Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

भाग २

श्री १०८ पं. सत्यदेवो वासिष्ठः

यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

महर्षिवेदव्यासप्रणीतस्य महाभारतस्यानुशासनपर्वण एकोनपञ्चाशदुत्तरैक शततमेऽध्याये कीर्तितस्य श्रीविष्णुसहस्रनामस्तोत्रस्य वेदप्रमाणोपवृंहितं श्रीविष्णुसहस्रनाम-सत्यभाष्यं श्री १०८ पं० सत्यदेववासिष्ठेन द्वादशवर्षैः पूरितम्। अस्मिन् भाष्ये श्रीविष्णुर्विश्वं व्यश्नुवानस्य ब्रह्मणः सूर्यस्य च पर्यायत्वेन गृहीतः। इत्थमाध्यात्मिकस्तरे विष्णुर्ब्रह्म, आधिदै- विकस्तरे च सूर्योऽस्ति। अस्मिन् भाष्ये ग्रन्थकर्तुर्वेद-वेदाङ्गानामायुर्वेदस्य लोकव्यवहारस्य च ज्ञानं सम्यक्तया प्रतिबिम्बितमास्ते। ग्रन्थकर्त्रा विश्वार्तिजिहीर्षयास्य सत्यभाष्यस्य रचना कृता-

न मे प्रयासोऽस्ति यशोऽधिगन्तुं
नार्थं तथा काममथापि कञ्चित्।
तथापि विश्वार्तिजिहीर्षयाहं
प्रावर्तिषीहातुलभाष्यकार्ये ।।

भाष्यस्वरूपं ग्रन्थकर्त्रैवं निर्दिष्टम्-"इदमत्र ज्ञेयं यदयं महर्षिवेदव्यासकृपातो लब्धस्वरूपो विष्णुसहस्रनामसङ्ग्रहो मया व्याख्यातस्तत्र प्रतिनाम यथोपयोगि व्याकरणं, नाम्नो व्याप्तिः, लोके तदनुकृतिः, शरीरेषु समन्वयः, तन्नाम्नः प्रमापयिता मन्त्रश्च सलोकोदाहरणं निर्दिष्टः।" १४५६ पृष्ठात्मके भागद्वयात्मके चास्मिन् ग्रन्थे भाष्यकर्तृपरिचयः, ग्रन्थरचनेतिहासः, विविधानि परिशिष्टानि च दीयन्ते। सत्यभाष्यान्तर्गतं श्रीविष्णुकाव्यम् पृथक्शः परिशिष्टरूपेण दीयते यद्धि गद्यात्मकस्य सत्यभाष्यस्य पद्यात्मकं निष्कृष्टं तत्त्वमस्ति। आर्षशैल्यां रचितमिदं सत्यभाष्यं संस्कृत-भाष्यपरम्परायां कामप्यपूर्वाममिख्यां दधाति।

मूल्यम् सम्पूर्णग्रन्थस्य रू०-११००.००
Price Full Set (Volumes 1&2)
Rs. 1100.00 (In India)
U.S. $ 45 (Abroad)
ISBN 81-900679-0-7 (Volumes 1&2)
ISBN 81-900679-2-3 (Volumes 2)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

भाग: २

श्री १०८ पं. सत्यदेवो वासिष्ठः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्-२

ŚRĪVIṢṆUSAHASRANĀMA-SATYABHĀṢYAM-2

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ओ३म्

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

{महाभारतानुशासनपर्वान्तर्गतस्य
श्रीविष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृंहितं
सत्यभाष्यम्}

द्वितीयो भागः
(उत्तरार्द्धम्)

भाष्यकर्ता

श्री १०८ पं० सत्यदेवो वासिष्ठः, साङ्गोपवेदवेदचतुष्टयी

भूतपूर्व-लवपुर-दिल्ली-भिवानीस्थ-सनातनधर्मायुर्वेद-महाविद्यालयीय
प्रधानाध्यापकः, गुरुकुलझज्झरस्यायुर्वेदविभागाध्यक्षश्च,
सामस्वरभास्करः, वेद - व्याकरण - निरुक्त -
छन्दः - साहित्य-ज्योतिषायुर्वेदाद्यनेक-
शास्त्रपारावारीणः
सत्याग्रहनीतिकाव्यस्य नाडीतत्त्वदर्शनस्य च प्रणेता

१९९९

संशोधितं नवीनं संस्करणम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णुसहस्रनाम-सत्यभाष्यम् (द्वितीयो भागः)

भाष्यकर्ता; वासिष्ठः, श्री १०८ पं० सत्यदेवः

प्रकाशकः

श्री १०८ पण्डितसत्यदेवो वासिष्ठः

देवसदनम्, महममार्गः, भिवानी-१२५०२१ (हरियाणा)

प्राप्तिस्थानम्

देवसदनम्,

महममार्गः, भिवानी-१२५०२१ (हरियाणा)

संस्करणम्

प्रथमं संस्करणम् १६६६

द्वितीयं मुद्रणम् १६८६

तृतीयं मुद्रणम् संशोधितं नवीनं संस्करणम् १६६६

मुद्रितानि प्रतिरूपाणि ११००

I.S.B.N. 81-900679-0-7 सम्पूर्णग्रन्थः (१–२)

I.S.B.N. 81-900679-2-3 द्वितीयो भागः

सर्वेऽधिकारा ग्रंथकाराधीनाः

अक्षरयोजनाकाराः

मोहित ग्राफिक्स

५३, बापू पार्क, कोटला मुबारकपुर, नई दिल्ली–११०००३

मुद्रकः

सिण्डिकेट बाइण्डर्स

(प्रिण्टर्स एण्ड बाइण्डर्स)

बी. १६७ ओखला औद्योगिक क्षेत्र, फेज–१ नई दिल्ली–११००२०

सम्पूर्णग्रन्थस्य मूल्यम् :

रू०–११००.०० (भारते), यू.एस.डालराः $ ४५ (विदेशेषु)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ŚRĪVIṢṆUSAHASRANĀMA SAṬYABHĀṢYAM

A COMMENTARY IN SANSKRIT LANGUAGE ON ŚRĪVIṢṆUSAHASRANĀMA-STOTRAM [VOL-2]

AUTHOR
SHRI 108 PT. SATYADEVA VASISHTHA
SANGOPAVEDAVEDACHATUSHTAYI
EX-Principal,Sanatan Dharm Ayurveda College,
Lahore, Delhi,Bhiwani
Ex.Head of the Department of Ayurveda,
Gurukul, Jhajjar
'Samasvarabhaskara'
Eminent Scholar of
Vedas,Vyakarana,Nirukta,Chhandas,Sahitya,Jyotish,Ayurveda
etc.
Author of
'Satyagrahanitikavyam'
and
'Naditattvadarshanam'

1996

NEW REVISED EDITION

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ŚRIVISNUSAHASRANĀMA SATYABHASYAM

A COMMENTARY IN SANSKRIT LANGUAGE ON ŚRĪVIṢṆUSAHASRANĀMA-STOTRAM

[VOL-2]

BY VASISHTHA, SHRI 108 PT. SATYA DEVA

Published by
Shri 108Pt.Satya Deva Vasishtha,
Devasadanam, Maharn Rood, Bhiwani Pin-125021

Available from
Devasadanam.
Maham Road,Bhiwani-125021[Haryana]INDIA

ALL RIGHTS ARE RESERVED WITH THE AUTHOR

I.S.B.N. 81-900679-0-7 full set [Volumes 1&2]
I.S.B.N. 81-900679-2-3 [Volume-2]

Edition
First Printing in 1969
Second Printing in 1986
Third Printing[New Revised Edition]in 1996

Copies Printed:1100.00

Price :Full Set (Vol.1&2) Rs.1100.00 (In INDIA) $-45 (ABROAD)

Type-Setting by
Mohit Graphics
53, Bapu Park, Kotla Mubarakpur,
New Delhi-110003

Printed by
Syndicate Binders
(Printers and Binders)
B-167,Okhla Industrial Area Phase-1,New Delhi-110020

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्पादक-मण्डलम्

प्रबन्धसम्पादकः

महेश कुमारः एम.ए. (आंग्लसाहित्ये), आइ.आर.एस.

उपप्रबन्धसम्पादकः

आनन्द कुमारः एम.ए. (आंग्लसाहित्ये), एल् एल्. बी.

●

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम.ए. (हिन्दी–संस्कृतयोः), पीएच.डी., साहित्याचार्यः, सांख्ययोगाचार्यः

सहसम्पादकः

पं० रत्नलाल शर्मा शास्त्री,

●

ग्रन्थसज्जा-परामर्शदाता

शरददत्तः, उपनिदेशकः, दिल्ली दूरदर्शनम्

अक्षरयोजना-परामर्शदाता

सुदर्शन कुमार मल्होत्रा, बी.ए., एल एल.बी.

आवरणचित्रकारः

नन्द कत्यालः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

Editorial Board

Managing Editor
Mahesh Kumar,M.A.[English Litt.],I.R.S.

Co Managing Editor
Anand Kumar,M.A.[English Litt.],LL.B

Editor-in-Chief
Dr. Rama Kant Shukla
M.A.[Hindi-Sanskrit],Ph.D.,Sahityacharya,
Sankhyayogacharya

Co Editor
Pt. Ratna Lal Sharma,Shastri

Production Advisor
Sharad Dutt
Deputy Director,Delhi Doordarshan

Type Setting Adviser
S.K.Malhotra, B.A., LL.B.

Cover Designer
Nand Katyal

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमः

प्रथमो भागः (पूर्वार्द्धम्)

	कृतिः	कर्त्ता	सुपर्णाङ्कः
१.	क्रमः		अ—आ
२.	सम्पादकीयम्		इ—ऋ
३.	अवतरणिका	श्री १०८ पं. सत्यदेवो वासिष्ठः	१— ६
४.	सहस्रनामसङ्ग्रहीतारं प्रति सत्य-भाष्यकृतः कृतज्ञताप्रकाशनम्	"	७—१०
५.	विष्णुसहस्रनामस्तोत्रस्य सत्यभाष्यकर्तुरात्मपरिचयः	"	११—१४
६.	श्री पं० सत्यदेव वासिष्ठ का संक्षिप्त परिचयः	पं० युधिष्ठिर मीमांसकः	१५—१८
७.	भाष्यकारविषयको मेऽनुभवः	पं० मुंशीराम शास्त्री	१९—२४
८.	विणुसहस्रनामस्तोत्रस्य माहात्म्यम्	पं० मुंशीराम शास्त्री	२५—३३
९.	विष्णुसहस्रनामस्तोत्रमधिकृत्य आत्रेयपुनर्वसोर्वचनम्	(चरकसंहितातः)	३४—३४
१०.	सत्यभाष्यकर्तुर्मङ्गलाचरणम्	श्री १०८ पं. सत्यदेवो वासिष्ठः	३५—३८
११.	भाष्यकर्तुरात्मभावप्रकाशनम्	"	३९—४०
१२.	भूमिकारूपाः पञ्चदश श्लोकाः	"	४१—४४
१३.	समाहात्म्यं साङ्गविन्यासञ्च श्रीविष्णुसहस्रनामस्तोत्रम्	महाभारतस्यानुशासनपर्वणः १४९ तमाध्यायात्	४५—५८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१४.	विष्णुसहस्रनामसत्यभाष्यम् (नामसंख्या १—५००)	श्री १०८ पं. सत्यदेवो वासिष्ठः	१-५७०
१५.	परिशिष्टम् (क) श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (१—५००)		क—न

द्वितीयो भागः (उत्तरार्द्धम्)

	कृतिः	कर्त्ता	सुपर्णाङ्कः
१६.	श्रीविष्णुसहस्रनाम-सत्यभाष्यम् (नामसंख्या ५००—१०००)	श्री १०८ पं. सत्यदेवो वासिष्ठः	५७१—१०३४
१७.	परिशिष्टानि (१—४)		१०३५—१०३८
	१. श्रीविष्णुसहस्रनाम्नां चतुर्थ्यन्तरूपाणि		१०३६—१०५०
	२. श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (१-१०००)		१०५१—१०८८
	३. श्री १०८ पं० सत्यदेव-वासिष्ठप्रणीतं श्रीविष्णु-काव्यम्		१०८६—१३३०
	४. श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (५०१-१०००)		१३३१—१३५०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ

श्रीविष्णुसहस्रनाम-सत्यभाष्यम्

(महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
श्रीविष्णुसहस्रनामस्तोत्रस्य श्री १०८ पं. सत्यदेव-वासिष्ठ-विरचितं वेदप्रमाणोपवृंहितं सत्यभाष्यम्)
उत्तरार्द्धम्
(नामसंख्या ५०१-१०००)

तत्र—

[१]*कपीन्द्रः—५०१*

कपिरिति—'कपि संचलने' भौवादिको धातुस्तस्मात्—इदिल्लक्षणो नुम् ***''कुण्ठि-कम्प्योर्नलोपश्च''*** (४।१४४) इत्युणादिसूत्रेण 'इः' प्रत्ययो नलोपश्च कपिः।

इन्द्र इति—'इदि परमैश्वर्ये' भौवादिको धातुस्तस्मात् ***''ऋज्रेन्द्राग्र''*** (२।२८) इत्याद्युणादिसूत्रेण 'रन्' प्रत्ययः, सांहितिको दीर्घश्च, कपीन्द्र इति।

कपीन्द्रः सर्वैश्वर्यशाली कम्प्राणां चलनशीलानां मध्ये। अथवा स एव सर्वेषां चलनशीलानां चलनशक्तिसमर्पको गतिद इति। सूर्यादयो ग्रहा अन्ये वा गतिमन्तस्तस्मादेव परमेश्वरात् लब्धशक्तयो गमने चलने प्रभवन्ति, न तेषां गतिशक्तिः स्वकीया, अतः सः कपीन्द्र उच्यते। दृश्यते च लोकेऽपि—यावदात्मा शरीरस्य सञ्चालकस्तावत्सर्वं शरीरोपकरणभूतं रसरक्तादिधातूपधातवो, मलोपमलाश्च युगपद् भ्रमन्ति, एवं भगवान् ब्रह्माण्डाङ्गभूतमिदं भ्रमयत्यतः कपीन्द्रः। मन्त्रलिङ्गञ्च—

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव। ऋक् ५।५१।१५।।

---

१. विष्णुसहस्रनामस्तोत्रस्य षष्टि(६६)तमेऽस्मिन् श्लोके ५०१-५०२ संख्याके नामनी परिगणिते

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद् भोक्ता कपीन्द्रो भूरिदक्षिणः।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथेमे द्यावापृथिवी सद्यः पर्येति सूर्यः । अथर्व ६।८।३।।
सूर्य एकाकी चरति चन्द्रमा जायते पुनः । यजुः २३।१० इत्यादि।

भवति चात्रास्माकम्—

नूनं कपीन्द्रः स हि विष्णुरेकः
कल्पान्तवासाय मनो दधानः ।
सूर्यादिकान् सर्वनिजोपकार्यान्
सम्भ्रामयन् कल्पमिदं वितस्थौ।।७२४।।

सर्वनिजोपकार्यान्—सर्वान् ग्रहोपग्रहसमेतान् तेषां कार्यांश्च। तद्यथा—सूर्यो दृश्यगणितानुसारं राशितो राशिषु सङ्क्रमते, तथाऽऽत्मापि देहाद्देहान्तरं सङ्क्रमते दृश्यते च प्रत्यक्षम्। चन्द्रमा गोतमः—शीघ्रगमनः सन् मनोऽपि स्वकार्यं गतिमत् कुरुते। पृथिवी भ्रमति देहोऽपि जन्ममृत्योर्भ्रमति, प्राधान्येन पृथिवीविकारत्वाच्छरीरस्य। एवं बहुत्र योजनीयं विज्ञैः।

वितस्थौ=विविधैरुपकरणैः तस्थौ=स्थापयामासेति=अन्तर्भावितण्यर्थः।

भूरिदक्षिणः—५०२

भूरिरिति—'भू सत्तायाम्' भौवादिको धातुस्तस्मात् ***"अदिशदिभूशुभिभ्यः क्रिन्"*** (४।६५) इत्युणादिः क्रिन् प्रत्ययः। कित्त्वाद् गुणाभावः ***"श्र्युकः किति"*** (पा० ७।२।११) इतीण्निषेधः, भवतीति भूरिः।

दक्षिणः—'दक्ष वृद्धौ शीघ्रार्थे च' भौवादिको धातुस्तस्मात् ***"द्रुदक्षिभ्यामिनन्"*** (२।५०) इतीनन् प्रत्ययः, णत्वम्। ततः—स्त्रियामभिधेयायां ***"अजाद्यतष्टाप्"*** (पा० ४।१।४) सूत्रेण 'टाप्' प्रत्ययः दीर्घः। एवं दक्षिणाशब्दः सिद्धः। भूरिः=भूयसी दक्षिणा यस्येति बहुव्रीहिसमासे ***"गोस्त्रियोरुपसर्जनस्य"*** (पा० १।२।४८) इति ह्रस्वः, भूरिदक्षिणः। यो भवति वर्धयति, शीघ्रं गमयति च, स भूरिदक्षिणः। भगवतः सर्वव्यापकस्य विष्णोर्नाम। लोकेऽपि च दृश्यते, जीवन्तं वर्धयति शीघ्रं कार्येषु नियोजयति च। यथा पक्षिणः फलं जातमात्रं पक्वापक्वविचारमन्तरैव भक्षित्वा स्वकं जीवनं रक्षन्ति। जातमात्रो बालो रोदनादिषु प्रवर्तते, पशवो गमनादिषु प्रवर्तन्ते। यदेतद्दृश्यं दृशा दृश्यते, तत्सर्वं तस्यैव सर्वव्यापकस्य विष्णोरनुकरणम्।

भवति चात्रास्माकम्—

सन्तं चरन्तं स हि विष्णुरेको
वृद्ध्याथ शैघ्र्येण युनक्ति नूनम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्यानुमानं प्रपदं हि दृश्यम्
भूरिः स उक्तः खलु दक्षिणान्तः।।७२५।।

मन्त्रलिङ्गञ्च—"**नाक्षस्तप्यते भूरि भारः।**" ऋक् १।१६४।१३।।

❖ ❖ ❖

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः।।६७।।

५०३ सोमपः, ५०४ अमृतपः, ५०५ सोमः, ५०६ पुरुजित्, ५०७ पुरुसत्तमः। ५०८ विनयः, ५०६ जयः, ५१० सत्यसन्धः, ५११ दाशार्हः, ५१२ सात्वतां पतिः।

सोमपः—५०३

सोमः—'षुञ् अभिषवे' सौवादिको धातुस्तस्मात् ***"अर्त्तिस्तुसुहु"*** (१।१४०) इत्याद्युणादिसूत्रेण 'मन्' प्रत्ययः, धात्वादेः षकारस्य सकारः, गुणः, सोमः। सोमरूपे कर्मण्युपपदे 'पा पाने' धातोः ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) सूत्रेण 'कः' प्रत्ययः, तस्मिन् परतः ***"आतो लोप इटि च"*** (पा० ६।४।६४) इत्याल्लोपः, सोमपः। सोमपः सूर्यो विष्णुश्च, सोमपो हि विष्णुः, सर्वत्र स्वसोमपानरूपेण गुणेन व्याप्तः। यथा—मनुष्यो निरामिषाश्च पशवो जलपानसमये पूर्वं प्राणेन मुखे जलमाकर्षन्ति, ततः प्राणेनान्तः प्रापयन्ति क्षिपन्ति वा, एवं सूर्यः, सोमं जलमाकृष्यान्तरिक्षे आपूरयति, पुनर्मेघैः पृथिवीं सिञ्चति। एवञ्चेह विष्णुरेव सोमपशब्देन गृह्यते, तस्य वेवेष्टित्वरूपधर्मं प्रदर्शयितुम्। सोमविषये चास्मद्व्याख्यानम्—

जीवनीयं भवेत् यद् यत्तत् सर्वं सोम उच्यते ।
एतावानेव सोमार्थो लोके वेदे व्यवस्थितः ।।
आपः सोमः शशी सोमो मनः सोमोऽपि तद्वशात्।
धात्वोजोऽपि स्मृतः सोमः 'सोमो गौरी अधि श्रितः'[1]।।
अग्निषोमौ हि सर्वस्य विश्वस्य विश्वदक्षिणौ ।
अग्निरुत्तरमाख्यातं, सोमो वा दक्षिणायनम् ।।
अग्निषोमीयमाख्यातं विश्वं दृश्यं चराचरम् ।
अग्निर्हिमस्य वह्नेस्तु भेषजं परिकल्पितम् ।।

---

१. **सोमो गौरी अधिश्रितः** (ऋ० ६।१२।३) गौरी=सूर्यः। आत्मा शरीरे सूर्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निर्हिमस्य भेषजम् (यजुः २३।१०) अत्रानुसन्धेयम्।

अग्निर्नारी पुमान् सोमः ताभ्यां जातोऽग्निषोमकः।
बीजे द्वैधं हि दृश्यं यत् तद् रूपञ्चाग्निषोमयोः ।।
एवं वेत्ति च यो लोकं वेदं वेत्ति स बुद्धिमान् ।
सूर्यो निहन्ति सोमांशमग्नेरंशं तु चन्द्रमाः ।। (बृहद्देवता)

भवति चात्रास्माकम्—

स सोमपो भानुरनागसो वा
नियन्त्रितः सोमपमाह विष्णुम् ।
अन्नं स लोकाय ददाति सोमं
धाराप्रपातेन पृथग् धरांशे ।।७२६।।

धरांशे=भूखंडे। भूमौ पृथक्–पृथक् स्थितेषु जनपदेषु।

अमृतपः—५०४

अमृतप इति—'मृङ् प्राणत्यागे' भौवादिकाद्धातोः ***"तनिमृङ्भ्यां किच्च"*** (३।८८) इत्युणादिसूत्रेण तन् प्रत्ययः किच्च। कित्त्वाद् गुणाभावः। अनिडयं धातुः। नञ्समासे नञो नकारलोपो 'अमृतम्'। तत् पिबतीति 'अमृतपः'। सर्वं पूर्ववज्ज्ञेयम्।

अमृतं=जलं=सोमो वा, न म्रियत इत्यमृतं जलं सद्रूपं नश्यतीत्यर्थः।

मन्त्रलिङ्गञ्च—**"यस्य छायामृतम्"**। ऋक् १०।१२१।२।।

भवति चात्रास्माकम्—

छाया यथा छायिनि नित्यसंस्था
तथामृतं पीतमिवास्ति सूर्ये ।
विष्णुर्व्यवस्थां कुरुते यतोऽत-
स्तेनैव नाम्नाऽमृतपः स उक्तः।।७२७।।

सोमः—५०५

सोमः—शब्दोऽयं व्युत्पादितः प्राक् 'सोमप' नाम व्याख्याने। तथा च—

आपः सोमः शशी सोमो मनः सोमोऽपि तद्वशात्।
विष्णुः सोमस्वरूपत्वात् स वै सोम उदाहृतः।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

सोम रारन्धि नो हृदि गावो न यवसेष्वा। मर्य इव स्व ओक्ये।।

ऋक् १।९१।१३।।

ओको=गृहम्=तत्र भवमोक्यं, तस्मिन् कक्षादिके। तथा च—

तद्वायुस्तदु चन्द्रमाः। तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।

यजुः ३१।१।।

आपः=सोमः। आप्यो वा सोमः। सोम्या वा आपः।

भवति चात्रास्माकम्—

सोमः स विष्णुः कथितः पुराणैः
शान्ता भवन्त्येव तु तं विदित्वा।
यो वेत्ति लोके विततं हि सोमं
स एव देहस्य च वेत्ति सोमम् ।।७२८।।

पुरुजित्—५०६

पुरुजिदिति—पुरुशब्दो बहुशब्दपर्यायः। 'पृ पालनपूरणयो' रिति जौहोत्यादिको धातुस्तस्मात् ***''पृभिदिव्यधिगृधिधृषिभ्यश्च''*** (१।२३) इत्युणादिना 'कुः' प्रत्ययः। ***''उदोष्ठ्यपूर्वस्य''*** (पा० ७।१।१०२) इत्यनेन उत्, रपरश्च, ऋकारस्य। कित्त्वाद् गुणाभावः, पुरुः। एतदुपपदात् 'जि जये' भौवादिकाद्धातोः क्विप्, तुक्, गुणाभावश्च, पुरून्=बहून् जयतीति पुरुजित्।

असंख्याततताराग्रहोपग्रहसहितं तथा वनोपवनसमुद्रादिसहितं खगोलभूगोलात्मकं सर्वं विश्वं येन वशीकृतं स पुरुजिद् विष्णुः। लोकेऽपि दृश्यते, मनस्सहायक आत्मा स्वाभीष्टसिद्ध्यै सर्वं शरीरं स्वायत्तं कुरुते। नहि जीवात्मन इच्छामन्तरा स्वेच्छयेन्द्रियाणि प्रवर्तन्ते कर्मसु। एवमात्मापि पुरुजित्, मनोजिद्, इन्द्रियजित्, शरीरजिदित्यादिनामभिः स्तुत्यो भवति।

मन्त्रलिङ्गञ्च—

वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे। ऋक् १।५।२।६।।

भवति चात्रास्माकम्—

स विष्णुरेकः पुरुजित् पुराणः
विश्वं समस्तं कुरुते वशं सः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मापि तद्वत् पुरुजिन्मनोजित्
सिद्धोऽथ सिद्धैर्बहुधोपगीतः ।।७२६।।

पुरुसत्तमः—५०७

पुरुसत्तमः—'पुरु' शब्दः 'सत्' शब्दश्च व्युत्पादितौ प्राक्। सच्छब्दात् तमबातिशायनिकः। पुरुषु बहुषु सत्तावत्सु योऽतिशयेन सत्तावान् स पुरुसत्तमः अविनाशीत्यर्थः। स च स्वसत्तालक्षणेन गुणेन सर्वत्र व्याप्तः। तद्यथा—पुरूणि नक्षत्राणि, पुरूणि शरीराणि, तेषु सत्तां जहत्सु विनश्यत्स्वपि कल्पान्तं स्थित्वा, भगवान् स्वसत्तालक्षणं धर्मं न त्यजति। तथा च—यथा बहुषु घटेषु नश्यत्स्वपि, कुम्भकारो न नश्यति। कुम्भकुम्भकारयोरुदाहरणं केवलं कुम्भकारस्य घटापेक्षया सत्तमत्वप्रदर्शनार्थम्। एवं सर्वत्रोहनीयम्।

भवति चात्रास्माकम्—

सत्ता हि सर्वस्य विनाशलीला
योऽतीत्य सर्वं न जहाति सत्ताम्।
स एव लोके कथितः पुराणैः
शब्देन विष्णुः पुरुसत्तमेन ।।७३०।।

मन्त्रलिङ्गञ्च—

यस्य छायामृतम्। ऋक् १०।१२१।२।। **न कुतश्चनोनः**। अथर्व १०।८।४४।

विनयः—५०८

विनय इति—विपूर्वको 'णीञ् प्रापणे' धातुस्तस्मात् अकर्तरि कारकेऽधिकारे **"एरच्"** (पा० ३।३।५६) सूत्रेण कर्मण्यच् प्रत्ययो गुणोऽयादेशश्च, विनय इति। एवञ्च विशेषेण नीयते प्राप्यते तत्तल्लक्षणैर्व्यापकत्वात् स विनयः। करणे वा 'अच्' प्रत्ययः, विशेषेण नीयते व्यवस्थाप्यते जगद्येन स विनयो विष्णुः। चतुर्धा वा कल्पितं पुरुषं बहुधा विकल्प्य तस्य यथाव्यवस्थं नेता। तद्यथा लोके—शरीरमिदं चतुर्धा विभक्तं—जत्रोरूर्ध्वभाग उत्तमाङ्गम्, भगास्थ्नः स्कन्धास्थ्यन्तभागो मध्यमाङ्गम्, शाखे बाहू द्वौ, जङ्घे द्वे। तदुक्तमृचा **"एकं विचक्र चमसं चतुर्धा"** (ऋ० ४।३५।२)। चमसं शरीरं चम्यन्ते भोगा अत्रेति। तत्र च पुनर्विविधानि प्रत्यङ्गानि कृतानि दृश्यन्ते। एतत्तस्य विष्णोरनुकरणं सर्वम्। एवं सर्वत्रोहनीयम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गम्—

स संनयः स विनयः पुरोहितः स सुष्टुतः स युधि ब्रह्मणस्पतिः।

ऋक् (२।२४।८)।।

भवति चात्रास्माकम्—

स शम्भुरेको विनयः पुराणः
स एव वैविध्यविभक्तविश्वः ।
तस्यानुगानं सुमनाः सुमेधाः
करोति नित्यं कविधर्ममाप्तः।।७३१।।

वैविध्येन=विविधं विभक्तं विश्वं येन सः।

जयः—५०६

जय इति—'जि जये' धातुस्तस्माद् भावेऽच् प्रत्ययः ***"एरच्"*** (पा० ३।३।५६) इत्यनेन। तस्मान्मत्वर्थीयेऽचि च जय उत्कृष्टः सर्वस्य जेतेत्यर्थः।

मन्त्रलिङ्गम्—

बह्वीनां पिता बहुरस्य पुत्रश्चिश्चा कृणोति समनावगत्य ।
इषुधिः सङ्काः पृतनाश्च सर्वाः पृष्ठे निनद्धो जयति प्रसूतः।।

ऋक् ६।७५।५।।

भवति चात्रास्माकम्—

जयः स विष्णुः स हि सर्वयातः
स एव सर्वान् प्रपुनाति लोके।
जयः स सूर्यः पृतनेव सर्वा-
ञ्जयत्यतः सर्वजयो जयः सः।।७३२।।

सत्यसन्धः—५१०

सत्यम्—सच्छब्दः शत्रन्तो व्युत्पादितः प्राक्। तस्माच्च "तत्र साधुः" इति यत्प्रत्ययः, सत्सु साधुः सत्यम्। सन्धा—समुपसर्गपूर्वो "डुधाञ् धारणपोषणयोः" धातुर्जौहोत्यादिकः। तस्मात् स्त्रियां भावे ***"आतश्चोपसर्गे"*** (पा० ३।३।१०६) सूत्रेण 'अङ्' प्रत्ययः, आतो लोपः ***"अजाद्यतष्टाप्"*** (पा० ४।१।४) इति टाप्। सत्या सन्धा यस्येति बहुव्रीहौ ***"गोस्त्रियोरुपसर्जनस्य"*** (पा० १।२।४८)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्युपसर्जनह्रस्वः सत्यसन्धः। सत्या सन्धा प्रतिज्ञा यस्य स सत्यसन्धो विष्णुः।

सच्चिदानन्दरूपः स स्वयम्भूः, सत्या प्रकृत्या यथाभिमतं कल्पानुकल्पं सर्वं दधाति, यावदायुश्च सकलं विश्वं पुष्णाति। प्रतिज्ञा हि नाम स्वाभिमतस्य साधनाय प्रतिज्ञानं दृढं वचनं सावधानता वा। लोकेऽपि मनुष्यः सन्तं दधद् तन्माध्यमेनोपादानभूतेनाभिमतानि वस्तूनि निर्मिमीते।

भवति चात्रास्माकम्—

स सत्यसन्धो भगवान् वरेण्यः
सत्येन विश्वं परितो दधाति।
एषा हि तस्यास्ति च सत्यसन्धा
सोऽहं पुरा योऽस्मि सुते वदामि।।७३३।।

मन्त्रलिङ्गम्—

अहं सो अस्मि यः पुरा सुते वदामि कानिचित् ।
तं मा व्यन्त्याध्यो३वृको न तृष्णजं मृगं वित्तं मे अस्य रोदसी।।

ऋक् १।१०५।७।।

दाशार्हः—५११

दाशार्ह इति—'दाशु दाने' भौवादिको धातुस्तस्येदं रूपं ***"दाशगोघ्नौ सम्प्रदाने"*** (पा० ३।४।७३) इति सम्प्रदाने निपात्यते। "दाशन्ति तस्मै" इति दाशः। 'अर्ह पूजायां' भौवादिको धातुस्तस्माद् ***"अजपि सर्वधातुभ्यः"*** (वा० ३।१।१३४) इत्यचि अर्हतीत्यर्हः। दाशश्चासावर्हः दाशार्हो विष्णुः। यद्वा दाशनं दाशो भावे घञ्, तत्कर्मण्युपपदेऽर्हतेः ***"अर्हः"*** (पा० ३।२।१२) इत्यच्, दाशं दानमर्हतीति दाशार्हः।

लोके ह्येतद्दृश्यते—किञ्चिद्रपि वस्तुरूपं मुद्रारूपं वा धनं यदि कस्मैचित्पूज्याय दीयते, तदा स तेन पूजितमात्मानं मन्यमानो दाशार्हस्वरूपं बिभ्रद्, दातारमाशिषा योजयति भूयस्या। अमुथैव भगवान् विष्णुः सूर्यो वा, पूजां निमित्तीकृत्य दातारं शुभाशिषा युनक्ति, प्रयच्छति तस्मै सतीं मतिं, प्रचोदयति च तस्य बुद्धिं सत्कर्मणि।

मन्त्रलिङ्गम्—

अहं दाशुषे वि भजामि भोजनम् । ऋक् १०।४८।१।।
शतहस्त समाहर सहस्रहस्त सङ्किर। अथर्व ३।२४।५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम।

ऋक् १।८६।१; यजुः ४०।१६।।

तमिन्द्रं जोहवीमि मघवानमुग्रं सत्रा दधानमप्रतिष्कुतं श्रवांसि भूरि।
मंहिष्ठो गीर्भिरा च यज्ञिया वर्त्तत राये नो विश्वा सुपथा कृणोतु वज्री।

साम पू० प्र० ५, दशतिः ८, मन्त्रः ४।।

भवति चात्रास्माकम्—

उक्तः स दाशार्हपदेन विष्णुः
स एव दात्रे प्रददाति भोज्यम्।
शुभाशिषा तञ्च युनक्ति भूम्ना
तमेव मर्त्या बहुधा नमन्ति।।७३४।।

सात्वतां पतिः—५१२

सत् शब्दः—'अस् भुवि' धातोर्वर्तमाने लटि, लटः शतरि च व्युत्पादितः प्राक्। ततः ***''तदस्यास्त्यस्मिन्निति मतुप्''*** (पा० ५।२।९४) सूत्रेण मतुप् प्रत्ययः। ***''तसौ मत्वर्थे''*** (पा० १।४।१९) सूत्रेण तान्तस्य भत्वाज्जशत्वाभावः। ***''झयः''*** (पा० ८।२।१०) सूत्रेण मतुपो मकारस्य वकारः। **''इन्द्रो मरुत्वान्''** (ऋ० ३।४।६) इत्यत्रेव। सत्वत्-शब्दस्य ताद्धितत्वात् प्रातिपदिकसंज्ञा, ततः सुबाद्युत्पत्तिः षष्ठीसमर्थाच्च तस्मात् ***''तस्येदम्''*** (पा० ४।३।१२०) सूत्रेण सम्बन्धसामान्ये 'अण्' प्रत्ययः ***''तद्धितेष्वचामादेः''*** (पा० ७।२।११७) सूत्रेणादिवृद्धिः सात्वतमिति। ततः सात्वतशब्दात् ***''तत्करोति तदाचष्टे''*** इति चुरादिगणसूत्रेण करोत्यर्थे आचष्ट इत्यर्थे वा णिच् प्रत्ययः। ***''णाविष्ठवत्प्रातिपदिकस्य''*** इति (पा० ६।४।१५५) सूत्रवार्तिकेनेष्ठवद् भावत्वात् अकाररूपटेर्लोपः, 'सात्वति' इत्यस्य ***''सनाद्यन्ता धातवः''*** (पा० ३।१।३२) इत्येन धातुसंज्ञा, ***''क्विप् च''*** (पा० ३।२।७६) सूत्रेण क्विप् प्रत्ययः, क्विपि णेर्लोपः, क्विपः सर्वापहारः। कृदन्तत्वात्प्रातिपदिकसंज्ञा, ततः सात्वदिति प्रातिपदिकात् षष्ठी विभक्तिः।

यद्वा, सातिर्हेतुमण्ण्यन्तः सौत्रो धातुस्तस्मात्क्विप्, क्विपि णेर्लोपः, क्विपश्च सर्वापहारः, सात् शब्दान्मतुप्, तान्तस्य भसंज्ञा, जशत्वाभावः ***''झयः''*** (पा० ८।२।१०) मकारस्य वकारः। प्रातिपदिकसंज्ञा, षष्ठी विभक्तिः, सात्वतामिति।

पतिः—पातेरुणादिडतौ व्युत्पादितचरः।

मनो हि सत्तावदक्षरममृतं वा। मन्त्रलिङ्गञ्च **''इमानि यानि पञ्चेन्द्रियाणि**

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनःषष्ठानि मे हृदि। अथर्व १६।६।५।। एतेन मनस इन्द्रियत्वं सिद्धम्। **''यज्ज्योतिरन्तरमृतं प्रजासु।''** यजुः ३४।३।। **''....परिगृहीतममृतेन्न सर्वं ... तन्मे मनः शिवसङ्कल्पमस्तु।''** यजुः ३४।४।। **''हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसङ्कल्पमस्तु।''** यजुः ३४।६।। मनसस्पतिश्च विष्णुः सूर्यो वा। मन्त्रलिङ्गञ्च—**''अपेहि मनसस्पतेऽपक्राम परश्चर। परो निर्ऋत्या आचक्ष्व बहुधा जीवतो मनः।''** ऋक् १०।१६४।१।। अथर्वणि (२०।६६) यक्ष्मासूक्तेऽपि चायं मन्त्रः।

प्रसङ्गप्राप्तं किञ्चिदुच्यते—

तत्रैव चास्यौषधम्—**''सहस्राक्षेण[1] शतवीर्येण[1] शतायुषा[1] हविषाऽहार्षमेनम्।''** अथर्व २०।६६।८।।

उक्तञ्चान्यत्र—**शतवारो अनीनशत् यक्ष्मान् रक्षांति तेजसः। आरोहन् वर्चसा सह मणिर्दुर्णामचातनः।** अथर्व १६।३६।१।। एतद्विषयकं सर्वं सूक्तमेव। आयुर्वेदीयार्षसंहितासु शतावरीविकल्पनोपेतमभिमतौषधसिद्धं घृतं, पुनः पुनस्तेनैव विधिना पाचितं वीर्यवत्तरं वीर्यवत्तमञ्च भवति। अस्माभिः परीक्षितं रमणीयमेतद् घृतपरिपाककर्म। आयुर्वेदानूचानोऽहं लब्धोपाधिकः। चरकोऽनुशास्ति घृततैलानां पाकं सहस्रपाकान्तं यावत् तत्रैव द्रष्टव्यं कणेहत्य।

भवन्ति चात्रास्माकम्—

स सात्वतानां पतिरस्ति लोके
स एव जीवान् मनसा युनक्ति।
मनस्तरङ्गान् विषमान् समान् वा
अपां समत्वेन तदोपयाति ।।७३५।।

शुभोर्मिमत्स्यान्मन आत्मसंस्थं
जीवः स्वयं प्रार्थयतेऽतिमन्त्रैः ।
मनो जविष्ठं विविधेऽप्सु[2] तच्च
[3]जीवैरनेकैः पुरुषं स शास्ति ।।७३६।।

मनसां बहुविधत्वे हेतुः—

नक्षत्रभेदादुत पादभेदात्
भस्यांशभेदादुत दृष्टिभेदात् ।

१. शतावरी तद् घृतञ्च। २. अप्सु कर्मसु ३. प्रतिशरीरं मनो भिन्नं—भिन्नं सत् शक्तिमीहाञ्च भिन्नां—भिन्नां स्वात्मनि स्थापयति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थानस्य भेदाद् गतिभेदभेदात्
कालस्य शुक्रस्य च लभ्यभेदात् ।।७३७।।

१. नक्षत्रचरणभेदात् ।
२. ग्रहाणामंशांशानां भेदात् ।
३. स्थानभेदात्—स्थानं=भावः ।
४. ऊर्ध्वाधःतिर्यग्रूपगतिभेदात् ।
५. ऋतूनां भेदात् ।
६. दोषदूषितभेदात् ।
७. पुंस्त्रीनपुंसकभेदात् ।

मनोनदी रूपमयी दुरन्ता
जीवेषु सर्वत्र तरङ्गिणी सा ।
विश्वं ह्यनन्तेषु गमेषु गन्तुं
[1]प्रकाशछन्नं कुरुते समग्रम् ।।७३८।।

दुरन्तपाराममृतां नदीं यो
नियम्य विश्वं परिपाति सम्यक् ।
स सात्वतामत्र पतिर्महात्मा
ज्ञाने समास्थाप्य भवत्यलिङ्गः[2] ।।७३९।।

एवं हि यो वेत्ति महेशमेनं
चराचरे व्याप्तमचिन्त्यवीर्यम् ।
स सात्वतानां पतिमेव पश्यन्
न क्लेशमायाति न चैति हर्षम् ।।७४०।।

सातिः सुखार्थकः सौत्रो धातुस्ततो निष्पन्नं सात्वच्छब्दं लक्षीकृत्य—

आनन्दसिन्धुर्भगवान् स्वयम्भूः
पिपर्ति तान् ये सुखयन्ति जीवान् ।
स सात्वतां चास्ति पतिर्यतोऽतः
[3]तत्रार्पयन्त्येव कृतं स्वकर्म ।।७४१।।

१. प्रकाशं—व्यक्तम् । २. नास्ति लिङ्गं चिह्नं यस्य सोऽलिङ्गः । ३. तत्र=ब्रह्मणि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं हि यो लौकिककर्ममग्नो
दिवानिशं [१]कार्मणमातनोति ।
कर्माणि लिम्पन्ति न कारकं तं
स एव शेते गतभीरलिप्सुः ।।७४२।।

निराशीः कर्मसंयुक्तान् सात्वतांश्चाप्यकल्पयन्।
सात्वतज्ञानद्रष्टाऽहं सत्वतः सात्त्विकीपते।।७४३।।

क्वचित्सात्वतीपते पाठः।

सत्त्वगुणप्रधानं सात्वतं कर्म ज्ञानं वा।

यत्तूक्तं—सत् प्रकृतिः—

यो दृश्यमेतत्पुरुषस्य काव्यं
समीक्षते नित्यमतन्द्रितः सन् ।
ज्ञातुं स शक्नोति विभक्तरूपां
विचित्रचित्रां प्रकृतिं त्रिरूपाम्[२] ।।७४४।।

तां योऽविभक्तां कुरुते विभक्तां
स एव लोके पतिरस्ति तस्याः ।
एवं दृशा पश्यति योऽत्र मर्त्यः
स सात्वतानां पतिमेति पश्यन् ।।७४५।।

सत्=ब्रह्म तदधिकृत्य—

स सात्वतान् संयममात्रनिष्ठान्
यथार्हभोगेन युनक्ति काले ।
पतिर्यतोऽसौ सकलस्य लोके
कुतो न पायान्निजसात्वतान् सः।।७४६।।

❖ ❖ ❖

१. कर्मणां समूहः, 'तस्य समूहः' (पा० ४।२।३७) इत्यण्; २. सत्त्वरजस्तमोमयीम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः ।।६८।।

५१३ जीवः, ५१४ विनयिता साक्षी, ५१५ मुकुन्दः, ५१६ अमितविक्रमः। ५१७ अम्भोनिधिः, ५१८ अनन्तात्मा, ५१६ महोदधिशयः, ५२० अन्तकः।

जीवः—५१३

जीव इति—'जीव प्राणधारणे' भौवादिकाद्धातोर्णिच्, ततः पचाद्यच् ततो णेर्लोपः। जीवयति प्राणान् धारयतीति जीवः। जीवानां प्राणधारणकारणमित्यर्थः। सकलं विश्वं परस्परसाहाय्यापेक्षं जीवति। एषा च पारस्परिक्यपेक्षा जीवने हेतुत्वमापन्ना, स्वगुणेन जीवनकारणभूतेन सकलं व्याप्नुवन्तं भगवन्तं जीवनामानं विष्णुं कार्त्स्न्येन व्यनक्ति। लोकेऽपि दृश्यते—जीवो जीवस्य जीवनमिति। ओषधयोऽपि जीवयन्तीति जीवनाम्नोच्यन्ते, ता हि प्राणानां दाने समर्थाः। तद्यथा पशवस्तृणानि भुक्त्वा जीवन्ति, मत्स्या अन्ये वा जलजन्तवः स्वतो लघून् जलजन्तून् स्वजीवनहेतुतामापादयन्ति। मत्स्याश्च जीवनीयं त्वचैवाददते, यतो हि तेषां कफोढौ=फुफ्फुसौ न भवतः। फुफ्फुसयोः कफोढवाच्यत्वे लिङ्गम्—**"कति कफोढौ"** (अथर्व १०।२।४) इति मन्त्रम्। मण्डूकस्त्वचा कफोढाभ्याञ्च जीवति। अथवैवं वक्तुं शक्यते गौण्या वृत्त्या—गुरुः शिष्येण, शिष्यश्च गुरुणा जीवति। भार्या पतिसहाया पतिश्च भार्यासहायो जीवति। स्वजीवने=सद्भावे दक्षिणायनमुत्तरायणम्, उत्तरायणञ्च दक्षिणायनमपेक्षते। मूलञ्चास्य चन्द्रसूर्ययोर्जीवकत्वेन सद्भावः। तत्र मन्त्रलिङ्गम्—***"द्वे ते चक्रे।"*** ऋक् १०।८५।१६।। तथा—

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम्।
विश्वान्यन्यो भुवनाभिचष्ट ऋतूँरन्यो विदधज्जायते पुनः ।।

ऋक् १०।८५।१८।।

नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम् ।
भागं देवेभ्यो विदधात्यायन् प्र चन्द्रमा तिरते दीर्घमायुः।।

ऋक् १०।८५।१६।।

चन्द्रमाः स्वकलावृद्धिक्षययुक्तः सन् नवो नवो भवन्नुदेति इति ध्वनितोऽर्थः। सुषुम्णानामकः सूर्यरश्मिश्च चन्द्रमसं प्रकाशयति—**"सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः।"** (यजुः १८।४०) इत्यादि मन्त्रात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्यच्च मन्त्रलिङ्गम्—

इमं जीवेभ्यः परिधिं ददामि। ऋक् १० ।१६१ ।१।

मुञ्चामि त्वा हविषा जीवनाय कमज्ञातयक्ष्मादुत राजयक्ष्मात्।
ऋक् १० ।१६१ ।१।

शतं जीव शरदो वर्धमानः शतं हेमन्ताञ्छतमु वसन्तान् ।
शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः।।
ऋक् १० ।१६१ ।४ ।।

जीवेम शरदः शतम्। यजुः ३६ ।१५ ।।

जिजीविषेत् शत ँसमाः। यजुः ४० ।२ ।। इत्यादि।

निदर्शनमात्रमुक्तं, बहुकृत्वः प्रयुक्तो जीवधातुर्वेदे।

भवति चात्रास्माकम्—

जीवः स विष्णुर्मिथुनेन विश्वं
चराचरं जीवयति प्रसह्य ।
तेनैव चक्रे विहिते ह दृश्ये
सूर्यस्ततश्चन्द्र उ जायते वा।।७४७।।

मन्त्रलिङ्गम्—

सूर्य एकाकी चरति चन्द्रमा जायते पुनः। यजुः २३ ।१० ।।

विनयिता साक्षी—५१४

विनयितेति—विपूर्वः 'णय गतौ' धातुर्भौवादिकः ***"णो नः"*** (पा० ६ ।१ ।६३) इति नकारः, तस्मात् तृच् प्रत्ययः कृत्, तत इट्, ततश्चानङादि, विनयिता। सर्वस्य जगतो गतिं प्रापयिता गतेर्दातेत्यर्थः। यथा विद्युत् स्वशक्त्या यन्त्रं गमयति गतिं प्रापयति, यथैवायं सूर्यः सकलस्य विनयिता, गतिं प्रापयिता=सञ्चालक इत्यर्थः। ननु सूर्यो जगद् गमयति, 'किन्तु सूर्यस्य को नाम गमक इति प्रश्ने भगवान् विष्णुरेव सूर्यं, सूर्येण च जगद् गमयति, इत्युत्तरम्। मन्त्रलिङ्गञ्च—"एष हितो विनीयतेऽन्तः शुभ्रावता यथा। यदी तुञ्जन्ति भूर्णयः।" ऋक् ६ ।१५ ।३ ।।

णय गतौ, णीञ् प्रापणे, द्वयोरपि गतिरर्थः, किन्तु विनयिता सेटो नयतेरेव न नीयतेरनिट्त्वात्। अर्थे तु न भेदः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स एव विष्णुर्गमयन् समस्तं
[1]जगज्जगत्यां कुरुते ह्यपारम् ।
तत्रापि वैविध्यमनक्ति योऽसौ
गते 'विं' धर्ता=नयिताऽस्ति विष्णुः ।।७४८।।

साक्षी नाम साक्षाद् द्रष्टा, साक्षादिति अव्ययात् ***"साक्षाद् द्रष्टरि सञ्ज्ञायाम्"*** (पा० ५।२।९१) सूत्रेण ताद्धित इनिः प्रत्ययः। ***अव्ययानां भमात्रे टिलोपो वक्तव्य इति*** (पा० ६।४।३५५। सूत्रस्थ) वार्तिकेन टिलोपः, इन्नन्तलक्षणो दीर्घः साक्षी।

मन्त्रलिङ्गम्—

आ देवो याति भुवनानि पश्यन्। ऋक् १।३५।२।।

भवति चात्रास्माकम्—

साक्षी स विष्णुः स हि दर्शनो वा
द्रष्टा स्वयं सोऽस्ति च सूर्यचक्षुः ।
ज्ञानं हि चक्षुर्ऋतुमात्रबोधः
[2]सोऽन्तर्गतः पश्यति विश्वमात्रम् ।।७४९।।

यो विनयिता स एव साक्षी सविशेषणमेकं नाम खण्डशो व्याख्यातं, महार्थत्वमस्य नाम्नो दर्शयितुम् ।

मुकुन्दः—५१५

मुकुन्द इति- 'मुच्लृ मोचने' तौदादिको धातुस्तस्मात् ***"स्त्रियां क्तिन्"*** (पा० ३।३।९४) सूत्रेण स्त्रीविशिष्टभावे क्तिन् प्रत्ययः, ***"चोः कुः"*** (पा० ८।२।३०) इति कुत्वम्-मुक्तिः । मुक्तिरूपे कर्मण्युपपदे ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) इति सूत्रेण कः प्रत्ययः, तत आल्लोपः, मुक्तिं ददातीति मुकुन्दः। पृषोदरादिना वर्णविकारः "उम्" अर्थात् मुक्तिस्थाने 'मुकुम्' इति रूपादेशः।

मन्त्रलिङ्गञ्च—

उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्। यजुः३।६०।।

उर्वारुकम्=दशाङ्गुलम्।

---

१. गच्छतीति=जगत्। २. **तदन्तरस्य सर्वस्य तदु सर्वस्यास्यच बाह्यतः। यजुः ४०।५।।**

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।

यजुः १२।१२।।

भवति चात्रास्माकम्—

स [1]केतपूः सर्वकलाभिरामो
विमोचयत्येव तदाप्तिवाञ्छम् ।
मुकुन्द उक्तो वत मुक्तिदः सः
स्तुवन्ति गायन्ति नमन्ति तं वा।।७५०।।

अमितविक्रमः-५१६

'माङ् माने' धातुर्जौहोत्यादिकस्ततः कर्मणि क्तः, तस्मिन् परतः ***''द्यतिस्यतिमास्थामित्ति किति''*** (पा० ७।४।४०) इतीत्त्वम्, गुणाभावः। ततो नञ्समासे नञो नकारस्य लोपः। न मीयते परिच्छिद्यत इत्यमितः।

विक्रमः— 'क्रमु पादविक्षेपे' भौवादिकाद्धातोर्भावे घञ्, तस्मिन् सति ***''अत उपधायाः''*** (पा० ७।२।११६) इति प्राप्ताया वृद्धेः ***"नोदात्तोपदेशस्य मान्तस्यानाचमेः"*** (पा० ७।३।३४) सूत्रेण निषेधः। अमितो विक्रमः पादविक्षेपो यस्येत्यमितविक्रमः।

विक्रमे मन्त्रलिङ्गम्—

नपातं च विक्रमणं च विष्णोः। ऋक् १०।१५।३।।

पुरां भिन्दुर्युवा कविरमितौजा अजायत ।

इन्द्रो विश्वस्य कर्मणो धर्त्ता वज्री पुरुष्टुतः। ऋक् १।११।४।।

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। ऋक् १।२२।१७।। यजुः ५।१५।। साम ३।३।६।। अथर्व ७।२६।४।।

अमितमिति मानरहितं विक्रमणं चलनं यस्य सः। अमितविक्रमः-अमितचलनः-अमितौजा इति समानार्थकाः शब्दाः।

लोकेऽपि च दृश्यते, पर्वत्रयमयमिदं सर्वम्। तद्यथा-अङ्गुलीनां त्रीणि पर्वाणि; गुल्फसन्धिः, जानुसन्धिः, ऊरुफलकसन्धिश्चेति पर्वत्रयं पादयोः, मणिबन्धसन्धिः, कफोणिसन्धिः, बाहुमूलसन्धिश्चेति पर्वत्रयं हस्तयोः; सत्त्वरजस्तमांसि त्रीणि; भूतवर्तमानभविष्यदाख्याः कालाश्च त्रयः, चतुर्विंशतिहोरात्मकः कालोऽपि

१. केतमिति कर्मनाम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दिनोषोरात्रिभेदेन त्रिधा; पृथिवी द्यौरन्तरक्षिमिति त्रीणि; मासानां राशीनाञ्च त्रिधाभावः। यथा—

ब्राह्मणाः	क्षत्रियाः	वैश्याः	शूद्राः
१	२	३	४
५	६	७	८
९	१०	११	१२

चतुर्वर्गात्मके राशिचक्रे मासचक्रे वा ब्राह्मणास्त्रयः, क्षत्रियास्त्रयः, वैश्यास्त्रयः, शूद्राश्च त्रयः।

इदमेव त्रिधाविक्रमणं वैदिकपरिभाषायां *'त्रिवृत्करण'* शब्देनोच्यते। एवं चैतादृशी कल्पना तस्यामितविक्रमस्य विष्णोरमितविक्रमणरूपं गुणं सर्वत्र=व्याप्तं पश्यद्भिर्विद्वद्भिः सर्वत्र कर्तव्या। दृश्यं श्रव्यञ्च लोकवेदयोः समानं भवति।

भवन्ति चात्रास्माकम्—

सूर्यः स विष्णुः क्रमतेऽतिमात्रं
वैविध्यमस्यास्ति जगत्प्रसिद्धम् ।
को नाम शक्नोति नरो ह मातुं
तमच्युतं चामितवीर्यवन्तम् ।।७५१।।

त्रेधा पदस्य क्रमणं हि विष्णो-
स्त्रिपर्वता साऽत्र गतास्ति विश्वे ।
सांख्या न संख्याभिरियत्त्वमाप्तुं
भवन्त्यलं सोऽमितविक्रमोऽतः ।।७५२।।

एवं हि यो वेत्ति तुरीयमस्य
शिष्टं पदं तेन तुरीय उक्तः ।
स एकपाद् विष्णुरजः स देवः
स्तुवन्ति तं [1]वेदवचोभिरर्च्यम् ।।७५३।।

अम्भोनिधिः—५१७

अम्भोनिधिरिति-"आप्लृ व्याप्तौ" धातुः सौवादिकः *"सर्वधातुभ्योऽसुन्',*

१."शं नो अज एकपाद् देवो अस्तु" (ऋ ७।३५।१३) इत्यादिभिर्मन्त्रैः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'आपः कर्माख्यायां ह्रस्वो नुट् च'' (४।१८६, २०८) इत्युभाभ्यामसुन्, आपो ह्रस्वश्चेत्यनुवर्तमानेषु ***"उदके नुम्भौ च"*** (४।२१०) इत्युणादिसूत्रेण नुमागमो धातोर्भकारान्तादेशो ह्रस्वश्च विधीयते । तेन 'असुन्' प्रत्यये भकारादेशे नुमि ह्रस्वादेशे च अम्भः। नुमागमस्य मित्त्वात् ***''मिदचोऽन्त्यात्परः''*** (पा०१।१।४०) सूत्रेण अकारात्परो भवति ।

निधिः– निपूर्वो 'डुधाञ् धारणपोषणयोः' इति धातुर्जौहोत्यादिकः। तस्मात् ***'अकर्तरि च कारके'*** अधिकारे ***''उपसर्गे घोः किः''*** (पा० ३।३।९२) इति अधिकरणे किः प्रत्ययः। एवञ्च-अम्भांसि निधीयन्तेऽस्मिन्नित्यम्भोनिधिरान्तरिक्षः समुद्रः पार्थिवः समुद्रश्चोभौ गृह्येते। यश्चाम्भस्सु गुणातिशयमाधाय तेषां व्यवस्थया निधाता, निहितानां व्यवस्थापयिता च सोऽम्भोनिधिर्विष्णुः।

लोके च दृश्यते-शरीरमिदमम्भोनिधिसमानं सदम्भोनिध्याख्यां लभते, तत्र हि हृदयं रसगुणप्रधानं रक्तं भ्रमयति प्रतिक्षणं, निधीयते वा हृदये रक्तमात्मनाऽतः- अम्भोनिधिरुच्यते। एवं प्राणिशरीरेषु सर्वत्र विज्ञेयम्। वीरुद्वृक्षलतादिष्वपि जलस्यैव प्राधान्यं तस्मात् वीरुधादयोऽपि अम्भोनिधिशब्दवाच्याः। जलप्रधानो हि सर्गः **''अपां रेतांसि जिन्वति''** (ऋक् ८।४४।१६) इति मन्त्रलिङ्गात्। अन्यच्च–

अम्भो अमो महः सहः इति त्वोपास्महे वयम्।
नमस्ते अस्तु पश्यत पश्य मा पश्यत।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन। अथर्व १३।४।५०।।

अत्र प्रसङ्गप्राप्तमुच्यते-

स वा अह्नोऽजायत तस्मादहरजायत ।।२९।।
स वा रात्र्या अजायत तस्माद् रात्रिरजायत ।।३०।।
स वा अन्तरिक्षादजायत तस्मादन्तरिक्षमजायत ।।३१।।
स वै वायोरजायत तस्माद्वायुरजायत ।।३२।।
स वै दिवोऽजायत तस्माद् द्यौरजायत ।।३३।।
स वै दिग्भ्योऽजायत तस्माद् दिशोऽजायन्त ।।३४।।
स वै भूमेरजायत तस्माद् भूमिरजायत ।।३५।।
स वा अग्नेरजायत तस्मादग्निरजायत ।।३६।।
स वा अद्भ्योऽजायत तस्मादापोऽजायन्त ।।३७।।
स वा ऋग्भ्योऽजायत तस्मादृचोऽजायन्त ।।३८।।
स वै यज्ञादजायत तस्माद्यज्ञोऽजायत ।।३९।।
स यज्ञस्तस्य यज्ञः स यज्ञस्य शिरस्कृतम् ।।४०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स स्तनयते स विद्योतते स उ अश्मानमस्यति ।।४१।।
पापाय वा भद्राय वा पुरुषायासुराय वा ।।४२।।
यद्वा कृणोष्योषधीर्यद्वा वर्षसि भद्रया यद्वा जन्यमवीवृध ।।४३।।
तावांस्ते मघवन् महिमोपो ते तन्वः शतम् ।।४४।।
उपो ते बध्वे बद्धानि यदि वासि न्यर्बुदम् ।।४५।।

इदं सूक्तम् (अथर्व १३।४) सूर्ये महेशे वा सङ्गतार्थं भवति। अत्रैव (अथर्व १३।४) च—***विभूः, प्रभुः, अम्भः, अमः, महः, सहः, अरुणम्, रजतम्, रजः, उरुः, पृथुः, सुभूर्भुवः, प्रथः, वरः, न्यचः, लोकः, भवद्वसुः, इदद्वसुः, संयद्वसुः, आयद्वसुः,*** इत्यादीनि नामानि सङ्केतितानि, यानि सूर्ये महेशे च सङ्गतार्थानि भवन्ति। सूक्तमिदमध्यात्मदेवताकमिति वैदिका अपि ब्रुवन्ति। सूक्तस्याध्यात्मं देवतेत्यनुशासनात्।

विस्तरेण लिखितमिदमध्येतॄणां बुद्धेर्वैशद्याय महार्थत्त्वावेदनाय च, व्याख्यातञ्च निगदेनैव।

भवतश्चात्रास्माकम्—

स सर्वसाद् भाव्यमितो यथेश
आपश्च साद्भाव्यमितास्तथैव।
अम्भोनिधिः सोऽस्ति महेश उक्तो
योऽपां निधानं कुरुतेऽतिरम्यम्।।७५४।।

अम्भोनिधिं तं पुरुषं पुराणम्
नभ्यं तथा पार्थिवमाहुरस्मिन्।
सर्वं स्थितं विश्वहिते च यत् यत्
स्तुवन्ति तं देवगणा व्यलीकाः।।७५५।।

व्यलीकाः=निष्पापाः=सत्त्वप्रधानाः।

अनन्तात्मा—५१८

अनन्तात्मेति—'अन प्राणने' आदादिको धातुस्तस्माद् अत्र बाहुलकेन ***'जॄविशिभ्यां झच्''*** (३।१२६) इत्यौणादिको 'झच्' प्रत्ययः। ***''झोऽन्तः''*** (पा०७।१।३) सूत्रेण अन्तादेशः चकार इत्, चित्वादन्तोदात्तः, अनन्तः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मा शब्दः 'अत सातत्यगमने'' इत्यस्माद् धातोः ***''सातिभ्यामनन्मनिणौ''*** (४।१५३) इत्युणादिसूत्रेण मनिण् प्रत्ययः। णित्त्वाद् वृद्धिः।

अनन्त+आत्मा ***''अकः सवर्णे दीर्घः''*** (पा० ६।१।१०१) इति सवर्णदीर्घः-अनन्तात्मा। अनन्तः=प्राणको=रक्षकः आत्मा=स्वरूपं यस्य सोऽनन्तात्मा विष्णुः सूर्यो वा। यथा सूर्योऽनन्तः, तथाभूतमनन्तधर्मकं सर्वं विश्वं प्राणयति व्यक्तोऽव्यक्त उदितोऽनुदितो वा, तथा भगवान् विष्णुरपि सर्वत्र सिद्धः सूर्यचन्द्रादिकान् प्राणयति, सर्वस्य जीवनस्वरूपोऽतोऽनन्तात्मा विष्णुरित्युक्तो भवति।

लोकेऽपि च दृश्यते-जीवात्मा देहमधिशयानो देहं प्राणयति। तत्र हृद्गुहागतः स्वचैतन्यधर्ममाधाय हृदयं सततं गमयति रसरक्तादिधातुमयशरीरस्य शोधनाय जीवनाय वा। जीवेऽपयाते मृतं शरीरं न प्राणिति। तस्मात्प्राणकत्वाज्जीवात्माऽप्यनन्तात्मोच्यते।

मन्त्रलिङ्गञ्च—

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।
पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्धः स्वस्तये।
यजुः २५।१८॥

देवा न आयुः प्र तिरन्तु जीवसे। यजुः२५।१५॥

भवति चात्रास्माकम्—

लोके ह्यनन्तात्मपदेन विष्णुः
प्राणेन युक्तं कुरुते समस्तम्।
देहं यथात्मा प्रतिगात्रसंस्थः
तथा जगत् [1]प्राणिति चान्तरात्मा।।७५६।।

यद्वा-अन्तशब्दः=समाप्तिवचनस्तत्र नास्ति अन्त-इयत्त्वं यस्य सः-अनन्तः। एतस्मिन्नर्थे-

'अम गत्यादिषु' भौवादिको धातुस्तस्मात् *''हलिमृग्रिणवामिदमिलूपूधूर्विभ्यस्तन्''* (३।८५) इत्युणादिस्तन् प्रत्ययः ***''तितुत्रेति''*** (पा० ७।२।९) इण्निषेधः, ततोऽनुस्वारपरसवर्णौ। नञ्पूर्वो बहुब्रीहिः। नलोपो नञः, नुट् च (पा० ६।३।७१, ७२) अनन्त इति । अनन्तश्चासावात्मा कर्मधारयसमासः।

१. प्राणिति-अन्तर्गर्भितण्यर्थः प्राणयतीति भावः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

सान्ते समग्रे विभुना निबद्धे
सान्तः कुतः पारमियात्तु विष्णोः ।
ईष्टे स विश्वस्य स पाति विश्वं
नान्तः स्वरूपेण विभुर्विशिष्टः ।।७५७।।

महोदधिशयः—५१६

महच्छब्दो व्युत्पादितचरः।

उदकम्- "उन्दी क्लेदने" रौधादिको धातुरीदित्, तस्मात् ***"क्वुन् शिल्पिसंज्ञयोरपूर्वस्याऽपि"*** (२।३२) इत्युणादिसूत्रेण क्वुन् प्रत्ययः संज्ञायाम्। ***"अनिदितां हल उपधायाः क्ङिति"*** (पा० ६।४।२४) सूत्रेण उन्देर्नलोपो गुणाभावः, ***"युवोरनाकौ"*** (पा० ७।१।१) इत्यनेन वोरकः, उदकम्। तदुपपदे च "डुधाञ् धारणपोषणयोः" धातोरधिकरणे ***"कर्मण्यधिकरणे च"*** (पा० ३।३।५८) सूत्रेण किः प्रत्ययः, ***"पेषंवासवाहनधिषु च"*** (पा० ६।३।६८) इत्युदकस्योदादेशः, उदधिः। महांश्चासावुदधिरिति कर्मधारयतत्पुरुषः। महोदधिरूपेऽधिकरण उपपदे "शीङ् शये" धातोः ***"अधिकरणे शेते"*** (पा० ३।२।१५) इति सूत्रेण 'अच्' प्रत्ययो गुणायादेशौ, महोदधौ शेत इति महोदधिशयः, शब्दसिद्धिर्ज्ञेया।

महोदधिरान्तरिक्षः समुद्रः, स एवान्तरिक्ष्याणामपां पार्थिवीनाञ्च योनिः। अत एव-अब्विकारा धूमा वाष्पीभूता अन्तरिक्षमभिगच्छन्ति नाधो ना तिर्यक्। तद्विकारा भौमा आपश्च पार्थिवं समुद्रमधितिष्ठन्ति। अतो विकारभूतं सर्वं जलं निम्नगं भवति समुद्रस्य निम्नभागे स्थानात्, निम्नोच्चे च भूगोलं मर्यादीकृत्योक्ते। अत एव शारीरं दुष्टं जलं वस्तिस्थानमधितिष्ठत् प्रस्रवणमापन्नं मूत्रशब्देनाभिधीयते, तच्च क्षारं सत् पार्थिवक्षारसमुद्रजलेन साम्यं भजति। वस्तिस्थानञ्च मध्यमभागस्य निम्नं स्थानमिति पार्थिवेनोदधिना साम्यं लभते । तत्र शेते स्वरूप इति महोदधिशयो विष्णुः।

मन्त्रलिङ्गञ्च—

औौर्वभृगुवच्छुचिमप्नवानवदा हुवे। अग्निं समुद्रवाससम्।

ऋक् ८।१०२।४।।

परि प्रासिष्यदत् कविः सिन्धोरूर्मावधि श्रितः।
कारुं बिभ्रत् पुरुस्पृहम् । साम० पू० ५।१०।१०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

महोदधौ शेत इव स्वभावाद्-
वह्निर्यथा विष्णुरयं तथैव ।
तस्यैव शक्त्या धृतमस्ति सर्वं
मेघ्ये जले विश्वमिदञ्च तस्मात्।।७५८।।

अन्तकः—५२०

अन्तक इति-अमतेस्तनि अन्तः, स च पूर्वं व्युत्पादितोऽनन्तनामप्रसङ्गे। अन्तशब्दात् ***''तत्करोति तदाचष्टे''*** इति चुरादिगणसूत्रेण णिच्, तस्मिंश्च परतः ***''णाविष्ठवदिति''*** (वि० ६।४।११५) टिलोपः, सनाद्यन्तधातुत्वे ***''ण्वुल्तृचौ''*** (पा० ३।१।१३३) इति ण्वुल्, वोरकः, णिलोपोऽन्तकः । अन्तं करोत्याचष्टे वान्तकः। ***''संयोगा विप्रयोगान्ताः''*** इति सिद्धान्तः। जातस्य जगतो लयस्य कर्ता, जगतः संहारक इत्यर्थः। लोकेऽपि च दृश्यते जातः प्राणी मृत्युना पञ्चत्वं प्राप्यते। कुम्भकारो घटं कस्माच्चिद् व्याजाद्भिनत्ति।

मन्त्रलिङ्गम्—

यमाय स्वाहाऽन्तकाय स्वाहा मृत्यवे स्वाहा। यजुः ३६।१३।।

प्रसङ्गप्राप्तमुच्यते बुद्धेर्वैशद्याय—

मृत्युर्हि नाम स्वरुपाद्विच्युतिः। सा च विश्लिष्टस्य संयुक्तिः, संयुक्तस्य विश्लिष्टिरित्यपि। तद्यथा-अङ्गुलीनां विभक्ता स्थितिर्जीवनं संयुक्ता च मरणम्। संधीनां संयुक्ता स्थितिर्जीवनं विभक्ता च मरणम्। एवं सर्वत्र योज्यम्। वियोजक एव मारकः=अन्तकः इत्यर्थः। यथा-कश्चिद्दण्डेन घटं भिनत्ति, तत्र दण्डसाधनको भेदको मारकः=अन्तकः। अतएव च ज्योतिःशास्त्रं मनुष्योपकाराय प्रवर्तितमाचार्यैः। सर्व एव ग्रहा यथादशं प्राप्ताः मृत्युस्थानमापन्ना मृत्युदा भवन्तीति कुण्डलीषु पृथक्-पृथक् व्यवह्रियन्ते। तथा च, यथा घटो हस्ताच्च्युतो भग्नस्तत्र च्यवनं घटभेदे कारणम्। एवं सुधीभिर्लोकदर्शं सङ्गमयितव्यम्। जातककुण्डल्यामंशैर्यथा सबलो निर्बलो वा शुभग्रहदृष्टोऽशुभग्रहदृष्टो वा, शुभग्रहसंयुक्तोऽशुभग्रहसंयुक्तो वा, शुभग्रहदशान्तर्गतोऽशुभग्रहदशान्तर्गतो वा, स ग्रहः प्राणदशान्तं तत्कारकत्वरूपं स्वस्वरूपं प्रकाशयति तद्विद्याविदे।

तथा च, यथा कश्चिदाचम्य मृतः प्राणदशा। कश्चिज्जले निमज्ज्य मृतो महादशा। कश्चिन्नित्याः क्रियाः कुर्वन् स्वस्थः स्नान् वा मृतः, सा जलस्थानस्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चन्द्रस्यान्तर्दशा। स्वस्थः सत्पुरुषेण सम्भाषमाणः स्वनित्यं कर्म स्नानं कुर्वाणो मृतः तत्र शुभग्रहयुतस्य चन्द्रस्यान्तर्दशा मृत्युकारिका। दुष्टेन दृश्येन श्रवणेन, वचनेन, भोजनेन, पानेन, वोद्विग्नः स्नान् मृतस्तत्राशुभग्रहयुतस्य चन्द्रस्यान्तर्दशा मृत्युकारिका। तीर्थे स्नान् मृतः, तत्रोत्तमस्थानस्थश्चन्द्रो मृत्युकारकः। कूपं खनन् मृतः, तत्र पापस्थानस्थश्चन्द्रः पापं स्थानं प्राप्य मृत्युं करोति। पर्वतशृङ्गे मृतः तत्र राहोरुच्चत्वमिते काले शनेर्दशां प्राप्तो मरणकारकः। सौम्यदृश्येन शुभग्रहयुतेन बुधेन स्नाने प्रवृत्तो मृतस्तत्र जलं प्राणदशास्थानीयं सत् स्वमारकत्वरूपं प्राकाशयत्। एवं यदुक्तं मया तत्सुधीभिः शतधा सहस्रधा विवर्धनीयम्। अन्येषु ग्रहेष्वेप्येवं योजनीयमन्तस्य कारकत्वे। अत उपपन्नमेतद्विष्णुरेव स्ववेवेष्टित्वरूपं धर्मं प्रदर्शयन् विश्वस्यान्तकरत्वधर्मस्य व्याजाद् अन्तकत्वं मूलेन कारणेन समन्वेतुम् अन्तं=गतिं करोतीति, महार्थकान्तकशब्दवाच्यो भवति।

भवन्ति चात्रास्माकम्—

सृष्ट्वा जगत्सोऽन्तक एव विष्णुः
संस्थाप्य काले च यथाविधानम्।
जलातिपातेन विशोषणेन
कृशानुयोगाच्च नयेत् स्वगर्भे ॥७५६॥

कृशानुः=अग्निः। स्वगर्भे=कारणभूते स्वरूपे। यथा पञ्चमहाभूतमयं शरीरं, पञ्चत्वं गतमुक्तं भवति अन्तकाले।

यथास्थितं यद्विभुना प्रणीतं
तथा स्थितं जीवनमाहुरार्य्याः।
वियोगहेतुत्वमुपैति यत्स्यात्
तत्कारकं तस्य विकारकत्वात् ॥७६०॥

लोकं दृष्ट्वा फलं चिन्त्यं फलनाद्वै फलं ग्रहाः।
चौरः स्तेयफलेनैव चारैर्निगृह्य नीयते॥७६१॥

स भवेद्वेदविद्वक्ता दाता भोक्ता महान् कविः।
किं स्याच्चौरेषु तादृगुण्याच्चौर्याच्चौर उदाहृतः॥७६२॥

ग्रहाणां तु फलं व्यक्तं लोके दृश्यं सनातनम्।
मर्त्ये तत्कीदृशं कर्हि ज्ञानमेतन्महार्थकम् ॥७६३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ये निन्दन्ति विमूढास्ते वेदवाचां बहिर्मुखाः ।
वेदो गायति सोद्घोषं चन्द्रमास्तिरते वयः ।।७६४।।

प्र चन्द्रमास्तिरते दीर्घमायुः। ऋक १०।८५।१६।।

❖ ❖ ❖

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः।।६६।।

५२१ अजः, ५२२ महार्हः, ५२३ स्वाभाव्यः, ५२४ जितामित्रः, ५२५ प्रमोदनः।
५२६ आनन्दः, ५२७ नन्दनः, ५२८ नन्दः, ५२६ सत्यधर्मा, ५३० त्रिविक्रमः।

अजः—५२१

अज इति—"अव रक्षण—गति—कान्ति—प्रीति—तृप्ति—अवगम—प्रवेश—श्रवण—स्वाम्यर्थ—वाचन—क्रियेच्छा—दीप्ति—अवाप्ति—आलिङ्गन—हिंसा—दान—भाग—वृद्धिषु" भौवादिको धातुस्तस्माद् ***"अन्येष्वपि दृश्यते"*** (पा० ३।२।१०१) सूत्रेण डः प्रत्ययः। अत्र सूत्रे "अपिशब्दः सर्वोपाधिव्यभिचारार्थस्तेन धात्वन्तरादपि भवति, कारकान्तरेऽपि डः प्रत्ययो भवति", काशिकावृत्तौ कारकस्यानभिमतत्वात् शब्दसिद्धिरेवाभिमता । डित्त्वाट्टिलोपः प्रत्ययाकारोऽवशिष्टः 'अ' इति, ब्रह्मनाम, तदुपपदे "जनी प्रादुर्भावे" दैवादिकाद् धातोः ***"अन्येष्वपि दृश्यते"*** (पा० ३।२।१०१) इति डप्रत्ययष्टिलोपश्च। एवञ्च आद् ब्रह्मणो जातः—अजः प्राकृतो विकारसमूहः। अजो महद् ब्राह्मणम्।

तदुक्तम्—

सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत्।

अथर्व १०।८।३३।।

यद्वा—न जायत इत्यजो व्याख्यातचरो विष्णोर्नाम। यतो हि स न जायते स्वरूपान्न प्रच्यवते। तदुक्तम्—***"अज एकपाद्देवः"*** (ऋ० ७।३५।१३) इति मन्त्रलिङ्गाद् व्यापनशीलो विष्णुर्ग्राह्यः।

तत्र प्राकृतसमूहस्याजत्वे मन्त्रलिङ्गम्—

ततो विराडजायत विराजो अधि पूरुषः।
स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्माद् यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूस्तांश्चक्रे......।।
तस्माद् यज्ञात् सर्वहुत ऋचः समानि जज्ञिरे....।
तस्मादश्वा अजायन्त....अजावयः।।'' यजुः ३१।५, ६, ७।।
विश्वान्यर्यो भुवाना जजान। ऋक् २।३५।२।।
अर्यः स्वामिवैश्ययोः (३।१।१०३) इति पाणिनिसूत्रम्।

भवति चात्रास्माकम्—

यदत्र विश्वे परितोऽस्ति दृश्यं
नक्षत्रचन्द्रार्कधरासमेतम् ।
विकारजातञ्च पृथक् स्थितं यत्
तत् ख्याति नित्यं तमजं पुराणम्।।७६५।।

महार्हः—५२२

''मह पूजायाम्'' चौरादिको धातुस्तस्मात् ***''घञर्थे कविधानम्''*** इति (३।३।५८) सूत्रवार्तिकेन घञर्थे कः प्रत्ययः, महः पूजनम्। यद्वा— चौरादिकान्महयतेर्णिचि धातोः अतो लोपेऽकारस्य स्थानिवद्भावत्वान्नोपधावृद्धिः। महिर्णिजन्तस्तस्माद् ***''एरच्''*** (पा० ३।३।५६) इति सूत्रेण भावेऽच् प्रत्ययो मह इति। तदुपपदे ''अर्ह पूजायाम्'' धातो ***''अर्हः''*** (पा० ३।२।१२) सूत्रेणाच् प्रत्ययः कर्मण्यणोऽपवादः। एवं च महं पूजामर्हति लब्धुं योग्यो भवतीति महार्हो विष्णुः। विविधा हि पूजा साधनभेदात्पूज्यभेदाच्च। तद्यथा—**''त्वं हि नः पिता वसो ! त्वं माता शतक्रतो! बभूविथ। अथा ते सुम्नमीमहे।** ऋक् ८।६८।११।। सुम्नं=स्वभ्यसनं, 'म्ना अभ्यासे' धातुः। ईमहे=कुर्मः **''देहि मे ददामि ते''** (यजुः ३।५०) एतेन नियमेनाग्निं सम्बोध्य **''युयोध्यस्मज्जुहुराणमेनम्''** (यजुः ४०।१६) पुनर्वयं किं करिष्यामः **''नमउक्तिं ते विधेम''** (यजुः ४०।१६) नमस्कारपूर्वकं वाचा त्वां स्तोष्याम इति। षोडशोपचारपूजा च प्रसिद्धैव। अवयवपूजा च— ''नमस्ते रुद्र ! मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः।'' यजुः १६।१।। दिङ्मात्रमुदाहृतं, बहु स्वयमूहनीयम्।

यथा—वनमालीत्यपि भगवन्नाम। तत्र वन्यते सम्भज्यते इति वनं सम्भजनं संविभाग इत्यर्थः। मा=शोभा, तां लाति=आदत्ते इति मालः, स्त्रियां माला।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वनानां=वनभवानां पुष्पाणां माला अस्येति मत्वर्थीय इनिः (पा० ५।२।११६) वनमाली। वनशब्देनेह तात्स्थ्याद् वनभवानि पुष्पाणि गृह्यन्ते।

अत्रैवं सन्धातव्यम्—प्रतिवृक्षं स्थितानि पुष्पाणि, विभक्त्या स्थिता वृक्षाश्च क्व प्रोता इति प्रश्ने, पुष्पाणि वृक्षाश्च तस्मिन् विष्णावेव प्रोता इत्युत्तरमिति। तथा—नक्षत्रैः कस्य शोभा, सूर्यादीनाञ्च कः परिक्रम्य इति प्रश्ने, स एव, तस्यैव चेत्युत्तरम्। एवञ्च स महार्हो विष्णुरित्युक्तो भवति। लोकेऽपि, यथाकालमुपलभ्यमानैः साधनैः पूज्यं प्रति स्वसद्भावान् प्रकटयन्ति मनुजाः। पूज्यमानश्च स परं तुष्यति। लोके बहुमार्गा पूजा। सर्वा हि वाक् तमेवार्चति। तथा हि, यथा कस्यचित् कश्चित्सम्बन्धी मृतः, स तं चिन्तं-चिन्तं रोदिति बहु, अन्ये च तस्याश्वासयितारः 'हे प्रभो! तवेच्छा बलीयसी न केनाप्यतिक्रमितुं शक्ये'ति तमेव प्रभुं मुहुर्मुहुः स्तुवन्ति। एवं सर्वत्र ज्ञेयम्। लोके वेदे च स एव महार्हो न ततोऽन्यः। लोके च तस्यानुकरणमात्रम्। विष्णोर्नामसु 'अतिथि' रिति नाम, अतोऽतिथिमपि विष्णुं मत्वा सत्कुर्वन्ति।

भवन्ति चात्रास्माकम्—

विष्णुर्महार्हः स सुभावसिद्धः
कृतं धृतं तेन यतो ह सर्वम् ।
स ओत आस्ते सकलेऽतिरम्ये
तथा यथा पुष्पगतं हि सूत्रम् ॥७६६॥

अथवा—

एवं हि यो वेत्ति महार्हमेकं
विष्णुं स ना[1] कर्मशतानि कुर्वन् ।
तमर्चयन् कर्मशतैरलिप्तो
मालेव सूत्रं [2]गलमेति तस्य ॥७६७॥

स वीतशोको व्यपयातचिन्त-
स्तस्मिन् स्थितस्तेन भवेत् स पोष्यः ।
महार्हभावेन रजस्तमोभ्यां
विमुच्यते कर्मशतानि कुर्वन् ॥७६८॥

१. ना=पुरुषः २. गलम्=कण्ठम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाभाव्यः—५२३

स्वाभाव्य इति—स्वशब्दो व्याख्यातः "स्वृ शब्दोपतापयोः" इति धातोर्डप्रत्यये। आभाव्यः—आङ्पूर्वकाद् भूधातोः ***"ओरावश्यके"*** (पा० ३।१।१२५) सूत्रेणावश्यके ण्यत्प्रत्ययः ***"अचो ञ्णिति"*** (पा० ७।२।११५) वृद्धिः ***"वान्तो यि प्रत्यये"*** (पा० ६।१।७६) सूत्रेणावादेशः। स्वपदेन सवर्णदीर्घे स्वाभाव्यम्, तदस्यास्तीति स्वाभाव्यः। एवञ्च स्वेन=आत्मना, आ=सर्वतोऽवश्यं—भाव्यं भवनमस्यास्तीत्यर्थः फलति। स्वभावसिद्धः सर्वतः सत्तावानित्यर्थः। न कश्चित् तस्य भवनहेतुर्भावयिता। इत्थं स एव सर्वं स्वसत्तया व्याप्य स्थितः स्वाभाव्य उच्यते भगवान् विष्णुः।

भवति चात्रास्माकम्—

स्वाभाव्यनाम्ना कथितोऽत्र विष्णुः
स्वयं समन्तात्परितोऽभ्युपैति।
अवश्यरूपेण मनुं[1] न वाञ्छेद्
द्रष्टा स सर्वस्य चराचरस्य।।७६६।।

लोकेऽपि पश्यामः—राजाज्ञा स्वयमावश्यकत्वेन सत्तावती सती, प्रजयोपेक्ष्यतेऽपेक्ष्यते वा, न च सा कञ्चिन्मन्तारमवमन्तारं वाऽपेक्षत इति।

जितामित्रः—५२४

जितामित्र इति—"अम गत्यादिषु" भौवादिको धातुस्तस्मात् ***"अमेर्द्विषति चित्"*** (४।१७४) इत्यौणादिकः 'इत्रः' प्रत्ययः, स च चित्, चित्त्वादन्तोदात्तः, अमित्रो द्वेष्टा।

जितः—"जि जये" धातोः कर्मणि क्तो गुणाभावः। जिता अमित्रा येन स जितामित्रः, विशेष्यवल्लिङ्गम्—जितामित्रं ब्रह्म, जितामित्रा देवी, जितामित्रो विष्णुरिति यथा। बहुव्रीहावन्यपदार्थप्रधानत्वात्। मन्त्रलिङ्गञ्च—

द्युमाँ अमित्रदम्भनः। ऋक् ४।१५।४।।
अमित्रसेनां मघवन्नस्माञ्छत्रूयतीमभि।
युवं तान्द्रि वृत्रहन्नग्निश्च दहतं प्रति। अथर्व ३।१।३।।
अमित्रसेनामभि भञ्जमानो द्युमद् वद दुन्दुभे सूनृतावत्।
अथर्व ५।२०।६।।

१. मनुं=मन्तारम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वं तमिन्द्र मर्त्यममित्रयन्तमद्रिवः ।
सर्वरथा शतक्रतो नि याहि शवसस्पते। ऋक् ५।३५।५।।

"शवो बलम्" इति भावप्रधानम्। इति निदर्शनमात्रमुक्तम्।

भवन्ति चात्रास्माकम्—

लोके जितामित्रपदेन विष्णुः
शवांसि तस्मिन् निचितानि यस्मात्।
अमित्रसेनामभिभञ्जमानो
मित्रस्य सव्ये च विराजतेऽतः ।।७७०।।

जयः स विष्णुः स युवा महान् सः
महाबलो विक्रमणः स एव ।
स एव जेता स हि सत्यधर्मा
तदाश्रितानां स भवेच्च सव्यः ।।७७१।।

यशांसि सर्वाणि स एव भुङ्क्ते
श्रवांसि सत्यानि शृणोति वा सः ।
नरस्तु मोहावृतबुद्धिदोषात्
न्यक्कृत्य तं स्वं जयमातनोति ।।७७२।।

सव्ये स्थितं योद्धृतमं वरेण्यं
पश्यन् प्रहर्ता जयते ह्यमित्रान् ।
न यत्र सत्यं न च यत्र धर्मः
पराजिता तत्र भवेच्च सेना ।।७७३।।

प्रमोदनः—५२५

प्रमोदन इति—प्रोपसर्गपूर्वको "मुद हर्षे" भौवादिको धातुस्तस्माण्णिच्, तदन्ताच्च ल्युः—णिलोपः प्रमोदनः। प्रमोदयति स्वस्वयोनिस्थितान् जीवान् हर्षयतीति प्रमोदनः। स्वयोनौ सर्वः प्रमोदते न कश्चिज्जिहासति, स्वकर्मप्राप्तां योनिमिति प्रमोदनो विष्णुरुच्यते। प्रमोदनाख्यश्च तस्य गुणः सर्वत्र व्याप्तः। सर्वत्र व्याप्तं भगवन्तं पश्यते उदितसत्त्वाय पुरुषाय स्वरूपं प्रकाश्य तं प्रकृष्टं मोदयतीति प्रमोदनः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविर ँ शुद्धमपापविद्धम्।

यजुः ४०।८।।

भवति चात्रास्माकम्—

प्रमोदनो विष्णुरशेषयोनिः
प्रमोदयन् वासयते सनात् सः।
प्रमोदनोऽतः श्रुतिवाक् वरेण्यं
तं वक्ति शुद्धं ह्यजरामरञ्च ।।७७४।।

आनन्दः—५२६

आनन्द इति—आङ्पूर्वः "टुनदि समृद्धौ" धातुर्भौवादिकः इदित्त्वान्नुमागमः, तस्माद् भावे घञ् घञन्ताच्च ***"अर्शआदिभ्योऽच्"*** इति (पा० ५।२।१२७) इति सूत्रेण मत्वर्थीयोऽच्। तत्परे च ***"यस्येति च"*** (पा० ६।४।१४८) सूत्रेणाकारलोपः। आनन्दमस्यास्तीति आनन्दः, आनन्दस्वरूपः। यद्वा—आसमन्तान्नन्दनं=समर्द्धनं=संवर्धनं परिपूर्णत्वमित्यर्थः। लोकेऽपि च दृश्यते—विश्वेऽस्मिन् लब्धसाधनः सर्व एव शरीरी शरीरसम्बन्धिनीं न्यूनतां नानुभवति, अन्यत्र विकारात्, तस्मात्स आनन्दो विष्णुः।

मन्त्रलिङ्गच —

पश्यदक्षण्ववान्न वि चेतदन्धः। अथर्व ६।६।१५।।

मित्र ईक्षण आवृत्त आनन्दः। अथर्व ६।७।२३।।

विश्वरूपगोरूपवर्णने सूक्तमेतत् तत्रैव **"आवृत्तआनन्द"** इति विश्वरूपेण सर्वरूपेण समृद्धत्वात् स आनन्दः समृद्धौ सत्यां सर्वोऽपि समृद्ध्यपरपर्यायमानन्दमनुभवति।

स विश्वरूपेण समर्धमानः
स सर्वरूपेण समर्धमानः ।
वैविध्यमानन्दपदेन धाता
सैवास्ति चानन्दपदेन विष्णुः।।७७५।।

नन्दनः—५२७

नन्दन इति 'टुनदि समृद्धौ' धातोरिदित्त्वान्नुमागमः, णिच्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

''नन्दिग्रहिपचादिभ्यो'' (पा० ३।१।१३४) योरनादेशो णेर्लोपः, नन्दनः। नन्दयति समर्धयति संवर्धयति वा नन्दनो विष्णुः। मन्त्रलिङ्गच—

नाभिर्मे चित्तं विज्ञानं वायुर्मेऽपचितिर्भसत्

आनन्दनन्दावाण्डौ मे भगः सौभाग्यं पसः।

जङ्घाभ्यां पद्भ्यां धर्मोऽस्मि विशि राजा प्रतिष्ठितः। यजुः २०।६।।

भवति चात्रास्माकम्—

स नन्दनो विष्णुरमित्रशत्रु-

श्चराचरं नन्दयतेऽतिरम्यैः।

नक्षत्रचन्द्रार्कधराविकारैः

समृध्यमानं भुवनं चकार ।।७७६।।

नक्षत्राणां विकारो रूपम्—नक्षत्राणि बहून्यतो रूपाण्यपि बहूनि। चन्द्रो ग्रहस्तस्य विकारा आपः, आप्याश्च तदुपजीवि च मनः। सूर्यो ग्रहः स शरीरे आत्मा, तस्य विकारोऽग्निराग्नेयाश्च तदुपजीविनः। धरा ग्रहस्तस्य विकारः शरीरं पार्थिवांश्च भावाः। एवं सर्वत्र योजनीयं सुधीभिः।

नन्दः—५२८

नन्द इति—'टुनदि समृद्धौ' धातोरधिकरणे घञ्। नन्दन्ति समर्धन्तेऽस्मिन् विश्वरूपे पुरुष इति नन्दो विष्णुः। लोकेऽपि दृश्यते, अल्पारम्भो भूर्यारम्भे सति समृद्धो भवति। एवं तच्छाययैव नन्दति समृद्धं भवति विश्वमतः स नन्दः।

मन्त्रलिङ्गञ्च—**''आनन्दनन्दावाण्डौ''** यजु २०।६।।

भवति चात्रास्माकम्

नन्दः स विष्णुः प्रपदं ह सर्वं

स्वस्मिन् स्थितं नन्दयते स्ववीर्यैः।

तथा यथात्मा निजवीर्यसिद्धो

देहं सखायं कुरुते समृद्धम् ।।७७७।।

समानख्यानं समनस्कं देहमिति भावः।

सत्यधर्मा—५२९

सत्यधर्मेति—अस्तेः शतरि सत्, तस्माद् यति सत्यशब्दः प्राग् व्युत्पादितः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धरतेर्मनिनि धर्मः। सत्यो धर्मो यस्येति सत्यधर्मा ***"धर्मादनिच् केवलात्"*** (पा० ५।४।१२४) सूत्रेण समासान्तोऽनिच् प्रत्ययः ततश्च, ***"यस्येति च"*** (पा० ६।४।१४८) इति सूत्रेणाकारलोपः समासत्वात्प्रातिपदिकत्वम्, सौ दीर्घः।

मन्त्रलिङ्ग–

त्रिपञ्चाशः क्रीडति व्रात एषां देव इव सविता सत्यधर्मा ।
उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इत् कृणोति।।

ऋक् १०।३४।८।।

भवति चात्रास्माकम्–

स सत्यधर्मा प्रभुरद्वितीयः सत्येन
वृत्तेन करोति विश्वम् ।
तथैव [1]दाधर्ति धरिष्यते वा
स सत्यधर्मा न जहाति लिङ्गम्।।७७८।।

यस्य यल्लिङ्गं पृथक्त्वविज्ञापकं चिह्नं, तथाविधमेव सर्गारम्भाद्यक्षणादद्य यावत् कुरुते करिष्यति चाग्रे। **न जहाति लिङ्ग**मिति श्लोकोक्तं वाक्यम्। लोकेऽपि दृश्यते केनचिद् भेदेन वस्तुनो भेदः। तद्भेदाच्च तन्नामभेदः। नामभेदात् मूल्यभेदो मानुष्यके कर्मणि दृश्यते। परन्तु न तथा भगवत्कृते कर्मणि। सत्यासत्यधर्मो मनुष्यः विष्णुस्तु केवलं सत्यधर्मकः। **"सत्यं ब्रह्म"** (शत० १४।८।५।१।।) **सत्यमेव देवाः, अनृतं मनुष्याः।** शत० १।१।१।४।। **सत्यसंहिता वै देवाः। अनृतसंहिता मनुष्याः।** ऐ० ब्रा० ६।। इत्युक्तेः।

त्रिविक्रमः–५३०

त्रिविक्रम इति "तॄ प्लवनसन्तरणयोः" इति भौवादिको धातुस्ततः ***"तरतेर्ड्रिः"*** इति ड्रिप्रत्यय औणादिकः, डित्त्वात् टेर्लोपः, ***"नेड्वशि कृति"*** (पा० ७।२।८) सूत्रेणेट्प्रतिषेधः, त्रिः।

विक्रमः–व्युपसर्गपूर्वकः "क्रमु पादविक्षेपे" भौवादिको धातुस्ततो भावे घञ्, घञि च ***"नोदात्तोपदेशस्य नान्तस्यानाचमेः"*** (पा० ७।३।३४) इति वृद्धिनिषेधे विक्रम इति।

त्रीणि विक्रमणानि यस्य स त्रिविक्रमः।

१. दाधर्तीति वैदिकपदानुकरणम्, यद्वा छन्दोवत् कवयः कुर्वन्तीति न्यायेन छान्दसप्रयोगोऽपि क्वचिल्लोके प्रयुज्यत एवेति नापशब्दत्वभागयम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गम्—

प्र तद्विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठा।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।।

ऋक् १।१५४।२।।

तन्महिमा च—

यस्येमे हिमवन्तो महित्वा, यस्य समुद्र ँ रसया सहाहुः।
यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ।।

यजुः २५।१२।।

भवति चात्राऽस्माकम्—

त्रिविक्रमो विष्णुरिमान् समस्तान्
विरच्य लोकान् कुरुते चतुर्धा ।
चतुष्प्रकारान् कुरुते त्रिधा स
त्रिविक्रमोऽतः स परः पुराणः।।७७६।।

तद्यथा—

मासा द्वादश—	ब्राह्मणः	क्षत्रियः	वैश्यः	शूद्रः
	१	२	३	४
	५	६	७	८
	६	१०	११	१२

त्रयो ब्राह्मणाः त्रयः क्षत्रियाः, त्रयो वैश्याः, त्रयः शूद्राः।

तत्र गणना यथा—नवरूपायाः संख्यायाः संयोगेन समानवर्गीयस्य द्वितीयस्याङ्कस्योत्पत्तिर्जायते, नवाख्या संख्या च नवत्वं नातिक्रमते— इति च सम्यग् ज्ञेयम्।

१+६=१० । १०+६=१६ इयमेकोनविंशतिर्द्वादशभिर्वितष्टा तत्र लब्धा द्वादश भवन्ति वर्षेण समानाः ते गताब्दे लीयन्ते, शेषाश्च सप्त ७ अग्रिमवर्षस्य मासेन राशिना वा समानाः। यथा ७ सप्त शिष्टाः ७+६=१६, द्वादशापवर्तनेन ४ चत्वारोऽवशिष्टाः, ४+६=१३, द्वादशभिर्विभजनेनैकं १ शिष्टमिति समानवर्गता। तत्र वर्गाणां चतुर्धात्वमित्थम्—यथा—१—४—७— १० प्रथमो वर्गः। २—५—८—११—द्वितीयो वर्गः। ३—६—६—१२— तृतीयरूपो वर्गः। तत्र च द्वितीयो २—५—८—११ वर्गो नवात्मसंख्यापातेनैवं शिष्यते। यथा—२+६=११, ११+६=२०, २०—१२=८, ८+६=१७, १७—१२=५, ५+६=१४, १४—१२=२, एवं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति—२—५—८—११ इति। एवं तृतीयो वर्गः—३+६=१२, १२+६=२१, २१—१२=६, ६+६=१८, १८—१२=६, ६+६=१५, १५—१२=३, इति ३—६—६—१२ तत्र स्थितानां ग्रहाणामप्याभिरेव संख्याभिः ब्राह्मण—क्षत्रिय—वैश्यशूद्रतोक्ता भवति। एवं संवत्सरोऽपि द्वादशमासात्मके चक्रे—१—५—६ संख्याभिर्ब्राह्मणः। २—६—१० संख्याभिः क्षत्रियः, ३—७—११ संख्याभिर्वैश्यः, ४—८—१२ संख्याभिः शूद्र इति। वैक्रमं संवत्सरमधिकृत्योच्यते—यथा—१६६६ संख्याकः संवत्सरो ब्राह्मण इति सुज्ञेयो भवति, नवात्मकसंख्याया ब्राह्मणत्वात्। १६७६ क्षत्रियच्छायान्वितः क्षत्रियान्तर्हृदयो वा षड्रूपायाः संख्यायाः क्षत्रियवर्गे निपातात्। द्वादशराशयो नवग्रहाः कतिधा भवन्ति? अष्टोत्तरशतधा भिद्यन्ते—६ × १२=१०८, नातिवर्तन्ते संख्यामिमाम्। तस्माद् य एतज्ज्ञो भवति, स लोकं वेद, सोऽधिगतयाथातथ्यो भवति। स एव कृत्याकृत्यविवेकी कृतकृत्यो भवति, स एव च परावरं जानाति।

एवञ्च योऽङ्को यमङ्कं जनयति, स तस्य पुत्रस्तदधीनो वा, यस्माच्च जायते स्वयं तत्तस्य मूलमिव माता पिता स्वामी वा। एवञ्चात्र ज्ञेयम्— १ एकस्य फलं १०, मूलं ६ नव।

अत्रास्मत्पद्यम्—

भानां भ्रमतां भेषु रूपमष्टोत्तरं शतम् ।
वेद्मि वच्मि ततश्चार्थान् ततोऽस्म्यष्टोत्तरं शतम्।।७८०।।

परम्परातोऽधिगतविद्यत्वात्।

अष्टोत्तरशतस्य समाहार—१+०+८=६ इति, यच्चोक्तं नव संख्या नवत्वं नातिक्रमते तत्र "१०" अत्र नवरूपा संख्या एकधापवृत्ता नवभिर्व्यपवर्तनेन शिष्टोऽङ्कः पूर्वं निपतति गणितकोविदानां समय एष स्मृत्युपपत्तये, यथा दशके। दशकस्य (१०) नवसंख्यया विभजनेन एकं १ शिष्यते तस्य च पूर्वं निपातः। एवञ्च '१०' इत्यत्र एकाङ्केनैकधा नव संख्या गता, शून्येन च तस्या निःशेषत्वञ्ज्ञाप्यते।

अपरञ्चात्रोदाहरणम्—यथा पञ्चत्रिंशदिति ३५ संख्या, तत्र नवात्मिका संख्या त्रिरपगतेति, त्रिसंख्याकेनाङ्केन सूच्यते—६×३=२७, अत्र सप्तविंशत्यां पञ्चत्रिंशदङ्कयोः ३+५=८ सम्मेलनेन पुनः सा मूलं स्वरूपमादत्ते संख्या ३५ पञ्चत्रिंशदिति। इति प्राचीनानां गणितस्य रमणीयता। अस्माभिश्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

"भूतभव्यभवत्प्रभुः, आदित्यः, चतुर्भुजः" नामव्याख्याने यथाव्याख्यापेक्षमुक्तं न तु सविस्तरम्, तत्रावकाशाऽभावात्। यदत्रोक्तं न तत्र, यच्च तत्रोक्तं तन्नेह, परन्तु ज्ञानवते तदप्यलं मन्ये।

कालास्त्रयः—भूतवर्तमानभविष्यद्रूपाः, गुणास्त्रयः—सत्त्वरजस्तमोरूपाः, वेदाश्चत्वारोऽपि ज्ञान-कर्म-उपासनात्मके त्रित्वे लीयन्ते। यद्वा ऋग्यजुःसामात्मकेषु त्रिविधेषु मन्त्रेष्वन्तर्भवन्ति। लोकास्त्रयः—भूर्भुवः स्वरिति। भूरिति भूलोको भुवरिति अन्तरिक्षं स्वरिति द्यौर्लोकः। य एवं सर्वं चराचरं रज्ज्वेव निबध्नाति स त्रिविक्रमः।

लोकेऽपि दृश्यते—षडङ्गं शरीरम्, तत्र—गलाद् यावच्छिर एकमङ्गम्, बाहू द्वितीयमङ्गम्, मध्यं तृतीयमङ्गम्, जङ्घे द्वे चतुर्थमङ्गम्, द्वौ बाहू द्वे जङ्घे चेति चत्वारि भवन्ति संख्याने, तथापि आकृतेः समत्वात्, बाहुत्वेन जङ्घात्वेन च एकैकत्वेन गृह्यते। तत्र बाह्वोर्जङ्घयोश्च, यत्त्रिसन्धिमत्त्वं, तत्तस्य विष्णोरेव त्रिविक्रमत्वम्। एवं पृष्ठकशेरुकाणामपि त्रिविधत्वं कृतपरीक्षणमस्थिशेषेऽपि द्रष्टुं शक्यम्। कपालास्थिष्वप्येवं योजनीयम्। प्रतिबाहु प्रतिजङ्घञ्च त्रिंशदस्थीनि मासेन समानता सम्पादनाय। शरीरस्यात्मा सूर्यः, सारयति=गमयति स्थानात् स्थानान्तरं प्रापयतीत्यर्थात्। शरीरञ्च वर्षशब्देन समानार्थत्वमाप्नोति। रूपे भेदो नत्वर्थे। देहाभिपातिन आत्मरूपस्य सूर्यस्य शरीरं संवत्सरः, तत्र यावदायुः सम्यक् वसतीत्यतः। संवत्सर इति नाम व्याख्याने विशदं व्याख्यातं तत्र द्रष्टव्यम्। एवं लोकं दृष्ट्वा विविधमूहनीयम्। **"सर्वो हि लोको बुद्धिमतामाचार्यः, शत्रुश्चाबुद्धिमताम्"** इत्याह "आत्रेयः पुनर्वसुश्चरके।"

भवति चात्रास्माकम्—

त्रिविक्रमे सर्वमिदं त्रिसूत्रं
यो वेद तं वेद स एव विश्वम्।
त्रिविक्रमः स्वस्य महिम्नि निष्ठ-
स्तुर्यं पदं स्वात्मनि गुप्तमस्ति।।७८१।।

नव=न व्येति, न विकुरुते।

❖ ❖ ❖

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः।
त्रिपदस्त्रिदशाध्यक्षो महाश्रृङ्गः कृतान्तकृत्।।७०।।

५३१ महर्षिः कपिलाचार्यः, ५३२ कृतज्ञः, ५३३ मेदिनीपतिः। ५३४ त्रिपदः, ५३५ त्रिदशाध्यक्षः, ५३६ महाशृङ्गः, ५३७ कृतान्तकृत्।

महर्षिः कपिलाचार्यः—५३१

महच्छब्दो व्याख्यात आत्त्वादिकञ्च।

ऋषि— 'ऋषी गतौ' ईदित् तौदादिकः, ततः ***'सर्वधातुभ्यः इन्'*** (४।११८) इत्युणादिसूत्रेण इनोऽनुवृत्तौ ***''इगुपधात् कित्''*** (४।१२०) इति 'इन्' प्रत्ययः कित्त्वं च, कित्त्वाद् गुणाभावः, ऋषिः।

महांश्चासौ ऋषिरिति कर्मधारयतत्पुरुषे ***''ऋत्यकः''*** (पा० ६।१।१२८) इति प्रकृतिभावाभावपक्षे ***''आद् गुणः''*** (पा० ६।१।८७) इति गुणो रपरश्च, महर्षिरिति। **''ऋषिर्दर्शनात्''** (निरु० २।११) **ऋषयो मन्त्रद्रष्टार** इति च ऋषिशब्दार्थः। स हि भगवान् प्राणिस्थभावानां यथार्थतो द्रष्टा, अतएव साम्प्रतं विभक्तेन वेदचतुष्टयेन यथार्थं ज्ञानमग्निवायुरव्यङ्गिरोभ्योऽदात्, तैश्च तज्ज्ञानं ब्रह्मणे प्रत्तं, ब्रह्मा च तज्ज्ञानं प्रजाभ्य उपादिशत्। स यथाकालं शाखानुशाखं प्रवृद्धो वेदतरुर्व्यासेन पाराशर्येण व्यासीकृतोऽतः स एतद्व्यवसनकर्मणा व्यास इत्याख्यामलभत। तदुक्तम्-**वेदान् विव्यास यस्मात् स वेदव्यास इति स्मृतः** (महाभारते) इति। अत एव सर्वा वेदवाचस्तमेव भगवन्तं वदन्ति तस्मिन्नेव चर्षीणामृषौ गुणसृजां गुरावात्मानं निदधति। अतो निधिरपि ब्रह्मनाम।

मन्त्रलिङ्गञ्च—

तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।। यजुः ३१।७।।

लोकेऽपि यो यस्य कर्मणो यन्त्रादिकस्य वाऽऽविष्कर्ता भवति स तस्य ज्ञाताऋषिरित्यभिधानीयो भवति।

भवति चात्रास्माकम्—

ऋषिः स विष्णुः प्रपदं विजान-
ज्ज्ञानस्य तत्त्वं स ददावृषिभ्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋषिर्हि साक्षात्प्रपदं यथावद्
दृष्ट्वा स मन्त्रस्य ऋषिर्बभूव ।।७८२।।

मन्त्रलिङ्गञ्च-

अपाक्रमन् पौरुषेयाद् वृणानो दैव्यं वचः।
प्राणीतीरभ्यावर्तस्व देवेभिः सखिभिः सह।। अथर्व ७।१०५।१।।

देवस्येदं दैव्यं ब्राह्ममार्षमित्यादि। स एव सर्वेषां महतां लोकानां याथार्थ्यविदिति महर्षिरुक्तो भवति।

मनुष्यवाचि, मनुष्यज्ञाने, मनुष्यानुभवे च नैयून्यरूपविस्मृतिदोषसद्भावात्, सोऽप्रतिहतयथार्थज्ञानामृषीणामप्यृषिर्महर्षिशब्देनोक्तः। लोकेऽपि च दृश्यते-मुखं विहाय यदि नेत्रे चरणयोः क्रियेतां तदा किं स्यादिति प्रश्ने, सर्वेषामुत्तरं पृथक्-पृथक् भवेत् खण्डज्ञानत्वाद्=अपूर्णज्ञानवत्त्वादित्यर्थः।

भवति चात्रास्माकम्—

महर्षिरेतस्य कृताकृतस्य
यथार्थवित् सन् कुरुते जगन्ति।
स एव धर्मान् स उ वोपदेशान्
नृभ्योऽददाल्लोकभवञ्च सत्यम्।।७८३।।

कपिल इति- 'कमु कान्तौ' भौवादिको धातुः 'कवृवर्णे' वा; एतयोरन्यतरस्मात् ***''कमेः पश्च''*** (१।५५) इत्युणादिसूत्रे ***''कवेः पश्च''*** इत्यपि केषाञ्चिन्मते पाठादिलच् प्रत्ययः। उभयत्रापि पकारोऽन्तादेशोऽतोऽर्थभेदेऽपि न रूपभेदः, कपिल इति।

आचार्य इति-आङ्पूर्वः 'चर गतिभक्षणयोः' इति भौवादिको धातुः ***''चरेराङि चागुरौ''*** (पा० ३।१।१००) इति वार्तिकेन गुरुवाच्याभावे यत्प्रत्ययो, विधीयते। अतो गुरुवाच्ये ***''ऋहलोर्ण्यत्''*** (पा० ३।१।१२४) इति ण्यत्प्रत्ययः, णित्त्वाद् उपधावृद्धिश्च, आचार्यः। आचरति स्वयं, शिष्येभ्यश्चाचारं ग्राहयति इत्याचार्यः। यथा हि सनक्षत्राः सूर्यादयो ग्रहा दृश्यदृष्ट्या चरिष्णवः, तथायं सर्वस्यान्तरतो बाह्यतश्च सर्वमाचारयति गतिं प्रदाय व्यवस्थापयति। अतः स सर्वेषामाचार्यः। कपिलश्चासावाचार्यः कपिलाचार्यः। आवृणोति च, चरति चेति कपिलाचार्यः सूर्यः, स हि सर्वं गर्भमिवात्मना वृणोति, कामयते वा भावाभावौ प्राणिनामिति कपिलाचार्यः सर्वगतो विष्णुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

विश्वं स लोके कपिलः पुराणः
[1]यायत्यमानं प्रकरोति यस्मात् ।
आचार्य उक्तस्तत एव तं वा
स्तुवन्ति गायन्ति नमन्ति सर्वे ।।७८४।।

इति खण्डशो व्याख्यातमिदं नाम।

समूहालम्बनात्मकश्च महर्षिः कपिलाचार्यः, बाहुलकात्संज्ञायां सुपोऽलुक् तेनेदमेकं नाम, गणेशीलालवत्।

भवति चात्रास्माकम्—

महर्षिः कपिलाचार्यः सर्वहृद्गह्वरं गतः ।
आवृत्य गमयत्येतद्विश्वं चक्रमतन्द्रितः ।।७८५।।

कृतज्ञः—५३२

"डुकृञ् करणे" धातुरनिट्, तस्मात् कर्मणि क्तः, गुणाभावः। कृतकर्मोपपदाद् 'ज्ञा अवबोधने' धातोः ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) सूत्रेण कः प्रत्यय आतो लोपः, कृतं जानातीति कृतज्ञ इति। लोके यथा कर्ता स्वकृतानि कार्याण्यवगच्छति, पक्षिणश्च स्वकृतान्नीडान्न विस्मरन्ति बहु दूरं गता अपि। परन्तु कृतज्ञविधौ व्यभिचारो दृश्यते मनुष्यादीनाम्। कृतज्ञनाम्नो भगवतो विष्णोश्च कृतज्ञविधौ व्यभिचारो न भवति, स्वकृतज्ञत्वेन सर्वं व्यश्नुते सः।

मन्त्रलिङ्गञ्च—

अतो विश्वान्यद्भुता चिकित्वाँ अभि पश्यति।
कृतानि या च कर्त्वा। ऋक् १।२५।११।।
इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च।
यमर्का अध्वरं विदुः। ऋक् ८।६३।६।।

महत्त्वात् तमसः परत्वाच्च विष्णोः कृतविषयकं ज्ञानं निर्व्यभिचारम्। तदुक्तम्-**"यस्य नाम महद्यशः"** (यजुः ३२।३) इति **"तमसः परस्तात्"** (यजुः ३१।१८) इति च।

---

१. 'यती प्रयत्ने' इत्यस्माद् यङन्तात् शानजन्तं विश्वविशेषणम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

कृतज्ञनामा भगवान् स विष्णुः
कृतानि जानाति जगन्ति विश्वा ।
कैर्हेतुभिः कुत्र कदा कथं च
कियद्वयस्कानि कृतानि तेन ।।७८६।।

मेदिनीपतिः—५३३

मेदिनी-"ञिमिदा स्नेहने" ञि-इत् भौवादिको धातुः ततः ***"सर्वधातुभ्योऽसुन्"*** (४।१८६) इत्युणादिरसुन् प्रत्ययः, तस्मिंश्च गुणे मेदस्, पृषोदरादिलक्षणः सलोपः। अदन्तो वा "रज-शिर" इतिवत्। यथा रज इत्यदन्तः सान्तोऽपि, एवं शिर इत्यदन्तः, शिरस् इति सान्तः। यदाऽदन्तो मेदस्तदा घञा तस्य सिद्धिः। मेदाच्च मत्वर्थीयः ***"अत इनिठनौ"*** (पा० ५।२।११५) इतीनिः प्रत्ययः। यस्येति लोपः, ततः स्त्रियां ***"ऋन्नेभ्यो ङीप्"*** (पा० ४।१।५) सूत्रेण नान्तलक्षणो ङीप् प्रत्ययस्ततो मेदिनी।

मेदिनी नाम पृथिवी, सा हि समुद्रजलेनान्तरिक्षजलेन च स्निग्धा सती प्राणिनां मित्रवद्धितं सम्पादयत्यतो मेदिनीत्युच्यते। स्नेहसम्पादकजलाभावे च सा सस्योत्पादनेऽक्षमा भवति, तत्र सति दुर्भिक्षे प्राणिनो म्रियन्ते क्षुधार्ताः। लोके च स्पष्टं दृश्यते-शोषमुपयाते शारीरे जले म्रियते प्राणी, **"पुरुषोऽयं लोकसम्मितः"** इति चरके (शारीरस्थान अ० ५) पुनर्वसुरात्रेयः। तस्या मेदिन्याः पतिर्मेदिनीपतिः। पतिशब्दो व्युत्पादितः पूर्वत्र। मन्त्रलिङ्गम्—

इहा यन्तु प्रचेतसो मेदिनीर्वचसो मम।
यथेमं पारयामसि पुरुषं दुरितादधि ।। अथर्व ८।७।७।।

यथायं निजव्यवस्थया कल्पान्तं पृथिवीं विस्तीर्णां मेदिनीमप्सम्भूतां **"तम आसीत्तमसा गूढमग्रेऽप्रकेतं सलिलं सर्वमा इदम्"** (ऋक् १०।१२६।१) पाति रक्षतीति। तथैवेदं शरीरं द्रुताभ्यां=द्रवीभूताभ्यां रजःशुक्राभ्याञ्जातं जीवेन मरणान्तं परिरक्ष्यतेऽतः समान एव मेदिनीपतिर्भगवान् विष्णुरात्मा च। शरीरपतिर्वात्मा।

भवति चात्रास्माकम्—

उर्वीपति र्विष्णुरिलां प्रपातैः
संवर्द्धय सम्पोष्य धराञ्च पोष्यैः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुण्यानि संवर्द्धय जनेषु विष्टो
निजंस्वरूपं कुरुते प्रकाश्यम्।।७८७।।

त्रिपदः—५३४

त्रिशब्दस्तरतेर्ड्रिप्रत्ययान्तो व्युत्पादितः प्राक्। पदम्-''पद गतौ'' धातुर्दैवादिकस्ततः ***''खनो घ च''*** (पा० ३।३।१२५) सूत्रेण बाहुलकात् कर्मणि घः प्रत्ययः। यद्वा **''खलो भगः पदं च''** इति पठ्यते कैश्चित्, किन्तु तत्र पदमञ्जरीकारो नानुकूलः।

यद्वा खनो 'घ' विधाने घित्त्वस्य प्रयोजनाभावः। यतो हि घिति चजयोः कुत्वं भवति, खनि च तयोरसद्भाव एव। अतो घित्करणाज्ज्ञाप्यते, खनधातोरन्यतोऽपि घः प्रत्ययो भवतीति। यथा ***खलो भगः पदम्*** इत्यादि। त्रिभिः पद्यते ज्ञायत इति त्रिपदः।

त्रीणि तत्त्वानि पदानि-यथा—

त्रिप्रतिष्ठिते—अथर्व १०।२।३२।।
त्रिबन्धु-ऋक्—७।३७।७।।
त्रिर्बर्हिषि-ऋक्—१।१८१।६।।
त्रिभुजम्-अथर्व—८।६।२।।
त्रिमन्तुः-ऋक्—१।११२।४।।
त्रिमाता-ऋक्—३।५६।५।।
त्रिमूर्धानम्-ऋक्—१।१४६।४।।
त्रियुगम्-ऋक्—१०।६७।१।।
त्रियोजनम्-अथर्व—६।१३१।३।।
त्रिबन्धुरः-ऋक्—१।११८।१।।
त्रिवरूथः-ऋक्—६।१५।६।।
त्रिधातु-ऋक्—७।१०१।२।।
त्रिवर्तु-ऋक्—७।१०१।२।।
त्रिवृत्-ऋक्—१।१४०।२।।
त्रिवृषः-अथर्व—५।१६।३।।
त्रिशीर्षाणम्-ऋक्—१०।८।८।।

इति संक्षेपतः त्रिपदस्यैव माहात्म्यं वाच्यभेदाद्धातुभेदः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रित्वमधिकृत्य-'त्रिविक्रम' शब्दे यद् व्याख्यातं तत्तत्र द्रष्टव्यम्। ज्ञाने, गमने, प्राप्तौ च सर्वस्य जगतः स्थितिरिति स सर्वेश्वरः संक्षेपतस्त्रिपद उच्यते, सूर्यो वा त्रिपदः।

भवति चात्रास्माकम्—

त्रिधा विभक्तं त्रिपदेन सर्वं
तत्रास्ति गम्यस्त्रिपदः स विष्णुः ।
एवं हि यः पश्यति सर्वथा तं
पश्यत्सु तं सूक्ष्मदृशं हि मन्ये ।।७८८।।

त्रिदशाध्यक्षः—५३५

त्रिशब्दो बहुशो व्याख्यातः।

दशा—"दंश दशने" भौवादिकाद्धातोः ***"गुरोश्च हलः"*** (पा० ३।३।१०३) सूत्रेण स्त्रियां भावे 'अ' प्रत्ययस्ततष्टाप् दशा, पृषोदरादित्वान्नलोपः।

यद्वा-पा० ३।३।५८ सूत्रस्थवार्तिकेन ***"घञर्थे कविधानम्"*** इति कः प्रत्ययः, तस्मिंश्च ***"अनिदितां हल उपधायाः क्ङिति"*** (पा० ६।४।२४) सूत्रेण नकारलोपः, स्त्रियां टाप्।

अध्यक्षः— अधिपूर्वकः 'अक्षू व्याप्तौ' भौवादिको धातुः, ततः पचाद्यच्-अधेरिकारस्य सांहितिको यण्, अध्यक्षः। तिसृणां दशानामध्यक्षः प्रेक्षको व्यापकतया यः स त्रिदशाध्यक्षः। त्रिपदनामव्याख्याने यदुक्तं तदिहापि ज्ञेयम्। यद्वा-त्रिदशाः देवाः तेषामध्यक्षः त्रिदशाध्यक्षः, सुराध्यक्षनामव्याख्याने यदुक्तं तदिहापि ज्ञयेम्। त्रिदशाध्यक्षः सुराध्यक्ष इति समानोऽर्थः।

भवति चात्रास्माकम्—

स विष्णुस्त्रिदशाध्यक्षो देवाध्यक्षोऽपि स स्मृतः ।
शम्भुर्दशासु सर्वासु सर्वं व्याप्नोत्यशेषतः ।।७८९।।

महाशृङ्गः—५३६

महच्छब्दो व्युत्पादितचरः, आत्वदीर्घत्वादिकं च।

शृङ्गः-'शृ हिंसायाम्' क्रैयादिको धातुः ***"शृणातेर्ह्रस्वश्च"*** (१।१२६) इति सूत्रेणौणादिको गन् प्रत्ययः, कित्त्वातिदेशः प्रत्ययस्य नुडागमश्च, धातोश्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ह्रस्वादेशः क्रियते। ***नेड् वशि कृति*** (पा० ७।२।८) इत्यनेनेण्निषेधः। कित्त्वाद् गुणाभावः, अनुस्वारपरसवर्णौ च। शृणाति हिनस्तीति शृङ्गः, महान् शृङ्गो यस्य स महाशृङ्गः। महाशृङ्गनाम्नः परिपुष्ट्यै वैदिकं प्रकरणमुपन्यस्यते। तद्यथा—

साहस्रस्त्वेष ऋषभः पयस्वान् विश्वा रूपाणि वक्षणासु बिभ्रत्।
भद्रं दात्रे यजमानाय शिक्षन् बार्हस्पत्य उस्रियस्तन्तुमातान् ।

इत्युपक्रम्य सूक्तम् (अ० ६।४)-

शृङ्गाभ्यां रक्ष ऋषत्यवर्तिं हन्ति चक्षुषा।
शृणोति भद्रं कर्णाभ्यां गवां यः पतिरध्न्यः। अथर्व ६।४।१७।।
पिशङ्गरूपो नभसो वयोधा ऐन्द्रः शुष्मो विश्वरूपो न आगन्।
अथर्व ६।४।२२।।
सरस्वती मन्युमन्तं जगाम। अथर्व १६।४०।१।।

अत्र सूर्यचन्द्रौ महाशृङ्गौ। विश्वानि रूपाणि बिभर्ति ऋषभः=इन्द्रः। एवमन्यत्राप्युपमीयत ऋषभेण—

चत्वारि शृङ्गास्त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश ।।
ऋक् ४।५८।३।।

भवति चात्रास्माकम्—

स एव सूर्यः स उ चन्द्रमा वा
तावेव लोकं विहतोऽथ पातः।
यस्तौ नियम्यारभते च विश्वं
लोके महाशृङ्गपदेन विष्णुः ।।७६०।।

इन्द्रो दाधार पृथिवीम्। मैत्रा० सं० ४।१४।७।।
नेन्द्रादृते पवते धाम किञ्चन। ऋक् ६।६६।६।।

उभयत्र इन्द्रः सूर्यः।

कृतान्तकृत्—५३७

कृतान्तकृदिति-करोतेः कर्मणि निष्ठा कृत इति, 'अम गत्यादिषु' तस्मादुणादिस्तन् प्रत्ययः-अन्त इति। 'कृती छेदने' धातोः क्विप्, कृन्तति छिनत्तीति कृत्। करोतेर्वा क्विपि तुकि करोतीति कृदिति। कृतस्य अन्तं करोतीति कृतान्तकृत् विष्णुः। कृतं कार्यं पुनस्तत्कारणेऽन्तः समावेशयतीति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतान्तकृत्। लोकेऽपि दृश्यते, मनुष्यः स्वकृतं कर्म सम्पादितफलं समाप्नोति विनाशयति वा। यथा च भुक्तमन्नादि, यथापेक्षितं शारीरोपकाररूपं फलं सम्पाद्य पुनर्मलरूपतामापद्य स्वकारणे मृदि निलीयते। सैषा व्यवस्था विष्णोरेवास्ति प्रतिप्राणि विहिता। अथापरमतोऽपि स्थूलमुदाहरणम्-यथा कश्चित् कृषीवलः क्षेत्रे बीजं वपति, सिञ्चति च, रक्षति च, परिपक्वे च सस्ये तत्कृन्तति=लुनाति=छिनत्ति। अतः स कृतान्तकृदेव। एवं सर्वमिदं जगत्तमेवानुकुरुते विष्णुमिति।

मन्त्रलिङ्गञ्च—

अनन्तं विततं पुरुत्रानन्तमन्तवच्चा समन्ते ।
ते नाकपालश्चरति विचिन्वन् विद्वान् भूतमुत भव्यमस्य।

अथर्व १०।८।१२।।

भवति चात्रास्माकम्—

कृतान्तकृद्विष्णुरिदं समस्तं
वितत्य काले कुरुतेऽन्तवत्तत्।
एवं हि यः पश्यति धैर्यधृष्णु-
र्न मोहमभ्येति कृतान्तजं सः।।७६१।।

❖ ❖ ❖

महावराहो गोविन्दः सुषेणः कनकाङ्गदी।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः।।७१।।

५३८ महावराहः, ५३९ गोविन्दः, ५४० सुषेणः, ५४१ कनकाङ्गदी। ५४२ गुह्यः, ५४३ गभीरः, ५४४ गहनः, ५४५ गुप्तः, ५४६ चक्रगदाधरः।

महावराहः—५३८

महाशब्दः प्राक् व्युत्पादितो बहुशः।

वरः-"वृञ् वरणे" सौवादिको धातुस्तस्माद् ***"ग्रहवृदृनिश्चिगमश्च"*** (पा० ३।३।५८) सूत्रेण कर्तृभिन्ने कर्मादिकारके अप् प्रत्ययो गुणो रपरः, वर इति।

आङ्पूर्वको "हन हिंसागत्योः" आदादिको धातुस्ततः ***"अन्येष्वपि दृश्यते"***

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(पा० ३।२।१०१) सूत्रेण डः प्रत्ययः टिलोपः, आह इति। महावरश्चासावाहः= महांश्चासौ वराह इति वा महावराहः। महावराहो विष्णुः सूर्यश्च। स हि महद्भिर्व्रियते, स एव चाहन्ति वृत्रं तमो वा। यथा बृहद्भानुरिति व्यापकधर्मिणि सूर्ये विष्णौ चान्वितार्थः। दृश्यते चान्यत्र बहुत्र महाशब्दस्य विशेषणता। यथा **महादेवः** (अथर्व ५।२१।११), **महाधनम्** (ऋक् ६।८६।१२), **महामहः** (ऋक् १०।११६।१२), **महावीरः** (ऋक् १।३२।६) इति निदर्शनमात्रम्।

मन्त्रलिङ्गम्—

हरिरर्षा पुनानः। (ऋक् ६।६७।६) इत्यनुवर्तमाने—

प्र काव्यमुशनेव ब्रुवाणो देवो देवानां जनिमा विवक्ति।
महिव्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येति रेभन्।।

(ऋक् ६।६७।१०)

उत्तरत्र च **''तिग्मशृङ्गः''** (ऋक् ६।६७।६) **''हन्ति रक्षः''** (ऋक् ६।६७।१०) इति सूर्यविशेषणम्। वदति च वेदो वराहं विशेषयन्—**''षडक्षं त्रिशीर्षाणम्.... विप्रा वराहम्।''** (ऋक् १०।६६।६) न च लोके षण्नेत्रस्त्रिशिराः वा कश्चिद् वराहः।

महताम्=बृहतामुदयास्ताभ्यामावृत्तिमाचरतां ग्रहाणां तेजांसि आहन्तीति सूर्यो महावराहः। विष्णुना च सर्वाणि तेजांस्यभिभूयन्ते स्वतेजसाऽतः स महावराह इत्युक्तः।

मन्त्रलिङ्गञ्च—

यथा सूर्यो नक्षत्राणामुद्यंस्तेजांस्याददे ।
एवा स्त्रीणाञ्च पुसां च द्विषतां वर्च आ ददे।। अथर्व ७।१३।१।।

तत्र च स भगवानेव सूर्यादिकं स्वज्योतिषा ज्योतिष्मन्तं कुर्वाणः **''विश्वं शृणोति पश्यति''** (ऋक् ८।७८।५) इति सुश्रवाः सुदर्शनश्चोक्तः, तत्रैव सुदर्शननामव्याख्याने द्रष्टव्यम्।

यद्वा-अह व्याप्तौ, इति छान्दसो धातुस्तस्मात् पचाद्यचि, अह्नोतीति अहः। महान्ति अवराणि च व्याप्नोतीति महावराहः परापरव्यापक इत्यर्थः।

भवति चात्रास्माकम्—

महावराहो भगवान् स विष्णु-
र्महावराहं कुरुते च सूर्यम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महाधनोऽसौ स महावरो वा
सुदर्शनोऽयं स्तुवते प्रजास्तम् ।।७६२।।

गोविन्दः—५३६

गोविन्द इति-'गम्लृ गतौ' धातोः ***''गमेर्डोः''*** इत्युणादिडोप्रत्यये गोशब्दो निष्पद्यते।

'विद्लृ लाभे' इति तौदादिककाद्धातोः पा० ३।१।१३८ सूत्रस्थेन ***''गवादिषु विन्देः संज्ञायाम्''*** इति वार्तिकेन कर्तरि शः प्रत्ययः क्रियते। ***''शे मुचादीनाम्''*** (पा० ७।१।५६) इति नुम्, अनुस्वारपरसवर्णौ, ***''सार्वधातुकमपित्''*** (पा० १।२।४) इति ङिद्वद्भावाद् गुणाभावः। ***''अतो गुणे''*** (पा० ६।१।६७) इति पररूपे विन्द इति सिध्यति। एवञ्च गा विन्दतीति गोविन्दः गच्छतीत्यर्थानुगमात् सर्वं गमनधर्मकं पदार्थजातं गोपदेनोच्यते। दूरं दूरतरञ्च गमनान्मनो गौः, इन्द्रियाण्यपि विषयान् गच्छन्ति अतस्तान्यपि गावः, देहोऽपि एकस्थानादन्यस्थानं गच्छत्यतो गौः, सूर्योऽपि गमनधर्मा गौः। एवं सर्वे ग्रहा अपि गच्छन्तीति गोशब्देनोक्ता भवन्ति। पार्थिवं सर्वं पदार्थजातं षड्भावविकारैर्गतिमदिति तद्विन्दते प्राप्नोति सर्वगतत्वेनेति गोविन्दः। लोकेऽपि दृश्यते देहे देहावयवे वा या गतिमत्ता सा तावदेव यावद्देहे देही तिष्ठति। अतो देहस्य गतिमत्तां विदधज्जीवोऽपि गोविन्दः। विषयप्राप्त्यर्थमिन्द्रियाणां गतिं प्रददन्मनोऽपि गोविन्दः। एवं सर्वत्रोहनीयम्। **गोविदां पति**रिति नाम्नो व्याख्यापि द्रष्टव्या। सूर्यस्य गोत्वपक्षे **''आयं गौः''** (ऋक् १०।१८९।१) इति मन्त्रलिङ्गम्।

भवति चात्रास्माकम्—

[1]जगत्स्वनाम्नैव गतिं व्यनक्ति
गतौ स्थितं तत्तमनक्ति विष्णुम्।
मनश्च गोस्तानि[2] मनोऽनुगानि
व्यञ्जन्ति जीवं [3]स पुनस्तमेति।।७६३।।

---

१. गच्छतीति=जगत्; २. तानि=इन्द्रियाणि गोवाच्यानि; ३. स जीवः पुनस्तं गोविन्दं विष्णुं प्राप्नोति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुषेणः—५४०

"षिञ् बन्धने" सौवादिको धातुः, ***"धात्वादेः षः सः"*** (पा० ६।१।६२) इति मूर्धन्यषकारस्य दन्त्यसकारादेशः। ततः—***"कृवृजसिद्रुपन्यनिस्वपिभ्यो नित्"*** (३।१०) इत्युणादिर्निन्नः प्रत्ययो विधीयते। धातोरनुदात्तत्वादिडभावः, गुणश्च। ततः स्त्रियां टाप्, सवर्णदीर्घत्वं च। ततः सुशब्देन समासः-शोभना=उत्तमा सेना यस्य स सुषेणः, ***"गोस्त्रियोरुपसर्जनस्य"*** (पा० १।२।४८) इति ह्रस्वत्वम्, ***"एति संज्ञायामगात्"*** (पा० ८।३।९९) इति षत्वञ्च। ***"अट्कुप्वाङ्नुम्व्यवायेऽपि"*** (पा० ८।४।२) इति सूत्रेण णत्वम्, सुषेणः।

मन्त्रलिङ्गञ्च—

अयमुपर्यर्वाग्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानीग्रामण्यौ।

यजुः १५।१६।।

ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च।
अन्तिमित्रश्च दूरे अमित्रश्च गणः। यजुः १७।८३।।

सुष्ठु=सम्यग्वा सिनोति=बध्नातीति सुषेणः, सम्यग् विश्वं व्यवस्थया बद्धं तेनातो भगवान् विष्णुः सुषेणः।

लोकेऽपि च पश्यामः—तथा हि—अपयातेऽपि जीवे शरीरमिदं तदेकदेशाङ्गुल्याकर्षणेन सर्वमाकृष्टं भवतीति, व्यनक्ति तस्य भगवतः सुषेणत्वमिति सुबद्धत्त्वाद्धेतोः। एवमपयातेऽपि जीवे न विश्लिष्यन्ति सन्धिबन्धनानि शरीरस्येत्यात्मापि सुषेण उच्यते। विशदं 'नक्षत्री' नामव्याख्याने द्रष्टव्यम्।

भवति चात्रास्माकम्—

स विष्णुरेकः कथितः सुषेणः
सितं समस्तं न वियौति तेन।
मृतोऽपि देहश्च सुषेणबद्धो
नित्यं तमंक्त्वा [1]चितिमभ्युपैति।।७६४।।

कनकाङ्गदी—५४१

कनकः—"कनी दीप्तिकान्तिगतिषु" भौवादिको धातुस्तस्मात् ***"क्वुन्***

१. श्मशाने चितां प्राप्नोति, भस्मीभवतीत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिल्पिसंज्ञयोरपूर्वस्यापि'' (२।३२) इत्युणादिसूत्रेण क्वुन् प्रत्ययः। अपूर्वस्येत्यस्याविद्यमानपूर्वस्येत्यर्थः, अपिशब्दाद्विद्यमानपूर्वस्यापि। वोरकादेशः। कनक इति । कनति प्रकाशते, कन्यते गम्यते वेतस्ततो व्यवहर्तुमिति कनकः सुवर्णं गोधूमो वा, 'अन्नविशेषो गेहूं-पदवाच्यः।'

अङ्ग-अगि गत्यर्थको भौवादिको धातुरिदित्, इदित्त्वान्नुम्, पचाद्यच् प्रत्ययश्च, अङ्गति गच्छतीति, अङ्गः। अङ्गनं वा अङ्गो गतिः। कनकश्च अङ्गश्च कनकाङ्गौ, तौ ददातीति कनकाङ्गदः, कनकाङ्गकर्मोपपदाद् ''डुदाञ् दाने'' धातोः ***''आतोऽनुपसर्गे कः''*** (पा० ३।२।३) इत्यनेन कः प्रत्ययः, आल्लोपः, ततो मत्वर्थीयः ***''अत इनिठनौ''*** (पा० ५।२।११५) इतीनिः प्रत्ययः, ***''यस्येति च''*** (पा० ६।४।१४८) इत्यकारलोपः। इन्नन्तलक्षणो दीर्घः सौ, कनकाङ्गदी।

मन्त्रलिङ्गञ्च—

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।

यजुः ३३।४३।।

भावप्रधानं मन्त्रलिङ्गम्—

साध्वर्या अतिथिनीरिषिराः स्पार्हा सुवर्णा अनवद्यरूपाः ।
बृहस्पतिः पर्वतेभ्यो वितूर्या निर्गा ऊपे यवमिव स्थिविभ्यः।

ऋक् १०।६८।३।।

सुद्योतनमधिकृत्य—

अस्य त्वेषा अजरा अस्य भानवः सुसंदृशः सुप्रतीकस्य सुद्युतः।
भात्वक्षसो अत्यक्तुर्न सिन्धवोऽग्ने रेजन्ते अससन्ते अजराः ।।

ऋक् १।१४३।३।।

एवञ्च वक्तुमर्हम्-यः प्रकाशमानेभ्यः प्रकाशं दीप्तिं गतिञ्च ददाति, स सर्वत्र व्याप्तः सर्वेश्वरो विष्णुः कनकाङ्गदी इत्युच्यते।

लोकेऽपि च पश्यामः—सुवर्णस्य दीप्तिमतो गमनशीलस्य निमेषोन्मेषाभ्यां दृशिक्रियां कुर्वाणस्य नेत्रस्य प्रकाशयिता आत्मा शरीरे वर्तमानः सन् कनकाङ्गदी। आत्मन्यपयाते शरीरात् नेत्रं निष्प्रभं निर्निमेषोन्मेषञ्च भवति गतिहीनम्। एवं लोको वेदेन साम्यं भजति।

भवति चात्रास्माकम्—

नूनं हि विष्णुः कनकाङ्गदी स्यात्
तस्यैव दीप्त्या द्युतिमज्जगत्स्यात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बद्धं गतौ सर्वमिहास्ति तेन
जीवोऽपि देहे कनकाङ्गदीव ।।७६५।।

सुवर्णवर्णः, **हेमाङ्गः** इति नाम्नोरप्येतद् भावप्रधानं व्याख्यानं ज्ञेयम्। यथास्थानञ्च वैशिष्ट्यं द्रष्टव्यम्।

गुह्यः—५४२

गुह्य इति—'गुहू संवरणे' धातुर्भौवादिक ऊदित्। ततः ***''शसिदुहिगुहिभ्यो वेति वक्तव्यम्''*** इति पा० ३।१।१०६ सूत्रस्थवार्तिकेन क्यप् प्रत्ययो विभाषया, पक्षे च ण्यद् भवति। गुह्यते संव्रियते, यद्वा गूहितुं संवरितुं योग्यं सर्वमस्येति गुह्यः। यद्वा गुह्यते सर्वत्रान्तर्हितो भवतीति गुह्यः।

यद्वा गुहायां हृदयरूपायां वर्तमानो गुह्यः ***''तत्र भवः''*** इत्यधिकारे ***''शरीरावयवाद्यत्''*** (पा० ४।३।४६) इति यत्प्रत्ययस्ताद्धितः। हृदयवर्ती सोऽनुभूतिं ददाति अतो गुह्यः पुण्डरीकाक्षः, पुण्डरीकाक्षे यद् व्याख्यातं तदिहापि द्रष्टव्यम्।

मन्त्रलिङ्गञ्च—

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजुः ४०।५।।

इति मन्त्रलिङ्गात् संवृतः सर्वतो भगवान् विष्णुरेव प्रकाश्यते वेदैर्वेदविदैश्च।

भवति चात्रास्माकम्—

गुह्यः सः विष्णुः कुरुते समस्तं
गूढं जगत्स्वस्य च गुह्यलिङ्गात्।
अन्तः स विश्वस्य बहिस्तथैव
गुह्यो गुहायां कुरुते [1]विरामम् ।।७६६।।

तत्र मन्त्रलिङ्गञ्च—

सोम रारन्धि नो हृदि गावो न यवसेष्वा।
मर्य इव स्व ओक्ये। ऋक् १।९१।१३।।
हृदा पश्यन्ति मनसा विपश्चितः। ऋक् १०।१७७।१।।

१. विरामम्-विशेषं रमणम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गभीरः—५४३

गभीर-गम्भीरशब्दौ उणादौ (४।३५) निपात्येते ईरन्प्रत्ययान्तौ । तत्र ''गम्लृ गतौ' धातुस्तस्मादीरन् प्रत्ययः भकारश्चान्तादेशः। तेन गभीरः, निपातनेन नुमि च गम्भीरः। द्वयोरर्थः समान एव गच्छतीति गभीरो गम्भीरो वा।

केचित्तु 'गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च' इति धातोः ईरन् प्रत्ययं विधाय धातोर्ह्रस्वत्वं भकारादेशं, निपातनान्नुमञ्च विधाय गभीर-गम्भीरशब्दौ साधयन्ति। गाध्यते प्रतिष्ठाविषयो लिप्साविषयश्च भवतीत्यर्थः, अर्थात् प्रतिष्ठमानो लिप्स्यमानो वा गभीर इति। बाहुलकाच्च कट्यत इति कटीरम्-हरीतकी। कुडि धातोः कुडीरम्, कुण्डेर्नुम्प्रतिषेधोऽपि बाहुलकादेव (द्र० दशपादी उणादिवृत्तिः ७।७७)

मन्त्रलिङ्गञ्च—

नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परा यत्।
किमावरीवः कुहकस्य शर्मन्नम्भः किमासीद् गहनं गभीरम् ।
ऋक् १०।१२६।१।।

यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद।
ऋक् १०।१२६।७।।

महामहिमवत्त्वात् स गभीरः। गच्छतीति गभीरः सूर्यः। अगाधशक्तिमत्त्वात् स गभीरो विष्णुः सूर्यो वा। आत्माऽपि अगाधशक्तित्वाद् गभीरो गम्भीरो वा। प्रसूतिपरम्परयानन्तज्ञानत्वान्मनुष्योऽपि गभीरः।

भवति चात्रास्माकम्—

विष्णुर्गभीरः स हि वास्ति सूर्यः
प्रतिष्ठितश्चास्ति चराचरे सः।
विपश्चितस्तं कवयः सदैव
पश्यन्त्यलीकं मनसा हृदन्तः।।७६७।।

मन्त्रलिङ्गञ्च—

हृदा पश्यन्ति मनसा विपश्चितः (ऋक् १०।१७७।१) इति।

गहनः—५४४

'गाहू विलोडने' भौवादिको धातुस्ततो ***''बहुलमन्यत्रापि''*** (२।७८) इत्युणादिसूत्रेण युच् प्रत्ययः, बाहुलकाच्च धातोर्ह्रस्वादेशः,। योरनादेशः, गहनः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विलोडयिता मन्थिता गहनः। मन्त्रलिङ्गञ्च—

दूरे चत्ताय च्छन्त्सद् गहनं यदिनक्षत्।
अस्माकं शत्रून् परि शूर विश्वतो दर्मा दर्षीष्ट विश्वतः।

ऋक् १।१३२।६।।

विलोडनार्थे मन्त्रलिङ्गम्—

संबाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः।

ऋक् १०।८१।३।।

'बाधृ विलोडने' धातोर्बाहुः। स्पष्टीकृतमेतद् विश्वबाहुः (२१३) नामव्याख्याने। लोके चानुभूयते-प्रतिप्राणि लघुगुरुभेदात्मकमान्त्रयुगलं विलोडनकर्मप्रधानकं प्रतिष्ठापयन् सर्गारम्भाद्यक्षणाद् आरभ्य सर्गान्तं यावद् गाहनगुणको विलोडनगुणको वा विष्णुः सर्वत्र व्याप्तं, गहनाख्यं गुणमव्यक्तमपि व्यनक्ति स्वमिति। उक्तञ्च ऋग्वेदे—**हृदा पश्यन्ति मनसा विपश्चितः** (१०।१७७।१) इति। विपश्चितः= लब्धगुरूपदेशाः। एवं गहनाख्यो विष्णुर्विश्वं व्यश्नुते।

विश्वबाहुरिति (२१३) नामव्याख्याने विशदं व्याख्यातं तत्र द्रष्टव्यम्। तत्रोक्तमिहावगन्तव्यं वा।

भवति चात्रास्माकम्—

विष्णु[1]र्मनोज्ञं [2]गहनं [3]भविष्णुं
[4]विलोडनाधारनिधानदक्षम् ।
यथा शरीरं कुरुते पृथक्शः
पश्यन्ति तं [5]लब्धगुरूपदेशाः।।७६८।।

गुप्तः—५४५

'गुपू रक्षणे' भौवादिको धातुस्ततः कर्मणि क्तः, ऊदित्त्वादिड्विकल्पः, विकल्पेट्कत्वाच्च निष्ठायां *''यस्य विभाषा''* (पा० ७।२।१५) सूत्रेणेण्निषेधः। आयादेशोऽप्यस्य वैकल्पिकः *''आयादय आर्धधातुके वा''* (पा० ३।१।३१) इति सूत्रेण। अत आयादेशाभावपक्षे गुणाभावे च गुप्त इति। स्वयं गुप्तो विश्वं

१. ज्ञानगम्यम्; २. विलोडनाधारस्य कर्तारम्; ३. सत्ताशीलम्; ४. विलोडनाधारमान्त्रं-तत्र भक्ष्य– चोष्य–अवलेह्य– पेयेति चतुर्विधस्याहारस्य भेदको वायुः। तच्च महास्रोतः शब्देनापि संज्ञाप्यते। ५. लोकवेदयोः साम्यं गुरुमुखादधिगतं यैस्ते लब्धगुरूपदेशाः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोपायतीति गुप्तः। यथा त्वक् शरीरमावृणोति, आवृत्य च रक्षति, तथैवायं भगवान् गुप्ताख्यो विष्णुर्जगदिदं निर्माय तस्य रक्षाविधानमपि विधत्ते। अत एवायं गुप्त इति।

मन्त्रलिङ्गम्—

अच्युतच्युत् समदो गमिष्ठो मृधो जेता पुर एतायोध्यः ।
इन्द्रेण गुप्तो विदथा निचिक्यद्धृद्द्योतनो द्विषतां याहि शीभम्।

अथर्व ५।२०।१२।।

भवति चात्रास्माकम्—

गुप्तो ह विष्णुः कुरुते सुगुप्तं
विरच्य विश्वं सकलं चिराय ।
शिल्पी यथा यन्त्रविधानविज्ञो
गोपायतीत्थं भगवान् स गुप्तः।।७६६।।

गोपायतीति शेषः।

चक्रगदाधरः—५४६

चक्रम्—"डुकृञ् करणे" धातुस्ततः ***"घञर्थे कविधानम्"*** (पा० ३।३।५८) इति घञर्थे कः प्रत्ययस्तस्मिंश्च परतः ***"द्विर्वचनप्रकरणे कृञादीनां के"*** इति (पा० ६।१।१२) सूत्रस्थेन वार्तिकेन द्वित्वं, 'कृ कृ अ' इति स्थिते ***"पूर्वोऽभ्यासः"*** (पा० ६।१।४) इति अभ्याससंज्ञा, ***"उरत्"*** (पा० ७।४।६६) सूत्रेणाभ्यासस्य अकारो रपरः, ***"हलादिः शेषः"*** (पा० ७।४।६०) इति 'क कृ अ' इति स्थिते ***"कुहोश्चुः"*** (पा० ७।४।६२) इति चवर्गादेशः। ***"इको यणचि"*** (पा० ६।१।७७) इति यण्-ऋकारस्य रेफश्चक्रमिति।

यद्वा "चक तृप्तौ" इति भौवादिकाद् धातोः ***"चकिरम्योरुच्चोपधायाः"*** (२।१४) इत्युणादिसूत्रेण रक् प्रत्ययः, बाहुलकादुत्त्वाभावः। ***"नेड् वशि कृति"*** (पा० ७।२।८) इतीण्निषेधः। क्रियते चक्यते=तृप्यते वा येनेति चक्रम्।

गदा-"गद व्यक्तायां वाचि" भौवादिको धातुस्ततः पचाद्यच्, स्त्रियाञ्च टाप् प्रत्ययो दीर्घः, गदा व्यक्तं वदतीति। चक्रञ्च गदा च चक्रगदे, ते धारयतीति चक्रगदाधरः। प्रकृते प्रत्यये संज्ञाछन्दसोः ***"रोदेर्णिलुक् च"*** (२।२३) इत्युणादिसूत्रेण णेर्लुग् विधीयते, तदन्येभ्योऽपि धातुभ्यो भवति बाहुलकात्। तेन पाशान् धारयतीत्यर्थे पाशधरः, शूलधरः, चक्रधरः, वज्रधरः, शक्तिधरः, श्रीधरः, धरणीधर

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादयः, सिध्यन्ति। लुग्विधानात् णेः प्रत्ययलोपेन वृद्धिर्न भवति (द्र० पा० १।१।६३) अज्निमित्तो गुणो भवति।

यद्वा—"धृञ् धारणे" भौवादिको धातुस्तस्मात् पचाद्यच्, धरतीति धरः, अन्तर्भावितण्यर्थोऽत्र धरतिः। शेषत्वविवक्षायां चक्रगदयोर्धरश्चक्रगदाधरः।

मन्त्रलिङ्गञ्च—

सूरश्चिद्रथं परितक्म्यायां पूर्वं करदुपरं जूजुवांसम्।
भरच्चक्रमेतशः सं रिणाति पुरो दधत् सनिष्यति क्रतुं न।।

ऋक् ५।३१।११।।

एवं बहुत्र मन्त्रेषु चक्रशब्दः प्रयुक्तोऽस्ति। यथा—"**द्वे ते चक्रे**"

ऋक् १०।८५।१६।।

भवति चात्रास्माकम्—

चक्रं हि तद्येन करोति विश्वं
दधाति तच्चक्रधरोऽप्यतोऽसौ।
सूर्योऽपि चक्रं भुवनानि चक्रं
चक्रं विना नास्ति जगद्धि किञ्चित्।।८००।।

वेदोऽस्ति वाचां निचयः पुराणो
गदास्ति वाग् धारयते च तां सः।
गदाधरः प्राणिनि वाक्प्रवृत्तः
स वाङ्मयं विश्वमिदं तनोति।।८०१।।

मन्त्रलिङ्गञ्च—

मन्द्रो होता नित्यो वाचा यजीयान्। ऋक् १०।१२।२।।

शूरोऽपि, यदि गदां धारयति, गदाधर उच्यते। तथा च—

इयं गदा या समरे सशब्दा
प्रक्षिप्यते द्वेष्टरि मन्युगर्भा।
तां यो दधात्यात्मनि निर्भयः सन्
गदाधरोऽसौ मनुजोऽप्यनिन्द्यः।।८०२।।

❖ ❖ ❖

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः संकर्षणोऽच्युतः।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः ।।७२।।

५४७ वेधाः, ५४८ स्वाङ्गः,५४६ अजितः, ५५० कृष्णः, ५५१ दृढः, ५५२ सङ्कर्षणोऽच्युतः। ५५३ वरुणः, ५५४ वारुणः, ५५५ वृक्षः, ५५६ पुष्कराक्षः, ५५७ महामनाः।

वेधाः—५४७

विपूर्वको "डुधाञ् धारणषोषणयोः" जौहोत्यादिको धातुः, ततः ***"विधाञोवेधश्च"*** (४।२२५) इत्यौणादिकोऽसुन्प्रत्ययापवादोऽसिः प्रत्ययः, स्वरभेदः प्रयोजनम्। विपूर्वस्य धातोर्वेधादेशः, आदेशेऽकार उच्चारणार्थः। असन्तलक्षणो दीर्घः (द्र पा० ६।४।१४) 'वेधाः' इति। विदधातीति वेधा विधाता।

मन्त्रलिङ्गञ्च—

अग्ने कविर्वेधा असि होता पावक यक्ष्यः ।
मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः।।

ऋक् ८।६०।३।।

यद्वा "विध विधाने" तौदादिकाद्धातोः ***"विधतेर्वेध वा"*** (दशपादी उणादि ६।८५) इत्युणादिरसिप्रत्ययो भवति वेधादेशश्च वा भवति विधाः, वेधा वा (द्र० दश० उ० वृत्तिः ६।८५)।

भवति चात्रास्माकम्—

अग्निर्हि वेधाः स कविः स होता
स एव यक्ष्यः स यजिष्ठ उक्तः ।
विश्वं समस्तं विदधाति सान्तं
तस्मिन् ह तस्थुर्भुवनानि विश्वा[1] ।।८०३।।

लोकेऽपि च पश्यामः-आत्मा यावज्जीवं सान्तं शरीरं स्वीयया चेतनशक्त्या बिभर्त्ति, तावदेव च सर्वेन्द्रियप्रचारः यावदात्माधिदेहं विराजते। एवं हि विराट्शक्त्या विराड् इदं जगद् विचित्रचित्ररमणीयतामापन्नं दृश्यते । वेधाः शब्दो हि वेदे बहुत्र प्रयुक्तः प्रत्यग्निसूर्यं विद्योतमानः।

---

१. मन्त्रांशोऽयम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत्।। ऋक् १।१।५।।

स्वाङ्गः—५४८

स्वः—"स्वृ शब्दोपतापयोः" धातोर्डप्रत्ययान्तः प्राग् व्युत्पादितः।

अङ्गमपि' अगि गत्यर्थकधातोः 'कनकाङ्गदी' नामव्याख्याने कृतव्याख्यमिति। स्वस्मिन्निति स्वविरचिते जगति अङ्गं=गमनं यस्य, यद्वा स्वाधिष्ठानकं गमनं यस्येति वा स्वाङ्गो विष्णुः सूर्यो वा। यद्व्यवस्थया सूर्यः स्वयं गमनं करोतीति वा स विष्णुः स्वाङ्गः। बृहद्भानुपदेन वेदे विष्णुरेव सम्बोध्यते। लोके चापि दृश्यते-यावदयं जीवात्मा शरीरे विराजते, तावत् स्वयं तस्याङ्गानि गतिं विदधति, निर्गते चात्मनि न केनापि तान्यङ्गानि अङ्गयितुं चालयितुं वा शक्यन्ते। तथैवायं विष्णुर्यावदिदं विराजं जगद् अधितिष्ठति, स्वाङ्गमयं विश्वमिदं तं स्वाङ्गं विष्णुं व्यनक्ति।

मन्त्रलिङ्गञ्च—

ऊर्ध्वं भानुं सूर्यस्य स्तभायन् दिवो वसुभिररतिर्विभाति।।

ऋक् १०।३।२।।

आ ये धामानि दिव्यानि तस्थुः। ऋक् १०।१३।१।।

स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः।
ईशानादस्य भुवनस्य भूरेर्न वा उ पोषद् रुद्रादसुर्यम् ।

ऋक् २।३३।६।।

भवति चात्रास्माकम्—

स्वान्तः स्थिराङ्गः पुरुरूपभानु-
र्विश्वं समस्तं गमयत्यचिन्त्यम् ।
न कोऽपि तस्यास्ति गतेर्विधाता
स्वाङ्गः स्वयं सर्वगतोऽस्ति यस्मात्।।८०४।।

अजितः—५४६

"जि जये" धातोः कर्मणि क्तः, गुणाभावः, अनिडयं धातुः। जीयते इति जितः, न जितः, अजितः। नञ्तत्पुरुषसमासे नञो नलोपेऽजित इति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जयपराजयौ हि द्विकर्तृकौ। द्वितीयस्य च यत्र तत्र निषेधः श्रूयते। यथा अथर्ववेदे—**''न द्वितीयो न तृतीयश्चतुर्थो न''** (अथर्व १३।४।१५) इति अजितनामैकत्वस्य व्यञ्जकम्। यतो हि स विष्णुरेकोऽतः केन जितः स्यादित्यजित एव सः। स एव चात्मानं वितत्य विश्वरूपेण विश्वं नियमयन् द्वन्द्वाभासो भवति। लोके यथा—सोदर्याणां भ्रातॄणामाकृतीनां भेदकं किञ्चित् लक्षणं भवति, येनायमस्मात् परः, अयञ्चास्मात्पूर्व इति परस्परं तत्पृथक्त्वं ज्ञाप्यते। एतदभावे लोकव्यवहार एव विच्छिद्येत। सैषा लोकव्यवस्था तस्याजितस्य छायाभूता सर्वथा तमजितं व्यनक्ति।

भवन्ति चात्रास्माकम्—

लोकेऽजितः कः स हि विष्णुरेकः
परोऽपरं यस्यति चाधिकर्तुम् ।
न चात्र तस्यास्ति परः समानः
स्वयं स लोकेऽजित आत्मसंस्थः।।८०५।।

एवं हि यो वेत्ति ततं हि विष्णो-
र्व्याप्तं स्वरूपं सकले कले [1]ले ।
मनोविकारैर्वलितः स नान्यं
सङ्क्लेशयन्नात्मसुखानि भुङ्क्ते।।८०६।।

कल इति– कलनं कलः, गणना=संख्यानं वा, तदस्यास्तीति कलो विकारी तस्मिन्। सकलः समानः कलो लो वा यस्य स सकलः सर्वजगद्व्यवहारः। नश्वरमिदं सर्वं नियतायुष्यञ्च सूर्यभगणगतिरूपेण कालेन। तस्मिन् जगति नश्वरे लरूपे।

सर्वं स्वकेऽस्त्यप्रतिमस्वरूपं
मूढो न जानन् धुनुते स्वमन्तः ।
मोहेऽपयाते न [2]परं हि पश्यन्
सुखं शयानोऽजितमेति चान्ते ।।८०७।।

कृष्णः—५५०

''कृष विलखने'' धातो, ***''कृषेर्वर्णे''*** (३।४) उणादिनक्प्रत्ययः अनिडयं,

१. ल इति-लाति=आदत्ते=आदानं वा प्राप्नोतीति लः। यद्वा लातीति ला कर्तरि क्विपि, ला एव लः, स्वार्थेऽणि अवर्णलोपे लः, तस्मिँल्ले। २. परं=अन्यं=द्वितीयमिति। अजितं=विष्णुम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कित्त्वाद् गुणाभवः। ***"रषाभ्यां नो णः समानपदे"*** (पा० ८।४।१) सूत्रेण णत्वम्। बाहुलकाद् वर्णार्थतोऽन्यत्रापि नक् दृश्यते। यथा—**"आ कृष्णेन रजसा वर्तमानो..... रथेना देवो याति भुवनानि पश्यन्।"** यजुः ३३।४३; ३४।३१।।

"आ कृष्णेन" इत्यस्यार्थमन्यभावेन वदति वेदः-"आ रात्रि पार्थिव ँ रजः।"

यजुः ३४।३२।।

द्यावापृथिवी वरुणस्य धर्मणा विष्कभिते अजरे भूरिरेतसा।

यजुः ३४।४५।।

एवं च कर्षणत्वबृंहणत्वोपेतमिदं पार्थिवं जगन्नक्तत्वदिनत्वरूपेण तं भगवन्तं व्यनक्ति। रात्रिः=तमः, दिनं=प्रकाशः। यद्वा रात्रिः=पृथिवी, दिनं=द्यौरिति। द्यावापृथिवी तेनैव वरुणधर्मणा धृते तमेव कृष्णं=विष्कभितारं व्यङ्क्तः। कृष्णशब्दः सप्तपञ्चाशत्तमे नाम्नि व्याख्यातचरस्तत्र द्रष्टव्यः।

लोकेऽपि दृश्यते-चिकित्साविदामेतत् सूत्रं सत्यापयत्यात्मनः स्वरूपं **"चिकित्सितं कर्षणबृंहणाख्यम्"** शार्ङ्गधरसंहिता। अध्याय—१ श्लोक ३।

भवति चात्रास्माकम्—

द्यावापृथिव्योरिदमन्तरं यत्
कृष्णेन सर्वं धृतमस्ति नित्यम्।
यो वेत्ति कृष्णं स हि वेत्ति शुक्लं
छायाऽस्ति कार्ष्ण्यं न जहाति सा स्वम्।।८०८।।

मन्त्रञ्च—**"आत्वेषं वर्तते तमः।"** यजुः ३४।३२।।

त्विष दीप्तौ, त्वेषं=दिनम्।

दृढः—५५१

दृढ इति "दृह वृद्धौ" भौवादिको धातुः, तस्मात् 'क्तः' प्रत्यय। ***"दृढः स्थूलबलयोः"*** (पा० ७।२।२०) इति निपातनाद् इडभावः, तकारस्य ढः, धातु स्थहकारस्य लोपः, दृढ इति। यद्वा "दृहि वृद्धौ' धातोरिदित्त्वात् प्राप्तस्य नुमो नलोपोऽपि निपात्यः, शेषं पूर्ववत्। दृढः स्थूलो बलवान् वा।

लोकेऽपि प्रतिपदं व्यवस्था दृश्यते-यो हि स्वसंबद्धं निजे बले वशीकरोति स दृढ इत्युच्यते। तद्यथा-समुद्रः स्वां परिधिं न जहाति, आसर्गाद् अद्य यावत् पृथिवीं परिमातुमशक्यं जलं वहन्त्यपि नार्द्रतां याति। जलं हि खातेन नीचैस्तरं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्वचिल्लभ्यते, क्वचिच्चोपरिष्टादेव प्राप्तुं सुशकं भवति, पाषाणमयेषु पर्वतेष्वनवरतं जलं स्रवद् दृश्यते, न च पृथिवी तेन आर्द्रा सती नाशं याति, अतः पृथिवी दृढा इत्युच्यते। सेयं स्थूला पृथिवी येन धृता वर्तते सोऽपि तामेव प्रशंसां लभते। यथा भीमसिंहः, 'सिंह इव भीमः' इति।

मन्त्रलिङ्गञ्च—

[१]ता हि क्षत्रं धारयेथे अनु द्यून् दृंहेथे सानुमुपमादिव द्योः।
दृढो नक्षत्र उत विश्वदेवो भूमिमातान् द्यां धासिनायोः ।।

ऋक् ६।६७।६।।

येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।

यजुः ३२।६।।

लोके चापि पश्यामः-शरीरेऽस्थिधातुः पृथिवीवत् दृढं न क्लिद्यति, न चेतरे धातवो व्यतियन्ति शारीरं कर्म, तेनैव दृढेन विष्णुना व्यवस्थापिताः सन्तः। **पुरुषोऽयं लोकसम्मित** इत्युवाच भगवान् पुनर्वसुरात्रेयः, चरक—शारीरस्थाने—३—अध्याय—५। इति च सिद्धान्तः (द्र० पूर्वत्र नाम ५३३, पृष्ठ ५६)। एवं सर्वत्र स व्यापनगुणशीलः स्वेन गुणेन दृढः सन् दृंहति।

भवति चात्रास्माकम्—

दृढः स विष्णुर्निजशक्तियोगात्
स्तभ्नाति विश्वं परितोऽभ्युपेतः।
यथा शरीरेऽस्थि दृढं, तथैव
दृढा धरा वारिनिधिं दधाति ।।८०६।।

सङ्कर्षणोऽच्युतः—५५२

सङ्कर्षणः-समुपसर्गपूर्वः "कृष विलेखने" धातुस्तौदादिको भौवादिको वा, ततो ल्युर्ल्युड् वा, योरनादेशः। लघूपधलक्षणो गुणः। ***"अट्कुप्वाङ्नुम्व्यवायेऽपि"*** (पा० ८।४।२) सूत्रेण णत्वम्। समो मकारस्यानुस्वारः, पाक्षिकः परसवर्णश्च।

संकृषति, सङ्कर्षति, सङ्कर्षयतीति वा सङ्कर्षणः।

---

१. ता-मित्रावरुणौ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एतच्च भावप्रधानं मन्त्रलिङ्गम्—

ओभे अन्ता रोदसी हर्षते हितः। ऋक् ६।७०।५।।

आ उपसर्गो हित इत्यनेन सम्बध्यते।

तस्मै ज्येष्ठाय ब्रह्मणेः नमः। (अथर्व १०।८।१) इत्यधिकृत्य-

यदेजति पतति यच तिष्ठति प्राणदप्राणन्निमिषच्च यद् भुवत्।

तद् दाधार पृथिवीं विश्वरूपं तत् सम्भूय भवत्येकमेव ।।

अथर्व १०।८।११।।

अनन्तमन्तवच्चा समन्ते। अथर्व १०।८।१२।।

मध्या कर्तोर्विततं सं जभार। ऋक् १।१०५।४।।

भवति चात्रास्माकम्—

बालो यथा क्रीडनकं विधाय

स्वचेतसस्तत्र रतिं विधत्ते ।

स्वमेव सर्वं मनुते [1]विरामं

सङ्कर्षयन् तद् गृहमेत्युदस्तः[2] ।।८१०।।

लोकेऽपि च दृश्यते-विपणिस्वामी विपणिमध्यासीनः सर्वमहो व्यवहरन् सायं तां सङ्कृश्य=उपसंहृत्य स्वगृहं प्रत्येति। येयं व्यवस्था लोके दृश्यते सा सङ्कर्षणगुणवतो विष्णोरेवानुकरणरूपा। यथा विपणेः स्वामी विपणिं संहरन् न मोहमेति, तथा विष्णुरिति।

अच्युतः—"च्युङ् गतौ" भौवादिको धातुस्तस्मात् 'कर्तरि' क्तः प्रत्ययः, गुणाभावः अनिट् चायं धातुः। नञ्समासे नञो नकारलोपः।

मन्त्रलिङ्गञ्च—

स पर्वतो न धरुणेष्वच्युतः सहस्रमूतिस्तविषीषु वावृधे।

ऋक् १।५२।२।।

भवति चात्रास्माकम्—

यस्यासनं यद्विधमत्र धात्रा

कृतं स तत्राच्युत एव सर्वः ।

कालेन सर्वं च्यवते ह सर्वं

न चाव्ययोऽसौ च्यवतेऽच्युतोऽतः ।।८११।।

सङ्कर्षणश्चासावच्युतश्च 'सङ्कर्षणाच्युतः' इति सविशेषणकं नाम।

१. विरामं=विक्रीडनम्, क्रीडामयं विविधं साधनम्; २. उदस्तः=औदासीन्यं प्राप्तः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवतश्चात्रास्माकम्—

सङ्कर्षणश्च्यावयतीह सर्वं
पुनर्विधत्तेऽच्युतधर्मकं तत् ।
यथाप्तकालं निखिलञ्च पश्यन्
स्वयं स्वधर्माच्च्यवते न कर्हि ।।८१२।।

यथा वणिक् वृत्तिमुपायमानोऽ-
लङ्कृत्य वस्तूनि पुरस्करोति ।
स्वयं स [1]सर्वेण वृतोऽच्युतः सन्
करोति नित्यं भगवांश्च तद्वत् ।।८१३।।

सारांशः-यथायमात्मा आशरीरं च्युताच्युतानि कर्माणि कुर्वन् स्वयमच्युत एव शरीरमध्यास्ते, तथा भगवानिति।

वरुणः—५५३

"वृञ् वरणे" सौवादिको धातुस्ततः ***"कृवृदारिभ्य उनन्"*** (३।५३) इति उनन् प्रत्यय औणादिकः, तस्मिन् गुणो रपरश्च। ***"अट्कुप्वाङ्नुम्व्यायेऽपि"*** (पा० ८।४।२) सूत्रेण णत्वम्, वरुणः। वृणोति सर्वमावृणोतीति वरुणः। अथवा आव्रियते सर्वमनेनेति वरुणः। मन्त्रलिङ्गम्—

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय।
अथा वयमादित्यव्रते तवानागसोऽदितये स्याम। ऋक् १।२४।१५।।
यजुः १२।१२।। अथर्व ७।८३।४; १८।४।६६।।

सूर्योऽपि वरुणः, तत्र मन्त्रलिङ्गम्—

इमं मे वरुण श्रुधी हवम्। ऋक् १।२५।१६।।
स वरुणः सायमग्निर्भवति स मित्रो भवति प्रातरुद्यन्।
स सविता भूत्वान्तरिक्षेण याति स इन्द्रो भूत्वा तपति मध्यतो दिवम्।
तस्य देवस्य··· मुञ्च पाशान्। अथर्व १३।३।१३।।
इन्द्रं मित्रं वरुणं······। एकं सद् विप्रा बहुधा वदन्ति······।
ऋक् १।१६४।४६।।

---

१. सर्वेण वृतः-सर्वमापन्नः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोके च दृश्यते- स प्रतिप्राणि वर्तमान आत्मा वृणोति विश्वं सकलायुर्भोगाय। यद्वा आत्मनैव नभो जलं पृथिवी च व्रियते यथानिचितसंस्काराणां भावाभावाय।

भवतश्चात्रास्माकम्—

वृणोति यो विश्वमिदं समस्तं
सर्वेण यो वा व्रियते स विष्णुः।
उद्यन् स मित्रः सवितान्तरिक्षे
यन्मध्य इन्द्रोऽस्तमितः स चाग्निः।।८१४।।

एवं वृणोत्याभुवनं स सूर्यः
सर्वेण वासौ व्रियते नभोगः।
यद् भीषया भ्राम्यति चान्तरिक्षे
वृणोति तं सोऽपि महेशमेकम्।।८१५।।

वारुणः—५५४

वरुणशब्दो व्युत्पादितस्तस्मात् *"तत्र भवः"* (पा० ४।३।५३) सूत्रेण भावार्थेऽण् प्रत्ययः, आदिवृद्धिः। *"यस्येति च"* (पा० ६।४।१४८) सूत्रेणाकारलोपो वारुण इति। वारुणो विष्णुर्जलं वा।

मन्त्रलिङ्गम्—

अपां रेतांसि जिन्वति। ऋक् ८।४४।१६।।

अपां मध्ये तस्थिवांसम्।। ऋक् ७।८६।४।।

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।
ऋक् १०।१२६।४।।

अप्रकेतं सलिलं सर्वमा इदम्। १०।१२६।३।।

इयमस्य धम्यते नाडी। ऋक् १०।१३५।७।।

अप्सु ते राजन् वरुण गृहो हिरण्ययो मिथः।
ततो धृतव्रतो राजा सर्वा धामानि मुञ्चतु। अथर्व ७।८३।१।।

प्रास्मत् पाशान् वरुण मुञ्च सर्वान् य उत्तमा अधमा वारुणा ये।
दुःष्वप्न्यं दुरितं निःष्वास्मदथ गच्छेम सुकृतस्य लोकम्।
अथर्व १।६५।४।।

त्रीणि जाना परिभूषयन्त्यस्य समुद्र एकं दिव्येकमप्सु।
ऋक् १।६५।३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोके च पश्यामः-रसमूलकमेवैतच्छरीरं पुष्यति=जीवति। मेदो धातुरेव वायुना शोषितोऽस्थित्वं लभते, शरीरे यद् दृढतमं भवति। तस्माद् वक्तुं शक्यते वारुणं शरीरम्। जलचराणाञ्च शरीरमक्लेद्यं भवति, जलीयांशस्यभूयस्त्वात्। अत एवेदमुपपद्यते, चन्द्रदैवतायां स्त्रियां सूर्यदैवतः पुमान् रेतोरूपं बीजमादधाति वारुणत्वात्।

भवति चात्रास्माकम्—

स वारुणो विष्णुरिदं समस्तं
विश्वं विधत्ते वरुणेन गुप्तम् ।
रजोद्रवः शुक्रमथापि तद्वत्
स चाप्सु बीजं व्यकिरत् पुराणः ।।८१६।।

वृक्षः—५५५

"वृक्ष वरणे" भौवादिकाद्धातोः पचाद्यचि वृक्ष इति। यद्वा-"ओव्रश्चू छेदने" तौदादिको धातुस्ततः ***"स्नुव्रश्चिकृत्यृषिभ्यः कित्"*** (३।६६) इत्युणादिसूत्रेण 'सः' प्रत्ययः, स च किद्विधीयते, अतः ***"ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च"*** (पा० ६।१।१६) इति सूत्रेण यणः स्थाने सम्प्रसारणमृकारः। वृश्च् स इति स्थितौ ***"व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः"*** (पा० ८।२।३६) सूत्रेण षकारान्तादेशः, ततश्च श्चुत्वसम्पन्नस्य शकारस्यापि सकारः वृस् ष् स इति स्थितौ ***"स्कोः संयोगाद्योरन्ते च"*** (पा० ८।२।२६) इत्यनेन संयोगादिसकारस्य लोपः, ***"षढोः कः सि"*** (पा० ८।२।४१) इत्यनेन षकारस्य ककारः ***"आदेशप्रत्यययोः"*** (पा० ८।३।५६) इति सकारस्य षकारादेशः, कषयोः संयोगे प्रातिपदिकसंज्ञायाञ्च सौ वृक्ष इति। वृक्षते च्छायामिति वृक्षस्तरुः, सूर्यः। तथा सूर्यादिकानपि यो वृश्चति स वृक्षो विष्णुः।

मन्त्रलिङ्गम्—

किं स्विद्वनं क उ वा स वृक्ष आस यतो द्यावापृथिवी निष्टतक्षुः।
संतस्थाने अजरे इतऊती अहानि पूर्वीरुषसो जरन्त। ऋक् १०।३१।७।।

यदुक्तं-स सूर्यादिकान् वव्रश्च इति, तत्र मन्त्रलिङ्गम्—

यः सूर्यं य उषसं जजान यो अपां नेता स जनास इन्द्रः।
ऋक् २।१२।७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्यो वृक्ष इत्यत्र मन्त्रलिङ्गम्—

कः स्विद्वृक्षो निष्ठितो मध्ये अर्णसः। ऋक् १।१८२।७।।

वृक्षस्तरुरित्यत्र मन्त्रलिङ्गम्-

वृक्षो न पक्वः। ऋक् ४।२०।५।।

तत्रैव योषाऽपि वृक्षस्तत्र मन्त्रलिङ्गम्—

मर्य्यो नः योषामभिमन्यमानो..........। ऋक् ४।२०।५।।

यो नः शपादशपतः शपतो यश्च नः शपात्।

वृक्ष इव विद्युता हत आमूलादनु शुष्यतु। अथर्व ७।५६।१।।

प्रकृतिर्वृक्षस्तत्र मन्त्रलिङ्गम्—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।

तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति।।

ऋक् १।१६४।२०; अथर्व ६।६।२०; निरुक्त १४।३०।।

यथा च—

यस्मिन् वृक्षे मध्वदः सुपर्णा निविशन्ते स्तुवते चाधि विश्वे।

ऋक् १।१६४।२२।।

लोके च पश्यामः-आत्मा वृश्चति शरीरान्तरात् शरीरं पृथक् करोतीति वृक्ष आत्मा। अमुथैव भगवान् सर्गारम्भे सर्वं वृश्चति=विभजति=पृथक् करोतीति, सनक्षत्रं ग्रहोपग्रहयुक्तं लोकलोकान्तरमिति स वृक्षः। वृक्षः सूर्यो वृश्चति तमः। वृक्षं प्रकृतिः पृथक्-पृथक् करोति स्वोपादानकानि कार्याणि छिदाविषयो वृक्षोऽपि वृक्षः, वृक्षते फलपुष्पगन्धशाखादीनि। मनुष्योऽपि वृक्षः, वृक्षते गुणकर्मायूंषि।

लोकेऽपि दृश्यते-प्रत्येकमिन्द्रियद्वारं खातं=विदारितं=तष्टं भवति, तस्य तष्टा च भगवान् विष्णुरेव वृक्षाख्यः। प्रतिशरीरं कार्यानुसारीण्यस्थीनि केन तष्टानि? तत्रोत्तरं भगवता विधात्रा त्वष्ट्रा। एवं स भगवान् स्ववृक्षत्वरूपेण गुणेन सर्वत्रौतो वृक्षसंज्ञया व्यवह्रियते।

अन्यच्च-यथा भगवान् वृक्षस्तथा माताऽपि वृक्षः, साऽनन्तान्यपत्यानि वृश्चति, पृथक्-पृथक् करोति प्रसूते। इत्थं समानो लोको वेदेन, वेदश्च लोकेनेति।

भवन्ति चात्रास्माकम्—

वृक्षः स विष्णुः स हि वास्ति सूर्य
आत्मा च वृक्षः प्रकृतिश्च वृक्षः।
माताऽपि वृक्षस्तरुरस्ति वृक्षो
वृक्षेण विश्वं विततं महत्तत् ।।८१७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं हि यो वेत्ति निगूढमर्थं
वृक्षस्य वृक्षे च जगत्समस्तम् ।
स एव वृक्षं परितोऽभ्युपेत्य
वृक्षः स्वयं वृश्चति मोहवृक्षम् ।।८१८।।

वृक्ष वरणे धातुमधिकृत्य—

वृणोति शम्भुर्यदिहास्ति दृश्यं
वृणोति सूर्यो भुवनानि पश्यन् ।
वृणोति माता सवनेन पुंसां
वृणोति चात्मा निजमात्रमेकम् ।।८१६।।

पुष्कराक्षः—५५६

पुष्करशंब्द "पुष पुष्टौ" दैवादिकः क्रैयादिको वा धातुस्ततः ***"पुषः कित्"*** (४।४) इत्युणादिसूत्रेण "करन्" प्रत्ययः, स च कित्, कित्त्वविधेर्गुणाभावः। पुष्यतेरनुदात्तत्वादिडभावः, क्रैयादिकात्तु बाहुलकादिडभावश्च, पुष्करः।

अशेः क्सिप्रत्ययेऽक्षिशब्दो (उ० ३।१५५) व्युत्पादितः **लोकाध्यक्ष** इति नामव्याख्याने। पुष्करशब्दस्याक्षिशब्देन सह बहुव्रीहिसमासो ***"बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्"*** (पा० ५।४।१३३) इति षच् समासान्तः। ***"यस्येति च"*** (पा० ६।४।१४८) सूत्रेणेकारलोपः, पुष्कराक्षः। तत्र मन्त्रलिङ्गम्-

गर्भं ते अश्विनौ देवावा धत्तां पुष्करस्रजा। ऋक् १०।१८४।६।।

विश्वे देवा पुष्करे त्वाददन्न। ऋक् ३।३३।१७।।

यद्वा-पुष्करौ चन्द्रसूर्यौ अक्षिणी यस्य स पुष्कराक्षः। तत्र मन्त्रलिङ्गम्—

यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः ।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।

अथर्व १०।७।३३।।

लोकेऽपि दृश्यते-नेत्रयोरूर्ध्वतमस्थाने निवेशो जीवस्य, तस्य ब्रह्मणोऽनुकरणमेव। एवं भगवान् व्यापनशीलो विष्णुः पुष्कराक्षनामा।

भवति चात्रास्माकम्—

अन्तः शयानो हृदये भवे वा
व्याप्नोति विश्वं स हि पुष्कराक्षः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तं पुष्कराक्षं मनसा विपश्चित्
नित्यं हृदा पश्यति वीतमोहः[1] *।।८२०।।*

महामनाः—५५७

महच्छब्दो व्युत्पादितचरः।

मनः-"मन ज्ञाने" धातुर्दैवादिकस्तस्मात् ***"सर्वधातुभ्योऽसुन्"*** (४।१८६) इत्युणादिः 'असुन्' प्रत्ययः। महच्छब्देन मनःशब्दस्य बहुब्रीहिसमासविधानानन्तरं प्रातिपदिकसंज्ञायां सौ असन्तलक्षणो दीर्घः। महामना व्यापकज्ञानवान्=अनन्तज्ञान इत्यर्थः। अत्र मन्त्रलिङ्गम्—

त्वमग्ने सौभगत्वस्य विद्वान् अस्माकमायुः प्र तिरेह देव।

ऋक् १।६४।१६।।

अयं मित्रस्य वरुणस्य धायसेऽवयातां मरुतां हेडो अद्‌भुतः।
मृडा सु नो भूत्वेषां पुनरग्नेः सख्ये मा रिषामा वयं तव ।।

ऋक् १।६४।१२।।

हे अग्ने ! एषां मित्रवरुणमरुतां मना=ज्ञानवान् भूत्वा नः सुमृड=सुखयेति भावः।

मन्द्रो विश्वानि काव्यानि विद्वान्। ऋक् ३।१।१७।।

अग्निर्विश्वानि काव्यानि विद्वान्। ऋक् ३।१।१८।।

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।।

ऋक् १।१८६।६; यजुः ३।३६।

लोकेऽपि दृश्यते— यो हि बहुविद् भवति स बहून् ज्ञानवतोऽभिभूय "महामनाः" इति नाम्ना प्रशंसाभाग् भवति। तथैवायं भगवान् विष्णुः पुष्कराक्षापरनामा प्रतिहृदयं वर्तमानः सर्वेषां ज्ञानान्यभिभवति, अतएव महामना नाम्ना स्तूयते।

भवति चात्रास्माकम्—

स एव विद्वान् कविरग्निसंज्ञो
[2]*मनांसि सर्वाणि च तद् भवानि ।*
महामना विष्णुरिहास्ति वाच्यो
मेधाप्तये तं बहुधा स्तुवन्ति ।।८२१।।

---

१. मोहो-व्यभिचारि ज्ञानम्। २. मनांसि=ज्ञानानि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा च मन्त्रलिङ्गम्—

यां मेधां देवगणाः पितरश्चोपासते ।

तया मामद्य मेधया अग्ने मेधाविनं कुरु।। यजुः ३२।१४।।

मेधां मे वरुणो दधातु इत्यादिः। यजुः ३२।१५।।

❖ ❖ ❖

भगवान् भगहानन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः।।७३।।

५५८ भगवान्, ५५९ भगहा, ५६० आनन्दी, ५६१ वनमाली, ५६२ हलायुधः। ५६३ आदित्यः, ५६४ ज्योतिरादित्यः, ५६५ सहिष्णुः, ५६६ गतिसत्तमः।

भगवान्—५५८

"भज सेवायाम्" भौवादिको धातुस्ततः ***"खनो घ च"*** (पा० ३।३।१२५) सूत्रेण 'घ' प्रत्ययः 'घित्करणमन्यतोऽपि ज्ञापनार्थमिति' वचनाद् भवति (द्र० ५३४ पदव्याख्या पृष्ठ ३२), ***"चजोः कु घिण्यतोः"*** (पा० ७।३।५२) इत्यनेन कुत्वं जस्य गकारः। कृदन्तत्वात् प्रातिपदिकसंज्ञा स्वाद्युत्पत्तिः, भगः।

ततो भग शब्दात्-अस्य अस्मिन्निति वार्थे ***"तदस्यास्त्यस्मिन्निति मतुप्"*** (पा० ५।२।९४) इत्यनेन मतुप् प्रत्ययस्ताद्धितः। ***"मादुपधायाश्च मतोर्वोऽयवादिभ्यः"*** (पा० ८।२।९) इति सूत्रेण मकारस्य वकारः। तद्धितान्तत्वात्प्रातिपदिकसंज्ञा, सुः प्रत्ययः, उगित्वान्नुम्, अत्वन्तलक्षणो (द्र० पा० ६।४।१४) दीर्घः, भगवानिति साधुः। भगोऽस्यास्ति अस्मिन्नस्तीति वा भगवान्। भज्यते सेव्यत इति भग=इष्यमाणोऽर्थः। इष्यते च सर्वैरैश्वर्यं यशः सन्ततिरूपो विस्तारो ज्ञानादिकञ्च, तत्सर्वमस्मिन्नस्तीति भगवान्। अत्र नित्ययोगे भूमार्थे वा मतुप्। एवञ्च नित्यानन्तैश्वर्यशाली, नित्यानन्तयशस्कः, नित्यानन्तविस्तारः तथा नित्यानन्तज्ञानश्च भगवान्। तस्य चायं विस्ताररूपो गुणः प्रजासु सर्वत्र समन्वितो दृश्यते। यथा— प्रत्येकं जायमानो वर्धते, सन्ततिपरम्परयात्मानं विस्तारयति। एकं बीजं वृक्षतां प्राप्यासंख्येयं विस्तारमाप्नोति। यथा वटवृक्षे फलागमः, फले च बहुबीजप्रादुर्भावः। बीजेभ्यश्च पुनर्बहुवृक्षसद्भावः। वृक्षेभ्यश्च पुनर्बहुबीजोत्पत्तिः, एष विस्ताररूपोऽर्थो भगशब्दे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निहितः। व्यवस्थापयित्रा भगवतैव विस्तारितमिदं जगत्। विस्तारगुणवन्तमात्ममूलं व्यनक्ति भगवत्पदेन।

मन्त्रलिङ्गञ्च—

प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम।

यजुः ३४।३४॥

यत्तूक्तं भगो विस्तार इति, तत्र मन्त्रलिङ्गम्—

भग प्रणेतर्भग सात्यराधो भगेमां धियमुदया ददन्नः।
भग प्र नो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम्॥

यजुः ३४।३६॥

भग एव भगवाँ२ऽअस्तु......। यजुः ३४।३८॥

एवं सुधीभिरुन्नेया मन्त्रार्थाः। सूर्योऽपि भग उच्यते। स भज्यते सेव्यते सर्वकेणाभीष्टसिद्ध्यै। अग्निः सूर्यः, सूर्यो वाऽग्निः।

मन्त्रलिङ्गञ्च—

उद् बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टापूर्ते संसृजेथामयञ्च।

यजुः १५।५४॥

भवति चात्रास्माकम्—

विष्णोः पदं यत् परमं पवित्रं
तज्जागृवांसः स्तुवतेऽर्थसिद्ध्यै।
भगो हि सूर्यो भगवान् स विष्णुः
भगं जगच्चक्रमयं[1] विधत्ते ॥८२२॥

यदुक्तं-'विष्णोः पदं जागृवांसः स्तुवते,' तत्र मन्त्रलिङ्गम्—

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते।
विष्णोर्यत् परमं पदम्॥ यजुः ३४।४४॥

भगशब्दोऽनन्तपारे शब्दार्णवे प्रयुज्यमानो नानार्थः प्रतीयते। ततश्च सुखबोधाय विष्णुपुराणे तदर्थगणना विहिता। यथा-

ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः।
ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा॥ वि० पु० ६।५।७४॥

तथा—

---

१. चक्रमयं=सङ्कोचविस्तारवच्चक्रमयमिति भावः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उत्पत्तिञ्च लयं चैव भूतानामागतिं गतिम्।

वेत्ति विद्यामविद्याञ्च स वाच्यो भगवानिति।। वि० पु० ६।५।७८।।

प्रसङ्गप्राप्तं किञ्चिदुच्यते—सामान्यतः सर्वापि स्त्री भगवती, यतो हि सा प्रजाः विस्तारयति। उक्तञ्च वेदे—**''सौभाग्यमस्यै दत्त्वा याथाऽस्तं वि परेतन''** (ऋक् १०।८५।३३)। अस्तं=गृहम्।

'सुभगे' इति च स्त्रियाः सम्बोधनं वेदे। सर्व एव वा सदारो भगवान्। यथा-भगवान् रामः, भगवान् कृष्णः; न च भीष्मो भगवान्। यथा लोके भगवतीसम्बन्धाद् भगवान्, तथा परमेश्वरोऽपि प्रकृतिसम्बन्धाद् भगवान्।

भगहा—५५६

"भगशब्दो" व्याख्यातचरः।

"हन हिंसागत्योः" आदादिको धातुः। उभावप्यर्थावत्र सङ्गच्छेते। ***''ब्रह्मभ्रूणवृत्रेषु क्विप्''*** (पा० ३।२।८७) इति सूत्रेण यो भूते क्विप् विहितः, स ***''बहुलं छन्दसि''*** (पा० ३।२।८८) इति सूत्रेण बहुलग्रहणात् अन्यस्मिन्नुपपदेऽपि भवति तथा भूतकालाभावे, छन्दोऽभावे, धात्वन्तरादपि भवति , यतो हि सर्वोपाधिव्यभिचारार्थको बहुलशब्दः। तदुक्तम्—

क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव।

विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदन्ति।

(दशपाद्युणादिवृत्तौ ५।७ उद्धृतः)

बहुलमेव बाहुलकम्। बहुलवचनाच्च सर्वे विधयो विपर्यासं भजन्ते। तेषु केषाञ्चित् संग्रहो पातञ्जलमहाभाष्ये (३।१।८५) एवं प्रदर्शितः—

सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च।

व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन।।

अन्यच्च पृषोदरादिसूत्रे (६।३।१०६) काशिकावृत्तौ—

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।

धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।।

एवं चेह भगोपपदाद् वर्तमाने च काले हन्तेः क्विब्भवति। भगहा=विस्तारहा इत्यनर्थान्तरम्। भगं हन्ति=प्राप्नोति संक्षिपति वा। स यदेच्छति तदा स्वनियमानुसारं सङ्कोचविकासौ विधत्ते। लोकेऽपि पश्यामः- क्रिमयः फलानि दूषयन्ति, विकारयन्ति च पक्षिणोऽपि। इयं तस्यैव भगवतो व्यवस्था न तु

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनुष्यस्य। उक्तञ्च दृढबलेन चरके—

विस्तारयति लेशोक्तं संक्षिपत्यतिविस्तरम्।

संस्कर्ता कुरुते तन्त्रं पुराणञ्च पुनर्नवम् ।। (सिद्धिस्थान १२।६५)

एवं सुधीभिः सर्वत्रोन्नेयम्। भावार्थप्रधानं मन्त्रलिङ्गम्-

तस्य ते वाजिनो वयं विश्वा धामानि जिग्युषः। सखित्वमा वृणीमहे।।

ऋक् ६।६५।६।।

अन्तकृत्, मृत्युः, अन्तक इत्यादि नामसु यदुक्तं तदत्रापि "भगहा" नामव्याख्याने बोध्यम्। विजयो नाम परस्य स्वायत्तीकरणम्।

भवति चात्रास्माकम्—

लोकेऽस्ति दृश्यं विभुना कृतं य-
न्मर्त्येन वा यद्विहितं स्वशक्त्या।
सर्वं हि तन्नाशनिगूढबीजं
वृणोति विष्णुं भगहेति सिद्धम्[1] ।।८२३।।

लोके चापि पश्यामः-सर्पिणी शुनी वा स्वजातकानि स्वयमश्नाति, संक्षेपसंस्तव एव तयोर्विहितो विधात्रा।

एवं बहुत्र दृश्यते प्राणिषु भगहत्वं=विस्तारहत्वं स्वभावतः। अमुथैव नागफणिजः क्रिमिस्तां नागफणिं नाशयति तथैव रजनीगन्धोऽपि मूले लब्धक्रिमिः शुष्यति।

आनन्दी—५६०

"टुनदि समृद्धौ" भौवादिको धातुराङ्पूर्वः। टुरिच्च इत्, इदित्त्वान्नुम्। पचादिलक्षणोऽच् प्रत्ययः, आनन्दः। यद्वा-भावे घञ्, आनन्दनं-आनन्दः। उभयत्रापि ***"अत इनिठनौ"***सूत्रेणेनिः प्रत्ययो मत्वर्थीयस्तस्मिंश्च ***"यस्येति च"*** (पा० ६।४।१४८) सूत्रेणाकारलोपे, आनन्दी। तद्धितान्तत्वात् प्रातिपदिकसंज्ञायां सौ इन्नतलक्षणो दीर्घः, आनन्दी-समृद्धः। तदुक्तम्—**"न कुतश्चनोनः"** इति। मन्त्रलिङ्गम्—

सर्वे नन्दन्ति यशसागतेन सभासाहेन सख्या सखायः।

ऋक् १०।७१।१०।।

कालेन सर्वा नन्दन्त्यागतेन प्रजा इमाः। अथर्व १६।५३।७।।

अथ च कामः सः—**"कामस्तदग्रे समवर्तत"** (अथर्व १६।५२।१), तमधिकृत्य

---

१. स्वयं न क्षयं यातीति सिद्धो भगवान् विष्णुरिति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जीवः प्रार्थयते—

यत्काम कामयमाना इदं कृण्मसि ते हविः ।

तन्नः सर्वं समृध्यतामथैतस्य हविषो वीहि स्वाहा।। अथर्व १६।५२।५।।

आनन्दी समृद्धार्थः समन्तान्नन्दनं समर्धनं यस्य यस्मिन् वास्ति स आनन्दी।

मन्त्रलिङ्गम्—

यत्रानन्दाश्च मोदाश्च मुदः प्रमुद आसते।

कामस्य यत्राप्ताः कामास्तत्र मामृतं कृधीन्द्रायेन्दो परिस्रव।

ऋक् ६।११३।११।।

भवति चात्रास्माकम्—

स एव विष्णुर्न कुतश्चनोनः

यत्राप्तकामाः परमाश्रयन्ति ।

तं सच्चिदानन्दमयं पुराणं

त्रिकालसिद्धं कवयन्ति धीराः।।८२४।।

वनमाली—५६१

"वन संभक्तौ" भौवादिको धातुस्ततः पचाद्यच् प्रत्ययः। वनति=संविभजतीति वनम्। मन्त्रलिङ्गम्—**"अग्निर्नो वनते रयिम्"** (ऋक् ६।१६।२८)। वनते= संविभजतीत्यर्थः।

माला—माङ् माने जौहोत्यादिको धातुस्तस्मात् ***"ऋज्रेन्द्राग्र०"*** (२।२८) इत्याद्युणादिसूत्रेण रन्नन्तो निपातितः। प्रत्ययस्य रेफस्य लत्वं निपात्यते। ततो मालशब्दात् स्त्रियां टापि माला।

यद्वा—"मान पूजायां" भौवादिको धातुस्ततो "रन्" प्रत्यय औणादिकः, धातोर्नकारस्य लोपो निपात्यते, प्रत्ययरेफस्य च लत्वम्, तथा स्त्रियां टापि, मान्यतेऽनयेति माला।

यद्वा—धारणार्थप्राधान्यमधिकृत्य "मल धारणे" धातोः "रन्" प्रत्ययः रेफस्य अकारादेशः, उपधाया दीर्घश्च निपातनात्, तथा स्त्रियां टापि, मल्यते धार्यते या सा माला।

यद्वा-मां=शोभां लाति=आदत्त इति माला। मोपपदात् "ला आदाने" धातोः ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) इति कप्रत्यये टापि च मालाशब्दसिद्धिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मालाशब्दात् ***''व्रीह्यादिभ्यश्च''*** (पा० ५।२।११६) सूत्रेण मत्वर्थीय इनिः प्रत्ययः, ***''यस्येति च''*** (पा० ६।४।१४८) सूत्रेणाकारलोपः। इन्नन्तलक्षणो दीर्घः, वनमालीति। बहुधा विभक्तं विश्वमिदं सूत्रे पुष्पसमूह इव सूत्रात्मके ब्रह्मणि प्रोतम्, अतएव 'वनमाला' शब्देनोच्यते तद्धारकश्च वनमालीति।

मन्त्रलिङ्गम्—

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजुः ३१।१६।।

भावार्थप्रधानं मन्त्रलिङ्गम्-

आ ग्रावभिरहन्येभिरक्तुभिर्वरिष्ठं वज्रमा जिघर्ति मायिनि ।
शतं वा यस्य प्रचरन् स्वे दमे संवर्त्तयतो वि च वर्त्तयन्नहा।।

ऋक् ५।४८।३।।

विश्वो देवस्य नेतुर्मर्तो वुरीत सख्यम् ।
विश्वो राय इषुध्यति द्युम्नं वृणीत पुष्यसे।। ऋक् ५।५०।१।।

भवति चात्रास्माकम्—

विभिन्नवर्णाकृतिगन्धयुक्तं
पौष्पं[1] सनेत्रं विमले च सूत्रे ।
माला यथा विश्वमिदञ्च तद्वत्
मालाभृतं विष्णुमनक्ति नित्यम्।।८२५।।

मालाशब्दे विभक्तानामेकीभावरूपोऽर्थः, पूजार्थश्च निहितो वर्तते।

तथापि, यथा-सत्य-देव, द्वयोः शब्दयोरेकीकृत्याभिधानं सत्यदेव इति तथा वन—मालाशब्दयोर्वनमालेति।

हलायुधः—५६२

''हल विलेखने'' भौवादिको धातुस्ततः पचाद्यच् प्रत्ययः। हलति विलिखतीति हलः।

आयुधम्-आङ्पूर्वकः ''युध सम्प्रहारे'' धातुर्दैवादिकः, तस्माद् ***''घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्''*** (पा० ३।३।५८) सूत्रस्थवार्तिकेन करणे कः प्रत्ययः, कित्त्वाद् गुणभावः। आसमन्ताद् युध्यतेऽनेनेत्यायुधम्, प्रहरणसाधनं शस्त्रम्। हल आयुधमस्यास्तीति हलायुधः सांहितिको दीर्घः। हलशब्दो हि

१. पुष्पाणां समूहः पौष्पम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सीरशब्दपर्यायः, तत्र मन्त्रलिङ्गम्—

इन्द्र आसीत्सीरपतिः। अथर्व ६।३०।१।।

युनक्त सीरा वि युगा तनुध्वं कृते योनौ वपतेह बीजम्।

ऋक् १०।१०१।३।।

हलेन आयुध्यते विलिख्यते इति हलायुधः। **''अक्षैर्मा दीव्यः कृषिमित्कृषस्व''** ऋक् १०।३४।१३।।

यद्वा-हलेन विलेखनेन=कर्षणेन समन्तात् सम्प्रह्रियते येन स हलायुधः। विलेखनस्य साधनं करणं वा हलम्, तत् सम्प्रहरणं यस्य स हलायुध इति। लोकेऽपि पश्यामः— यथा लोके कृषीवलो हलायुधस्तथा प्रत्येकं प्राणी स्वक्षेत्रभूतां योनिं हलरूपेण स्वशिश्नेन विलिखति। अत्र मन्त्रलिङ्गम्-

सं पितरावृत्विये सृजेथां माता पिता च रेतसो भवाथः।
मर्य इव योषामधि रोहयैनां प्रजां कृण्वाथामिह पुष्यतं रयिम्।।
तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या वपन्ति।
या न उरू उशती विश्रयाति यस्यामुशन्तः प्रहराम शेपम्।।
आरोहोरुमुप धत्स्व हस्तं परिष्वजस्व जायां सुमनस्यमानः।
प्रजां कृण्वाथामिह मोदमानौ दीर्घं वामायुः सविता कृणोतु।।

अथर्व १४।२।३७, ३८, ३६।।

अत एतद्वक्तुमर्हं यत्-भगवता हलायुधेन सर्वमिदं जैवं जगत्, हलायुधरूपं विहितं प्रवाहतोऽनादिमतो जगतः सन्तानाय। उक्तं हि करणनामव्याख्याप्रसङ्गे-करणनामानं भगवन्तमनुकरोति मनुष्यः। तथा हि प्रत्येकं मनुष्यः स्वस्वकार्यसिद्धौ पृथग्विधानि स्वोपकरणानि करोति। लोके चापि दृश्यते-पाचकश्चुल्ल्यां काष्ठानि विलिखति=निदधाति—पाकाय, तत्र चुल्ली योनिस्थानीया, काष्ठानि शिश्न-स्थानीयानि। अमुथैव सर्वासामोषधीनां पृथिवी योनिः, हलं तद्विलेखने साधनम्। तत्र मन्त्रः—

गिरा च श्रुष्टिः सभरा असन्नो नेदीय इत् सृण्यः पक्वमेयात्।

ऋक् १०।१०१।४।।

एवं भगवान् हलायुधनामा विष्णुः प्रतिपदं स्वहलायुधरूपेण गुणेन व्याप्तः स्तुतिमुपयाति। मनुष्यो हि भगवतोऽनुकरणशीलः।

भवन्ति चात्रास्माकम्—

हलायुधो विष्णुरिदं प्रतन्वन्
जगत् समृद्धं कुरुते हलेन।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[1]हलस्य नानाविधतेह दृश्या
कार्यस्य योन्याश्च तथैव भेदः ।।८२६।।

एवं हि यो वेत्ति हलायुधं तं
विष्णुं समस्ते विततं भवेऽस्मिन् ।
न मोहमभ्येति स कार्यसिद्धौ
[2]हलं क्रियासिद्धिकरं करोति ।।८२७।।

निःसाधनो[3] ना सबलोऽप्यपार्थकः
सुसाधनो न्यूनबलोऽपि सार्थकः ।
हलस्य तत्त्वं निहितं गुहायां
विज्ञाय धीरः सुखमेत्यनिन्द्यम् ।।८२८।।

आदित्यः—५६३

अदितिः—"दो अवखण्डने" दैवादिको धातुस्तस्मात् स्त्रीविशिष्टे भावे 'क्तिन्' प्रत्ययो नञा समासः।

आदित्यः-अदितिशब्दात् *"दित्यदित्यादित्यपत्युत्तर"* (पा० ४।१।८५) इत्यादि सूत्रेण अपत्यार्थे ण्यः प्रत्ययः। ***"यचि भम्"*** (पा० ४।१।१८) सूत्रेण पूर्वस्य भसंज्ञा, भत्वात् ***"यस्येति च"*** (पा० ६।४।१४८) सूत्रेण इकारलोपः ***"तद्धितेष्वचामादेः"*** (पा० ७।२।११७) इति आदिवृद्धिः। ततः प्रातिपदिकसंज्ञायां सुप्, आदित्यः। अदितिर्नाम या खण्डिता न भवति, न खण्डनं विघटनं भवति यस्याः सा अदितिः। का पुनः सा ? अत्र वेद आह—

अदितिर्द्यौरदितिरन्तरिक्षमदितिर्माता स पिता स पुत्रः ।
विश्वे देवा अदितिः पञ्चजना अदितिर्जातमदितिर्जनित्वम्।।

यजुः २५।३३।।

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता। यजुः ३४।३५।।

अदितेर्दिवः पुत्रः सूर्यः। यतो हि स प्रत्यक्षम्, अन्तरिक्षाज्जायमानो दृश्यते। सूर्यस्यापि यो जनकः सोऽप्यदितिः—**"यः सूर्यं...... जजान...... स जनास इन्द्रः"** (ऋक् २।१२।७) यद्वा, जातं जनित्वञ्चादितिरिति मूलमदितिः, तस्याः

१. हलस्य=शिश्नस्य; २. हलं=करणम्; ३. साधनं=शिश्नं=करणम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कार्यमादित्यः। लिङ्गं विशेष्याधीनमत आदित्यं-जगत् इत्यादि। एवञ्चादितिरूपाद् ब्रह्मणो जातत्वात् सर्वं जगदादित्यं, सर्वो लोक आदित्यः प्रवाहतो नित्यं जगदादित्यम्। एवमादित्यरूपगुणेन विश्वं व्यश्नुवानो भगवान् विष्णुरादित्यः।

भवति चात्रास्माकम्—

प्रवाहनित्यं जगदाततानो
विचित्ररूपां कुरुतेऽदितिं सः ।
विकारजातांश्च करोत्यनन्तान्
सर्वे त आदित्यपदेन ते स्युः।।८२६।।

सर्वे त आदित्यपदेन वाच्याः।

ज्योतिरादित्यः—५६४

ज्योतिः—"द्युत दीप्तौ" भौवादिको धातुस्ततः ***"द्युतेरिसन्नादेश्च जः"*** (२।११०) इत्युणादिः 'इसन्' प्रत्यय आदिदकारस्य जकारादेशः गुणश्च। आदित्यशब्दो प्राग् व्युत्पादितः। ज्योतिश्च तदादित्यश्च, ज्योतिरादित्यः। छाया=छायी च समानस्थितिकाविति समाननाम्नां गृह्येते। अमृतं ब्रह्म तच्छायापि अमृता। अत्र मन्त्रलिङ्गम्—

यस्य छायामृतं......कस्मै देवाय हविषा विधेम। यजुः २५।१३।।

विशदमत्रानुसन्धेयम्—सूर्यः पञ्चमराशिसिंहनायकः। मघा पूर्वाफाल्गुनी तथोत्तराफाल्गुन्या एकं पादं सिंहराशिः, सूर्यो वा। अग्निः=सूर्यः, सूर्यो वाग्निः। पिता-पुत्रः, पुत्रो वा पिता। पुत्रः पुत्रो वा माता।

मन्त्रलिङ्गञ्च—

अदितिर्माता स पिता स पुत्र......अदितिर्जातमदितिर्जनित्वम्।
यजुः २५।२३।।

एवं स पिता स पितामह इत्यादि। एवं वेदे सर्वत्र सङ्गमनीयम्, न कुत्रचिद् विसंशनीयम्, लौकिकान् शब्दान् दृष्ट्वा। यतो हि महार्था वेदवाणी। तद्यथा, सूर्य आत्मा, आत्मा वा सूर्यः। सूर्यो यशो, यशः सूर्यः। सूर्यः पिता, पिता सूर्यः। सूर्यः सत्यं, सत्यं सूर्यः। अग्निर्यशो यशो वाग्निः। अग्निर्वाक्, वाग्वाग्निः। एवं सर्वत्र शब्दमहार्थता नियममाश्रित्य ग्रहैः फलकथने ज्योतिःशास्त्रं प्रवर्तते, तत्र मुह्यन्ति गुरूपदेशरहिताः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवतश्चात्रास्माकम्—

छाया सदा छायिनमेति नित्यं
छायी च तस्या हि सदानुकारी ।
ज्योतिर्हि सूर्यः स उ वा प्रकाशः
सिंहश्च सूर्यः स च पञ्चमो वा ।।८३०।।

एवं ततं यो मनुते जगत्यां
स वेद वेद्यं किमु वेदवाचम् ।
विज्ञाय लोके सुखमेत्यनिन्द्यं
वेदाश्च तस्मिन् विलसन्ति नन्द्याः।।८३१।।

सहिष्णुः—५६५

"षह मर्षणे" भौवादिको धातुस्तस्मात् तच्छीलतद्धर्मतत्साधुकार्यर्थेषु *"अलङ्कृञ्निराकृञ्"* इत्यादि (पा० ३।२।१३६) सूत्रेण 'इष्णुच्' प्रत्ययः। सहते तच्छीलः तद्धर्मः तत्साधुर्वा सहिष्णुः सहनशील इत्यर्थः।

मन्त्रलिङ्गञ्च—

अयमग्निः पृतनाषाट् सुवीरो येन देवासो असहन्त दस्यून्।
ऋक् ३।२९।९।।

येन सहांसि सहासा सहन्ते। ऋक् ६।६६।६।।

इन्द्रो तुराषाण्मित्रो वृत्रं यो जघान यतीर्न ।
बिभेद वलं भृगुर्न ससहे शत्रून् मदे सोमस्य।। अथर्व २।५।३।।

एवं बहुत्र सहधातोः प्रयोगो वेदे। लोकेऽपि च पश्यामः सहिष्णुर्भगवान् विष्णुः प्रतिशरीरं सहिष्णूनामस्थ्नां समूहं कुरुते, तेन नरा भारसहा भवन्ति।

सहोऽसि सहो मयि धेहि। यजुः १९।९।।

भवतश्चात्रास्माकम्—

सहोऽस्ति विष्णुः सहते समग्रं
सहिष्णुमन्तः कुरुते जगत् सः ।
यथा शरीरेऽस्थिवितानमन्तः
कृत्वा सहिष्णून् कुरुते च जन्तून।।८३२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं हि यो वेत्ति सहं सहिष्णुं
तस्यैव साहश्च जगत् प्रसृप्तः ।
सर्वं खलानां सहते स शान्तः
सहिष्णुमग्र्यञ्च[1] सखाय मित्वा[2] ।।८३३।।

गतिसत्तमः—५६६

गतिशदो "गम्लृ गतौ" धातोः क्तिनि व्युत्पादितः प्राक्। तथा सत्तमशब्दोऽपि "अस्भुवि" धातोः शतृप्रत्यये, तदन्ताच्चातिशायनिके तमपि प्राक् साधितः। गतिशब्देनेह गतिराश्रयो गृह्यते, तेन गत्याश्रितानां श्रेष्ठतमो गतिसत्तमः। तत्र मन्त्रलिङ्गम्—

तद् दूरे तद्वन्तिके, तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।
यजु ४०।५।।

भवति चात्रास्माकम्—

विष्णुर्भवेऽस्मिन् गतिसत्तमोऽस्ति
सर्वं गतं तेन [3]सदात्मयोगात् ।
[4]अमर्त्यगत्या मृत एति चात्मा
सूर्योऽपि तद्वद् गतिसत्तमः खे ।।८३४।।

प्रसङ्गप्राप्तं किञ्चिदुच्यते-सूर्यो राशे राश्यन्तरं सङ्क्रमते यथा, तथाऽयमात्मा देहाभिमानी देहाद्देहान्तरं सङ्क्रमते। मन्त्रलिङ्गम्—

त्रिंशद् धाम विराजति वाक् पतङ्गाय धीयते।
प्रति वस्तोरहद्युभिः। ऋक् १०।१८६।३।।

"त्रिंशदंशाः=त्रिंशद् धामानि। षष्ट्युत्तराणि त्रीणि शतानि चास्थ्नां भवन्ति, इति वेदवादिनो वदन्ति। तदुक्तम्—

षष्टिश्च ह वै त्रीणि च शतानि पुरुषस्यास्थीनि। शत० १०।५।४।१२।।

❖ ❖ ❖

---

१. अग्र्यम्=उत्तमम्; २. इत्वा=प्राप्य; ३. सत् एव आत्मा=स्वरूपं यस्य स सदात्मा, तस्य योगः सदात्मयोगः, तस्मादिति। अस्तित्वरूपेण सर्वग इत्यर्थः। ४. देहं परित्यज्य, आत्मा कया गत्या यातीति न केनापि मर्त्येन वक्तुं शक्यमिति "अमर्त्यगत्या" इत्युक्तम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिविस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः ।।७४।।

५६७ सुधन्वा, ५६८ खण्डपरशुः, ५६६ दारुणः, ५७० द्रविणप्रदः। ५७१ दिविस्पृक्, ५७२ सर्वदृग्व्यासः, ५७३ वाचस्पतिरयोनिजः।

सुधन्वा–५६७

"धन धान्ये" जौहोत्यादिको धातुस्तस्मात् ***"अर्तिपृवपियजितनिधनितपिभ्यो नित्"*** (२।११७) इत्यनेनोणादिसूत्रेण "उसिः" प्रत्ययस्तस्य च नित्त्वातिदेशः स्वरार्थम्। सुपूर्वो बहुवीहिस्ततः ***"वा संज्ञायाम्"*** (पा० ४।५।१३३) सूत्रेण समासान्तो वैकल्पिकोऽनङ् क्रियते, स च ***"ङिच्च"*** (पा० १।१।५३) इति सूत्रेणान्त्यस्यालः सकारस्य स्थाने भवति-'सु धनु अन्' उकारस्य यणादेशेन वकारः। प्रातिपदिकसंज्ञायां सुः प्रत्ययः, नान्तलक्षणो दीर्घः, सुधन्वा, पक्षे सुधनुरित्येव।

मन्त्रलिङ्गञ्च–

धनुर्हस्तादाददानो मृतस्याऽस्मे क्षत्राय वर्चसे बलाय ।
अत्रैव त्वमिह वयं सुवीरा विश्वाः स्पृधो अभिमातीर्जयेम।।

ऋक् १०।१८।६।।

अहं रुद्राय धनुरा तनोमि ब्रह्मद्विषे शरवे हन्तवा उ ।
अहं जनाय समदं कृणोमि अहं द्यावापृथिवी आ विवेश।।

ऋक् १०।१२५।६।।

लोकेऽपि दृश्यते-या भ्रुकुटिः सा सूर्यस्य धनुरिव, सूर्यो हि चक्षूरूपेण स्थितस्तत्र। तदुक्तम्– **"चक्षोः सूर्यो अजायत"** (यजुः ३१।१२) इति।

भवति चात्रास्माकम्–

लोकेऽस्ति दृश्या भ्रुकुटिर्मनुष्ये
मन्ये सुधन्वैव पदं व्यनक्ति ।
विष्णुः सुधन्वा धनुरातनोति
[1]ब्रह्मद्विषो रक्षति [2]तेन विश्वम्।।८३५।।

---

१. ब्रह्मद्विड्भ्य इत्यर्थः, पञ्चम्यन्तं पदम्; २. तेन=धनुषेत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खण्डपरशुः—५६८

यद्वा "सुधन्वा-अखण्डपरशुः" इत्यपि च्छेत्तुं शक्यते।

खण्ड-"खनुअवदारणे" धातुर्भौवादिकस्तस्मात् ***"ञमन्ताड्डः"*** (१।११४) इति सूत्रेणौणादिको "डः" प्रत्ययः। ञमिति प्रत्याहारः, तेन ञ-म-ङ-ण-न-एषां पञ्चानां ग्रहणम् ***"चुटू"*** (पा० १।३।७) इति डकारस्येत्संज्ञा च बाहुलकान्न भवति। इत्संज्ञाभावाच्च नलोपः। ***"नेड् वशि कृति"*** (पा० ७।२।८) इत्यनेनेण्निषेधः अनुस्वारपरसवर्णौ, खण्ड इति।

यद्वा, "खडि भेदने" चौरादिकः, इदित्त्वान्नुम्, 'णिच्', तदन्ताच्च पचाद्यच् प्रत्ययः, णेर्लोपः, खण्ड इति। इदित्करणलिङ्गात् णिचः पाक्षिकत्वे (माधवीया धातुवृत्तिः चितिस्मृत्याम् १०।२) तु केवलात् खण्डधातोरेव अच् प्रत्ययः। खनति, खण्डयति वा खण्डः। खायते खण्ड्यते वा खण्डः।

परः—"पॄञ् पालनपूरणयोः" क्रैयादिको धातुस्ततोऽच् प्रत्ययो गुणो रपरः। पृणातीति परः=पालकः पूरको वा।

परशुः परशब्दे उपपदे "शॄ हिंसायाम्" इति क्रैयादिकाद्धातोः ***"आङ्परयोः खनिशॄभ्यां डिच्च"*** (१।३३) इत्युणादिः 'कुः' प्रत्ययो डित्त्वातिदेशश्च तस्य, तेन टेर्लोपः, परशुरिति।

खनति=अवदारयति, खण्डयति=भिनत्ति वा खण्डः। पृणाति=पालयति=पूरयति वा परः। परं शत्रुं शृणाति हिनस्तीति परशुः, अत्र परशब्दः स्वापरवाचकः। भगवति च परशुशब्दः पूर्वोक्तव्युत्पत्त्या सङ्गच्छते। एवञ्च खनन-भेदन-पालन-पूरण-हिंसनानां समाहारो यस्मिन् स खण्डपरशुर्विष्णुः। कः खनति समुद्रं ? कः पूरयति च तं ? कश्च पालयति हिनस्ति वेति प्रश्ने, उत्तरम् सोऽनिर्वचनीयज्ञानबलक्रियोदयः कश्चिन्मनुष्यबुद्धेरगोचरः सत्स्वरूपो, यो विधत्ते व्यवस्थापयति संहरति चेति सर्वस्य महार्थस्य संक्षेपः खण्डपरशुरिति। अथवा अ-खण्ड-परशु-इति त्रिपदमेकं नाम।

अः—"अत सातत्यगमने" धातोः ***"अन्येष्वपि दृश्यते"*** (पा० ३।२।१०१) इति डप्रत्यये टिलोपे च सिध्यति। अत्र ***"अपिशब्दः सर्वोपाधिव्यभिचारार्थः"*** इति, तेन विनाप्युपपदे धात्वन्तरादपि डः प्रत्ययो द्रष्टव्यः। एवञ्च— अतति सर्वं सदा गच्छति व्याप्नोति, खण्डयति=आत्मनात्मानं विभजति जगद्रूपेण नानाविधं करोति, पृणाति=विविधभेदभिन्नमिदं जगत् पालयति पूरयति वा, ततश्च सर्वमिदं शृणाति संहरति इति महार्थवदेतन्नाम। अत्र मन्त्रलिङ्गानि क्रमेण—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अः—तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजुः ४० ।५ ।।

खण्डः—प्र वक्षणा अभिनत् पर्वतानाम्। अथर्व २ ।५ ।५ ।।

परः—वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः।

अथर्व २ ।५ ।६ ।।

परशुः—अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ।

अहं जनाय समदं करोमि अहं द्यावापृथिवी आ विवेश।।

ऋक् १० ।१२५ ।६ ।। इति निदर्शनम्।

लोकेऽपि पश्यामः— मनुष्यः पूर्वं किञ्चिदुपादत्ते, ततः तस्मिन् स्वत्वमाधत्ते, स्वत्वरूपेण तद् व्याप्नोतीत्यर्थः। सैषा अवस्था 'अ' शब्देनोच्यते। पुनस्तत् खनति खण्डयति वा, अर्थात् स्वकार्योपयोगार्हं विधत्ते। तत्र च या न्यूनता तां पूरयति, पुनश्च तत्र विघ्नभूतानि तत्कार्यविहन्तृणि=स्वाभीष्टसिद्धिविघातकानि हिनस्ति। अतश्च वक्तुं शक्यते, सर्वे मनुष्यास्तं भगवन्तमेवानुकुर्वन्ति सर्वमनिन्द्यं कुर्वन्तस्तमेव ध्यायन्ति। निन्द्ये कर्मणि भगवतो रतिर्नास्ति, तमसः परत्वात्तस्य, तदुक्तं—

तमसः परस्तात् (यजुः ३१ ।१८) इति।

भवति चात्रास्माकम्—

सोऽनन्तविज्ञानविभक्तविश्वं
विष्णुर्विचित्रं कुरुते ह्यपारम् ।
व्याप्नोति लीलायितमात्रमात्तं[1]
तद् भ्रामयन् नेमिरिवासिनोति[2] ***।।८३६।।***

यच्चोक्तं नेमिरिवेति— लोके यथा नेमिस्थानीयनाभौ निबद्धमिदं शरीरं जीवात्मा 'रथ' इति व्यवहरति।

दारुणः—५६६

"दॄ विदारणे" क्रैयादिको धातुस्ततो णिच् रपरा वृद्धिश्च, 'दारि' इति णिजन्त धातोः—***"कॄवृदारिभ्य उनन्"*** (३ ।५३) इत्यौणादिकः "उनन्" प्रत्ययो णिलोपो णत्वम्। कृदन्तत्वात् प्रातिपदिकसंज्ञा, सुप् च, दारुण इति।

१. आत्तं=गृहीतम्; २. आसिनोति=आसमन्ताद् बध्नाति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दारयति=द्विधा करोतीति दारुणः। विदारण-दारुणशब्दयोः समानोऽर्थः, प्रत्ययभेदेन रूपभेदः। यदस्माभिर्विदारणे उक्तम्, तदिहापि ज्ञेयम्।

मन्त्रलिङ्गञ्च—

यद् दारुणि बध्यसे यच्च रज्ज्वां, यद् भूम्यां बध्यसे यच्च वाचा।

अथर्व ६।१२१।२।।

अग्रे च—

वि जिहीष्व लोकं कृणु बन्धान्मुञ्चसि बद्धकम्।

योन्या इव प्रमुच्यतो गर्भः पथः सर्वां अनु क्षिय।। अथर्व ६।१२१।४।।

भवन्ति चात्रास्माकम्—

स दारुणो विष्णुरिदं समस्तं
द्विधा विभक्तं कुरुते जगत्याम् ।
बद्धं विमुक्तं कुरुते स बन्धा-
न्मुक्तं स बध्नाति च बन्धनेन ।।८३७।।

कायेन बद्धस्य मृतिर्विमोको
मृतस्य बन्धोऽस्ति च गर्भरज्ज्वा ।
दृणाति विश्वं स सदाऽप्रमत्तः
तथा यथा स्त्री च पुमांश्च तौ वा।।८३८।।

एकं हि सद्द्वैधमुपैति लोके
द्विधा च यत्तत् पुनरेकभावम् ।
एकं त्वनेकं कुरुते स एको
विचित्रमायोऽस्ति स दारुणोऽतः ।।८३९।।

द्रविणप्रदः—५७०

"द्रु गतौ" भौवादिको धातुस्ततो "***द्रुदक्षिभ्यामिनन्***" (२।५०) इति उणादिसूत्रेण "इनन्" प्रत्ययः, तस्मिंश्च गुणः, अवादेशः, णत्वम्, द्रविणम्। द्रवति=गच्छतीति द्रविणं धनम्, द्रविणः पुमान्।

प्रदः—प्रपूर्वकाद् दाधातोः "***प्रे दाज्ञः***" (पा० ३।२।६) सूत्रेण "कः" प्रत्ययः, आकारलोपः, प्रदः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्रविणस्य प्रदः, द्रविणं वा प्रददातीति द्रविणप्रदो धनद इत्यर्थः। यद्वा गतिमतः प्रदो द्रविणप्रद इति महार्थोऽयं द्रविणप्रदशब्दः।

तत्र मन्त्रलिङ्गम्—

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदया ददन्नः।
भग प्रनो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम।।

यजुः ३४।३६।।

धनमपि द्रविणं, यतो हि तन्मनुष्यान्मनुष्यान्तरं गच्छति, भवति चाभीष्टसिद्धौ प्रधानम्।

मन्त्रलिङ्गञ्च—

दधासि रत्नं द्रविणञ्च दाशुषेऽग्ने सख्ये मा रिषामा वयं तव।

ऋक् १।६४।१४।।

द्रविणोदा द्रविणसो ग्रावहस्तासो अध्वरे।
यज्ञेषु देवमीडते। ऋक् १।१५।७।।
प्रजापते नत्वदेता.......।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।

यजुः ४०।१६।।

एवं बहुत्र वेदे विविधरूपेण तस्य द्रविणप्रदत्वं वर्ण्यते।

भवति चात्रास्माकम्—

स एव रत्नानि दधाति विष्णुः
स एव गर्भे द्रविणं दधाति ।
स एव दात्रे प्रददाति नित्यं
स एव लोके द्रविणप्रदोऽस्ति।।३४०।।

दिविस्पृक्—५७१

दिवि—"दिवु क्रीडादौ" दैवादिको धातुस्ततः ***"उणादयो बहुलम्"*** (पा० ३।३।१) सूत्रभाष्ये—***"संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे। कार्याद् विद्यादनूबन्धमेतच्छास्त्रमुणादिषु।"*** इति श्लोकवार्तिकम्। अत एव ***"दिवेर्डिविः"*** इतिन्यासकृतोहितेनोणादिसूत्रेण[1] 'डिवि' प्रत्ययः, टिलोपस्ततः प्रातिपदिकसञ्ज्ञायां सुपि ङौ दिवीति।

---

१. धातुवृत्तौ ४।१। सायणः, श्वेतवनवासी तु साक्षात् सूत्रं पठति। द्रष्टव्या तदीया वृत्तिः २।८०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्पृक्—''स्पृश संस्पर्शने'' धातुस्तौदाकिदकस्ततः ***''स्पृशोऽनुदके क्विन्''*** (पा० ३।२।५८) सूत्रेण-उदकभिन्ने दिवि उपपदे क्विन् प्रत्ययः ***''क्विन्प्रत्ययस्य कुः''*** (पा० ८।२।६२) इति कुत्वम्। यद्वा परत्वात् पूर्वं कुत्वे कृते तस्यासिद्धत्वाद् ***''व्रश्चेति''*** (पा० ८।२।३६) सूत्रेण शस्य षकारादेशस्तस्य जश्त्वेन डकारस्तस्य पुनः कुत्वेन गकारस्तस्य च पक्षे चर्त्वं ककारः। क्विन्प्रत्ययस्य सर्वापहारः, स्पृक्। दिवि स्पृशति—इति दिविस्पृक्, ***तत्पुरुषे कृति बहुलम्*** (पा० ६।१।१३) इति सप्तम्या अलुक्। मन्त्रलिङ्गम्—

वातस्य नु महिमानं रथस्य रुजन्नेति स्तनयन्नस्य घोषः।
दिविस्पृग्यात्यरुणानि कृण्वन्नुतो एति पृथिव्या रेणुमस्यन्।।

ऋक् १०।१६८।१।।

दिविस्पृक् सूर्यः। बहुत्र दिव्युपपदेन सूर्य उच्यते-यथा **'दिविक्षयम्'** (ऋक् ५।४६।५), **'दिविक्षिता'** (ऋक् १०।६२।१२), **'दिविचराः'** (अथर्व १९।६।७), **'दिविजाः'** (ऋक ७।७५।१ तथा ८।४३।२८), **'दिवियजः'** (ऋक् ६।६७।२६), **'दिवियोनिः'** (ऋक् १०।८८।७), **'दिविश्रितः'** (अथर्व ११।७।२३-२७), **'दिविषदः'** (अथर्व० १०।६।१२), **'दिविसदम्'** (यजुः ६।२)।

सर्व एते शब्दा दिवि-उपपदे तत्तद्धातुभ्यः क्विन्क्विबादीनां सर्वापहारे तद्भिन्ने वा प्रत्यये सिध्यन्ति। य एवं दिविस्पृशं सूर्यं ग्रहोपग्रहान् वा व्यवस्थापयति स सर्वव्यापको विष्णुर्दिविस्पृक्। स **बृहद्भानु**रिति व्याख्यातः।

हृन्मस्तिष्कयोः परस्परं सम्बन्धित्वात् सूर्यवत् मनुष्यस्य ज्ञानमपि दिवः प्रतीकभूते शिरसि तिष्ठति। एवञ्च स्वाभाविकः प्रयत्नेन निवर्तितो वा पशुपक्षिसरीसृपादीनां क्षुद्रजीवानां ज्ञानोदयोऽपि मस्तिकाश्रयः सन् तं सर्वत्र व्याप्तं दिविस्पृशं विष्णुं व्यनक्ति।

भवतश्चात्रास्माकम्—

दिविश्रितं यत् सकलं हि तेन
व्याप्तेन नद्धं निजसत्ययोगात्।
दिविस्पृशं तं रविमेकमाहु-
र्विश्वस्य यन्तारमथापि चैके ।।८४१।।

एवं हि यो वेत्ति पदं भविष्णोः
स एव लोकं किमु वा शरीरम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विज्ञाय सूक्ष्मादपि सूक्ष्मभूतं
सूत्रस्य सूत्रं सुखमेत्यनन्तम् ॥८४२॥

सर्वदृग्व्यासः—५७२

सर्वशब्दोपपदाद् "दृशिर् प्रेक्षणे" धातोः क्विप् प्रत्ययः, षडगका आदेशा यथाक्रमं दिविस्पृग्वज्ज्ञेयाः (पृष्ठ ११६) सर्वं पश्यतीति सर्वदृक्।

मन्त्रलिङ्गम्—

यमा इव सुसदृशः सुपेशसः। ऋक् ५।५७।४॥
पुरुद्रप्सा अञ्जिमन्तः सुदानवस्त्वेष संदृशो अनवभ्रराधसः ।
सुजातास्ते जनुषा रुवमवक्षसो दिवो अर्का अमृतं नाम भेजिरे॥
ऋक् ५।५७।५॥

भवति चात्रास्माकम्—

स सर्वदृग् विष्णुरमोघकर्मा
करोति जन्तूनभितो [1]दृशानान् ।
जले स्थले खे दिवि वान्धकारे
पश्यन्ति ते सर्वदृशं स्तुवन्तः ॥८४३॥

यथा च—

कायं यथा भूतमसौ ददाति
[2]जीवाय भोगानुपनेतुकामः ।
तदर्थशक्तानि च तानि तेषु
कृत्वा यथाकर्म वयो ददाति ॥८४४॥
[3]विचित्रयोन्याततचित्रविश्वं
विचित्रचित्राणि च [4]शक्तिमन्ति ।
खान्याचितान्यात्मबलेन विश्वे
पृथक्-पृथक् सर्वदृगस्ति यस्मात्॥८४५॥

१. दृशान इति-दृश् धातोः "युधिबुधिदृशेः किच्च" इत्युणादिः (२।९०) कर्तरि "आनच्" प्रत्ययः, किद्वदतिदेशश्च तस्य। पश्यतीति दृशानः; २. जीवाय-जातावेकवचनम्। ३. विचित्रयोनिभ्य आततं विचित्रं विश्वमित्यभिप्रायः; ४. तद्यथा-योजनगन्धा पिपीलिका, दूरश्रवाः क्रुञ्चः, चिराय पर्याप्तं जलमाददान उष्ट्रः, बहुप्रसूः सर्पिणी। एवमूह्यं तथा योनिवैचित्र्यम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यासः—

विपूर्वकः "असु क्षेपणे" दैवादिको धातुस्ततो ***"हलश्च"*** (पा० ३।३।१२१) सूत्रेण करणे कर्मणि वा घञ् प्रत्ययः, वृद्धिः, व्यासः। व्यस्यन्ते पृथक् क्रियन्तेऽनेनेति व्यासः सूर्यः। तेन हि दिनं निशा च पृथक् क्रियेते। उत्तरायणं दक्षिणायनञ्च पृथक् क्रियेते। शुक्लकृष्णपक्षौ च पृथक् क्रियेते चन्द्रेणातश्चन्द्रोऽपि व्यासः। सूर्यचन्द्रौ च पृथक्-पृथक् व्यवस्थाप्येते येन सोऽनन्तशक्तिर्विष्णुर्व्यासः। तेन हि सर्व एव ग्रहोपग्रहाः सनक्षत्राः पृथक् क्रियन्ते।

लोकेऽपि दृश्यते—मनुष्यः स्वानि कर्माणि विभज्य कुर्वन् तं विष्णुमेव सर्वथाऽन्वाचष्टे।

भावप्रधानं मन्त्रलिङ्गम्—

पवमान महिश्रवश्चित्रेभिर्यासि रश्मिभिः ।
शर्धन् तमांसि जिघ्नसे विश्वानि दाशुषो गृहे।। ऋक् ६।१००।८।।

भवति चात्राऽस्माकम्—

व्यासो हि सूर्योऽथ निशाकरश्च
व्यस्तञ्च वा सर्वमिदं जगत्याम्।
अहो विचित्राभरणीयमस्य
व्यासस्य यत्तन्नयते समस्तम् ।।८४६।।

सर्वदृक् चासौ व्यासः सर्वदृग्व्यासः, सविशेषणमेकं नाम, सांहितिकं जश्त्वम्।

भवतश्चात्रास्माकम्—

स सर्वदृग् व्यासकरोऽप्यसौ वा
व्यस्तं समस्तञ्च वशे दधानः ।
नित्यं ह विश्वे कुरुते [1]विरामं
विक्रीडयन् विश्वमतन्द्रितः सन्।।८४७।।

यथा शरीरे कुरुतेऽङ्गवर्गं
पृथक्-पृथक् रूपमथापि कर्म ।
परन्तु सर्वाणि समस्य देहं
कुर्वन्ति शक्तं जगदस्ति तद्वत् ।।८४८।।

१. विरामं=विक्रीडनम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाचस्पतिरयोनिजः—५७३

वाचस्पतिः—''वच परिभाषणे'' आदादिको धातुस्ततः ***''क्विब्वचि ''प्रच्छ्या''*** (२।५७) इत्याद्युणादिसूत्रेण क्विप्, दीर्घः, सम्प्रसारणाभावश्च ***''वचिस्वपि''***— इत्यादिना (पा० ६।१।१५) सूत्रेण सम्प्रसारणस्य प्राप्तिरासीत्। ततः प्रातिपदिकसंज्ञा षष्ठ्या एकवचनं ङस् प्रत्ययश्च। तस्य च रुत्वविसर्गौ। वाचः पतिरित्यत्र **''ऋषिभिः परिगीतानि''** (एतत्स्तोत्रादौ अ० १४६।१३) इति प्रतिज्ञानान्नाम्नां छन्दोवद्भावस्ततश्च ***''षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु''*** (पा० ८।३।५३) सूत्रेण विसर्गस्य सकारादेशो वेदे, वाचस्पतिरिति, लोके तु वाचः पतिरिति।

यद्वा संज्ञावाचकत्वात् समासे षष्ठ्या अलुक्। वाचस्पतिमधिकृत्य विशदं व्याख्यातं, **वाचस्पतिरुदारधी**रिति नाम्नि। पतिशब्दश्चापि बहुवारं व्युत्पादितो इत्यन्तः।

मन्त्रलिङ्गञ्च—

देव सवितः प्र सुव यज्ञं प्र सुव यज्ञपतिं भगाय।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु॥

यजुः ९।१।; ११।७; ३०।१॥

यथायं सूर्यो वाचस्पतिस्तथैवायं जीवो यावद्देहे तिष्ठति तावद् वदति। अतो जीवोऽपि वाचस्पतिरुक्तो भवति। अत्र च देहे देहाभिमान्यात्मा सूर्यः। सर्वा विद्या वाग्विषया इति विद्यापतिरपि वाचस्पतिरुच्यते।

भवतश्चात्रास्माकम्—

वाचोऽग्निरीशोऽस्ति रविश्च वह्नेः
सूर्योऽग्निरूपेण च जन्तुमात्रे।
[1]आत्मा स्ववाच्यानभिधातुमिच्छन्
कायाग्निमाहन्ति मनः स वायुम्॥८४६॥

वायुर्यथास्थानमभिप्रयातः
शब्दं यथास्थानविभागभक्तम्।

१. आत्मा बुद्ध्या समेत्यर्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि चरन्मन्दं जनयति स्वरम्॥ इति श्लोकात्मिका पाणिनीयशिक्षा इहानुसन्धेया॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जगत्प्रचाराय करोति शक्तं
वाचस्पतिस्तत्र च पाति वाचम्।।८५०।।

अयोनिज इति— "यु मिश्रणामिश्रणयोः" आदादिको धातुस्ततः ***"वाहिश्रिश्रुयु०"*** (४।५) इत्याद्युणादिसूत्रेण निः प्रत्ययः निच्च, आद्युदात्तार्थम्। गुणः, ***"नेड्वशिकृति"*** (पा० ७।२।८) सूत्रेण इण्निषेधः, योनिः।

"जनी प्रादुर्भावे" दैवादिको धातुस्ततः सप्तम्यन्ताद् योनिशब्दोपपदात् ***"सप्तम्यां जनेर्डः"*** (पा० ३।२।९७), सूत्रेण डः प्रत्ययः, टेर्लोपो योनिज इति। न योनिजोऽयोनिजः, नञ्तत्पुरुष समासः। अयोनिजः सूर्यः। उक्तञ्च— **"दिवियोनिः"** (ऋक् १०।८८।७), यस्य जन्म भगाख्ययोनेर्न भवतीत्यर्थः। तथा च मन्त्रलिङ्गम्—

दृशेन्यो यो महिना समिद्धोऽरोचत दिवियोनिर्विभावा ।
तस्मिन्नग्नौ सूक्तवाकेन देवा हविर्विश्व आजुहुवुस्तनूपाः।।

ऋक् १०।८८।७।।

भवति चात्रास्माकम्—

सर्वस्य धाता रुचिरो हि सूर्यः
कथं भगाख्यां समियात् स योनिम् ।
यस्तस्य धाता स कथं व्रजेद्वा
योनिं ह्यतोऽयोनिज एव विष्णुः ।।८५१।।

वाचस्पतिश्चायोनिजश्चेत्येकं सविशेषणं नाम वाचस्पतिरयोनिज इति।

भवति चात्रास्माकम्—

वाचस्पतिर्यः स न याति योनिं
जीवोऽपि तद्वत् कथितोऽस्ति नित्यः।
यथा शरीराणि बिभर्ति जीवः
तथा दरीधर्ति च लोकसङ्घम् ।।८५२।।

❖ ❖ ❖

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक् ।
संन्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम्।।७५।।

५७४ त्रिसामा, ५७५ सामगः, ५७६ साम, ५७७ निर्वाणम्, ५७८ भेषजम्। ५७९ भिषक्, ५८० संन्यासकृत्, ५८१ शमः, ५८२ शान्तः, ५८३ निष्ठा, ५८४ शान्तिः, ५८५ परायणम्।

त्रिसामा–५७४

त्रिशब्दः तरतेर्ड्रिप्रत्ययान्तः प्राक् साधितः।

सामा–"षो अन्तकर्मणि" दैवादिको धातुस्ततः ***"धात्वादेः षः सः"*** (पा० ६।१।६३) इति षकारस्य सकारे तथा ***"आदेच उपदेशेऽशिति"*** (पा० ६।१।४५) सूत्रेणात्वे चौणादिको 'मनिन्' प्रत्ययः, साम इति। त्रीणि सामानि यस्मिन् स त्रिसामा। नान्तोपधलक्षणो दीर्घः। तानि पुनः सामानि बृहद्-रथन्तर-वामदेव्यानीति। स्यति=अन्तं गमयतीति साम।

मन्त्रलिङ्गञ्च–

असि यमो अस्यादित्यो अर्वन्नसि त्रितो गुह्येन व्रतेन ।
असि सोमेन समया विपृक्त आहुस्ते त्रीणि दिवि बन्धनानि।।
त्रीणि ते आहुर्दिवि बन्धनानि त्रीण्यप्सु त्रीण्यन्तः समुद्रे।
उतेव मे वरुणश्छन्त्स्यर्वन् यत्रा त आहुः परमं जनित्रम्।।

ऋक् १।१६३।३,४।।

यो जागार तमृचः कामयन्ते यो जागार तमु सामानि यन्ति।
यो जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः।।
अग्निर्जागार तमृचः कामयन्ते अग्निर्जागार तमु सामानि यन्ति।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः।।

ऋक् ५।४४।१४, १५; सामवेद उ० ६२।५,६।।

अथापि च–

यद् गायत्रे अधिगायत्रमाहितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत ।
यद् वा जगज्जगत्याहितं पदं य इत् तद्विदुस्ते अमृतत्वमानशुः।।

ऋक् १।१६४।२३।।

एता एव गायत्रस्य समिधस्तिस्रः। मन्त्रलिङ्गम्–

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गायत्रस्य समिधस्तिस्र आहुः। ऋक् १।१६४।२५।।

गायत्रेण प्रति मिमीते अर्कमर्केण साम त्रैष्टुभेन वाकम् ।

वाकेन वाकं द्विपदा चतुष्पदाऽक्षरेण मिमीते सप्त वाणीः।।

ऋक् १।१६४।२४।।

इत्यादि विस्तरशो द्रष्टव्यं वेदे।

यस्मात्तिस्रः समिधस्तस्मात् 'त्रिसामा' इति नाम।

मन्त्रलिङ्गञ्च—

इन्द्राया साम गायत विप्राय बृहते बृहत्।

धर्मकृते विपश्चिते पनस्यवे। ऋक् ८।९८।१।।

तत्र बृहत्-साम-

२र र २र र २ २ १र र २

औ हो यि त्वामिद्धि हवामहा ३ ए। सा तौ वाजा। स्याका

३ ५ १ २ ३र ४र ५ २ १ २

रा २ ३ ४ वाः। तु वा ३ ४। औ हो वा। वृत्रायिषुवायि। द्रा सा ३ १ त्।

२ ३ ५ १र र २ ३र ४र ५ १

पातिं ना २ ३ ४ राः। त्वां काष्ठा ३ ४। औ हो वा। सू २ अर्वा २ ३ ४ ताः।

५ ५ १

उ हु वा ६ हो उ । वा । अस्।

रथन्तरं साम—

२र र र र १ १ २र र र र २

आभि त्वा शूर नोनुमो वा। आ दुग्धा इव धेनव ईशानमस्य

१ २ १ र २ १ ४ १

जगतः। सुवा २ ३ र्दृशाम्। आ यि शा न मा २ ३ ४ यिन्द्रा ३। तास्थू २ ३ ४

र र ५ ५ १

षा। ओ वा ६ हा उ वा। अस्।।

''रथन्तरे सूर्यं पर्यपश्यत्।'' ऋक् १।१६४।२५।।

वामदेव्यं साम—

३ र ४ २ ४र ५ १ २ १र २ १

का ५ या। नश्चा ३ यित्रा ३ आ भुवात् । ऊ। तीः स दा वृ धः स।

२ र २ २ २ ३ र २ १ १

खा। औ ३ हो हायि। कया २ ३ शचायि। ष्ठयौहो ३। हुम्मा २ वाऽर्तो ३ ५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२
हायि।।१।।

३ र ४ २ ४र ५ १ २र १ २ १
का ५ स्त्वा। सत्यो ३ मा ३ दा नाम्। मा। हिष्ठो मात्सा दन्ध। सा।
२ र २ १ २ ३ र २ १ — १
औ ३ हो हायि। दृढा २ ३ चिदा। रुजौ हो ३। हुम्मा २। वाऽ२सो ३ ५
२
हायि।।२।।

३ र ५ ४ २ ४ ५ १ २र १ २र
आ ५ भी। षु णा ३ः सा ३ खी नाम्। आ। वि ता ज राई तृ।
१ र २ १ २ ३ र २ १ —
णाम्। औ २ ३ हो हायि। शता २ ३ म्भवा। सि यौ हो ३ । हुम्मा २ ।
१ २
ताऽ२ यो ३ ५ हायि।।३।।

भवति चात्रास्माकम्—

मन्ये त्रिसामा भगवान् त्रिबन्धो
विश्वं निबध्नन् गमयत्यभीष्टम् ।
तं वामदेव्येन रथन्तरेण
स्तुवन्ति नूनं बृहता च तज्ज्ञाः ।।८५३।।

साम्नां बहुत्वं प्रथितं हि वेदे
गायन्ति तद् गानविदो यथार्थम् ।
ज्ञात्वा विकारं प्रकृतिञ्च साम्नां
ते चोक्थशासः प्रचरन्ति लोके ।।८५४।।

एवं हि यो वेत्ति स वेत्ति सर्वां
छन्दोमयीं गां समिधश्च तिस्रः।
वेदेऽस्ति गीतं विविधं यथावत्
तज्ज्ञास्त्वलङ्कारमिति ब्रुवन्ति[1] ।।८५५।।

१—यथा—त्रिककुत्, त्रैष्टुभम्, त्रिबन्धनम् इत्यादिरूपेण।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सामगः—५७५

सामशब्दो व्युत्पादितः प्राक्।

सामगः— सामोपपदाद् ''गै शब्दे'' इति भौवादिकधातोः ***''आदेच उपदेशेऽशिति''*** (पा० ६।१।४५) इत्यात्त्वे ***''गापोष्टक्''*** (पा० ३।२।८) इत्यनेन कः प्रत्यय आतो लोपश्च, सामगः। साम गायतीति सामगो विष्णुः। लोकेऽपि दृश्यते, कश्चित् मनुष्यः सुखं प्राप्य यदि दुःखमाप्नोति तदा स किञ्चिद् गातुमुपक्रमते। तत्र वेदः—**''अर्चत प्रार्चत प्रियमेधासो अर्चत''** (ऋक् ८।६६।८) अर्चत=गायत, तं भगवन्तमिति शेषः।

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ।। ऋक् १०।९०।९;
यजुः ३१।७; अथर्व १९।६।१३।।

यस्मादृचो अपातक्षन् यजुर्यस्मादपाकषन्।
सामानि यस्य लोमान्यथर्वाङ्गिरसो मुखम्।।
स्कम्भं तं ब्रूहि कतमः स्विदेव सः। अथर्व १०।७।२०।।

भवति चात्रास्माकम्—

यदन्तरङ्गं मनुजस्य दुःखं
सुखञ्च वा येन [1]विलासमेति।
ताभ्यां प्रणुन्नेन जनेन किं स्यात्
गेयं तु सामैव मतं श्रुतीनाम्।।८५६।।

अथ च सामेत्यन्तस्यापि नाम सर्वोऽपि सर्वं प्रारब्धमन्तं गमयति प्राप्तं वा। तथा हि—स्वतः प्राप्तं मूर्खत्वमपनेतुं वेदानध्येतुं प्रारभते। वेदाध्ययनं मूर्खताया अन्तः, वेदाध्ययनसमाप्तिश्च वेदाध्ययनस्यान्त इति। एवं सर्गादौ सर्गान्ते च शिष्टः स भगवान् सामनामा, गातुमर्हत्वादिति।

प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः।
उभे वाचौ वदति सामगा इव गायत्रं च त्रैष्टुभं चानु राजति।।
उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शंससि।......
सर्वतो नः शकुने भद्रमा वद विश्वतो नः शकुने पुण्यमा वद।
आवदस्त्वं शकुने भद्रमा वद। ऋक् २।४३।१,२,३,।।

१. विगतो लासो विलासः=दुःखमिति यावत्, विशिष्टो लासो वा विलासः=सुखञ्च।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शकुनीनधिकृत्य यच्छास्त्रं प्रवृत्तं तच्छाकुनं शास्त्रं वेदाङ्गभूतव्याख्यानं लोकोपकाराय ऋषिभिः प्रणीतम्। तन्नूनं ज्ञेयमभ्यसनीयञ्च।

उच्चैर्गायतीत्युद्गाता, उच्चैर्गीयमानत्वात् सामाप्युद्गीथम्। सामवेदस्य कौथुमप्रभृतयः शाखाः साममन्त्राणां गानप्रकारप्रदर्शिन्य एव। बाल्य एव मया कौथुमशाखा गुरुमुखादधीता, पञ्च वर्षाणि यावत्। तत्र मम गुरोर्नाम **''रामशङ्कर-सामवेदी''**। अयं च महानुभावो गुर्जरब्राह्मणवंश्यः काशीवासी।

साम—५७६

साम-शब्दः, प्राग् व्युत्पादितः। स्यति=अन्तं करोतीति साम=ब्रह्म। सर्वे वेदाः कर्माणि सर्वाणि यस्मिन्नन्तं गच्छन्ति तद् ब्रह्म साम—इति ज्ञेयम्।

स्तुतिर्हि स्तुत्ये लीयतेऽत एव स्तुत्यं स्तुत्वा स्तुतिरन्तं गच्छति स्तोतुश्चाभीष्टं साधयति।

मन्त्रलिङ्गञ्च—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत् ।। अथर्व १० ।८ ।३३ ।।
तद्वै ब्रह्मविदो विदुः। अथर्व १० ।८ ।४३ ।।

भवति चात्रास्माकम्—

सर्वस्य कर्तारमचिन्त्यशक्तिं
[1]गायन्तु मर्त्याः निहितार्थसिद्ध्यै।
स सर्वगः सर्वसुहृत् हृदिस्थः
स एव चेष्टेन युनक्ति मर्त्यम्।।८५७।।

मन्त्रलिङ्गम्—

प्र वो महे महि नमो भरध्वमाङ्गूष्यं शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन्।।
ऋक् १ ।६२ ।२ ।।

निर्वाणम्—५७७

निरुपसर्गो निश्चयार्थकः। यथा च- यास्कप्रणीतं निरुक्तं निश्चयेनोक्तमित्यर्थः।

१. हे मर्त्या गायन्तु=स्तुवन्तु भवन्तः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निश्चयेन वचनं निर्वचनम्-इति च। यद्धि लोके सत्यत्वेन निश्चितं प्रमाणैः परीक्षितञ्च भवेत्तदर्थविवक्षया निर्ब्रूयात्। कथं निर्ब्रूयात्? एवं निर्ब्रूयादित्येवं प्रकारकं शासनं यस्मिन् शास्त्रे तन्निरुक्तं शास्त्रं नाम। आसन् बहूनि शास्त्राणि निरुक्ताख्यानि प्रणीतान्याचार्यैः प्राक्तनैः। तत्रेदानीन्त्वेकं यास्कीयमेव निरुक्तं प्रचुरप्रचारमुपलभ्यते। यास्कीये निरुक्ते बहूनामाचार्याणां नामोपलब्धिरेव निरुक्तबहुत्वज्ञापिका-इति प्रसङ्गप्राप्तमुक्तम्। ''वा गतिगन्धनयोः'' आदादिको धातुस्ततः कर्तरि निष्ठा, क्तः, ***''निर्वाणोऽवाते''*** (पा० ८।२।५०)इत्यनेन निपातनात्तस्य नत्वं णत्वञ्च निर्वाणमिति। लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येत्युक्तं महाभाष्ये ***''लुपि युक्तवद् व्यक्तिवचने''*** (पा० १।२।५१) इति सूत्रे। यानि च लिङ्गानुशासनसूत्राणि तानि शब्दलिङ्गाभिधायकानि, न तु लिङ्गनियामकानि। यथा-दारा इति बहुवचने, परन्तु एकवचनेऽसावपि कैश्चित् प्रयुक्तः। पदमिति नपुंसके पुंल्लिङ्गे च प्रयुज्यते इति निदर्शनमात्रमुक्तं प्रसङ्गप्राप्तम्। अत्रास्मत् प्रबन्धेऽपि सर्वत्रैवं सङ्गमनीयम्। उक्तञ्च मयैव स्वकृते **सत्याग्रहनीतिकाव्ये** विद्यार्थिप्रकरणे—

चुम्बन्ति ये कामवशेन बालान् ये चापि तान् गूढमुपस्पृशन्ति ।
युञ्जन्ति ये निन्द्यपदान् प्रशास्तौ तेऽध्यापकाश्छात्रजनैर्न सेव्याः।।

स० नी० का० ४।३।६।।

अत्र ''निन्द्यपदानि शास्तौ'' इत्यपि युक्तम्। एवञ्च लिङ्गानुशासनं नाम न सुनियन्त्रितमिदमित्थमेवेति, परिवर्तयितुमशक्यमिति। तत्र कारणम्—

क्वचिद् भाषाप्रवाहस्य रक्षा, क्वचिन्निन्दावचनम्, क्वचिच्छन्दोऽनुरोधविवशता चेत्यादि।

अस्याश्चोहाया मूलं ***''पात्रेसमितादयश्च''*** (पा० २।१।७४) इति सूत्रे गणसङ्ग्रह एव। तद्यथा—''मातरिपुरुषः'' इति पठ्यते, तत्र सप्तम्या अलुका ''मातरि गर्भस्याऽध्यापयिता'' इति निन्दनीयार्थस्य प्रतीतिः। अमुथैव स्वसरिपुरुषः दुहितरिपुरुष इत्याद्यप्यूह्यं भवति। अनन्तोऽयं शब्दार्णवः, शास्त्रं केवलं मार्गप्रदर्शकं भवति।

निर्वाणं नाम पृथक्करणम्। तत्र मन्त्रलिङ्गम्-

ईर्ष्याया ध्राजिं प्रथमां प्रथमस्या उतापराम्।
अग्निं हृदय्यं शोकं तं ते निर्वापयामसि ।। अथर्व ६।१८।१।।

इदं त्रिमन्त्रं सूक्तमीर्ष्यामधिकृत्यैव, निर्वापयामसि=पृथक् कुर्म इत्यर्थः। 'निर्वापय' पदप्रयोगो लोके वेदे च बहुधा दृश्यते। यथा ऋग्वेदे १०।१६।१३, तथाथर्ववेदे १८।३।६। तथा लोकेऽपि दीपं निर्वापय=अस्तं गमय, दीपं कुरु निर्वापयेत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सारांशः—विष्णुर्हि यथासमयं जन्तुं सर्गं वा निर्वापयति अतः स विष्णुर्निर्वाण इत्युक्तो भवति। शब्दस्वारस्याच्च निर्वाणं मोक्षाख्यं पदम्, भूतानां विमुक्ताविद्याबन्धनानां शरीरतः पृथगवस्थानमिति। लोकेऽपि च दृश्यते, मनुष्यः स्वानि कर्माणि विदधद् यथासमयं तानि मुञ्चति=निर्वापयति। तदेतत्सर्वं निर्वाणात्मकस्य विष्णोरनुकरणमात्रमिति। य एवं वेद स कर्माणि कुर्वन्=समाप्नुवन् वा तमेव स्तौति निरभिमानः- त्वय्येवैतद् व्यवस्थितमिति ब्रुवाणः।

भवति चात्रास्माकम्—

विष्णुर्हि निर्वाणपदेन वाच्यो
निर्वापयन् विश्वमिदं दधाति ।
यथोदयास्तौ रविरश्नुवानो
दृश्योऽस्ति लोके सकलञ्च तद्वत्।।८५८।।

भेषजम्—५७८

''भिषज् चिकित्सायाम्'' इति कण्ड्वादिगणपठितो धातुस्ततः ***''कण्ड्वादिभ्यो यक्''*** (पा० ३।१।२७) सूत्रेण स्वार्थे यक् प्रत्ययः, ततश्च क्विप्, तस्मिन् ***''यस्य हलः''*** (पा० ६।४।४६) सूत्रेण ***''आदेः परस्येति''*** (पा० १।१।५४) सूत्रसाहाय्यतो यकारस्य लोपः। अकारस्य च ***''अतो लोप''*** (पा० ६।४।४८) सूत्रेण लोपः। क्विपः सर्वापहारः, प्रातिपदिकसंज्ञा सुबुत्पत्तिर्भिषगिति। भिषक्शब्दात् सम्बन्धसामान्ये ***''तस्येदम्''*** (पा० ४।३।१२०) सूत्रेणाण् प्रत्ययः, ततश्चादिवृद्धिर्भैषजम्, तस्य पुनः पृषोदरादित्वाद्वर्णविकार एकारो भेषजमिति।

मन्त्रलिङ्गञ्च—

अप्स्वन्तरममृतमप्सु भेषजमपामुत प्रशस्तये।
देवा भवत वाजिनः।। ऋक् १।२३।१६।।

अप्सु यश्चिकित्सोपयोगी गुणः स तस्यैव विष्णोः। अप्सु यद्भेषजं तत् ''अमृतम्'' अमृतस्य विष्णोः सूर्यस्य वा गुणभूतमिति सत्यापयितुमिति।

यत् सिन्धौ यदसिक्न्यां यत्समुद्रेषु मरुतः सुबर्हिषः।
यत् पर्वतेषु भेषजम्।।
विश्वं पश्यन्तो बिभृथा तनुष्वा तेनानो अधि वोचत।
क्षमा रपो मरुत आतुरस्य त इष्कर्ता विह्रुतं पुनः ।।

ऋक् ८।२०।२५, २६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोमस्य मित्रावरुणोदिता सूर आददे। तदातुरस्य भेषजम्।

ऋक् ८।७२।१७।।

वेदे बहुत्र लभ्यतेऽयं भेषजशब्दः। सर्वत्र च तस्य व्यापकता दृश्यते, जिज्ञासुभिर्वेद एव द्रष्टव्यम्। नाम्नो लिङ्गमात्रप्रदर्शनं नः समीहितम्।

भवतश्चात्रास्माकम्—

यदत्र दृश्यं किमुवाप्यदृश्यं
तद् भेषजेनास्ति ततं समग्रम् ।
विष्णुः स्वयं भेषजमाप्तमात्रः
क्षिणोति रोगं [1]सकलस्य लोके ।।८५६।।

जन्तुर्यदा याति निजान्तकालं
स भेषजस्तञ्च जहाति तस्मात् ।
न भेषजं नापि भिषक् च तत्र
व्यनक्ति वीर्यं किमु वास्ति चित्रम्।।८६०।।

भिषक्—५७६

भिषक्-शब्दो भेषजनामव्याख्याने व्याख्यातः। भिषज्यति चिकित्सां करोतीति भिषक्-भिषग् वा, चर्त्वविकल्पः। मन्त्रलिङ्गञ्च—

यत्रौषधीः समग्मत राजानः समिताविव ।
विप्रः स उच्यते भिषग् रक्षोहामीवचातनः।।

ऋक् १०।६७।६; यजुः १२।८०।।

भवति चात्रास्माकम्—

भिषक् हि विष्णुः स हि सर्वयातः
सुप्तं प्रमत्तं विषमस्थितं वा ।
जन्तुं सदा रक्षति दुर्गतं वा
सर्वत्र भैषज्यमयो यतः सः ।।८६१।।

लोके च दृश्यते वानरभल्लूकप्रभृतयः पशवोऽपि स्वोपकारिणमुपचिकीर्षन्ति। कुत एवं? यतो हि तत्रापि पश्वादिषु भगवान् विष्णुरेव व्याप्तः। तत्र स

१. सकलस्य=चतुर्विधसृष्टेरिति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भिषग्रूपो विष्णुस्तं पशुं तथाविधया धिया युनक्ति।

मन्त्रलिङ्गम्—

मा त्वा रुद्र चुक्रुधा मा मनोभिर्मा दुष्टुती वृषभ मा सहूती।
उन्नो वीराँ अर्पय भेषजेभिर्भिषक्तमं त्वा भिषजां शृणोमि ।।

ऋक् २।३३।४।।

संन्यासकृत्—५८०

सं-निश्चोपसर्गौ, तत्पूर्वकः—"असु क्षेपणे" दैवादिको धातुः, ततो भावे घञ् प्रत्ययः, उपधावृद्धिः, नेरिकारस्य सांहितिको यणादेशः संन्यासः।

संन्यासरूपकर्मोपपदे "डुकृञ् करणे" धातोः क्विप् प्रत्ययः, तुगागमः, क्विपः सर्वापहारश्च, संन्यासं करोतीति संन्यासकृत्।

मन्त्रलिङ्गम्—

परीत्य भूतानि परीत्य लोकान् परीत्य सर्वाः प्रदिशो दिशश्च ।
उपस्थाय प्रथमजामृतस्याऽऽत्मनात्मानमभि सं विवेश ।।
परि द्यावापृथिवी सद्य इत्वा परि लोकान् परि दिशः परि स्वः।
ऋतस्य तन्तुं विततं विचृत्य तदपश्यत् तदभवत् तदासीत्।।

यजुः ३२।११, १२।।

विचृत्य—इति "चृती हिंसाग्रन्थनयोः" इति तौदादिकस्य धातोः क्त्वो ल्यपि रूपम्, विचृत्य =विच्छिद्य=संक्षिप्य वेत्यर्थः, स च सूर्यः। सूर्ये हि रजस्तमश्च न भवतः, किन्तु प्रकाशाभावरूपस्य तमसः प्रकाशस्य च सन्धिभूतं रजस्त्वं रात्रिदिवसयोः सन्धिभूत उषाकाल इव भवति। अत एव चोषसां रक्तिमा जायते। संन्यासिनां काषायवस्त्रपरिधानञ्चाप्येतस्यैवानुकरणम्। लोकेऽपि पश्यामः-सूर्यो हि दृश्यचक्षुषा हानोपादाने विदधद्- तदपश्यत्, तदभवत्, तदासीत्।

यश्चायं संन्यास आश्रमः स तस्यैव भगवतः संन्यासकृतो रूपं मनुष्येभ्यो दर्शयति, तदनुकरणभूतः, भगवति तेषामासनां भावनां वा विधातुमिति।

अत एव च यो ब्रह्मभावभावितस्तस्यैव संन्यासाश्रमोपदेशः। कथञ्चेदं शरीरं ब्राह्मं क्रियत इति? तदुत्तरं—

स्वाध्यायेन व्रतैर्होमैस्त्रैविद्येनेज्यया सुतैः।

महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः।। मनुः २।२८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

नित्यं भ्रमन् लौकिकमार्गमाप्तो
यदा मनुष्यः सुकृतानुरोधात् ।
तमांसि हित्वा किमु वा रजांसि
संन्यासकृत्[1] विष्णुरिवापरः सः ।।८६२।।

शमः—५८१

"शमु उपशमे" दैवादिको धातुस्ततो घञ् प्रत्ययस्ततश्च उपधावृद्धिः प्राप्ता, सा ***"नोदात्तोपदेशस्य मान्तस्यानाचमेः"*** (पा० ७।३।३४) सूत्रेण निषिध्यते। अत्र च ***"अनाचमिकमिवमीनामिति वक्तव्यम्"*** इति वार्तिकम्, तेन मान्तत्वेऽपि कामः वाम इति भवति। वक्ष्यति च **कामः=कामप्रद** इति अत्रैव संग्रहे।

तस्माच्च द्वितीयान्तात् शमशब्दात् ***"तत्करोति तदाचष्टे"*** (वा० ३।१।२६) इति करोति, आचष्टे वार्थे 'णिच्', ***"णाविष्ठवत्प्रातिपदिकस्य"*** इतीष्ठवद् भावस्तेन टिलोपे 'शमि' इति धातुस्ततः पचाद्यच् ततश्च णेर्लोपः, शम इति। शमः सूर्यः, यतो हि स तमोभवानि कार्याणि शमयति निशाचराणाम्। नरोऽपि मे तामसानि कर्माणि शान्तानि स्युरिति बुद्ध्या कर्म कुर्वाणस्तमेव शमाख्यं विष्णुं सूर्यं वान्वाराधयति। एवं सर्वत्रानुवृत्तः शमः स्वं लिङ्गं परितो व्याप्नोति।

भवति चात्रास्माकम्—

शमो विष्णुः शमः सूर्यः शमो मर्त्योऽपि तद्वशात्।
शमं पश्यन् शमं प्राप्तः शमः शान्तिं प्रपद्यते ।।८६३।।

मन्त्रलिङ्गम्—

आवः शमं वृषभं तुग्र्यासुः। ऋक् १।३३।१५।।
इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः।
सेदु राजा क्षयति चर्षणीनामरान्न नेमिः परि ता बभूव ।।
ऋक् १।३२।१५।।

शान्तः—५८२

"शमु उपशमे" दैवादिको धातुस्ततः कर्तरि क्तः प्रत्ययः, ***"उदितो वा"***

---

१. अतएव लोकैषणा-वित्तैषणा-पुत्रैषणा च परिहर्तव्या भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(पा० ७।२।५६) सूत्रेण क्त्वि वैकल्पिक इड् विधीयतेऽतो निष्ठायां ***''यस्य विभाषा''*** (पा० ७।२।१५) इतीण्निषेधः। ***''अनुनासिकस्य क्विझलोः क्ङिति''*** (पा० ६।४।१५) सूत्रेण दीर्घः। अनुस्वारपरसवर्णौ। शान्तः=अविकृतमानसः, स्वस्थो वा। पश्यामश्च लोके निर्विकारः स्वस्मिन् स्थितः शान्तो भवति। निर्विकारञ्च ब्रह्म, तत्स्वशान्तिगुणेन सर्वं विश्वं व्याप्नोति। अतः स शान्त इत्युक्तो भवति भगवान् विष्णुः।

भवति चात्रास्माकम्—

शान्तो हि विष्णुः स विधत्त एतत्
जगत् समस्तं निजशान्तभावे ।
शान्तं स्मरन् शान्तमनास्तपस्वी
हित्वा च काम्यान् तमुपैति शान्तम्।।८६४।।

अथापि मन्त्रलिङ्गम्—

शान्तो अग्निः क्रव्याच्छान्तः पुरुरेषणः ।
अथो यो विश्वदाव्यस्तं क्रव्यादमशीशमम्।। अथर्व ३।२१।६।।

निष्ठा—५८३

निपूर्वकः"ष्ठा गतिनिवृत्तौ" धातुर्भौवादिकस्तस्य षस्य सकारः, षकाररूपनिमित्तापाये ठकारस्यापि थकारः। ***''आतश्चोपसर्गे''*** (पा० ३।३।१०६) सूत्रेण 'अकर्तरि च कारकेऽधिकारे' अधिकरणे 'अङ्' प्रत्ययः, आल्लोपः। स्त्रियां टाप्, ***''उपसर्गात् सुनोति''*** (पा ८।३।६५) इत्यादिना सूत्रेण षत्वं, तद्योगात् ष्टुत्वञ्च निष्ठेति।

गतयो निवर्तन्ते यत्र सा निष्ठा, गतिनिरोधाश्रयो विष्णुरित्यर्थः। सर्वं हि स्वस्मिन् स्थितं निवृत्तगतिर्भवति।

मन्त्रलिङ्गञ्च—

यूथे नः निष्ठा वृषभो वि तिष्ठसे। ऋक् ६।११०।६।।

भवतश्चात्रास्माकम्—

निष्ठा हि विष्णुर्गतिमच्च सर्वं
तत्र स्थितं ब्रह्म न चैति याति ।
यथा तथा प्रस्तरनिष्ठजन्तु-
रश्मानमाकम्पयितुं न शक्तः ।।८६५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निष्ठां हि यो वेत्त्यविकल्पतो[1] ना[2]
न कम्पते नापि च याति मोहम्।
मनोविकाराः किमु वापि विघ्ना-
स्तं निष्ठनिष्ठं न विचालयन्ति।।८६६।।

शान्तिः—५८४

"शमु उपशमे" दैवादिको धातुस्ततः ***'अकर्तरि च कारके'*** इत्यधिकारे ***"स्त्रियां क्तिन्"*** (पा० ३।३।९४) सूत्रेण स्त्रीत्वविशिष्टे भावे क्तिन् प्रत्ययोऽथापि चाधिकरणे। 'शम्-ति' इत्यत्र ***"तितुत्रतथसिसुसरकसेषु च"*** (पा० ७।२।९) सूत्रेणेण्निषेधः। ***"अनुनासिकस्य क्विझलोः क्ङिति"*** (पा० ६।४।१५) इत्युपधादीर्घः। अनुस्वारपरसवर्णौ च, प्रातिपदिकसंज्ञा, सुप्, शान्तिः। एवञ्च शाम्यति यत्र सर्वमिति शान्तिः, शमनं वा। मन्त्रलिङ्गञ्च—

"द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः। वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्म........।" यजुः २६।१७।।

उपशमशब्दो हि स्वात्मधारकधारणरूपमर्थं ब्रवीति। यथा-अग्निं शमयति जलम्, अत्र अर्थादेतदापद्यते यज्जलम् अग्निं स्वात्मनि लीनं कुरुते। अतो द्यौः शान्तिरित्यत्र क्तिन् प्रत्ययस्य भावार्थकत्वादधिकरणार्थकत्वाद् वा, दिवः शमनं, दिवो वा शमनं यत्रेत्यर्थः। यद्वा तेजस्विनां सूर्यादीनां तेजांसि केनाधृतानि, क्व वोपशान्तानि भवन्ति, तत्र—**द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्ति**रिति', दिवा अन्तरिक्षेण पृथिव्या वा धृतानि भवन्ति, तेष्वेवोपशाम्यन्ति, अतो द्यौरन्तरिक्षं पृथिवी च शान्तिशब्देनोक्ता भवन्ति। सर्वमेतद् ब्रह्मणा धृतं ब्रह्मणि च शाम्यति, अतो **ब्रह्म शान्तिः**, शान्ते वा सर्वाधारभूते ब्रह्मणि सर्वमेतद् शाम्यति, अतः **शान्तिरेव शान्तिः**, सर्वं वा एतद् धृतमुपशान्तं भवति परस्परं वा सापेक्षमतः **सर्वं शान्ति**रिति।

एवं वेदे धारकाणां सुव्यक्ता व्याख्या विहिता इति वेदार्थस्य हृदयम्। सा शान्तिः=अत्यन्तसहनशीलता सदा सर्वत्र एधिषीष्टाऽनुक्षणमित्यन्ते—**सा मा शान्तिरेधीति**। एवं भगवतः शान्तिगुणकत्वात्तस्य शान्तिरूपो गुणः सर्वत्रानुस्यूतो व्यापनशीलत्वात्, शान्तिर्विष्णुः।

शमु धातुप्रकृतिकशब्दप्रयोगो वेदे बहुत्र दृश्यते।

---

१. अविकल्पतो=निश्चयतो निःसंशयमित्यर्थः; २. ना=पुरुषः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

शान्तिर्हि सा यत्र धृतं हि किञ्चित्
विष्णुर्हि शान्तिः सकलं दधाति ।
विष्णौ हिरण्यात्मनि सर्वमास्ते
जीवोऽपि तं शान्तमुपैति शान्तः ।।८६७।।

परायणम्—५८५

परायणमिति—परशब्दः प्राक् साधितः। अयनशब्दः "इण् गतौ" इत्यादादिकाद्धातोः, "अय गतौ" इति भौवादिकाद् वा धातोर्ल्युट् प्रत्ययः करणे, योरनादेशः, गुणायादेशौ चेति-अयनं सुबन्तपदम्। परञ्च तदयनमिति परायणम्, इति सांहितिको दीर्घः। ***"पूर्वपदात् संज्ञायामगः"*** (पा० ८।४।३) इति णत्वं, ल्युडन्तं नपुंसकम्। वस्तुतस्तु ***लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्येति*** पातञ्जल महाभाष्यम् (२।१।३६ इत्यादिषु बहुत्र)।

मृत्योरतिक्रमणाय परमपुरुषज्ञानं विना नान्यः पन्था विद्यते इति स विष्णुस्तद् ब्रह्म वा परायणमुक्तं भवति। मन्त्रलिङ्गञ्च—

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तपसः परस्तात् ।
तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।।

यजुः ३१।१८।।

लोकेऽपि च पश्यामः- यो मनुष्यः प्रकृतेः=विश्वस्य यावत्तत्त्वं वेत्ति तावदेव स क्लिष्टेऽपि कर्मणि सुखमनुभवति। यथा-दूरभाषयन्त्रं (टेलिफोन, रेडियो) विद्युत् साहाय्येन आकाशगुणं शब्दं दूरं नयति, स च शब्दस्ताम्रादिधातुविकारभूतं तारं विनापि यन्त्रसाहाय्येन समीपस्थ इव श्रूयते, श्राव्यते च। तत्र यन्त्राविष्कर्ता तत्त्वविद् भवति। एवं गन्धोऽपि सर्वत्र व्याप्तोऽस्ति पार्थिवेषु, किन्तु यो गन्धादानकुशलो गन्धादानतत्त्वं वेत्ति स स्वासनस्थ एव सूर्यकिरणैः सर्वविधान् गन्धानादत्ते। मया प्रत्यक्षं दृष्टमेतत्, काश्यां स्वाध्यायकाले एकाशीत्युत्तरे एकोनविंशतितमे वैक्रमाब्दे गन्धादानं कुर्वाणः कश्चिद्वङ्गदेशीयः। स च चत्वारिंशद् वर्षाणि यावत् कृताभ्यासः त्रिविधं सगन्धं तूलं पृथक्-पृथक्-आदत्ते स्म, स हि गन्धात्मकं सूर्यरश्मिं परिचिनोति स्म। तत्रासन् बहवो दिदृक्षवः तद्विधं गन्धमादित्सवश्च। स काचादाग्नेयकाचे=सूर्यकान्तमणौ, पुनः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पराच्चाग्नेयकाचान्निः सृतं किरणं तूले क्षिपति स्म, तत्तूलं शुष्कं सत् सगन्धं दिव्यगन्धं वा भवति स्म। दिनानां त्रयञ्च तद् गन्धं तस्मिन् तूले स्थितमिति। निदर्शनमात्रमुक्तम्।

भवति चात्रास्माकम्—

परायणे ब्रह्मणि सर्वमोतं
यो वेत्ति तद् विश्वभवञ्च वा यत्।
स एव दुःखान्यतिमुच्य शेते
परायणेऽशेषसुखालये वा ॥८६८॥

❖ ❖ ❖

शुभाङ्गः शान्तिदः स्त्रष्टा कुमुदः कुवलेशयः।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥७६॥

५८६ शुभाङ्गः, ५८७ शान्तिदः, ५८८ स्त्रष्टा, ५८६ कुमुदः, ५६० कुवलेशयः। ५६१ गोहितः, ५६२ गोपतिः, ५६३ गोप्ता, ५६४ वृषभाक्षः, ५६५ वृषप्रियः।

शुभाङ्गः—५८६

"शुभ शोभार्थे" तौदादिको धातुस्तत इगुपधलक्षणः (पा० ३।१।१३५) कः प्रत्ययो गुणाभावः। शुभति शोभां प्राप्नोतीति शुभः। अङ्ग-अङ्गतिर्गतिकर्मा, तस्मात्पचाद्यच्। अङ्गति=गच्छति=व्याप्नोतीत्यङ्गः। शुभश्चासावङ्गः शुभाङ्गः। प्रकाशको व्यापकश्चेत्यर्थः।

यस्य च गतिसाधनानि, अङ्गानि च शुभानि स पुरुषोऽपि शुभाङ्ग उच्यते, स्त्री शुभाङ्गी, यन्त्रादिकं नपुंसकं शुभाङ्गमित्यादि। सूर्योऽपि शुभाङ्गः, स निरन्तरगतिशीलो दीप्तियुक्तश्च।

मन्त्रलिङ्गम्—

आ द्योतनिं वहति शुभ्रयामा। ऋक् ३।५८।१॥

भवति चात्रास्माकम्—

विष्णुः शुभाङ्गः कुरुते शुभाङ्गं
सूर्यं जगच्चापि तथैव शक्तम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुभाङ्गत्ता [1]सर्वशरीरजा या सा
द्योतिका तस्य शुभस्य दातुः ।।८६६।।

शान्तिदः—५८७

शान्तिशब्दो भावक्तिन्नन्तो व्युत्पादितः। शान्तिरूपकर्मोपपदाद् दाधातोः ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) सूत्रेण कर्तरि कः प्रत्ययः, तस्मिंश्चाल्लोपः। शान्तिं द्यौरादिलक्षणां ददातीति शान्तिदः। अयं विषयः शान्तिनाम-व्याख्याने (सं० ५८४ पृ० ६६६) सविस्तरं व्याख्यातः।

भवति चात्रास्माकम्—

स शान्तिदो विष्णुरमर्त्यकर्मा[2]
विश्वस्य वासाय ददाति शान्तिम्।
एवं हि यो वेत्ति जगच्छयानं[3]
विष्णुं स देहेऽपि ततं [4]रहस्यम् ।।८७०।।

स्रष्टा—५८८

"सृज विजर्गे" तौदादिको धातुरनिट्, तस्मात्तृच् प्रत्ययः कर्तरि, ***"सृजिदृशोर्झल्यमकिति"*** (पा० ६।१।५८) सूत्रेण झलादावकिति प्रत्ययेऽमागमो मित्त्वादन्त्यादचः परः। धातुस्थस्य ऋकारस्य यण्=रेफः, ***"व्रश्चभ्रस्जसृज"*** (पा० ८।२।३६)इत्यादिसूत्रेण षत्वं, ष्टुत्वम्, अनङादिकार्यं च। एवं निष्पन्नः स्रष्टा शब्दः।

भगवान् विष्णुर्हि प्रलयकाले स्वात्मनि समावेशितं सर्वमिदं सृजति= आविर्भावयति, तस्मात् स्रष्टोच्यते। माताऽपि स्रष्ट्री उच्यते, यतो हि साऽप्यन्तरात्मगृहीतं गर्भं विसृजति बहिरिति कृत्वा। मन्त्रलिङ्गञ्च—

सृजामि सौम्यं मधुः। ऋक् १।१६।६।।

---

१. सर्वशरीरजा=सर्वेषां जगदन्तर्वर्तिनां प्राणिनां यावद्धि पशुपक्षिणां तथा जडपदार्थानामपि शरीरेषु अङ्गसौन्दर्यं शुभाङ्गत्वं दृश्यते, तत्तमेव शुभाङ्गं सर्वदाऽऽख्याति। २. अमर्त्यकर्मा=सततकर्मा; ३. जगच्छयानं=जगति वर्तमानम्; ४. रहस्यं=साधारण्येन ज्ञातुमशक्ये गुप्ते धाम्नि वर्तमानो= निगूढस्तमित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बहुत्र वेदे सृजिधातुजाः प्रयोगा उपलभ्यन्ते। निदर्शनमात्रमस्माकमभिमतम्।

भवति चात्रास्माकम्—

स्रष्टा स एवोक्त इहास्ति विष्णु-
स्तस्माद्ध जज्ञे यदिहास्ति दृश्यम्।
स्रष्टारमीशं कवयः स्तुवन्ति
स्वयं मनुष्यः सृजतीह सर्ज्यम् ।।८७१।।

कुमुदः—५८६

"कै शब्दे" भौवादिको धातुस्ततः ***"आदेच उपदेशेऽशिति"*** (पा० ६।१।४५) इत्यात्त्वं, बाहुलकात् ***"कुर्भ्रश्च"*** (१।२२) इत्यौणादिकः कुः प्रत्ययो भवति। यद्वा प्रत्ययस्य प्राङ्निर्देशाद् अन्यतोऽपि भवतीति ज्ञाप्यते। तदुक्तम्-प्राक्प्रत्ययनिर्देशः शरण्डादीनां प्रसिद्ध्यर्थः। (दशपादीवृत्ति ५।६)। तस्मिन् आलोपः, कुरिति।

मुदः-"मुद हर्षे" भौवादिको धातुस्ततः कर्तरि ***"इगुपधज्ञाप्रीकिरः कः"*** (पा० ३।१।१३५) इति कः प्रत्ययो गुणाभावश्च कुमुदः। कायति मोदते चेति कुमुदः।

लोकेऽपि दृश्यते प्राणी स्वमोदं व्यङ्क्तुं हर्षध्वनिं कुरुते गायति वा। यैषावस्था मनुष्यस्य तया स मनुष्यस्तथाभूतः सन् तं सर्वत्र व्याप्तं कुमुदमेवान्वाख्याति।

भवति चात्रास्माकम्—

यो मोदते कायति तत्र किञ्चित्
युक्तं भवेत्तूक्तमथाप्ययुक्तम् ।
वाचं मुदं चापि स एव नृभ्यो
ददन्मुदं तिष्ठति वीतरागः ।।८७२।।

वेदे स वाचस्पतिरुक्तः। तथा हि—

वाचस्पतिं विश्वकर्माणमूतये। ऋक् १०।८१।७।।

आनन्दा मोदाः प्रमुदोभीमोदमुदश्च ये ।
उच्छिष्टाज्जज्ञिरे सर्वे दिवि देवा दिविश्रिताः।। अथर्व ११।७।२६।।

कुवलेशयः—५६०

कुशब्दो व्युत्पादितः कायतेरुणादिकुप्रत्यये। वलशब्दो "वल संवरणे सञ्चरणे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

च'' इति भौवादिकधातोः पचाद्यचि सिध्यति। संवृणुते सञ्चरति वा वलः।

ईश शब्दोऽपि ''ईश ऐश्वर्ये'' इत्यादादिकधातोरिगुपधलक्षणे (द्र० पा० ३।१।१३५) कप्रत्यये सिद्धः, ईष्ट इतीशः।

एवञ्च कायन्ति, शब्दायन्ते, गायन्ति वेति कवः। वलन्ति संवृण्वते, सञ्चरन्ति वेति वलाः। ईशते कल्पन्ते प्रभवन्ति इतीशाः शक्तिशालिनः। एतांश्च सर्वान् याति=प्राप्नोति सर्वगतत्वेनेति कुवलेशयः। कवश्च वलाश्च ईशाश्चेति कुवलेशा द्वन्द्वः। कुवलेशकर्मोपपदाद् ''या प्रापणे'' धातोः ***''आतोऽनुपसर्गे कः''*** (पा० ३।२।३) सूत्रेण कप्रत्यये आतो लोपे च कुवलेशय इति निष्पन्नः।

यद्वा, कौ पृथिव्यां वलन्ति सञ्चरन्तीति कुवलाः सञ्चरणशीला जागताः पदार्थास्तेषामीशते, शासितुं समर्था भवन्तीति कुवलेशा ब्रह्मविष्णुमहेश्वराः, पार्थिवा वा। तान् याति=ईशनशक्तिदातृत्वेन प्राप्नोतीति कुवलेशयः। तेभ्यः स्वशक्तिं प्रदाय जगच्चक्रं प्रवर्तयतीत्यर्थः।

यद्वा, कुं=पुथिवीं वलति स्वतेजसा संवृणोतीति कुवलः सूर्यः, तत्र सौरमण्डले शेत इति कुवलेशयः, सर्वजगदन्तर्यामी भगवान् विष्णुः। कुवलाधिकरणपूर्वकात् ''शीङ् स्वप्ने'' धातोः ***''अधिकरणे शेते''*** (पा० ३।२।१५) इत्यचि ***''शयवासवासिष्वकालात्''*** (पा० ६।३।१८) सूत्रेण सप्तम्याः पाक्षिकोऽलुक्, कुवलेशयः, कुवलशय इति वा। जीवात्माऽपि स्वचितिशक्त्या शरीरं संवृणोति=आच्छादयति-अतः सोऽपि कुवलेशयः।

लोकेऽपि पश्यामः-मनुष्यः शब्दायते, पशुः शब्दायते, पक्षिणश्च शब्दायन्ते तथा मनुष्यादयो यथायोनि यथाबलं वा कर्तुमर्हं स्वकर्म व्याप्नुवन्ति, ते च सर्वे स्वायत्तकर्मणामीशा इति। शब्दनसंवरणेशनरूपेण गुणेन सर्वत्र व्याप्तः भगवान् स्वगुणार्पणेन तान् अपि स्वदृशान् कुवलेशयान् विधत्त इति सर्वे जागतपदार्थाः कुवलेशयशब्दवाच्याः भवन्ति। सर्वशक्तिमन्तञ्च भगवन्तञ्जीव एवं प्रार्थयते—

भग एवं भगवाँ अस्तु। यजुः ३४।३८।।

एवं कुवलेशयशब्दे महान् अर्थः सङ्गृहीतोऽस्ति। मन्त्रलिङ्गञ्च पृथक्-पृथक्—

कुः—वाचस्पतिं विश्वकर्माणमूतये। ऋक् १०।८१।७।।

वलः—येन द्यौरुग्रा पृथिवी च दृढा। यजुः ३।२।६।।

ईशः—य ईशे अस्य द्विपदश्चतुष्पदः। १०।१२१।३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स क्षियति विश्वस्येशानः। अथर्व ११।७।१६।।

यः—तद् दूरे तद्वन्तिके तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजुः ४०।५।।

राद्धिः प्राप्तिः समाप्तिर्मह······हिता। अथर्व ११।७।२२।।

भवतश्चात्रास्माकम्—

स [1]कातृवर्गं वचसानुयाति
स संवृणोत्येव च भूमिमुग्राम् ।
ईष्टे स ईशान इदं समस्तं
प्राप्तिः समाप्तिश्च हितास्ति यस्मिन्।।८७३।।

एवं हि यो वेत्ति विचित्रवीर्यं
विचित्ररूपेण वितत्य विश्वे ।
विराजमानं च सखायमेकं
स वेद विष्णुं कुवलेशयं तम् ।।८७४।।

गोहितः—५६१

गो शब्दो "गम्लृ गतौ" इति भौवादिकाद्धातो ***"गमेर्डो"*** (२।६७) इत्युणादिडप्रत्यये टिलोपेन सिद्ध्यति।

हितशब्दश्च दधातेः कर्मणि निष्ठायां हिनोतेर्वा कर्तरि निष्ठायां सिध्यति। गोशब्देन सर्वे प्राणिनो जङ्गमं जगदेव वा सर्वं गृह्यत इत्युक्तं प्राक् सविस्तरम्। एवञ्च सर्वं गोरूपं प्राणिवर्गं जगद् वा धृतं येनेति, अथवा सर्वं गोरूपं प्राणिवर्गं जगद् वा हितो=गतो=व्यापकत्वेन प्राप्त इत्यर्थः। यद्वा गवां गमनशीलानां, हित इत्यन्तर्भावितण्यर्थो गमयितेत्यर्थः। मन्त्रलिङ्गम्—

तदेजति तन्नैजति तद् दूरे तद्वन्तिके।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।। यजुः ४०।५।।

लोकेऽपि च पश्यामः-मनुष्यो हि स्वाभीष्टाप्तये वाष्पं, तैलं वा अग्निसाहाय्येन वाष्पीकृतं, विद्युतं वा यन्त्रेषु निदधाति तेन तया वा यन्त्रं चालयतीत्यर्थः। गतिमतां गतेः प्रदातेत्यर्थः।

१. कातृवर्गः-शब्दक-वर्गः=गायक-वर्गो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स गोहितो विष्णुरिदं समस्तं
गत्या नियुञ्जन् भ्रमणेन युङ्क्ते।
शिल्पी यथा यन्त्रकलाप्रवीणः
शक्तिं नियुङ्क्ते गमनाय तद्वत् ।।८७५।।

गोपतिः—५६२

गोशब्दः पतिशब्दश्च द्वावपि प्राग् बहुवारं साधितौ। गोर्गतिमतो जगतः प्राणिवर्गस्य वा पती रक्षकः=पाता गोपतिः। लोके चापि पश्यामः-यथा गच्छति रथे स्थितः सारथिस्तं पाति, तथा भगवानपि सर्वमिदं चराचरं विश्वं जीवात्मनानुप्रविष्टो गोपतिरुच्यते।

मन्त्रलिङ्गम्—

या आपो याश्च देवता या विराड् ब्रह्मणा सह।
शरीरं ब्रह्म प्राविशत् शरीरेऽधि प्रजापतिः ।। अथर्व ११।८।३०।।
तस्माद्वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते।
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते।। अथर्व ११।८।३२।।

भवतश्चात्रास्माकम्—

सर्वं प्रवाहेण हि नित्यमेतत्
पुनश्च तद् व्यासकृतावधानः ।
गतिञ्च गम्ये प्रहिणोति यो वै
स गोहितो विष्णुरिहास्ति गीतः ।।८७६।।

रथी यथा तत्र विराजमानः
चलत्सु वा वाजिषु 'हिं' करोति ।
तान् सर्वतः पाति रथञ्च तद्वत्
स गोपतिर्विष्णुरिहास्ति बोध्यः ।।८७७।।

गोप्ता—५६३

"गुपू रक्षणे" भौवादिको धातुस्तत आयाभावपक्षे कर्तरि तृच् प्रत्ययो गुणः,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनङ्गादि च—गोप्तेति।

गोपायति सर्वमिति गोप्ता सर्वस्य रक्षक इत्यर्थः। मन्त्रलिङ्गम्—

अग्निर्मा गोप्ता परिपातु विश्वत उद्यन् सूर्यो नुदतां मृत्युपाशान्।
व्युच्छन्तोरुषसः पर्वता ध्रुवाः सहस्त्रं प्राणा मय्यापतन्ताम् ।।

अथर्व १७।१।३०।।

भवति चात्रास्माकम्—

गोप्ता स विष्णुः स हि गोप्तृधर्मा
दिविश्रितेभ्योऽथ च भूश्रितेभ्यः ।
यच्छन् स शर्म स्वयमात्मगुप्तो
विश्वञ्च गोपायति सर्वगुप् सः।।८७८।।

वृषभाक्षः—५६४

वृषभः—"वृषु सेचने" इति भौवादिकधातोः ***"ऋषिवृषिभ्यां कित्"*** (३।१२३) इत्युणादिसूत्रेण "अभच्" प्रत्ययस्तस्य च कित्त्वातिदेशः। तेन गुणाभावः। **अक्षः-** अक्षू व्याप्तौ भौवादिको धातुस्ततः पचाद्यच् प्रत्ययः। अक्षति=व्याप्नोतीत्यक्षः। वृषभश्चासावक्ष इति वृषभाक्षः सेक्ता व्याप्ता वेत्यर्थः। अग्निः सूर्यो वा।

मन्त्रलिङ्गञ्च—

वृषभः—त्वमग्ने वृक्षभः पुष्टिवर्धन उद्यतस्त्रुचे भवसि श्रवाय्यः।
य आहुतिं परि वेदा वषट्कृतिमेकायुरग्रे विश आविवाससि।।

ऋक् १।३१।५।।

सूर्यः—प्र केतुना बृहता यात्यग्निरा रोदसी वृषभो रोरवीति।
दिवश्चिदन्ताँ उपमाँ उदानडपामुपस्थे महिषो ववर्ध।।

ऋक् १०।८।१।।

स एव वृषभः—**"भुवश्चक्षुर्महः**........" (ऋक् १०।८।५) स एव वृषभः—**"भुवो यज्ञस्य रजसश्च नेता**........" (ऋक् १०।८,६), स एव वृषभः—**"त्वाष्ट्रस्य चिद्विश्वरूपस्य**........" (ऋक् १०।८।६) इत्यादि रूपेणोक्तः।

भवति चात्रास्माकम्—

स एव विष्णुर्वृषभाक्ष उक्तो
व्याप्नोति विश्वं स महः स चक्षुः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मेघैश्च यत् सिंचति विश्वमात्रं
व्याप्नोति सर्वं वृषभाक्ष एकः ।।८७६।।

एवंविधाया व्यवस्थाया यो व्यवस्थापयिता सोऽपि वृषभाक्षपदेन स्तूयते। एवं वृत्रघ्ना निहता मेघा अपो मुञ्चन्ति, तत्र यः स्तनयित्नुः स सूर्यस्य प्रतिरूपको ज्ञेयः। एवं लोको लोकान्तरा जीवा वा वर्षाजलेन जीवन्ति नद्यश्च समुद्रं प्रति वहन्ति, समुद्राश्च—उद्रिक्ता वृष्टिमाघ्नन्ति इत्यादि क्रमः। एवं बहुत्र वेदे, निदर्शनमात्रमस्माकं प्रयोजनम्।

वृषप्रियः—५६५

वृषः—''वृष सेचने'' भौवादिको धातुस्ततः ***''इगुपधज्ञाप्रीकिरः''*** (पा० ३।१।१३५) इति कः प्रत्ययः कित्त्वाद् गुणाभावश्च, वर्षतीति वृषः।

प्रियः—''प्रीञ् तर्पणे कान्तौ च'' क्रैयादिको धातुस्ततः ***''इगुपध......''*** (पा० ३।१।१३५) इति कः प्रयत्यो गुणभावः, ***''अचि श्नुधातु''*** (पा० ६।४।७७) इत्यादिना सूत्रेण 'इयङ्' ईकारस्य। प्रीणाती तिप्रियः। वृषश्चासौ प्रियो वृषप्रियः। यो वर्षति प्रीणाति च।

वृषः—अग्निः—तत्र मन्त्रलिङ्गम्—

वृषोऽग्निःसमिध्यतेऽश्वो न देववाहनः । ऋक् ३।२७।१४।।

प्रियः—**प्रियमिन्द्रस्य काम्यं सनिं मेधामयासिषम्।**

ऋक् १।१८।६।।

अप्सरा जारमुपशिश्रियाणा योषा बिभर्ति परमे व्योमन् ।
चरत् प्रियस्य योनिषु प्रियः सन्त्सीदत् पक्षे हिरण्यये स वेनः।।

ऋक् १०।१२३।५।।

अयं वेन इति प्रथमे मन्त्रे।

भानुः शुक्रेण शोचिषा चकानस्तृतीये चक्रे रजसि प्रियाणि। ऋक् १०।१२३।८।। इत्याद्यूह्यं संयोजनीयञ्च। तथा च—

एष विश्ववित् पवते मनीषी सोमो विश्वस्य भुवनस्य राजा। द्रप्साँ ईरयन् विदथेष्विन्दुर्वि वारमव्यं समयाति याति। ऋक् ६।६७।५६।।

भवति चात्राऽस्माकम्—

वृषप्रियो विष्णुरिदं स जानन्
प्रीणाति सूर्यः स उ वाग्निरुर्व्याम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीणाति विश्वञ्च स वर्षणेन स
एव [1]विश्वाय ददाति भोज्यम् ।।८८०।।

❖ ❖ ❖

अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः ।।७७।।

५९६ अनिवर्ती, ५९७ निवृत्तात्मा, ५९८ संक्षेप्ता, ५९९ क्षेमकृत्, ६०० शिवः। ६०१ श्रीवत्सवक्षाः, ६०२ श्रीवासः, ६०३ श्रीपतिः, ६०४ श्रीमतांवरः।

अनिवर्ती—५९६

नि—उपसर्गः, ''वृतु वर्तने'' भौवादिको धातुस्ततः ***''सुप्यजातौ णिनिस्ताच्छील्ये''*** (पा० ३।२।७८) इति णिनिः, प्रातिपदिकसञ्ज्ञा, सुप्रत्ययः, इन्नन्तलक्षणो दीर्घः, नञ्समासः, अनिवर्तीति, न निवर्तितुं शीलमस्येति—अनिवर्ती। सदा सर्वत्रानुगतो न कुतश्चिदपि निवृत्त इत्यर्थः। मन्त्रलिङ्गम्—

यदी मन्थन्ति बाहुभिर्विरोचतेऽश्वोन वाज्यरुषो वनेष्वा ।
चित्रो न यायन्नश्विनोरनिवृतः परि वृणक्त्यश्मनस्तृणा दहन् ।।

ऋक् ३।२९।६।।

लोकेऽपि दृश्यते—सूर्यः सर्वकालं रजांसि प्रकाशयति न च कदाचित्स्वप्रकाशनधर्मं निवर्तयति। एवमयं जीवात्मा देहे वर्तमानो न निवर्तते=विरमतीन्द्रियप्रकाशनात्। लोकसम्मितः पुरुषस्तथा लोकवेदयोश्च समानता।

भवति चात्राऽस्माकम्—

यद्विष्णुना यत्र यथाविधं वा
कृतं तदासर्गनिवृत्तिशून्यम् ।
तथाविधं तत् कुरुते च कर्म
[2]नक्षत्रधर्मेण जगद्वितन्वन् ।।८८१।।

---

१. अत्र विश्वशब्दो जडचेतनसमष्टिरूपजगद्वाचकः संज्ञाशब्दः। अत एवेह सर्वनामसंज्ञा तत्कार्याभावश्च द्रष्टव्यः।२ नक्षत्रधर्मेण=अनश्वरधर्मेण=आप्रलयं स्थास्नुधर्मेणेत्यर्थः। जगदिति-कर्म।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निवृत्तात्मा—५६७

नि—उपसर्गः, 'वृतु वर्तने'' भौवादिको धातुस्ततः कर्तरि क्तो गुणाभावः, उदित्त्वात् क्त्वाप्रत्यये इड्विकल्पविधानान्निष्ठायामिडभावश्च, निवृत्तः। आत्मशब्द उणादिमनिण्प्रत्ययान्तो व्युत्पादितः। निवृत्त आत्मा स्वरूपं यस्येति बहुव्रीहिः। आत्मशब्दः स्वरूप वचनो निवृत्तस्वरूप इत्यर्थः।

लोकेऽपि यथा मनुष्यो नियतकालं कर्म कुर्वाणो यथाकालं तत् परित्यजति, पुनश्च प्राप्ते समये पुनरारभते कर्तुम्। तथैव भगवान् विष्णुः सृष्टिकाले प्रलयकाले च सृष्टिप्रलयौ यथाक्रमं विदधदपि, स्वस्वरूपतो निवृत्तात्मा भवत्यसङ्गः, प्रलयकाले वा सृष्टेर्निवर्तत इति निवृत्तात्मा विष्णुरुक्तो भवति।

निवर्तत इत्यर्थे मन्त्रलिङ्गम्—

एकचक्रं वर्तते एकनेमि सहस्राक्षरं प्र पुरो नि पश्चा।
अर्धेन विश्वं भुवनं जजान यदस्यार्धं क्व तद् बभूव ।।

अथर्व १०।८।७।

पुरः प्रवर्तते, पश्चान्निवर्तते।

भवति चात्राऽस्माकम्—

विष्णुर्निवृत्तात्मपदेन बोध्यः
प्रवर्तते यश्च निवर्तते च ।
गोलार्धके सूर्य इहास्ति दृश्यः
परार्धकास्तञ्च[1] 'निवृत्त' माहुः।।८८२।।

निपूर्वो वृतु धातुः ''परे भवः'' इत्यर्थे वेदे बहुत्र प्रयुक्तः। निदर्शनमात्रं यथा—

उप त्वा रातिः सुकृतस्य निष्ठान्निवर्तस्व हृदयं तप्यतेमे।

ऋक् १०।६५।१७।।

संक्षेप्ता—५६८

समुपसर्गः, ''क्षिप प्रेरणे'' धातुरनिट्, ततः ***''तृन्''*** (पा० ३।२।१३५) सूत्रेण तच्छीलाद्यर्थेषु 'तृन्' प्रत्ययः, गुणोऽनङादि, समोऽनुस्वारः, संक्षेप्ता।

१. निवृत्तं=अस्तङ्गतं वदन्ति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्पूर्वः क्षिपिधातुः संहारार्थकः **''उपसर्गेण धात्वर्थो बलादन्यत्र नीयते''** इति नियमात्। संक्षेपः कारणं, विक्षेपः कार्यम्। कार्यं कारणरूपेण संक्षेपयन् कारणे समावेशयन् भगवान् संक्षेप्तेत्युच्यते। यथा-वटवृक्षं तद् बीजे संक्षिपति। य एव संक्षेपः स एव संहारः।

भावप्रधानार्थे मन्त्रलिङ्गम्—

संमील्य यद्भुवना पर्यसर्पत क्व स्वित् तात्या पितराव आसतुः।

ऋक् १।१६१।१२।।

भवति चात्राऽस्माकम्—

आब्रह्मकीटान्तमिदं हि विश्वं
[1]संक्षेपविक्षेपमयं विधत्ते ।
बीजे वटं वृक्षमथापि बीजात्
[2]संक्षेपशीलः कुरुतेऽति चित्रम्।।८८३।।

संक्षेपं सम्यक्कर्तुमना इत्यपि ज्ञेयम्। तृन्प्रत्यो हि संक्षेपशीलवति कर्तरि भवति।

क्षेमकृत्—५६६

''क्षि क्षये'' भौवादिकः 'क्षि निवासगत्योः'' तौदादिकः, ''क्षि हिंसायाम्'' सौवादिकः, एभ्यो धातुभ्यो यथार्थविवक्षं *''अर्तिस्तुसुहुसृधृक्षिक्षुभावापदिपक्षिनीभ्यो मन्''* (१।१४०) इत्युणादिर्मन् प्रत्ययः, गुणः, क्षेम इति।

क्षेमोपपदात् कृञ् धातोर्बाहुलकात् कर्तरि क्विप्, तुगागमः क्विपः सर्वापहारश्च क्षेमकृदिति। क्षेमं करोतीति क्षेमकृत्। मन्त्रलिङ्गम्—

स हि क्षेमो हविर्यज्ञः। ऋक् १०।२०।६।।

बहुत्र प्रयुक्तोऽयं धातुः कृदन्तस्तिङन्तश्च वेदे। निवासेऽर्थे—

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।२।।

स स्वयं न क्षीयते—

यस्य त्रिपूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।
य उ त्रिधातु पृथिवीमुतद्यामेको दाधार भुवनानि विश्वा ।।

ऋक् १।१५४।४।।

१. संक्षेपः=समासः, विक्षेपो=व्यासः। २. संक्षेपशीलः=संक्षेपधर्मा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णोः सूर्यस्य न कोऽप्यन्तमवाप, अत्र मन्त्रलिङ्गम्—

न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः ।।

– ऋक् ७।६६।२।।

विष्णुश्च सर्वस्य पारं वेत्ति, तत्र मन्त्रलिङ्गम्—

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।
उभे ते विद्म रजसी पृथिव्या विष्णोः देवः त्वं परमस्य वित्से।।

ऋक् ७।६६।१।।

सूर्यः प्राचीं दिशं धारयति, तत्र मन्त्रलिङ्गम्—

दाधर्थ प्राचीं ककुभं पृथिव्याः। ऋक् ७।६६।२।।

स विष्णुरेव 'क्षेमकृत्', स एव च सर्वं वेत्ति इति समन्त्रं व्याख्यातम्।

लोके च दृश्यते-प्रभुर्जीवस्य निवासाय शरीरं ददाति; तच्च शरीरं गच्छति, निवसति, निवासयति स्वस्मिन्नात्मानं, क्षीयते मृत्युना ग्रस्यते चेति स क्षेमकृदुच्यते।

भवति चाऽत्रसमाकम्—

स क्षेमकृद्विष्णुरिदं वितन्वन्
सर्वस्य पारं च स वेद एकः ।
[1]क्षेमं स जीवाय ददाति[2] गुप्तम्
[3]स्वोकांसि जीवोऽपि करोति तस्मात्।।८८४।।

शिवः—६००

शिव शब्दः "शीङ् स्वप्ने" धातोः ***"सर्वनिघृष्वरिष्वलिष्वशिवहस्वपद्वप्रहेष्वा अतन्त्रे"*** (१।१५३) इत्युणादिसूत्रेण-अकर्तरि वन्प्रत्ययान्तो निपात्यते, धातोर्दीर्घेकारस्य ह्रस्वेकारोऽपि निपातनात्। शेतेऽस्मिन् सर्वमिति शिवः। अत्र गुणाभावोऽपि निपात्यते। तत्र केचन आहुः-ह्रस्वविधानसामर्थ्यादेव गुणो न भविष्यतीति तन्निपातनमयुक्तमिति। अत्रैतच्छङ्कावसर एव नायातु—इति ह्रस्वत्वमगुणत्वञ्च निपात्यत इति व्याख्यानं युक्तमिति सत्यदेवो वासिष्ठः।

यद्वा "शो तनूकरणे" धातोर्वन् प्रत्ययो ह्रस्वेकारश्चाकारस्य निपात्यते, श्यति=तनूभवति=संक्षेपीभवति सर्वमस्मिन्निति शिवः सर्वाधिष्ठानम्।

१. क्षेमं=शरीरम्; २. गुप्तं=जीवनोपकरणै रक्षितम्; ३. ओकांसि=स्थानानि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्वा "श्यैङ् गतौ" भौवादिकधातोर्वन् प्रत्ययो सम्प्रसारणमिकारश्च निपातनात्, श्यायते सर्वमिति प्राप्नोतीत्यर्थः, शिवः=शम्भुः। क्षेमकृत्=शिवः सन्धौ, क्षेमकृच्छिवः। मन्त्रलिङ्गम्—

त्वमग्ने: प्रथमो सङ्गिरा ऋषिर्देवो देवानामभवः शिवः सखा।
तव व्रते कवयो विद्म नापसोऽजायन्त मरुतो भ्राजदृष्टयः ।।

ऋक् १।३१।१।।

उप नः पितवा चर शिवः शिवाभिरूतिभिः।
मयोभुरद्विषेण्यः सखा सुशेवो अद्वयाः ।। ऋक् १।१८७।३।।
स नो युवेन्द्रो जोहूत्रः सखा शिवो नरामस्तु पाता।
यः शंसन्तं यः शशभानमूती पचन्तञ्च स्तुवन्तञ्च प्रणेवत्।।

ऋक् २।२०।३०।।

आरे अस्मदमतिमारे अंह आरे विश्वां दुर्मतिं यन्निपासि ।
दोषा शिवः सहसः सूनो अग्ने यं देव आ चित् सचसे स्वस्ति।।

ऋक् ४।११।३।।

शिवः शिवमित्यादि निदर्शनम्।

शिवाय, शिवासः, शिवे, शिवेन, शिवेभिः, शिवतमः, शिवतमाः, शिवतमाभिः, शिवतमाम्, शिवतमाय, शिवतराय। एवं बहुत्र वेदे प्रयुक्तोऽयं शिवशब्दस्तत एवावगन्तव्यः।

भवति चात्रास्माकम्—

शिवः स विष्णुः स सखा स देवः
स एव लोकान् परितः पिपर्ति।
शिवोऽग्निरुक्तः स हि पाति विश्वं
स दुर्मतिं कृन्तति हूयमानः ।।८८५।।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृंहितसत्यभाष्ये
षष्ठं नामशतकं
सम्पूर्णम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीवत्सवक्षाः—६०१

श्रीः—''श्रिञ् सेवायां'' भौवादिको धातुस्ततः ***''क्विब्वचि प्रच्छ्यायतस्तु०''*** (पा० ३।२।१७८) इत्यादिना वार्तिकेन क्विप् प्रत्ययो दीर्घश्च। श्रयति, श्रीयते वा श्रीः शोभा, विभूतिर्वा हिरण्यादिकम्।

वत्सः-''वद् व्यक्तायां वाचि'' भौवादिको धातुस्ततः ***''वृतृवदिहनिकमिकषिभ्यः सः''*** (३।६२) इत्युणादिसूत्रेण सः प्रत्ययः ***''तितुत्रेति''*** (पा० ७।२।९) इति सूत्रेणेण्निषेधः, चर्त्वम्। वदतीति वत्सः।

वक्षः—''वच परिभाषणे'' इत्यादादिको धातुस्ततः ***''पचिवचिभ्यां सुट् च''*** (४।२२०) इत्युणादिना ''असुन्'' प्रत्ययः सुटश्चागमो विहितः, सुटष्टित्त्वात् ***''आद्यन्तौ टकितौ''*** (पा० १।१।४६) इत्याद्यवयवः, अनुदात्तत्वान्नेट्। ***''चोः कुः''*** (पा० ८।२।३०) इति सूत्रेण झलि कुत्वम्। ***''आदेशप्रत्यययोः''*** (पा० ८।३।५५) सूत्रेण प्रत्ययावयवस्य सस्य षत्वम्। प्रातिपदिकसंज्ञा, सुविभक्तिर्वक्षा इति।

श्रीश्च वत्साश्च' श्रीवत्सा वक्षसि=उरसि=हृदये यस्य स श्रीवत्सवक्षाः— ***''असन्तलक्षणो''*** (द्र० पा० ६।४।१४) दीर्घः। श्रियो वत्सा इति वा द्वन्द्वगर्भस्तत्पुरुषगर्भो वा बहुव्रीहिः। ***''सप्तमीविशषणे बहुव्रीहौ''*** (पा० २।३।३५) इति सप्तम्याः पूर्वनिपाते प्राप्ते ***''गड्वादिभ्यः परा सप्तमी वक्तव्या''*** (२।२।३५) इति वार्तिकेन तस्याः परनिपात एव विहितः। गड्वादिरित्यत्रादिः शब्दः प्रकारार्थकः। क्वचिच्च न भवति, यथा वहेगडुः। श्रीः=परहिताराधनं, तत्पुनः पुनर्वदतीति तु वास्तविकोऽर्थः। एवञ्च परं सेवध्वमिति मुहुर्मुहुर्वदन् श्रीवत्सवक्षा उच्यते।

यद्वा श्रीः=परहिताराधनं, तद् वदन्ति, प्राणिभ्य उपदिशन्तीति श्रीवत्साः=भक्ता विद्वांसो वा, तान् वक्ति, शुभलक्षणा यूयं मामुपैत इति श्रीवत्सवक्षाः।

यद्वा, श्रीविष्णुशक्तिः, विभूतिर्वा, वत्सा वदन्तीति, अस्मभ्यं देहीति भगवन्तं प्रार्थयमाना अकिञ्चना दीना अर्थार्थिनो भक्ताः श्रीवत्साः, तान् वक्ति, मा भैष्ट, मां शरणं व्रजतेति श्रीवत्सवक्षाः।

यद्वा श्रियमात्मशक्तिं वदत्यर्थानुगमाद् वत्सं वेदरूपं ज्ञानञ्च, सर्गारम्भकाले विराडात्मने ब्रह्मणे वक्ति=उपदिशतीति श्रीवत्सवक्षाः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्वा श्रियो लक्ष्म्याः वत्साः प्रेमपात्रभूता वैभवशालिनो लक्ष्मीपुत्रा धनिनः, तान् वक्ति, दत्त दत्तेति पुनः पुनरुपदिशतीति श्रीवत्सवक्षाः सर्वेषां हृद्यन्तर्यामिरूपेण वर्तमानो भगवान् विष्णुः।

मन्त्रलिङ्गञ्च—

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे नक्षत्राणि
रूपमविश्वनौ व्यात्तम्। यजुः ३१।२२।।

अत्र किञ्चित्प्रसङ्गप्राप्तमुच्यते—

यदिह लोके व्यवहारहेतुभूतं हिरण्यादिकं धनं तद्योगभेदतो द्वैरूप्यमुपैति। यथा हि-तत्पालनभावेन=सेवाभावेन परहिताय प्रयुक्तं, चकासद्दिनमिव धवलं यशो वितरद् श्रीसंज्ञामुपैति। आत्मभोगाय प्रयुक्तञ्च रात्रिवत् कृष्णवर्णं तमोरूपमयशो वितरत्—लक्ष्मीरूपतामुपैति। पत्न्यौ शब्देन पालिके उच्येते। यथा—अहोरात्रेण सर्वं जगत् पाल्यते, श्रीलक्ष्मीभ्यामिदं सर्वं विश्वं पाल्यते।

तथा च—"यथा गौः—तृणादिभक्षणेन स्वात्मानं पालयन्ती, पालयति विश्वं दुग्धमूत्रगोमयवत्सादिप्रदानेन। एवं सर्वत्र तत्र तत्र वृक्षादिष्वप्यूह्यम्।" तत्र मनुष्याः गुणवैषम्यजान् विविधान् भावान् भजन्ति। तद्यथा—तमोगुणप्रधानाः स्वात्मपोषणाय भोगान् भुञ्जते। रजोगुणप्रधाना आत्मानं पोषयन्तः परानपि पोषयन्ति। सत्त्वप्रधानाश्च सर्वाभिर्विभूतिभिः परपोषणरता आत्मानमुपेक्षन्ते। यथा सत्त्वात्मकः सूर्यः परार्थस्वरूपः। तस्माद् विष्णुः सूर्यो वा श्रीवत्सवक्षा इत्युच्यते नतु लक्ष्मीवत्सवक्षा इति।

भवति चात्रास्माकम्—

श्रीवत्सवक्षा भगवान् स विष्णु-
र्विश्वं स वक्तीति पुनः पुनश्च।
सेवध्वमन्यं तमसः परोऽहं
श्रीरस्ति सर्वा मयि गुप्तरूपा ।।८८६।।

यदुक्तं पुनः पुनर्वक्तीति, अत्र हि नाम्नि समस्ते द्विधातुजं रूपद्वयमस्ति, वदतेर्वत्सः वक्तेर्वक्ष इति च। ***"अभ्यासे भूयांसमर्थं मन्यन्ते"*** (निरुक्त १०।१४) इति न्यायेन समानार्थकयोः शब्दयोः प्रयोगात् पौनःपुन्यरूपो विशेषार्थो द्योत्यते। पृथिव्याश्छायैव रात्री, यावत्प्राचीं ककुभन्नाश्रयते सूर्यस्तावत्तमः। यदुक्तं—**"आत्वेषं वर्तते तमः"** इति याजुषो मन्त्रः (३४।३२)।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीवासः—६०२

श्रीशब्दो व्याख्यातः। वासः शब्दो निवासार्थकाद् भौवादिकाद् 'वस' धातोः ***''हलश्च''*** (पा० ३।३।१२१) सूत्रेणाधिकरणे घञि वृद्धौ च सिद्ध्यति। श्रिया उष्यते यस्मिन् स श्रीवासः। अत्र लिङ्गम्—

श्रीणामुदारो धरुणो रयीणाम्। (ऋक् १०।४५।५) तथा

ऋष्टयो वो मरुतो अंसयोरधि सह ओजो बाह्वोर्वो बलं हितम्।
नृम्णा शीर्षस्वायुधा रथेषु वो विश्वा वः श्रीरधि तनूषु पिपिशे ।।

(ऋक् ५।५७।६)

इति ऋग्वेदवचने।

भवति चात्रास्माकम्—

श्रीवास एकः स हि सूर्य उक्त-
स्तस्मिन् ह तस्थुर्भुवनानि यस्मात्।
तस्मात् स विष्णुर्निजशक्तिमस्यन्
श्रियं पुरुत्रा कुरुतेऽधिविश्वम् ।।८८७।।

लोके चापि दृश्यते, सजीवो देहः श्रीमानुच्यते, अतः कायोऽपि श्रीवासनाम्नाभिधीयते।

श्रीपतिः—६०३

श्रीशब्दः पतिशब्दश्चोभावपि पृथक् पृथक् व्याख्यातौ। श्रियः पतिः श्रीपतिरिति षष्ठीतत्पुरुषसमासः। अत्र मन्त्रलिङ्गम्—

श्रीश्च ते लक्ष्मीश्च पत्न्यौ। यजुः ३१।२२।।

पतिशब्दात् स्त्रियां ङीपि, पतिशब्देकारस्य नत्वे च पत्नीशब्दः सिद्ध्यति, श्रीलक्ष्म्यौ पत्न्यौ यस्य, तयोः पतिरित्यर्थः। तयोश्च पाता=रक्षिता विष्णुरेवातो—विष्णुरेव श्रीपतिः, न तद्व्यतिरिक्तः कश्चिदन्यः।

लोके चापि पश्यामः, कश्चित् कस्माच्चित् किञ्चित् वस्त्वादत्ते, स च यावत् तन्न प्रत्यावर्तयति, तावत् स्वगर्भमिव रक्षति। अन्यच्च, दानिना निष्कामभावेन दत्तं, स विष्णुरेव पाति=रक्षति, तत्फलदानप्रतिभूः। अत एव स श्रीपतिरित्युच्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स श्रीपतिर्विष्णुरिदं वितन्वन्
श्रियं स्वयं पाति सना समग्राम् ।
लोकेऽस्ति दृश्यं बहुपुष्पजातं
कस्तच्छ्रियं पाति स एव विष्णुः ।।८८८।।

श्रीमतां वरः—६०४

श्रीशब्दात् *"तदस्यास्त्यस्मिन्निति मतुप्"* (पा० ५।२।९४) इति मतुप् प्रत्ययस्तदन्तस्य प्रातिपदिकसंज्ञायां षष्ठीबहुवचन आमि, श्रीमतामिति।

वरः शब्दो वरणार्थकाद् 'वृञ्' इति सौवादिकाद्धातोः *"ग्रहवृदृनिश्चिगमश्च"* (पा० ३।३।५८) सूत्रेणाप्प्रत्यये गुणे रपरे च सिध्यति। निर्धारणे षष्ठी, श्रीमतां वर इति।

भवतश्चात्रास्माकम्—

श्रीमज्जगत् सर्वमिहास्ति दृश्यं
वरीतुमर्होऽस्ति स एव विष्णुः ।
तमाप्तवाचः कवयः पुराणाः
स्तुवन्ति गायन्ति नमन्ति चान्ते ।।८८९।।

श्रीः सन्ति वेदा य उ तान् वृणोति
श्रीमान् स उक्तः स वरः स मान्यः।
ऋचाऽथ साम्ना यजुषा च नित्यं
तं जागृवांसः कवयः स्तुवन्ति ।।८९०।।

अत्र मन्त्रलिङ्गम्—

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते विष्णोर्यत् परमं पदम्।

यजुः ३४।४४।।

❖ ❖ ❖

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावानः।
श्रीधरः श्रीकरः श्रेयः श्रीमाँल्लोकत्रयाश्रयः ।।७८।।

६०५ श्रीदः, ६०६ श्रीशः, ६०७ श्रीनिवासः, ६०८ श्रीनिधिः, ६०९ श्रीविभावनः। ६१० श्रीधरः, ६११ श्रीकरः, ६१२ श्रेयः, ६१३ श्रीमान्, ६१४ लोकत्रयाश्रयः।

श्रीदः—६०५

श्रीशब्दोपपदात् "डुदाञ् दाने" धातोः ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) इति कर्त्रर्थे 'कः' प्रत्यय आल्लोपश्च, श्रीद इति। श्रियं ददातीति, श्रीश्च विष्णोरेव स्वीया, अतः स एव तस्या दाता, स एव च श्रीद इति।

अत्र मन्त्रलिङ्गम्—

भूरिदा ह्यसि श्रुतः पुरुत्रा शूर वृत्रहन्। आ नो भजस्व राधसि।

ऋक् ४।३२।२१।।

भवति चात्रास्माकम्—

श्रीदो हि विष्णुर्जगते ददाति
श्रियं सदा भूरिविधामनन्ताम् ।
वने जले विद्युति भेषु चोर्व्यां
स केवलं [१]पञ्चति निष्प्रपञ्चः ।।८६१।।

श्रीशः—६०६

श्रिय ईशः श्रीशः, षष्ठीतत्पुरुषसमासः, सांहितिको दीर्घश्च। श्रियो नियन्तेत्यर्थः।

भवति चात्रास्माकम्

श्रीशोऽस्ति विष्णुः स युनक्ति लोकं
श्रिया विचित्राभरणा च सा श्रीः।
लोकोऽस्ति तस्मात् प्रपदं विभक्तो
निन्द्येन नन्द्येन [२]तदाश्रयेण ।।८६२।।

---

१. पञ्चति=विस्तारयति। पचि विस्तारवचने चौरादिको धातुः। २. तस्या आश्रयस्तदाश्रयः। आश्रयः पात्रम्। तद्यथा—सर्वाङ्गो विकालाङ्गश्च। सुरूपः, कुरूपश्च। सुगन्धिः, निर्गन्धश्च। तरुणो जीर्णश्च। बह्वपत्योऽनपत्यश्च। सदारो विदारश्च, दाराः स्त्री। सधनो निर्धनश्चेत्यादि, त्रिलिङ्गोपेतायां चतुर्विधसृष्ट्यां स्वयमूह्यम्। यथा—सुरूपः पुमान् सुरूपा स्त्री, सुरूपमन्यत्। एतत् केवलं निदर्शनमात्रं दर्शितमस्माभिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीनिवासः—६०७

श्रीशब्दः प्राग् व्याख्यातः।

निरुपसर्गपूर्वाद् वसतेरधिकरणे घञि वृद्धौ च निवासशब्दो निष्पद्यते। श्रिया न्युष्यते यत्रेति श्रीनिवासः। यत्र श्रीः सदा स्थिरा निवसतीत्यर्थः। एवंविधश्च भगवान् विष्णुरेव।

भवति चात्रास्माकम्—

श्रियः समग्रा निहिता हि सूर्ये
सूर्योऽस्ति विष्णुर्जगदस्ति विष्णौ।
यथा [1]धनेशाकलकाधिसर्वं
सन् मन्यते स्वामिनि तद्वदेतत् ।।८६३।।

तत्र मन्त्रलिङ्गम्—

ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। यजुः ४० ।१।।

श्रीनिधिः—६०८

श्रियो निधीयन्ते यस्मिन्निति श्रीनिधिः। निपूर्वकाद् धातोः ''*कर्मण्यधिकरणे च*'' (पा० ३।३।९३) सूत्रेणाधिकरणे 'किः' प्रत्यय आकारलोपो, विष्णुरेतन्नामवाच्यः।

अत्र लिङ्गम्—

निधीनान्त्वा निधिपतिꣳ हवामहे। यजुः २३।१९।।
अपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमाविवेश ।
सद्यः पर्येमि पृथिवीमुतद्यामेकेनाङ्गेन दिवो अस्य पृष्ठम्।।
यजुः २३।५०।।

भवति चात्रास्माकम्—

स श्रीनिधिर्विष्णुरिहास्ति गम्यः
पदानि यस्मिन् त्रिवृतानि तस्थुः ।
तं श्रीनिधिं ध्यायति तत्त्वविद् यः
स श्रीनिधिः सन् व्रियते सदार्थैः।।८६४।।

---

१. आकलको=गणकः, कल संख्याने धातुः। धनेशस्याकलकः धनेशाकलकस्तस्मिन् सर्वमधिकृतं भवति वैभवं धनेशस्य, परन्तु गणकसमेतं सर्वं वैभवं धनेश एव निवसति वास्तवमेतत्। तथैव, प्रपदं गुणविभक्तमेतद् विश्वं तस्मिन्नेव सर्वपरिवृढे निवसति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविभावनः—६०६

व्युपसर्गपूर्वको "भू सत्तायाम्" भौवादिको धातुस्तस्माद् णिजन्ताद् ***"नन्द्यादिलक्षणो"*** (द्र० पा० ३।१।१३४) ल्युः ल्युड् वा बाहुलकात्, णेर्लोपो, योरनादेशो, विभावयतीति विभावनः, श्रियः विभावनः श्रीविभावनः श्रीर्विभाव्यतेऽनेनेति वा। श्रीविभावनो विष्णुः।

श्रियश्च विभावनं विविधरूपैः परिणमनम्—यतो हि उपसर्गवशाद्धात्वर्थः परिवर्तते। यदुक्तं—

उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत् ।। इति वैयाकरणसमयः।

सूर्योऽपि श्रीविभावन नाम्ना स्तूयते।

भवति चात्रास्माकम्—

श्रियं स विष्णुः प्रपदं विभज्य
गुणेन रूपेण पृथक् च नाम्ना ।
श्रिया विभातं कुरुते च विश्वं
स्वयं श्रिया तत्र विभाति नित्यम्।।८६५।।

श्रीधरः—६१०

श्रियो धरः श्रीधर इत्यत्र 'धृञ्' धरणे' धातोः पचाद्यचि शेषषष्ठ्या समासः। अत्र यद् वक्तव्यं तन्महीधरनाम्नो (३१७) व्याख्याने सविस्तरमुक्तमस्माभिः।

भवति चात्रास्माकम्—

स श्रीधरो विष्णुरनन्तशोभः
श्रियञ्च दाधर्ति विचित्रचित्राम् ।
नामानि लोके विविधानि तस्याः
श्रियं स षट्केन बिभर्ति लोकान्।।८६६।।

श्रीकरः—६११

श्रीशब्दसिद्धिर्दर्शिता।

करः—"डुकृञ् करणे" इति धातोः ***"कृञो हेतुताच्छील्यानुलोम्येषु"*** (पा०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३।२।२०) सूत्रेण हेत्वादिधर्मविशिष्टे कर्तरि टः प्रत्ययो रपरो गुणश्च।

श्रियः करः कारणं, तच्छीलोऽनुकूलो वा श्रीकरः शोभाकरो, विभूतिकरो, विचित्रगुणबलादिकरो वा। एवंविधश्च भगवान् विष्णुरेव।

भवति चात्रास्माकम्—

[1]स श्रीकरो विष्णुरनन्तलोकान्
करोति गर्भे स्वक एव यस्मात्।
तस्मात् स उक्तः कविभिः पुराणैः
प्रभाकरो भास्कर एव वा सः ।।८६७।।

श्रेयः—६१२

प्रशस्यशब्दात्—अतिशयद्योत्येऽर्थे ***''द्विवचनविभज्योपपदे तरबीयसुनौ''*** (पा० ५।४।५७) सूत्रेण 'ईयसुन्' प्रत्ययस्तस्मिँश्च ***''प्रशस्यस्य श्रः''*** (पा० ५।३।६०) सूत्रेण प्रशस्यस्य श्रादेशः, ***''टेः''*** (पा० ६।४।११५) इति प्राप्तष्टिलोपः ***''प्रकृत्यैकाच्''*** (पा० ६।४।१६३) सूत्रेण प्रकृतिभावविधानेन निषिध्यते, 'श्र—ईयस्' इति स्थितौ ***''आद् गुणः''*** (पा० ६।१।८४) इति गुणः, प्रातिपदिकसंज्ञा, तन्निमित्ते च कार्ये विहिते श्रेय इति।

मनुष्यवर्गस्य कृते प्रवृत्तिनिवृत्तिरूपो द्विविधो मार्गः निर्दिष्टः शास्त्रकृद्भिः स एव द्विविधो मार्गः श्रेयःप्रेयःशब्दाभ्यामभिधीयते। यथा च कठोपनिषदि (१।२।२)—

श्रेयश्च प्रेयश्च मनुष्यमेतस्तौ सम्परीत्य विविनक्ति धीरः ।
श्रेयो हि धीरोऽभिप्रेयसो वृणीते प्रेयो मन्दो योगक्षेमाद् वृणीते।।

श्रेयो निवृत्तिमार्गो भगवत्प्राप्तिकरः, प्रेयश्च प्रवृत्तिमार्गो लौकिकभोगप्रापकः। श्रेयो विष्णुः सूर्यो वा। तत्र मन्त्रलिङ्गम्—

परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत्।
उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात्।।

ऋक् १०।३१।२।।

श्रेयःशब्दस्य श्रेयसे, श्रेयांसमित्यादिबहुविभक्त्यन्ताः प्रयोगाः वेद उपलभ्यन्ते, निदर्शनमस्माभिः प्रदर्शितम्।

---

१. स विष्णुः सूर्यो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

श्रेयो हि विष्णु स उ वास्ति दक्षः
स एव सूर्यः स उ वास्ति यज्ञः।
स एव लभ्यः स उ वास्ति वाच्यः
श्रेयांसमेनं कवयः स्तुवन्ति ॥८६८॥

श्रीमान्—६१३

श्रियोऽस्य सन्तीति श्रीमान्। श्रीशब्दात्=*"तदस्यास्त्यस्मिन्निति मतुप्"* (पा० ५।२।९४) सूत्रेण मतुप् प्रत्ययः, प्रातिपदिकसंज्ञा, सुविभक्तिः, अत्वन्तलक्षणो दीर्घश्च, श्रीमानिति।

भवति चात्रास्माकम्—

श्रीमान् स विष्णुः कुरुतेऽधि सर्वं
न तद्विना श्रीर्भुवनेऽस्ति दृश्या।
श्रीमान् मनुष्योऽपि भवेत् सुयज्ञो
यज्ञेषु सर्वेषु ततः स एव ॥८६९॥

लोकत्रयाश्रयः—६१४

लोकशब्दो 'लोकृ दर्शने' धातोः *"हलश्च"* (पा० ३।३।१२१) सूत्रेण कर्मण्यधिकरणे वा घञ् प्रत्ययेन सिध्यति। लोक्यत इति, लोक्यते यत्रेति वा लोकः।

त्रय इति त्रिशब्द उणादिड्रिप्रत्ययान्तः, ततः *"संख्याया अवयवे तयप्"* (पा० ५।२।४२) सूत्रेण तयप् प्रत्ययोऽवयवार्थे। तस्य च *"द्वित्रिभ्यां तयस्याऽयज्वा"* (पा० ५।२।४३) सूत्रेण अयजादेशो वैकल्पिको, भत्वात् *"यस्येति च"* (पा० ६।४।१४८) इतीकारलोपः, त्रयमिति, पक्षे च त्रितयम्।

आश्रयः=आश्रीयत इति 'अकर्तरि च कारके'ऽधिकारे *"एरच्"* (पा० ३।३।५६) सूत्रेण कर्मणि अच् प्रत्ययः, गुणायादेशौ, सुबादिः, आश्रयः। लोकानां त्रयं भूर्भुवः स्वर्लक्षणं, तस्य=आसमन्ताद् आधारभूत इत्यर्थः। स च विष्णुः सूर्यो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गम्—

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।२।।—

परि द्यावापृथिवी याति सद्यः। ऋक् ३।५८।८।।

भवति चात्रास्माकम्—

लोकत्रयं संश्रयते स विष्णु-
र्लोकत्रयं संश्रयते च सूर्यः।
लोकत्रयं संश्रयते च देही
त्रिलोकयातं मनुते मनश्च।।६००।।

❖ ❖ ❖

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः।
विजितात्माऽविधेयात्मा सत्कीर्तिश्छिन्नसंशयः।।७६।।

६१५ स्वक्षः, ६१६ स्वङ्गः, ६१७ शतानन्दः, ६१८ नन्दिः, ६१६ ज्योतिर्गणेश्वरः। ६२० विजितात्मा, ६२१ विधेयात्मा-अविधेयात्मा, ६२२ सत्कीर्तिः, ६२३ छिन्नसंशयः।

स्वक्षः—६१५

शोभनं—अशनं—व्यापनं यस्येति सुपूर्वो बहुव्रीहिः। "अशूङ् व्याप्तौ" धातोरुणादिक्सौ (३।१५५) 'अक्षि'शब्दः सिध्यति। सु—अक्षि ***"बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच्"*** (पा० ५।४।११३) सूत्रेण षच् प्रत्ययः समासान्तः, ***"यस्येति च"*** (पा० ६।४।१४८) सूत्रेणेकारलोपः, सोर्विसर्गो, यण् वकारश्च, स्वक्ष इति। अक्षि शब्दो व्याप्त्यर्थको विषयाणां व्यापनात्।

मन्त्रलिङ्गञ्च—

श्रिये सुदृशो वपुरस्य सर्गाः। ऋक् ४।२३।६।।

तव श्रिया सुदृशो देव देवाः। ऋक् ५।३।४।।

अग्निं सुदीतिं सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः।

ऋक् ३।१७।४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तं सुप्रतीकं सुदृशं स्वञ्चमविद्वांसो विदुष्टरं सपेम ।
स यक्षद् विश्वा भुवनानि विद्वान् प्र हव्यमग्निरमृतेषु वोचत्।।

ऋक् ६।१५।१०।।

भवति चात्रास्माकम्—

स्वक्षः स विष्णुर्भुवनानि पश्यन्
हिरण्मयेनाथ रथेन याति ।
स एव चक्षुः सकलस्य लोके
स्तुवन्ति देवाः सुदृशं सदाग्निम् ।।६०१।

स्वङ्गः—६१६

शोभनानि अङ्गानि=गमनानि यस्य स स्वङ्गः। 'अगि गतौ' इति भौवादिकधातोः पचाद्यचि भावे घञि वा—अङ्गः, इदित्त्वान्नुम्। सुपूर्वो बहुब्रीहिः।

मन्त्रलिङ्गञ्च—

अग्रे बृहन्नुषसामूर्ध्वो अस्थान्निर्जगन्वान् तमसो ज्योतिषागात् ।
अग्निर्भानुना रुषता स्वङ्ग आ जातो विश्वा सद्मान्यप्राः।।

ऋक् १०।१।१।।

श्रिये सुदृशो वपुरस्य सर्गाः.....। ऋक् ४।२३।६।।

भवति चात्रास्माकम्—

स्वङ्गो हि विष्णुर्गमयन् स विश्वं
साङ्गैः शुभाङ्गैः कुरुते च विश्वम् ।
स्वाङ्गो हि गीतः कुरुते स्थिराङ्गं
यैः प्राणिमात्रं कुरुते क्रियाः स्वाः।।६०२।।

शतानन्दः—६१७

शतशब्दोऽनन्तपर्यायः प्राग्व्याख्यातः।

आनन्दशब्द आङ्पूर्वाद् ''टुनदि समृद्धौ'' इति भौवादिकाद् धातोर्भावे घञि, इदित्त्वान्नुमि, मत्वर्थीयेऽचि च सिध्यति । शतम् अनन्ता आनन्दा यस्मिन् यस्य वा स शतानन्दः। सर्वत्र विश्वे सर्वेणानुभूयमानः प्रसादः किन्निमित्तक इति विचार्यमाणे, विष्णोरेवानन्दरूपात् स सर्वत्र प्रसृत इति पर्यवसीयते। विकारमभजमानं प्रकृतिस्थं वस्तु विष्णुसाम्यं भजदानन्दमनुभवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथवा यल्लब्ध्या समृद्धोऽहमिति मनसि प्रसत्तिर्जायते सैवानन्दशब्देनोच्यते। तत्र विषयनिमित्तो य आनन्दः स नानन्दः, किन्त्वानन्दाभासः सः, क्षणिकत्वात् तस्य। यज्ज्ञात्वा समृद्धार्थो भवति जीवः स एव वस्तुत आनन्दः। अपरथा ज्ञानमेवानन्दस्तस्य चानन्त्यं, **''अनन्ता वै वेदाः''** (तै० ब्रा० ३।१०।११) इति वचनात्। सर्वञ्चैतत् शतानन्दरूपे ब्रह्मानन्दे परिसमाप्नोति। तस्मात् शतानन्दः स विष्णुः। शतानन्दाद् व्यतिरिक्तं यत्सर्वमानन्दं तद् दुःखपर्यायेण निर्ऋतिशब्देनोच्यते।

तद्यथा—

बहुप्रजा निर्ऋतिमाविवेश। ऋक् १।१६४।३२।।

प्रार्थना च निर्ऋतिर्न नो प्राप्नुयात्। यथा —

द्यौश्च नः पृथिवी च प्रचेतस ऋतावरी रक्षतामंहसोरिषः ।
मा दुर्विदत्रा निर्ऋतिर्न ईशत तद् देवानामवो अद्या वृणीमहे।।

ऋक् १०।३६।२।।

''दुष्ष्वप्न्यं निर्ऋतिम्'' (ऋक् १०।३६।४।) इति दुष्ष्वप्न्यं निर्ऋत्या विशेषणम्। मन्त्रे चास्मिन्नादित्यसम्बन्धि शर्म प्रार्थ्यते। तत्र मन्त्रो यथा—

ग्रावा वदन्नप रक्षांसि सेधतु दुष्ष्वप्न्यं निर्ऋतिं विश्वमत्रिणम्।
आदित्यं शर्म मरुतामशीमहि तद् देवानामवो अद्या वृणीमहे ।।

ऋक् १०।३६।४।।

एवं वेदे बहुत्र निर्ऋतिशब्दो दृश्यते, तद् दुःखरूपनिर्ऋत्या निवृत्तये देवकर्तृकम् अवः=रक्षणं समीह्यते, यतो हि भगवन्तं शतानन्दमवाप्तुं तत्र स्थातुञ्च सकलानां जीवानां स्वाभाविकी प्रवृत्तिः।

मृत्युरपि निर्ऋतिस्तत्र **"एषा त्वा पातु निर्ऋतेरुपस्थात्''** इति (१०।१८।१०) ऋग्वचनं लिङ्गम्।

भवति चात्रास्माकम्—

शतानन्दः स वै विष्णुस्ते वा ये तदुपासकाः।
देवा देवगणा वापि सर्वे वा लोकविग्रहाः ।।६०३।।

लोकविग्रहा इति यदुक्तम्, तत्र— अप्तत्त्वबहुलो मत्स्योऽप्सु समेधते, पृथिव्याञ्चासौ निर्ऋतिमाविशति। एवं पृथिवीतत्त्वबहुलं मनुष्यादीनां वपुः पृथिव्यां शतानन्देन समेधते, अप्सु निर्ऋतिं लभते। एतेनैवं विज्ञायते यत्—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथास्वतत्त्वावस्थानं सुखम्=आनन्दः, स्वतत्त्वाद्विच्युत्य परतत्त्वप्राप्तिर्दुःखं=निर्ऋतिः।

सूर्यो जगतस्तस्थुषश्चात्मेति, स सुखं दुःखं वा न प्राप्नोति, किन्तु स्थानान्तरेण नभसा गच्छन् लोकान् सुखेन दुःखेन वा योजयति, परन्तु नैतदनन्तानन्दरूपे ब्रह्मणि सङ्गच्छतेऽतः स शतानन्दः।

भवति चात्रास्माकम्—

विश्वे शतानन्दमयेन सृप्तं
नन्दं स विष्णुः सकलाय राति।
न निर्ऋतिं काङ्क्षति कोऽपि जीवो
वाञ्छन् शतानन्दमयस्य चाङ्कम्।।६०४।।

नन्दिः—६१८

"टुनदि समृद्धौ" धातोरौणादिकः "इन्" प्रत्ययः, इदित्त्वान्नुम् नन्दति, समर्धत इति नन्दिर्विष्णुः सूर्यो वा।

लोकेऽपि पश्यामः—चक्रमयमिदं विश्वं सर्वदा समृध्यमानं दृश्यते। दृश्यते चोदेत्य सूर्योऽन्तरिक्षे समर्द्धमानः। यत्र च यज्ज्योतिषा भास्वताम् नक्षत्राणाञ्च समेधते स विष्णुर्नन्दिः। अस्याञ्च चतुर्विधायां सृष्टौ सर्वं नन्दति=समर्धते। यथा—सर्वोऽपि प्राणिवर्गः स्वसन्तानपरम्परया नन्दति, यथा—क्षुपलतावृक्षादयोऽपि निरन्तरं समेधन्ते। मन्त्रलिङ्गञ्च—

सर्वे नन्दन्ति यशसागतेन। ऋक् १०।७१।१०।।

भवति चात्रास्माकम्—

सूर्यो हि नन्दिः स समृद्ध्यमानो
यथा जनैः खे परिलोक्यते वै ।
विष्णुस्तथा विश्वमिदं समस्तं
समृद्ध्यमानं कुरुते ह्यजस्त्रम् ।।६०५।।

ज्योतिर्गणेश्वरः—६१६

"द्युत दीप्तौ" इति भौवादिकाद्धातोः ***"द्युतेरिसिन्नादेशच जः"*** (२।११०) इत्युणादिसूत्रेण "इसिन्" प्रत्ययो धातोरादेर्दकारस्य जकारादेशश्च, गुणो,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्योतिः। द्योतत इति ज्योतिः। ज्योतिः=प्रकाशग्रहनक्षत्राग्नयः तात्स्थ्यात्।

गणः—"गण संख्याने" इति चुराद्यन्तर्गतकथादिगणपठिताद् धातोर्णिच्, णिचि—अकारलोपस्तस्य च स्थानिवद्भावाद् वृद्धेरभावः। गणि इत्यस्य ***"सनाद्यन्ता धातवः"*** (पा० ३।१।३२) सूत्रेण धातुसंज्ञा, ततः ***"एरच्"*** (पा० ३।३।५६) सूत्रेण 'अच्' प्रत्ययः तस्मिंश्च णिलोपः। गण्यन्ते=संख्याविषयीक्रियन्त इति गणाः।

ईश्वरः—'ईश ऐश्वर्ये' धातोः ***"स्थेशभासपिसकसो वरच्"*** (पा० ३।२।१७५) इत्यनेन ताच्छील्यादिविशिष्टकर्त्रर्थे 'वरच्' प्रत्ययः। ज्योतिषां गणस्येश्वर इति ज्योतिर्गणेश्वरः, विष्णुः सूर्यो वा।

मन्त्रलिङ्गम्—

इनो विश्वस्य भुवनस्य गोपाः। ऋक् १।१६४।२१।। इनः=सूर्यः।

यथा सूर्यो नक्षत्राणामुदयंस्तेजांस्याददे।

एवा स्त्रीणाञ्च पुसां च द्विषतां वर्च आददे।। अथर्व ७।१३।१।।

लोके च पश्यामः—अयं शरीराभिमान्यात्मा ज्योतिषां समनस्कानामिन्द्रियाणामीश्वरः सन् ज्योतिर्गणेश्वर उच्यते। एवमयमैश्वरो गुणः सर्वत्र लोके व्याप्तो दृश्यते। तस्माद् विष्णुरेव ज्योतिर्गणेश्वर इति।

भवति चात्रास्माकम्—

ज्योतिर्गणेशः स रविः स विष्णु-
र्नक्षत्रतेजांस्युदयन् क्षिणोति।
तथा यथात्मा विरहन् शरीरं
ज्योतींषि खानां परिगृह्य याति।।६०६।।

विजितात्मा—६२०

विपूर्वो "जि जये" धातुरनिट्, तस्मात्कर्मणि क्तो विजितः। आत्मा—अततेर्मनिन्प्रत्ययान्तो व्याख्यातः। विजित आत्मा स्वरूपं येन स विजितात्मा स्वयम्प्रकाश इत्यर्थः।

लोके चापि दृश्यते—शरीरान्तर्गतो जीवात्मा स्वयं प्रकाशते, तस्मिन् प्रकाशमाने च ज्ञानेन्द्रियाणि प्रकाशन्ते, परन्तु—इन्द्रियगणो नहि जीवात्मनः प्रकाशकोऽतः स विजितात्मोच्यते। मन्त्रलिङ्गञ्च—

अयं ह येन वा इदं स्वर्मरुत्वता जितम्।

इन्द्रेण सोमपीतये। ऋक् ८।७६।४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

अयं ह विष्णुः सकलं विजित्य
स्वीये स्वरूपे निदधाति सर्वम् ।
सूर्योऽपि तद्वद्विजितान्तरात्मा
विश्वं समस्तं कुरुते निजान्तः ।।६०७।।

विधेयात्मा—६२१—अविधेयात्मा

विपूर्वकः "डुधाञ् धारणपोषणयोः" इति जौहोत्यादिको धातुस्ततः ***"अचो यत्"*** (पा० ३।१।९७) इति यत् प्रत्ययः, कृत्यसंज्ञकत्वाद् ***"अर्हे कृत्यतृचश्च"*** (पा० ३।३।१६९) सूत्रेण अर्हार्थे विधीयते। यति परतश्च ***"ईद्यति"*** (पा० ६।४।६५) सूत्रेण आकारस्य ईत्वं विहितं, ततो गुणः । विधेय+आत्मा इत्यत्र सवर्णदीर्घः। आत्मशब्दस्य साधनं प्राग्विहितं, स च स्वरूपपर्यायः।

"विजितात्माविधेयात्मा" इत्यत्र 'अविधेयात्मा' इत्यपि च्छेत्तुं शक्यतेऽतो द्विधा व्याख्यातमेतन्नाम।

मन्त्रलिङ्गञ्च—

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते स ँ सृजेथामयं च।
यजुः १५।५४।।

उद्बुध्यस्व, प्रतिजागृहि, इष्टापूर्ते संसृज, इत्यादि प्रेष्यत्वरूपमिह विधेयत्वम्। एवं प्रतिपदं वेदे तद्यथा—

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय। यजुः ३०।१।। इत्यादि।

नञा योगे **अविधेयात्मेति**। तत्र विधेयत्वप्रतिपादकानि वेदवाक्यानि—

मेधाम्मे वरुणो दधातु मेधामग्निः प्रजापतिः।
मेधामिन्द्रश्च वायुश्च मेधां धाता दधातु मे ।। यजुः ३२।१५।।

इत्यादीनि न ब्रह्मविषयकतात्पर्यवन्ति स्युरिति। अत उभयथेति सत्यदेवो वासिष्ठः। एवञ्चोपपद्यते—यद्यपि राजा अप्रेष्यस्तथापि तत्कर्मकराः प्रेष्या भवन्ति। एवं कर्तव्यमस्ति, तस्मादेवं कुरु—इति प्रेषणा।

भवति चात्रास्माकम्—

सर्वत्र सद्व्याप्तिमयं महेशं
सूर्यं तथा चन्द्रमथापि शुक्रम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आगच्छ तिष्ठेह कुरुष्व वैवं
प्रकाश्यते मर्त्यवरेण वाञ्छा।।६०८।।

तं प्रति—इति शेषः

सत्कीर्तिः—६२२

सती—अस्तेः शतरि 'सत्', स्त्रियां ***"उगितश्च"*** (पा० ४।१।६) ङीपि सती। कीर्तिः—'कॄत संशब्दने' इति चौरादिको धातुस्ततो णिच्, णिचि च ***"उपधायाश्च"*** (पा० ७।१।१०१) सूत्रेण ऋकारस्य इत्त्वं रपरत्वं च, ***"उपधायाञ्च"*** (पा० ८।२।७८) सूत्रेण दीर्घः, कीर्ति इत्यस्य धातुसंज्ञायां ***"ण्यासश्रन्थो युच्"*** (पा० ३।३।१०७) इति प्रबाध्य ***"ऊतियूतिजूतिसातिहेतिकीर्तयश्च"*** (पा० ३।३।९७) सूत्रेण क्तिन्नन्तो निपातितः कीर्तिशब्दः। ***"तितुत्र"*** (पा० ७।२।८) इतीण्निषेधः, णेर्लोपः। सती कीर्तिर्यस्य स सत्कीर्तिः ***"स्त्रियाः पुंवद्भाषित०"*** (पा० ६।३।३२) इति पुंवद्भावः।

यद्वा णिजन्तात् कीर्तिधातोः ***"ह्वपिशिरुवृतिवृधिछिदिकीर्तिभ्यश्च"*** (४।११६) इत्युणादिसूत्रेण 'इन्' प्रत्ययः कीर्तिः। यद्वा णिजन्तादेव तस्मात् ***"अच इः"*** (४।१३६) इत्युणादिः "इ" प्रत्ययो णेर्लोपः, कीर्तिः, विशेषः स्वरे। कीर्तिर्नाम कस्यचित् गुणप्रकाशिका स्तुतिर्वस्तुत्वस्य प्रकाशनं वा। तत्र मन्त्रौ—

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।
अथर्व ५।११।४।।

अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्। ऋक् १।१।१।। इत्यादि।

भवति चात्रास्माकम्—

विष्णुः सदा सर्वगुणाभिरामः
सङ्कीर्त्यते स्वात्मतमः प्रमृष्ट्यै ।
मन्त्रैर्व्रतैः सत्यजपैस्तपोभि-
र्नान्यस्ततः[1] कीर्तिमुपैति सत्याम्।।६०९।।

१. तत इति—तस्मादन्य इत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

छिन्नसंशयः—६२३

छिन्न इति—''छिदिर् द्वैधीकरणे'' इति रौधादिको धातुरनिट्, ततः कर्मणि क्तः, ***''रदाभ्यां निष्ठातो नः पूर्वस्य च दः''*** (पा० ८।२।४२) सूत्रेण निष्ठातकारस्य तथा पूर्वस्य धातुदकारस्य च नत्वम् ।

संशय इति—संपूर्वात् ''शीङ्स्वप्ने'' इत्यादादिकाद्धातोः ***''एरच्''*** (पा० ३।३।५६) इति भावेऽच् प्रत्ययः, गुणायादेशौ, समो मकारस्यानुस्वारश्च, संशयः=सन्देहः।

छिन्नः संशयो यस्य स छिन्नसंशयो भगवान् विष्णुः। यतो हि तस्य सृष्टेरादित आरभ्य सृष्टेः प्रलयान्तं विश्वविषयकं सर्वं ज्ञानं निःसंशयं भवति, येनेदं जगद् व्यवस्थाबद्धं सम्यक् प्रचलति। स मनुष्योऽपि च्छिन्नसंशयो यस्य भगवान् छिन्नसंशयो दक्षिणः। अन्यथा संशयग्रस्तो निमज्जति।

संशये मन्त्रलिङ्गम्—

प्रसु स्तोमं भरत वाजयन्त इन्द्राय सत्यं यदि सत्यमस्ति ।
नेन्द्रो अस्तीति नेम उ त्व आह क ईं ददर्श कमभिष्टवाम।।

ऋक् ८।१००।३।।

छिन्नसंशये मन्त्रलिङ्गम्—

अयमस्मि जरितः पश्य मेह विश्वा जातान्यभ्यस्मि महा ।
ऋतस्य मा प्रदिशो वर्धयन्त्यादर्दिशे भुवना दर्दरीभिः।।

ऋक् ८।१००।४।।

एवं बहुत्र

अहमिन्द्रो न परा जिग्ये। ऋक् १०।४८।५।।
अहं भुवं वसुनः पूर्व्यस्पतिरहं धनानि सं जयामि शश्वतः ।
मां हवन्ते पितरं न जन्तवोऽहं दाशुषे वि भजामि भोजनम्।।

ऋक् १०।४८।१।।

भवति चात्रास्माकम्—

न संशयः स्थानमुपैति तस्मिन्
यस्मिन् ह तस्थुर्भुवनानि विश्वा ।
अयं तथाहं च पदेन विष्णु-
र्व्यक्तोऽस्ति यद्वद् दिवि सूर्य [1] एकः।।६१०।।

---

१. प्रतिसौरमण्डलमियं व्यवस्था द्रष्टव्या।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतस्थिरः।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः।।८०।।

६२४ उदीर्णः, ६२५ सर्वतश्चक्षुः, ६२६ अनीशः, ६२७ शाश्वतस्थिरः। ६२८ भूशयः, ६२९ भूषणः, ६३० भूतिः, ६३१ विशोकः, ६३२ शोकनाशनः।।

उदीर्णः—६२४

उदिति तकारान्तोपसर्गपूर्वकः "ऋ गतौ" इति क्रैयादिको धातुस्ततो ***"गत्यर्थाकर्मक"*** (पा० ३।४।७२) इत्यादिना कर्तरि क्तः, गुणाभावः। ***"श्र्युकः किति"*** (पा० ७।२।११) सूत्रेणेण्निषेधः। ***"ऋत इद्धातोः"*** (पा० ७।१।१००) सूत्रेण धातोरङ्गस्य रपरमित्वम् । ***"रदाभ्यां निष्ठातो नः पूर्वस्य च दः"*** (पा० ८।२।४२) सूत्रेण निष्ठातकारस्य नकारादेशः। ***"रषाभ्यां नो णः समानपदे"*** (पा० ८।४।१।) सूत्रेण णत्वम्। ***"हलि च"*** (पा० ८।२।७७) इति दीर्घः, उदीर्ण इति, उच्चैर्गत इत्यर्थः, अर्थात् सर्वस्यादिभूतः। मन्त्रलिङ्गञ्च—

एष स्य भानुरुदियर्त्ति। ऋक् ४।४५।१।।
इन्द्रः समुद्रमुदियर्त्ति। ऋक् ६।८४।४।।
दिवि स्वनो यतते भूम्योपर्य्यनन्तं शुष्ममुदियर्त्ति भानुना।
अभ्रादिव प्र स्तनयन्ति वृष्टयः सिन्धुर्यदेति वृषभो न रोरुवत् ।।
ऋक् १०।७५।३।। इत्यादि।

भवति चात्रास्माकम्—

सूर्यो ह्युदीर्णः सकलं हि दृश्यं
नित्यं नयत्यात्मगुणेन नूत्नम् ।
उदीर्य विश्वं कुरुते मनोज्ञं
विष्णाविदं स्यूतमतोऽस्त्युदीर्णः।।६११।।

सर्वतश्चक्षुः—६२५

सर्वत इति—सर्वशब्दात् ***"आद्यादिभ्य उपसंख्यानम्"*** इति (पा० ५।४।४४) सूत्रस्थवार्तिकेन सार्वविभक्तिकस्तसिः प्रत्ययः।

चक्षुः—"चक्षिङ् व्यक्तायां वाचि" धातुर्दर्शनेऽपि, अत्र च दर्शनार्थक एव। इदितोऽप्यस्य नुम् न "अन्ते इदितः" इति व्याख्यानात् (द्र० क्षीरतरङ्गिणी २।८)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

''चक्षेः शिच्च'' इत्युणादिना (२।११६) उसि प्रत्ययस्तस्य च शिद्वदतिदेशः, तेन शित्त्वात् *''तिङ् शित् सार्वधातुकम्''* (पा० ३।४।११३) सूत्रेण सार्वधातुकत्वात् ख्याञादेशाभावः, चक्षुरिति। सर्वतः पश्यतीति सर्वतश्चक्षुः।

अत्र मन्त्रलिङ्गम्—

विश्वतश्चक्षुरुत विश्वतो मुखो०। ऋक् १०।८१।३।।

यजुः १७।१९।। विश्वतः=सर्वतः—साक्षाद् द्रष्टेत्यर्थः। अस्मिन्नेवार्थे—

विश्वतश्चर्षणिरुत विश्वतोमुखो०। अथर्व १३।२।२६।। इत्यादि।

भवति चात्रास्माकम्—

स सर्वतश्चक्षुरिहास्ति विष्णुः
स विश्वतः पश्यति विश्वमेतद्।
स विश्वबाहुः स च विश्वतस्पात्
तमेव गायन्ति नमन्ति धीराः ।।६१२।।

अनीशः—६२६

"ईश ऐश्वर्ये" इति धातुरादादिकस्तस्माद् *''इगुपधज्ञाप्रीकिरः कः''* (पा० ३।१।१३५) सूत्रेण कर्त्रर्थे कः प्रत्ययः गुणाभावः। नञा अविद्यमान ईशोऽनीश इति बहुव्रीहिसमासे *''नलोपो नञः''* (पा० ६।३।७३) सूत्रेण नकारलोपः, *''तस्मान्नुडचि''* (पा० ६।३।७४) सूत्रेण नुडागमश्च। न तस्य कश्चिदीष्टे, किन्तु स सर्वस्येष्टे।

मन्त्रलिङ्गञ्च—

अयमग्निः सुवीर्यस्येशे महः सौभगस्य ।
राय ईशे स्वपत्यस्य गोमत ईशे वृत्रहथानाम्। ऋक् ३।१६।१।।

ईशधातोर्वेदे विभिन्नलकारत्वेन विविधपुरुषवचनत्वेन च बहुधा प्रयोगो दृश्यते। तत्र वेदप्रमाणनिदर्शनमात्रमिह नः प्रयोजनम्।

भवति चात्रास्माकम्—

अग्निर्हि विष्णुर्ह्यथवाऽपि सूर्यः
स एव सर्गान्तमिदं समीष्टे ।
न कोऽपि विष्णोरपरोऽस्ति शास्ता
गीतोऽस्त्यतोऽनीशपदेन विष्णुः।।६१३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाश्वतस्थिरः—६२७

शश्वदिति सदार्थेऽव्ययम्। शश्वदेव शाश्वतः, स्वार्थे अण् तद्धितः। ***''अव्ययानां भमात्रे टिलोपो वक्तव्यः''*** इति त्वनित्यं बहिषष्टिलोपविधानाज्ज्ञापकात् (द्र० काशिका ४।१।८५) ***''येषाञ्च विरोधः शाश्वतिकः''*** इति (पा० २।४।६) सूत्रलिङ्गच्च।

स्थिरः—''ष्ठा गतिनिवृत्तौ'' इति भौवादिकाद्धातोः ***''अजिरशिशिरशिथिल-स्थिरस्फिरस्थविरखदिराः''*** (१।५३) इत्युणादिसूत्रेण 'किरच्' प्रत्ययष्टिलोपश्च निपात्यते। तिष्ठतीति स्थिरः, स्थायी दृढो वा। शाश्वतश्चासौ स्थिरश्चेति शाश्वतस्थिरः, सनातनोऽविनाशीत्यर्थः। विष्णुः सूर्यो वा शाश्वतस्थिरनामा, सूर्योऽपि हि शश्वत् दिवि तिष्ठत्यतः स एतन्नाम्नाऽभिधीयते।

मन्त्रलिङ्गञ्च—

इन्द्रो अङ्गमहद् भयमभीषदपच्युच्यवत्।
स हि स्थिरो विचर्षणि। ऋक् २।४१।१०, इति निदर्शनम्।

भवति चात्रास्माकम्—

स्थिरो हि विष्णुः स हि शाश्वतो वा
दिवं सनाथं कुरुते चिरस्य।
तस्मिन् ह तस्थुर्भुवनानि विश्वा
संस्थापयन् विश्वमसौ बिभर्त्ति।।६१४।।

भूशयः—६२८

भूः—''भू सत्तायाम्'' भौवादिकाद्धातोः कर्तरि क्विप्। भवतीति भूः—भवनधर्मा।

शयः—''शीङ् स्वप्ने'' इत्यादादिको धातुस्ततः पचाद्यच्, गुणायादेशौ शय इति।

भूषु=भवनधर्मकेषु=सत्तावत्सु शेते=अन्तर्यामिरूपेण वर्तत इति भूशयो विष्णुः।

मन्त्रलिङ्गम्—

शेषे वनेषु मात्रोः सं त्वा मर्तास इन्धते।
अतन्द्रो हव्या वहसि हविष्कृत आदिद् देवेषु राजसि।।

ऋक् ८।७।१५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स भूशयो विष्णुरनन्तशक्ति-
श्चराचरं भूगुणवद्विधाय ।
शेतेऽन्तरासौ भुवनानि जानन्
वपुर्यथात्मा कुरुते क्रियावत् ।।६१५ ।।

भूषणः—६२६

"भूष अलङ्कारे" चौरादिको धातुस्ततो णिच्, णिजन्ताच्च *"क्रुधमण्डार्थेभ्यश्च"* (पा० ३।२।५१) सूत्रेण 'युच्' प्रत्ययः मण्डनार्थे, योरनादेशः, णेर्लोपः, णत्वम्, भूषण इति। भूषयति=अलङ्करोतीति भूषणः। भूषणता चेयमेव तस्य यदिमां जडात्मिकां प्रकृतिं सत्तया स्फूर्त्तिप्रदानेन क्रियाशीलतामापादयतीति।

मन्त्रलिङ्गञ्च—

अरं हि ष्मा सुतेषु णः सोमेष्विन्द्र भूषसि।
अरं ते शक्र दानवे। ऋक् ८।९२।२६।।
अग्निः सनोति वीर्य्याणि विद्वान्त्सनोति वाजममृताय भूषन्।
स नो देवाँ एह वह पुरुषो। ऋक् ३।२५।२।।

लोकेऽपि दृश्यते—यथा—यावत्कालमात्मा शरीरस्थायी तावत्कालं स शरीरमलङ्कुरुते=भूषयति, अर्थात् प्रियत्वाय कल्पयति, तावत्तस्य भूषण इति संज्ञा। अपयाते चात्मनि तदेव शरीरं प्रतिक्षणं विक्रियामापद्यमानं परिक्षीणशोभं जायते। अतो ज्ञायते स आत्मैव शरीरस्य भूषण आसीदिति। एवमेव लोकस्य सर्वस्य भूषणः सूर्यः, सूर्यस्य च कश्चिदव्यक्तशक्तिर्विष्णुसंज्ञः। यो हि यस्य जीवनः स तस्य भूषण इत्यर्थादापद्यते।

भवति चात्रास्माकम्—

स भूषणो विष्णुरलङ्करिष्णुः
सूर्यादिभिर्भूषयते ह नित्यम्।
तथा यथात्मा वपुरिन्द्रियाढ्यं
स्वसत्तया तत्कुरुते प्रभावत् ।।६१६ ।।

सः विष्णुः सूर्यस्य भूषणः=मण्डनः। सूर्यश्च भूषणो लोकलोकान्तराणां मण्डनकर्तृत्वात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतिः—६३०

"भू सत्तायाम्" इति भौवादिको धातुस्ततः स्त्रियां भावे क्तिन्। ***"श्र्युकः किति"*** (पा० ७।२।११) इतीण्निषेधः। कित्त्वाद् गुणाभावः। भवनं भूतिः सत्तारूपः। विभूतेः सम्पदो वा भूतिरिति नाम। स हि सत्तारूपः स्वसत्तया सर्वं व्याप्नोति, विभूतिरूपेण च सर्वं व्यवहारयति। सा च परा देवता। बृहस्पत्यादयस्तस्या एव स्वरूपविशेषाः, यदुक्तं **"अग्निर्देवता वातो देवता सूर्यो देवता चन्द्रमा देवता..... बृहस्पतिर्देवतेन्द्रो देवता वरुणो देवता"** इत्यादि यजुषि १४।२०।।

विष्णुः सर्वदेवतारूपः सूर्यरूपेण नक्षत्रादिरूपेण वा स्वसत्तया सर्वकालं सर्वत्र विद्यत इति द्रढयितुं भूतिरिति नाम भगवतः स्तुतिपरमिति।

मन्त्रलिङ्गञ्च—

कालो भूतिमसृजत काले तपति सूर्यः ।
काले ह विश्वा भूतानि काले चक्षुर्विपश्यति।। अथर्व १९।५३।६।।

यस्मात् स काले भूतिमसृजत्, तस्मात् स तद्गुणाधिष्ठानो भूतिरित्युच्यते। तथा च, यथा योऽपूर्वं यन्त्रादिकमाविष्करोति स तन्नाम्ना प्रशस्यते व्यवह्रियते वा। लोकव्यवहारहेतुभूता वा सम्पद् भूतिः। तद्यथा—

भूतिश्च मे यज्ञेन कल्पन्ताम्। यजुः १८।१४।।

भवति चात्रास्माकम्—

भूतिः स विष्णुः कुरुते कृतं स्वं
सत्तान्वितं सर्वरसं सदास्थम् ।
यतः स भूतिर्न जहाति सत्तां
कार्यञ्च सत्तां न जहाति तस्मात्।।६१७।।

विशोकः—६३१ अशोकः

"शुच शोके" इति धातोर्भावे घञ् प्रत्ययः ***"चजोः कु घिण्ण्यतोः"*** (पा० ७।३।५२) सूत्रेण कुत्वं, गुणः। एकत्र अविद्यमानः शोको यस्य, अपरत्र विगतः शोको यस्येति बहुव्रीहिः, नञो नलोपोऽशोको, विशोकश्च। सर्वथा शोकरहित इत्यर्थः। मन्त्रलिङ्गञ्च—

नैतावदेना परो अन्यदस्त्युक्षा स द्यावापृथिवी बिभर्त्ति ।
त्वचं पवित्रं कृणुत स्वधावान् यदीं सूर्यं न हरितो वहन्ति।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तेगो न क्षामत्येति पृथ्वीं मिहं न वातो वि ह वाति भूम।
मित्रो यत्र वरुणो अज्यमानोऽग्निर्वने व्यसृष्ट शोकम् ।।

ऋक् १० ।३१ ।८,९ ।।

विशोको विष्णुः सूर्योऽग्निरात्मा वा।

भवति चात्रास्माकम्—

विष्णुर्विशोकः कुरुते च सूर्यं
विशोकमग्निं सकलं जगद्वा ।
न शोकमोहौ च तमश्नुवाते
यतः स विद्वान् कविरात्मतन्त्रः।।६१८।।

यद्वा—"ईशुचिर पूतिभावे" इति दैवादिकाद्धातोर्घञि शोकः। वि-उपसर्गेण समासे विगतः शोकः क्लेदो यस्य स विशोकः, क्लेदरहितः खरांशुः सूर्यात्मको विष्णुः। 'ईशुचिर् पूतिभावे' इति तथा 'शुच दीप्तौ' इति धात्वर्थानुगमपक्षे च मन्त्रलिङ्गानि—

शुचिक्रन्दम् (ऋक् ७ ।६७ ।५), **शुचिजिह्वः** (ऋक् २ ।९ ।१), **शुचिपेशसम्** (ऋक् १ ।१४४ ।१), **शुचिप्रतीकम्** (ऋक् १ ।१४३ ।६), **शुचिबन्धुः** (ऋक् ६ ।६७ ।९), **शुचिभ्राजाः** (ऋक् १ ।७९ ।१) इत्यादीनि विशोकार्थं स्पष्टयन्ति। **"तत्र को मोहः कः शोक एकत्वमनुपश्यतः"** (यजुः ४० ।७) इति यजुर्मन्त्रोक्त एवार्थो 'वि'-उपसर्गेण द्योत्यते।

शोकनाशनः—६३२

"णश अदर्शने" इति दैवादिकाद्धातोर्हेतुमण्णिच्, वृद्धिः, ततो ***"नन्द्यादित्वात्"*** (पा० ३ ।१ ।१३४) ल्युर्ल्युड् वा बाहुलकात्, योरनादेशः, शोकस्य नाशनः शोकनाशनः, स्वयं विशोकोऽशोकसंस्पर्शः, परेषां शोकं नाशयति यः स शोकनाशन इत्यर्थः। मन्त्रलिङ्गम्—

तत्र को मोहः कः शोक एकत्वमनुपश्यतः। यजु, ४० ।७ ।।

भवति चात्रास्माकम्—

विष्णुर्विशोकः सविनाशनोऽस्ति
शोकस्य तस्माल्लभते प्रसादम् ।
जगत् समस्तं शिशुमात्मसूतं
माता यथा सूर्यमिमं तथा विद्।।६१९।।

दृष्ट्वेति शेषः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ।।८१।।

६३३ अर्चिष्मान्, ६३४ अर्चितः, ६३५ कुम्भः, ६३६ विशुद्धात्मा, ६३७ विशोधनः। ६३८ अनिरुद्धः, ६३६ अप्रतिरथः, ६४० प्रद्युम्नः, ६४१ अमितविक्रमः।।

अर्चिष्मान्—६३३

"अर्च पूजायाम्' भौवादिको धातुस्ततः ***"अर्चिशुचिहुसृपिच्छादिच्छदिभ्य इसिः"*** (२।१०८) इत्युणादिसूत्रेण 'इसिः' प्रत्ययस्ततो मतुप् ***"तसौ मत्वर्थे"*** (पा० १।४।१६) इत्यनेन भसंज्ञकत्वात् पदान्तस्य सो रुत्वं न भवति। ***"आदेशप्रत्यययोः"*** (पा० ८।३।५६) सूत्रेण षत्वम्, नुम्, अत्वन्तदीर्घः, अर्चिष्मानिति। अर्चिरिति पूजाया दीप्तेर्वा नाम, तेन पूजावान्=पूजार्हो दीप्तिमानिति वार्थः।

मन्त्रलिङ्गञ्च—

इन्द्रिमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः।
इन्द्रं वाणीरनूषत। ऋक् १।७।१।।
गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः।
ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे।। ऋक् १।१०।१।।

भवतश्चात्रास्माकम्—

अर्चिष्मानस्ति पूजार्हो विष्णुः सूर्यः सदा शुचिः।
अपरेऽपि ग्रहाः सर्वे पूजामर्हन्ति नैत्यिकीम्।।६२०।।

विष्णुनैतद् यथा व्याप्तं जगत् सर्वं विराजते ।
ग्रहैश्चापि तथा सर्वं विश्वं व्याप्तं विराजते ।।६२१।।

अर्चितः—६३४

'अर्च पूजायाम्' इति भौवादिको धातुस्ततो भावे ***"गुरोश्च हलः"*** (पा० ३।३।१०३) इत्यनेन स्त्रियामकारः प्रत्ययः। ततष्टाप्, अर्चा=पूजेत्यर्थः। ततः ***"तदस्य सञ्जातं तारकादिभ्य इतच्"*** (पा० ५।२।३६) सूत्रेण 'इतच्' प्रत्ययः अर्चा सञ्जाता अस्येति अर्चितः पूजित इत्यर्थः। सर्वेषां पूज्य इति भावः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

यस्मिन् विश्वानि काव्या चक्रे नाभिरिव श्रिता।
त्रितं जूती सपर्यत व्रजे गावो न संयुजे ।।
युजे अश्वाँ अयुक्षत नभन्तामन्यके समे। ऋक् ८।४१।६।।
स माया अर्चिना पदा।। ऋक् ८।४१।८।।

भवति चात्रास्माकम्—

विष्णुर्जगत्यां लभतेऽर्चनां स्वां
ततोऽर्चितः स स्तुतिमभ्युपैति ।
तमेव वेदाः प्रणुदन्ति गातुं
देवा नरा वा ऋषयः पुराणाः।।६२२।।

तत्र मन्त्रलिङ्गञ्च—

न यस्येन्द्रो वरुणो न मित्रो व्रतमर्यमा न मिनन्ति रुद्रः।
नारातयस्तमिदं स्वस्ति हुवे देवं सवितारं नमोभिः।। ऋक् २।३८।६।।

कुम्भः—६३५

'कुभि आच्छादने' चौरादिको धातुस्ततः पचाद्यचि, कुम्भयति=आच्छादयतीति कुम्भः, विष्णुः सूर्यो वा।

यद्वा केचन—'कमु कान्तौ' इति भौवादिकाद्धातोः ***"कमे कुञ्च"*** इत्युणादि सूत्रेण 'भः' प्रत्ययो, धातोश्च कुमादेशः, कुम्भः काम्यत इति।

यद्वा—***"उणादयो बहुलम्"*** (पा० ३।३।१) इति—अनुशासनात् कमेरत उः भश्च प्रत्ययो बाहुलकाद् गुणाभावः। ***"नेड् वशि कृति"*** (पा० ७।२।८) इतीण्निषेधः, कुम्भः।

यद्वा—"कै शब्दे" इति भौवादिको धातुस्तत आत्त्वे ***"कुर्भ्रश्च"*** इति चकारादन्यतोऽपीति कुः प्रत्यय आलोपश्च, कुः। "भा दीप्तौ" इत्यादादिकस्य धातोः ***"अन्येष्वपि दृश्यते"*** (पा० ३।२।१०१) सूत्रेण डप्रत्ययान्तो भ-शब्दो गृह्यते। कायति भाति च, पृषोदरादित्वाद्वर्णोपजनो मकारः, कुम्भः। कुम्भ इति घटस्यापि नाम मनुष्यस्यापि च। तथा हि दृश्यते—लोके—कुम्भः पूर्यमाणो जलेन शब्दायते भाति=प्रकाशते च, तथा मनुष्योऽपि शब्दायमानो भाति। एवंविधानां विविधकल्पनानां मूलं श्रीभर्तृहरिणा स्वकारिकायां प्रदर्शितं तत्रैव (वाक्यपदीयकाण्ड २) द्रष्टव्यम्। सर्वमूहितं समादर्तव्यमिति मयात्र प्रदर्शितम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्वा—अन्तर्गर्भितण्यर्थोऽत्र भातिः, कुं भापयति=प्रकाशयतीति कुम्भः, कौ वा भातीति कुम्भः सूर्यः, वर्णोपजनो मकारः। लोके च पश्यामः कुरूपमिदं पार्थिवं शरीरं तत्रात्मरूपः सूर्यः भाति=प्रकाशते प्रकाशयति वा तत् कुम्भः सूर्यः निर्गत आत्मनि शरीरमिदं निस्तेजस्कं भवति।

क्षुद्रा महान्तो वा जलाशया अपि समुद्रापेक्षया 'कुम्भ' इति संज्ञां लभन्ते। महाकायवतां मत्स्यानामपेक्षया क्षुद्रा मीना अपि कुम्भशब्देनाभिधातुं शक्याः। मीनो राशिर्वा। एवंविधामर्थयोजनामनुसृत्यैव वेदोक्तं ग्रहाणां फलं लोकमनुव्यापृत्य तिष्ठति। लोके चापि—हृदयं शरीरे समुद्र इव, यूकाश्च मीना इव कुम्भाभिधेयाः। आन्तरिक्ष्य आपः समुद्रस्थानीयाः, पार्थिव्यश्च कुम्भस्थानीयाः।

भवति चात्रास्मकाम्—

कुम्भोऽत्र विष्णुः स उ वापि सूर्यः
सहोऽपि कुम्भः किमु वाक् च कुम्भः।
उशन्ति यं सूरिवराः स कुम्भो
व्याप्तञ्च कुम्भेन विभाति सर्वम् ।।६२३।।

मन्त्रलिङ्गञ्च—

कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां अन्त ।
प्लाशिर्व्यक्तः शतधार उत्सो दुहे न कुम्भी स्वधा पितृभ्यः।।

यजुः १६।८७।।

सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिसिचतुः समानम्।
ततो ह मान उदियाय मध्यात् ततो जातमृषिमाहुर्वसिष्ठम्।।

ऋक् ७।३३।१३।।

बहुविभक्त्यन्तोऽयं वेदे कुम्भशब्द उपलभ्यते। निदर्शनमात्रं नः प्रयोजनम्, नाममात्रप्रदर्शनार्थत्वात्।

विशुद्धात्मा—६३६

"शुध शौचे" इति दैवादिको धातुरनिट्, ततः क्तः प्रत्ययः गुणाभावः। ***"झषस्तयोर्धोऽधः"*** (पा० ८।२।४०) सूत्रेण तकारस्य धकारः, ***"झलां जश् झशि"*** (पा० ८।४।५२) इति धातोर्धकारस्य दकारः शुद्धो, व्युपसृष्टो विशुद्ध इति। आत्मशब्दो बहुशो व्युत्पादितः स्वरूपपर्यायः, तस्मात् विशुद्धात्मा शुचिस्वरूप इत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

स पर्यगात्...... शुद्धमपापविद्धम्। यजुः ४० ।८।। इत्यादि।

एतो न्विन्द्रं स्तवाम शुद्धं शुद्धेन साम्ना।
शुद्धै रुक्थैर्वावृध्वांसं शुद्ध आशीर्वान् ममत्तु।।
इन्द्र शुद्धो न आ गहि शुद्धः शुद्धाभिरूतिभिः।
शुद्धो रयिं नि धारय शुद्धो ममद्धि सोम्य।।
इन्द्र शुद्धो हि नो रयिं शुद्धो रत्नानि दाशुषे।
शुद्धो वृत्राणि जिघ्नसे शुद्धो वाजं सिषाससि।।

ऋक् ८।९५।७, ८, ९।।

भवति चात्रास्माकम्—

विशुद्धात्मा स एवास्ति विष्णुः सूर्यः पुरातनः।
शुद्धो दधाति विश्वस्मै रत्नानि च धनानि च।।६२४।।

विशोधनः—६३७

व्युपसृष्टः "शुध शौचे" इति दैवादिको धातुस्ततो णिचि गुणे च विशोधि, ततश्च ल्युटि योरनादेशे णिलोपे विशोधन इति सिध्यति। स स्वयं विशुद्धो विशोधयति सर्वमिति विशोधन उच्यते। एतच्च विष्णोः सूर्यस्य वा नाम। विशोधनार्थकानि मन्त्राण्यत्र लिङ्गानि—

भावार्थोऽत्र प्राधान्यतोऽवगन्तव्यः, यथा—**शुचिः, मार्गः, भर्ग** इत्यादि-नामभिर्विष्णुः सूर्यो वोच्यते, तथैव—आत्मा शुचिः, भर्गः, मार्गो वा सन्, देहं शोधयति भृज्जति, मार्ष्टि वेति कृत्वा विशोधन उच्यते। एवं विशोधनाख्यो गुणो विश्वं व्यश्नुवानस्तमेव सर्वत्र व्याप्तं विशोधनाख्यं व्यनक्ति।

भवति चात्रास्माकम्—

विशोधनो विष्णुरमोघशक्ति-
र्विशोधयन् विश्वमिदं समस्तम् ।
प्रत्नं स [१]नूत्नं कुरुते चिराय
तथा यथा स्वापविमुक् [२]सभः स्यात्।।६२५।।

१. नवो नवो भवति जायमानः।" (ऋक् १०।८५।१९।) चन्द्र इति शेषः; २. समाना भा=प्रभा यस्य स सभः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यदुक्तम् अमोघशक्तिरिति तत्र मन्त्रलिङ्गम्—

इन्द्रस्य बाह्वोर्भूयिष्ठमोजः। ऋक् ८।६६।३।।

अनिरुद्धः—६३८

नि—उपसर्गः, "रुधिर् आवरणे" इति रौधादिको धातुरनिट्, ततः क्तो धत्वजश्त्वे निरुद्ध इति, नञा समासे नञो नलोपः। नास्ति निरोधो यस्य सोऽनिरुद्धो विष्णुः सूर्यो वा। मन्त्रलिङ्गञ्च—

अरुद्धिरिन्द्रः सख्यं ते अस्त्वथेमा विश्वाः पृतना जयासि।
ऋक् ८।६६।६।।

मन्ये त्वा वृषभं चर्षणीनाम्। ऋक् ८।६६।४।।

पुरूण्यस्य पौंस्या। ऋक् ८।६५।६।। इन्द्रस्येति शेषः।

त्वं हि शश्वतीनां पती राजा विशामसि। ऋक् ८।६५।३।।

लोकेऽपि दृश्यते—मृत्युकाले शरीरं विहाय गच्छन्नयं जीवो न केनापि शक्यो निरोद्धुमिति जीवोऽपि अनिरुद्ध शब्देनोच्यते।

भवति चात्रास्माकम्—

अनिरुद्धः स एवास्ति विष्णुः सूर्यः पुरातनः।
स्तूयते जीयते वासौ शत्रुजिद्विश्वबन्धनः[1]।।६२६।।

अप्रतिरथः—६३६

प्रति—उपसर्गः "रमु क्रीडायाम्" भौवादिको धातुरनिट्, ततः ***"हनिकुषिनीरमिकाशिभ्यः क्थन्"*** (२।२) इत्युणादिः क्थन् प्रत्ययः। ***"अनुदात्तापदेश०"*** (पा० ६।४।३७) इत्यादिना झलि कित्यनुनासिकलोपः। प्रतिगतो रथं प्रतिरथस्तत्पुरुषः, पुनर्नञा अविद्यमानः प्रतिरथो यस्येति ***"नञोऽस्त्यर्थानां बहुव्रीहिर्वा चोत्तरपदलोपश्च"*** (वा० २।२।२४) इति बहुव्रीहिः। प्रतिरथशब्दः, प्रतिपक्षिपर्यायः।

मन्त्रलिङ्गञ्च—

स तिग्मशृङ्गं वृषभं युयुत्सन् द्रुहस्तस्थौ बहुले बद्धो अन्तः।
ऋक् १०।४८।१०।।

नभो न कृष्णमवतस्थिवांसम्। ऋक् ८।६६।४।।

---

१. **"स नो बन्धुर्जनिता"** (यजुः ३२।१०) इत्यादि मन्त्रमत्र लिङ्गम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अपराजितमस्तृतमषाढम्। ऋक् १० ।४८ ।११ ।।
अहमिन्द्रो न परा जिग्ये इद्धनं न मृत्यवे अव तस्थे कदाचन।
सोममिन्मा सुन्वन्तो याचता वसु न मे पूरवः सख्ये रिषाथन ।।
ऋक्१० ।४८ ।५ ।।
त्वं ह त्यदतिमानमोजो वज्रेण वज्रिन् धृषितो जघन्थ।
ऋक् ८ ।६६ ।१७ ।।

रथमधिकृत्य–रथचर्षणे (ऋक् ८ ।५ ।१६), **रथवते** (ऋक् १ ।१२२ ।१२), ***रथवाहनम्*** (ऋक् ६ ।७५ ।८) **रथिने** (ऋक् १० ।४० ।५) इति निदर्शनम्।

भवति चात्रास्माकम्–

रथो न कश्चिन्न रथी च कश्चित्
यः स्याज्जगत्यां प्रतिमानभूतः ।
हिरण्ययेनारमता रथेन
पश्यन् स सूर्यो भुवनानि याति।।६२७।।

प्रद्युम्नः–६४०

प्र– उपसर्गः, 'दिव' धातुः क्रीडाद्यर्थको दैवादिकस्ततो ***''दिवेर्डिविः''*** (श्वेत० टीका ५ ।८०) इत्युणादिना 'डिविः' प्रत्ययष्टिलोपो द्–इव्=दिव्, ***''दिव उत्''*** (पा० ६ ।१ ।१३१) सूत्रेण ***''अलोऽन्त्यस्य''*** इति (पा० १ ।१ ।५२) इति परिभाषासूत्रसाहाय्येनान्त्यवकारस्य स्थाने उदित्यादेशः दि–उ इति यणादेशेन यकारो द्युः।

म्नः–'म्ना अभ्यासे' इति भौवादिकाद्धातोः ***''घञर्थे कविधानम्''*** (पा० ३ ।३ ।५८) इति वार्तिकेन भावे कः प्रत्यय आल्लोपः। अभ्यासो हि पौनःपुन्यम्। एवञ्च पौनःपुन्येन प्रकर्षेण देवनं=द्योतनं=भासनं वा यस्य स प्रद्युम्नः। अक्षरवर्णसामान्यादर्थप्राधान्येन वा निर्ब्रूयाद् (द्र० निरु० २१) इति नियमेन, पुनः पुनः प्रद्योतत इति वा प्रद्युम्नो विष्णुः सूर्यो वा। यः पौनःपुन्येन सूर्यमुद्यातुं प्रेरयति स प्रद्युम्नो विष्णुः। यश्च पौनःपुन्येनोदेति सोऽपि प्रद्युम्नः सूर्यः। लोकेऽपि दृश्यते–नित्योऽयमात्मा पौनःपुन्येन यथाव्यवस्थं नूत्नानि शरीराण्युपैति, तत आत्माऽपि प्रद्युम्नः। यतो हि सः नूत्नं शरीरमुपेत्यापूर्व इव प्रदीप्यते। प्रेर्य-प्रेरकभावेन जगच्चक्रं इति प्रेरको विष्णुः प्रद्युम्नः, प्रेर्यश्च सूर्योऽपि प्रद्युम्नो गभस्तिनेमिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गम्—

अक्षासो अस्य वितिरन्ति कामं प्रतिदीव्ने दधत आकृतानि।

ऋक् १० ।३४ ।६ ।।

कः सः ?—**त्रिपञ्चाशः क्रीडति व्रात एषां देव इव सविता सत्यधर्मा।**

उग्रस्य चिन्मन्यवे ना नमन्ते राजा चिदेभ्यो नम इत् कृणोति ।

ऋक् १० ।३४ ।८ ।। इति सूर्यः सः।

दिवियोनिः (ऋक् १० ।८८ ।७), **दिविजाः** (ऋक् ७ ।७५ ।१), **द्युमत्तमः** (ऋक् ६ ।६५ ।१६) इति निदर्शनम्।

भवति चात्रास्माकम्—

स एव विष्णुः किमु वापि सूर्यः
प्रद्युम्नशब्देन नमन्ति तं वा ।
प्रद्युम्न आत्मापि यतः स कायं
पुनः पुनः प्राप्य नवो विभाति।।६२८।।

अमितविक्रमः—६४१

"माङ् माने" इति जौहोत्यादिकाद्धातोः कर्मणि क्तः। अनिडयं धातुः गुणाभावः। ततश्च ***"द्यतिस्यतिमास्थामित्ति किति"*** (पा० ७ ।४ ।४०) सूत्रेण इत्वम्। न मित इति नञा समासः, नञो नलोपः, अमित इति।

विक्रमः—विपूर्वकात् "क्रमु पादविक्षेपे" घातोर्घञि ***"नोदात्तोपदेशस्य मान्तस्यानाचमेः"*** (पा० ७ ।३ ।३४) इति सूत्रेणोपधावृद्धेर्निषेधः। विक्रमणं विक्रमः। अमितो विक्रमो यस्य सोऽमितविक्रमः।

अर्थप्रधानं मन्त्रलिङ्गम् अमिते—

ववक्ष इन्द्रो अमितमृजीष्युभे आ पप्रौ रोदसी महित्वा ।

अतश्चिदस्य महिमा विरेच्यभि यो विश्वा भुवना बभूव।।

ऋक् ४ ।१०२ ।५ ।।

अमितक्रतुः—

गोजिता बाहू अमितक्रतुः सिमः कर्मन् कर्मञ्छतमूतिः खजंकरः।

अकल्प इन्द्रः प्रतिमानमोजसाथा जना विह्वयन्ते सिषासवः।।

ऋक् १ ।१०२ ।६ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमितौजाः—

पुरां भिन्दुयुर्वा कविरमितौजा अजायत ।
इन्द्रो विश्वस्य कर्मणो धाता वज्री पुरुष्टुतः।। ऋक् १।११।४।।

भवति चात्रास्माकम्—

इन्द्रोऽस्ति वेदेऽमितविक्रमेण
नाम्ना प्रगीतः स हि वामितौजाः।
स एव सूर्यः क्रमतेऽमिते खे
तं योऽतिविक्रामयते स विष्णुः ।।६२६।।

❖ ❖ ❖

कालनेमिनिहा वीरः शौरिः शूरजनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः ।।८२।।

६४२ कालनेमिनिहा, ६४३ वीरः, ६४४ शौरिः, ६४५ शूरजनेश्वरः।
६४६ त्रिलोकात्मा, ६४७ त्रिलोकेशः, ६४८ केशवः, ६४६ केशिहा, ६५० हरिः।।

कालनेमिनिहा—६४२

"कल शब्दसंख्यानयोः" इति भौवादिको धातुस्ततो ***"हलश्च"*** (पा० ३।३।१३१) सूत्रेण करणेऽधिकरणे वा घञ् प्रत्ययः, ततो वृद्धिः, कालः। कल्यते=संख्यायते, शब्द्यते वानेनास्मिन् वा स काल इत्यर्थः।

नेमिः—'णीञ् प्रापणे" भौवादिकाद्धातोः ***"नियो मिः"*** (४।४४) इत्युणादिर्मिः शब्द्यते वानेनास्मिन् वा स काल इत्यर्थः।

निहा—नि-उपसर्गपूर्वकः "हन् हिंसागत्योः" इति धातुरादादिकस्तस्मात् क्विप्, कृदन्तत्वात्प्रातिपदिकसंज्ञा, सुविभक्तिस्ततः ***"इन्हन्"*** (पा० ६।४।१२) इति दीर्घो निहा गमयिता। एवञ्च संख्यानहेतुभूतस्य कालस्य नेमेः=नियन्तुर्भगवतः सूर्यस्यापि यो निहा गमयिता स कालनेमिनिहा विष्णुः।

यद्वा—कीलकमिव यः कालस्य नेमिं=नियन्त्रणं=बन्धनं निहन्ति=भनक्ति स कालनेमिनिहा विष्णुः सूर्यो वा। तथा च, सूर्यः प्रमादमन्तराऽऽसर्गात् सर्गान्तं गमयति सर्वं जगत्, सरति च स्वयमुत्तरायणदक्षिणायनरूपचक्रद्वयेन, अतः स

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कालनेमिरिहोच्यते। यश्च सूर्यमपरांश्च ग्रहानुपग्रहान्, तथा नक्षत्रादीन् सनियमं गमयति स विष्णुः कालनेमिनिहा।

लोकेऽपि दृश्यते—स्वस्थे हि मनुष्ये यथानियतसमयं वातपित्तकफाविकाराणामुदयमस्तञ्च कुर्वन्तीति एतन्नामसम्बद्धं व्याख्यानं पृथक्-पृथक् कालः, नेमिः, इत्यादिनामव्याख्याप्रसङ्गे, प्रादर्शि तत्रैव द्रष्टव्यम्।

भवतश्चात्रास्माकम्—

कालनेमिनिहा विष्णुः सर्वं काले नियच्छति ।
तद्यथाक्षगतं चक्रं [1]तं निहन्ति भ्रमत्यपि ॥६३०॥

आकाशे यानि दृश्यन्ते ज्योतिर्बिम्बान्यनेकशः ।
तेषु नक्षत्रसंज्ञानि स्थिरस्थानानि यानि वै ॥६३१॥

गच्छन्तो [2]भानि गृह्णन्ति सततं ये तु ते ग्रहाः।
सूर्यादयो ग्रहाः सप्त राहुकेतुयुता नव ॥६३२॥

वीरः—६४३

वीरशब्दो व्युत्पादितो वीरहनामव्याख्याप्रसङ्गे।

मन्त्रलिङ्गम्—

दिवि श्रवो दधिषे नाम वीरः। ऋक् १०।२८।१२॥

अग्निः सप्तिं वाजंभरं ददात्यग्निर्वीरं श्रुत्यं कर्मनिष्ठाम्।
अग्नी रादेसी वि चरत् समञ्जन्नग्निर्नारीं वीरकुक्षिं पुरन्धिम्॥
ऋक् १०।८०।१॥

वेदे विविधविभक्तिवचनेषु प्रयुक्तो दृश्यतेऽयं वीरशब्दः। निदर्शनं नः प्रयोजनम्।

भवति चात्रास्माकम्—

यदत्र विश्वेऽस्ति विचित्रवीर्यं
सर्वञ्च तद्वीरपदेऽस्ति विष्णौ ।
अग्निर्हि वीरो रविरस्ति वीरो
वीरो मनुष्योऽपि जवातिरेकात् ॥६३२॥

१. तम्=अक्षमित्यर्थः; २. भानि=नक्षत्राणि, गृह्णन्ति=उपाददते ये ते ग्रहाः सूर्यादयः सप्त, राहुकेतुयुताश्च नव।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शौरिः—६४४

''शूर विक्रान्तौ' इति चौरादिको धातुस्ततो बाहुलकात् ***''वसिवपिवदि''*** (४।१२५) इत्याद्युणादिसूत्रेण ''इञ्'' प्रत्ययः। णिलोपः, बाहुलकाद् आदिवृद्धिः। शूरयत इति शौरिः। यद्वा शूरस्यापत्यं शौरिः, अत्यन्तशूर इत्यर्थः। अपत्यशब्दश्चात्यन्तार्थेऽपि प्रयुज्यते। तद्यथा—**मगन्दः कुसीदी मामागमिष्यतीति ददाति। तदपत्यं प्रमगन्दः अत्यन्तकुसीदी कुलीनः।** (निरु० ६।३२)।

मन्त्रलिङ्गं भावप्रधानम्—

शूरग्रामः सर्ववीर सहावाञ्जेता पवस्व सनिता धनानि ।
तिग्मायुधः क्षिप्रधन्वा समत्स्वषाढः साह्वान् पृतनासु शत्रून्।।

ऋक् ६।६०।३।।

भवति चात्रास्माकम्—

य एव शूरः स हि चात्र शौरिः
स सर्ववीरः सनिता धनानाम् ।
स क्षिप्रधन्वा स विहन्ति शत्रून्
सूर्योऽथवा विष्णुरिहास्ति तर्क्यः।।६३३।।

शूरजनेश्वरः—६४५

शूर इति—'शु' इति सौत्रो धातुर्गत्यर्थकस्ततः ***''शुसिचिमीनां दीर्घश्च''*** (२।२५) इत्युणादिसूत्रेण क्रन् प्रत्ययो दीर्घश्च, भ्वादेरवृत्कृतत्वादयं 'शु' इति धातुरुह्यत इति पुरुषोत्तमदेवः (द्र० उज्ज्वलदत्तीयोणादिवृत्तिः पृष्ठ ७१) शवति गच्छति योद्धुं संग्राममिति शूरः। शूयते वाऽसौ रिपुभिरिति शूरः।

जनः—''जनी प्रादुर्भावे'' इति दैवादिको धातुस्ततः पचाद्यच्, जायत इति जनः। जन्यतेऽनेनेति वा जनः जन इति घञ्यपि ***''जनिवध्योश्च''*** (पा० ७।३।३५) इति वृद्धिनिषेधात्।

ईश्वरः—ईशेर्वरजिति प्रत्यये व्युत्पादितः। शूरजनानामीश्वरः शूरजनेश्वरो विष्णुः। मन्त्रलिङ्गञ्च—

शूरग्रामः[1] **सर्ववीरः।** (ऋक् ६।६०।३) इत्यादि

१. शूरग्रामः—शूराणां समूहः। इह च बहुशूरशौर्यशालित्वमनेन द्योत्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

गतौ हि यज्जायत एव तस्मा-
ज्जनोऽस्ति जातो जगदस्ति जातम्।
तस्मात् प्रधानात् पुरुषात् पुराणात्
स गीयते शूरजनेश्वरोऽपि ॥६३४॥

त्रिलोकात्मा—६४६

त्रि—लोक—आत्मा चैते त्रयोऽपि शब्दा पृथक्-पृथक् पूर्वं व्युत्पादिताः। त्रयाणां लोकानामातयिता अतिता वा त्रिषु लोकेषु स त्रिलोकात्मा।

भावप्रधानं मन्त्रलिङ्गम्—

त्रिमूर्धानं सप्तरश्मिं गृणीषे नूनमग्निं पित्रोरुपस्थे ।
निषत्तमस्य चरतो ध्रुवस्य विश्वा दिवो रोचना पप्रिवांसम्॥

ऋक् १।१४६।१॥

भवति चात्रास्माकम्—

त्रिलोकात्मा स एवास्ति विष्णुः सूर्यः पुरातनः।
स त्रिबन्धुस्त्रिमूर्धा वा पश्यंश्चातति सर्वदा ॥६३५॥

लोकेऽपि प्रत्यक्षं दृश्यते—स एवात्मा त्रिगुणात्मकस्य प्रकृतिविकारभूतस्य जगतो गमयिता हृद्गुहास्थ इति त्रिलोकात्मा, भूतानामतीतानां वर्तमानानां भविष्यताञ्चेति त्रिकालभाविनां स एक एवात्मा।

त्रिलोकेशः—६४७

तरतेर्ड्रिप्रत्यये त्रिशब्दः, तरतीति त्रिः। संख्यावाचकश्च त्रिशब्दः।

लोकः—"लोकृ दर्शने" भौवादिको धातुस्ततो ***"हलश्च"*** (पा० ३।३।१२१) सूत्रेण घञ् प्रत्ययः कर्मणि अधिकरणे वा। ईशेः इगुपधलक्षणः कः प्रत्ययः, ईष्ट इतीशः। त्रिसंख्याका लोकाः, त्रिलोकानामीशः त्रिलोकेशः।

मन्त्रलिङ्गञ्च—

इनो विश्वस्य भुवनस्य राजा। ऋक् १।१६४।२१॥
तमीशानं जगतस्तस्थुषस्पतिम्। ऋक् २५।१८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

संराजते येन समस्तमेत-
दीष्टे त्रिलोक्याः स्वयमात्मसिद्धः।
विष्णुर्ह वा सूर्य उ वा स एको
विप्रास्तमेकं [1]बहुधा वदन्ति ।।६३६।।

ऋक् १।१६४।४६।।

केशवः—६४८

"क्लिशू विबाधने" क्रैयादिकाद् धातोः ***"क्लिशेरन् लोपश्च लः"*** (५।३३) इत्युणादिसूत्रेण "अन्" प्रत्ययो लकारस्य लोपश्च। क्लिश्नाति, क्लिश्यते वानेनेति कर्तरि करणे वा प्रत्ययः। यद्वा कशब्दो मस्तकस्य शिरसो वाचकः, तत्र शेरते इति ***"अन्येष्वपि दृश्यते"*** (पा० ३।२।१०१ द्र० काशिका) इति डः, केशाः। ***"तत्पुरुषे कृति बहुलम्"*** (पा० ६।३।१३) इति सप्तम्या अलुक्। अथवा कस्य मस्तकस्य ईशाः केशाः। केशशब्दात् ***"केशाद् वोऽन्यतरस्याम्"*** (पा० ५।२।१०६) सूत्रेण मत्वर्थीयो वः प्रत्ययः प्रशंसार्थे, प्रशस्ताः केशाः अस्य सन्तीति केशवः।

यद्वा—खेशयाः सन्तः केशा इत्युच्यन्ते, शिरसि बाहुल्येन प्ररूढत्वात्। अत एव केशानामंशुसाम्येन व्याख्या विहिता, अंशवो मरीचयः किरणा वा। तद्यथा—

अंशवो ये प्रकाशन्ते मम ते केशसंज्ञिताः।
सर्वज्ञाः केशवं तस्मान्मामाहुर्द्विजसत्तमाः ।।

महाभारत शां० प० ३४१।४८।।

केशी केशा रश्मयः तैस्तद्वान् भवति। (नि० १२।२५) इति यास्कः।

मन्त्रलिङ्गञ्च—

अधि यस्तस्थौ केशवन्ता व्यचस्वन्ता न पुष्ट्यै।
वनोति शिप्राभ्यां शिप्रिणीवान्।। ऋक् १०।१०५।५।।

शूर इन्द्र इत्यनुवर्तते पूर्वस्मान्मन्त्रात्।

भवतश्चात्रास्माकम्—

स केशवो विष्णुरिहास्ति सूर्यः
स्वकांशुभिर्विश्वमिदं [2]प्रचष्टे ।

---

१. "एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।" २. प्रचष्टे—प्रपश्यति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिधातुशृङ्गो दिविषत् स एव
त्रिलोचनोऽसौ स मरीचिमाली ॥६३७॥

अथ च—

एवं हि यः केशवमात्मसंस्थं
नित्यं शुचिं पश्यति हृद्गुहास्थम्।
स वीतशोको विनिहन्ति पापं
तथा यथाग्निर्विदहत्यवद्यम् ॥६३८॥

केशिहा—६४६

केशा अस्य सन्तीति केशी, केशिनं हन्तीति केशिहा इति। 'वीरह'-नाम्नि हन्तेः सर्वमुक्तम्, अन्यत्र चापि। तत्र—

केश-शब्दः—***"क्लिशेरन् लोपश्च लः"*** (५।३३) इति क्लिशेर्धातोः अन् प्रत्ययो लकारस्य लोपश्च। क्लिश्यतेऽनेनेति केशः, शिरोलोमानि वा।

तत्र त्रयः केशिनः। तद्यथा—

केश्यग्निं केशी विषं केशी बिभर्त्ति रोदसी।
केशी विश्वं स्वर्दृशे केशीदं ज्योतिरुच्यते ॥ ऋक् १०।१३६।१॥

केश्यग्निं विषं च। विषमित्युदकनाम, विष्णातेः (विपूर्वस्य स्नातेः शुद्ध्यर्थस्य)। विपूर्वस्य वा संचतेः। द्यावापृथिव्यौ च धारयति। केशीदं सर्वमभिविपश्यति, केशीदं ज्योतिरुच्यते, इत्यादित्यमाह।

अथाप्येते उत्तरे ज्योतिषी केशिनी उच्येते। धूमेनाग्नी रजसा च मध्यमः। तयोरेषा साधारणा भवति—

त्रयः केशिन ऋतुथा वि चक्षते संवत्सरे वपत एक एषाम्।
विश्वमेको अभिचष्टे शचीभिः ध्राजिरेकस्य ददृशे न रूपम्॥
ऋक् १।१६४।४४॥

त्रयः केशिन ऋतुथा विचक्षते। काले कालेऽभिविपश्यन्ति संवत्सरे वपत एक एषाम् इत्यग्निः पृथिवीं दहति। सर्वमेकोऽभिविपश्यति कर्मभिरादित्यः।

गतिरेकस्य ददृशे न रूपं मध्यमस्य इति निरुक्ते १२।२६, २७ केशिव्याख्यानं द्रष्टव्यम्।

प्रसङ्गप्राप्तमुच्यते अश्वस्य ग्रीवारोमा केसरा उच्यन्ते, तेन तद्वान् अश्वोऽपि केशी।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तद्यथा—

आत्वा सहस्रमा शतं युक्ता रथे हिरण्यये।

ब्रह्मयुजो हरय इन्द्र केशिनो वहन्तु सोमपीतये।। ऋक् ८।१।२४।।

अत्र केशिनो हरयः एवं यस्तान् हन्ति गतये प्रेरयति स केशिहा इन्द्रः। **''इन्द्रः सूर्यमरोचयत्''** (ऋक् ८।३।६) एतेन लिङ्गेन सूर्यात् पृथक् इन्द्रो विष्णुपर्यायोऽपि वेदे दृश्यते।

यद्वा—**''कालो अश्वो वहति सप्तरश्मिः''** (अथर्व १६।५३।१) इति कालं सूर्य एव स्वगत्या गणनायामास्थापयति। 'वंशवर्धनः' ८४६ नामव्याख्याने विशदमुक्तम्।

हन्तिर्गत्यर्थेऽपि, तमन्तर्भावितण्यर्थं मत्वा उच्यते—केशी उदकं मेघरूपं हन्ति गमयति प्रापयति, वायुं वा हन्ति चालयति , विद्युतं वा हन्ति प्रकाशयति। एवं सूर्यः संगच्छतेतरां 'केशिहा' नामतः।

लोकेऽपि च पश्यामः—इडा पिङ्गला सुषुम्ना च तिस्र एव नाड्यः पृष्ठवंशस्था मस्तिष्कं यावत् गच्छन्ति।

वातपित्तकफा वा दोषा जीवतः सूर्यस्यात्मनः सत्तया जीवयन्ति शरीरम्। तत्र केशी आत्मा। केशा इव विविधस्वरूपास्ते दोषा पञ्चधा प्रत्यात्मं विभक्ताः सन्तः, तान् दोषान् गमयतीति केशिहाऽऽत्मा इति समानं भवति सूर्येण।

यत्तु गत्यर्थो हन्तिरित्युक्तं, तत्र हृदयं तावत् सूक्ष्मलोमवत् सिराभिर्नद्धं तेषां पृथक्-पृथक् कोष्ठानां प्रत्यक्षतो दर्शनात्। तं केशिनं हृदयमात्मैव हन्ति गमयति एवं लोकसम्मितत्वात् आत्माऽपि केशिहा उक्तो भवति ।

यद्वा—ज्योतिःप्रधानानि समनस्कानि दशेन्द्रियाणि, तानि वाञ्छितार्थप्राप्तये मनोऽग्निमारुतसाहाय्येन आत्मा प्रेरयति। एवं वा आत्मा केशिहा उक्तो भवति।

सारथी रथे तिष्ठन्नश्वान् कशेन हन्ति गत्यर्थं प्रेरयति। तत्र सारथिरपि केशिहा भवति।

इति निदर्शनमात्रमुक्तम्, पथप्रदर्शनमस्माकमभिमतमिति कृत्वा। एवं विविधा ऊहा विज्ञैः कल्पनीयाः स्वयमेव लोकं वेदं वा दृष्ट्वा। यत्तु निरुक्तमुद्धृतं तदध्येतॄणां ज्ञानविवृद्धये व्याख्यानस्य च सुखावबोधाय।

केशा रश्मयः, तदुक्तं केशी (६४८) इति नामव्याख्याने।

भवन्ति चात्रास्माकम्—

इन्द्रः स्वकाश्वैर्गतिमादधानः

सन् केशिहा नाम बिभर्ति लोके ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निं जलं विद्युतमत्र निघ्नन्
स केशिहा सूर्य इहास्ति दृश्यः ॥६३६॥

कालं स लोके गणनाय युञ्जन्
सरश्मिकः पश्यति विश्वमर्कः ।
[1]जीवोऽपि तिग्मांशुसमश्च देहं
घट्यादिभिः संकलनाय युङ्क्ते ॥६४०॥

स एव वातादिषु जालबद्धं
त्रिनाडिबद्धं च वपुर्निसर्गात् ।
जीवः स्वकार्थाय गतिं दधाति
केशा विचित्राः कृतिमाहुरस्य[2] ॥६४१॥

स पुण्डरीकाक्षपदेन वाच्यः
केशीव हृत्तन्त्रमनक्ति गत्या ।
सूतो रथेष्ठोऽपि तथैव लोके
स केशिहाऽश्वान् कशया विनिघ्नन् ॥६४२॥

एवं हि यो वेत्ति स वेत्ति वेदं
लोकं च वा देहमथापि सूर्यम् ।
इन्द्रं च वा केशिहनं च विष्णुं
विश्वे ततं पश्यति विष्णुमेव ॥६४३॥

इतरोऽपि केशिनामाऽसुरः कश्चित्पुरुषः, महेन्द्र इति नामधृन्मनुष्यवत्। तस्य हन्ताऽपि केशिहानामतो लोके प्रसिद्धः श्रूयते।

हरिः—६५०

हरि—शब्दो 'हृञ् हरणे' इति भौवादिकाद्धातोः ***"हृपिसिरुहिवृतिविदिच्छिदिकीर्तिभ्यश्च"*** (४।११६) इत्युणादिसूत्रेण इन्प्रत्यये ***"अच इः"*** (४।१३६)

---

१. **"सूर्य आत्मा जगतस्तस्थुषश्च"** (ऋक् १।११५।१) इति मन्त्रलिङ्गमत्र; २. मायाभिः पुरुरूपमीयमानस्यास्येन्द्रस्य। **"इन्द्रो मायाभिः पुरुरूप ईयते"** (ऋक् ६।४७।१८) इति मन्त्रमत्रानुसन्धेयम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति 'इ'प्रत्यये वा सिध्यति, स्वरे विशेषः। हरतीति हरिः। शरणमुपेतानां, सर्वपापानां हारकोऽन्ते प्रलयकाले जगतो हारको वा तमसो हारकश्च।

मन्त्रलिङ्गञ्च—

द्यामिन्द्रो हरिधायसं पृथिवीं हरवर्पसम् ।

अधारयद्धरितोर्भूरि भोजनं ययोरन्तर्हरिश्चरत्।। ऋक् ३।४४।३।।

हरिः=इन्द्रः, सूर्यश्च।

जज्ञानो हरितो वृषा विश्वमा भाति रोचनम्। ऋक् ३।४४।४।।

उषो न जारः पृथुः पाजो अश्रेद् दविद्युतद् दीद्यच्छोशुचानः।

वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः ।।

ऋक् ७।१०।१।।

प्रसङ्गतो हरिः सूर्योऽग्निर्विष्णुर्वा—

अग्निर्जन्मानि देव आ विविद्वान्, द्रवद् दूतो देवयावा वनिष्ठः।

ऋक् ७।१०।२।।

लब्धप्रपञ्चोऽयं हरिशब्दो वेदे, निदर्शनं नः प्रयोजनम्।

भवति चात्रास्माकम्—

हरिर्हि विष्णुः सः उ वास्ति सूर्यो
विश्वं समस्तं हरते महौजाः ।
भासा च विश्वं सकलं विभाति
जन्मानि विश्वस्य स वेद विद्वान्।।६४४।।

स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी। हरिः पवित्रे अव्यत वेधा न योनिमासदम्। (ऋक् ६।१०१।१५) इति ऋङ्मन्त्रलिङ्गञ्च।

❖ ❖ ❖

कामदेवः कामपालः कामी कान्तः कृतागमः।
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ।।८३।।

६५१ कामदेवः, ६५२ कामपालः, ६५३ कामी, ६५४ कान्तः, ६५५ कृतागमः। ६५६ अनिर्देश्यवपुः, ६५७ विष्णुः, ६५८ वीरः, ६५९ अनन्तः, ६६० धनञ्जयः।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामदेवः—६५१

"कमु कान्तौ" इति भौवादिको धातुस्ततः ***"अकर्तरि च कारके संज्ञायाम्"*** (पा० ३।३।१९) सूत्रेण कर्मणि घञ् प्रत्ययः। इह ***"नोदात्तोपदेशस्य"*** (पा० ७।३।३४) इति वृद्धेर्निषेधस्तु न भवति ***"अनाचमिकमिवमीनामिति वक्तव्यम्"*** इति वार्तिकेन वृद्धिनिषेधनिषेधात्, तस्मात् काम्यत इति कामः।

देवः—"दिवु क्रीडादौ" इति दैवादिको धातुः। अत्रायं दानार्थकः, ततः पचाद्यच्, गुणः, इति। कामान् ददातीति कामदेवः। मन्त्रलिङ्गञ्च—

कोऽदात् कस्मा अदात् कामोऽदात् कामायादात्।
कामो दाता कामः प्रतिग्रहीता कामैतत्ते।। यजुः ७।४८।।
यः इन्द्रेण सरथं याति देवो वैश्वानर उत विश्वदाव्यः ।
यं जोहवीमि पृतनासुसासहिं तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ।।
यो देवो विश्वाद् यमु काममाहुर्यं दातारं प्रतिगृह्णन्तमाहुः ।
यो धीरः शक्रः परिभूरदाभ्यस्तेभ्यो अग्निभ्यो हुतमस्त्वेतत् ।।
अथर्व ३।२१।३, ४।।

भवति चात्रास्माकम्—

स कामदेवो भगवान् वरेण्यो
विष्णुर्ह वा सूर्य उतापि चाग्निः।
काम्यं समस्मै स ददाति नित्यं
तं कामदेवं स्तुतिभिः स्तुवन्ति।।६४५।।

कामपालः—६५२

कामशब्दः कर्मणि घञि व्युत्पादितः।

पालशब्दश्च "पाल रक्षणे" चौरादिकाद् धातोर्णिच्, ततः पचाद्यच् प्रत्ययः, ततो णिलोपः। पालयतीति पालः। स स्वयं दत्तं कामं पालयति=रक्षतीति कामपालः। कामानां पाल इति षष्ठी तत्पुरुषः । यं यं कामं यथाविधं यस्मै ददाति तं तं तथाविधं तदायुःपर्यन्तं रक्षति, तथा लोके प्रत्यहं दृश्यते ।

मन्त्रलिङ्गमत्र—

कामस्तदग्रे समवर्त्तत मनसो रेतः प्रथमं यदासीत् ।
स कामः कामेन बृहता सयोनी रायस्पोषं यजमानाय धेहि।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्कामं कामयमाना इदं कृण्मसि ते हविः।
तन्नः सर्वं समृध्यतामथैतस्य हविषो वीहि स्वाहा।।
अथर्व १६।५२।१, ५।।

अत्रान्ये मन्त्रलिङ्गे—

त्वं काम सहसासि प्रतिष्ठितो विभुर्विभावा लख आसखीयसे।
त्वमुग्रः पृतनासु सासहिः सह ओजो यजमानाय धेहि।।
दूराच्चकमानाय प्रतिपाणायक्षये।
आस्मा अशृण्वन्नाशाः कामेनाजनयन्त्स्वः।। अथर्व १६।५२।२, ३।।

तथा चान्यदपि—

कामेन मा काम आगन् हृदयाद्धृदयं परि।
यदमीषामदो मनस्तदैतूप मामिह।। अथर्व १६।५२।४।।

एवमत्रत्यं सर्वं द्रष्टव्यम्।

भवति चात्रास्माकम्—

कामस्तदग्रे समवर्ततायं
विभुर्विभावा स सखीयते च।
स सासहिः पृत्सु स एव चोग्रः
स कामपालोऽवतु मां[1] शरण्यः।।६४६।।

कामी—६५३

कामार्थिभ्यः प्रदानाय कामा भोग्यपदार्था अतिशयेन सन्त्यस्येति कामी। कामशब्दादतिशयेऽर्थे मत्वर्थीय इनिः प्रत्ययो *"यस्येति च"* (पा० ६।४।१४८) इत्यकारलोपः, प्रातिपदिकसंज्ञा, साविन्नन्तलक्षणो दीर्घः। मन्त्रलिङ्गम्—

कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि।
ऋक् २।१४।१।।

लोकेऽपि पश्यामः—

आब्रह्मकीटान्तमिदं समस्तं विश्वं मनोवेगरूपेण कामेनाविष्टं, तदेतन्महाबलस्य भगवतः कामिनः कामगुणस्यैव जगति सर्वत्र व्याप्तस्य सर्वत्र विचेष्टितम् इति सम्यगनुसन्धेयं सुधीभिः।

१. 'माम्' पदमिह जीवमात्राय प्रयुक्तम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

कामी स सूर्यः परिपूर्य विश्वं
पिपर्ति कामान् सकलस्य लोके।
विष्णुर्हि भूत्वा हृदि सन्निविष्टः
कामेन कान्तं कुरुते जगत् सः।।६४७।।

कान्तः—६५४

"कमु कान्तौ" इति भौवादिको धातुस्ततो ***"मतिबुद्धिपूजार्थेभ्यश्च"*** (पा० ३।२।१८८) सूत्रेण वर्तमाने काले क्तः प्रत्ययः। कान्तिः=इच्छा। इह सूत्रे च मतिशब्देन इच्छा गृह्यते, मतिशब्दात्पृथग् बुद्धेर्ग्रहणात्। ***"उदितो वा"*** (पा० ७।२।५६) इति क्त्वि इड्विकल्पनाद् ***"यस्य विभाषा"*** (पा० ७।२।१५) इति निष्ठायान्नेट्। ***"अनुनासिकस्य क्विझलोः क्ङिति"*** (पा० ६।४।१५) इति सूत्रेण झलादौ क्ङिति दीर्घः। अनुस्वारपरसवर्णौ। काम्यते=इष्यत इति कान्तः। दृश्यते च प्रत्यहं लोके—भगवान् सुखरूपो विष्णुः तेजोदः सद्बुद्धिदश्च सूर्यः शरीराधिष्ठाता चात्मा सर्वैः काम्यते।

मन्त्रलिङ्गञ्च—

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुतमानुषेभिः।
यं कामये तं तमुग्रं करोमि तं ब्रह्माणं तं सुमेधाम्।।

ऋक् १०।१२५।५।।

काम्यते, काम्येते, काम्यन्ते, इति कान्तः कान्तौ, कान्ताः,। कान्तः=इष्यमाण इत्यर्थः।

भवति चात्रास्माकम्—

कान्तिं समापन्न इहास्ति कान्तः
स एव काम्येषु गतश्च कान्तः।
यं कामये तञ्च करोमि कान्तं
कविं सुमेधामृषिषूत्तमं वा' ।।६४८।।

यद्वा—"कनी दीप्तिकान्तिगतिषु" इति भौवादिको धातुस्ततो गत्यर्थे दीप्त्यर्थे च ***"गत्यर्थाकर्मक"*** (पा० ३।४।७२) इति सूत्रेण कर्तरि क्तः। ***"अनुनासिकस्य क्विझलोः"*** (पा० ६।४।१५) इति दीर्घः। अयात्, अदीप्येतेति वा कान्तः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतागमः—६५५

कृतः करोतेः क्तः प्रत्ययो गुणाभावश्च।

आगमः—आङुपसर्गपूर्वो "गम्लृ गतौ" इति भौवादिको धातुस्ततो ***"ग्रहवृदृनिश्चिगमश्च"*** (पा० ३।३।५८) इति सूत्रेण घञोऽपवादः 'अप्' प्रत्ययो विधीयते। कृत आगमो येन स कृतागम इति बहुव्रीहिः, ***"निष्ठा"*** (पा० २।२।३६) इति निष्ठान्तस्य पूर्वं निपातः। यथैतस्य सदा प्रत्यक्षं दृश्यमानस्य प्रत्यहमावृत्तिः सूर्यस्यं तथा देहाभिमानिनो जीवस्यापि, नित्यं नैत्यिकीं क्रियां देहञ्च प्रति पुनः पुनरागम आवृत्तिर्भवति। अत एवायं सूर्यः, शरीरात्मा तथा तयोरावर्तयिता विष्णुः कृतागम उच्यते। एष यो गुणः प्रत्यावर्तनरूपो लोके दृश्यते, स तस्यैव भगवतो विष्णोर्व्यञ्जकः। आगमः=शास्त्रं तज्जन्यं ज्ञानं वा कृतमापादितं येन सोऽपि कृतागम उच्यते ज्ञानरूपः।

मन्त्रलिङ्गञ्च—

कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः।।
कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते।
कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आगमः ।।

ऋक् ८।३।१३, १४।।

कदा सुतं तृषाण ओक आगम इन्द्र स्वब्दीव वंसगः।

ऋक् ८।३३।२।।

अमी न आ ववृत्स्व चक्रं न वृत्तमर्वतः।
नियुद्भिश्चर्षणीनाम्।।
प्रवता हि ऋतूनामा हा पदेव गच्छसि।
अभक्षि सूर्ये सचा।। ऋक् ४।३१।४, ५।। इति निदर्शनम्।

भवति चात्रास्माकम्—

विष्णुर्महान् यो विविधैः स्वरूपैः
स्तोत्रा स्तुतस्तं समुपैति यस्मात्।
तस्मात् स्तुतः सत्कविभिः पुराणैः
कृतागमेनापि पदेन भानुः[1] ***।।६४६।।***

१. यदुक्तं 'तमसः परस्तात्' (यजुः ३१।१८) इति।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनिर्देश्यवपुः—६५६

निर्—उपसर्गः। 'दिश अतिसर्जने' इति तौदादिको धातुस्तत ***"ऋहलोर्ण्यत्"*** (३।१।१२४) इति कृत्यो ण्यत् प्रत्ययः, ***"शकि लिङ् च"*** (पा० ३।३।१७२) इति शक्यार्थे विधीयते निर्देष्टुं शक्यं निर्देश्यम्।

वपुः—"डुवप् बीजसन्ताने छेदने च" इति भौवादिको धातुस्ततः— ***"अर्तिपृवपियजितनिधनितपिभ्यो नित्"*** (२।११७) इत्युणदिसूत्रेण "उसि" प्रत्ययो नित्त्वञ्च तस्यातिदिश्यते। नित्त्वात् प्रत्ययान्तसमुदाय आद्युदात्तः। निर्देष्टुं शक्यं वपुर्यस्य स निर्देश्यवपुः। ततो नञा समासे नञो नलोपश्चेति—अनिर्देश्यवपुः। न निर्देष्टुमियत्प्रकारकमियत्प्रमाणञ्चैवं व्यपदेष्टुम्= आख्यातुं शक्यं रूपं यस्य सः, एवम्भूतो विष्णुः। यतो हि, सर्वो वेदस्तस्यैव भगवतो विविधै रूपैर्गुणातिशयितां द्योतयति। उक्तञ्च **"तस्मिन् ह तस्थुर्भुवनानि विश्वा"** (यजु ३१।१६) वेदोक्तं विभिन्नगुणातिशयवत्त्वं भगवतो विष्णोरेवेति तदनन्तगामि चेति, सोऽनिर्देश्यवपुरुच्यते। विस्तरस्तु पूर्वत्र द्रष्टव्यः।

भवति चात्रास्माकम्—

यदत्र विश्वे परितोऽस्ति दृश्यं
ज्ञानेन वा गन्तुमिहास्ति शक्यम्।
सर्वं स्वरूपं तदिहास्ति विष्णो-
रियान् स वाचा न विधातुमर्हः ।।६५०।।

विष्णुः—६५७

विष्लृ व्याप्ताविति जौहोत्यादिको धातुस्ततो ***"विषेः किच्च"*** (३।३६) इत्युणादिसूत्रेण 'णुः' प्रत्ययस्तस्य च कित्त्वातिदेशस्तेन गुणाभावः। अनिट् चायं धातुः। वेवेष्टि=व्याप्नोति चराचरं जगदिति विष्णुः।

यद्वा—"विश प्रवेशने" इति धातुस्ततो बाहुलकादन्यतोऽपि धातोर्णुः प्रत्ययः षत्वञ्च, विशति सर्वत्रेति विष्णुः। मन्त्रलिङ्गञ्च—

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

(ऋक् १।१५४।२) तथा

इदं विष्णुर्विचक्रमे। (ऋक् १।२२।१७) इत्यादि ऋक्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स्थानं न तद्यत्र न विष्णुवासः
स्थानं न तद्यत्र न विष्णुसत्ता।
स्थानं न तद्यत्र न सोऽस्ति विष्टः
स्थानं न तद्यत्तु परं ततः स्यात्।।६५१।।

उक्तञ्च महाभारते शान्तिपर्वणि (३४१।४२, ४३)—

व्याप्य मे रोदसी पार्थ कान्तिरप्यधिका स्थिता।
क्रमणाद्वाप्यहं पार्थ विष्णुरित्यभिसंज्ञितः ।।

आदित्यपुराणे चापि—

यस्माद्विष्टमिदं सर्वं तस्य शक्त्या महात्मनः ।
तस्मात् स प्रोच्यते विष्णुर्विशेर्धातोः प्रवेशनात्।।

वीरः—६५८

"वी गतिव्याप्तिप्रजनकान्त्यसनखादनेषु" धातुः। प्रजनं गर्भग्रहणम्। ततो बाहुलकादन्यतोऽपि धातोः ***"स्फायितञ्चि०"*** (२।१३) इत्यादिसूत्रेण "रक्" प्रत्ययो वीरः इति। अजेर्वीति पूर्वं व्युत्पादितः।

वेति—गच्छति, व्याप्नोति, प्रजायते, अस्यति, खादतीति वा वीर इति। तथा च श्रुतिः—***"सूर्य आत्मा जगतस्तस्थुषश्च"*** (ऋक् १।११५।१) सर्वस्य जगत आत्मा सूर्योऽत्र वीरशब्देनोक्तः—यतो हि स गच्छति, कर्माणि च कारयति जगता, स्वांशुभिः सर्वं व्याप्नोति, प्रजायते=उदयते प्रत्यहं, अस्यति=क्षिपति किरणान् सर्वत्र, खादति=आदत्ते च रसान्। एतच्च सर्वं जीवात्मन्यपि घटते। तथा हि नित्योऽपि जीवात्मा शरीरसम्पृक्तो गच्छति, कर्माणि व्याप्नोति, प्रजायतें=जन्म गृह्णाति, अस्यति=क्षिपति चारीन्, खादति चान्नादिकम्। सूर्यपक्षेऽन्तर्गर्भितण्यर्थोऽप्युपपद्यते। विष्णौ चान्तगर्भितण्यर्थ एवं सम्यगन्वेति, वाययति=गमयतीति वीरः। कुतः? **"तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः"** (४०।५) इति याजुषमन्त्रवर्णनात्। व्याप्नोति, व्यापयति वा वीरः। प्रजनयतीति वीरो, यदुक्तं—**"प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा विजायते"** (यजुः ३१।१६) विजायत इति, योनिभेदेन विविधानि भूतानि जनयतीति भावः। कुतः? अजायमान इत्यत्रैव मन्त्र उक्तत्वात्। कामयते=अकामान्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भक्तानिति, कान्तिविषयो भवति इति वा वीरः। अथवा कनति दीप्तो भवति, दीपयति वा विश्वमिति। तद् ब्रह्म **''वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात्''** इति यजुषि (३।१८) तमसः परस्ताज्ज्योतीरूपमुक्तम्। अस्यति, आसयति व़ा वीरः। खादयति च सः। तथाहि, प्रतिप्राणि तदर्हान्नदानेन विज्ञाप्यते, यत्स प्रतिप्राणि तदर्हं भोजनं ददाति। यदुक्तं—**''मां हवन्ते पितरं न जन्तवो अहं दाशुषे विभजामि भोजनम्।''** ऋक् १०।४८।१।।

मन्त्रलिङ्गञ्च—

वीरः—इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च।
उग्र उग्राभिरूतिभिः। ऋक् १।७।४।।

विशेषेण ईरयतीति वीर इति पूर्वमुक्तम्।

स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते।
विभूतिरस्तु सूनृता। ऋक् १।३०।५।।
हव्यं वीर हव्या हवन्ते। ऋक् ६।२१।१।।
ब्रह्मन् वीर ब्रह्मकृतिं जुषाणः। ऋक् ७।२६।२।।
स वीरो दक्षसाधनो वि यस्तस्तम्भ रोदसी।
हरिः पवित्रे अव्यत वेधा न योनिमासदम्।। ऋक् ६।१०१।१५।।
दिवि श्रवो दधिषे नाम वीरः। ऋक् १०।२८।१२।।

विविधविभक्तिवचनेषु प्रयुक्तोऽयं वीरशब्दो वेदे तत्रैव द्रष्टव्यः निदर्शनं नः प्रयोजनम्।

भवति चात्रास्माकम्—

वीरो हि विष्णुः स हि वास्ति सूर्यो
जनोऽस्ति वा विष्णुगुणेन युक्तः।
व्याप्नोति विश्वं स हि सर्वयातः
सर्वंसहं तं स्तुवते पवित्रम् ।।६५२।।

अनन्तः—६५६

'अम गत्यादिषु'' भौवादिको धातुस्ततो ***''हसिमृग्रिण्वामिदमितमिलूपूधूर्विभ्यस्तन्''*** (३।८६) इत्युणादिः 'तन्' प्रत्ययः अमति, अम्यते वासौ—अन्तः। ***''तितुत्र''*** (पा० ७।२।६) इति सूत्रेणेण्निषेधः। नञो नलोपो नुडागमश्च।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नास्ति=अन्तो यस्य सोऽनन्तः=विष्णुः सूर्यो वा। मन्त्रलिङ्गञ्च—

समानो अध्वा स्वस्त्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे।।

ऋक् १।११३।३।।

यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः।
अमश्चरति रोरुवत्। ऋक् ६।६१।८। त्वेषः=सूर्यः।

अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।
अनन्तास उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः।।

ऋक् ५।४७।२।।

अनन्ते अन्तररश्मनि। ऋक् १।१३०।३।।

अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः।

ऋक् ४।१।७।। बहुविभक्त्यन्तोऽयं बहुत्र वेदे।

भवति चात्रास्माकम्—

अनन्तशक्तिः कथितोऽत्र विष्णु-
रनन्तशक्तिश्च तथैव सूर्यः।
अनन्तपारं कुरुते च सान्तं
त्वेषश्चरिष्णुर्दिवमात्मचक्षुः[१]।।६५३।।

धनञ्जयः—६६०

"धन धान्ये" इति च्छान्दसो धातुस्तत पचाद्यच् प्रत्ययः, धनम्। 'जि जये' इति भौवादिको धातुस्ततः ***"संज्ञायां भृतृवृजिधारिसहितपिदमः"*** (पा० ३।२।४६) इत्यनेन खच् प्रत्ययो गुणायादेशौ च। धनं जयतीति विग्रहे ***"अरुर्द्विषदजन्तस्य मुम्"*** (पा० ६।३।६७) इत्यजन्तस्य धनशब्दस्य मुमागमो मित्त्वादन्त्यादचः परः, अनुस्वारपरसवर्णौ च, पाक्षिकपरसवर्णाभावे धनंजयः।

तत्र मन्त्रलिङ्गम्—

स पवस्व धनञ्जय प्रयन्ता राधसो महः।
अस्मभ्यं सोम गातुवित्। ऋक् ९।४६।५।।

१. आत्मचक्षुः=द्रष्टृरूपः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्मा हि त्वा धनञ्जयं वाजेषु दधृषं कवेः।
अधा ते सुम्नमीमहे। ऋक् ३।४२।६।।
विद्मा हि त्वा धनञ्जयमिन्द्रः दृढा चिदारुजम्।
आदारिणं यथा गयम्। ऋक् ८।४५।१३।।

एवं बहुत्र धनञ्जयशब्दप्रयोगो दृश्यते।

भवति चात्रास्माकम्—

धनञ्जयो विष्णुरनन्तराधा
धनं हि सर्वं जितमस्ति तेन ।
यस्मिन् स्थितः सोऽस्ति धनं तदेव
यथा धनं जीवति काय आहुः।।६५४।।

'जीवति, काये' इति च सप्तम्यन्ते पदे।

❖ ❖ ❖

ब्रह्मण्यो ब्रह्मकृद् ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद् ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः।।८४।।

६६१ ब्रह्मण्यः, ६६२ ब्रह्मकृत्, ६६३ ब्रह्मा, ६६४ ब्रह्म, ६६५ ब्रह्मविवर्धनः। ६६६ ब्रह्मवित्, ६६७ ब्राह्मणः, ६६८ ब्रह्मी, ६६९ ब्रह्मज्ञः, ६७० ब्राह्मणप्रियः।।

ब्रह्मण्यः—६६१

'बृह बृहि वृद्धौ' भौवादिको धातुः, तयोर्बृंहेरिदितः ***''बृहेर्नोऽच्च''*** (४।१४६) इत्युणादिसूत्रेण मनिन् प्रत्ययो नकारस्य चाकारः, अकारे परतश्च ऋकारस्य यणादेशः। ***''नेड् वशि कृति''*** (पा० ७।२।८) इत्यनेनेण्निषेधः। एवं ब्रह्म शब्दः सिध्यति। तस्माच्च ब्रह्मशब्दात् ***''खलयवमाषतिलवृषब्रह्मणश्च''*** (पा० ५।१।७) इति सूत्रेण हितमित्यर्थे यत् प्रत्ययो विहितः। एवञ्च 'ब्रह्मन् य' इति स्थितौ ***''नस्तद्धिते''*** (पा० ६।१।१४४) इति टिलोपे प्राप्ते ***''ये चाभावकर्मणोः''*** (पा० ६।४।१६८) सूत्रेण प्रकृतिभावः। ततः ''अट्कुप्वाङ्नुम्व्यवायेऽपि'' इति सूत्रेण नकारस्य णकारः। तद्धितान्तत्वात् ***''कृत्तद्धितसमासाश्च''*** (पा० १।२।४६) इति प्रातिपदिकसंज्ञा, सु विभक्तिः ब्रह्मण्यो ब्रह्मणे हितः। स्वयं वृद्धं, स्वाश्रितान्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बृंहयति=वर्धयति च ब्रह्म, सर्वधा च तद् ब्रह्म।

तत्र मन्त्रलिङ्गम्—

त्वं विप्रस्त्वं कविर्मधु प्रजातमन्धसः।
मदेषु सर्वधा असि। ऋक् ६।१८।२।।

सर्वमेतत्सप्तमन्त्रकं सूक्तं ''**मदेषु सर्वधा असि**'' एतद्वाक्यान्तं समाप्नोति। यदेव ब्रह्म तदेव सर्वधा सर्वधातृत्वात्।

उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः।
विप्रा अतक्ष्म जीवसे। ऋक् ८।६।३३।।

भवतश्चात्रास्माकम्—

स सर्वधा ब्रह्म बृहत् प्रवृद्धो
विश्वे समस्ते च बृहद्धि सर्वम्।
दृशास्ति दृश्यो रविरूर्ध्वमायन्
जगद्धितायैव चरिष्णुधर्मा।।६५५।।

ब्रह्मण्य[1] उक्तः कविभिर्विधिज्ञै-
र्ब्रह्मण्य[2] एनं निदधाति यन्त्रे[3]।
नियन्त्रितो विश्वहिताय[4] गच्छन्
धामानि विश्वानि च वेद देवः[5]।।६५६।।

ब्रह्मकृत्—६६२

ब्रह्मेति कर्मोपपदात् कृञः क्विप्, ब्रह्म=बृहत् करोतीति ब्रह्मकृत्, बृंहणो हि स प्रवर्धन आश्रितानाम्। मन्त्रलिङ्गञ्च—

त्वं विश्वा दधिषे केवलानि यान्याविर्या च गुहा वसूनि।
काममिन्मे मघवन् मा वि तारीस्त्वमाज्ञाता त्वमिन्द्रासि दाता।।
यो अदधज्ज्योतिषि ज्योतिरन्तर्यो असृजन् मधुना सं मधूनि।
अध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो बृहदुक्थ्यादवाचि।।
ऋक् १०।५४।५, ६।।

---

१. ब्रह्मण्यः=सूर्यः; २. ब्रह्मण्यः=विष्णुः; ३. यन्त्रे=नियमे; ४. परिवृद्धस्य विश्वस्य हिताय। ५. देवः=विष्णुः सूर्यो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अयं ब्रह्मकृदिति शब्दो बहुत्र प्रयुक्तो दृश्यते वेदे।

भवति चात्रास्माकम्—

स ब्रह्मकृद् विष्णुरुतापि सूर्यो
ये तत्कृतौ सन्ति च दत्तवाचः।
स्तुवन्ति तं ब्रह्मकृतं पुराणं
निजार्थसिद्ध्यैः सकलायुराप्त्यै।।६५७।।

ब्रह्मा—६६३, ब्रह्म—६६४

ब्रह्म शब्दः प्राग् व्युत्पादितस्तस्य पुंसि सौ दीर्घे नान्तोपधलक्षणे ब्रह्मेति, वर्धत इति ब्रह्मा। मन्त्रलिङ्गम्—

आदित्यान् विष्णुं सूर्यं ब्रह्माणञ्च बृहस्पतिम्।
इन्द्रवायू बृहस्पतिं सुहवेह हवामहे।। ऋक् १० ।१४१ ।३, ४ ।।

ब्रह्म क्लीबे। विशेष्यनिघ्नोऽयं वृद्ध्यर्थको ब्रह्म शब्दः। नित्यं नपुंसके परब्रह्मवाची। तत्र क्लीबलिङ्गे ब्रह्मशब्दे मन्त्रलिङ्गम्—

त्वं नो अग्ने अग्निभिर्ब्रह्म यज्ञं च वर्धय।
त्वं नो देवतातये रायो दानाय चोदय ।। ऋक् १० ।१४१ ।६ ।।

वर्धनशीलं ब्रह्म यज्ञवृद्ध्यै प्रार्थ्यते।

एहि स्तोमाँ अभि स्वराऽभि गृणीह्या रुव।
ब्रह्म च नो वसो सचेन्द्र यज्ञं च वर्धय ।। ऋक् १ ।१० ।४ ।।

भवति चात्रास्माकम्—

ब्रह्मा स विष्णुश्च तथाऽस्ति सूर्यो
यः स्तूयते सामभिरुक्थरूपैः ।
यज्ञं च नो वर्धय देव देव!
तवोतिभी रिष्यति नैव मर्त्यः ।।६५८।।

'तवोतिभी' रित्यत्र मन्त्रलिङ्गम्—

स धा वीरो न रिष्यति यमिन्द्रो ब्रह्मणस्पतिः।
सोमो हिनोति मर्त्यम्।। ऋक् १ ।१८ ।४ ।।
त्वं तं·····मर्त्यं दक्षिणा पात्वंहसः। ऋक् १ ।१८ ।५ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मविवर्धनः—६६५

ब्रह्म वै यज्ञः (ऐ० ब्रा० ७।२२), एवं च ब्रह्मविवर्धनो=यज्ञस्य वर्धन इत्यर्थः। "वर्ध छेदनपूरणयोः" इति चौरादिको धातुः "वृधु वृद्धौ" इति भौवादिकश्च, णिजन्तात् *"नन्दिग्रहिपचादिभ्यः"* (पा० ३।१।१२४) इति कर्तरि ल्युः प्रत्ययः, यद्वा ल्युट् करणे, योरनादेशः, वर्धनः, विशेषेण वर्धयति वर्ध्यते, पूर्यते वाऽनेनेति विवर्धनः। ब्रह्मणो=यज्ञस्य विवर्धनो ब्रह्मविवर्धनः। मन्त्रलिङ्गम्—

यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मेदमिन्द्र भूतु तेऽहा विश्वा च वर्धनम्।। ऋक् ८।१।३।।

भवति चात्रास्माकम्—

विवर्धनं विश्वमिदं समस्तं
यतः स्वयं ब्रह्मविवर्धनः सः ।
बीजाच्च वृक्षं कुरुते विवृद्धं
वृक्षाच्च बीजान् कुरुते बहून् सः।।६५६।।

ब्रह्मवित्—६६६

ब्रह्म वेत्तीति ब्रह्मवित् "विद् ज्ञाने" आदादिको धातुस्ततः ***"क्विप् च"*** (पा० ३।२।६,७) इत्यनेन सुप्युपपदे क्विपप्रत्ययस्तस्य च सर्वस्यापहारः, ***"वाऽवसाने"*** (पा० ८।४।५६) इत्यनेन दस्य चर्त्त्वं, तकारो वैकल्पिको ब्रह्मविद् ब्रह्मवित् वा। विवृद्धं विवर्धनं वा ब्रह्म, दृश्यमदृश्यं ज्ञानमात्रगम्यञ्च यत्, तत् को वेत्तीति प्रश्ने वक्तुं शक्यते, स एव सर्वस्याधारो भगवान् विष्णुर्वेत्तीति। तस्मात्स ब्रह्मवित्। मन्त्रलिङ्गम्—

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजुः ३१।१६।।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।
ऋक् १।१५४।२।।

तेषां बृहतां भुवनानां ज्ञाता स ब्रह्मवित् परमेश्वरः।

एतस्य ब्रह्मणा कृतस्य ब्रह्मरूपस्य जगतोऽपि यो ज्ञाता स ब्रह्मवित्संज्ञकः। यदुक्तम्—

सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत्।
अथर्व १०।८।३७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्र लोकाश्ंच कोशांश्चापो ब्रह्मविदो विदुः ।
असच्च यत्र सच्चान्तः स्कम्भं तं ब्रूहि कतमः स्विदेव सः ।।

अथर्व १० ।७ ।१० ।।

यच्चेदं दृश्यं जगत् तदिदं तस्य देवस्य दृश्यं काव्यं, यतो हि स परमेश्वरः कविः। अत्र वेदः—

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरा गमत्।

ऋक् १ ।१ ।५ ।।

तस्य कवेः कर्म काव्यम्। तद्दर्शिना विशेषितं कर्म जगदेव भवितुमर्हति। तद्व्यञ्जकश्च विष्णुस्तद्विद् ब्रह्मविदुच्यते, "यो हि यस्य व्यञ्जकः स तद्विद्" इति न्यायात्।

भवति चात्रास्माकम्—

स ब्रह्मविद्विष्णुरुदात्तकाव्यो
धामानि सर्वाणि दधाति गर्भे ।
जानाति वा तानि विधारकत्वात्
स्तुवन्ति तं ब्रह्मविदः पुराणाः ।।६६० ।।

ब्राह्मणः—६६७

ब्राह्मणं जगत्, तदस्यातीति मत्वर्थीयेऽचि ब्राह्मणो विष्णुः। जगद्धि ब्रह्मणः सङ्कल्पमात्राज्जातत्वादनपत्यमपि जातत्वसामान्येनोपचारादपत्यम्। यदुक्तम्—पुरुषसूक्ते—"**ततो विराडजायत विराजो अधि पूरुषः। स जातो अत्यरिच्यत पश्चाद् भूमिमथो पुरः।**" तथा "**तस्मादश्वा अजायन्त**" "**गावो ह जज्ञिरे तस्माद्**" इत्यादि यजुः ३१ ।५,८ ।।

अतः "***ब्राह्मोऽजातौ***" (पा० ६ ।४ ।१७१) इति सूत्रेण जातिविशिष्टापत्यभिन्नार्थे, केवलेऽपत्यभिन्नार्थे च निपात्यमानष्टिलोप इह न भवति, जगत औपचारिकापत्यत्वात्। ब्राह्मणजातिवचनोऽपि ब्राह्मणशब्दः ब्रह्मणो जातत्वात्तस्य मुखरूपत्वाच्च, जातिविशिष्टापत्यत्वान्न टिलोपं लभते, यदुक्तं "**ब्राह्मणोऽस्य मुखमासीद्**" इत्यादि यजुषि ३१ ।११ ।। विराड्=ब्रह्मा, तदधिष्ठानत्वादात्मरूपत्वाच्च जगतः सूर्योऽपि ब्राह्मणः यदुक्तं "**सूर्य आत्मा जगतस्तस्थुषश्च**" (ऋक् १ ।११५ ।१) इत्यादि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इह नाम्नि मन्त्रलिङ्गानि—

यमृत्विजो बहुधा कल्पयन्तः सचेतसो यज्ञमिमं वहन्ति।
योऽनूचानो ब्राह्मणो युक्त आसीत् कास्वित्तत्र यजमानस्य संवित्।।
एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः।
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं बभूव सर्वम्।।
ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम्।
चित्रा मघा यस्य योगेऽधिजज्ञे तं वां हुवे अति रिक्तं पिबध्यै।।

ऋक् ८।५८।१, २, ३, ।।

भवतश्चात्रास्माकम्—

अग्निः स एको बहुधा समिद्धः
सूर्यः स वा सर्वमिदं स एव ।
उषोऽप्यसौ ब्राह्मण एव भाति
स केतुमान् चित्ररथस्त्रिचक्रः ।।६६१।।

एवं हि यो वेत्ति पदं सुगुप्तं
स ब्राह्मणं वेद पदञ्च विष्णोः ।
विष्णुर्विधाता स पुनश्च धाता
ब्रह्माप्यतो ब्राह्मणशब्दवाच्यः ।।६६२।।

ब्रह्मी—६६८

ब्रह्मन् शब्दो व्युत्पादितः। सर्वं सचराचरं विश्वरूपं ब्रह्म अस्य—अस्मिन्नस्तीति ब्रह्मी ***''व्रीह्यादिभ्यश्च''*** (पा० ५।२।११६) इति 'इनि', ***''नस्तद्धिते''*** (पा० ६।४।१४४) सूत्रेण टिलोपो दीर्घश्चेन्नन्तलक्षणः।

भावार्थप्रधानं मन्त्रलिङ्गम्—

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ।।

ऋक् १।९८।१।।

त्वं हि विश्वतोमुख विश्वतः परिभूरसि।
अप नः शोशुचदधम्। ऋक् १।९७।६।।
ब्रह्मणस्पते, ब्रह्मणस्पतिः। ऋक् १।१८।१,४।।

एवंविधा बहवः प्रयोगा वेदे दृश्यन्ते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

यो यस्य राजा स्वमदो हि तस्य
ब्रह्मास्ति विश्वं सकलञ्च तस्मिन् ।
ब्रह्मीति तस्मात् स हि विष्णुरुक्तः
स विश्वतो वा परिभूः पुराणः ।।६६३।।

ब्रह्मज्ञः—६६६

ब्रह्मेति कर्मोपपदात्—"ज्ञा अवबोधने" धातोः ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) इत्यनेन "कः" प्रत्ययः, आतो लोपः। ब्रह्म जानातीति ब्रह्मज्ञः ब्रह्म चात्र चराचरं विश्वमिति पूर्वमुक्तम्।

भावार्थप्रधानं मन्त्रलिङ्गम्—

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।२।।

यस्मिन् यद् भवति स तद्वेत्ति तस्मात् स ब्रह्मज्ञः। यद्वा—महान्ति विवृद्धानि ब्रह्मपर्यायाणि भुवनानि स जानाति। उक्तञ्च—

य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा।

ऋक् १।१५४।४।।

स कः ?—**"महे शूराय विष्णवे चार्चत।"** ऋक् १।१५५।१।।

तस्मात् स विष्णुर्ब्रह्मज्ञः।

यद्वा—ब्रह्म=वेदस्तं जानातीति ब्रह्मज्ञः। एतदेवाभिप्रेत्यैतदुक्तं वेदमयं काव्यमिति। भूतवर्तमानभविष्यत्कालिकवेदधर्माऽयमतो ब्रह्मज्ञः। स एव च—इति—ह—अस्ति, इति—ह—आस, इति—ह—भविष्यतीत्यादिकं सर्वं वेद, अत एव वक्ष्यति तस्येतिहास इति नाम।

भवति चात्रास्माकम्—

विष्णुर्हि विश्वं परितोऽभ्युपेतो
जानाति वृद्धं सकलं स्वकस्थम्[1] ।
ब्रह्मज्ञ उक्तः स कविश्च तस्माद्
विश्वानि देवो वयुनानि विद्वान्।।६६४।।

---

१. स्वस्थम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्वान् जानातीत्यर्थः। ऋग्यजुषोश्चोक्तम्—

अग्ने नय सुपथा रायेऽस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नम उक्तिं विधेम।।

ऋक् १।१८९।१।। यजुः ४०।१६।।

ज्ञा अवबोधने, विद् ज्ञाने, बुध ज्ञाने, इत्यादयः समानार्था धातवः।

ब्राह्मणप्रियः—६७०

ब्राह्मणशब्दो व्युत्पादितः।

प्रियः—''प्रीञ् तर्पणे कान्तौ च'' इति क्रैयादिको धातुस्ततः ***''इगुपधज्ञाप्रीकिरः कः''*** (पा० ३।१।१३५) इत्यनेन कः प्रत्ययः। ***''अचि श्नुधातुभ्रुवां य्वोरियङुवङौ''*** (पा० ३।१।१३५) इति सूत्रेण 'इयङ् आदेशः' ***''ङिच्च''*** (पा० १।१।५३) इत्यनेनान्त्यस्य। ब्राह्मणानां प्रियः, षष्ठीतत्पुरुषसमासो ब्राह्मणप्रियः।

''सूत्रं सूत्रस्य यो विद्यात्'' (अथर्व १०।८।३७) इत्यत्र ब्राह्मणशब्दो विश्वमात्रस्य पर्यायवचनः, तस्मात् सकलस्य चराचरविश्वस्य तर्पकः प्रकाशकश्च विष्णुरेव ब्राह्मणप्रियशब्देनोक्तो भवति सूर्यश्च।

यद्वा—''**ब्राह्मणोऽस्य मुखमासीत्**'' तथा ''**मुखादग्निरजायत**'' (यजुः ३१।११, १२) तस्माद् **''आग्नेया ह ब्राह्मणाः''** (तै० ब्रा० २।७।३) तेषां प्रकाशकः। तत्र—ब्राह्मणः=सूर्यः, अग्निर्वा, उषा वा, इदं सर्वं वा, तस्य तर्पको ब्राह्मणप्रियः।

भवति चात्रास्माकम्—

ब्राह्मणस्य प्रियो लोके विष्णुः सूर्यः पुरातनः।
तं नमन्ति सदार्चन्ति विश्वञ्च स पृणाति वै।।६६५।।

मन्त्रलिङ्गम्—

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम्।

यजुः ३२।१३।।

❖ ❖ ❖

महाक्रमो महाकर्मा महातेजा महोरगः।
महाक्रतुर्महायज्वा महायज्ञो महाहविः।।८५।।

६७१ महाक्रमः, ६७२ महाकर्मा, ६७३ महातेजाः, ६७४ महोरगः।
६७५ महाक्रतुः, ६७६ महायज्वा, ६७७ महायज्ञः, ६७८ महाहविः।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महाक्रमः—६७१

महतो व्युत्पादनं ***"वर्तमाने पृषन्महज्जगच्छतृवच्च"*** (२।८४) इत्युणादौ विहितम्। क्रमतेश्च घञि क्रमः ***"नोदात्तोपदेशस्य"*** (पा० ७।३।३४) इति वृद्धिनिषेधः। महान्तः क्रमाः पादविक्षेपा यस्य स महाक्रमः बहुव्रीहिसमासः।

मन्त्रलिङ्गञ्च—

विष्णुरुरुक्रमः। यजुः ३६।६।।

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।२।।

भवति चात्रास्माकम्—

न चास्ति किञ्चिद् भुवि वर्तमानं
महाक्रमो यन्न वशे करोति ।
त्रिधातुरुक्तः स कविः स सूर्यः
स विष्णुरिन्द्रः स महान् स भर्गः।।६६६।।

महाकर्मा—६७२

महदिति बहुशः साधितम्।

कर्मेति—"डुकृञ् करणे" इति धातोः ***"सर्वधातुभ्यो मनिन्"*** (४।१४५) इति "मनिन्" प्रत्यय औणादिकः, रपरो गुणः। अनिडयं धातुः। महत् कर्म, जगतो रचनं धारणं व्यवस्थापनञ्च यस्येति बहुव्रीहिः समासः। नान्तलक्षणो दीर्घो महाकर्मेति विष्णुः। मन्त्रलिङ्गञ्च—

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।

इन्द्रस्य युज्यः सखा। ऋक् १।२२।१९, यजुः ६।२।।

भवति चात्रास्माकम्—

महाकर्मा स एवास्ति विष्णुः सूर्यो जनेश्वरः।
तं स्तुवन्ति सदा विप्राः प्राप्तुं तत्पदमुत्तमम्।।६६७।।

महातेजाः—६७३

तेजः—"तिज निशाने" निशानं तीक्ष्णीकरणं चौरादिको धातुस्ततः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

''सर्वधातुभ्योऽसुन्'' (४।१८२) इत्यसुन् प्रत्यय औणादिकः, गुणः। महत्तेजो यस्येति बहुव्रीहावसन्तलक्षणो दीर्घः, महातेजा विष्णुः सूर्यो वा। ***''गुप्तिज्किद्भ्यः सन्''*** (पा० ३।१।५) सूत्रेण संस्तु न भवति, तस्य क्षमायां विधीयमानत्वात्। मन्त्रलिङ्गञ्च—

यथा सूर्यो नक्षत्राणामुदयस्तेजांस्याददे ।
एवा स्त्रीणाञ्च पुंसां च द्विषतां वर्च आ ददे।। अथर्व ७।१३।१।।

भवति चात्रास्माकम्—

तेजोऽग्निरुक्तः स समिद्धतेजाः
सूर्यो विभात्येति तमो विलुम्पन्।
स तेजसां तेज इति प्रतीतः
तेजांसि विष्णुर्हरते समेषाम् ।।६६८।।

महोरगः—६७४

उरग इति—''ऋ गतिप्रापणयोः'' इति भौवादिको धातुस्ततः **''अर्तेरुच्च''** (४।१९५) इत्युणादिसूत्रेण स्वाङ्गे गम्यमाने धातोरुदादेशो रपरोऽसुंश्च प्रत्ययः। अर्यतेऽनेनेत्युरः। उरसा गच्छतीत्यर्थे ***''उरसो लोपश्च''*** (पा० ३।२।४८) इति सूत्रस्थवार्तिकेन गमेर्डः प्रत्ययष्टिलोपः, उरसः सलोपश्च। महांश्चासावुरगो महोरगः, आद् गुणः। महोरगो विष्णुः सूर्यो वा।

अर्थप्रधानं मन्त्रलिङ्गम्—

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा[1] वहमानो अश्वैः ।
हस्ते दधातो नर्या पुरूणि निवेशयञ्च प्रसुवञ्च भूम।।
ऋक् ७।४५।१।।

भवति चात्रास्माकम्—

महोरगो विष्णुरुतापि सूर्य
उरोऽन्तरिक्षं स महांश्च तत्र ।
गच्छन् रविः स्यात् स महोरगोऽतो
विष्णुश्च यस्तन्नियमं विधत्ते।।६६९।।

१. अन्तरिक्षप्राः=अन्तरिक्षं पूरयन्ति, 'प्रा पूरणे' धातुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महाक्रतुः—६७५

क्रतुरिति—*''कृञः कतुः''* (१।७६) इत्युणादिसूत्रेण कतुः प्रत्ययः, गुणाभावः, यण्—ऋतो रेफः। करोतीति क्रतुः, क्रियते वा क्रतुः। यज्ञोऽपि क्रियतेऽतः क्रतुः। महत् कर्म महान्तः क्रतवो यज्ञा वा यस्य स महाक्रतुः। मन्त्रलिङ्गञ्च—

त्वं सोमक्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः।
त्वं वृषा वृषतवेभिर्महित्वा द्युम्नेभिर्द्युम्नभवो नृचक्षाः ।।

ऋक् १।९१।२।।

इति निदर्शनम्। बहुत्र वेदे क्रतुशब्दप्रयोगः समस्तो व्यस्तश्च, विविधविभक्तिवचनान्तश्च दृश्यते।

भवति चात्रास्माकम्—

महाक्रतुर्विष्णुरनन्तकर्मा
सूर्योऽपि वोक्तः क्रतुमान् महान् सः।
विश्वञ्च यः कर्मसु सन्नियुङ्क्ते
क्षणं विरामं लभते स्वयं नो ।।६७०।।

महायज्वा—६७६

"यज देवपूजादौ" भौवादिको धातुस्ततः ***''सुयजोर्ङ्वनिप्''*** (पा० ३।२।१०३) सूत्रेण भूते ङ्वनिप् प्रत्यय इडभावः। कर्मधारयसमासः, नान्तोपधलक्षणो दीर्घः। महान्तं यज्ञं कृतवानिति महायज्वा। तथा च मन्त्रलिङ्गम्—

यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि। इत्यादि यजुः ३१।१६।।

अन्यच्च—

वसन्तोऽस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः। यजुः ३१।१४।।

अन्यच्च मन्त्रलिङ्गम्—

आ होता मन्द्रो विदथान्यस्थात् सत्यो यज्वा कवितमः स वेधाः।
विद्युद्रथः सहसस्पुत्रो अग्निः शोचिष्केशः पृथिव्यां यातो अश्रेत् ।।

ऋक् ३।१४।१।।

मनुष्या महतो यज्ञान् विदधतीति तेष्वपि भगवतो महायज्वनो विष्णोर्महायज्वत्वरूपो गुणोऽनुस्यूत इति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्.—

यज्वा महान् विष्णुरुतापि सूर्यो
होता स एवास्ति कविः स वेधाः।
विद्युद्रथोऽसौ सहसश्च पुत्रः
स्तुतोऽस्ति वेदे स हि सर्वयातः ।।६७१।।

महायज्ञः—६७७

यज्ञ इति—यजतेः *"यजयाचविच्छप्रच्छरक्षो नङ्"* (पा० ३।३।६०) इति सूत्रेण कर्तृभिन्ने भावादौ नङ् प्रत्ययः। यजनं यज्ञः, इज्यते इति वा यज्ञः। महान् यज्ञो यस्येति बहुव्रीहिः। महद् यस्य, महद्भिरिज्यत इति वा।

मन्त्रलिङ्गम्—

यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन।
स धीनां योगमिन्वति।। ऋक् १।१८।७।।

स घा वीरः, सोम इन्द्र, सदसस्पतिमद्भुतम्, रेवान् यो अमीवहा वसुवित्पुष्टिवर्धनः (द्र० ऋक् १।१८ सूक्त) इत्यादिषूक्तो विष्णुः सूर्यो वा। कस्तस्माद्विष्णोः सूर्याद् ऋत एवंविधो भवितुमर्हति ? न कोऽपि, अतो महायज्ञो विष्णुः।

भवति चात्रास्माकम्—

महानसौ येन विना न सिध्येद्
यज्ञः स विष्णुः सदसस्पतिः सः ।
स एव सोमो वसुवित् स रैवान्
स वाद्भुतस्तञ्च नमन्ति देवाः ।।६७२।।

महाहविः—६७८

हविः—"हु दानादानयो" इति जौहोत्यादिको धातुस्ततः *"अर्चिशुचिहुसृपिच्छदिछर्दिभ्यः इसिः"* (२।१०८) इत्युणादिसूत्रेण "इसिः" प्रत्ययः, गुणोऽवादेशो हविः। हूयते अनेन, हूयत इति वा हविः। जुहोतीति वा हविर्विष्णुः सर्वं प्रीणयतीति। सतां वा दानविषयः=आश्रयणीयः। महद्धविरिति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः।
स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आविवेश ।।

ऋक् १०।८१।१।।

इमानि विश्वानि भुवनानि हविःस्थानीयानि यस्येति स महाहविर्विष्णुरुच्यते।

भवति चात्रास्माकम्—

महाहविर्विष्णुरुतापि सूर्यो
विश्वानि यो वा भुवनानि जुह्वद्।
ऋषिः स होता हविषा पिता नः
स एव [1]विश्वा भुवनानि वेद ।।६७३।।

❖ ❖ ❖

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ।।८६।।

६७९ स्तव्यः, ६८० स्तवप्रियः, ६८१ स्तोत्रम्, ६८२ स्तुतिः, ६८३ स्तोता, ६८४ रणप्रियः।
६८५ पूर्णः, ६८६ पूरयिता, ६८७ पुण्यः, ६८८ पुण्यकीर्तिः, ६८९ अनामयः।।

स्तव्यः—६७९

"ष्टुञ् स्तुतौ" इत्यादादिको धातुस्ततोऽकर्तरि कारकाधिकारे ***"ऋदोरप्"*** (पा० ३।३।५७) इति सूत्रेण भावे अप् प्रत्ययः, गुणोऽवादेशः, स्तवः। तमर्हतीति स्तव्यः अर्हार्थे यत्, ***"यस्येति च"*** (पा० ६।४।१४८) इत्यवर्णलोपः, स्तव्यः स्तोतुमर्ह इत्यर्थः। बृहद्—रथन्तर—वामदेव्यादिकरणकस्तुतिविषयः।

मन्त्रलिङ्गञ्च—

महः सु वो अरमिषे स्तवामहे मीढुषे अरङ्गमाय जग्मये ।
यज्ञेभिर्गीर्भिर्विश्वमनुषां मरुतामियक्षसि गाये त्वा नमसा गिरा।।

ऋक् ८।४६।१७।।

---

१. विश्वा=विश्वानीति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुते सोमे स्तुमसि शंसदुक्थेन्द्राय ब्रह्म वर्धनं यथासत्।
ऋक् ६।२३।५।।

स्तविष्यामि त्वामहं विश्वस्यामृत भोजन।
अग्ने त्रातारममृतं मियेध्य यजिष्ठं हव्यवाहन।। ऋक् १।४४।५।।

उतो न एभिः स्तवथैरिह स्याः। ऋक् ७।१।८।।

त्वं नो अग्ने अङ्गिरः स्तुतः स्तवान आ भर।
होतर्विभ्वासहं रयिं स्तोतृभ्यः स्तवसे च न उतैधि पृत्सु नो वृधे।।
ऋक् ५।१०।७।।

सो चिन्नु सख्या नर्य इनः स्तुतः। ऋक् १०।५०।२।।

भवतश्चात्रास्माकम्—

स्तव्योऽस्ति को विष्णुरुतापि सूर्यो
यतोऽमृतोऽसौ सकलस्य कर्म।
पश्यन् स्मरन् भूतपतिश्चरिष्णु-
र्वाञ्छन् नियच्छन् भुवनानि [1]वेत्ति।।६७४।।

त्वक्त्वाऽमरं यो मनुजो महेशं
नरो नरं स्तौति सहस्रभावैः।
नष्टः स्वयं स्तोत्रमथापि नश्यन्
वियुज्यते [2]चार्थ्यतमैश्च [3]लिप्स्यैः।।६७५।।

भावार्थः—नहि मरणधर्मा मनुष्योऽमरत्वं साधयितुं प्रभवति।

स्तवप्रियः—६८०

स्तवः प्रदर्शितसिद्धिः।

प्रियः—प्रीञ् तर्पणे कान्तौ चेति क्रैयादिकाद् धातोः के प्रत्यय इयङि च सिद्धः। प्रियाः स्तवाः स्तुतयो यस्य स स्तवप्रियो विष्णुः। स्तोतॄणां स्तोत्रैः, प्रीतः, प्रीणयति स्तोतॄनिति भावः। मन्त्रलिङ्गम्—

आ नः कामं पूपुरन्तु स्तवानाः। ऋक् ७।६२।३।।

आ वो वाहिष्ठो वहतु स्तवध्यै। ऋक् ७।३७।१।।

१. वेत्ति=जानातीत्यर्थः। २. अर्थ्यतमैः=अत्यन्तं याचितुमर्हैः। ३. लिप्स्यैः=वाञ्छ्यैः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आ नो राधांसि सवितः स्तवध्या आ रायो यन्तु पर्वतस्य रातौ।
सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ।।

ऋक् ७।३७।८।। इति निदर्शनम्।

भवतश्चात्रास्माकम्—

स्तवप्रियो विष्णुरिहास्ति लोके
सूर्यस्तथान्ये च खगाः समस्ताः।
स्तुतिं स्वकीयामभितो भवन्तीं
श्रुत्वा च वित्त्वा परितः कनन्ति।।६७६।।

लोकेऽपि यः स्तोत्रशतैः प्रक्लृप्तै-
र्नरो नरं स्तौति शताभिधानैः।
स्तुत्यः स्तवैः शुद्धतरात्मभावः
प्रीणाति तञ्चार्थ्यतमप्रदानैः।।६७७।।

दृश्यते च लोकेऽपि—सर्वः प्राणिवर्गः स्वकीयया स्तुत्या प्रसन्नः स्वस्तोतारं प्रीणाति। एवं स्तवप्रियत्वरूपेण गुणेन लोकं व्यश्नुवानो विष्णुः स्तवप्रियः इति नाम भजते।

स्तोत्रम्—६८१

"ष्टुञ् स्तुतौ" इति भौवादिको धातुस्ततो ***"दाम्नीश सयुयुज स्तुतुदसिसिचमिहपतदशनहः करणे"*** (पा० ३।२।१८२) सूत्रेण करणे ष्ट्रन् प्रत्ययः स्तूयतेऽनेनेति स्तोत्रं वेदः। वेदस्य प्रधानविषयत्वाद् ब्रह्मापि स्तोत्रम्। यदुक्तं— **"वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।"** अथर्व १०।८।३३।।

मन्त्रलिङ्गञ्च—

महि स्तोत्रमव आगन्म सूरोरस्माकं सु मघवन् बोधि गोपा।

ऋक् ३।३१।१४।।

भवति चात्रास्माकम्—

स्तोत्रं स्वयं [1]ब्रह्मविवर्धनोऽसौ
स्तोत्रस्वरूपेण [2]जरितृकोशे।

१. ब्रह्मविवर्धनः=विष्णुः। २. जरितृकोशे=स्तोतुर्हृदये।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रतिष्ठितः सन् जरितुश्च [1]वाचः
समर्धयत्येव च तन्निशम्य[2] ।।६७८।।

स्तुतिः—६८२

"ष्टुञ् स्तुतौ" इति भौवादिको धातुस्ततः स्त्रियां करणे क्तिन् प्रत्ययः, कित्त्वाद् गुणाभावः। नित्त्वमाद्युदात्तार्थम्। कृदन्तत्वात् प्रातिपदिकसंज्ञा, ततः सौ स्तुतिः-औपाधिकी चिच्छक्तिः। यद्वा स्तूयते या सेति कर्मणि क्तिन्, परमेशरूपा चिच्छक्तिः। तयोश्चोपाधिनिर्मुक्तयोरैक्यात् स्तुतिर्विष्णुः। क्वचित् पुंल्लिङ्गता क्वचित् स्त्रीलिङ्गता तथा क्वचित् क्लीबतेत्यनियतलिङ्गतायाः प्रदर्शनं भगवति लिङ्गाभावज्ञापनार्थम्।

केषाञ्चिन्मते स्तुत इति नाम। तत्र कर्मणि क्तः, स्तूयते यः स स्तुतो विष्णुः सूर्यो वा। मन्त्रलिङ्गञ्च—

सं च त्वे जग्मुर्गिर इन्द्र पूर्वीर्वि च त्वद् यनित बिभ्वो मनीषाः।
पुरा नूनञ्च स्तुतय ऋषीणां पस्पृध्र इन्द्रे अध्युक्थार्काः ।।

ऋक् ६।३४।१।।

अस्य स्तुतिं जरितुर्भिक्षमाणाः। ऋक् १०।३१।५।।

भवति चात्रास्माकम्—

स्तुतिर्हि विष्णुः स हि वास्ति सूर्यो
मर्त्यः स्वकार्यस्य वशं प्रपन्नः।
स्तुतिं प्रयुङ्क्ते हृदि तं बिभर्ति
तमेव वाचा बहुशो ब्रवीति ।।६७९।।

स्तोता—६८३

"ष्टुञ् स्तुतौ" इति धातुस्ततस्ताच्छीलिकस्तृन् प्रत्ययः। गुणोऽनङ्, दीर्घादि—स्तोतेति। स्तोतृमुखेन स्वयमेव स्वस्य स्तावकः स्तोता विष्णुः। लोकेऽपि च दृश्यते—किञ्चित् कस्मैचिद्दित्सुर्मनुष्यस्तमात्मानं स्तावयति, पश्चाच्च

---

१. वाचः=द्वितीया-बहुवचनम्; २. निशम्य=श्रुत्वा। **"श्रुधी हवम्"** (ऋक् १।२।१) इति मन्त्रलिङ्गम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दत्ते। क्रमो ह्येष स्वाभाविको मनुष्यस्य। एवं विश्वं व्याप्य स्थितः स्तोतृत्वरूपो गुणो विष्णुरूप एव।

मन्त्रलिङ्गञ्च—

यद् यूयं पृश्निमातरो मर्त्तासः स्यातन।
स्तोता वा अमृतः स्यात्। ऋक् १।३८।४।।
इशिषे वार्यस्य हि दात्रस्याग्ने स्वर्पतिः।
स्तोता स्यां तव शर्मणि। ऋक् ८।४४।१८।।

वेदे विविधविभक्तिवचनान्तोऽयं स्तोतृशब्दः प्रयुज्यते। स्तौतीति कर्तरि तृज्वा स्तोता। वेदेषु त्वन्तोदात्तस्तृजन्त एव प्रयुज्यते।

भवति चात्रास्माकम्—

स्तोता स विष्णुर्ह्यथवाऽपि सूर्यः
स्तोतुर्हि हृद्देशगतः स्वयं सः।
अर्थप्रदित्सुः प्रणुदन् प्रवक्तुं
प्रसादमन्वेति वचांसि चोद्य ।।६८०।।

रणप्रियः—६८४

"रण गतौ, रण शब्दार्थः" इति वा भौवादिको धातुस्ततः पचाद्यच् प्रत्ययः कर्तरि, रणति=गच्छति, शब्दायते चेति रणः।

प्रिय-शब्दः प्रीणातेर्व्युत्पादितः। रणन्=गच्छन्, शब्दायमानश्च प्रीणातीत्यर्थः। यत्र हि गतिस्तत्र शब्दः। अतः सर्वत्र गतोऽसौ शब्दायमानः प्रीणातीति कर्तृवाच्यगम्योऽर्थः।

यद्वा—रणनं रणः गतिः शब्दो वा। रणन्ति वा यत्रेति रणः। द्वन्द्वरूपेण वर्तमानो विविधभावरूपः सर्गयज्ञः सर्गसंग्रामयज्ञो वा।

तत्रोभयथाऽपि रणधातुतः अकर्तरि कारकाधिकारे ***"वशिरण्योरुपसंख्यानम्"*** इति पा० ३।३।५८ सूत्रस्थवार्तिकेन भावेऽधिकरणे वा 'अप्' प्रत्ययः। गतिरत्र द्वन्द्वभावेन विविधभावताऽभिप्रेता, तथा शब्दोऽपि सत्यां सृष्टौ प्रवर्तते, सर्गरूपयज्ञे, सर्गरूपसंग्रामे वा। वस्तुत इदं विश्वमेव संग्रामो यज्ञो वा। इहैव विविधभावरूपाया गतेः शब्दस्य च प्रादुर्भावः, गतिशब्दयोः साहचर्यात्। एष एव सर्गरूपः संग्रामो विविधभावरूपो यज्ञो वा भगवतः प्रिय इति बहुव्रीहिसमासगम्योऽर्थः।

यद्वा—रण्यते=गम्यते, शब्द्यते च यत्रेति रण आकाशो द्यौर्वा। तत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीणाति=कान्तिं=प्रकाशं ददातीति रणप्रियः सूर्यः।

रणः संग्रामोऽप्येतस्मादेव, तत्र प्रीणाति=हृष्यतीति रणप्रियो वीरः=योद्धा।

तत्र मन्त्रलिङ्गम्—

कस्य वृषा सुते सचा नियुत्वान् वृषभो रणत्।
वृत्रहा सोमपीतये।। ऋक् ८।६३।२०।।
सजूर्विश्वेभिर्देवेभिरश्विभ्यामुषसा सजूः।
आ याह्यग्ने अत्रिवत् सुते रणः।। ऋक् ५।५१।८।। तथा
पवस्व गोजिदश्वजिद् विश्वजित् सोम रण्यजित्।
प्रजावद्रत्नमा भर।। ऋक् ६।५६।१।।

सोमः, कविः, इन्द्रः, एते गुणप्रत्यायकाः पर्यायाश्चतुर्मन्त्रात्मकेऽस्मिन् सूक्ते।

भवति चात्रास्माकम्—

रणप्रियो विष्णुरुतापि सूर्यः
प्रकाशयन् द्यां च स एति विश्वम्।
हृदि स्थितो वा स तमांसि हत्वा
प्रकाशयत्येव कविः सुमेधाम् ।।६८१।।

पूर्णः—६८५

'पूरी आप्यायने' चौरादिको दैवादिको वा धातुस्ततश्चौरादिकस्य कर्तरि क्ते ***"वा दान्तशान्तपूर्णदस्तस्पष्टच्छन्नज्ञप्ताः"*** (पा० ७।२।२७) इति सूत्रेण पाक्षिक इडभावो णेर्लुक् च निपात्यते, दैवादिकस्य चेडभावो निपात्यते—पूर्णः, पक्षे पूरितः। पूर्णः सर्वैः कामैः पूरयति च लोकान् स्वगुणैरिति पूर्णो विष्णुः, पीनः स्वयं, प्याययति च सर्वं रसरूपेणान्तः प्रविश्येति वा।

मन्त्रलिङ्गञ्च—

पूर्ण आहावो मदिरस्य मध्वो यं विश्व इदभिहर्य्यन्ति देवाः।
ऋक् १०।११२।६।।
यः पात्रं हारियोजनं पूर्णमिन्द्र चिकेतति योजान्विन्द्र ते हरी।
ऋक् १।८२।४।।
प्र नूनं पूर्णबन्धुरः स्तुतो याहि वशाँ अनु योजान्विन्द्र ते हरी।
ऋक् १।८२।३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्णगभस्तिः सूर्यः। तत्र वेदः—

इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीडते सुपाणिम्।
चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः।।

ऋक् ७।४५।४।।

अत्रैव सूक्ते प्रथमे मन्त्रे—

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः।
हस्ते दधानो नर्या पुरूणि निवेशयञ्च प्रसुवञ्च भूम।।

ऋक् ७।४५।१।।

अन्तरिक्षप्राः सूर्यः। स एव पूर्णगभस्तिः।

भवति चात्रास्माकम्—

पूर्णो ह विष्णुः स हि वास्ति सूर्यः
स पूर्णबन्धुः सविता सुरत्नः।
स पूरयत्येव जगत्स्वभाभिः
पूर्णं पदं तस्य बृहद् वदन्ति।।६८२।।

पूरयिता—६८६

"पूरी आप्यायने" इति चौरादिको धातुस्ततो णिच्, णिजन्ताच्च 'तृन्' प्रत्ययः कर्तरि, इट्, ***"णेरनिटि"*** (पा० ६।४।५१) सूत्रेण इडादावार्धधातुके णेर्लोपाभावे, गुणायादेशे, पूरयितृशब्दस्य प्रातिपदिकसंज्ञा, ततः सावनङ् दीर्घादि, पूरयिता। भगवता पूरयित्रा पूर्णत्वात् सर्वमिदं विश्वं पूर्णमस्मीत्यनुभवति। पूरयिता, अन्तरिक्षप्रा इति समानार्थे नाम्नी। अन्तरिक्षं प्राति=पूरयतीति, पूर्णत्वेन वाऽप्रमादं चरतीति=अन्तरिक्षप्राः पूरयिता विष्णुः।

मन्त्रलिङ्गञ्च—

आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः।

ऋक् ७।४५।१।।

अश्वःकालः—

कालोऽश्वो वहति सप्तरश्मिः। अथर्व १९।५३।१।।

तस्माद्वै नान्यत् परमस्ति तेजः। अथर्व १९।५३।४।।

पूर्णः कुम्भोऽधि काल आहितः। १९।५३।३।।

सर्वकं चैतत् सूक्तं पठनार्हम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

मन्ये पूरयिता विष्णुर्जगत्[1] पूर्णं च मन्यते।
पूर्णस्य पूर्णमादाय पूर्णं सर्वञ्च दृश्यते।।६८३।।

पुण्यः—६८७

'पूञ् पवन' इति धातुस्ततः ***"पूञे यण्णुग्घ्रस्वश्च"*** (५।१५) इत्युणादिना पूञो यत् प्रत्ययो, णुगागमः, उपधाया ह्रस्वत्वंच; ह्रस्वविधानसामर्थ्याद् गुणाभावः।

पूङ् पवन इति भौवादिको धातुर्वा, पवत इति पूयते वाऽनेनेति पुण्यः पवित्रः पापानाविद्धः शुभो वा विष्णुः सूर्यो वा।

मन्त्रलिङ्गञ्च—

विश्वतो नः शकुने पुण्यमा वद। ऋक् २।४३।२।।

पुण्यं=पवित्रम्।

पवित्रपते पवित्रपूतस्य यत्कामः। यजुः ४।४।।

तपोष्पवित्रं विततं दिवस्पदे शोचन्तो अस्य तन्तवो व्यस्थिरन्।
अवन्त्यस्य पवितारमाशवो दिवस्पृष्ठमधि तिष्ठन्ति चेतसा ।।

ऋक् ६।८३।२।।

एवं यत्र तत्र निगमे संयोजनीयं सुधीभिः।

भवति चात्रास्माकम्—

पुण्यः स विष्णुः स हि वाऽस्तु सूर्यः
पुण्यः पवित्रं स पुनाति विश्वम्।
तपः पवित्रं तपसा च पूर्णं
विश्वं समस्तं प्रविभाति तस्मात्।।६८४।।

पुण्यकीर्तिः—६८८

पुण्यशब्दः कीर्तिशब्दश्च कृतव्युत्पादनौ।

पुण्यशब्दात् स्त्रियां टापि पुण्या, पुण्या चासौ कीर्तिः पुण्या कीर्तिर्यस्येति

१. जगदिति प्रथमैकवचनम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वा बहुव्रीहिः। पूर्वत्र ***"पुंवत्कर्मधारय०"*** इत्यादिना (पा० ६।३।४२) अपरत्र ***"स्त्रियाः पुंवद्भाषित०"*** (पा० ६।३।३४) इत्यादिना पुंवद्भावः। कीर्तिः पवित्रं यशोगानं भगवतो महतां वा सताम्। पवित्रं संशब्दनमिति वा। सूर्यस्य नामोच्चारणं च पवित्रं, सर्वं भगवतः सूर्यस्य गुणसङ्कीर्तनम्, इह मन्त्रलिङ्गम्—

तद्विप्रासो विपन्यवो जागृवांसः समिन्धते।
विष्णोर्यत् परमं पदम्। यजुः ३४।४४।।

भवति चात्रास्माकम्—

[1]पुण्यकीर्तिः स एवास्ति विष्णुः सूर्यः सनातनः।
तं विप्रासः समिन्धते लब्धुं विष्णोश्च [2]सत् पदम्।।६८५।।

अनामयः—६८६

"मीञ् हिंसायाम्" इति क्रैयादिको धातुस्तस्माच्च पचाद्यच् प्रत्ययः कर्तरि ***"मीनातिमिनोति"*** (पा० ६।१।५०) इति सूत्रेण प्राप्तमात्त्वं अत्रत्येनैव ***"निमिमीलियां खलचोः प्रतिषेधः"*** इति वार्तिकेन निषिध्यते, ततो गुणायादेशौ आमयः, नञा समासेऽनामयः, सर्वविधदुःखविनिर्मुक्तोऽशेषसुखरूपो विष्णुः। सर्वाणि दुःखानि रोगांश्च निहन्तीति विष्णोः सूर्यस्य वा नामानामयः। **आरोग्यं भास्करादिच्छेदिति** चागमः।

अत्र मन्त्रलिङ्गम्—

हृद्रोगं च मम सूर्य हरिमाणं च नाशय। ऋक् १।५०।११।।

भवति चात्रास्माकम्—

अनामयो विष्णुरुतापि सूर्यः
सदाऽव्रणो विश्वमसौ पिपर्ति।
योऽनामयं ध्यायति मुच्यतेऽसौ
मनोविकारादथवान्यरोगात् ।।६८६।।

❖ ❖ ❖

१. पुण्यकीर्तिशब्देन नामजपमाहात्म्यमधिगतं भवति; २. सत्पदम्=सत् स्वरूपं पदं=ज्ञानमिति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः।।८७।।

६६० मनोजवः, ६६१ तीर्थकरः, ६६२ वसुरेताः, ६६३ वसुप्रदः।
६६४ वसुप्रदः, ६६५ वासुदेवः, ६६६ वसुः, ६६७ वसुमनाः, ६६८ हविः।।

मनोजवः—६६०

"मन ज्ञाने" धातोरुणाद्यसुन्प्रत्ययान्तो मनः शब्दः। "जु" सौत्रधातोर्भावे ***"ऋदोरप्"*** (पा० ३।३।५७) सूत्रेण 'अप्' प्रत्ययो गुणावादेशौ, जव इति।

मनः=ज्ञानरूपं जवो गतिः वेगो वा यस्येति मनोजवः। यथा ज्ञानेन सर्वं प्राप्यते, तथैव विष्णोर्ज्ञानं सर्वं गतिमत्-वेगवच्च करोति।

यथा पक्षिणां जवो मनोऽनुगतो भवति तथा मानवानां जवो ज्ञानानुगतो भवति। तथैव सूर्यादीनां ग्रहाणां जवो गतिरपि, विष्णुविहितज्ञानपूर्विकैवास्ति इति निश्चयतो ज्ञेयम्।

मन्त्रलिङ्गम्—

मनोजवसा वृषणा स्वस्ति। ऋक् १।११७।१५।।

मनोजवेभिरिषिरैः शयध्यै। ऋक् ६।६२।३।।

भवतश्चात्रास्माकम्—

ज्ञानं मनस्तत्र जवो हि यस्य
मनोजवः स कविभिः प्रगीतः ।
ज्ञानेऽस्ति विष्णोरखिलं [1]समाप्तं
जवो न तस्मात् परमस्ति किञ्चित्।।६८७।।

तथा च—

सुनिश्चितं पूर्वत एव विश्वं
[2]मनोजवेनैति सदा प्रणुन्नम् ।
स [3]विष्णुरेको भुवनस्य नाभि-
र्दिवि[4] क्षयो धावति [5]पूर्णबन्धुः ।।६८८।।

---

१. समाप्तं=सम्यगाप्तम्; २. मनोजवेन=परमेश्वरेण (अक्षरेण); ३. विष्णुः=सूर्यः। भुवनस्य नाभिः=नद्धा ४. दिविक्षयः=द्युलोकनिवसनः; ५. पूरयन्=आप्यायन् बध्नातीति=पूर्णबन्धुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तीर्थकरः—६६१

"तॄ प्लवनसन्तरणयोः" इति भौवादिको धातुस्ततः ***"पातृतुदिवचिरिचिसिचिभ्यस्थक्"*** इत्यादिसूत्रेण थक् प्रत्ययः, कित्त्वात् ***"श्र्युकः किति"।*** (पा० ७।२।११) सूत्रेणेण्निषेधो गुणाभावश्च, ***"ऋत इद्धातोः"*** (पा० ७।१।१००) सूत्रेण रपरमित्त्वम्, ***"हलि च"*** (पा० ८।२।७७) इति दीर्घः। ***"अचो रहाभ्यां द्वे"*** (पा० ८।४।४६) सूत्रेण थकारस्य वैकल्पिको द्विर्भावः, ***"झरो झरि सवर्णे"*** (पा० ८।४।६५) सूत्रेण पाक्षिकः प्रथमथकारस्य लोपः, तीर्थ इति। तदभावे ***"खरि च"*** (पा० ८।४।५५) सूत्रेण थस्य चर्त्वं तकारः, तीर्त्थ इति।

करोतेः ***"कृञो हेतुताच्छील्यानुलोम्येषु"*** (पा० ३।२।२०) इति 'टः' प्रत्ययो गुणो रपरः, तत ***"उपपदमतिङ्"*** (पा० २।२।१९) इत्युपपदसमासः।

मन्त्रलिङ्गञ्च—

ता मन्दसाना मनुष्यो दुरोण आ धत्तं रयिं सर्ववीरं वचस्यवे।
कृतं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिं हतम्।।

ऋक् १०।४०।१३।।

बहुत्र वेदे तीर्थशब्दो विविधविभक्तिवचनान्तो दृश्यते।

भवति चात्रास्माकम्—

मन्ये तीर्थकरो विष्णुः सूर्यः सर्वे च खेचराः।
तरन्ति विष्णौ सम्बद्धा विष्णुस्तीर्थकरो मतः।।६८६।।

वसुरेताः—६६२

वसुः—"वस निवासे" इति भौवादिको धातुस्ततः ***"शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च"*** (१।१०) इत्युणादिसूत्रेण "उः" प्रत्ययो वसत्यस्मिन् सर्वमिति वसुः। रेतः—"रीङ् स्रवणे" धातोः ***"स्रुरीभ्यां तुट् च"*** (४।२०२) इत्युणादिसूत्रेण 'असुन्' प्रत्ययस्तुडागमश्च टित्त्वादाद्यवयवः, गुणः, रेतः। वसु चादो रेतः, यद्वा वसु रेतो यस्य सः वसुरेताः। सर्वनिवासहेतुः, सर्वोत्पत्तिहेतुश्चेत्यर्थः। असन्तलक्षणो दीर्घः। यदन्तःप्राणि, सर्वप्राण्युत्पत्तिहेतुभूतं बीजं शुक्रशोणितादि, तस्य व्यवस्थापको भगवान् विष्णुरेव यथाप्राणियोग्यम्। दृश्यते च लोकेऽपि सर्वत्र द्विर्भावमुपेतं जगदिद**मग्नीषोमीय**मिति, स वसुरेता इत्याख्यायते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

आर्दी केचित् पश्यमानास आप्यं वसुरुचो दिव्या अभ्यनूषत।
वारं न देवा सविता व्युर्णुते।। ऋक् ६ ।११० ।६ ।।

एतन्मन्त्रस्थो वसुरुचो वसुरेतसः समानार्थकः।

अध यदिमे पवमान रोदसी इमा च विश्वा भुवनानि मज्मना।
यूथे न निःष्ठा वृषभो वितिष्ठसे।। ऋक् ६ ।११० ।६ ।।

रेतोधाः शब्दोऽप्येतदर्थक एव। तत्र मन्त्रलिङ्गम्—

त्रिपाजस्यो वृषभो विश्वरूप उत त्र्युधा पुरुध प्रजावान् ।
त्र्यनीकः पत्यते महिनावान्त्स रेतोधा वृषभः शश्वतीनाम्।।
ऋक् ३ ।५६ ।३ ।।

स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च ।
तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः।।
ऋक् ७ ।१०१ ।६ ।।

कामस्तदग्रे समवर्तताधि मनसो रेतः प्रथमं यदासीत्।
सतो बन्धुमसति निरविन्दन् हृदि प्रतीष्या कवयो मनीषा।।
तिरश्चीनो विततो रश्मिरेषामधः स्विदासी३दुपरि स्विदासी३त्।
रेतोधा आसन् महिमान आसन् स्वधा अवस्तात् प्रयतिः परस्तात्।।
ऋक् १० ।१२६ ।४,५। ।इति निदर्शनम्

महाभारतेऽपि—

देवः पूर्वमपः सृष्ट्वा तासु वीर्यमपासृजत्।
तदण्डमभवद्धैमं ब्रह्मणः कारणं परम् ।।

भवति चात्रास्माकम्—

वसुरेताः स एवास्ति विष्णुः सूर्यः सखा कविः।
यस्मिन्नात्मा समस्तस्य रेतोधो वृषभश्च सः ।।६६०।।

उक्तञ्च ***"सूर्य आत्मा जगतस्तस्थुषश्च"*** (यजुः ७ ।४२)।

वसुप्रदः—६६३

वसत्यस्मिन्निति वसुर्वासस्तं प्रददातीति वसुप्रदः। वसुरूपकर्मोपपदात् प्रोपसृष्टाद् "डुदाञ् दाने" धातोः ***"प्रे दाज्ञः"*** (पा० ३ ।२ ।६) सूत्रेण कः प्रत्यय-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तस्मिंश्चाल्लोपः वसुप्रद इति।

मन्त्रलिङ्गञ्च–

स बोधि सूरिर्मघवा वसुपते वसुदावन्।
युयोध्यस्मद् द्वेषांसि।। ऋक् २।६।४।।
विधेम ते परमे जन्मन्नग्ने विधेम स्तोमैरवरे सधस्थे।
यस्माद् योनेरुदारिथा यजे तं प्र त्वे हवींषि जुहुरे समिद्धे।।
ऋक् २।६।३।।

सधस्थं=स्थानम्। तत्र मन्त्रलिङ्गम्–

उद्बुध्यस्वाग्ने प्रति जागृहि त्वमिष्टा पूर्तेस ँ सृजेथामयञ्च ।
अस्मिन् सधस्थेऽध्युत्तरस्मिन् विश्वे देवा यजमानश्च सीदत।।
यजुः १५।५४।।

भवति चात्रास्माकम्–

स्थानं ह्यशेषाय ददाति शम्भुः
स्थानाधिपः स्थानपतिश्च सोऽस्ति।
वसुप्रदो वासपतिश्च किं वा
[1]वस्यः स्वयं विष्णुरनन्तकर्मा।।६६१।।

उक्तञ्च–

त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता।
ऋक् २।६।२।।

वसुप्रदः–६६४

वसुशब्दः प्रदशब्दश्च विहितसाधनौ।

वसु धनं तत्प्रददातीति वसुप्रदः। मन्त्रलिङ्गम्–

स नो वसून्या भर।" ऋक् १०।१६१।१।।
तमित् सखित्व ईमहे तं राये तं सुवीर्ये।
स शक्र उत नः शकदिन्द्रो वसु दयमानः।। ऋक् १।१०।६।।
यो विश्वा दयते वसु होता मन्द्रो जनानाम्।
मधोर्न पात्रा प्रथमान्यस्मै प्र स्तोमा यन्त्यग्नये।। ऋक् ८।१०३।६।।

---

१. वस्तुमर्हः=वस्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दयते ददाति, तच्छीलो दयालुः। "दय दान—गति—रक्षण—हिंसा—आदानेषु" इति भौवादिको धातुस्ततः ***"स्पृहिगृहिपतिदयि"*** (पा० ३।२।१५०) इत्यादितः सूत्रेण 'आलुच्' प्रत्ययः।

भवति चात्रास्माकम्—

विष्णुर्दयालुर्दयते वसूनि
वसुप्रदश्चापि स एव गीतः ।
सखित्वमिच्छन्ति बुधश्च तस्य
स नो वसून्याभरते च यस्मात् ।।६६२।।

वासुदेवः—६६५

वासुः—"वस निवासे" इति भौवादिको धातुस्ततः ***"कृवापाजिमिस्वदिसाध्यशूभ्य उण्"*** (१।१) इत्युणादिसूत्रेण बाहुलकाद् "उण् प्रत्ययः।" यः सर्वत्र वसति सर्वं वा यस्मिन् वसतीति वासुः।

देवः—दीव्यतेः पचाद्यच् प्रत्ययः। पचादिगणपाठादिगुपधलक्षणः 'कः' न भवति, दीव्यतीति देवः। वसति, वासयति, वा, गच्छति, गमयति वेति, वासुश्चासौ देवः वासुदेवः। उक्तञ्च क्वचित्—

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते।।

भवति चात्रास्माकम्—

यस्मिन्निदं वासमुपैति विश्वं
विश्वे च यो वासमुपैत्यशेषे ।
चरिष्णुरर्को दिवि यात्यनन्ते
स वासुदेवः कथितोऽत्र विष्णुः।।६६३।।

मन्त्रलिङ्गञ्च—

ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। यजुः ४०।१।।

वस्तुमर्हो वस्यः=सूर्यः

मन्त्रलिङ्गम्—

त्वं दूतस्त्वमु नः परस्पास्त्वं वस्य आ वृषभ प्रणेता।

ऋक् २।६।२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय। यजुः ६।१।।

यच्चोक्तं 'दिवि यात्यनन्तेः' इति तत्र—

अनन्ते अन्तः परिवीत आगात् शुचिः शुक्रो अर्यो रोरुचानः।

ऋक् ४।१।७।।

वसुः—६६६

वसुशब्दो "वस निवासे" इति भौवादिकाद् "वस आच्छादने" इति आदादिकाद्वा धातोर्लब्धस्वरूपः। वसतेर्वस्तेर्वा ***"शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिवधिमनिभ्यश्च"*** (१।१०) इत्युणादिः "उः" प्रत्ययः। वसति सर्वत्र सर्वं वा वस्त आच्छादयतीति वसुः।

मन्त्रलिङ्गम्—

यः शुक्र इव सूर्यो हिरण्यमिव रोचते।

श्रेष्ठो देवानां वसुः। ऋक् १।४३।५।।

वसुः शब्दो बहुत्र वेद उपलभ्यते।

भवति चात्रास्माकम्—

वसुर्हि विष्णुः स हि वास्तु सूर्य-
स्त्रिविक्रमे वासमुपैति विश्वम्।
वसुर्हि वासं [1]दयते समस्मै स्तुवन्ति
गायन्ति वसुं वरेण्यम् ।।६६४।।

वसुमनाः—६६७

वसतीति वसु आत्मरूपं, सृष्टदृश्यरूपं वा (आत्मविषयकं दृश्यविषयकं वेत्यर्थः) मनो=ज्ञानं यस्य स वसुमनाः। मन्यतेरौणादिकः 'असुन्" प्रत्ययः, मनः।

मन्त्रलिङ्गञ्च—

द्यावो न यस्य पनयन्त्यभ्वं भासांसि वस्ते सूर्यो न शुक्रः।

वि य इनोत्यजरः पावकोऽश्नस्य चिच्छिश्नथत् पूर्व्याणि ।।

ऋक् ६।४।३।।

१. दयते=ददाति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वस्ते=आच्छादयतीत्यर्थः।

त्वं हि क्षैतवद् यशो अग्ने मित्रो न पत्यसे।
त्वं विचर्षणे श्रवो वसो पुष्टिं न पुष्यसि ।। ऋक् ६।२।१।।
यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरम् ।
तावाँ अयं पातवे सोमो अस्त्वर मिन्द्राग्नी मनसे युवभ्याम्।।

ऋक् १।१०८।२।।

भवति चात्रास्माकम्—

नूनं वसुमना विष्णुः सूर्यः सत्यस्त्रिविक्रमः।
सर्वं विश्वं समावास्य मनुते कर्मतत्कृतम् ।।६६५।।

हविः—६६८

'हु दानादानयोः' इति जौहोत्यादिको धातुस्ततः *"अर्चिशुचिहुसृपि"* (२।१०८) इत्यादिना इसिः प्रत्यय औणादिकः। हूयत इति जुहोतीति वा हविः।

मन्त्रलिङ्गञ्च—

यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरंकृतः ।।
यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत ।
स नो देवेष्वा यमद् दीर्घमायुः प्र जीवसे।। ऋक् १०।१४।१४, १५।।

जुहोतीति कर्तरि—

वयं तद्वः सम्राज आ वृणीमहे पुत्रो न बहुपाय्यम् ।
अश्याम तदादित्या जुह्वतो हविर्येन वस्योऽनशामहै।।

ऋक् ८।२७।२२।।

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत्। ऋक् १।१।१५।।

भवति चात्रास्माकम्—

हविर्हि विष्णुः स जुहोति नित्यं
क्रियाविधौ विश्वमिदं [1]प्रगच्छन्।
स एव होता स हि वास्तु हुत्यो
बिभर्त्ति रूपाणि यतः स एकः।।६६६।।

१. प्रगच्छन्=प्रकर्षेण गच्छन्=अव्याहतगतिरित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ।।८८।।

६९९ सद्गतिः, ७०० सत्कृतिः, ७०१ सत्ता, ७०२ सद्भूतिः, ७०३ सत्परायणः। ७०४ शूरसेनः, ७०५ यदुश्रेष्ठः, ७०६ सन्निवासः, ७०७ सुयामुनः।।

सद्गतिः—६९९

सदिति, अस्तेः शतरि व्युत्पादितः।

गच्छतेः स्त्रीविशिष्टभावे क्तिनि गतिः। अस्ति सती गतिर्यस्य स सद्गतिः।

भवति चात्रास्माकम्—

सदास्ति खे तद्गतिमद् यदस्ति
सूर्यादयश्चापि सता[1] भ्रमन्ति।
प्रवाहनित्यञ्च जगद् भ्रमत् सत्
स विष्णुरेको भ्रमयत्यशेषम्।।६६७।।

सत्कृतिः—७००

असेः स्त्रियां शत्रन्तान्ङीपि सती, कृञः स्त्रियां भावे क्तिनि कृतिः। सती=विद्यमाना कारणनिमित्ता क्रिया यस्य स सत्कृतिः।

यथा लोके स्थावरजङ्गमजातीनां भेदे बीजं निमित्तमस्ति, तथा जीवानां विलक्षणभावमापन्नानां सुखदुःखनिमित्ता कर्मानुरूपा क्रिया=कृतिरस्यास्तीति स सत्कृतिरित्युच्यते।

जगद्बीजभूतायाः सर्वत्र आद्यक्रियायाः कर्तृत्वाच्चापि स सत्कृतिर्भगवान् विष्णुः।

मन्त्रलिङ्गञ्च—

सदसस्पतिमद्भुतम्। इत्यादि

यजुः ३२।१३।।

सत् कारणरूपं ब्रह्म, असत् कार्यरूपञ्च ब्रह्म, तदुभयविधस्य पतिः।

---

१. सता=सद्धेतुका इति, हेतौ तृतीया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स सत्कृतिर्विष्णुरनन्तकर्मा
करोति तद् यस्य निमित्तमस्ति।
करोति बीजात् स फलं फलाच्च
बीजं पुनर्विश्वमिदञ्च तद्वत्।।६६८।।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपबृंहितसत्यभाष्ये
सप्तमं नामशतकं
सम्पूर्णम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्ता—७०१

भवत्यर्थे वर्तमानादसेः शतरि सत्, ततः *''तस्य भावस्त्वतलौ''* (पा० ५।१।११६) इति सूत्रेण तलि *''तलन्तं स्त्रियाम्''* (लिङ्गानुशासन १।१७) इति वैयाकरणसमयानुसारतष्टापि सत्ता, सा चात्मधारणलक्षणा ***''सत्ता[1] ह्यात्मधारणम्''*** इत्यभिज्ञवचनात्। सा च यद्यपि भगवतोऽतिरिक्ता सा सर्वत्र व्यभिचारिणी=प्रतिक्षणं परिवर्तनशीला, उत्पत्तिविनाशशीला वा, भगवतश्च शाश्वती नित्यैकरूपाऽतो भगवान् विष्णुरक्षुण्णामेकरसां सत्तामधितिष्ठन् सत्स्वरूपः सत्तानाम्नाऽभिधीयते सत्तातत्त्वकोविदैः। कारणरूपायाः प्रकृतेः कार्यरूपं विविधं जगत् सत्तावदपि न सत्तासञ्ज्ञं तत्सत्ताया विपरिणामित्वात्। यथा च लोके सूर्योऽयनांशं प्राप्नुवानो व्यभिचरति स्वामेकरसात्मिकां सत्ताम्, अस्तित्वञ्च महाप्रलये। तस्माद् व्यभिचारिसत्त्वशून्यो भगवान् विष्णुः स्वसत्तया व्याप्य सर्वं सत्तावद् विदधत् स्वयं सत्तेति नाम बिभर्ति। अमुथैव लोकं दृष्ट्वा विविधमूह्यम्, दिङ्मात्रप्रदर्शनमेतत्।

भवति चात्रास्माकम्—

चराचरं विश्वमिदं समस्तं
बिभर्ति नूनं निजसत्स्वरूपे ।
षड्भाववैकारिकविश्वमेतत्
परं न सत्ता प्रजहाति सत्ताम्।।६६६।।

सद्भूतिः—७०२

अस्तेर्भवत्यर्थे वर्तमानादादादिकाद् वर्तमानकाले शतृप्रत्यये सदिति साधितचरम्। अस्तिमत् सत्। सत्तार्थकभवतेः स्त्रियां भावे क्तिनि कित्त्वाद् गुणाभावे *''तितुत्रतथसिसुसरकसेषु च''* (पा० ७।२।९) सूत्रेणेण्निषेधे च भूतिरिति सिध्यति। सूत्रे चास्मिन् निरनुबन्धकेन तिग्रहणेन क्तिन्क्तिचोरुभयोर्ग्रहणं भवति। यद्वा *''श्र्युकः किति''* (पा० ७।२।११) सूत्रेणेण्निषेधः। एवञ्च सती=शाश्वती,

---

१. सत्ता=विष्णुः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतिः=भवनं=विविधभावेन परिणमनं यस्य स सद्भूतिः। अथवा सतः सत्तास्वरूपस्य विविधभावेन परिणामः सद्भूतिः। तथा च लोकेऽपि पश्यामः—कार्यभावेन परिणतमपि कारणं स्वकारणतां न जहाति, बीजं हि वृक्षपत्रफलादिरूपेण परिणतमपि स्वकारणबीजवद् भवति। तथा चोच्यते **'फलकोषो हि बीजाय।'** एतेन ज्ञायते, यन्नहि कारणं कालेन विहन्तुं शक्यते। सर्वत्र चैष कारणतालक्षणो गुणो विश्वं व्यश्नुवानो व्याचष्टे सद्भूतिसंज्ञं विष्णुम्। निमित्तकारणञ्च ब्रह्म जगतः, तथा हि दृश्यते लोके कृषीवलः क्षेत्रं बीजाकरोति, तत्र कृषीवलो बीजावापे निमित्तं भवति, न तूपादानं स्वयं बीजभावमापद्यते। तथैवेदं ब्रह्म जडचेतनरूपस्यास्य विश्वस्य निमित्तं कारणं न तूपादानकारणं, बीजानां वप्तेव। उपादानकारणन्तु सत्पदवाच्या प्रकृतिरेव। लोकेऽपि च दृश्यते भूमावुत्पद्यमानं फलं, भूमावेव पुनस्तथाविधं किञ्चिदुपादानं प्राप्यं कारणरूपेण परिणमते, नान्यथा। तद्यथा—शालयो जलं प्राधान्येनापेक्षमाणाः गोधूमाश्च भूमिं प्राधान्येनापेक्षमाणा जलमनुलवमाश्रयन्ते। किन्तु यवा रूक्षा लघवश्च भवन्ति, तस्मान्न तेऽनुलवं जलमवश्यम्भावत्वेनापेक्षन्ते। तस्मात् सत्, निमित्तं, आदिकारणं वा ब्रह्म। सत्=प्रकृतिः किमपि चेतनमपेक्षते स्वप्रवृत्तौ, बीजमिव कृषीवलम्।

भवतश्चात्रास्माकम्—

सत् सर्वकार्येषु विभाति नैर्जी
सत्तां पुनस्तन्न जहाति नूनम् ।
सत्ता हि सद्भूतिपदेन बोध्या
सद्भूतिरन्वेति च कार्यमात्रम् ।।१०००।।

कृषीवलः सस्यसुखानुलिप्सु-
र्निमित्तमात्रं त्विह बीजवापे ।
तथैव विष्णुस्तु निमित्तमात्रं
स सत्प्रकृत्या कुरुते च विश्वम्।।१००१।।

यथा हि बीजं स्ववापे चेतनशक्तिमपेक्षते, तथैव महज्जगन्महत्संज्ञं सच्चित्स्वरूपमपेक्षते। निर्लिप्तत्वाच्च स आनन्दमयः।

सत्परायणः—७०३

सत्—शब्दो व्युत्पादितः। परः पृणातेः पचाद्यचि, पृणातीति परः। एतेर् अयतेर्वाऽधिकरणे ल्युटि, अयनम्।परशब्देन सह सांहितिको दीर्घः परायणः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवञ्च सद्‌रूपायाः प्रकृतेः परः श्रेष्ठो गमनाधारः। अथवा—सत्प्रकृतिविकाराणां पालनपोषणकर्तॄणां पञ्चमहाभूतानाम् अशेषयोनिभेदप्रत्यायकानां, कारणानां, यस्मिन् निमित्तकारणात्मके ब्रह्मणि=अयनं=गमनं मातुरङ्कवत्, सत्परायणं ब्रह्म, सत्परायणो विष्णुः सविता वा।

लोकेऽपि च पश्यामः—कृषीवलस्य सर्वाणि बीजवापनिमित्तानि, साधनानि निमित्तकारणं कृषीवलमेवाश्रित्य सार्थकानि भवन्ति, सम्यग् व्यवस्थितानि च तमेव निमित्तकारणं कृषीवलं प्रत्याययन्ति। तथैवायं सत्परायणो विष्णुः स्वयमविनाशी जगतः कर्ता, कर्त्रा च यथापेक्षकार्यकरणाय सम्यग्व्यवस्थितानि साधनानि स्वयं शोभमानानि स्वप्रयोक्तारं प्रत्याययन्ति। इयमेवावस्था चराचररूपे विश्वे प्रतिपदं दृश्यते—एनं चराचरं विश्वं व्यवस्थापयितुं, निमित्तकारणात्मकः कृषीवल इव विष्णुर्मनुष्यबुद्धेर्विषयबहिर्भूतानां प्रवाहनित्यानामसंख्यातानां परम आश्रय इति सत्परायण उक्तो भवति, प्रत्याय्यते च प्रतिपदमेभिः साधनैः।

मन्त्रलिङ्गञ्च—

अन्ति सन्तं न पश्यति अन्ति सन्तं न जहाति।
पश्य देवस्य काव्यं न ममार न जीर्यति।।
अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम् ।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।। अथर्व० १०।८।३२, ३३।।
यः प्राणतो निमिषतो महित्वैक इद्राजा जगतो बभूव।
य ईशे अस्य द्विपदश्चतुष्पदः कस्मै देवाय हविषा विधेम।।
यजुः २३।३; ऋक् १०।१२१।३।। इत्यादि।

भवतश्चात्रास्माकम्—

यदस्ति सत्तत् क्रमते च सन्तं
स सच्चिदानन्दमयोऽस्ति सृप्तः ।
लोकेऽपि विद्वांसमुपेत्य दक्षं
सम्भान्ति सर्वाणि च साधनानि ।।१००२।।

महाबुद्धिर्महावीर्यो विष्णुरेको हि केवलः ।
[१]तपसोऽभीद्धयोगेन [२]व्यज्यानक्ति च सत्पदम्।।१००३।।
ऋक् १।१६०।१।।

१. अत्र मन्त्रलिङ्गम्—"ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत।" २. व्यज्य—अज्य=सर्वं कार्यगणं कारणगणञ्च पृथक्—पृथक् प्रकाश्य, स्वकं विनाशरहितं स्वरूपं प्रत्याययति, प्रत्यक्षमिव प्रकटयति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शूरसेनः—७०४

शूरा—''शु'' इति सौत्रो धातुर्गत्यर्थस्तस्मात् ***''शुसिचिमीनां दीर्घश्च''*** (२।२५) इत्युणादिसूत्रेण रक् प्रत्ययस्तत् सन्नियोगेन धातूकारस्य दीर्घश्च, ***''तितुत्र''*** (पा० ७।२।९) इतीण्निषेधः, कित्त्वाद् गुणाभावश्च, स्त्रियां टाप्।

शूरयतेर्वा पचाद्यच्, णेर्लोपः, स्त्रियां टाप्। बहुव्रीहौ ***''स्त्रियाः पुंवद्भाषित-पुंस्कादनूङ्''*** (पा० ६।३।३२) इत्यादिना पूर्वपदस्य पुंवद्भावः।

सेना—'षिञ् बन्धने'' इति सौवादिको धातुः ***''धात्वादेः षःसः''*** (पा० ६।१।६२) सूत्रेण मूर्द्धन्यस्य षस्य सकारः। ***''कृवृजॄसिद्रुपन्यनिस्वपिभ्यो नित्''*** (३।१०) इत्युणादिसूत्रेण 'नः' प्रत्ययस्तस्य निद्वद्भावश्च ***''नेड् वशि कृति''*** (पा० ७।२।८) सूत्रेणेण्निषेधः, ***''सार्वधातुकार्धधातुकयोः''*** (पा० ७।३।८४) इति गुणः, स्त्रियां टाप्।

चमूशब्दपर्यायवाचकं सेनाशब्दमधिकृत्येदमुच्यते—यावन्तो हि हिंस्रस्वभावा जन्तवः भगवता निर्मितास्ते सर्वे भगवद्व्यवस्थया बद्धा न तदाज्ञां विना कमपि हन्तुमीशते। एतेन प्रतिपदं दृश्यमानेन नियमेन तस्य शूरसेनस्य सर्वव्यापिका शूरसेनता दृग्गोचरमायाति। यद्वा, शूरान्=गतिमतोऽसौ सिनाति=बध्नातीति शूरसेनः। तथा हि दृश्यते लोके—आपादनखशिखं बद्धेयं प्राणिजातिः सवेगं धावति, यथाभिमतमाचरति च। न हि कश्चिदपि जीवः सवेगं निःशङ्कञ्च धावन् मम धावतः कश्चिदवयवः पतिष्यतीति मनसापि चिन्तयति। ईदृश्येव व्यवस्था सर्वत्र दृश्यते—

एतस्य मूलञ्च भगवान् सूर्य एव। यदुक्तम्—**''सूर्य आत्मा जगतस्तस्थुषश्चेति''** (ऋक् १।११५।१) ततः शक्यते वक्तुं यद् येन भगवता स्वव्यवस्थया बद्धः सूर्यः सर्वदा दिवि चरति, स भगवान् महामहिमशाली विष्णुरेव शूरसेन इति। एवमेव सकलं चराचरदृश्यमदृश्यं चिन्त्यमचिन्त्यञ्च जगत्तस्य विष्णोः शूरसेनत्वलक्षणं गुणं प्रकाशयन्, शूरसेनाभिधानं लभते।

पूर्वैरर्वाक्तनैश्चर्षिभिः सर्वत्र यन्त्रेषु प्रयुक्तोऽग्निः बन्धनबद्धं यन्त्रं गमयित्वा मनुष्योपकारं कुरुते। तदेतत्सर्वं तस्य भगवतश्शूरसेनस्यानुकरणमात्रम्। एवं प्रतिपदं कल्पनीयम्।

यथा शिल्पी यन्त्रेषु स्वबुद्धेर्वैभवं प्रतिपदं व्यनक्ति, तथैवायं महाबुद्धिः स्वतः प्रकाशः स्वयं प्रमाता, यथायोग्यविभागभक्तं यथायोग्यबन्धनैर्बद्धञ्च शरीरं विधाय, केवलं स्वतन्त्रमबद्धमिव बोधयन् निजमव्यक्तं स्वरूपं प्रत्याययति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्चात्र—

अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्।

होतारं रत्नधातमम्।

अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।

स देवाँ एह वक्ष्यति।।

अग्निना रयिमश्नवत् पोषमेव दिवे दिवे।

यशसं वीरवत्तमम्। ऋक् १।१।१, २, ३।।

अग्निशब्देन लौकिकोऽग्निरीश्वरश्चोभावपि गृह्येते। तस्मादुभयथापि शूरसेन इति नाम व्याख्यातम्। उदाहरणानां वैविध्यं लोकं दृष्ट्वा स्वयमुन्नेयं भवति। तद्यथा—नेत्रं गतिमत्, नृत्यदिव च पश्यति, परन्तु न पतति बद्धत्वात्, शूर इव कुरुते च गतिम्, साधयति च यथेष्टम्।

इतरोऽपि योद्धृपर्यायः शूर एतस्मादेव। सोऽपि स्वाम्यभिमतं चिकीर्षुर्गतिं कुरुते। इतरा पृतनाऽपरनामिका सेनाप्येतस्मादेव, सा हि नियमबद्धा गच्छति राजाभिमतञ्च कुरुते। गौणनाम्ना राजापि शूरसेन उक्तो भवति, परन्तु परमार्थतः सूर्यः शूरसेनः, तद्व्यवस्थापकश्च भगवान् सर्वं ब्रिभ्राणो विष्णुः शूरसेन इति निष्प्रपञ्चम्।

भवति चात्रास्माकम्—

स शूरसेनो भगवान् मनस्वी
बध्वापि विश्वं कुरुते स्वतन्त्रम् ।
तं ज्ञाननेत्राः प्रपदं समीक्ष्य
स्तुवन्ति विष्णुं क्षपयन्ति पापम् ।।१००४।।

ये शूरसेनस्य यथातिसूक्ष्मं
ज्ञानं जगत्याञ्च प्रतिष्ठमानम् ।
पश्यन्ति ते वह्निमुपास्य यन्त्रे
कुर्वन्ति यन्त्रं गतिमत् सुबद्धम्[1] ।।१००५।।

इति दिङ्मात्रमुदाहृतम्।

१. दध धारणे, विपूर्वः करोत्यर्थे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यदुश्रेष्ठः—७०५

यदुः—''यती प्रयत्ने'' इति भौवादिको धातुस्ततः ***''अणश्च''*** (१।८) इति उणादिसूत्रपठितचकाराद् वा 'उः' प्रत्ययः। तथा च कटति रसनां कटुः रसः, वटतीति वटुर्विभाजको द्विजसुतो वा, यतेः यतुः प्रयत्नशीलः ***''पृषोदरादीनि यथोपदिष्टम्''*** (पा० ६।३।१०७) इति वैयाकरणसमयात् तकारस्य दकाररूपो वर्णादेशः। एवञ्च यो हि यतुः स एवं यदुरिति विज्ञेयम्।

श्रेष्ठः—प्रशस्यशब्दादातिशायनिकेऽर्थे ***''प्रशस्यस्य श्रः''*** (पा० ५।३।६०) 'इष्ठनि' प्रकृतेः श्रादेशे, प्रकृतिभावे गुणे च, अतिशयेन प्रशस्यः श्रेष्ठः। यदूनां=प्रयत्नशीलानां मध्ये अतिशयेन प्रयत्नशील इत्यर्थः। तत्र सूर्यो नित्यैकरसगतिर्दिवि भ्रमति, तस्मात् स यदुश्रेष्ठ इत्युक्तो भवति। मन्त्रलिङ्गञ्च—

यदिन्द्राग्नी यदुषु तुर्वशेषु यद् द्रुह्युष्वनुष पुरुष स्थः ।
अतः परि वृषणा वा हि यातमथा सोमस्य पिबतं सुतस्य।।

ऋक् १।१०८।१।

उत दासा परिविषे स्मद्दिष्टी गोपरीणसा।
यदुस्तुर्वश्च मामहे।। ऋक् १०।६२।१०।।

लोके चापि पश्यामः शरीरे हृदयं यदूनां मध्ये श्रेष्ठं, तत्र चात्मनो निवासः आत्मा च सूर्यः **''सूर्य आत्मा जगतस्तस्थुषश्च''** (ऋक् १।११५।१) इति मन्त्रलिङ्गात्। पुण्डरीकाक्षनामव्याख्यानेऽपि विशदमुक्तं, तत्र द्रष्टव्यम्। हृदययन्त्रं स्वतन्त्रपेशीमत्कं ततश्च तन्निरन्तरं चलति, तद्गतेरवरोधान्नाशो मृत्युरिति। हृदयस्य निर्दोषतायै जीवः प्रार्थयते—

यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वाऽतितृण्णं बृहस्पतिर्मे तद्दधातु।
शन्नो भवतु भुवनस्य यस्पतिः।। यजुः ३६।२।।

तत्रेदं वितर्क्यते, को नामास्य सूर्यस्य व्यवस्थापयितेति। समाधानमस्येदमेव यत् स सर्वगः सर्वाधारो यदुश्रेष्ठो भगवान् विष्णुरेवास्य व्यवस्थापयिता।

तत्र मन्त्रलिङ्गम्—

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।। यजुः ४०।५।।

तथा—

अस्मै श्रेष्ठेभिर्भानुभिर्विभाह्युषो देवी प्रतिरन्ती न आयुः।
इयं च नो दधती विश्ववारे गोमदश्वाद् रथवच्च राधः।।

ऋक् ७।७७।५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथायं यदुश्रेष्ठः सूर्यः राशे राश्यन्तरं सङ्क्रामति, तथायं जीवोऽपि देहाद्देहान्तरं सङ्क्रामति—

अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि त्वं जीव शरदः शतम्।।

(तुलनीयम् मन्त्र ब्राह्मण—१।५।१७)

इतिमन्त्रलिङ्गात्।

भवति चात्रास्माकम्—

मन्ये यदुश्रेष्ठ इहास्ति सूर्य
आत्मापि सूर्यः स विभुश्च सूर्यः।
काये यदुश्रेष्ठमतश्च "हृत्" स्यात्
विष्णुस्तु यातूनतिशय्य शेते ।।१००६।।

यथायमात्मा नश्यत्स्वपि शरीरेषु न नश्यति, तथैवायं यदुश्रेष्ठो भगवान् वरेण्यो नश्यत्स्वपि जागतभावेषु न नश्यति सत्यधर्मा। वक्ष्यति च नामसंग्रहे **सत्यधर्मपरायण** इति।

सन्निवासः—७०६

सत्—शब्दो व्युत्पादितः । निवासः—नि उपसर्गपूर्वकः "वस निवासे" इति भौवादिको धातुस्ततो ***"हलश्च"*** (पा० ३।३।१२१) सूत्रेणाधिकारणे घञ् प्रत्ययो ञित्त्वादुपधावृद्धिः ततो निवासः, उष्यतेऽस्मिन्निति। सतां=विनाशरहितानां, प्रवाहतो नित्यानाम्, आप्रलयस्थायिनां वासो यस्मिन् स सन्निवास इति। सतः तकारस्य ***"यरोऽनुनासिकेऽनुनासिको वा"*** (पा० ८।४।४५) सूत्रेण पाक्षिको नकारः। प्रकृतिः, जीवः, स्वयं ब्रह्म चेत्यविनाशिवर्गाः। तत्र प्रकृत्याः कार्यरूपपरिणामे कारणं ब्रह्म, यथा चेतनजीवाधिष्ठितदेहरूपपुत्रोत्पादने मातापितरौ निमित्तकारणं भवतः। गौण्या वृत्त्या चोच्यते, मातृजोऽयं, पितृजोऽयमिति। अमुथैवेयम् अघटितघटनापटीयसी प्रकृतिः निमित्तकारणस्य ब्रह्मणोऽभीद्धतपसो योगेन दृश्यादृश्यलोकलोकान्तररूपकार्ये परिणमते, यो हि यं परिणमयति, स तस्य परिणमयिता=वासयिता भवति। तद्यथा—

त्वं हि नः पिता वसो ! त्वं माता शतक्रतो ! बभूविथ।
अथाते सुम्नमीमहे। (ऋक् ८।९८।११; साम० ३०, ४, २, १३, २)

इति ऋक्साम्नोर्मन्त्रलिङ्गम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमुथैवायं विष्णुः सन्निवास उक्तो भवति। लोकेऽपि च पश्यामः—त्रिदोषदोषमूले प्रवाहनित्ये शरीरे ये काम—क्रोध—लोभ—अहङ्काराः, तथा इच्छा—द्वेष—प्रयत्न—सुख—दुःख—ज्ञानानि, तेषां प्रवाहनित्यानां वासयिताऽविनाशी जीवो भवति, नह्येते मृतशरीरे व्यञ्जन्त्यात्मानम्। तस्मात् यथाभूतं दृश्यते, तथा भूतमुच्यते।

मन्त्रलिङ्गञ्च—

यादृगेव ददृशे तादृगुच्यते। ऋक् ५।४४।६।।

अमुथैवायं सूर्योऽपि सन्निवास उक्तो भवति, स हि सूर्यः सकलस्य चराचरस्यात्मभूतः सकलं चराचरं जीवितमिव गत्या, प्रभया, तेजसा च युनक्ति कारणानुरूपम्। एवं सर्वं विश्वं व्यश्नुवानो भगवान् विष्णुः सन्निवास इति नाम्नोच्यते कूटस्थत्वान्नित्यत्वाच्च।

मन्त्रलिङ्गञ्च—

जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा।
पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानम्।।

ऋक् २।१०।४।।

"प्रति क्षियन्तं भुवनानि विश्वा" विश्वानि भुवनानि=लोकलोकान्तराणि निजसत्तायां वासयन्तं, तेषु वा वसन्तमिति भावः। अस्य सूक्तस्य अग्निर्देवता। अग्निशब्देन चात्र सङ्ग्रहे विष्णुर्गृहीतः। क्वचित् सूर्यः क्वचिद् भौतिकोऽग्निरिति यत्र तत्र मन्त्रेषु विदुषोहाः कर्तव्याः।

भवन्ति चात्रास्माकम्—

स सन्निवासो भगवान् वरेण्यो
विष्णुः स्वयं तिष्ठति सत्यधर्मा।
चराचरे मर्त्यधियाप्यचिन्त्ये
प्रवाहनित्यं जगदादधाति ।।१००७।।

एवं हि ये पूतधियो हि धन्या
जपन्ति किं वा तमु राधयन्ति ।
ते सन्निवासं भगवन्तमेकं
पश्यन्ति नित्यं हृदये वसन्तम् ।।१००८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किं वच्मि मर्त्याः ! मम सत्प्रयासे
गङ्गामृते[1] दोषविनाशशक्ते ।
भाष्ये निमज्यात्मधियो विशोध्य
विष्णुं सदा पश्यत यात शान्तिम् ।।१००६।।

सुयामुनः—७०७

"यम उपरमे" भौवादिको धातुः सु— उपसर्गपूर्वकः। ततः ***"अजियमिशीङ्भ्यश्च"*** (३।६१) इत्युणादिसूत्रेण 'उनन्' प्रत्ययः, यच्छति= उपरमयतीति यमुनः। यमुन एव यामुनः स्वार्थेऽण्, शोभनो यामुनः सुयामुनो विष्णुः। तथा हि भगवान् विष्णुर्महाप्रलये स्वकीयया व्यवस्थया कार्यकारणरूपमिदं समस्तं विश्वं यच्छति, अर्थात् कार्यकारणरूपेण परिणतमुपरमयति=शमयतीत्यर्थः। अथवा पुनः कार्यकारणरूपेण परिणमयितुं स्वान्तरुदरे समावेश्य रक्षतीत्यर्थः। यथा कृषीवलः स्वं वाप्यं बीजं तथा रक्षति यथा स बीजः कार्यरूपेण परिणमनक्षमः स्यात्। एवं भगवान् विष्णुः सर्वं कार्यकारणरूपं विश्वं यथाव्यवस्थं स्वज्ञाने उपरमति, न च स्वयं विकारं भजते तथा च कश्चिन्मनस्वी विद्वान् शरीरान्तरेऽपि स्वकानि पूर्ववृत्तानि स्मरति। अमुथैव भगवान् सूर्यो भूखण्डपिहितो निजतिरोधानरूपधर्मेण रात्रिं विदधज्जीवान् उपशमयति=विश्रमं प्रापयतीत्यर्थः।

मन्त्रलिङ्गञ्च—

आत्वेषं वर्तते तमः। यजुः ३४।३२।।

त्विष—दीप्ताविति धातुस्तस्येदं त्वेष इति रूपम्। न चायं सूर्यः कदाचिन्निम्लोचति, तत्र मन्त्रलिङ्गम्—

एवा पर्येमि ते मनो यथा पर्येति सूर्यः। तुलनीयम् अथर्व ६।८।३।।

तथा ब्राह्मणवादश्च भवति—

स वा एष न कदाचन निम्लोचति।

ऐ० ब्रा० १४।६।। गोपथ २।४।१०।।

तथा चायं भगवानपि न निम्लोचति, तस्मादयं सुयामुन उच्यतेऽव्यभिचरितज्ञानः।

---

१. नदीनां गङ्गा श्रेष्ठतमा, तस्मादिदमुच्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

यस्योरुषु त्रिषु विक्रमणेष्वधि[1] क्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।४।।

तत्र-मन्त्रलिङ्गंच—

यस्मिन् क्षियन्ति प्रदिशः षडुर्वीः। अथर्व १३।३।१।।

क्षि—निवासगत्योरिति धातोर्लटि प्रथमपुरुषबहुवचने, क्षियन्तीति रूपम् कार्यावस्थायां निवसन्तीत्यर्थः। कारणावस्थायाञ्च गच्छन्ति लयमित्यर्थः। लयम्=उपरममित्यर्थः। नहि कदाचिदपि सतो नाश इति।

भवति चात्रास्माकम्—

सुयामुनो विष्णुरतर्क्यरूपः
क्षिणोति स्वस्मिन्निति कार्यजातम्।
रात्रौ नरोऽशेषमथोपरत्य
सकारणं ज्ञानमनाश्च शेते ।।१०१०।।

❖❖❖

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ।।८६।।

७०८ भूतावासः, ७०९ वासुदेवः, ७१० सर्वासुनिलयः, ७११ अनलः। ७१२ दर्पहा, ७१३ दर्पदः, ७१४ दृप्तः, ७१५ दुर्धरः, अथ, ७१६ अपराजितः।।

भूतावासः—७०८

भूतम्—भवतेः सत्तार्थकाद् भौवादिकाद्धातोः कर्तरि कारके क्तः प्रत्ययः, ***''श्रयुकः किति''*** (पा० ७।२।११) सूत्रेणेण्निषेधः। भवन्तीति भूतानि।

आवासः—आङुपसर्गः समन्ताद्भवनेऽर्थे। ''वस निवासे'' इति भौवादिको धातुस्ततो ***''हलश्च''*** (पा० ३।३।१२१) सूत्रेणाधिकरणे घञ् प्रत्ययः उपधावृद्धिश्च। एवञ्च—आ=समन्ताद् वसन्ति भूतानि यस्मिन् सः भूतावासो भगवान् विष्णुः। सांहितिको दीर्घः। नित्योऽयमात्मा, भवनधर्मा च जीवः। शरीरेन्द्रियादिभिर्योगे

१. अधि-यस्मिन्नर्थेऽव्ययम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सति इच्छा—द्वेष—प्रयत्न—सुख—दुःख—ज्ञानादिभिर्देहात् पृथक् सद्भावेन व्यज्यमानोऽयं जीवो भूत इत्युच्यते यद्वा—अव्यक्तप्रकृतेः कार्याणि खादीनि पञ्चमहाभूतानि सकार्याणि चराचरात्मकानि, वसन्ति समन्ताद् यस्मिन्निति स भूतावासः।

मन्त्रलिङ्गञ्च—

अधि[1] क्षियन्ति भुवनानि विश्वा। ऋक् १।१५४।४।।

"क्षि निवासगत्योः" इति धातुः, क्षियन्ति=वसन्तीत्यर्थः। प्रत्यक्षं लोके दर्शनेन ज्ञायते यद् आकाश—वायु—अग्नि—जल—पृथिवीति पञ्चमहाभूत-समुद्भवान्यपि पृथिवीतत्त्वप्रधानानि दृश्यानि शरीराणि, स्वाश्रयप्रधानभूतस्य गुणाधिक्यं वहन्ति, तद्रक्षितुर्वा भूतस्य। तत्र मिश्रितयोर्द्वयोर्भूतयोरपि क्वचित्प्राधान्यं दृश्यते। यथा—ऊर्णनाभ आकाशतत्त्वप्रधानो जीवः स च तद्भूतप्राधान्यं व्यङ्क्तुमाकाशे जालं वितत्य वसति तत्र, प्रधानता तत्राकाशस्य गौणता चेतरेषां भूतानाम्। एवं वायव्यानां प्राधान्येन वातानुकूलधर्मित्वम्, इतरेषाञ्च तत्रानुपातवशाद् विहितं सत्त्वं भूतावासेन भगवता। एवं हि वृद्धपरम्परातः श्रूयते, अतिक्रान्तपञ्चाशद्वत्सरे साग्निगोमयभस्मनि आग्नेया जीवाः प्रादुर्भवन्ति, ते च न म्रियन्ते—आग्नेयास्ते। इत्युपदिष्टमस्मदायुर्वेदगुरुभिः श्रीब्रह्मचारितिलकराम-शर्मभिरमृतसरोनाम्नि नगरे, दृष्टाश्चासन् तैस्तथाविधाः क्रिमयः। जले जलतत्त्वप्रधाना जीवाः प्रतिपदं दृश्यन्ते, ते च प्रायश आग्नेया एव भवन्ति, यतो हि न ते शीतेन बाध्यन्ते। मत्स्यो हि जले जीवति, त्वक्तो जीवनीयं तत्त्वमाकर्षति, फुप्फुसयोरभावात्, विचित्रा हि रचना भगवतः। परन्तु मण्डूक उभयथा नासिकातः त्वक्तश्च जीवनीयं जलीयं वायवीयञ्चांशमादत्ते जलस्थो जलीयं बहिःस्थितो वायवीयम्। मत्स्यस्याग्नितत्त्वप्रधानत्वात्तन्मांसभोक्तापि भूयो भूयो जलं पिपासति। मनुष्यपशुबिलेशयाश्च पृथिवीतत्त्वप्रधानाः फुप्फुसाभ्यां प्राणेभ्यश्चाकर्षन्ति जीवनीयं तत्त्वम्। एवञ्च ज्ञायते यद् भूताश्रयः स भगवान् सर्वान् पश्यति, सर्वांश्च तत्तद्भोगैर्युनक्ति। पाञ्चभौतिकानां शरीराणां नाना भेदाः प्रभेदाश्च तेनैव कृताः सन्ति।

स्थावरेष्वपि वीरुद्—वृक्ष—क्षुप—लतादिषु विविधता प्रत्यक्षं दृश्यते। सर्वस्य बीजात्मकं कारणं सर्वत्र निहितं भवति। योनीनामुत्पत्तिकालस्तत्तद्-गर्भाशयस्य दूरनिकटभेदाच्च स्थानकरणं, प्रभोर्ज्ञानातिशयतां प्रकटयति। तत्तद्योनिमतो

१. "अधि" यस्मिन्नर्थे वर्तते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जन्तोर्जननेन्द्रियदैर्घ्यं लघुताञ्च दृष्ट्वा प्रतीयते, भगवतः **सर्वलक्षणलक्षण्य** इति सहस्रनामस्तोत्रे समाम्नातं नाम अन्वर्थमिति, तत्कर्म चापि सर्वलक्षणलक्षितमिति युक्तमुपपद्यते। चटकादयः शीघ्रं प्रसुवतेऽल्पीयसा कालेन, तत्कालनैयून्यं पुनर्बाह्येन तापेनापूर्यते। नक्रादीनामण्डानां तापनैयून्यं सूर्यः पूरयति। नक्रादयोऽण्डानि जलाद्बहिः प्रसुवते। मयूर्यपि कुक्कुटीमिव गर्भबीजमादत्ते। ईदृग्भ्यो निदर्शनेभ्यो ज्ञायते यद् विचित्रज्ञानवताऽमोघकर्मणा विष्णुना सर्वत्र सर्वकार्ये प्रतिपदं स्वकीयं मेधावित्वं प्रदर्शितमिति। अत एवोक्तं वेदे—

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे।
इन्द्रस्य युज्यः सखा। ऋक् १।२२।१९; यजुः ६।४।।
त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ।
अथा ते सुम्नमीमहे।। ऋक् ८।९८।११; सा० उ० ४।२।१३।२।।

एवं च—

यथा यथा हि पुरुषः शास्त्रं समधिगच्छति।
तथा तथा विजानाति विज्ञानं चास्य रोचते।।

इति मनुस्मृतौ ४।२०।।

उक्तं पद्यं सत्यापयति निजात्मानम्। एवं सूक्ष्मपर्यालोचनेन निश्चीयते यद् भूतानामावासत्वेन सर्वं विश्वं व्यश्नुवानो भगवान् विष्णुर्भूतावास उक्तो भवति यच्चोक्तं प्रसवकालोऽपि प्रतियोनिभिन्नो भिन्न इति तत्र शुनी, गर्दभी, वडवा, महिषी, गौः, सिंही, उष्ट्री—चैताः सर्वाः पृथक्-पृथक्—मासैर्दिनैर्घटिकाभिश्च संख्यातुमर्हकालं स्वप्रसवं प्रति उपाददते। स प्रभुः—माता=निर्माता सन्नात्मानं मातरि व्यनक्ति भूतावासत्वेन। मनुष्यो यथा यथा भिन्नभिन्नप्राणिशरीररचनां पश्यति, तथा तथा पश्यत्यसौ सर्वत्र विततं भूतावासरूपम्। प्राणिशरीरेष्वपि प्रतिप्राणिशरीरं भिन्नभिन्नप्रकाराः विविधाः क्रिमयो जीवन्तीति क्रिमिरोगव्याख्याने व्याख्यातम्। विषेऽपि विषक्रिमयो जीवन्ति। काकजङ्घानाम्नि क्षुपमूलकाण्डे स्वत एव क्रिमय उत्पद्यन्ते, तेषाञ्चैकोऽपि समध्वजादुग्धेन पायितो जीवितक्रिमिः शमयति सन्निपातोत्थमुरःशूलं सद्य एवेति प्रात्यक्षिकं नः। एकस्मिन् क्षुपमूलेऽपि दृष्टा मया जीवाः, स च क्षुपः प्रायशो नदीकूले भवति, तस्य च मूले बद्धौ द्वावण्डकोशाविवाण्डौ तयोश्च प्रत्यण्डं कृष्णवर्णः षट्पाद् प्रबुद्धः कीटो विदारिते चाण्डे सद्यो बहिरुड्डीनः। भगवतो विष्णोर्महाबुद्धिमत्त्वं भूतावासत्वञ्च प्रतिपदं व्यज्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रेऽप्युक्तम्—

अन्ति सन्तं न पश्यति अन्ति सन्तं न जहाति।

पश्य देवस्य काव्यं न ममार न जीर्यति।। अथर्व १०।८।३२।।

देवस्य दृश्यं काव्यं जगत्, तस्माद्विदुषा शिल्पिना जगदध्येतव्यं पौनःपुन्येन। उक्तञ्च वराहमिहिरेण—

आब्रह्मकीटान्तमिदं निबद्धं पुंस्त्रीप्रयोगेण जगत् समस्तम्।

स्त्रीत्वं पुंस्त्वञ्च स्थावरेष्वपि प्रतिपदं दृश्यते। यथा—खर्जूरे एरण्डदशाङ्गुले। बीजस्य द्विदलता च प्रत्यक्षं प्रत्यायिका भवति इति दिङ्मात्रमुक्तं ज्ञानवृद्धये भगवति श्रद्धोत्पादनाय च।

भवन्ति चात्रास्माकम्—

स विष्णुरेकः स्वधिया विभाव्य
जगत्प्रक्लृप्यात्मनि तन्निवास्य ।
निमित्तहेतुर्जगतोऽद्वितीयः
शेते समायो जगदीश आद्यः ।।१०११।।

नित्यो हि जीवः प्रकृतिश्च नित्या
संयोज्य शिल्पीव करोति देहान् ।
विचित्र वर्णाकृतिभिर्विभक्तान्
नमन्ति नम्राः कवयोऽत्र विष्णुम्।।१०१२।।

कालं प्रसूतेरथ गर्भशय्यां
पृथक्पृथक्शोऽथ विधाय चायुः ।
आवासितं भूतमयं विधत्ते
जगत् समस्तं सविता मनस्वी ।।१०१३।।

वासुदेवः—७०६

वासुः—निवासार्थक वस इति भौवादिकाद्धातोर्ण्यन्तात् ***"शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च"*** (१।१०) इत्युणादिसूत्रेण 'उः' प्रत्ययः।

अथवा शुद्धाद्वसेर्बाहुलकाद् "उण्" प्रत्यय औणादिक उपधावृद्धिश्च वासुः। एवञ्च यः सर्वं स्वस्मिन् वासयति सर्वत्र वा स्वयं वसतीति वासुरीश्वरः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आच्छादनार्थकाद् वसेरपि 'उः' 'उण्' इति वा प्रत्यये "वसुः" वासुर्वा, धनं, सूर्यः, ईश्वरः, आकाशो वा।

देवः—दीव्यतेः पचाद्यचि दीव्यतीति देवः। वासुश्चासौ देवश्च वासुदेव इति। लोकेऽपि च पश्यामो यो यत्र वसति स तत्र यथाभिमतं दीव्यति, अर्थाद्यथास्वरुचि क्रीडति, विजिगीषते, व्यवहरति, इत्यादि। अथवा यो यमुपस्वं वासयति सोऽपि तत्र यथाभिमतं क्रीडितुं व्यवहर्तुं वा स्वतन्त्रो भवति। यथा चेयं लौकिकी व्यवस्था दृश्यते तथैव भगवत्यपि द्रष्टव्या। भगवान् हि सर्वं चराचरं स्वस्मिन् वासयति वसति च स्वयं तस्मिन्, तस्मात् स वासुरीश्वरो यथाव्यवस्थं जगद् व्यवहारक्षमं विधत्ते। सर्वत्र वर्तमानश्च स दीव्यत्यर्थबोध्यो विद्वद्भिः कल्प्यते। भगवतो विष्णोः सूर्यस्य वा महार्थवत्त्वप्रकाशनायैव विष्णुसहस्रनाम्नि स्तोत्रे गौणानां नाम्नां संग्रहः।

लोकेऽपि च पश्यामो यथा जीवं वासयितुं देवो विष्णुः शरीररचनाभिरेव ज्ञानानन्त्यं व्यज्य, सर्वं ससुखं क्रियाक्षमं कुरुते, जीवभोगाय शरीरसाधनानि, आहार—प्राण—जल—वायु—प्रकाशरूपाणि पोषणनिमित्तानि, बुद्धिं बुद्धिनिमित्तानि, प्रजां प्रजानिमित्तानि च ददाति, तथैवायं विश्वं वासयित्वा विश्वरचनायां पारस्परिकापेक्षितानि जगति ददाति प्राणिभ्य इति दीव्यत्यर्थानुगमाद्देवः। एवञ्च वासुदेव इति नामान्वर्थं तस्य। दृश्यते चायं वासनदेवनरूपो भगवतो गुणः सर्वत्र व्याप्त इति। यावच्छरीरे जीवात्मा तावच्छरीरं प्रियायते, जीवात्मापेतञ्च तच्छरीरं शवरूपम् या शरीरे देवरूपता, सा देहाभिमानिन आत्मन एव। आत्मापाये शरीरं मृतमिति निगद्यते सर्वविधचेष्टाशून्यम्। तस्माद्वासुदेव आत्मा सूर्यश्च। स्वोदरे गर्भं वासयति, जनयति च सम्पूर्णाङ्गमिति मातापि वासुदेव्युच्यते। पिताऽपि गर्भमाधातुं दीव्यति स्ववीर्यरूपं बीजं क्षेत्रभूतायै स्त्रियै ददातीति स वासुदेव उच्यते दीव्यत्यर्थानुगमाद्।

वसुदेवनामा कश्चित्तस्य यदपत्यं पुमान् सोऽपि वासुदेवः स्त्र्यपत्यञ्च वासुदेवी। किन्तु नैतदपत्यत्वमीश्वरे युज्यते कूटस्थनित्यत्वान्निमित्तकारणत्वाच्चेश्वरस्य। वृद्धानुश्रुतिरत्र लिङ्गम्—

वासनाद्वासुदेवस्य वासितं भुवनत्रयम् ।
सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते।।

तथा—**वासुदेवः सर्वमिति** गीतोपनिषत्। ७।१६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवन्ति चात्रास्माकम्–

स वासुदेवः सकलं वसानः
स वा निवासोऽस्ति च भूतयोन्याः।
स सर्वकस्मै च ददाति सर्वं
वस्त्वस्य यद्यत् समपेक्षितं स्यात् ।।१०१४।।

देवो हि दानात् स वरेण्य उक्तो
वासुर्हि वासं स ददाति यस्मात् ।
तं वासुदेवं प्रणमन्ति देवा
याचन्ति[1] तञ्चापि समीप्सितं स्वम्।।१०१५।।

स वासुदेवो वसुदान[2] उक्तो
[3]वह्निर्हि वा विश्वमिदं समिध्य ।
करोति वासाय समग्रमेतद्
यथार्हमिष्टेन च संयुनक्ति ।।१०१६।।

सर्वासुनिलयः–७१०

सर्वेषां प्राणिनामसवो निलीयन्ते यस्मिन् सर्वासुनिलयः। सर्वप्राणिप्राणाधार इत्यर्थः। सर्वेषामसूनां जीवनसाधनानां वा निलय आधारभूतोऽवलम्बनं वा स सर्वासुनिलय इति।

सर्वः–'सृ' गत्यर्थकधातोः ***"सर्वनिघृस्वरिस्वलिष्वशिवपद्वप्रह्वेष्वा अतन्त्रे"*** (१।१५३) इत्युणादिसूत्रेण वन् प्रत्यये गुणे च सिध्यति, सृतमनेन विश्वमिति सर्वः।

असुः–अस्तेर्भवत्यर्थे वर्तमानाद् ***"शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धि-मनिभ्यश्च"*** (१।१०) इत्युणादिसूत्रेण "उ" प्रत्यये सिध्यति–अस्तीति असुः। यद्वा– असु क्षेपणे दैवादिको धातुः, अस्यन्ति शरीरमित्यसवः प्राणाः।

निलयः–नि–उपसर्गः। 'लीङ्श्लेषणे' इति दैवादिको, 'ली श्लेषण' इति वा

---

१. याचन्ति आर्षानुकरणम्; २. मन्त्रलिङ्गं च–
"सायं सायं गृहपति र्नो अग्निः प्रातः प्रातः सौमनसस्य दाता।
वसोर्वसोर्वसुदान एधि वयं त्वेन्धानस्तन्वं पुषेम।" अथर्व १९।७।५५।।
३. वह्निः=अग्निः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रैय्यादिको धातुस्तत ***''एरच्''*** (पा० ३ ।३ ।५६) सूत्रेणाधिकरणे 'अच्' प्रत्ययो गुणायायादेशौ च। यद्यपीह ***''विभाषा लीयतेः''*** (पा० ६ ।१ ।५१) सूत्रेण यका निर्देशाद् उभयोरप्यात्वं प्राप्नोति, तथापि ***''निमिमीलियां खलचोः प्रतिषेधो वक्तव्यः''*** (पा० ६ ।१ ।५१) इति निषेधादात्वन्न भवति, निलीयन्तेऽस्मिन्निति निलय आश्रय इत्यर्थः।

एवञ्च सर्वगः सर्वत्र विद्यमानस्तथा सर्वाश्रय इति सर्वासुनिलयनाम्नोऽर्थः सम्पन्नो भवति। सर्वासां योनीनां जीवनाधार इति वार्थः।

मन्त्रलिङ्गञ्च–

प्राणाय नमो यस्य सर्वमिदं वशे। अथर्व ११ ।४ ।१।।

लोकेऽपि च पश्यामः–यो हि शिल्पी यस्य यन्त्रस्य निर्माता, स तद्विषयकं सर्वं रहस्यं वेत्ति, तथायं सर्वासुनिलयो विष्णुः सर्वं विश्वं श्लेषयन् जीवनाधारेण योजयन् सर्वं व्यश्नुवानश्च वशे करोति।

भवति चात्रास्माकम्–

सर्वासुनिलयः शम्भुः सर्वं कृत्वा जगद्वशे।
सर्वाधारः स्वयं प्राणो जगतीं व्याप्य तिष्ठति।।१०१७।।

अनलः–७११

"अलं भूषणपर्याप्तिवारणेषु" भौवादिको धातुस्ततः पचाद्यच् प्रत्ययः। अलतीत्यलः, न अलः–अनलः। यद्वा–अलमित्यव्ययं स्वरादिषु पर्याप्त्यर्थकं निषेधार्थकञ्च, तस्माद् ***''अर्शआदिभ्योऽच्''*** (पा० ५ ।२ ।१२७) सूत्रेण, अर्शादेराकृतिगणत्वान्मत्वर्थीयोऽच् प्रत्ययः ***''अव्ययानां भमात्रे टिलोपो वक्तव्यः''*** इति टिलोपे च अल इति सिध्यति, नञा समासे, नञो नलोपे नुडागमः। अलं पर्याप्तिः=प्रभूतमेतावन्नान्यदपेक्षम् इत्येतद्रूपं तृप्तिवचनं, समाप्तिवचनं वा। तदुभयन्न विद्यते यस्य सोऽनल इति। लोकेऽपि च पश्यामः कश्चिदुत्पद्यते कश्चिन्म्रियते– इत्यविच्छिन्नपरम्परया नहि प्रभूतमेतदेतावत्, समाप्तं वैतदिति केनाप्याकलयितुं शक्यते। तस्माद् भगवान् विष्णुरनलत्वरूपेण गुणेन सर्वं विश्वं व्यश्नुवान आस्ते।

अलशब्दस्य भूषणार्थवृत्तावपि, नास्त्यन्यो भूषयिता यस्येति सोऽनलः। पर्याप्तिवचने च–नास्त्यपरो विना तं महावीर्यं विष्णुं पर्याप्तः=शक्तः सृष्टिनिर्माण इत्यनलः। वारणार्थे–नास्त्यन्यः कश्चिदीदृशो यो विष्णुं पराजयेतेति, विष्णुरेवानलः। भावार्थप्रधानं मन्त्रलिङ्गञ्च–

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न त्वदन्यः कवितरो न मेधया धीरो वरुण स्वधावन्।
अथर्व ५।११।४।।

न द्वितीयो न तृतीयः। इति अथर्व १३।४।१६।।
अहमिन्द्रो न परा जिग्ये। ऋक् १०।४८।५।।
सर्वं तदिन्द्र ते वशे।
ऋक् ८।६३।४; अथर्व २०।११२।१; यजुः ३३।३५।।

भवति चात्रास्माकम्—

मन्येऽनलं सर्वगतं हि विष्णुं
न तस्य शक्तिं ह्युपहन्तुमीशः।
न कोऽपि वा भूषयिताऽस्ति तस्य
निमित्तभूतः स दधाति विश्वम्।।१०१८।।

धारणे मन्त्रलिङ्गञ्च—

स दाधार पृथिवीमुत द्यामुतेमाम्। अथर्व ४।२।७ इत्यादि।।

दर्पहा—७१२

'दृप हर्षमोहनयोः'' इति दैवादिको धातुस्ततो भावे घञ्, रपरो गुणो दर्पः। दर्पं हतवान्, हन्ति, हनिष्यतीति वा सार्वकालिकः क्विप्, हन्नन्तलक्षणो दीर्घः (पा० ६।४।१२)। भगवद्व्यवस्थाप्रभावतः सर्वे जीवा आत्मानं पूर्णंमन्यमाना दृप्यन्ति, त एव च यदा कञ्चित्स्वसदृशं नश्यन्तं पश्यन्ति, तदा तेषां स दर्पः किञ्चिदुपशाम्यति, तद्दर्पनाशात्मकदर्पोपशमनहेतोरुपस्थापको भगवान् विष्णुरेव 'दर्पहा' इत्युक्तो भवति। लोकेऽपि जरां गतस्य रूपवतोऽपि रूपं हीयते। क्व गतं तद्रूपमिति प्रश्ने प्रतिवचनमेतदेव यद् रूपस्य दात्रा विधात्रा स्वव्यवस्थानुसारं प्रत्यात्तं प्रत्याहृतं वा तत्। एवञ्च स दर्पहा—हर्षहा—मोहहा वेत्युक्तो भवति। मन्त्रलिङ्गञ्च—

अकामो धीरो अमृतः स्वयम्भू रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न बिभाय मृत्योरात्मानं धीरमजरं युवानम् ।।
अथर्व १०।८।४४।।

भवति चात्रास्माकम्—

स दर्पहा सर्वगतः स्वयम्भू-
दर्पं ददात्येव स विश्वकस्मै ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दर्पं च हर्षं किमुताथ मोहं
स एव हन्तीति विनिश्चितं मे ।।१०१६।।

दर्पदः—७१३

दर्प शब्दो निष्पादितो 'दर्पहा' नाम व्याख्याने। दर्पं ददातीति ददातेः ***''आतोऽनुपसर्गे कः''*** (पा० ३।२।३) सूत्रेण कः प्रत्ययः, आल्लोपश्च, दर्पदः। दर्पः—हर्षः—मोहो वा प्रतिवस्तु यो दर्पो यो हर्षो यो मोहो वा स तस्यैव भगवतो विष्णोरिति विज्ञापयितुं तन्नामैव दर्पद इति विख्यापितं तत्त्ववेतृभिः। लोकेऽपि पश्यामो, योषिति यो रूपसम्मोहः स कस्येति प्रश्ने, भगवतश्चन्द्रशुक्रनामवतो विष्णोरेव स इति समाधिः। मन्त्रलिङ्गञ्च—

तदेवाग्निस्तदादित्यस्तद्वायुस्तदु चन्द्रमाः ।
तदेव शुक्रं तद्ब्रह्म ता आपः स प्रजापतिः।। यजुः ३२।१।।

भवति चात्रास्माकम्—

विष्णुर्हि रूपेण युनक्ति विश्वं
सत्येन तञ्चाऽपि युनक्ति युक्त्या।
न तं विना रूपमिहास्ति चन्द्रे
मन्ये न शुक्रे स हि दर्पदोऽतः ।।१०२०।।

शुक्रचन्द्रयोर्योगो रूपं सम्मोहनं करोतीति ग्रहयोगविदां समयः।

अदृप्तः—दृप्तः—७१४

'दृप हर्षमोहनयोः' इति दैवादिकाद्धातोः कर्तरि क्तः, अनिट् गुणाभावश्च अत्र द्विधा सन्धिविग्रहः—अदृप्त इति दृप्त इति वा। तत्र न दृप्त इति नञ् समासे, अदृप्तपक्षे—न दृप्यतीति—अदृप्तः। यत्र च न नञ्समासस्तत्र दृप्त इति। **'दर्पदोदृप्त'** इति सांहितिकं रूपं तूभयत्र समानम्। अत उभयथाऽप्ययं व्याख्यायते—

अत्रादृप्त इति—सर्वं यथायथं विरच्यापि न कञ्चिद् व्युत्क्रमते स्वकीयेनादृप्तगुणेन विश्वं व्यश्नुवान इति। तद्यथा—बीजानुसारिणा कार्येण भवितव्यमिति कृतनियमं विश्वमिदन्न व्यभिचरति। नासौ क्वचित्तथाविधं मोहं हर्षं वा प्राप्नोतीति विष्णुः 'अदृप्त' इत्यनया संज्ञया ख्यापितस्तत्त्ववेदिभिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दृप्त इति पक्षे च—भगवद्रचितमिदं विश्वं विष्णोः कर्माणि पश्यन्तं बुद्धिमन्तमपि क्षणं मोहयति, स चाश्चर्यचकितश्चिन्तयति, को ह्यस्य विश्वस्य कर्ता, कथंविधश्च स इति। विश्वमायामोहितस्य मोहकरणः स भगवानपि **आयुर्वै घृत**मितिवत् 'कारणे कार्यशब्द' न्यायेन दृप्तनाम्नोक्तो भवति, तस्मिंश्च स्थितं विश्वमिदं शोकाद्विमुच्यते। अत एव भगवतो विष्णोः 'विशोक-शोकनाशन' इति नाम्नी पृथक्-पृथक् व्याख्यातचरे। मन्त्रलिङ्गञ्च—

तदेजति तन्नैजति तद्दूरे तद्वन्तिके ।
तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः।। यजुः ३२।१।।

भवति चात्रास्माकम्—

दृप्तः शम्भुरदृप्तो वा स्वभावं नातिवर्तते।
यथाबीजगुणं कृत्वा नियच्छन् विश्वमेजति।।१०२१।।

दुर्धरः—७१५

दुस् उपसर्गः, 'धृञ् धारणे' इति भौवादिको धातुस्ततः ***''ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्''*** (पा० ३।३।१२६) सूत्रेण कृच्छ्रार्थके दुस्युपपदे खल् प्रत्ययः सस्य रुत्वं उकारस्य चेत्संज्ञा, धातोरपि गुणो रपरः, दुर्धर इति दुःखेन धर्तुं शक्यो दुर्धरः। दुर्ज्ञेय इति तु वास्तविकार्थः जरायुजाण्डस्वेदजोद्भिज्जरूप चतुर्विधयोनीनाम् अनन्तानां च तद्विकल्पनानां ज्ञानगुणकर्मस्वभावादीनि धर्तुं=ज्ञातुं सचेतसामपि चेतांसि न क्षमाणि भवन्तीति कृत्वा। स विष्णुर्दुर्धर इत्युक्तो भवति। तद्यथा—पाणिना वायुर्दुर्धरः, पटेनाग्निर्दुर्धरः, शिरसा पृथिवी दुर्धरा, यथा वा सूर्यः पाणिना दुर्धरः, तथैवायं भगवान् ज्ञानचक्षुष्कैरपि दुर्धरो दुःखेन ज्ञातुं शक्य इति दुर्धर उच्यते। तत्र मन्त्रलिङ्गञ्च—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि ँ सर्वतस्पृत्त्वात्यतिष्ठद्दशाङ्गुलम्।। यजुः ३१।१।।

भवति चात्रास्माकम्—

स दुर्धरो विष्णुरचिन्त्यरूपः
स्वात्मानुरूपञ्च जगद्विधाय ।
स्वं दुर्धरत्वं विविधं विचष्टे
तं दुर्धरं पूतधियो नमन्ति ।।१०२२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अपराजितः—७१६

परोपसर्गपूर्वक 'जि जये' इति भौवादिको धातुस्ततः कर्मणि 'क्तः' प्रत्ययोऽनिट्, गुणाभावश्च। न पराजीयतेऽन्यैरित्यपराजितः, पराजितशब्देन नञ्तत्पुरुषः समासो नञा नलोपः। न कश्चित्तमपरः पराजेतुं शक्त इत्यपराजितो विष्णुः। अथवा पर एव कश्चिन्नास्ति **"न द्वितीयो न तृतीयः"** इत्यथर्ववचनात् (१३।४।१६) तस्मात् पराजितत्वस्यासम्भवाद् भगवतोऽपराजित इति' नाम्ना सकीर्तनं युक्तमुपपद्यते। मन्त्रलिङ्गञ्च—

इन्द्रो बध्नातु ते मणिं जिगीवाँ अपराजितः। अथर्व ८।५।२२।।

तथा—

आदित्यानां वसूनां रुद्रियाणां देवो देवानां न मिनामि धाम।
ते मा भद्राय शवसे ततक्षुरपराजितमस्तृतमषाळ्हम् ।।

ऋक् १०।४८।११।।

लोकेऽपि च पश्यामः—कश्चित्प्राणी कञ्चिदपरं स्वतो बलिष्ठं प्राणिनं दृष्ट्वैतेन जितोऽहं स्यां कदाचिदिति मत्वा निरुत्साहो भवति त्यजति वा लक्ष्यम् न तथा स्वं स्वेन पराजितं मन्यते।

एवं भगवानखिलनामधरोऽपराजित इत्युक्तो भवति।

सख्ये त इन्द्र वाजिनो मा भेम शवसस्पते।
त्वामभि प्रणोनुमो जेतारमपराजितम् ।। ऋक् १।११।२।।

तथा च दृश्यते लोके—बहुलसाधनसम्पन्नमपि मरणशीलं शरीरं न अमरमात्मानं जेतुं क्षममित्यात्मा अपराजित इत्युच्यते।

अमुथैव भगवता निमित्तकारणेन यथापूर्वमिदं दृश्यतामानीतं जगत् स्वविकारैः कथं तमद्वितीयं जेतुं क्षमं स्यादित्यपराजितः स उक्तो भवति।

भवति चात्रास्माकम्—

परो न यस्यास्ति समो बलेन
रूपेण किं वा पर एव नास्ति ।
तस्माद्वदन्त्येव तमाप्तवेदा
विष्णुं न केनापि जितं कदाचित्।।१०२३।।

❖ ❖ ❖

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ।।६०।।

७१७ विश्वमूर्तिः, ७१८ महामूर्तिः, ७१६ दीप्तमूर्तिः, ७२० अमूर्तिमान्।
७२१ अनेकमूर्तिः, ७२२ अव्यक्तः, ७२३ शतमूर्तिः, ७२४ शताननः।।

विश्वमूर्तिः—७१७

विशेः क्वनि विश्वमिति "विश्व" नामव्याख्याने व्युत्पादितम्। विश्वं=जडचेतनात्मकः सर्वो दृश्यवर्गः। "मुर्च्छा—मोहसमुच्छ्राययोः" इति भौवादिको धातुस्ततः ***"स्त्रियां क्तिन्"*** (पा० ३।३।९४) सूत्रेण स्त्रीत्वविशिष्टभावे क्तिन् प्रत्ययः, ***"तितुत्रथसिसुसरकसेषु च"*** (पा० ७।२।६) सूत्रेणेटः प्रतिषेधः। ***"राल्लोपः"*** (पा० ६।४।२१) सूत्रेण झलादौ प्रत्यये रात् परस्य छस्य लोपः। ***"हलि च"*** (पा० ८।२।७७) सूत्रेण दीर्घे मूर्तिः, वैकल्पिकद्वित्वपक्षे च मूर्त्तिः। मूर्त्तिः=आकारः, मायारूपा मोहिका शक्तिर्वा। विश्वमेव मूर्तिराकारो यस्य सः विश्वमूर्तिः। अथवा विश्वमेव माया=विमोहिका शक्तिर्यस्य स विश्वमूर्तिः। अथवा विश्वस्य मोहिका शक्तिर्यस्य सः विश्वमूर्तिः। तथा हि सर्वमिदं विश्वं व्याप्य स्थितो भगवान् विष्णुर्विश्वाकारः सन् विश्वमूर्तिरित्युक्तो भवति। तस्य च सर्वस्य मोहिका शक्तिर्विश्वमेव। विचित्ररचनाचातुर्यमिदं विश्वं, विश्वान्तर्गतं प्रत्येकं वस्तु वा द्रष्टारं प्रति प्रत्यक्षत उपस्थितमपि मोहयतीव सर्वम्। आ तृणादामेरु बुद्धेरप्यगोचरेऽस्मिन् चराचररूपे विश्वे स सर्वत्र व्याप्तोऽव्यक्तरूपेण सर्वस्योद्भावकः सर्वस्याश्रयश्चास्ति। अत एव स विष्णुः सर्वव्यापकः, सर्वरूपः, सर्वमोहनः, सर्वाश्रयश्च विश्वमूर्तिरित्युक्तो भवति। मन्त्रलिङ्गञ्च—

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजुः ३१।१६।।तथा
तस्मिन् क्षियन्ति भुवनानि विश्वा। ऋक्।

भवति चात्रास्माकम्—

स्थानं न तद् यत्र न वर्तते "यत्"[1]
तद्दर्शकं विस्मितवद् विधत्ते ।
विद्वान् सदा विश्वगतञ्च विष्णुं
निजात्मवत् पश्यति वीतशङ्कः।।१०२४।।

१. यदिति=विष्णुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा—

शरीर आत्मा हि यथा ह्यदृश्यो
जीवो न केनापि दृशास्ति दृष्टः।
तथापि निर्वक्तुमहंधिया तं
मर्त्यो यथाशक्ति वचांसि [1]यौति।।१०२५।।

माया चेह—मीयते—ज्ञायतेऽनेनेति मायं=ज्ञानम् बाहुलकात् कर्मणि णः प्रत्ययो युगागमश्च, स्त्रियाञ्च माया—ज्ञानं शक्तिर्वा।

महामूर्तिः—७१८

महच्छब्दसिद्धिः पूर्वं प्रदर्शिता, तस्य शतृवद्भावविधानात् ***"उगितश्च"*** इति (पा० ४।१।६) सूत्रेण ङीप् प्रत्ययः पुंवद्भावश्च, महती मूर्तिर्यस्य स महामूर्तिः। मूर्तिशब्दश्चात्रापि प्राक् प्रदर्शितार्थोऽवगन्तव्यो जगन्मूर्त्तित्वात्तस्य।

अत्र च मन्त्रलिङ्गम्—

न तस्य प्रतिमा अस्ति यस्य नाम महद्यशः। यजुः ३२।२।।

महतः सर्वव्यापकस्य विष्णोर्मूत्तिरपि यथाजागतपदार्थव्याप्तिर्महती, लघ्वी च भवति। यथा जीवो यथाशरीरं शक्त्या रूपेण च व्यक्तो भवति, तथा महतो महती मूर्त्तिरिति व्यञ्जयितुं सर्वमहतोऽमोघस्य विष्णोर्महामोहनं विश्वमिति महद्रूपञ्च तस्य विश्वस्य। अत एव भगवतो जगन्मूर्तित्वान्महामूर्तिरिति नामाघुष्यत विद्वद्भिः।

भवति चात्रास्माकम्—

यावान् हि यस्तस्य च तावती स्यात्
छाया महामूर्तिपदेन विष्णुम् ।
गायन्ति पश्यन्ति कथानकेषु
शृण्वन्ति तं चोपचरन्ति तज्ज्ञाः ।।१०२६।।

व्याख्यातञ्च विस्तरतो ज्येष्ठनाम व्याख्याने। तद्यथा—

यस्य भूमिः प्रमा अन्तरिक्षमुतोदरम् ।
दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व १०।७।३२।।

---

१. यौति=सत्यान्यसत्यानि च मिश्रयति। यथाज्ञाननिचितैर्वचोभिर्यौति=निश्चयेन व्यामोहयति स्वात्मानं परात्मानञ्च। यथा लोकेऽपि प्रत्येकं प्राणी—आत्मनश्छायां दृष्ट्वाऽस्यां मत्कमेव रूपं व्याप्तमिति मन्यमानः तस्यां प्रियायते। तथैव विद्वानपि चराचररूपं जगत् तद्रूपमेव मन्यामानो विशोको रमते स्वात्मनि निर्भयम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दीप्तमूर्तिः—७१६

'दीपी दीप्तौ' इति दैवादिको धातुस्ततः कर्तरि क्तः ***''श्वीदितो निष्ठायाम्''*** इति (पा० ७।२।१४) सूत्रेण इण्निषेधः दीप्तः, स्त्रियां टाप्—दीप्ता। दीप्ता मूर्तिर्यस्य स दीप्तमूर्तिः। दीप्तशब्दोऽयं विशेष्यनिघ्नः, समासे तस्य पुंवद्भावः। तथा च यथा सूर्यादयो ग्रहाः सनक्षत्रा दीप्यन्ते= प्रकाशन्ते स्वात्मना, तथाऽयं दीप्तमूर्तिर्विष्णुः स्वतः प्रकाशते। स्वप्रकाशरूपेण च गुणेन विश्वं व्यश्नुवानः सर्वमपि प्रकाशयति। तद्यथा—म्रियमाणस्य तन्मृत्युज्ञापकानि लक्षणानि प्रकाशन्ते, यियासोः क्रियोपकरणं विलक्षणं भवति, प्रसोष्यमाणायाः प्रसवकालभाविन्यो वेदनाः जायन्ते, एवं सूक्ष्मपर्यालोचनेन भगवान् विष्णुर्दीप्तमूर्त्तित्वगुणेन सर्वत्र व्यष्टो द्रष्टेव लीलावत् सर्वं चरन्तं चारयति विश्वम्। मन्त्रलिङ्गञ्च—

विश्वतश्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुत विश्वतस्पात्।
सं बाहुभ्यां धमति सं पतत्रैर्द्यावाभूमी जनयन् देव एकः ।।

ऋक् १०।८१।३।।

भवति चात्रास्माकम्—

मर्त्यो यथा गुह्यतमानि कर्तुं
गुप्तं प्रदेशं कुरुते प्रयत्नात् ।
विष्णुर्न तद्वत् स तु दीप्तमूर्तिः
सर्वत्र सर्वञ्च करोति दीप्रम्।।१०२७।।

अमूर्तिमान्—७२०

न मूर्तिर्येषां तेऽमूर्तयोऽव्यक्तादयः। तेऽस्य सन्तीति अमूर्त्तिमान् विष्णुः। अथवा न—एवंविधेति निश्चितरूपा मूर्तिर्यस्य सोऽमूर्तिमान् विष्णुरिति भावानुसारिणी व्युत्पत्तिः। अमूर्त्तिशब्दात् ***''तदस्यास्त्यस्मिन्निति मतुप्''*** (पा० ५।२।३६) सूत्रेण 'मतुप्' प्रत्ययः। सुबादिकार्यमुपधादीर्घो, नुमादि च। एवञ्चामूर्त एव भगवान् विष्णुः सूर्यादिरूपेण सर्वत्र चरति तथा च मन्त्रलिङ्गम्—

तदेवाग्निस्तदादित्यस्तद् वायुस्तदु चन्द्रमाः।
तदेव शुक्रं तद् ब्रह्म ता आपः स प्रजापतिः।। यजुः ३२।१।।
प्रजापतिश्चरति गर्भे अन्तरदृश्यमानो बहुधा विजायते।

अथर्व १०।८।१३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा–

सूर्य व्रतपते !

चन्द्र व्रतपते !

अग्ने व्रतपते ! (द्र० साममन्त्र ब्रा० १।६।, ६।१२)।

इत्याद्यूह्यम्।

भवति चात्रास्माकम्–

नैवंविधैवास्ति च तस्य मूर्ति-
रित्थं विनिश्चेतुमिदं प्रवृत्तम् ।
अमूर्तिमान्नाम च तस्य विष्णोः
स एव सर्वत्र गतोऽस्त्यमूर्तः ।।१०२८।।

अनेकमूर्तिः–७२१

एकः–"इण् गतौ" इत्यादादिको धातुस्ततः ***"इण्भीका०"*** (३।४३) इत्यादिनोणादिसूत्रेण 'कन्' प्रत्ययः, तस्मिंश्च परतो गुणः, एक इति। न एकम् अनेकमिति नञ् समासे नञो नलोपः। अनेका मूर्तयो यस्य सोऽनेकमूर्तिः। मूर्त्तिशब्दश्च मूर्च्छतेः क्तिनि पूर्ववद् व्युत्पादनीयः। पुरुमूर्त्तिरिति भावः। तथा च मन्त्रलिङ्गम्–

इन्द्रो मायाभिः पुरुरूप ईयते। ऋक् ६।४७।१८।।

तथा च भगवान् विष्णुर्मायाभिः पुरुरूपतां प्राप्नुवन् प्रतिजाति बाहुविध्यं विदधदनेकमोहनः, अनेकाश्रयश्च भवति। एकमनेकमिव व्यनक्तीत्यर्थः। जीवितमनुष्यगोऽश्ववृक्षमूषकमूषिकामत्स्यसर्पादीनां दर्शनेन वस्तुतो मनुष्यस्य बहुविधमूर्त्तित्वं प्रकटयति। एवञ्चानेकमूर्तित्वरूपेण गुणेन सर्वत्र व्याप्तो भगवान् विश्वं व्यवस्थापयति। मन्त्रलिङ्गञ्च–

रूपं रूपं मघवा बोभवीति मायाः कृण्वानस्तन्वः परिस्वाम्।
त्रिर्यद् दिवः परिमूहूर्तमागात् स्वैर्मन्त्रैरनृतुपा ऋतावा ।।
ऋक् ३।५३।८।।

रूपमधिकृत्य, **नैकरूप**व्याख्याने यदुक्तं तदिहापि समुन्नेयम्।

भवति चात्रास्माकम्–

विश्वं हि विष्णुः परिगृह्य सर्वं
विभिद्य तत् तत्र च वर्तमानम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकं हि सन्तं बहुधा तमाप्ता
अनेकमूर्तिं परिभाव्य तस्थुः।।१०२६।।

मन्त्रलिङ्गञ्च—

एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।
ऋक् १।१६४।४६।।

विश्वम्=चराचरम्।

त्रिषु विक्रमणेष्वधि क्षियन्ति भुवनानि विश्वा। ऋक् १।१५४।२।।

तस्थुः=स्थिरैरङ्गैः स्तोतुं प्रववृतिरे।

अव्यक्तः—७२२

'वि' उपसर्गपूर्वः अञ्जू व्यक्तिम्रक्षणकान्तिगतिषु इति रौधादिको धातुस्ततो ***''अञ्जिधृसिभ्यः क्तः''*** (३।८६) इत्युणादिसूत्रेण कर्तरि क्तः प्रत्ययः ***''तितुत्रतथसिसुसरकसेषु च''*** (पा० ७।२।६) सूत्रेणेण्निषेधः। ***''अनिदितां हल उपधायाः क्ङिति***'' (पा० ६।४।२४) सूत्रेण नकारलोपः। ***''चोः कुः''*** (पा० ८।३।३०) इति सूत्रेण कुत्वम् वेरिकारस्य यण्। विविधमात्मानम्—अनक्तीति व्यक्तः। न व्यक्तः अव्यक्तः। नञ्तत्पुरुषो नञो नलोपः। मनुजः स्थलपद्मं पश्यन्नपि, तत्तत्त्वतो व्याकर्तुमक्षम उपरमति, तच्चाव्यक्तमेतदित्याचष्टे। तद्यथा—यदा पुष्पं स्वं रूपं व्यनक्ति, तदा तन्मूलमव्यक्तं भवति, तत्पार्थिवाणुसंयोगवियोगौ चाप्यव्यक्तौ भवतः। यदा कश्चिद्विद्वान् तन्मूलमुत्पाट्य पश्यति तदा तन्मूलं व्यक्तं सन्न व्यनक्ति स्वं कार्यमात्मात्मानम्। अर्थात् कार्यमव्यक्ततां याति। अतोऽव्यक्तं वैष्णवं कर्म, यतो हि तस्य कर्ताऽव्यक्तोऽस्ति। एवं सर्वत्र विश्वेऽव्यक्तत्वगुणस्य व्याप्तिदर्शनात्, स भगवानव्यक्त इति गौणेन नाम्ना स्तूयते। एवं सर्वत्रोह्यं लोकानुरूपम्। मन्त्रलिङ्गञ्च—

अन्ति सन्तं न पश्यति अन्ति सन्तं न जहाति।
देवस्य पश्य काव्यं न ममार न जीर्यति।। अथर्व १०।८।३२।।
एको देवः सर्वभूतेषु गूढः। श्वे० उ० ६।११।।

गूढः=गुप्त इत्यनर्थान्तरम्।

इतरा प्रकृतिरप्येतस्मादेवाव्यक्ताभिधाना। न ह्येकेन विकारेण व्यनक्त्यात्मानम् अपितु नाना स्वविकारान्तर्निगूढा तन्मूलभूतेति। स्त्रियोऽप्यव्यक्ताभिधानमर्हन्ति, यतो हि ता अपि स्वसन्ततिप्रकृतिरूपाः। प्रकृतिरिव मनोऽप्यव्यक्तं, रूपाणां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रकृतित्वात्, इति दिङ्मात्रमुक्तम्—

भवति चात्रास्माकम्—

अव्यक्तमाहुर्मुनयस्तमक्तं
व्यक्तं पुनस्तञ्च [1]विभक्तमाहुः ।
तथा यथा व्यक्ततमोऽत्र सूर्योऽ-
व्यक्तस्वरूपेण[2] जगद् बिभर्ति ।।१०३०।।

शतमूर्तिः—७२३

शतशब्दो मूर्तिशब्दश्च प्राग् व्युत्पादितौ। शतशब्दोऽनन्तपर्य्यायः। सहस्रशब्दोऽपि निघण्टौ बहुनामसु पठितोऽनन्तपर्याय एव। विश्वं शतधा, सहस्रधा वा विधाय तत्रानुस्यूतो भगवान् विष्णुस्तद्रूपतां प्रतिपद्य अनन्ताकारः शतमूर्तिरिवाभाति। अतएव स शतमूर्तिः, सहस्रमूर्तिर्वोक्तो भवति। जगज्जन्यभेदं प्रधानीकृत्यैतन्नाम सङ्कीर्तितम्। अनेकमूर्तिरेव शतमूर्तिः, बहुमूर्तिर्वा।

मन्त्रलिङ्गञ्च—

इन्द्रं मित्रं वरुणमाहुः अथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।।

ऋक् १।१६४।४६।।

तथा—

शतं सेनाः=अजयत्साकमिन्द्रः। ऋक् १०।१०३।१।।

शतं सेनाः=बहुसेना इत्यर्थः।

भवति चात्रास्माकम्—

एको रसोऽर्कप्रभवः पृथिव्यां
विभिद्यते सोऽत्र च पाकभेदात् ।
यथा तथाऽयं परियातविश्वो[3]
विष्णुर्निजं[4] मूर्तिशतैर्व्यनक्ति ।।१०३१।।

---

१. विभक्तम्=अव्यक्तम्; २. अव्यक्तस्वरूपेण=नानाशक्तिभेदेन। ३. परियातं=व्याप्तं विश्वं येन सः। ४. निजं स्वरूपमित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शताननः—७२४

शतशब्दो व्युत्पादितः। आङुपसर्गपूर्वः "अन प्राणने" धातुरादादिकस्ततः ***"करणाधिकरणयोश्च"*** (पा० ३।३।११७) सूत्रेण करणे ल्युट् प्रत्ययो योरनादेशः। आ=समन्ताद् अन्यते=प्राण्यतेऽनेनेत्याननं=मुखम्। मुखसाहचर्य्याच्च मूर्धापि मुखमुच्यते, प्रधानानामाधारभूतानां ज्ञानेन्द्रियाणां मूर्ध्न्येव सत्त्वात्। शतं=आननानि यस्य स शताननः अनन्तानन इत्यर्थः। प्राणा हि जीवनहेतवः। जीवनोपायानाञ्च बाहुविध्यं, तथा च यद्यज्जीवने शिल्पवैशिष्ट्यं तत् तत् तस्यैव भगवत इत्याख्यातुं शताननना‌म्ना भगवान् विष्णुः स्तूयते।

मन्त्रलिङ्गञ्च—

ब्राह्मणोऽस्य मुखम्। यजुः ३।१।११।।

ब्रह्म=ज्ञानं तस्येदं ब्राह्मणं=ज्ञानेन्द्रियाश्रयं मुखं मूर्धा वा। इत्यूहितव्यम्। ऊहाकरणं हि व्याकरणस्य प्रयोजनम्। तथा च पाञ्जलमहाभाष्यम्— ***"रक्षोहागमलध्वसन्देहाः प्रयोजनम्"*** इति पस्पशाह्निके। सर्वप्राणिज्ञानाधारस्य मुखस्य मूर्ध्नो वा निर्माणकौशलं, तमेव व्यनक्ति भगवन्तं विष्णुमित्यभिप्रेत्य **"सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपाद्"** (यजुः३१।१) इति मन्त्रलिङ्गमिति संगन्तव्यम्।

भवति चात्रास्माकम्—

शताननो विष्णुरिहामुखो वा[1]
तथैव बोध्यं स सहस्रशीर्षा।
मुखं सदेकं बहुरूपभक्तं
[2]त्वष्टारमाम्नाति ततं हि विश्वे।।१०३२।।

यद्वा—आङ् पूर्वादनतेः ***"हेतुमति च"*** (पा० ३।३।२६) सूत्रेण प्रयोजनव्यापारे 'णिच्" प्रत्ययस्तन्निमित्तोपधावृद्धिश्च आनि—इति णिजन्तान्नन्द्यादिल्युः कर्तरि। आनयतीत्याननः शतं=अनन्तान्यानयति=जीवयतीति शताननः। चतुर्विधसृष्ट्युद्भाविनोऽनन्तान् जीवान् तत्तज्जीवनीयैरुपकरणैरानयति=जीवयति—इति शताननो विष्णुरुक्तो भवति।

---

१. वा=अप्यर्थकः। २. तथा च **"त्वष्टा रूपाणि पिंशतु"** (अथर्व ५।२५।५) **"ये त्रिषप्ताः"** (अथर्व १।१।१।) इत्यादि पदं, रूपविभरणे मूलम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

त्वं महां इन्द्र ये ह शुष्मैर्द्यावापृथिवी जजान अमे धाः ।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृह्ळासः किरणा नैजन्।।

ऋक् १।६३।१।।

भवति चात्रास्माकम्—

यथा स विष्णुर्भुवनं जजान
तथा स विष्णुर्बहुधा बभूव ।
[१]दिव्यानिवाण्डाज्जलजांश्च सोऽण्डात्
धरेव योनीर्जनयत्यनेकाः ।।१०३३।।

तथा—

अहं हि मन्ये महिमानमस्य
शताननस्यैकरसस्य कल्पात् ।
प्रक्लृप्य सर्वं स दधार सर्वं
तेभ्यो ददात्येव च भोजनानि[२] ।।१०३४।।

❖ ❖ ❖

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ।।६१।।

७२५ एकः, ७२६ नैकः, ७२७ सवः, ७२८ कः, ७२६ किम्, ७३० यत्, ७३१ तत्, ७३२ पदमनुत्तमम्। ७३३ लोकबन्धुः, ७३४ लोकनाथः, ७३५ माधवः, ७३६ भक्तवत्सलः।।

एकः—७२५

"इण् गतौ" इति आदादिको धातुस्तत ***"इण्भीकापाशल्यर्तिमर्चिभ्यः कन्"***

---

१. दिव्याः=दिवि भवाः=आकाशीया इत्यर्थः। २. मन्त्रलिङ्गञ्च—
"मां हवन्ते पितरन्न जन्तवो अहं दाशुषे विभजामि भोजनम्।"

ऋक् १०।४८।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(३।४३) इत्युणादिसूत्रेण कन् प्रत्ययः गुणः। अनिट् चायं धातुः। एति=गच्छति सर्वत्रेत्येकः। बह्वर्थोऽयमेकशब्दो यथा च पातञ्जलभाष्ये—

एकशब्दोऽयं बह्वर्थः। अस्त्येव संख्यावाची, यथा—एको द्वौ—बहवः। अस्ति चासहायवाची, यथा—एकाग्नयः एकहलानि। एकाकिभिः क्षुद्रकैर्जितम्, असहायैरित्यर्थः। अस्त्यन्यार्थकश्च यथा—प्रजामेका रक्षत्यूर्जमेका, अन्येत्यर्थः। सधमादो द्युम्न एकास्ता अन्या इत्यर्थः। (१।१।२३)

भगवान् विष्णुः सर्वमितो भवतीत्येकः। मन्त्रलिङ्गञ्च—

द्यावाभूमी जनयन् देव एकः। ऋक् १०।८१।३।।

लोकेऽपि च पश्यामः—एति, स्त्रियं गच्छतीत्येकः पिता। नहि दृश्यते लोके द्वयोः पित्रो रूपाकृतिं दधान एको जातक इति। कुत एवं? तस्य भगवतो विष्णोरेकत्वधर्मस्य सर्वत्र व्याप्तत्वात्। एवञ्चैको विष्णुर्विश्वं व्यश्नुवान आस्ते। दृश्यते च लोके—अन्यशाखोपर्यारोपितान्यशाखान्वितो वृक्षो यं बीजं जनयति, नहि स बीजो जनयत्यात्मनः सदृशं वृक्षं, यतः स बीजो द्वन्द्वजः। तस्मिन् क्षुपे एकत्वस्य व्यभिचारात्। एवमन्यत्राप्यूहनीयम्।

भवति चात्रास्माकम्—

एकः स विष्णुः सकलं विजन्य
पितेव तञ्चैति स [१]एकसंज्ञः।
[२]वापो यथा याति च गर्भधिं स्वां
न चैककालेऽस्ति गतिर्द्वयोऽतः।।१०३५।।

नैकः—७२६

न शब्दोऽयं निषेधार्थकः। नञो वा नलोपाभावः। एकशब्दो व्युत्पादितः प्राक्। न एको यस्मादिति नैकः। अर्थाद्यस्मादन्यः कश्चिदेकसंज्ञाभाङ्नास्ति, स नैकः। मन्त्रलिङ्गञ्च—

एक इद्राजा जगतो बभूव। ऋक् १०।१२१।३।।

न तस्य प्रतिमा अस्ति। ३२।२।।

लोकेऽपि च पश्यामः=समानपितृभ्यामपि जातो नैकं धर्मं न जहाति।

---

१. एकः प्रधानः। २. वापः—वप्ता बीजस्य।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

विश्वं जनित्वा स विभुर्विशिष्टः
नैकं करोत्यात्मगुणानुरूपम् ।
समानपित्रोरपि जायमानः
पृथग् व्यनक्त्येव सहोदरात् स्वम् ।।१०३६।।

सवः—७२७

श्रेष्ठं सवं सविता साविषन्नोऽभीद्धो धर्मस्तदु षुप्रवोचम्।

ऋक् १।१६४।२६।।

सवोः—यज्ञ इति।

तथा च—

अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा ।
अभि सम्राजो वरुणो गृणन्त्यभिमित्रासो अर्यमा सजोषाः।।

ऋक् ७।३८।४।।

यो हि स्यति=अन्तयति=निश्चाययति स्वविषयं ज्ञानं, वसति च सर्वत्रेति सवः। निश्चितोदयास्तरूपं सर्गप्रलयकरं वा सूर्यस्य यत् कर्म, यद्वा **देवस्येति** सूर्यस्येश्वरस्य वेति, सूर्येण सहेश्वरोऽपि व्याख्यातो भवति, सूर्यो हि विष्णुरिति सहस्रनामस्तोत्रे पठितत्वात् उदयास्तकरं सर्गप्रलयकरं च धर्मः उभयोरेव।

भवति चात्रास्माकम्—

सवं हि देवस्य पुरातनस्य
गृणाति देवी किमु वाऽथ सर्वे ।
गृणन्ति देवाः किमु मित्रवर्गः
किं वार्यमा किं वरुणः सजोषा ।।१०३७।।

सः—वः (इति वा छेदः)

सः—षो अन्तकर्मणीति दैवादिको धातुः षकारस्य सकारादेशः। ***''शशिमुषिस्यति''*** इत्यादिनोणादिसूत्रेण ***''अन्येष्वपि दृश्यते''*** इति (पा० ३।२।१०१) सूत्रेण वा डः प्रत्ययः, टिलोपश्च। स्यति=अन्तयति, विश्वमिदमेवंविधं सव्यवस्थमिति निश्चयायतीति सः—विष्णुः। स चैतेन निश्चायनरूपेण गुणेन सर्वं विश्वं व्यश्नुतेऽतः स इत्युक्तो भवति। लोकेऽपि पश्यामः—कस्यचित्कार्यस्य कर्ता पूर्वं विनिश्चिनोति, पश्चात् कार्यमारभते। अयं गुणः मनुष्येषु पश्वादिषु च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वत्र व्याप्तो दृश्यते, स्थावरसृष्ट्यां बीजोद्भवकालः पाककालश्च निश्चितो भवति, स एव ससंज्ञो विष्णुस्तत्र तत्र स्वं रूपं प्रकाशयति। मन्त्रलिङ्गञ्च—

स नः पितेव सूनवेऽग्ने सूपायनो भव।

सचस्वा नः स्वस्तये। ऋक् १।१।६।।

भवति चात्रास्माकम्—

निश्चायिता ज्ञानविधिः स विष्णु-

र्विश्वं जनित्वा न करोति मोहम् ।

यतो ह्यमोघः स पुनर्मनस्वी

काव्यं जगत् सान्तमिदं करोति ।।१०३८।।

सान्तं=निश्चितान्तपरिणाममिति भावः।

वः—वस निवास इति भौवादिको धातुस्ततः ***"अन्येष्वपि दृश्यते"*** इति (पा० ३।२।१०१) सूत्रेण डः प्रत्ययो डिति टेर्लोपश्च। ततः प्रातिपदिकत्वात् सुः प्रत्ययो वसतीति वः। एवञ्च विश्वे वसति यः स व इति। लोकेऽपि च पश्यामः—जीवात्मा स्वशक्त्या सर्वं शरीरं व्यवस्थापयन् तत्र वसति, तस्मिन् वा जीवात्मनि शरीरे निवसति सति शरीरमिदं चेतनवद् भवत् पूजां प्राप्नोति।

तथैवायं लोकस्तेन 'वेन' विष्णुना वासरूपेण गुणेन जगद् व्यश्नुवानेन चेतनवत् प्रत्याय्यते। मन्त्रलिङ्गञ्च वासार्थे—

जिघर्म्यग्निं हविषा घृतेन प्रतिक्षियन्तं भुवनानि विश्वा ।

पृथुं तिरश्चा वयसा बृहन्तं व्यचिष्ठमन्नै रभसं दृशानाम्।।

ऋक् २।१०।३।।

क्षियन्तं=वसन्तम्।

तथा—

ईशा वास्यमिदं सर्वं यत्किं च जगत्यां जगत्। यजुः ४०।१।।

भवति चात्रास्माकम्—

सर्वं हि वो व्याप्य जगत् समस्तं

तज्जीवयच्चेतनवद् विधत्ते ।

तस्मिन् हि वै प्रीतिमुपैति विश्वं

न तद्विना भाति मृतं वपु र्वा[1] ।।१०३९।।

---

१. वा शब्द उपमावाचकः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स व इत्येवं पाठे ***''सुपां सुलुक्०''*** इत्यादिना (पा० ७।१।३९) सूत्रेण सोर्लुक्—छान्दसः। अत्रापि **''ऋषिभिः परिगीतानि''** इति प्रतिज्ञातत्वात्। यद्वा सश्चासौ वश्चेति सव इत्येकं नाम। यद्वा—सुवतेः सवो यज्ञपर्यायोऽत्र यज्ञश्च विष्णुः। एवं महार्थवत्त्वं नाम्नः प्रदर्शितम्।

कः—७२८

''कनी दीप्तिकान्तिगतिषु'' इति भौवादिको धातुस्ततः ***''अन्येष्वपि दृश्यते''*** (पा० ३।२।१०१) सूत्रेण डः प्रत्ययस्तस्मिंश्च टेर्लोपे कृते क इति सिध्यति। कान्तो दीप्तो गतो वा भवति सर्वत्रेति कः। विष्णोरेतन्नाम।

तथा च मन्त्रलिङ्गम्—

अहेर्यातारं कमपश्य इन्द्र हृदि यत्ते जघ्नुषो भीरगच्छत्।
नव च यन्नवतिं स्रवन्ती श्येनो न भीतो अतरो रजांसि।।

ऋक् १।३२।१४।

यथा शरीरे या कान्तिश्चेतनात्मिका दीप्तिर्गतिर्वा, सा जीवस्यैवेति निश्चितम्, यतो हि जीवेऽपयाते शरीरमपि निष्प्रभं भवति। तथैवेदं जगत् काख्येन विष्णुना व्याप्तं सत् कान्तिमद् दृश्यते, तस्माद् भगवान् विष्णु कः इत्यनया संज्ञया व्यवहृतो भवति।

भवति चात्रास्माकम्—

आभा शरीरे प्रबलं हि भाति
काख्येन जीवेन समर्ध्यते सा।
तथैव विश्वं प्रपदं वसानः
कः कान्तिमद्विश्वमिदं विधत्ते।।१०४०।।

अथ च मन्त्रलिङ्गम्—

गर्भे नु नौ जनिता दम्पती कर्देवस्त्वष्टा सविता विश्वरूपः।
न किरस्य प्रमिनन्ति व्रतानि वेद नावस्य पृथिवी उत द्यौः।।

ऋक् १०।१०।५।।

किम्—७२९

''प्रच्छ ज्ञीप्सायाम्'' तौदादिको धातुस्तत 'इम्' प्रत्यय औणादिकः धातोः ककारादेशश्चोह्यते—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे।
कार्याद्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु। महाभाष्य ३।३।१।।

इत्यनुशासनानुसारम्। पृच्छतीति किम्। पृच्छ्यत इति वा किम्।

यद्वा "कै शब्दे" इति भौवादिको धातुस्ततो 'डिम्' प्रत्ययः औणादिको डित्त्वाट्टिलोपः, कायतीति किम्।

सर्वत्रैव किमिदं? कथं वेदं? कुतो वेदम्? इत्येव रूपेण सर्वत्र व्यष्टमाख्यातुं किमितिनाम्ना व्यपदिश्यते भगवान् विष्णुः। मन्त्रलिङ्गञ्च—

अम्भः किमासीद् गहनं गभीरम्। ऋक् १०।१२६।१।।

तथा

कुत आजाता कुत इयं विसृष्टिः। ऋक् १०।१२६।६।।
योऽस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद।
ऋक् १०।१२६।७।। इत्याद्यूह्यम्।

भवति चात्रास्माकम्—

विचित्रचित्रं यदिहास्ति विश्वे
दृश्यं तथा ज्ञानदृशा च गम्यम् ।
सर्वत्र तत्रास्ति स वर्तमानः
किं किं कुतो वेति च तत्र गुप्तः।।१०४१।।

स विष्णुस्तत्र गुप्तो=निगूढः। उत्तरलभ्य इत्यर्थः।

यत्—७३०

"यती प्रयत्ने" इति भौवादिको धातुस्ततः कर्तरि क्विप् यतते, यतिष्यते अयतिष्ट, वेति, यत्, क्विपः सर्वापहारः, जश्त्वचर्त्वे यत्, यद्।

यद्वा—"यज देवपूजासङ्गतिकरणदानेषु" इति भौवादिको धातुस्ततः ***"त्यजितनियजिभ्यो डित्"*** (उ० १।१३२) इत्युणादिसूत्रेण 'अदिः' प्रत्ययः स च डित्, डित्त्वादभस्यापि टेर्लोपः। **त्यजितन्याद्यु** णादि सूत्रे यजिस्थाने क्वचिन्मतभेदेन यतिरेव दृश्यते। तन्मते यततेरेवादिः प्रत्ययो यतत इति यत्, कर्ता। एतच्च सार्वकालिकप्रत्ययविधानं—

प्रत्यक्षे च परोक्षे च समीपे दूरतस्तथा ।
सर्वेषाञ्च प्रयोक्तव्यस्तथा पुंस्त्रीनपुंसके।।

इति वृद्धानुशासनात् (दश उ० वृत्तौ ६।४३, उपलभ्यते)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्यपि यत्तद्किमादीनां सर्वादिगणपठितत्वात् सर्वनाम संज्ञा प्राप्नोति द्वितीयकल्पे, तथापीह न भवति संज्ञाशब्दत्वादेतेषाम्। संज्ञाभूतास्तु न सर्वादय इति सिद्धान्तात्। मन्त्रलिङ्गञ्चार्थप्रधानम्—

यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन।
स धीनां योगमिन्वति। ऋक् १।१८।७।।
यस्मिन् विश्वानि भुवानानि तस्थुः। ऋक् ७।१०१।४।। तथा च—
यस्मिन् विश्वानि पौंस्याः। ऋक् १।५।६।।

एतेन महावीर्य इति नाम्नोऽन्वर्थता सम्पद्यते।

यथा च ब्रह्मणि सर्वाणि भुवनानि वसन्ति, तथैव जीवति शरीरे सर्वाण्याशानिबद्धानि भुवनानि स्वानि कर्माणि कुर्वन्ति जीवात्मनि वसन्ति। तदपाये तेऽपि विकारमुपयान्तीति भावः। अमुथैव 'यत्' शब्दाभिधेयो भगवान् विष्णुर्विश्वं व्यश्नुवानो यजमानयज्ञमिव विश्वं नयति सर्वोपकरणेन सहेति 'यत्' इत्युच्यते। अत्—तत्—त्यद् एतानि ब्रह्मणो नामानीत्याहुराचार्याः (द्र० उणादि कोषव्याख्या १।१३२)।

भवति चात्रास्माकम्—

यदस्ति विष्णुः स इहास्ति विश्वे
तस्मिन् ह तस्थुर्भुवनानि विश्वा ।
यदेव यस्मिन् हि पदस्थवाच्यं
तदेव तस्मिन् पदतोऽस्ति गम्यम्।।१०४२।।

तत्—७३१

"तनु विस्तारे" इति धातुस्तानादिकस्ततः सार्वकालिकः क्विप्, तस्मिंश्च पा० ६।४।४० सूत्रस्थेन ***"गमादीनामिति वक्तव्यम्"*** इति वार्तिकेनानुनासिकलोपः, ततो ***"ह्रस्वस्य पिति कृति तुग्"*** (पा० ६।१।७१) इति सूत्रेण तुगागमो जश्त्वचर्त्वे च, तत्—तदिति। यद्वा "तनु विस्तारे" इति धातोः ***"त्यजित्यनियतिभ्यो डित्"*** (उ० १।१३२) इत्युणादिसूत्रेण डिद्वद्भावभावितः 'अदिः' प्रत्ययः, तथा ***"डित्त्वसामर्थ्यादभस्यापि टेर्लोपः"*** इति वचनाट्टिलोपो जश्त्वचर्त्वे, तद्—तत् इति सर्वनामसंज्ञेह न भवतीति पूर्वमुक्तं यन्नाम्नि। तनोति विश्वमिति तत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजु: ३१।१६।।

तथा

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे।
छन्दा ँसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।। यजु: ३१।७।।

अर्थप्रधानमेतत्।

भवति चात्रास्माकम्—

ततं जगत्तेन ततं हि मन्ये
तस्मिन् ह तस्थुर्भुवनानि तद्वत् ।
गर्भो यथा मातरि गुप्त आस्ते
ततोऽस्ति माता तदिहास्ति विष्णुः।।१०४३।।

पदमनुत्तमम्—७३२

"पद गतौ" इति दैवादिको धातुस्ततः ***"खनो घ च"*** इति (पा० ३।३।१२५) सूत्रे घित् करणाच्चकाराद्वा प्रकृत्यन्तरादपि घः प्रत्ययो भवतीति ज्ञाप्यते (द्र० काशिका ३।३।१२५)। तेनात्र कर्मणि घ प्रत्यये, पद्यते=गम्यते, ज्ञायते, प्राप्यते, यत्यते वा यदर्थं तत् पदम्।

उत्तमम्—उत्कृष्टवाचिन उच्छब्दाद् ***"अतिशायने तमबिष्ठनौ"*** (पा० ५।३।५५) सूत्रेणातिशायनिकस्तमप्, चर्त्वम्। नञ्बहुब्रीहिसमासे, नञो न लोपो नुडागमश्च। न उत्तमं यस्मादित्यनुत्तमम्। धर्मविदुत्तमनामव्याख्यावसरे उत्तमशब्दो विशदं व्याख्यातस्तत्र द्रष्टव्यः। अनुत्तमञ्च तत्पदमित्यनुत्तमं पदम्।

अतः पदमनुत्तममित्येतत् सविशेषणमेकं नाम, आविष्टलिङ्गञ्च—

मन्त्रलिङ्गञ्च—

हिरण्यपाणिमूतये सवितारमुपह्वये।
स चेत्ता देवता पदम्।। ऋक् १।२२।५।।

तथा

समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।
अर्वाचीनं वस्तुविदं भगं नो रथमिवाश्वा वाजिन आवहन्तु।।

ऋक् ७।४१।६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।

समूढमस्य पांसुरे। ऋक् १।२२।१७; यजुः ५।१५।।

लोकेऽपि च पश्यामः—सर्वं वस्तु स्वरूपतस्त्रिधा भिद्यते। तद्यथा—उर्वारुकमेकं वस्तु, तच्च त्वङ्मांसबीजरूपेण त्रिधा भिन्नम्। तत्र त्वक् भूतस्थानीया, मांसो वर्तमानस्थानीयः, तथा—बीजं भविष्यत्स्थानीयमिति। ज्येष्ठे मासि पक्वं त्रोटितञ्चोर्वारुकं वर्तमाने (ज्येष्ठे मासि) तस्य मांसो वर्तमान इव भुज्यते स च वर्तमानो ज्येष्ठो मासः, जायते—उत्पद्यते भाद्रपदमासात्, जनयति च फाल्गुनम्, तत्र मासानां संक्रमणमधिकृत्येवमुच्यते—ज्येष्ठमासस्य—भूतमासः फाल्गुनमासः भविष्यन्मासश्च भाद्रपदमिति, यतो हि—'अङ्कानां वामतो गतिरिति दक्षिणावर्तनमधिकृत्योच्यते। प्रत्यक्षतस्तु वामावर्त्तनमिवांकानां व्यवहारः। तद्यथा एकः—द्वौ—त्रय इति—३२१, पठने च एकविंशत्युत्तरं त्रिशतमिति, एवमेव—बीजानि—भाद्रपदे भविष्यदिव, त्वक् फाल्गुने भूतमिवेति निश्चेतव्यम्। न्यासस्तु—

४—१—१०

५—२—११

६—३—१२ इति

एवं सर्वत्र—सर्वमासानां उत्पाद्योत्पादकभावेषु योजना कर्त्तव्या भवति। यदि च वैशाखजं तत् फलं, तदा भूतो माघस्त्वक्, वर्तमानो वैशाखो मासः, भविष्यञ्छ्रावणमासो बीजम्। एवं यदि चाषाढजं फलं, तदा पौषस्त्वक् आषाढो मासः आश्विनो मासो बीजम्। इतिदिङ्मात्रमिहोक्तम्, बहुत्र चेदं बहुधा व्याख्यातं विविधोहाभिर्यतो हि सर्वं त्रिपर्वकम्। इदमेव च त्रिपर्वकत्वं वेदेषु **त्रिवृत्** पदेनोच्यते, ब्राह्मणग्रन्थेषु च बहुधा व्याख्यायते। तद्यथा—**हन्ताहमिमास्तिस्त्रो देवताः, तासां त्रिवृतं त्रिवृतमेकैकां करवाणि** (छा० ३०६।३।२, ३)। **वायुर्वा आशुस्त्रिवृत्** (शत० ८।४।१।६) **अग्निर्वै त्रिवृत्** (तै० ब्रा० १।५।१०।४)।

भवति चात्रास्माकम्—

विश्वं हि सर्वं पदनीयमेकं
तस्य त्रिधा स्यूतमिहास्ति कर्म ।
यो वेत्ति सूत्रं किमु सूत्रसूत्रं
स [1]ब्राह्मणं वेद [2]महच्च विष्णुम्।।१०४४।।

१. ब्रह्मण इदं ब्राह्मणं=जगत्। २. महत्=विष्णुः, **"तस्य नाम महद्यश"** इति (३२।३) याजुषान्मन्त्रलिङ्गात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकबन्धुः—७३३

"लोकृ दर्शने" इति भौवादिको धातुस्ततो भावे घञि लोक इति।

बन्धुः—"बन्ध बन्धने" इति क्रैय्यादिको धातुस्ततः ***"शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च"*** (१।१०) इत्युणादिसूत्रेण 'उ' प्रत्ययः। बध्नातीति बन्धुः। सर्वं दृश्यमानं तेन ब्रह्मणैव नियतायुष्कं बद्धं सद् दृष्टिगोचरं भवति, लोकबन्धुत्वसामान्येन, लोके यो हि यस्य विकारः स तेन बद्धो भवति।

यद्वा, लोकः प्रकाशः, तद्रूपं सूर्यं बध्नाति=आकाशे गमनाय नियमयतीति लोकबन्धुर्विष्णुः।

सौरमण्डलं वा सर्वं लोकः, तं बध्नातीति लोकबन्धुः। लोकेऽपि च पश्यामो, भोक्ता भोगं बध्नाति। यथा दुग्धं पिपासुर्गां बध्नाति, एवं सर्वत्रोह्यम्।

भवति चात्रास्माकम्—

स लोकबन्धुर्भगवान् मनस्वी
बध्नाति युक्त्या च ततं समस्तम्।
न तत्र रज्जुर्न च दृश्यमन्यत्
स केवलस्तत्र निगूढकर्मा ।।१०४५।।

मन्त्रलिङ्गञ्च—

उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः।
ऋक् १।१५४।५।।

तथा— **स नो बन्धुर्जनिता।** यजुः ३२।१०।।

लोका मनुष्यास्तेषां पारस्परिकं जीवनार्हं व्यवहारं वेदोपदेशेन बध्नातीति लोकबन्धुः।

लोकनाथः—७३४

"लोकृ दर्शने" इति भौवादिको धातुस्ततो ***"हलश्च"*** (पा० ३।३।१२१) सूत्रेणाधिकरणे घञ्, लोकन्तेऽस्मिन्निति लोकः स्थावरजङ्गमात्मकं जगत्, तत्स्थाः प्राणिनो वा।

"नाथृ याच्ञोपतापैश्वर्याशीःषु" इति भौवादिकाद्धातोः पचाद्यच्, नाथन्त इति नाथाः। एवञ्च लोकाः-लोकस्थाः प्राणिनो नाथन्ते यं स लोकनाथ इति द्वितीयाबहुव्रीहिः। अथवा लोकतेः पचाद्यच् प्रत्ययः कर्तरि, नाथतेश्च घञ् प्रत्ययः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्मणि, तथा च लोकैः प्राणिभिः स्वार्थसिद्धये नाथ्यते-प्रार्थ्यत इति लोकनाथः। मन्त्रलिङ्गञ्च—

मां हवन्ते पितरं न जन्तवो अहं दाशुषे विभजामि भोजनम्।

ऋक् १० ।४८ ।१

यद्वा लोकं नाथति, स्वैश्वर्ययोगेनैश्वर्यवन्तं करोतीति लोकनाथः—अत्र **तत्सूर्यस्य देवत्वं तन्महित्वम्** (ऋक् १ ।११५ ।४) इति।

भूतभव्यभवन्नाथ इति नामव्याख्याने यदुक्तं तदिहापि द्रष्टव्यम्—

पुरुष एवेदं सर्वं यद्भूतं यच्च भाव्यम् (यजुः ३१ ।२) इति यजुश्च।

याच्ञा-याचना अर्थनास्वरूपश्चोक्तोऽर्थानर्थनाम्नोर्व्याख्याने, तत्र सम्यग् द्रष्टव्यम्।

लोकैर्याच्यते, लोकानामीष्ट इति वा लोकनाथः।

पश्यामश्च लोकेऽपि, जीवो हि स्वतः श्रेष्ठं ज्येष्ठञ्च प्रार्थयते। यथा निर्धनो धनिनं, विद्यार्थी विद्यावन्तम्। सबलश्च दुबर्लमनुशास्ति। आशिषा वा युनक्ति।

तथैवेमे जीवा भगवन्तं विष्णुं प्रार्थयन्ते स चैषामीष्टेऽत एताननुशास्ति।

भवति चात्रास्माकम्—

नाथन्ति लोकास्तमु लोकनाथं
युनक्ति लोकान् पुनराशिषा सः।
तस्यैव भासाऽथ भिया च भीत-
स्तमेव लोकोऽत्र सदा प्रणौति।।१०४६।।

माधवः—७३५

"मन ज्ञाने" इति दैवादिको धातुस्ततो ***"अन्येष्वपि दृश्यते"*** (पा० ३ ।२ ।१०) इति सूत्रेण डः प्रत्ययो ***"डित्यभस्यापि टेर्लोपः"*** इति वार्तिकवचनाच्च टेर्लोपः, मन्यत इति मः स्त्री चेन्मा।

यद्वा मनुतेर्वा ***"फलिपाटिनमिमनिजनी गुक्पटिना किधतश्च"*** (उ० १ ।१८) इत्युणादिसूत्रेण उः प्रत्ययो धकारोऽन्तादेशश्च मनुत इति मधुः। मनुरेव मधु। मधु-ज्ञानं मध्वेव माधवो ज्ञानरूपो विष्णुः स्वार्थेऽण्।

यद्वा—"धू कम्पने" इति क्रैय्यादिको धातुस्ततः पचाद्यच् धवः-धुनोतीति।

मन्यते, मनुते वा मः—मधुर्वा, धुनातीति धवः। मस्वरूपो धव इति मध्यमपदलोपी समासो मधवः, मधवो मधुरेव वा माधवः, स्वार्थेऽन् प्रत्ययः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनेकार्थाभिधायी चायं मधुशब्दः।

विष्णुनामान्वर्थत्वे च, ज्ञानरूपो भगवान् सर्वं विधुनाति-कम्पयति, भीषया, भीतमिव कृत्वा व्यवस्थापयतीति माधवः। मनुरेव मधुः तथा च बहुत्र मन्त्रेषु मधुशब्दप्रयोगः। यथा—**"मधुपाणिम्"** (ऋक् १० ।४१ ।३) **"मधुपृष्टम्"** (ऋक् ६ ।८६ ।४) **"मधु प्रतीकः"** (ऋक् १० ।११८ ।४) इत्यादि। लोकेऽपि पश्यामः—सर्वो हि लोको ज्ञानानुस्यूतः स्वावश्यकतानुसारमपरं पदार्थं विधुनाति-विकम्प्य स्ववशं करोति। योऽयमेवम्प्रकारको गुणो लोके दृश्यते स सर्वत्र व्याप्तस्य भगवतो माधवस्यैव, स च गुणो भगवन्तं माधवं प्रतिपदं प्रकटयति।

मन्त्रलिङ्गञ्च—

विश्वानि देव वयुनानि विद्वान्। ऋक् १।१८६।१; यजुः ३।३६।।

भवति चात्रास्माकम्—

स माधवो विष्णुररं विधूय
यथायथं ज्ञानविभागभक्तम्।
विश्वं विधायात्मनि गुप्तरूपं
प्रकाशते माधव एव सृप्तः।।१०४७।।

भक्तवत्सलः—७३६

भजति-विभागं करोतीति भक्तः "भज सेवायाम्" इति भौवादिको धातुस्ततो ***"गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च"*** (पा० ३।४।७२) सूत्रेण बाहुलकात् कर्तरि क्तः प्रत्ययो भजत इति भक्तः। तथा च काशकृत्स्न धातु व्याख्याने (१।६६५)—**भजति, भजते, सेवत इति भक्तः** सस्नेहं वदतीति वत्सलः। "वद व्यक्तायां वाचि" इति धातुस्ततो ***"वृतृवदिहनिकमिकषिभ्यः सः"*** इत्युणादिसूत्रेण (३।३२) कर्तरि सः प्रत्ययः, ***"तितुत्रतथ०"*** (पा० ७।२।९) इत्यादिना सूत्रेणेण्निषेधः, चर्त्वम्, वत्सः। वत्सशब्दाद् ***"वत्सांसाभ्यां कामबले"*** (पा० ५।२।९८) सूत्रेण कामवति-स्नेहवति मत्वर्थे लच् प्रत्ययो वत्सल इति। भक्तश्चासौ वत्सलः भक्तवत्सलः कर्मधारयः। विभजति सस्नेहं वदतीति चार्थः। भक्तवत्सलो भगवान् विश्वं व्यश्नुवानः प्रत्येकं वस्तु भजति-विभक्तं करोति। विभक्तं विभक्तं प्रत्येकं स्निग्धमनाः सस्नेहं वक्तुं वाचा युनक्ति।

लोकेऽपि च पश्यामः—यथा माता भिन्नभिन्ननामगुणरूपवतीं प्रजां पृथक् पृथगभिकाङ्क्षितां वाचं सस्नेहं वक्ति। इतरेष्वपि प्राणिषु सा वाग् जातिभेदेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भिन्ना तत्तज्जातिमत्सु। यथा वानरा वानरवाचैव समवेता भवन्ति तथा काकाः काकवाचा, चटकाश्चटकवाचेति। स्थावरेष्वपि स्थावरवाग् भवति। यश्चायं लोकप्रसिद्धो भक्तः सोऽप्येतस्मादेव। यतो हि स विभजति स्वाभीष्टानर्थान् सेव्यं प्रति, सेव्यश्च तमाश्वासयति। तथा च कश्चिद्धनार्थी, कश्चित् पुत्रार्थीत्यादि विभक्तार्थो भजति तं भगवन्तं भक्तवत्सलं, भगवांश्च तमात्मसमं समर्थं विधत्ते, स तस्य भक्त-इत्युक्तो भवति। तञ्च हितमनाः स समर्थो भूया इति वदति। एष हि भक्तवत्सलाख्यरूपो गुणो विश्वे प्रतिपदं दृश्यते।

मन्त्रलिङ्गम्—

मां हवन्ते पितरं न जन्तवो अहं दाशुषे विभजामि भोजनम्।

ऋक् १० ।४८ ।१।।

भोजनम्=भोग्यमिति।

भवति चात्रास्माकम्—

भक्तादिमद् वत्सलनामविष्णु-
र्भागं विधत्ते सकलस्य लोके।
सस्नेहवाचञ्च ददाति तस्मै
तथा यथा वाचमुनत्ति[१] माता।।१०४८।।

❖ ❖ ❖

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः।।९२।।

७३७ सुवर्णवर्णः, ७३८ हेमाङ्गः, ७३९ वराङ्गः, ७४० चन्दनाङ्गदी। ७४१ वीरहा, ७४२ विषमः, ७४३ शून्यः, ७४४ घृताशीः, ७४५ अचलः, ७४६ चलः।।

सुवर्णवर्णः—७३७

सु उपसर्गः, ''वृञ् वरणे'' सौवादिको धातुस्ततः ***''कृवृजॄसिद्रुपन्यस्वपिभ्यो नित्''*** (उ० ३ ।१०) इत्युणादिसूत्रेण निद्वद्भावभावितो 'नः' प्रत्ययो ***''नेड् वशि कृति''*** (पा० ७ ।२ ।६) इतीण्णिषेधो, गुणः, रपरः, वर्ण इति। शोभनो वर्णः सुवर्णः,

१. उनत्ति—उन्दी क्लेदने, स्नेहान्वितां करोतीत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुवर्णमिव वर्णो यस्य स सुवर्णवर्णः। वर्णो हि सर्वैर्व्रियते-प्रार्थ्यते। मन्त्रलिङ्गञ्च—

स्पार्हाः सुवर्ण अनवद्यरूपाः। ऋक् १० ।६८ ।३।।

तथा—

स प्रजापतिः सुवर्णमात्मन्नपश्यत् तत् प्राजनयत्। अथर्व १५ ।१ ।२।।

सुवर्णः सूर्योऽपि तैजसवर्णः प्रार्थनीयो वा। सुवर्णाभिधो धातुरपि सुवर्ण एतस्मादेव, स हि सर्वैर्व्रियते भोगाय व्यवहाराय च। योऽयं रूपाणामधिपतिस्त्वष्टा **''त्वष्टा रूपाणामधिपतिः''** (पा० गृ० १० ।५ ।१०) **''त्वष्टा रूपाणि पिंशतु''** (ऋक् १० ।१८४ ।१) इति ऋङ्मन्त्रलिङ्गात्, स एव सुवर्णवर्णः सन् विश्वे रूपाणि प्रकिरति।

यद्वा सूर्य+शुक्र+चन्द्र+मङ्गलसंयोगजं सुवर्णं, तत्र नैयून्याधिक्ये परस्परं ग्रहाणामंशनैयून्याधिक्याभ्याम्। दृष्टिभेदाद् वर्गराशिभेदाद्वा। असंख्यातरूप-विभक्तमिदं जगत् तमेव सुवर्णवर्णं विष्णुं व्यनक्ति। अत एव स सुवर्णवर्ण इत्युक्तो भवति।

भवति चात्रास्माकम्—

सुवर्णवर्णो भगवान् वरेण्यो
विष्णुः स्वयं राजति वर्णमात्रे।
त्वष्टा जगत्त्वक्षति भिन्नरूपं
ग्रहाः निमित्तं [१]पृथुलोचनानाम्।।१०४६।।

हेमाङ्गः—७३८

हेम—''हि गतिवृद्ध्योः'' इति सौवादिको धातुस्ततः ***''सर्वधातुभ्यो मनिन्''*** (उ० ४ ।१४५) इत्यादिको मनिन् प्रत्ययः। अनिट्, गुणो हेमन्। अङ्गशब्दः—अगिधातो र्व्युत्पादितः, सवर्णदीर्घे नलोपो नासिद्धो ***''न लोपः सुप्स्वरसंज्ञातुग्विधिषु''*** इति (पा० ८ ।२ ।२) सूत्रनियमात्।

वर्धमानः—अङ्गति-गच्छतीति हेमाङ्गः। सूर्यो हि हेमाङ्गो **''यादृगेव ददृशे तादृगुच्यते''** (ऋक् ५ ।४४ ।६) इति मन्त्रलिङ्गात्।

यद्वा हेम इति हिरण्यपर्यायस्य सुवर्णस्य नाम तद्धि जनाज्जनं गच्छति। मन्त्रलिङ्गञ्च—

अस्य प्रेषा हेमना पूयमानो०। ऋक् ६ ।६७ ।१।।

१. पृथुलोचनानाम्-स्थूलदृशामित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुवर्णवर्ण इति नाम पूर्वं व्याख्यातम्।

भवति चात्रास्माकम्—

हेमाङ्गसंज्ञो भगवान् स विष्णु-
श्चन्द्रादिसर्वं गमयत्यजस्रम्।
याता यथा स्वात्मपदं प्रपित्सु-
र्विवर्धते मार्गगतांशयातैः ॥१०५०॥

लोकेऽपि च पश्यामो याता स्वगन्तव्यं प्रपित्सुर्गतक्रोशांशगणनयाऽऽत्मानं वृद्धं मन्यते, स एष गुणो विश्वं व्यश्नुवानस्य भगवतो विष्णोः सूर्यस्य च, लोके चैतस्यानुकरणमात्रम्। एवं लोकं दृष्ट्वा विविधमूहितव्यम्।

वराङ्गः—७३६

''वृञ् वरणे'' सौवादिको धातुस्ततो 'अकर्तरि कारकेऽधिकारे' ''*ग्रहवृदृनिश्चिगमश्च*'' (पा० ३।३।५८) सूत्रेण कर्मण्यप् प्रत्ययः, वर इति। अङ्गशब्दः—अङ्गेर्धातोः साधितः प्राक्।

व्रियते=स्तूयते उदयमान इति वरः सूर्यः। व्रियते-प्रार्थ्यते सर्वैः स्वाभीष्टसिद्ध्यै वरो विष्णुः। वरः—अङ्गः-गतिः प्राप्तिर्वा यस्य स वराङ्गः। अध्यात्मनिष्ठाश्चराचरं व्यश्नुवानं भगवन्तं विष्णुं सूर्यं वा स्वगन्तव्यलक्ष्यलब्धये वृण्वते-स्वीकुर्वन्तीत्यर्थः। इतरोऽपि वर एतस्मादेव, यतो हि सोऽपि व्रियते-स्वीक्रियते वध्वा।

मन्त्रलिङ्गञ्च—

य ईं वहाते य ईं वरेयात्। ऋक् १०।२७।११॥

अन्यच्च—

भद्रा वधूर्भवति यत् सुपेशाः स्वयं सा मित्रं वनुते जने चित्।
ऋक् १०।२७।१२॥

तथा च—

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥ ऋक् ३।६२।१०; यजुः ३।२५॥

वरेण्यं-वरीतुमर्हम्, सवितुः-सूर्यस्य, भर्गः-शुद्धं तेजो, धीमहि-ध्यायामश्चिन्ताविषयं कुर्म इत्यर्थः। स नः-अस्माकं धियः-बुद्धीः, प्रचोदयात्-शुभेषु कर्मसु प्रेरयेत्-संयोजयेदित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

जनैर्वराङ्गोऽस्ति सदा वरेण्यो
विष्णुर्यथा जीवितदेहजीवः ।
जीवेऽपयातेऽस्यति तं नृसङ्गो
वरा गतिस्तञ्च यतो जहाति।।१०५१।।

लौकिकञ्च वरमधिकृत्य—

मनोज्ञगात्रोऽथ मनोज्ञकर्मा
युवा युवत्या व्रियते मनुष्यः ।
तस्माद् वरो विष्णुसमो जगत्या-
माप्नोति पूजास्तुतिभोजनानि।।१०५२।।

चन्दनाङ्गदी—७४०

चन्दनम्—"चदि आह्लादे" इति धातुर्भौवादिक इदित्, ततश्चेदित्त्वानुम्। करणे ल्युड् योरनादेशः। यद्वा तस्मादेव णिजन्तात्—ल्युर्ल्युड्, युज्वा, बाहुलकात्। योरनादेशो णेर्लोपश्च। चन्द्यतेऽनेन, चन्दयति वा यत् तच्चन्दनमिति। अङ्गशब्दोऽङ्गतेर्गत्यर्थाद् व्युत्पादितः।

चन्दनाङ्गरूपकर्मोपपदात् ददातेः ***"आतोऽनुपसर्गे कः"*** (पा० ३।२।३) सूत्रेण कः प्रत्ययः, तस्मिंश्चाल्लोपः। आह्लादकरीं गतिं यो ददाति स चन्दनाङ्गदः सूर्यादिः। स चन्दनाङ्गदः सूर्यादिर्यस्य, यस्मिन् वास्तीति स चन्दनाङ्गदी भगवान् विष्णुः मत्वर्थीय इनिः। भगवता पृथक् पृथग्गतिनिबद्धाः सूर्यादयो ग्रहा विश्वाय चन्दनम्-आह्लादं ददतो गच्छन्ति, ते ग्रहा सगतिका यस्य यस्मिन् वा स चन्दनाङ्गदी भगवान् विष्णुरुक्तो भवति। जीवोऽपि चायं चन्दनाङ्गदी यतो ह्येष शरीराय विविधामाह्लादकरीं गतिं ददाति स्वयं प्रकाशमानः। एवञ्चायं विष्णुः स्वेन चन्दनाङ्गादित्वरूपेण गुणेन विश्वं व्यश्नुवानो विविधगतिमच्चैतत् कुर्वन् परः शतशरदो जीवितुं जीवं प्रयासयति।

मन्त्रलिङ्गञ्च—

दश क्षियो युञ्जते बाहू अर्दि सामस्य या शमितारो सुहस्ता।
मध्वो रसं सुगभस्तिर्गिरिष्ठां च निश्चदद् दुदुहे शुक्रमंशुः ।।

ऋक् ५।४३।४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

यदत्र विश्वे गतिमत् प्रसन्नं
तत्तस्य तस्मिन्निति वा च बोध्यम्।
स सच्चिदानन्दमयोऽत्र विष्णुः
स्वशक्तिमद् विश्वमिदं विधत्ते ।।१०५३।।

वीरहा—७४१

वि उपसर्गः। "इण् गतौ" इत्यादादिकाद्धातोः *"ऋज्रेन्द्राग्रवज्र०"* (उ० २।२८) इत्यादिनोणादिसूत्रेण रन् प्रत्ययान्त इरा शब्दो निपात्यते गुणाभावोऽपि निपातनादेव। एति-गच्छति यया सा इरा-उदकं मद्यं वा। तद्योगादिरावान् समुद्रः। इरावत्येव ऐरावती नदी। इरया मद्येनोदकेन वा माद्यतीतीरम्मदः मेघज्योतिर्विद्युत्। वेदे च स्तनयित्नुरिरा, तथा च—

प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते स्वः ।
इरा विश्वस्मै भुवनाय जायते यत् पर्जन्यः पृथिवीं रेतसावति।।

ऋक् ५।८३।४।।

विविधा विगता वा इरा स्तनयित्नुर्यस्मात् यस्मिन् वा स वीरः पर्जन्यस्तं वीरं पर्जन्यं हन्तीति वीरहा सूर्यः। यद्व्यवस्थया चैतत् कर्म भवति स सर्वेश्वरोऽपि वीरहा। विविधा इराः-विद्युतो हन्ति-गमयति पर्जन्यं लोकानां भावाभावाभ्यामिति वीरहा विष्णुः। तथा च लोकभावाभावकरान् विद्युद्भेदानाहुरभिज्ञाः—

वाताय कपिला विद्युद् दुर्भिक्षाय सिता भवेत्।
कृष्णा सर्वविनाशाय वर्षायायतिलोहिनी ।। इति।।

क्वचिच्चैवं पठ्यते—

वाताय कपिला विद्युद् आतपायातिलोहिनी।
कृष्णा सर्वविनाशाय दुर्भिक्षाय सिता भवेत् ।।

एतेन वीरहननरूपेण गुणेन सर्वत्र व्याप्तो भगवान् वीरहोच्यते। तथा च मन्त्रलिङ्गम्—

भूरिदा ह्यसि श्रुतः पुरुत्रा। ऋक् ४।३२।२१।।

सूर्यार्थे चापि—

शूर वृत्रहन् आ नो भजस्व राधसि। ऋक् ४।३२।२१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वीरहा शब्दः पूर्वत्र व्याख्यातोऽपि द्विःपठितोऽयं पूर्वतोऽन्यमर्थं प्रकटयतीति पुनर्व्याख्यातोऽन्यथा।

भवति चात्रास्माकम्—

स वीरहा विष्णुरिदं समस्तं
जगत् समृद्धं कुरुते जलेन ।
[1]इरासहायः स विहन्ति मेघान्
पर्जन्ययोनिर्जलमेव विश्वे ।।१०५४।।

विषमः—७४२

'षम अवैकल्ये' इति भौवादिको धातुस्ततः पचाद्यच् प्रत्ययः, समतीति समः। समशब्दश्चायं सदृशार्थे रुढः। ***"धात्वादेः षः स"*** (पा० ६।१।६४) इति षकारस्य सकारः। व्युपसर्गेणयोगे ***"सुविनिर्दुर्भ्यः सुपिसूतिसमाः"*** (पा० ८।३।८८) सूत्रेण षत्वम्। विषमः सादृश्यरहित इत्यर्थः। **"विषमेभ्यः"** इत्यादि (यजुः ३०।१६) यजुर्वेदमन्त्रश्चात्र प्रमाणम्। लोके हि नहि कश्चिदपि कस्यचित्समो दृश्यते गुणाकृत्यादिभ्यो भिन्नत्वात्। तथा च—सप्तदीप्ताः समिद्धाः प्रकाशं प्राप्ता ग्रहाः **"सप्त ते अग्ने समिधः"** (यजुः १७।७६) इत्यादि मन्त्रलिङ्गात्" विषमसंख्यां भजमानास्तथा विषमगतिं समगतिञ्च भजमाना विषमयन्ति लोकम्। एवं भगवान् विषमो निजविषमत्वरूपेण विश्वं व्यश्नुवानो विषमनाम्ना स्तुतिमभ्युपैति। समानपितृभ्यामपि जातः सन्ततिगणो न समो भवति सर्वात्मना परस्परम्।

भवति चात्रास्माकम्—

स विष्णुरेको विषमः पुराणः
करोति विश्वं विषमं स्वभावात् ।
तमान्विते ते विषमं प्रवृत्ते
सम्पद् विपच्चापि जगत् प्रसृप्ते।।१०५५।।

शून्यः—७४३

"शुन गतौ" इति तौदादिको धातुस्तत ***"ऋहलोर्ण्यत्"*** (पा० ३।१।११३)

१. इरा-जलम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूत्रेण, स्नानीयं चूर्णम्, दानीयो विप्र इतिवत् बाहुलकात् कर्तरि ण्यत् प्रत्ययस्ततः *''अन्येषामपि दृश्यते''* (पा० ६ ।३ ।१३७) सूत्रेण दीर्घः, शुनति-प्राप्तो भवति सर्वत्रेति शून्यो विष्णुः।

मन्त्रलिङ्गञ्च—

तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः। यजुः ४० ।५ ।।

तन्नो द्यावा पृथिवी तन्न आप इन्द्रः शृण्वन्तु मरुतो हवं वचः।

मा शूने भूम सूर्यस्य संदृशि भद्रं जीवन्तो जरणामशीमहि ।।

ऋक् १० ।३७ ।६ ।।

खं ब्रह्म। इति यजुः ४० ।१७ ।।

खं=शून्यमिति। गतिर्हि शून्यात् प्रादुर्भवति, शून्यात् प्रादुर्भूता च गतिः शून्य एवान्तमेति। लोकेऽपि च पश्यामः—सावकाशे गर्भाशये सिराधमन्याशयादिभिः शून्ययुक्तैरस्थिभिश्च स्तम्भतामुपगतं सर्वं दृश्यं शरीरं, सौरनवमासानन्तरं बहिर्निश्चिक्रमिषुर्गतिं लभते। अत्र गर्भाशयः शून्यमिव गर्भजातकश्चोत्क्रान्त-नवसंख्यातुल्यः। एषा व्यवस्था चेतरपशुभ्य ऋते मनुष्येषु मनुष्यसदृशेषु गोषु च। गतिप्रादुर्भावमूले शून्ये गर्भाशये, शून्यवन्मांससितः त्वक्पिहितो जायते। स च प्रसूयमानः पश्यतीति पशुसंज्ञयाभिधीयते।

मन्त्रलिङ्गञ्च—

वितिष्ठन्तां मातुरस्या उपस्थान्नानारूपा पशवो जायमानाः।

अथर्व १४ ।२ ।२५ ।।

पशवः शिशव इति। य एव शून्यः स एव सुमुखः सुखदश्च। स एव च खमिति तत्र तत्र यथाप्रसङ्गव्याख्यातं द्रष्टव्यम्। गणिते शून्यमेव गतिं ददाति, तथा च नवात्मिका संख्या यदा नवत्वमतिवर्तते तदा यावद्वाऽतिवर्तते, तत्संख्या- सूचकोऽङ्कः सङ्कलय्य शून्यात् पूर्वं निधीयते गणितज्ञैः। तद्यथा—दश-१० इति। इह हि शून्यात् प्रथमं स्थित एकरूपोऽङ्को नवसंख्याया एकवारातिक्रमणं सूचयति। ततोऽवशिष्टञ्च शून्यं स्वोदरनिहितां सूचयति अथवा १० इत्यत्र शून्यस्थानादेकवारं व्यपगताया नवंख्यायाः सूचकः १ इत्यङ्को दशत्वसंख्यापूरकश्च, ० शून्यञ्च स्वस्वरूपेण नवसंख्यामाददानो नवसंख्याभावं सूचयति। यदा पुनरेकादारभ्य नवान्तां काञ्चित् सख्यामुपस्थापयितुमिच्छति शून्यं, तदा तां स्वगतां कुर्वत्तेन रूपेण स्थापयति। तद्यथा—एकादश ११, अत्र नवसंख्योत्क्रान्तैकधा तस्या ज्ञापक एकोऽङ्कः, तत्र शिष्टश्चैकस्थानीय एकोऽङ्क इति तौ मिलित्वा द्वौ जायेते ९+२=समानं भवति एकादश इति एवमन्यत्राप्यूह्यम्। अमुथैवायं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुर्जगच्चिकीर्षुर्जगत् स्वगतं बहिः प्रकाशयत्युच्छिष्टाख्यः शून्यरूपः। यदुक्तम्—

उच्छिष्टाज्जज्ञिरे सर्वे। अथर्व ११।७।११।।

इमं भावं व्यञ्जयितुं शून्य इति विष्णोर्नामसङ्कीर्तितं वेदविद्भिः।

तथा च कार्यं यदुपादानकं भवति, तदाकारं व्यनक्त्यात्मानम्। यथा—काष्ठचक्रं काष्ठाकारं, लौहचक्रं लौहाकारम्, सुवर्णचक्रं सुवर्णाकारं, ताम्रचक्रञ्च ताम्राकारमित्याद्यूह्यम्। एवं मनुष्यान्मनुष्यः, गोर्गौः, शुनः श्वा, काकात् काकः पिकाच्च पिक इति। नैकरूपिणो निमित्तकारणस्य विष्णोः नैकरूपतां गतं चराचररूपं जगत् तमेव तथाविधं सर्वत्र व्याप्तं शून्याख्यं विष्णुं व्यनक्ति। भण्यते च "जगदेव ब्रह्म, ब्रह्मैव जगच्चेति।" सर्वात्मना—उत्क्रान्ताः शून्यतः पूर्वं निपतिताः (१, २, ३, ४, ५, ६, ७, ८, ९) संख्याः मातुर्गर्भाशयमिव शून्यं शेषयन्ति। एकधोत्क्रान्ता संख्या १०, द्विरुत्क्रान्ता संख्या २०, त्रिरुत्कान्ता ३०, त्रिंशदित्यादि योजनीयम्। दश, विंशति, त्रिंशदित्यादिसंख्यासंज्ञाः पूर्वाचार्यैर्विहिता व्यवहारसौकर्याय। एवं—एक—दश—शत—सहस्रेत्याद्यो लीलावत्युक्ताः संज्ञाः स्थानानां ज्ञानसौकर्याय।

भवति चात्रास्माकम्—

शून्यो हि विष्णुर्विदधाति खाक्तं
विश्वं स्वयं तत्र च लीयते सः ।
गर्भाशयः स्तत्रभवेऽस्ति शून्यः
शिशुञ्च शून्यं न जहाति शून्यम्।।१०५६।।

घृताशीः—७४४

"घृ सेचने" इति भौवादिको धातुः यद्वा 'घृ क्षरणदीप्त्योः" इति जौहोत्यादिकस्ततो नपुंसके भावे क्तः प्रत्ययः। सेचनं, क्षरणं, दीपनं वा घृतम्। यद्वा—आभ्यामेव धातुभ्यां ***"अञ्जिघृसिभ्यः क्तः"*** (उ० ३।८९) इत्युणादिसूत्रेण कर्तरि कारके क्तः प्रत्ययः। एवञ्च सिञ्चति क्षरति, दीप्यत इति वा घृतम्।

आशीः—"आङः शासु इच्छायाम्" इति धातुस्ततः ***"क्विप् च"*** (पा० ३।२।६७) इत्यनेन क्विप् ***"आशासः क्वावुपधाया इत्वं वाच्यम्"*** इति (पा० ६।४।३५) सूत्रस्थ वार्तिकेनोपधाया इत्वम्। शासेः सोरुत्वं ***"र्वोरुपधाया दीर्घ इकः"*** (पा० ८।२।७६) सूत्रेणोपधादीर्घः। आवसानिको विसर्गः। सोरन्यत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

''शासिवसिघसीनाञ्च'' (पा० ८।३।६०) सूत्रेण षत्वं बोध्यम्। घृतं-क्षरणं, सिञ्चनं, दीपनं वेच्छतीति घृताशीः।

घृतशब्देन जलादिद्रवद्रव्यम्, आग्नेयपदार्थजातञ्च गृह्यते। तदिच्छतीति घृताशीरिति। सर्वं लोके घृताशीः, यतो हि सर्वमेव जलं-स्नेहविशेषं दीपनं वेच्छति। सूर्यो घृताशीः, यतो हि स जलाकर्षणधर्मा। मनुष्यो घृताशीः, यतो हि सः पिपासति जलम्। भूमिर्घृताशीः, यतः सा वर्षारूपं जलमभिवाञ्छति। स्त्रीर्वा घृताशीः यतः सापि शुक्रात्मकं घृतं जिघृक्षति। एवञ्चैष घृताशिष्ट्वरूपो भगवतो गुणः सर्वत्र व्याप्तो दृश्यतेऽत एव भगवन्नामसु स्तुतिमाप्नोति।

मन्त्रलिङ्गञ्च—

घृतं तीव्रं जुहोतन। ऋक् ५।५।१।।
ऋताय चित्रं घृतवन्तमिष्यति। ऋक् १।३४।१०।।
घृतेन वर्धयातिथिम्। अतिथिरग्निः। तथा—
घृतेन वर्द्धयामसि बृहच्छोचा यविष्ठ्या।

ऋक् ६।१६।११।। इत्यादि।

भवति चात्रास्माकम्—

विष्णुर्घृताशीः स्वगुणेन विश्वं
घृताशिषा युक्तमयं विधत्ते।
सूर्यो घृताशीरनलो घृताशी-
वैश्वानरोऽग्निश्च तथा घृताशीः।।१०५७।।

अचलः—७४५

कम्पनार्थकश्चलिर्भौवादिको धातुस्ततः कर्तरि पचाद्यच् प्रत्ययः। चलतीति चलः। नञ् समासे *''नलोपो नञः''* (पा० ६।३।७) इति सूत्रेण नञो नकारलोपे च न चलः, अचल इति सिध्यति। न चलति-व्यभिचरति स्वसङ्कल्पं, नित्यज्ञानगुणक्रियां वा सोऽचलो विष्णुः। अर्थाद् यद् यथा व्यवस्थापितं तदासृष्टेः प्रलयपर्यन्तं तथैव चलति न विपर्येति स्वधर्मतः यथा सर्गादित एव सूर्यो न वक्री भवति, तथा च चन्द्रो वृद्धिक्षयौ भजति, सर्वे चेतरे ग्रहा वक्रगतित्वं रूपं धर्मं बिभ्राणा दर्शयन्ति भगवतोऽचलस्याचलत्वरूपं धर्मं सुव्यवस्थितम-व्यभिचारिणमिति। यस्य वस्तुनो यादृक्स्वभावस्तस्मिन् समर्यादमवस्थान-मेवाचलत्वम्। पश्यामश्च प्रतिपदं लोके बीजो हि स्वसदृशं क्षुपं जनयति, न

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विसदृशं कुत एवमिति प्रश्ने च, विश्वे व्यष्टेन भगवताऽचलेन स्वधर्मानुरूप-कृतव्यवस्थत्वात्, सर्वस्य विश्वस्याचलधर्मवत्त्वात्। एवं सर्वत्रोहनीयम्। यथा—अग्निः स्वप्रकाशरूपं सन्तापरूपं, ऊर्ध्वगमनरूपं वा धर्मं न जहाति।

मन्त्रलिङ्गञ्च—

षड् भारां एको अचरन् बिभर्त्यृतं वर्षिष्ठमुपगाव आगुः।
तिस्रो महीरुपरास्तस्थुरत्या गुहा द्वे निहिते दर्श्येका ॥

ऋक् ३।५६।२॥

भवति चात्रास्माकम्—

चलं हि सर्वं यदिहास्ति दृश्यं
स्वकञ्च धर्मन्न चलं जहाति ।
कर्ताऽचलो ह्यस्य यतः स विष्णु-
र्धीरोऽचलं तं प्र पदं हि नौति॥१०५८॥

चलः—७४६

"चल कम्पने" इति भौवादिकः स च "चलिः कम्पने" इति च मित्संज्ञकः। तस्माद् धातोः कर्तरि पचाद्यच् प्रत्ययः, चलतीति चलः। यद्यपि कूटस्थो हि सः, तथापि स्वस्वाभाविक्या ज्ञानरूपबलक्रियया वायुनिहितचलनकर्मा सर्वमिदं जगच्चलयञ्चलतीव प्रतीयते। यथा शिल्पी स्वशक्त्यपेक्ष्यानेकसाधनसम्पनो यन्त्रं चालयन्, स्वस्थानस्थितोऽपि चलतीति जनप्रतीतिमवतरति, तथा भगवानपि वायुरूपेण स्वकर्मणा जगद्रूपं यन्त्रं स्वयमपि चलतीव प्रतीयमानश्चलेतिसंज्ञां प्रतिपद्यते।

एतच्चैवमुपपद्यते—अजनामा हि भगवान् विष्णुः स चाजति=प्रक्षिपति वायुरूपं स्वचलनात्मकं कर्म जगति, जगच्चिचलयिषुः, यथा यन्त्रं चिचलयिषुः शिल्पी यन्त्रचालको वा बाष्पं तस्मिन् प्रक्षिपति आविष्करोति, तेन च यन्त्रव्यापकेन यन्त्रनिबद्धेन वा वाष्पेण स्वयं कूटस्थ इव शिल्पी यन्त्रं स्वाभिमतसिद्धये प्रवर्तयति। एवं चलनधर्मिणि वायौ या गतिः सा तस्यैव सर्वव्यापकस्य विष्णोः। यथा यन्त्रचालिका शक्तिः शिल्पिनः यावद्यन्त्रं चलति, तत्र निहिता भवति। एवं स्वाभाविकज्ञानबलकर्मशीलस्य विष्णोश्चलनरूपं कर्म विश्वं व्यश्नुवानं तं चलाख्यं विष्णुं व्यनक्ति प्रतिपदम् वायौ यच्चलनात्मकं कर्म तत् कुत आयातमिति प्रश्ने, तद्विष्णोरेवायातमिति समाधानं सम्पद्यते। सर्वं हि

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदार्थजातमवकाशगामि, स चावकाशरूपो धर्म आकाशस्य। खञ्च ब्रह्म, **''ओं खं ब्रह्म''** इति (४० अ० १७) याजुषाल्लिङ्गात्।

लोको वेदश्च यादृक् पश्यति तादृग्वक्ति तत्र मन्त्रलिङ्गं यथा—

यादृगेव ददृशे तादृगुच्यते। ऋक् ५।११।६।।

सर्वयन्त्रप्रवर्तयिता गत्यधिष्ठातृदेवः स वायुः स्तुतो भवति। यथा च मन्त्रलिङ्गम्—

आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम।।

ऋक् १०।१६८।४।।

अत एव विष्णुनामसंग्रहे वायोर्वातस्य वा नाम संगृहीतमस्ति।

चर धातुरपि गत्यर्थत्वाच्चलधातुसमानार्थकः। तथा च—

सूर्य एकाकी चरति चन्द्रमा जायते पुनः। यजुः २३।१०।।

शिशू क्रीडन्तौ। ऋक् १०।८५।८।।

इत्यत्र शिशुशब्देन सूर्याचन्द्रमसोरभिधानम्।

इदमापः प्रवहत यदवद्यं दुरितञ्च यत्।

ऋक् १।२३।२२; यजुः ६।१७।।

तथा—

अग्ने ! व्रतपते ! व्रतं चरिष्यामि। यजुः १।५।। इत्यादि।

भावार्थश्चैवं ज्ञेयः—यथा बृहद्भानुर्विष्णुर्न सूर्यादृते तपन् दृश्यते न वायोः ऋते चरन् दृश्यते, न चाग्नेर्ऋते दहन् दृश्यते, तथा च तत्तत्सूर्याद्यन्तर्हितः तत्तत् कर्म करोति। एवमत्र दृश्यमानश्चलनाख्यो गुणोऽपि तच्छक्त्यधीन एवेति दृढं द्योतयितुं चलसंज्ञया विष्णुरुक्तो भवति।

लोकेऽपि च पश्यामः—शरीराधिष्ठातृदेव आत्मा स्वत एवान्यसहायमन्तरेण स्वान्यङ्गानि यथाकार्यवशं चालयति, तथैवायं विष्णुः प्रवाहनित्यमिदं विश्वं यथानियतमर्यादं प्रवर्तयितुं चलनाख्येन कर्मणा संयुनक्ति, स्वयं सर्वत्र वर्तमानः। अन्यान्यप्येवमुदाहरणानि कल्पनीयानि लोकं दृष्ट्वा विज्ञैरिति।

अन्यच्च—उत्पत्तिलयशालि जगदुत्पत्तिलयाभ्यां चलं दृश्यते, दृश्यते च सूर्यश्चल उदयास्ताभ्यां, तथा नित्योऽमरोऽपि जीवः शरीरसम्बन्धात् शरीरोत्पत्तिविनाशाभ्यां जातो मृत इति व्यवह्रियते। एवं कूटस्थोऽपि विष्णुः सर्वत्र सर्वावस्थासु ध्यात्रे स्वस्वरूपं प्रकाशयति सर्वत्र वर्तमानः। तस्माद् ध्याता तं सर्वत्र चलं मन्यते, यानस्थं शिल्पिनमिव।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

या विश्वमात्रे गतिरस्ति सक्ता
तदात्मभूतश्चलकर्मवायुः ।
वायुं चलं यः कुरुते मनस्वी
चलः स विष्णुः स्तुतिमेति [1]वातः ।।१०५६।।

❖ ❖ ❖

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृक्।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः ।।६३।।

७४७ अमानी, ७४८ मानदः, ७४९ मान्यः, ७५० लोकस्वामी, ७५१ त्रिलोकधृक्। ७५२ सुमेधाः, ७५३ मेधजः, ७५४ धन्यः, ७५५ सत्यमेधाः, ७५६ धराधरः।

अमानी—७४७

"मान पूजायाम्" इति धातुश्चौरादिकस्ततोऽ***नित्यण्यन्ताश्चुरादय*** इति सिद्धान्तभेदतो णिच् पक्षे ***"ण्यासश्रन्थो युच्"*** इति (पा० ३।३।१०७) सूत्रेण युच् प्रत्यये माननेति प्राप्ते ***"कृत्यल्युटो बहुलम्"*** (पा० ३।३।११३) सूत्रेण घञि मान इति, ततश्च मत्वर्थीय इनिः, ***"यस्येति च"*** (पा० ६।४।१५८) सूत्रेण अकारलोपे मानी, इन्नन्तलक्षणो दीर्घः। न मानी अमानी नञ् समासो नञो नलोपः आत्मसम्मानभावरहितः इत्यर्थः।

यद्वा—माङ् माने धातुस्तस्मात् करणेऽधिकरणे वा ल्युट् प्रत्ययो योरनः। मीयते येन मीयते यत्र वा तन्मानम्। तस्मान्मत्वर्थीय इनिः प्रत्ययो नञ् नलोपः इन्नन्तलक्षणो दीर्घः। न मानमियत्ता यस्यास्ति सोऽमानी, अप्रमेय इति भावः। अयम्भावोऽमेयाप्रमेयात्मनाम्नोर्व्याख्याने विशदं व्याख्यातं तत्र द्रष्टव्यम्।

मन्त्रलिङ्गञ्च—

न ता मिनन्ति मायिनो न धीराः। ऋक् ३।५६।२।।

१. "तस्मै वाताय हविषा विधेम।" (ऋक् १०।१६८।४) इत्युक्तमन्त्रलिङ्गम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

अमानिविष्णुर्नहि [१]मानगोचरो-
ह्यमानिविष्णुर्नहि [२]मानगोचरः।
अमानिविष्णुर्नहि मातुमर्ह्यते
नरेण कल्पान्तवयः समेयुषा।।१०६०।।

मानं=सम्मानम्। मानं=प्रमाणम्।

मानदः—७४८

मानं ददातीति मानदः। मानशब्दो व्युत्पादितः प्राक्। मानरूपकर्मोपपदाद्ददातेः *''आतोऽनुपसर्गे कः''* (पा० ३।२।३) सूत्रेण कः प्रत्यय आल्लोपश्च मानद इति।

मानं-परिमाणं-एतावत्त्वमिति पूर्वमुक्तम्। तच्च स्वात्मसंस्थानं सत्त्वरूपेण, खण्डरूपेण चेति द्विधा भिद्यते। तथा हि परस्परं जीव्यजीवकभावापन्नेषु पदार्थेष्वेकः स्वसंस्थानसत्तालक्षणं मानं ददात्याकर्षणेन,—अपरश्च तं द्यति-खण्डयति विकर्षणेन। एवञ्च सर्वं विश्वं भगवान् स्वस्वरूपनिवेशेनेयत्तया परिच्छिनत्तीति मानद उच्यते। तथा च तस्य महामहिम्नो महिम्ना सर्वे ग्रहोपग्रहाः परस्पराकर्षणविकर्षणजीवना एतावत्त्वरूपं मानं-परिच्छेदं प्राप्ताः।

लोकेऽपि च पश्यामः—प्रत्येकप्राणीन्द्रियगोलकानि परिच्छिन्नानि-इयत्ता विशिष्टानि विद्यन्ते। सा च तेषामियत्ता परस्परं भिन्ना विद्योतयति दानरूपं खण्डरूपं धर्मम्। एतच्च सर्वं शरीराङ्गविभागं दृष्ट्वा सुज्ञानं भवति।

भावार्थश्चैवं ज्ञेयः—सर्वं तेन विधात्रा तष्टं तद्वशे वर्तते। मनुष्यज्ञानागोचरमपि यत्, तत् कन्दुकमिव तज्ज्ञानगोचरं भवति। यथा चाकाशे गच्छन्महद् यानमपि—आकाशविस्तारापेक्षयाऽणुप्रमाणम्। तथा च मन्त्रलिङ्गम्—

सर्वं तदिन्द्र ते वशे। यजुः ३३।३५; ऋक् ८।६३।४।।

प्रत्येकप्राणिशरीरविभागविज्ञानेन भगवान् विष्णुर्मनुष्येभ्यो यन्त्रनिर्माणज्ञानं ददाति। तथा च मन्त्रलिङ्गम्—

वेदा यो वीनां पदमन्तरिक्षेण पतताम्।
वेद नावः समुद्रियः। ऋक् १।२५।७।।

एतद्धि गगनगविमान-विज्ञानमूलम्। एवं च स भगवान् विष्णुर्वीनामाकाश-

१. मानं सम्मानम्। तस्य गोचरो मानगोचरः, मानविषयरहित इत्यर्थः। २. मानं प्रमाणम्। तस्य मानगोचरः, प्रमाणविषय इत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चराणामद्ग्वादिजलचराणाम्, अश्वादिस्थलचरजीवानां विज्ञानेन नभोजलस्थल-गमनार्हाणां विमानादियानानामुपदेशं ददाति। एवमेव वर्तिकया कच्छपेन वा जलस्थलोभयसंचारियाननिर्माणमुपदिशति। तत्र चैतन्यनिधानाच्चोपदिशति चालकशक्तिनिवेशम्। मन्त्रलिङ्गञ्च—

नावेव सिन्धुं दुरितात्यग्निः। ऋक् १।६१।१।।

अग्निस्तत्र शरीरस्थजीवस्थानीयः। एवं लोकं दृष्ट्वा बहुविधमूहनीयं तत्त्वविद्भिः। भवति चात्रास्माकम्—

स मानदो मानशतानि दत्ते
द्यतीव वा मानशतानि विष्णुः।
परस्परं मानमियर्त्ति सर्वं
परस्परं वा च [1]विकर्षतीति ।।१०६१।।

मन्त्रलिङ्गञ्च—

एतानि वां श्रवस्या सुदानू ब्रह्माङ्गूषं सदनं रोदस्योः ।
यद्वां पज्रासो आश्विना हवन्ते यातमिषा च विदुषे च वाजम्।।
ऋक् १।११७।१०।।

रोदस्योः द्यावा (सूर्य) पृथिव्योः सदनम्—आङ्गूषम्—ब्रह्म—पज्रास इति। रोदस्योः सदनं शिल्पिशाला भवति सा च ब्रह्मलोकेनोपमिता भवति। यत्र यन्त्राणि मानं प्राप्नुवन्ति तन्मानदस्य शिल्पिनः शाला तस्य सदनं भवति।

मान्यः—७४६

मान पूजायामिति चौरादिको धातुस्तत ***"ऋहलोर्ण्यत्"*** (पा० ३।१।१०४) सूत्रेण ण्यत्प्रत्ययः। मानयितुं योग्यो मान्यः पूजनीय इति। यश्चेष्टे समर्थो भवति स सर्वैर्मान्यते-पूज्यते। तथा च मन्त्रलिङ्गम्—

ईशा वास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। यजुः ४०।१।।

सर्वमिदं विश्वमाकीटाद् ब्रह्मपर्यन्तमघटितघटनापटीयस्याः प्रकृतेः परिणामः। सा च प्रकृतिर्यद्वशगा स ईश एव सर्वेषां मान्यः पूज्य इति।

लोकेऽपि च पश्यामः—सुचारुयन्त्रे, रमणीये वा चित्रे तन्निर्मातुः कर्तुर्यो बुद्धिनिवेशः स एव मान्यो भवति, न तु यन्त्रचित्रोपादानभूतं कारणमिति। एवञ्च—**"न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।"**

१. तद्यथा—जलमग्निं निर्वापयति,—अग्निर्वा जलं दहति, स्वबलानुसारम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्याथर्वण (अ० ५।११।४) मन्त्रलिङ्गात् स एव विष्णुः सर्वत्र प्राकृतेषु विकारेषु दृष्टिपथमुपयन् मान्यतां लभते। मान्य इत्यनेन नाम्ना च स एव पूज्यते, भवतु पूजाविधानानां बहुत्वमिति। तथा मन्त्रलिङ्गञ्च—

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः। ऋक् १।१०।१।।

"अर्च पूजायाम्" धातुर्मानसमानार्थकः। मान्यः पूज्योऽर्च्यो वा।

भवति चात्रास्माकम्—

मान्यः स विष्णुर्भुवने शयानः
स मेधयाऽन्यान् कुरुते ह्यधस्तात्।
स्तुवन्ति साम्ना स्तुतिकर्मदक्षाः
तमेव चार्चन्ति च पूजनीयम्।।१०६२।।

लोकस्वामी—७५०

स्वरतेर्डे प्रत्यये स्वः शब्दो न्यरूप्यत तस्मादैश्वर्यवाच्ये मत्वर्थे ***"स्वामिन्नैश्वर्ये"*** (पा० ५।२।१२६) सूत्रेण 'आमिन्' प्रत्ययान्तो निपात्यते। इन्नन्तलक्षणो दीर्घः। स्वम्-ऐश्वर्यमस्यास्तीति स्वामी, लोकानां स्वामी लोकस्वामी। यद्वा लोकरूपं स्वं, लोकस्वम्, मध्यमपदलोपी समासः, तदस्यास्तीति लोकस्वामी विष्णुः। ईश्वरस्य भावः कर्म वा—ऐश्वर्यम्। यश्चेशनशीलः, ईशनधर्मा, ईशनसाधुश्च स ईश्वरः।

स च स्वकीयेनैश्वर्येण सर्वं व्यश्नुवानो विष्णुरेव। अथ चास्मिन् देहे जीवो लोकस्वामी, तथाहि पञ्च ज्ञानेन्द्रियाणि बाह्या लोकाः, पञ्च चाभ्यन्तराः, यथा—फुफ्फुसौ, हृदयं, यकृत्, प्लीहानौ। मूत्रपुरीषद्वारद्वयं, सुषुम्नाख्यमेकं ज्ञानवहम् एकञ्च मुखाद् गुदान्तं महाविवरमिमानि चतुर्दशभुवनानि, एभिरन्तःस्थमरिष्टं बहिरायाति। मन्त्रलिङ्गञ्च—

तमीशानं जगतस्तस्थुषस्पतिमित्यादि। यजुः २५।१८।।

भवति चात्रास्माकम्—

स्वामी हि लोकस्य परात्परोऽसौ
स एव विष्णुर्वितनोति सर्वम्।
तथा यथा [1]स्वात्मवशी शरीरं
स्वैश्वर्यमात्रेण करोति मान्यम्।।१०६३।।

१. आत्मा-जीवः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिलोकधृक्–७५१

त्रीन् लोकान् धृष्णोतीति त्रिलोकधृक्।

"ञिधृषा प्रागल्भ्ये" इति सौवादिकधातोः क्विनि, जश्त्वे, ***क्विन्प्रत्ययस्य कुः*** (पा० ८।२।६२) इति कुत्वे च धृक्–शब्दसिद्धिः। लक्षणया च धारणपोषणरूपोऽर्थः।

यद्वा **त्रिलोकधृत्**–इत्यपि क्वचिद् दृश्यते, तत्र "धृञ् धारण" इति धातोः क्विपि, तुकि, च स सिध्यति।

भूतं–वर्तमानं–भविष्यच्च सर्वं स एव धारयतीति निश्चाययितुं स त्रिलोकधृक्–त्रिलोकधृदित्यनेन वा नाम्ना स्तूयते। लोकेऽपि च पश्यामः–जीवः प्रार्थयते भगवन्तं **"यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु शन्नो भवतु भुवनस्य यस्पतिः"** (यजुः ३६।२) मनश्चक्षुर्हृदयञ्चापि त्रिकालं भूतभवद्भविष्यद्रूपं धारयति। एतेनैतेषु त्रिषु लोकत्वमुपचर्यते। अमुथैवायं सूर्योऽपि, यापितं–यापयिष्यमाणं याप्यमानञ्च तद्व्यवस्थया व्यवस्थितं धारयति।

मन्त्रलिङ्गञ्च–

अधि क्षियन्ति भुवनानि विश्वा। ऋक् १।१५४।२।।

भवति चात्रास्माकम्–

त्रिलोकधृग् विश्वमिदं समस्तं
भवद् भविष्यत् किमु वापि भूतम्।
स्वज्ञानमात्रे नियतं विधार्य
पात्रं यथापो निहितं बिभर्ति ।।१०६४।।

सुमेधाः–७५२

सूपसर्ग उत्तमार्थको मेधाशब्दो "मिदृ मेदृ मेधाहिंसनयोः" इति भौवादिकौ धातू, तौ च मतभेदेन थान्तौ धान्तौ च। अस्माभिश्चात्र धान्तोऽनुकल्पः स्वीक्रियते। मेधृ धान्तधातोः ***"गुरोश्च हलः"*** (पा० ३।३।१०३) सूत्रेण स्त्रियामकारप्रत्ययस्ततष्टाप् मेधेति। शोभना मेधा यस्येति बहुव्रीहौ ***"नित्यमसिच् प्रजामेधयोः"*** (पा० ५।४।१२२) सूत्रेण समासान्तः असिच् प्रत्ययः ***"यस्येति च"*** (पा० ६।४।१४८) सूत्रेणाकारलोपः प्रातिपदिकसंज्ञा, सुबादिकार्यम्, असन्तलक्षणो दीर्घश्च। ***नित्यमसि***जिति सूत्रे नित्यग्रहणमन्यपूर्वपदादपि भवत्यसिज्, न केवलं नञ्दुःसुभ्य एवेति सूचयति। तथा च–

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रोत्रियस्येव ते राजन् मन्दकस्याल्पमेधसः।
अनुवाकहता बुद्धिर्नैषा तत्त्वार्थदर्शिनी ।।

(द्र० महा० शान्ति० १०।१।।)

मेधा धारणात्मिका बुद्धिरित्यनुशुश्रुम। सर्वत्रानुस्यूतलक्षणः सुमेधःसंज्ञो भगवान् विष्णुर्न कदापि कृतं विस्मरति। अथवा यावत्यो मेधाः संसृतौ तावत्यः सर्वास्तदनुगुणा एव। यो हि यावद् भगवतः सुमेधस्त्वं जानाति, स तावन्मेधासाम्राज्यं लभते—इतरप्राणिनाञ्च मेधास्तिरस्करोति, तज्जं वा ज्ञानमधिगच्छतीति बोद्धव्यम्। एवमन्यप्राणिष्वपि यथायथमूह्यम्। अत्र विष्णोर्नाम **सत्यमेधाः** (सं ७५५) इत्यपि संगृहीतमस्ति। कदाचिदपि तस्य मेधा न विपर्येति अत एव स सुमेधा उक्तो भवति। मन्त्रलिङ्गञ्च—

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम्।।
यस्मादृते न सिध्यति यज्ञो विपश्चितश्चन। स धीनां योगमिन्वति।

ऋक् १।१८।६, ७।।

इति दिङ्मात्रमुक्तम्। विशेषजिज्ञासुभिर्वेदोऽनुसन्धेयः बुद्धिवैशद्याय, सत्यज्ञानमयो हि वेदः।

न त्वदन्यः कवितरो न मेधया धीरतरो वरुण स्वधावन्।

अथर्व ५।११।४।।

भवतश्चात्रास्माकम्—

विष्णुः सुमेधाः स हि सत्यमेधा
व्यनक्ति विश्वं प्रपदं तमेव ।
तमेव देवं वरुणं तथाग्निं
प्रजापतिं वायुमथापि मत्वा ।।१०६५।।

तथा—

मेधाभिलाषी निजदोषमृष्ट्यै
यथार्हमार्गञ्च गुरूपदेशात् ।
लब्ध्वा व्रतान्याकलयन् समेति
मेधां सुमेधामुत सत्यमेधाम् ।।१०६६।।

मन्त्रलिङ्गञ्च—

मेधाम्मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यां मेधां देवगणाः पितरश्चोपासते।
तया मामद्य मेधया अग्ने मेधाविनं कुरु स्वाहा।। यजु ३२।१५, १४।।

मेधजः—७५३

मिधृ मेधृ मेधाहिंसनयोरिति भौवादिकौ धातू। तत्र मेधृ धातोः ***"हलश्च"*** (पा० ३।३।१२१) सूत्रेणाधिकरणे घञ् प्रत्ययः, उपदेशसिद्धश्च गुणो मेधः। सप्तम्यन्ते मेध इत्युपपदे जनिधातोः ***"सप्तम्यां जनेर्डः"*** (पा० ३।२।९७) सूत्रेण डः प्रत्ययः, तस्मिंश्च परतष्टेर्लोपः मेधज इति। जनिभावमापद्य जनमेधायां तिष्ठासुर्भगवान् विष्णुर्जगदाविष्करोति, ततश्च स मेधास्थित एव मेधज इत्युच्यते।

यद्वा—जगदाविष्करणमेव मेधो=यज्ञस्तस्मिन् जायते=जायमान इव प्रतीयत इति मेधजो भगवान् विष्णुः। तथा च मन्त्रलिङ्गम्—

कामस्तदग्रे समवर्तताधि। ऋक् १।१२९।४।।
तन्महिना जायतैकम्। ऋक् १०।१२९।३।।
ऋतञ्च सत्यं चाभीद्धात्तपसोऽध्यजायत। ऋक् १०।१९०।१।।

तथा—

यथापूर्वमकल्पयद्। ऋक् १०।९०।३।।

अन्यच्चापि मन्त्रलिङ्गम्—

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।। अथर्व १०।८।३३।।

लोकेऽपि च पश्यामो यथाभिमतं चिकीर्षुः कर्म, पूर्वं मेधायां चित्रयति, तच्चित्रं पश्चात्तत् करोति, पुनस्तदभिसम्पद्यते। तथैव मेधात्मके यज्ञे जातः स्वाभाव्येन प्रादुर्भूतो भगवान् विष्णुराकाशवत् सर्वत्र व्यष्टो मेधज इति नाम्ना स्तूयते। मन्त्रलिङ्गञ्च—

इन्द्रमिद् विमहीनां मेधे वृणीत मर्त्यः।
इन्द्रं सनिष्युरूतये। ऋक् ८।६।४४।।

तथा—

स हि क्रतुः स मर्यः स साधुमित्रो न भूदद्भुतस्य रथीः।
तं मेधेषु प्रथमं देवयन्तीर्विश उपब्रुवते दस्ममारीः।। ऋक् १।७७।३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स मेधजो विष्णुरनेकनामा
मेधेषु यज्ञेषु विराजमानः ।
स्वकं स्वरूपं विविधं व्यनक्ति
तं मेधजं तत्त्वविदः स्तुवन्ति ।।१०६७।।

एवं मेधपतिनाम्नाऽप्ययं स्तुतो भवति। तथा च मन्त्रलिङ्गम्—

गाथपति मेधपति रुद्रं जलाषभेषजम्। तच्छयोः सुम्नमीमहे।

ऋक् १।४३।४।।

धन्यः—७५४

"धन धान्य" इति जौहोत्यादिको धातुस्ततः पचाद्यच् धनम् धनशब्दाच्च धनं लब्धेत्यर्थे *"धनगणं लब्धा"* (पा० ४।४।८४) सूत्रेण यत् प्रत्ययस्ताद्धितः, धनं लब्धा, कृतार्थो वा धन्य इति। सर्वधनेश्वरो हि धन्यः। यो हि यदर्थकामोयं स्तौति, स च ददाति यथाकाममर्थं स्तावकाय, स दाता धन्यमात्मानमनुभवति। स एक एव च बुद्धिभेदात् प्रयोजनभेदाच्च विविधाभिः स्तुतिभिः स्तूयते। **"राधानां पते"** (ऋक् १।३०।५; ३।५१।१०) तथा **"राधस्पते"** (ऋक् १०।६१।१४) इति मन्त्रलिङ्गम्। धन्याभिधानेऽपि मन्त्रलिङ्गम् यथा—

पवमान मह्यर्णो वि धावसि सूरो न चित्रो अव्ययानि पव्यया।
गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्वसि ।।

ऋक् ९।८६।३४।।

भवति चात्रास्माकम्—

धन्यो हि सूर्यः स हि विष्णुरुक्तः
स स्तूयतेऽनन्तविभेदभक्तः ।
यदर्थकामोऽर्थयते तमर्थी
तथाविधार्थेन स तं पिपर्ति[1] ।।१०६८।।

सत्यमेधाः—७५५

अस्तेः शतरि सत्, तस्मात् *"तत्र साधुः"* (पा० ४।४।९८) सूत्रेण यत्

१. पिपर्ति=पूर्णं करोतीत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रत्ययः ततः स्त्रियां टाप् सत्या। मेधा शब्दश्च मेधतेर्व्युत्पादितचरः। सत्या-अव्यभिचारिणीमेधा-अर्थधारणात्मिका शक्तिर्यस्य स सत्यमेधा इति *''नित्यमसिच् प्रजामेधयोः''* (पा० ५।४।१२२) सूत्रेनित्यग्रहणात् क्वचिदन्यपूर्वपदादपीति ज्ञाप्यते। अतः सत्यपूर्वपदान्मेधाशब्दात् समासान्तोऽसिच् प्रत्ययः यथाल्पमेधस इत्यत्र। मन्त्रलिङ्गञ्च भावप्रधानम्—

देव इव सविता सत्यधर्मा। ऋक् १०।३४।८।। तथा

देवो न यः सविता सत्यमन्मा। ऋक् १।७३।२।।

भुवः सम्राडिन्द्र सत्ययोनिः। ऋक् ४।१९।२।।

इति दिङ्मात्रमुक्तम्।

लोकेऽपि च पश्यामः—सर्वे हि पदार्था भगवता सत्यमेधसा सत्यमेधोरूपेण स्वगुणेनाकल्पं सुव्यवस्थं प्रवर्त्यन्ते, नहि तदीयं ज्ञानं क्वचिद् व्यभिचरति। यतो हि स ईश्वरः सत्यः कविश्च। मन्त्रलिङ्गञ्च—

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः।
देवो देवेभिरागमत्। ऋक् १।१।५।।

भवतश्चात्रास्माकम्—

स सत्यमेधा भगवान् वरेण्यः
सत्यः स विष्णुर्न जहाति धर्मम्।
यथाविधं यद्रचितं हि पूर्वं
तथाविधं तद्रचयन् समेति ।।१०६९।।

अमोघ उक्तः स हि विश्वकर्मा
स सत्यधर्मा स च सत्ययोनिः ।
मेधापि तस्मात् कथितास्ति सत्या
तस्येति लोकेऽपि तथैव दृश्या ।।१०७०।।

धराधरः—७५९

धृञ् धारण इति भौवादिको धातुस्ततः पचाद्यच् प्रत्ययः, गुणो रपरः। धरति, धारयति वा धरः, स्त्रियां टाप् धरा। तां धरतीति धराधरो विष्णुः। अथवा—धराधर इत्यत्र धरा+आधर इतिच्छेदे—आङ्पूर्वाद्धरतेः पचाद्यच्। आ=समन्ताद्धरतीत्याधरः। धराम् आधरति=धराधरो विष्णुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्वा 'चराचरः चलाचलः पतापतः वदावदः' इतिवत् अचि धातोर्द्वित्वमाक् चाभ्यासस्य **'धराधरः'**। अस्मिन् पक्षे ***चरिचलिपतिवदीनां द्वित्वमाक् चाभ्यासस्य*** (वा० ६।१।१२) इत्यत्र धृञोऽप्युपसंहारो द्रष्टव्यः। धराधरः— अत्यन्तं धारणशीलो विष्णुः। मन्त्रलिङ्गञ्च—

स दाधार पृथिवीं द्यामुतेमाम्। ऋक् १०।१२१।१।।

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजु ३१।१६।।

यस्मिन् क्षियन्ति भुवनानि विश्वा। इत्यादि।

प्रत्येकं वस्तु किञ्चिन्न किञ्चिद्धारयति, अतः सर्वे पदार्था धरा उच्यन्ते, तेषाञ्च सर्वेषां य आधारः स सर्वाधारो धराधर इत्युच्यते।

लोकेऽपि च पश्यामो देहाभिमान्यात्मा पृथिवीमिव दोषधातुमलमूत्राधारं वपुर्धारयति-जीवयति, तेजसा च तत् पिपर्ति। एवं जीवोऽपि तमनुकुर्वाणो धराधर उक्तो भवति। **''अनड्वान्[1] दाधार पृथिवीम्''** (अथर्व ४।११।१) इति च मन्त्रलिङ्गम्।

भवति चात्रास्माकम्—

धराधरो विष्णुरनेकशक्तिः
सर्वं जगद्धारयतीति मन्ये ।
तथा यथा भारवहं वपुश्च
जीवोऽविकारी धरते सहर्षम्।।१०७१।।

एतेन स सर्वाधार इत्यप्युक्तो भवति।

❖ ❖ ❖

तेजोवृषो द्युतिधरः सर्वशस्त्रभृतां वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः।।६४।।

७५७ तेजोवृषः, ७५८ द्युतिधरः, ७५९ सर्वशस्त्रभृतांवरः। ७६० प्रग्रहः, ७६१ निग्रहः, ७६२ व्यग्रः, ७६३ नैकशृङ्गः, ७६४ गदाग्रजः।

---

१. अनड्वान् उक्षा सूर्य इत्यनर्थान्तरम्। अत एव लौकिकोऽप्ययम् अनड्वान् सूर्य दैवतकः पृथिवीं पिपर्त्ति अन्नोत्पादने प्रजनने च साधनीभूतः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तेजोवृषः—७५७

तिज निशाने इति भौवादिकश्चौरादिकश्च, तेज पालने इति भौवादिको वा धातुस्ततः ***''सर्वधातुभ्योऽसुन्''*** (४।१८६) इत्यौणादिकः ''असुन्'' प्रत्ययः, सस्य रुत्वोत्वगुणाः, धातोरिकारस्य लघूपधलक्षणो गुणश्च **तेज** इति।

वृषः—वृषु सेचन इति भौवादिको धातुस्तत ***''इगुपधज्ञाप्रीकिरः कः''*** (पा० ३।१।१३५) इति सूत्रेण कः प्रत्ययः कित्त्वाद् गुणाभावः। वर्षतीति वृषः। तेजसो वृषः तेजोवृषः। यद्वा तेजश्चासौ वृष इति तेजोवृषः। तेजः पालनलक्षणं, सन्तापलक्षणञ्च। प्रजायाः पालनलक्षणं तेजो वर्षति, सन्तापलक्षणं वा तेजो वृषतीति तेजोवृषः स उच्यते भगवान् विष्णुः। अथवा तेजाः-पालको, वृषः-वर्षकः सिञ्चकश्च। यतो हि सर्वं स पालयति, वर्धयति, च सर्वं सेचनेन। सर्वं हि वस्तु सम्यक् पालितं सत् सन्तापलक्षणेन तेजसा परिपोषमेति। तेजोवृष इति सूर्यस्याग्नेर्वापि नाम, सूर्याश्रितो ह्यग्निः। शरीरे च पित्तधातुरेवाग्निः। यद्वा तेजोरूपाणां सूर्यादीनां वर्षकः शक्तेर्वर्धकः शक्तिदाता वा, तेजोवृष इति विष्णोर्नाम। व्याप्तश्चायं भगवान् तेजोवृषत्वरूपेण स्वेन गुणेन समस्ते विश्वे।

मन्त्रलिङ्गञ्च—

तेजोऽसि तेजो मयि धेहि। यजुः १६।६।।

यद्वा तेजांसि-आपः तानि वर्षतीति, तेजोवृषः सूर्यः। लोकेऽपि च पश्यामः प्रतिवस्तु स्वरं वर्षति। चिन्तयितुमप्यशक्यानि, तेजोजानि नानाविधानि रूपाणि लोके भवन्तीति प्रत्यक्षं दृश्यते। तथा च— यथा मनुष्यशेफो रेतो मूत्रञ्च मुञ्चति।

भवति चात्रास्माकम्—

तेजोवृषो विष्णुरिदं प्रकल्प्य
करोति सर्वं स्वगुणानुरूपम्।
तेजो जलं तेज इहास्ति वाग्निः
सूर्यो नरो वौषधिपश्च तद्वत्[१] ।।१०७२।।

द्युतिधरः—७५८

ओजस्तेजोद्युतिधरः (सं० २७५) इति नामव्याख्याप्रसङ्गे व्याख्यातमेतन्नाम।

---

१. तद्वत्-तेजोवृषवत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इह तु पुनरेतत् स्वतन्त्रन्नामोपदिष्टमिति। द्योतत इति द्युतिः—***''इगुपधात् कित्''*** (उ० ४।१२०) इत्युणादिसूत्रेण किद्वद्भावभावितः 'इन्' प्रत्ययो विहितः कित्त्वाद् गुणाभावः। द्योतते-प्रकाशत इति द्युतिः। धरतेः पचाद्यचि धर इति। द्युतिश्चासौ धर इति द्युतिधरः। स्वयम्प्रकाशमानः सर्वं धरति इति वास्तविकार्थः सर्वस्याधारश्चेत्यर्थः।

लोकेऽपि च पश्यामः—शरीरो हि जीवात्मा प्रकाशमानः स्वरूपेण शरीरं धरतेऽतोऽयं द्युतिधर इत्युच्यते। मन्त्रलिङ्गञ्च—

त्वेषस्ते धूमऋण्वति दिविषञ्छुक्र आततः।
सूरो नहि द्युता त्वं कृपा पावक रोचसे ।। ऋक् ६।२।६।।

भवति चात्रास्माकम्—

विष्णुर्हि लोकं स्वगुणानुरूपं
करोति चित्रं द्युतिमप्रमेयम्।
तथा यथा देहगतो हि जीवो
वपुर्दधात्यात्मसमानदीप्रम् ।।१०७३।।

सर्वशस्त्रभृतांवरः—७५६

सर्वशब्दः सर्व इति स्वतन्त्रनामव्याख्याने व्याख्यातम्। शस्त्रम्—शसु हिंसायामिति सौवादिको धातुस्ततो ***''दाम्नीशसयुयुज''*** (पा० ३।२।१८२) इत्यादिना सूत्रेण करणे ष्ट्रन् प्रत्ययः ***''षः प्रत्ययस्य''*** (पा० १।३।६) इति षस्य इत्संज्ञा तस्य लोपश्च। ***''हलन्त्यम्''*** (पा० १।३।३) इति नकारस्येत्संज्ञा, तस्य लोपः। ***''निमित्तापाये नैमित्तिकस्याप्यपायः''*** इति नियमात् षकारविगमे टकारस्यापि तकारः। ***''तितुत्र''*** (पा० ७।२।६) इति सूत्रेणेण्निषेधः। शस्त्रमिति। भृत्—भृञ् धातोः क्विप् तस्य च सर्वापहारः। ***''ह्रस्वस्य पिति कृति तुक्''*** (पा० ६।१) इति तुक्। सर्वेषां शस्त्रभृतां मध्ये वरः श्रेष्ठः। ***''न निर्धारणे''*** (पा० २।२।१०) इति सूत्रेण निर्धारणषष्ठ्या समासनिषेधः। समुदायात् षष्ठीबहुवचनम्। वर इति वृञ वरणे धातोः—***''ग्रहवृदृनिश्चिगमश्च''*** (पा० ३।३।६८) सूत्रेण कर्मणि अप् प्रत्ययो गुणो रपरः। सर्वेषां शस्त्रभृतां मध्ये वरीतुमर्हः क इति चेत् स एव भगवान् विष्णुः। कुतः? जगति यावत् स्थावरं जङ्गमं वा दृश्यते, तत् सर्वं भगवता व्यवस्थापितं नाशाय उपकाराय वा प्रभवति। यथा च हिंस्रः पशुः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वनखदन्तशृङ्गपुच्छशुण्डचञ्चुलत्ता[1] द्याघातं भगवद्व्यवस्थाबद्धः स्वरक्षार्थं भक्षणार्थं वा प्रयुङ्क्ते, तत्र पशोरेकशस्त्रप्रयोगः। भगवांस्तु सर्वं प्रयुङ्क्ते तथा च भूकम्पाज्जनपदध्वंसो भवति, दूषितवातप्रवाहेण महामारी प्रवर्तते तया भूयसां मृत्युर्भवति सर्पादिघातकजन्तवश्च निमित्तवशादपरं घ्नन्ति।

मनुष्योऽपि भगवन्तमनुकुर्वन् शस्त्रभृत् सर्वशस्त्रभृदतिशायी सर्वैः शस्त्रभृद्भिर्व्रियते-मान्यते पूज्यत इत्यर्थः। अतः सोऽपि सर्वशस्त्रभृतांवर उच्यते। भगवान् विष्णुः नखशृङ्गपुच्छशुण्डदन्तदंशलत्ताताडनादीनां बहुत्वं विज्ञापयितुं प्राणिषु नखादिभेदं विधत्ते।

यथा-गोमहिषी-अज-गण्डकानां[1] शृङ्गवैविध्यम्। विडालाश्वसिंहानां नखभेदः। पक्षिणां चञ्चुभेदः। उष्ट्रे ककुद्, हस्तिनि शुण्डम्, अश्वे च लत्तां बहुधा वितनोति, एवं सर्वत्रोह्यम्। अत एव स सर्वशस्त्रभृतांवर इत्युच्यते।

मन्त्रलिङ्गञ्च—

तं तमुग्रं करोमि। ऋक् १०।१२५।५।।

भवति चात्रास्माकम्—

शस्त्रं जगत्यां यदिहास्ति दृश्यं
मूलं तु तस्यास्ति स एव विष्णुः।
रक्षार्थमेवं व्यवहारसिद्ध्यै
स प्राणिनः शस्त्रभृतो विधत्ते।।१०७४।।

प्रग्रहः—७६०

प्र उपसर्गः, ग्रह उपादान इति क्रैयादिको धातुस्ततः प्रकर्षेण गृह्णाति विश्वमिति प्रग्रहः, पचाद्यच् प्रत्ययः कर्तरि। अथवा प्रगृह्यते विश्वं येनेति करणे *"ग्रहवृदृनिश्चिगमश्च"* (पा० ३।३।५८) सूत्रेण 'अप्' प्रत्ययः प्रग्रहः। स च प्राणिषु मन इति नाम्ना प्रसिद्धं, भगवति च चेतनाख्यं मनः ज्ञानमिति प्रसिद्धम्। सर्वज्ञानमयेन भगवतेदं विश्वं विशेषेण ग्रहणेन गृहीतमिति स प्रग्रह इत्युक्तो भवति।

लोकेऽपि च पश्यामः—सर्वञ्चेदं सन्धिभिः सन्धितं प्रगृहीतमिव। सर्वञ्चेदं जगत् प्रग्रहरूपेण मनसा व्यापारे व्याप्रियते। तत्र मन्त्रलिङ्गम्—

---

१. गण्डकस्यैव द्वीपीत्यपि नामान्तरम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुषारथिरश्वानिव यन्मनुष्यान्नेनीयते.......

तन्मे मनः शिवसङ्कल्पमस्तु। यजुः ३४।६।। तथा—

यथाज्यं प्रगृहीतमालुम्पेत् स्रुचो अग्नये ।

एवा ह ब्रह्मभ्यो वशामग्नय आवृश्चतेददत्।। अथर्व १२।४।३४।।

तथा—

ऋजीतिभी रशनाभिर्गृभीतान्। ऋक् १०।७६।७।।

इति प्रग्रहे लिङ्गम्।

भवति चात्रास्माकम्—

स प्रग्रहो विष्णुरनन्तभेदं
जगद् विरच्यापि [1]मनोऽनुबद्धम् ।
[2]असङ्गमात्रः स [3]मनोग्रहेण
प्रगृह्य विश्वं नयते [4]विदिक्षु ।।१०७५।।

निग्रहः—७६१

नि—उपसर्गः। 'ग्रह उपादाने' इति धातोर् ***''ग्रहवृदृनिश्चिगमश्च''*** इति (पा० ३।३।५७) सूत्रेण कर्तृभिन्ने कारके अप् प्रत्यये निपूर्वो बहुव्रीहिः। नि-निश्चयेन गृह्यते येनेति निग्रहो विष्णुः अत्र च मन्त्रलिङ्गम्—

येन द्यौरुग्रा पृथिवी च दृढा येन स्व स्तभितं येन नाकः।

यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।

ऋक् १०।१२१।५।।

यथा शरीर आत्मा शरीरस्य निगृहीता भवति, तथा भगवान् विष्णुरस्य विश्वस्य निगृहीता भवत्यतः स निग्रह इत्युक्तो भवति। लोकेऽपि च पश्यामो यथा यन्त्रस्य चालको यन्त्रस्य निगृहीता भवत्यप्रत्यक्षमपि वर्तमानः, यन्त्राधिपतिर्वा यथा यन्त्रनियामकः, तथैवायं विष्णुः स्वशक्त्या निगृह्य यथाधुरं यन्त्रमिमं संसारं नियतं सारयति।

भवति चात्रास्माकम्—

स निग्रहो विष्णुरमोघवर्त्मा
निगृह्य विश्वं नयते यथावत् ।

---

१. मनः—अन्तरिन्द्रियम्। २. निर्लिप्तः। ३. मनोग्रहेण-ज्ञानग्रहेण। ४. विदिक्षु-नानादिक्षु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूते स [१]जन्यञ्च विहन्ति मर्त्यं[२]
सर्वं स्वतन्त्रं कुरुते निगृह्णन्।।१०७६।।

व्यग्रः—७६२

'अगि गतौ' इति भौवादिको धातुस्तत ***''ऋज्रेन्द्राग्रवज्र''*** (उ० २।२८) इत्यादिनोणादिसूत्रेण रन् प्रत्ययो नलोपश्च निपात्यते। अङ्गतीत्यग्रः। विविधं-यथास्वभावसम्भूतं-अङ्गनं-गमनं यो विधत्ते व्यवहरतीत्यर्थः स व्यग्र उच्यते।

भगवांश्च यथास्वभावमात्मनि क्षियन्तं समस्तं यथावर्त्म गमयतीति व्यग्र इवास्ते। या चेयं लोके व्यग्रता दृश्यते, तस्या अपि मूलं स एव। यद्वा विविध-मुत्तरायणदक्षिणायनादिभेदेन अङ्गति-गच्छतीति व्यग्रः सूर्यो ग्रहोपग्रहपरिवृतः।

मन्त्रलिङ्गञ्च—

इमा अभि प्र णोनुमो विपामग्रेषु धीतयः।
अग्नेः शोचिर्न दिद्युतः।। ऋक् ८।६।७।।

भवति चात्रास्माकम्—

व्यग्रः स विष्णुः स्वयमग्रधर्मा
व्यग्रञ्च विश्वं तनुते स सर्वम्।
व्यग्रोऽस्ति जीवो निजलक्ष्यलब्ध्यै
सूर्यादयो व्यग्रतमाश्च तस्मात्।।१०७७।।

नैकशृङ्गः—७६३

एतेः कनि व्युत्पादित एकशब्दः **एकः** (सं० ७२५) इति स्वतन्त्रनाम-व्याख्याने। शृङ्गशब्दश्च शॄ हिंसायां धातोः ***''शृणातेर्ह्रस्वश्च''*** इत्युणादिसूत्रेण गन् प्रत्ययो, नुडागमो, धातोर्ह्रस्वश्च। गनो गकारस्य नेत्त्वम् ***''उणादयो बहुलम्''*** (पा० ३।३।१) इति वचनात्। यद्वा गनः कित्त्वविधानसामर्थ्यान्नेत्त्वम्। ***''नेड् वशि कृति''*** (पा० ७।२।८) इतीण्निषेधः अनुस्वारपरसवर्णौ। नास्ति एकः शृङ्गो यस्य स नैकशृङ्गः, नञा समासे नलोपाभावः। 'नैकशृङ्गः' सूर्यो विष्णुर्वा। शृङ्गमिति दीप्तेर्नाम, दक्षिणोत्तराभ्यां परिभ्रमतः सूर्यस्य मृदुतीक्ष्णरूपा नैका दीप्तयो

१. जन्यं-जनयितुमर्हम्। २. मर्त्यम्-मारयितुं योग्यम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवन्त्यतः सूर्यस्य नैकशृङ्ग इति नाम। हिंसासाधनं तथा परकृतबाधानिराकरणसाधनमपि शृङ्गम्, बहूनि च सर्वव्यापकस्य विविधरूपस्य विष्णोर्हिंसासाधनानि। तथा हि प्रत्येकं व्यक्तिः स्वेप्सितप्रतिबन्धकान् प्रत्यूहान् निराकर्तुं सर्वथा प्रयतते, तत्र येन प्रयत्यते तन्निराकरणसाधनं शृङ्गशब्देनाभिधीयते, तथा चानेकशफानां पशूनां शिरसो निर्गते शृङ्गे भवतः, यथा गोमहिषीहरिणाजादीनाम्। मनुष्यस्य हस्तौ शृङ्गे। गण्डकस्य मस्तिष्कान्निर्गतमेकमेवं शृङ्गं भवति। द्विशफानां मेषप्रभृतीनां लोमान्येव शृङ्गाणि। सिंहानां नखाः, सूकराणां हनवस्तथा हस्तिनां दन्ता एव शृङ्गाणि भवन्ति। तथा च—

एक वा इदं वि बभूव सर्वम्। ऋक् ८।५८।२।।

इत्यृङ्मन्त्रस्य व्याख्याभूतं जगत्तमेव व्यवस्थापयितारं जगदध्यक्षं विष्णुं गमयति। इति दिङ्मात्रमुदाहृतम्। तथा च मन्त्रलिङ्गम्—

शिशानो वृषभो यथाग्निः शृङ्गे दविध्वत् ।
तिग्मा अस्य हनवो न प्रतिधृषे सुजम्भः सहसो यहुः।।

ऋक् ८।६०।१३।।

शृङ्गं ह्युदितमिव भवति तथा सूर्योऽपि दक्षिणोत्तरायणादिभेदेन नैकधोदयनान्नैकशृङ्ग उच्यते। एवं सर्वविधप्राणिनामुदयनकालः (प्रसवकालः) नियतो न भवति, किन्तु सर्वेषां भिन्नकालिकः प्रसव इति भगवतो नैकशृङ्गस्यैवायं धर्मो व्याप्तः सर्वत्र लोके। सर्वत्र सूर्य एवात्मरूपेण व्याप्तः। तथा च मन्त्रलिङ्गम्—

सूर्य आत्मा जगतस्तस्थुषश्च। यजुः ७।४२।।

नैकशृङ्गवत्त्वे मन्त्रलिङ्गम्—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे। ऋक् ४।५८।३।।

इत्यादि। व्याख्यातोऽयं मन्त्रः पातञ्जलमहाभाष्ये। केवलशृङ्गत्वे मन्त्रलिङ्गम्—

वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा ।
प्रादेवीर्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे।।

ऋक् ५।२।६।।

एक एवाग्निर्बहुधा स्तूयते। तथा च वेदः—

एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनु प्रभूतः ।
एकैवोषाः सर्वमिदं वि भात्येकं वा इदं वि बभूव सर्वम्।।

ऋक् ५।५८।२।।

तमेव च सूर्यं नक्षत्रनाम्ना विशिनष्टि। तथा च—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम् ।
चित्रा मघा यस्य योगेऽधिजज्ञे तं वा हुवे अति रिक्तं पिबध्यै।।
ऋक् ८।५८।३।।

तनूनपात् पवमानः शृङ्गे शिशानो अर्षति। अन्तरिक्षेण रारजत्।।
ऋक् ६।५।२।।

चतुःशृङ्गोऽवमीद् गौर एतत्। ऋक् ४।५८।२।।

इति पथः प्रदर्शनम्।

भवतश्चात्रास्माकम्—

स नैकशृङ्गो भगवान् वरेण्यो
विष्णुः ससर्जाखिल भेदभिन्नम्।
शृङ्गं सदेकं द्विविधं विभज्य
स हस्तशृङ्गं मनुजं करोति ।।१०७८।।

नखी तथा चैकशफी न शृङ्गी
दन्ती च वा सूकर एष लोके ।
शुण्डा करिण्यां थुहनं तथोष्ट्रे
विभक्तलीलं विधुनोति विश्वम् ।।१०७९।।

गदाग्रजः—७६४

'गद व्यक्तायां वाचि' भौवादिको धातुस्ततः कर्तरि पचाद्यच् प्रत्ययो गदतीति गदः।

अग्रः—'अगि गतौ' इति भौवादिकाद्धातोरुणादिरन् प्रत्ययो, नलोपश्च निपातनात्। अङ्गन्तीति—अग्राः। गदेषु-गदनशीलेषु, अग्रेषु-गमनशीलेषु चानुप्रविष्टो जात इव प्रतीयमानो गदाग्रज इति विष्णोर्नाम। 'जनी प्रादुर्भावे' इति दैवादिको धातुः, ततः ***''सप्तम्यां जनेर्ड''*** (पा० ३।२।९७) सूत्रेण डः प्रत्ययो ***''डित्यभस्यापि टेर्लोपः''*** इति वार्तिकानुशासनाट्टिलोपश्च गदाग्रजः।

लोकेऽपि च पश्यामः—शब्दायमाने, गमनशीले च जीवितशरीर एव जीवात्मनोऽवभासः प्रकाश इत्यर्थः। एवञ्च भगवान् विष्णुरात्मनश्चेतनारूपेण गुणेन प्रकृतिं गतिमतीं विधाय स्वयं खमिव व्यापकमात्मानं तत्र जातमिव प्रकाशयति—अत एव गदाग्रजपदेन तं देवाः तुष्टुवुः। आत्मगुणसम्पृक्तञ्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनयति विश्वम्, तथा मन्त्रलिङ्गम्—

अग्निर्विश्वानि काव्यानि विद्वान्।। ऋक् ३।१।१८।।

इमं स्वस्मै हृद आ सुतष्टं मन्त्रं वोचेम कुविदस्य वेदत्।

अपां नपादसुर्यस्य मह्ना विश्वान्यर्यो भुवना जजान ।।

ऋक् २।३५।२।।

देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान।

इमा च विश्वा भुवनान्यस्य महद् देवानामसुरत्वमेकम् ।।

ऋक् ३।५५।१६

तथा—

हिरण्यरूपं जनिता जजान। ऋक् १०।२०।६।।

एवं बहुत्र जनेः प्रयोगो वेदे कालभेदप्रत्ययनिमित्तः। निदर्शनमात्रं नः प्रयोजनम्।

यद्वा गदानां व्यक्तं शब्दं कुर्वतां मनुष्याणाम् अग्रजः-ज्येष्ठः-श्रेष्ठः। तेन हि भगवता सृष्ट्यादौ मानवेभ्यः श्रुतिरूपिणी स्वकीया वाणी प्रदत्ता। अत एव स वेदेषु वाचस्पतिशब्देन स्तूयते। भवति चात्रास्माकम्—

गदाग्रजो विष्णुरनेकरूपः
प्रजाः सिसृक्षुः पुरुधा ससर्ज ।
वदत्सु वाणीमधिजायतेऽसौ
गच्छत्सु यातोऽस्ति च जातपूर्वः।।१०८०।।

❖ ❖ ❖

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्।।६५।।

७६५ चतुर्मूर्तिः, ७६६ चतुर्बाहुः, ७६७ चतुर्व्यूहः, ७६८ चतुर्गतिः ।

७६६ चतुरात्मा, ७७० चतुर्भावः, ७७१ चतुर्वेदवित्, ७७२ एकपात्।।

चतुर्मूर्तिः—७६५, चतुर्बाहुः—७६६, चतुर्व्यूहः—७६७, चतुर्गतिः—७६८, चतुरात्मा—७६६, चतुर्भावः—७७०, चतुर्वेदवित्—७७१

चतस्रो मूर्तयो यस्य सः। तथा च मन्त्रलिङ्गं तस्य चतुष्ट्वस्य प्रतिपादकम्—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्ने! कविर्वेधा असि होता पावक यक्ष्यः ।
मन्द्रो यजिष्ठो अध्वरेष्वीड्यो विप्रेभिः शुक्र मन्मभिः।।

ऋक् ८।६०।३।।

पाहि चतसृभिर्वसो! ऋक् ८।६०।६।।

गतिभिरिति शेषः।

त्वां विप्रासः समिधान दीदिव आ विवासन्ति वेधसः।

ऋक् ८।६०।५।।

चतुरङ्गता च तस्य—

ते हि द्यावापृथिवी भूरिरेतसा नराशंसश्चतुरङ्गो यमोऽदितिः ।
देवस्त्वष्टा द्रविणोदा ऋभुक्षणः प्र रोदसी महती विष्णुरर्हिरे।।

ऋक् १०।६२।११।।

चतुरनीकता—

स जिह्वया चतुरनीक ऋञ्जते चारुवसानो वरुणो यतन्नरिम्।
न तस्य विद्म पुरुषत्वता वयं यतो भगः सविता दाति वार्यम्।।

ऋक् ५।४८।५।।

तथा—

एकं विचक्र चमसं चतुर्धा। ऋक् ४।३५।२।।
चतुः शृङ्गोऽवमीद् गौर एतत्। ऋक् ४।५८।२।।

तथा च चतुःसमुद्रता—

स्वयुधं स्ववसं सुनीथं चतुःसमुद्रं धरुणं रयीणाम् ।
चर्कृत्यं शस्यं भूरिवारमस्मभ्यं चित्रं वृषणं रयि दाः।।

ऋक् १०।४७।२।।

चत्वार ईं बिभ्रति क्षेमयन्तो०। ऋक् ५।४७।४।।
चतस्त्रः प्रदिशो मनो जगाम दूरकम्। ऋक् १०।५८।४।।

एवं बहुश ऋगालोचनेन भगवतो विष्णोश्चतुष्ट्वजन्यं महत्त्वं प्रकाशते, तदेव द्योतयितुं—**चतुर्मूर्त्तिः, चतुर्बाहुः, चतुर्व्यूहः, चतुरात्मा, चतुर्गतिरित्यादीनां** नाम्नां संग्रहोऽत्र।

चतुर्व्यूहः—चतुर्विधविशिष्टरचन इत्यर्थः। तथा चैका वाक् चतुर्धा भिद्यते विशिष्टस्वरूपा। यथा च वेदः—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः।

ऋक् १।१६४।४५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गतिश्चापि दिग्भेदनिमित्ततश्चतुर्धा भिद्यते। यथा च वेदः—

चतस्रः प्रदिशो मनो जगाम दूरकम्। ऋक् १० ।५८ ।४ ।।

तथा च स्वरूपमपि चतुर्धा भिद्यते योनिभेदनिमित्तम्। तच्च विद्योत्यते चतुरात्मनाम्ना, आत्मशब्दः स्वरूपपर्य्यायः। चतुर्धाविक्लृप्तयोनिरित्यर्थः। तद्यथा जरायुजाः, अण्डजाः स्वेदजाः, उद्भिज्जाश्चेति चातुर्विध्यं योनीनाम्। तासु च तादृश एव विष्णुरनुभूयते।

चतुर्भावः—भवन्त्यस्मिन्निति भावः। भवतेरधिकरणे घञ्। ते च भावाः **भाव** (सं० ७) नाम व्याख्याने विशदं व्याख्याताः, तत्र द्रष्टव्याः। चत्वारो भावा यस्येति स चतुर्भावः।

चतुर्वेदवित्—चतुरो वेदान् वेत्तीति चतुर्वेदविदिति। चतुर्धा विभक्तं वेदमसौ सम्यग् जानातीति तं स्तोतुं—चतुर्वेदविदिति नाम। सूर्यो हि सृष्टेरारम्भतो जनिमतां प्राणिनां हृदयस्थान् भावान् यथा याथार्थ्यतो जानाति न तथा जीवः। सूर्यो हि सदानावृतैकरसज्ञानोऽजरामरत्वात्, जीवश्च तिरोहितज्ञानो जन्ममरणशीलत्वात्। **''अग्निर्जन्मानि वेद''** इति (ऋक् ७ ।१० ।२) अत एव चोपपद्यते—

अपक्रामन् पौरुषेयाद् वृणानो दैव्यं वचः ।
प्रणीतीरभ्यावर्तस्व विश्वेभिः सखिभिः सहः।। अथर्व ७ ।१०५ ।१ ।।

तथा—

देवस्य पश्य काव्यं न ममार न जीर्यति। अथर्व १० ।८ ।३२ ।।

जगदेव देवस्य काव्यमिति **वेद** (सं० १२७) नाम व्याख्याप्रसङ्गे विशदं व्याख्यातम्। इति चतुष्ट्वयोजना संक्षेपतो दर्शिता, मनीषिभिर्यथाबुद्धिबलोदयं विस्तार्या उक्तञ्च दृढं दृढबलेन चरके यथा—

विस्तारयन्ति लेशोक्तं संक्षिपत्यतिविस्तरम्।
संस्कर्ता कुरुते तन्त्रं पुराणञ्च पुनर्नवम् ।। सिद्धिस्थान १२ ।६६ ।।

भाष्यकर्तापि संस्कर्तैव भवति, तस्मान्मयापि यथायोग्यं प्रयतितमत्र विष्णुसहस्रनामभाष्ये।

भवन्ति चात्रास्माकम्—

सोऽग्निश्चतुर्मूर्तिरचिन्त्यशक्तिः
स एव विष्णुः स उ वास्ति सूर्यः।
बध्नाति विश्वं ह्यभितोऽत उक्तो
विष्णुश्चतुर्बाहुरमोघवीर्यः ।।१०८१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोऽग्निश्चतुर्व्यूहपदप्रसिद्धः
संव्यूह्य विश्वं गमयत्यजस्त्रम् ।
यथा शरीरी सकलं शरीरं
वृण्वान एत्यात्ममनोऽर्थ्यमाप्तुम् ।।१०८२।।

चतुर्गतिश्चापि स विष्णुरेको
गन्तुं चतस्त्रश्च दिशः करोति ।
एकः स्वयं सन् चतुरात्मभूतो
विष्णुर्हि विश्वं विभिनत्ति भेदैः ।।१०८३।।

पृथक् पृथग् योनिषु वर्तमानं
चतुष्कसंख्यासु विचित्रकासु ।
विष्णुश्चतुर्भावपदप्रसिद्धम्
[1]त्रिधा विभज्याकलते च विश्वम् ।।१०८४।।

स एवात्मगतं वेदं वेदञ्चापि यथार्थतः ।
चतुर्भेदसमापन्नं जानाति नात्रसंशयः ।।१०८५।।

"वेदोऽसि" (यजुः २।२१) इत्यपि च मन्त्रलिङ्गम्—

१—४—७—१०

२—५—८—११

३—६—९—१२ इत्युक्तः प्रपञ्चो बहुत्र।

एकपात्—७७२

'इण् धातोः' औणादिके कनि प्रत्यये 'एकः' इति शब्दो व्युत्पादितः। (पूर्वत्र सं० ७२५) पादः—"पद गतौ" इति दैवादिको धातुस्ततः ***"पदरुजविशस्पृशो घञ्"*** (पा० ३।३।१६) सूत्रेण विहितो घञ् ***"कृत्यल्युटो बहुलम्"*** (पा० ३।३।११३) इति वार्तिकेन द्रष्टव्यः। उपधावृद्धिः। एकः पादो यस्येति बहुव्रीहौ ***"संख्यासुपूर्वस्य"*** (पा० ५।४।१४०) सूत्रेण पादान्तलोपः समासान्तः चर्त्वम्, एकपात्। सर्वमेत्य=प्राप्य गतो भवतीत्यर्थः। मन्त्रलिङ्गञ्च—

उत नोऽहिर्बुध्न्यः शृणोत्त्वज एकपात् पृथिवी समुद्रः ।
विश्वे देवा ऋतावृधो हुवानाः स्तुता मन्त्राः कविशस्ता अवन्तु।।

ऋक् ६।५०।१४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शन्नो अज एकपाद् देवो अस्तु शन्नोऽहिर्बुध्न्यः शं समुद्रः।
शं नो अपांनपात् पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥

ऋक् ७।३५।१३॥

तथा—

सूर्य एकाकी चरति। यजुः २३।१०, ४६॥

सूर्यो हि यथा—एकाकी चरति तथा मनुष्योऽपि स्वक्रियासिद्ध्यै एकाकी चरति, सजीवः सर्व एव वा प्राणिवर्गः स्वाभीष्टसिद्धये केवलः=एकाकी चरति। एकचररूपोऽयं गुणो जगति व्याप्तो भगवतो विष्णोरेव। भगवान् विष्णुर्हि विश्वं सिसृक्षुरपरं नापेक्षते सहायकमिति निश्चापयितुमेकपाद् नाम्ना स्तूयते।

भवति चात्रास्माकम्—

विष्णुर्हि लोके स्वत एव सिद्धः
स्वकानि गन्तव्यपदानि याति।
नापेक्षतेऽन्यं [1]मनुजोऽपि तद्वत्
[2]जीवात्मबन्धुः क्रमते [3]क्रियायाम्॥१०८६॥

❖ ❖ ❖

समावर्तोऽनिवृत्तात्मा दुर्जयो दुरतिक्रमः।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥६६॥

७७३ समावर्तः, ७७४ अनिवृत्तात्मा (निवृत्तात्मा), ७७५ दुर्जयः, ७७६ दुरतिक्रमः। ७७७ दुर्लभः, ७७८ दुर्गमः, ७७९ दुर्गः, ७८० दुरावासः, ७८१ दुरारिहा।

समावर्त्तः—७७३

समुपसर्गः, आङ् च सर्वतोभावेऽर्थे। "वृतु वर्तने" इति भौवादिको धातुस्ततो ण्यन्त्याद् ***"एरच्"*** (पा० ३।२।५६) सूत्रेण अच् प्रत्ययो णिलोपश्च, गति समासः, समीचीनमावर्तयतीति समावर्त्तः। यद्वा सम्=एकीभावे यथापूर्वं विश्वमावर्तयति। यथापूर्वं चेतनं जगत् क्रियया योजयन् सूर्योऽपि समावर्त्तः।

१. मनुज इति जीवितस्योपलक्षणम्। २. जीवात्मबन्धुः=अन्यसाहाय्यानपेक्षः। ३. एको म्रियते—एको वा जायत इति च स्पष्टं दृश्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्यञ्च यथा भगवान् विष्णुरावर्तयति, तथा प्रवाहनित्यमिदं जगदपि यथापूर्वं व्यवहारक्षमं विधत्तेऽतोऽयं विष्णुः समावर्त्तः यद्वा—यथायं सूर्य उदयास्ताभ्यां विशिष्यते, तथायं नित्योऽपि जीवो जन्ममृत्युभ्यामावर्तमानो विशिष्यते। एवञ्च योऽयं लोके समावर्तनात्मको गुणो व्याप्तो दृश्यते, स भगवतो विष्णोरेवेति समावर्त इत्यन्वर्थनामा भगवान् विष्णुः। मन्त्रलिङ्गञ्च—

स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव।
पुनर्ददताऽघ्नता जानता सं गमेमहि ।। ऋक् ५।५१।१६।।

तथा—

यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम।
ऋक् १०।१२१।६।।

भवति चात्रास्माकम्—

विभाति यस्मिन्नुदितो ह सूर्यो
व्यवस्थया वा पुनरेति यस्य ।
यो वा समावर्तयतीह चक्रं
विश्वस्य वन्द्यः स हि विष्णुरुक्तः।।१०८७।।

निवृत्तात्मनाम्नि (सं० ५६७; ७७४) यन्मन्त्रलिङ्गं तदेवात्राप्यावर्तनाम्नि ज्ञेयमिति।

निवृत्तात्मा—७७४

इदं नाम पूर्वं ५६७ संख्यायां व्याख्यातम्। इह पुनः किञ्चिद् भेदेन व्याख्यायते।

नि उपसर्गः, 'वृतु वर्तने' इति भौवादिको धातुस्ततः कर्तरि क्तः उदित्त्वान्निष्ठायां नेट्, गुणाभावः। निवृत्त आत्मा=स्वरूपं यस्य स निवृत्तात्मा बहुव्रीहिः। आत्मशब्दः—स्वरूपवचनः पूर्वं व्युत्पादितः। यथा चायं सूर्यः पृथिव्या वर्तुलत्वाद्—कुतश्चित् पृथिव्यंशस्थैरुदेति इति कैश्चिच्चास्तं गत इति दृश्यते तथा चोच्यते। तथैव विश्वस्य कर्ता भगवान् कुतश्चिन्निवृत्तः क्वचित् प्रवृत्तश्च लक्ष्यते। तद्यथा नह्येकस्मिन् काले माता बहून् पुत्रान् जनयति, परन्त्वेकैकं जनयन्ती बहूनामपत्यानां जनयित्री भवति, तथैवायं भगवान् विष्णुर्निवृत्तिप्रवृत्तिधर्मा निवृत्तात्मना स्तुतिमभ्युपैति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

यन्नियानं न्ययनं संज्ञानं यत् परायणम् ।

आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ।। ऋक् १० ।१६ ।४ ।।

य उदानड् व्ययनं य उदानट् परायणम् ।

आवर्तनं निवर्तनमपि गोपा नि वर्तताम् ।। ऋक् १० ।१६ ।५ ।।

आ निवर्त नि वर्तय पुनर्न इन्द्र गा देहि ।

जीवाभिर्भुनजामहै।। ऋक् १० ।१६ ।६ ।।

आ निवर्तन वर्तय नि निवर्तन वर्तय ।

भूम्याश्चतस्त्रः प्रदिशस्ताभ्य एना नि वर्तय।। ऋक् १० ।१६ ।८ ।।

इत्यादि।

भवति चात्रास्माकम्—

विष्णुर्निवृत्तात्मपदेन सिद्धः
करोति विश्वञ्च निवर्तमानम् ।
प्रवर्तते यः स निवर्तते वा
तस्मात् स्मरन् तं प्रभुमात्मगूढम्।।१०८८।।

दुर्जयः—७७५

दुसुपसर्गः। 'जि जये' इति भौवादिको धातुस्तत ***"ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्"*** (पा० ३ ।३ ।१२६) सूत्रेण कृच्छ्रार्थे दुस्युपपदे खल् प्रत्ययो गुणः सस्य रुत्वञ्च दुःखेन, जेतुं शक्यो दुर्जयः। मन्त्रलिङ्गञ्च—

शूरो निर्युधाधमद्दस्यून्। ऋक् १० ।५५ ।८ ।।

तिग्मायुधो अजयच्छत्रुमिन्द्रः।। ऋक् २ ।३० ।३ ।।

आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम्।

सङ्क्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः ।।

ऋक् १० ।१०३ ।१ ।।

एवं बहुत्र दुर्जयत्वं तस्य विष्णोः परिलक्षितं भवति, तस्मात् स दुर्जयः। लोके चापि दृश्यते—भगवन्नियमानुरूपं कर्म कुर्वाणो न केनापि जेतुं शक्य इति विष्णोस्तत्र व्याप्तिः, दुर्जयश्च विष्णुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

यो दुर्जयो यत्र च दुर्जयत्वं
तत्रास्ति विष्णुः स्वबलं दधानः ।
नरो हि योऽधीत्य जगत् जगत्यां
तनोति कृत्यानि स दुर्जयः स्यात् ।।१०८६।।

दुरतिक्रमः—७७६

दुरिति दुष्टः=दुःखजनको अतिक्रमः=नियमोच्चारो यस्य स दुरतिक्रमः।'क्रमु पादविक्षेपे' इति भौवादिकधातोरत्युपपदे भावे घञ्, अतिक्रमणमतिक्रमः। एवञ्च यो भागवतं नियममुल्लङ्घते स शश्वद्दुःखमेवाप्नोतीति दुरतिक्रमनामगम्योऽर्थः। अथवा क्रमशब्देनात्र क्रम्यतेऽस्मिन्नित्यधिकरणार्थकेन घञन्तेन सूर्यभ्रमणकक्षा गृह्यते। तस्याश्च सूर्यकृतातिक्रमात् समस्तं जगद्दुःखमाप्नुयादिति भगवान् भास्करः प्रभुव्यवस्थया व्यवस्थापितस्तस्यामेव क्रममाणो भूयो लोकानुपकरोति, पश्यति, च।

तथा च मन्त्रलिङ्गम्—

आ कृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।।

यजुः ३३।४३।।

लोकेऽपि च पश्यामः—आत्माननुमतं कुर्वाणो न सुखमाप्नोत्यपितु महद्दुःखमवाप्नोति। नहि च कश्चित् सूर्यशक्तिमतिक्रमितुं क्षमः, सूर्यो हि सर्वग्रहाधिपतिः। तस्मात् सोऽपि दुरतिक्रम इत्युक्तो भवति।

भवति चात्रास्माकम्—

अतिक्रमो दुःखमिहास्ति विष्णोः
तथा यथा राजविधानभङ्गः ।
दुःखाम्बुधौ सर्वजगन्निमज्जे-
दत्याक्रमेच्चेन्निजवर्त्म सूर्यः ।।१०६०।।

तथा—

विष्णुर्हि मूलं सकलस्य लोके
जीवो हि मूलं वपुषो जगत्याम् ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा हि मूलं सविता क्रियाया
अतिक्रमे दुःखमियात् समग्रम् ।।१०६१।।

तस्माद् दुरतिक्रमः स=इति शेषः।

दुर्लभः—७७७

"डुलभष् प्राप्तौ" इति भौवादिको धातुस्ततो दुस्युपपदे ***"ईषद्दुःसुषु कृच्छ्राकृच्छार्थेषु खल्"*** (पा० ३।३।१२६) सूत्रेण खल् प्रत्ययः, सस्य रुत्वम्। दुर्लभ इत्यत्र ***"लभेश्च"*** (पा० ७।१।६४) सूत्रेण नुम् प्राप्तः, तस्य च ***"न सुदुर्भ्यां केवलाभ्याम्"*** (पा० ७।१।६८) सूत्रेण निषेधः। दुःखेन=कृच्छ्रेण लभ्यो दुर्लभः। तथा हि भगवतः सर्वव्यापकस्य समष्टिव्यष्टिरूपजगद्रचनरूपक्रिया-कौशलमपि दुर्लभं, लब्धुं=ज्ञातुमशक्यं किमुत भगवान् स्वरूपतो दुर्लभो दुर्ज्ञेयो दुःशक्यप्राप्तिर्वा। तद्विषयकं यत्किञ्चिज्ज्ञानमपि बहु क्लेशयति विद्वांसं, किमुताविदं जनम्। शृणुमश्च लोके शास्त्रपरम्परातः मार्कण्डेयादयोऽपि चिरञ्जीविनो महर्षयस्तत्तत्त्वतोऽज्ञात्वैव तद्दुर्लभतामनुभवन्तो मृत्युमवापुः।

अयञ्चात्राभिप्रायः—जीवस्य कदायमात्मा शरीरेण संयोगं वियोगं वा लप्स्यत इति ज्ञानमपि यत्र दुर्लभं तत्र विष्णुविषयिका ज्ञानप्राप्तिस्तु सुतरां दुर्लभेति। अपवादं विहाय।

मन्त्रलिङ्गञ्च—

सूर्यो मे चक्षुर्वातः प्राणोऽन्तरिक्षमात्मा पृथिवी शरीरम् ।
अस्तृतो नामाहमयमस्मि स आत्मानं निदधे द्यावापृथिवीभ्यां गोपीथाय।।

अथर्व ५।६।७।।

लभधातोः प्रयोगः केवलमथर्वणि दृश्यते। यथा **"लभेत्"** (अथर्व २०।१३६।१६) **"लब्ध्वा"** (अथर्व १।८।२।; ५।८।८)

भवति चात्रास्माकम्—

स दुर्लभो विष्णुरनन्तरूपो
मृल्लोष्ठवल्लब्धुमिहास्त्यशक्यः।
तं दुर्लभं विश्वसृजं सुधीरा
मन्यन्त आत्मानमिवात्मसंस्थम्।।१०६२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्गमः—७७८

दुरुपपदाद् "गम्लृ गतौ" इति भौवादिकाद्धातोः ***"ईषदःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्"*** इति (पा० ३।३।१२६) सूत्रेण खल् प्रत्ययो दुर्गमः। दुःखेन गम्यते=ज्ञायते, ज्ञाप्यते वा दुर्गमः।

यद्वा दुरिति दुःखजनकं गमनं येन सहेति दुर्गमः सूर्यः। सूर्येण सह शक्तस्यापि कस्यचिदपरस्य गमनं कृच्छ्रदं भवतीति दुर्गमः सूर्य उक्तो भवति। अत्र शरीरे चात्मा सूर्यः। लोके चापि दृश्यते न ह्यन्यप्राणिनोऽन्येन प्राणिना हृत्स्थं किञ्चिज्ज्ञायते, भज्यते वा साम्यं गुणधर्मस्वभावक्रियावैभवादिभिः। कुत एतत्? दुर्गमो हि आत्मा—आत्मनश्च दुर्गमत्वात् सर्वमेतदुपपद्यते।

यद्वा—पार्थिवाच्छरीरान्निर्जिगमिषुरयमात्मा प्राप्तकालः केवलो याति न चान्यः कश्चित्तदुपस्थाता (=सेवकः) तेन सह याति, सूर्यस्येव जीवस्यापि दुर्गमत्वात्। एवमेतादृग्गुणो विष्णुर्विश्वं व्यश्नुवानो दृश्यते। दुर्गमशब्दो वेदे न क्वचिद् दृश्यते। मन्त्रलिङ्गमर्थप्राधान्येन—

सुगेभिर्दुर्गमतीता०। ऋक् १०।८५।३२॥

भवतश्चात्रास्माकम्—

स दुर्गमो विष्णुरनन्तकर्मा
विश्वं करोत्यात्मगुणानुरूपम्[1] ।
ऋतस्य दृश्यो महिमा विचित्र-
स्तत्कर्म दृष्ट्वापि गतिर्न तत्र ॥१०६३॥

सूर्यस्तथानन्तविकर्त्त एवं
वपुर्जहद् दुर्गम एव जीवः ।
न तद्गतौ मर्त्यगतिः कदाचित्
[2]सूर्यो गतिं स्वां स्वयमाह मर्त्यम् ॥१०६४॥

दुर्गः—७७९

दुरुपसर्गः। "गम्लृ गतौ" इति धातुर्भौवादिकस्ततः ***"सुदुरोरधिकरणे"***

---

१. दुर्गममित्यर्थः। २. सूर्यो भास्करः, स सूर्यसिद्धान्तस्य प्रवक्ता। स च।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(पा० ३।२।४८) वार्तिकेनाधिकरणे 'डः' प्रत्ययः डित्त्वाटटेर्लोपो दुर्ग इति। दुरत्र कृच्छ्रार्थः। कृच्छ्रेण गम्यते यत्रेति दुर्गः। तथा हि सततं प्रयतमाना मनीषिणोऽपि विष्णोः कर्माणि साक्षात् पश्यन्तश्च तत्कर्माणि तत्त्वतो न विदन्ति, तत्र कुतः पुनः साक्षाद्विष्णुतत्त्वेऽन्तःप्रवेश इत्यभिप्रेत्य स दुर्ग इति नाम्ना स्तूयते।

अथवा भगवद्विष्णुज्ञानोपपत्तये यावत् प्रयत्यते तावदेव तद्गहनता प्रतिपद्यतेऽनन्तत्वात्, अतः स दुर्गः। अथवा—अविद्यावृतचेतोभिस्तत्स्वरूपान्तःप्रवेशो दुर्लभ इति स दुर्गनामवाच्यो भगवान् विष्णुः।

विश्वाध्यक्षोऽनन्तरश्मिकः सूर्योऽपि लोकलोकान्तरस्थावरजङ्गमर्त्वयनांशकृद् गतिभेदाद् भिन्नं-भिन्नं रूपयन् प्रत्येकं गुणवीर्यविपाकैश्च योजयन् प्राणिवर्गमुत्कर्षविकर्षाभ्यां द्वादशभावगुणवैशिष्ट्येन तद्भावाधीशानां संस्थानभेदाच्चानन्तभेदविभक्तं कुर्वन् दुर्ग इत्यभिधीयते, दुःखगम्यत्वात्, मन्त्रलिङ्गञ्च—

जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः।।

ऋक् १।९९।१।।

भवति चात्रास्माकम्

दुर्गः स विष्णुः कथितः पुराणैः
सूर्योऽपि दुर्गः कथितस्तथैव ।
दुर्गस्य कर्मापि न चाशुबोधं
गतिश्च दुर्गास्ति तथैव भानोः ।।१०६५।।

तथा च—

एवं हि यो वेत्ति स वेत्ति विश्वं
दुर्गं स विष्णुं किमु वाऽपि सूर्यम्।
वित्त्वा स्वकान्तःसुखमेत्यपूर्वं
विसंशयः स्तौति तमेव नित्यम् ।।१०६६।।

दुरावासः—७८०

आसमन्तादुष्यतेऽस्मिन्नित्यावासः, अधिकरणे घञ्। दुर्गम आवासो दुरावास इयदिति परिमित्यभावाद् दुर्ज्ञेयस्थान इत्यर्थः। एतदेव बोधयितुं भगवतो दुरावास इति नाम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यद्वा दुर्धराणां सूर्यचन्द्रान्तरिक्षादीनाम् आवासः स्थानं यस्मिन् स दुरावासः ***"प्रादिभ्यो धातुजस्य वाच्यो वा चोत्तरपदलोपः"*** (पा० २।२।२४) इति वार्तिकेन बहुव्रीहिरुत्तरपदलोपश्च वैकल्पिकः। तथा चोक्तं पूर्वं ज्येष्ठनाम्नो (संख्या ६७) व्याख्याने, सूर्याचन्द्रमसौ नेत्रे, दिशः श्रोत्रम्, अन्तरिक्षमुदरम्। तत्र मन्त्रलिङ्गञ्च—

अन्तरिक्षमुतोदरम्, विश्वं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।
अथर्व १०।७।३२।।

इदं शरीरमपि जीवस्यावासः। मन्त्रलिङ्गञ्च—

ईशावास्यमिद ँ सर्वं यत् किं च जगत्यां जगत्। यजुः ४०।१।।

यद्वा दुर्गतमपि प्राणिवर्गं यथाव्यवस्थं दुःखमनुभवन्तमावासयतीति दुरावासः। पचादेराकृतिगणत्वाण्ण्यन्तादच् प्रत्ययो णेर्लोपश्च। सूर्योऽपि दुरावासो दुर्धरं जगदावासयति ज्योतिषा धारयति दुरावास इव। जीवोऽपि दुरावासो दुर्धरमिदं पार्थिवं शरीरमावासयति। एवंविधा योजना प्रकृतौ विकृतौ च सर्वत्र कल्पनीया।

भवति चात्रास्माकम्—

दुरावासो वरेण्यो यः स विष्णुः सविता च सः।
स ज्येष्ठः स च वा श्रेष्ठः, तं स्तुवन्ति नमन्ति च।।१०६७।।

दुरारिहा—७८१

दुरुपसर्गो दुःखार्थकः। आ=समन्तात्, अर्पयतीति, अरिः।। 'ऋ गतिप्रापणयोः' भौवादिकः, 'ऋ गतौ' जौहोत्यादिको वा धातुस्ततः—***"अच इः"*** (उ० ४।११४) इत्यौणादिकेन सूत्रेण इः प्रत्ययः, रपरो गुणः—अरिः। दुर्=दुःखं समन्तादर्पयति=प्रापयतीति दुरारिः=दुर्मतिस्तां हन्तीति दुरारिहा। दुरारिकर्मपूर्वकाद् हनधातोः सार्वकालिकः क्विप्। अस्य विशदं व्याकरणं वीरहा (संख्या १६७) इति नामव्याख्याने प्रदर्शितं, तत्र द्रष्टव्यम्। दुरारिहा विष्णुः सूर्यो वा। भगवान् दुरारिहा, दुर्मतिं विनाश्य यं सुमेधया संयुनक्ति, तस्य सर्वथा दुर्लभमपि वस्तु सुलभं भवति तथा च लोकेऽपि पश्यामः—जीवेन स्वतः प्राप्तुमशक्यमत्यन्तं दुर्लभं शरीरं दशभिर्मासैः सकलाङ्गं समर्थं कृत्वा जीवाय ददाति भगवान्। मनुष्योऽपि दुरारिहणं भगवन्तमनुकुर्वन्, स्वलक्ष्यबाधकान् विहत्य स्वं लक्ष्यं सौकर्येण प्राप्नोति। एवं सर्वत्र योजनीयम्। अत एव च प्रार्थ्यते—

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।
ऋक् ३।६२।१०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा—

मेधाम्मे वरुणो ददातु। यजुः ३२।१५।। इत्यादि।

मन्त्रलिङ्गम् यथा वा—

अशस्तिहा विश्वमनास्तुराषाट्। ऋक् १०।५५।८।।

मान्तः स्थुर्नो अरातयः। ऋक् १०।५७।१।।

भवति चात्रास्माकम्—

दुरारिहा विष्णुरयोनिजन्मा
सर्वं जगत्यां सुलभं करोति।
नरोऽपि तं चानुनयन् स्वभावे
हत्वा दुरारिं सुलभं [1]सदैति।।१०६८।।

❖❖❖

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ।।६७।।

७८२ शुभाङ्गः, ७८३ लोकसारङ्गः, ७८४ सुतन्तुः, ७८५ तन्तुवर्धनः। ७८६ इन्द्रकर्मा, ७८७ महाकर्मा, ७८८ कृतकर्मा, ७८९ कृतागमः।

शुभाङ्गः—७८२

"शुभ शोभार्थे" भौवादिको धातुस्ततः ***"इगुपधज्ञाप्रीकिरः कः"*** इति (पा० ३।१।१३५) सूत्रेण कः प्रत्ययः, कित्त्वाद् गुणाभावः। अङ्ग इत्यङ्गतेः पचाद्यच् भावे घञ् वा। एवञ्च शोभमानोऽङ्गति=गच्छति यः स शुभाङ्गः, शुभम् अङ्गनं वा यस्य स शुभाङ्गः, अङ्गनं सार्वकालिकं सार्वदेशिकञ्च व्यापनमित्यर्थः। अङ्गतेर्ण्यताद् वा बाहुलकात् पचाद्यच्। एवञ्च शोभायञ्जगद् गमयतीत्यर्थः सम्पद्यते। अथवा शोभमानोऽङ्गन् सूर्यः शुभाङ्ग उच्यते। सोऽस्यास्ति तस्याध्यक्षत्वेन मत्वर्थीयेऽचि। विष्णुः शुभाङ्गः, सूर्यो हि सर्वदैकविधां गतिमादधानः लोकेन दृश्यते गच्छन्नतो **"यादृगेव ददृशे तादृगुच्यते"** (ऋक् ५।४४।६) इति वेदवचनात् सूर्यः शुभाङ्ग उक्तो भवति। भगवान् विष्णुरपि **"सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयद्"**

१. सदैति-सदा एति=प्राप्नोति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(ऋक् १० ।१६० ।३) इति वेदवचनानुसारं स्वरूपेण शोभमानो जगद् गमयत्यतः शुभाङ्ग इति विष्णुनाम।

आत्मापि शुभाङ्ग उच्यते। यतो हि स स्वयुक्तशरीरेण शोभमानः स्वाभिलिप्स्यानि गच्छति। एवं भगवतः शुभाङ्गत्वरूपो गुणो जगति व्याप्तः प्रेरयति सबलं भगवन्तं शुभाङ्गेतिनाम्ना स्तोतुम्। मन्त्रलिङ्गञ्च—

क्षेत्रादपश्यं सनुतश्चरन्तं सुमदं यूथं न पुरु शोभमानम्।

ऋक् ५ ।२ ।४ ।।

शोभे, शोभस्, शोभसे, शोभिष्ठम् एते क्रमशः ऋक् १ ।१२० ।५; १० ।७७ ।१; ८ ।३ ।२१ मन्त्रेषु प्रयुज्यन्ते शुम्भ धातुरपि शोभार्थे, तस्यापि **शुम्भमानः, शुंभानः,** पदे क्रमश ऋक् ६ ।३६ ।४; ८ ।४४ ।१२ इत्यत्र प्रयुज्येते। इति दिङ्मात्रमुक्तम्।

भवति चात्रास्माकम्

विष्णुः शुभाङ्गो ह्यभवत् सदाऽसौ
विष्णुर्यथापूर्वमकल्पयत्तम् ।
जीवः शुभाङ्गोऽङ्गति देहसक्तः
स मे शुभाङ्गोऽस्तु सदार्चनीयः ।।१०६६ ।।

लोकसारङ्गः—७८३

लोकः—लोक्यते=दृक्पथमानीयत इति लोकः, कर्मणि घञ्। लोकते=विविधैर्भावैः प्रकाशत इति वा लोकः, पचाद्यच्। सारः—"सृ गतौ" इति भौवादिको धातुस्ततः ***"सृ स्थिरे"*** (पा० ३ ।३ ।१७) सूत्रेण स्थिरत्वविशिष्टे कर्तरि घञ् प्रत्ययः। एवञ्च स्थिरो भवतीति सारः। लोके सारः—लोकसारः सप्तमीति योगविभागात्समासः। लोकसार इति सुबन्तोपपदाद् गमधातोः पा० ३ ।२ ।३८ सूत्रस्थ ***"गमेः सुप्युपसंख्यानम्"*** इति वार्तिकेन खच् प्रत्ययः ***"खच्च डिद् वा वक्तव्यः"*** इति वार्तिकेन वैभाषिको डिद्वद्भावः, तथा च डित्त्वाट्टेर्लोपः। ***"खित्यनव्ययस्य"*** (पा० ६ ।३ ।६६) सूत्रेण मुमागमो लोकसारङ्ग इति। एवञ्च लोके सारो भगवति प्रेम, तद् गच्छति=प्राप्नोति तत् प्रति आकृष्टो वा भवतीति लोकसारङ्गो विष्णुः।

यद्वा लोकश्चासौ सारङ्गो लोकसारङ्गः। लोकते=प्रकाशते सारः गच्छति=प्राप्नोति-इति चार्थः। लोकसारङ्गः सूर्योऽपि, लोके सारभूतं रसं गृह्णन् गच्छतीति कृत्वा। जीवात्मापि लोकसारङ्गः, यतो हि स लोके=शरीरे स्थित्वा सारभूतं स्वेप्सितं भोगं मोक्षं वा गृह्णातीत्यतः स लोकसारङ्ग उक्तो भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादिविविधा योजनोहनीया।

भवति चात्रास्माकम्—

स लोकसारङ्गपदावबोध्यो
विष्णुः सनात् सारवदाप्तुमर्हः।
सारं विगृह्णन् क्रमते च सूर्यः
स लोकते विश्वमनन्तशक्तिः ।।११००।।

मन्त्रलिङ्गञ्च—

विश्वरूपं चतुरक्षं क्रिमिं सारङ्गमर्जुनम्। अथर्व २।३२।२।।

तथा—

शृणाम्यस्य पृष्टीरपि वृश्चामि यच्छिरः। अथर्व २।३२।२।।

इति सारङ्गशब्दे निर्दशनमात्रमुक्तम्।

सुतन्तुः—७८४

सु—इति शोभार्थक उपसर्गः। तन्तुरिति "तनु विस्तारे" इति तानादिकाद् धातोः ***"सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन्"*** (उ० १।६६) इत्युणादिसूत्रेण कर्मणि तुन् प्रत्ययः, ***"तितुत्रे"*** (पा० ७।२।६) इत्यादि सूत्रेणेण्निषेधः। अनुस्वारपरसवर्णौ, सुपूर्वो बहुव्रीहिः। तन्यत इति तन्तुः शोभनस्तन्तुर्यस्य स सुतन्तुर्विष्णुः। अर्थात् शोभनं तन्यते विश्वं येन स सुतन्तुरित्यर्थः। स एष सुतानरूपो भगवतो गुणो विश्वे सर्वत्र व्याप्तो दृश्यते। तथाहि—लोके सर्वं जातं, जायमानं, जनिष्यमाणञ्च सर्गारम्भाद् यावत् सर्गान्तमेकरूपेण तन्वन्नायाति, तथा भविष्यत्यपि समये। तमेवानुकुर्वन् जीवोऽपि रमणीयं यथा स्यात्तथा तितनिषति कर्मजालम्।

मन्त्रलिङ्गञ्च—

यो यज्ञो विश्वतस्तन्तुभिस्तत एकशतं देवकर्मेभिरायतः ।
इमे वयन्ति पितरो य आययुः प्र वयाप वयेत्यासते।।

ऋक् १०।१३०।१।।

तथा—

समिद्धो अग्न आवह देवां अद्य यतस्रुचे।
तन्तुं तनुष्व पूर्व्यं सुतसोमाय दाशुषे ।। ऋक् १।१४२।१।।

इति निदर्शनम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवन्ति चात्रास्माकम्—

विष्णुः सुतन्तुः स तनोति रम्यं
विश्वं सुयज्ञं विततं महान्तम् ।
दिनोदयास्तैः प्रतिवस्तु रम्यं
सर्वत्र तन्तुं कुरुते विचित्रम् ॥११०१॥

सिरा मनुष्येषु च तन्तुवत्ता
लतासु तन्तुस्तु ततो विभाति ।
ग्रहेषु राशिर्मणिसूत्रवत् स्यात्
सुतन्तुरूपाः प्रवहन्ति नद्यः ॥११०२॥

एवं हि यो वेत्ति सुतन्तुमर्थ्यं
विष्णुं शयानं सकलेऽत्र तन्त्रे।
स एव तं पश्यति सर्वदृष्टि-
र्न चक्षुषा पश्यति तं सुचक्षुः ॥११०३॥

तन्तुवर्धनः—७८५

तन्तुरुक्तः सुतन्तुनामनि। वर्धन इति "वृधु वृद्धौ" इति भौवादिको धातुः, ततो णिच् रपरः, वर्धि-इति णिजन्ताल्ल्युः, योरनादेशः वर्धयतीति वर्धनः, तन्तोर्वधनस्तन्तुं वा वर्धयति स तन्तुवर्धनो विष्णुः, सूर्यः, आत्मा वा। एवञ्च तन्तुं विश्वयज्ञं वितत्य यो बर्धयति स तन्तुवर्धनो विष्णुः। अथवा विश्वमिदं नियतकालं= यावन्निश्चितायुःकालं वर्धयति=गमयतीत्यर्थः।

मन्त्रलिङ्गञ्च—

स्वर्ण, वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म ।
अग्निर्जन्मानि देव आ वि विद्वान् द्रवद्दूतो देवयावा वनिष्ठः॥

ऋक् ७।१०।२॥

अग्निः सूर्यो यस्माज्जन्मानि वेद तस्मात् स तन्तुवर्धनः। तथा चार्थप्रधानन्निदर्शनम्—

यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे।
स त्रिधातु शरणं शर्म यंसत् त्रिवर्तु ज्योतिः स्वभिष्ट्यस्मे ॥

ऋक् ७।१०१।२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकेऽपि पश्यामो मनुष्यः सर्वोऽपि वा प्राणिवर्गः स्वतन्तुरूपं सन्तानं विवर्धयिषुर्भूयः प्रयतते। स वेद च मनुष्यः स्वतः प्राक्तनानि पितृपितामहादीनां जन्मानि, स्वतोऽर्वाक्तनानां जन्मिनाञ्च जन्मानि। तथाऽप्यल्पविषयो मनुष्यः, सर्वे भगवांस्तु सर्गादितः सर्गान्तं सर्वेषां प्रलयोदयौ पश्यति। अत एव सोऽग्निः सर्वेषां प्रलयोदयौ तत्त्वतो जानाति।

भवतश्चात्रास्माकम्

विश्वं ततं तेन यतः स एव
तद्वर्धनः सर्वमिदञ्च वेत्ति ।
कुतः प्ररूढं क्व नु चान्तमस्य
स जन्मिनां वेद च [1]भूतभव्ये ।।११०४।।

एवं हि यो वेत्ति सनातनं तं
[2]सूर्यस्य कर्तारमपीह विष्णुम् ।
स एव सूत्रस्य च वेद सूत्रं
[3]यस्मिन् ह तस्थुर्भुवनानि विश्वा।।११०५।।

इन्द्रकर्मा—७८६

इन्द्रशब्द इन्देरनि प्रत्यये व्युत्पादितः (उ० २।२८), कर्म—करोतेः **''सर्वधातुभ्यो मनिन्''** (उ० ४।१४५) इत्युणादिसूत्रेण मनिन् प्रत्ययो रपरो गुण;। अनिडयं धातुः समासे च नान्तलक्षणो दीर्घः। इन्द्राणि=परमैश्वर्यशालीनि कर्माणि यस्य स—इन्द्रकर्मा विष्णुः। अव्याहतक्रियो वेत्यनर्थान्तरम्। मन्त्रलिङ्गञ्च—

इन्द्रस्य कर्म सुकृता पुरूणि व्रतानि देवा न मिनन्ति विश्वे।
दाधार यः पृथिवीं द्यामुतेमां जजान सूर्यमुषसं सुदंसः ।।
ऋक् ३।३२।८।।

एवमिन्द्रकर्माख्यानं बहुत्र वेदे। लोकेऽपि पश्यामो यथेन्द्रकर्मा भगवान् पृथिवीं द्याञ्च धारयति, जनयति सूर्यमुषसञ्च, तथैवायं मनुष्योऽपि विविधकर्मा स्वाभीष्टसिद्ध्यै विविधानि साधनानि साधयति धारयति च। यथा—यन्त्रशालां

१. भूतभव्ये=भूतं, भविष्यच्च। २. सूर्यस्य=सरणशीलस्य सपरिच्छदस्य सर्वस्य ब्रह्माण्डस्येति भावः। ३. **''यस्मिन् क्षियन्ति प्रदिशः षडुर्वी।''** अथर्व १३।३।१।। **''तस्मिन् ह तस्थुर्भुवनानि विश्वा।''** यजुः ३१।१६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विद्युतं प्रकाशाय दीपकानि विविधानि गृहवितानानि च विधत्ते।

भवति चात्रास्माकम्—

स इन्द्रकर्मा भगवान् वरेण्यो
दाधार भूमिं स उ वा दिवञ्च ।
अजीजनच्चापि स सूर्यमग्र्यं
स वोषसं, तञ्च नमन्ति सर्वे ।।११०६।।

महाकर्मा—७८७

महान्ति कर्माणि यस्य स महाकर्मा। कर्मशब्दः करोतेः प्राक् व्युत्पादितः। यथा चैतस्य महाकर्मत्वप्रतिपादकं मन्त्रलिङ्गम्—

त्वं विश्वस्य धनदा असि श्रुतो य ई भवन्त्याजयः।
तवायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते।। ऋक् ७।३२।१७।।

तथा—

यः कर्मभिर्महद्भिः सुश्रुतोऽभूत्। ऋक् ३।३६।१।।

इन्द्रोऽस्य मन्त्रस्य देवता।

ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः।

ऋक् ७।३२।२२।।

इति निदर्शनमात्रमुक्तम्। इन्द्रस्य महिमा बहुत्र गीतो वेदे।

लोकेऽपि च पश्यामः—यथा मनुष्यो हि सततं यन्त्रादिसाहाय्येन महाकर्माऽहं स्यामिति बहु प्रयतते।

भवति चात्रास्माकम्—

महाकर्मा स एवास्ति विष्णुरुक्तः [1]सनातनः ।
मनुष्योऽपि विदित्वा तं तादृशो भवति ध्रुवम्।।११०७।।

कृतकर्मा—७८८

कृत—कर्म-शब्दौ पृथक् पृथग्व्युत्पादितौ। तयोः सति समासे सुबागमे च नान्तलक्षणो दीर्घः—कृतकर्मा।

---

१. सनातन इति यदुक्तं तत्र मन्त्रलिङ्गम्— "**पुरुवसुर्हि मघवन्त्सनादसि।**" ऋक् ७।३२।२४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतकर्मनाम्नश्चायमभिप्रायः—कृतमेव जगल्लक्षणं कर्म पुनः पुनः करोति, **''यथापूर्वमकल्पयद्''** (ऋक् १० ।१९० ।३) इति वेदवचनात् स कृतकर्मा। यद्वा—अन्यैः कर्तुमनर्हं बहुभिरपि यत् कर्म, तत् करोतीति कृतकर्मा। सूर्योऽपि स्वोदयास्तलक्षणं कर्म पुनः पुनरनुदिनं प्रतिकल्पञ्च करोतीति कृतकर्मा। तथैवैष कृतकर्मत्वरूपो भगवतो गुणः सर्वत्र जगति व्याप्त इति, सर्वं जगत् कृतकर्मतां धत्ते।

मन्त्रलिङ्गञ्च—

कृतं न श्वघ्नी विचिनोति देवने संवर्गं यन्मघवा सूर्यं जयत् ।
न तत् ते अन्यो अनुवीर्यं शकन्न पुराणो मघवन् नोत नूतनः।।

ऋक् १० ।४३ ।५ ।।

भवति चात्रास्माकम्—

कृतं हि यत्तेन करोति तत्पुनः
स एव नान्यः क्षमते च तद्वत् ।
[1]सूर्यं कृतं दर्शयतीह भूयो
न नूतनस्तेन विसृज्यतेऽतः ।।११०८।।

लोकेऽपि च दृश्यते कृतकर्मा ह मनुजस्तान्येव कर्माणि पुनः पुर्निवधत्ते।

कृतागमः—७८६

कृतशब्दः करोतेर्निष्ठायाम्, आगमशब्दश्च—आङ्पूर्वाद् गमेः ***''ग्रहवृदृनिश्चिगमश्च''*** (पा० ३ ।३ ।५८) सूत्रेण करणे 'अप्' प्रत्यये सिध्यतः। आगम्यतेऽनेनेत्यागमो वेदः। कृत आगमो येन स कृतागमः। मन्त्रलिङ्गञ्च—उपरितनमन्त्रतो **'यस्मिन् नेतरि'** इत्यनुवर्तमाने—

परि विश्वानि काव्या नेमिश्चक्रमिवाभवत्। ऋक् २ ।५ ।३ ।।

तथा—

तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे। यजुः ३१ ।७ ।।

भवति चात्रास्माकम्—

कृतागमो विष्णुरनन्तबोधो
ज्ञानं जनेभ्यः प्रददत्र नित्यम् ।

१. सूर्य इत्युपलक्षणमात्रम्। सर्वं तेन प्राग्भवमेव पुनः पुनः सृज्यते, न तु नूतनं क्रियते। **''यथापूर्वमकल्पयद्''** (ऋक् १० ।१९० ।३) इति मन्त्रलिङ्गात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतं पुरा यत् कुरुते तथा तद्
यथागमं स्वं कुरुते [1]खरांशुः ।।११०६।।

आगम इत्यावर्तवचनोऽपि, तथा च–

सूर्यस्यावृतमन्वावर्ते (यजुः २।२६) इति वेदवचनम्।

लोके च पश्यामः–मनुष्यः कृतान्येव पुनरावर्तयति। एवं च भगवतो ह्येष कृतागमत्वरूपो गुणो विश्वे व्याप्तः।

❖ ❖ ❖

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी।।६८।।

७६० उद्भवः, ७६१ सुन्दरः, ७६२ सुन्दः, ७६३ रत्ननाभः, ७६४ सुलोचनः। ७६५ अर्कः, ७६६ वाजसनः, ७६७ शृङ्गी, ७६८ जयन्तः, ७६६ सर्वविज्जयी।

उद्भवः–७६०

उदुपसर्ग उच्चैरर्थे। ''भू सत्तायाम्'' इति धातोः ***''ऋदोरप्''*** (पा० ३।३।५७) इति सूत्रे दकारस्य मुखसुखार्थत्वात्, अप् प्रत्ययः। उत्=उच्चैर्भवनं यस्य स उद्भव इति बहुव्रीहिः। यद्वा उत्=ऊर्ध्वं गतो भवतीत्युद्भवः, पचाद्यच् प्रत्ययः कर्तरि। दृश्यते हि सूर्य ऊर्ध्वं गच्छन्, कथ्यते चात एवोद्भव इति। उक्तञ्च वेदे **''यादृगेव ददृशे तादृगुच्यते''** (ऋक् ५।४४।६) एष एवोद्भवशब्दार्थो वेदे पदान्तरैरुच्यते। यथा–

उद्यन्नद्य मित्रमह आरोहन्नुत्तरां दिवम्।
हृद्रोग मम सूर्य हरिमाणञ्च नाशय। ऋक् १।५०।११।।
उद्यन्तं त्वा मित्रमहो दिवे दिवे ज्योग्जीवाः प्रति पश्येम।
ऋक् १०।३७।७।।

उदन्येन ज्योतिषा यासि सूर्य। ऋक् १०।३७।३।।

इति दिङ्मात्रं निदर्शितम्। उद्भवन्तं सूर्यं सर्व एव पश्यन्ति, स चोद्भवन् स्थावरमुद्भिनत्ति, जङ्गमञ्चोद्भावयति, अर्थात् कार्यायोद्युक्तं कुरुते। एतस्य

१. खरांशुः–सूर्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वस्य व्यवस्थापकः सर्वञ्च व्यश्नुवानो भगवान् विष्णुरेवोद्भव उक्तो भवति। लोके चापि पश्यामः—मनुष्यो हि कर्मकरणाय हस्तावुद्यमयति, यतो हि हस्तावन्तरिक्षस्थानीयौ।

भवति चात्रास्माकम्—

स उद्भवो विष्णुरनन्तकर्मा
विश्वं सदोत्थाय करोति नूनम्।
मर्त्योऽपि कर्माण्यनुसञ्चिकीर्षुः
करौ स्वकावुद्यमनाय युङ्क्ते ।।७११०।।

अग्निः=सूर्यः, सूर्यो वाग्निः, तस्य "उत्तिष्ठसि" क्रियायाः कर्तृत्वेन निर्देशो वेदे। अग्निरूपश्च जीवोऽत एव सदोत्थाय स्वोन्नत्यै यतते।

मन्त्रलिङ्गञ्चात्र—

उत्तिष्ठसि स्वाहुतो घृतानि प्रति मोदसे।
यत्त्वा स्रुचः समस्थिरन्। ऋक् १०।११८।२।।

सूर्यस्योद्भवत्वादेव, अर्थादुच्चैर्भवत्वादेव, सूर्ययोनिरग्निरुत्तिष्ठति। यो हि यस्य विकारः स स्वां प्रकृतिं प्रतियाति।

सुन्दरः—७६१

सु उपसर्गः। दर-शब्दो "दृ विदारणे" धातोः क्रैयादिकाद् ***"ऋदोरप्"*** (पा० ३।३।५७) इति सूत्रेण अप् प्रत्यये सिध्यति। सूपर्सेगण योगे मकारो वर्णागमः पृषोदरादित्वात्, तस्य चानुस्वारपरसवर्णौ सुन्दर इति। पृषोदरादिकार्यञ्च—

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ विर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्।। इति।।

निरुक्तम्=निर्वचनं, निश्चितकथनं वेत्यनर्थान्तरम्। यद्वा ***"अज्विधिः सर्वधातुभ्यः"*** (महाभाष्य ३।१।१३४) इति वैयाकरणनियमानुसारं कर्तर्यच् प्रत्ययस्तेन सु=सुष्ठु "निर्दोषं" विदारणं यः कुरुते स सुदरः सन्नेव वर्णागमेन सुन्दर इत्युक्तो भवति। लोके चापि पश्यामः—सर्वस्य जङ्गमवर्गस्य गुदशिश्नमुखादिकं विदीर्णमस्ति, पक्षिणां पक्षौ विदीर्णौ स्तः। तथा—नासिका, कर्णौ, चक्षुषी च विदीर्णे, वृक्षस्य शाखा, तथा पर्वता अपि विदीर्णा इव प्रतिभान्ति। य एवंविधस्य विदारणस्य कर्ता स सर्वं व्यश्नुवानो विष्णुरेव सुन्दर इत्युक्तो भवति। वेदे सुखशब्दस्य बहुत्रोपलब्धिः, सुखं सुखातं भवति। सुखं,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खनु धातोरवदारणार्थकान्निष्पद्यते, दृ धातोरप्येष एवार्थस्तस्मात् सुखं= सुविदारितमिति रथस्य विशेषणं प्रयुक्तं वेदे, तथा च **''सुखेषु रुद्रा मरुतो रथेषु''** (ऋक् ५।६०।२)। जीवात्मनो रथं शरीरम्, तच्चापि सुखातं सत् सुखजीवनाय कल्पते, तस्य शरीररथस्य यः सुविदारकः स सुन्दरो विष्णुरिति बोध्यम्। लोके चापि पश्यामः—यो हि शिल्पी समर्यादं दारयति स पूज्यः सेवनीयश्च भवति, कुतः ? यतो हि सुन्दररूपो भगवानेव तस्मिन् शिल्पिनि स्थितः, सुन्दरत्वरूपेण गुणेन पूजितो भवति।

भवति चात्रास्माकम्—

स सुन्दरो विष्णुरनन्तरूपो
योनीः समग्रा विविधं दृणाति ।
सुखात एवास्ति रथः सुखाय
योनिः प्रतीकास्ति रथं चिकीर्षोः।।१११११।।

सुन्दः—७६२

सु उपसर्गः, ''उन्दी क्लेदने'' धातुस्तस्मात् पचाद्यच् प्रत्ययः। सु=सम्यग् उनत्ति=क्लेदयतीति सून्दः। यो हि वर्षणकर्मणा सम्यगुनत्ति, स सून्दः सन् सुन्द इत्युक्तो भवति, पृषोदरादित्वादुकारलोपः सुक्लेदक इत्यर्थः।

मन्त्रलिङ्गञ्च—

असच्च सच्च परमे व्योमन् दक्षस्य जन्मन्नदितेरुपस्थे ।
अग्निर्हि नः प्रथमजा ऋतस्य पूर्व आयुनि वृषभश्च धेनुः।।

ऋक् १०।५।७।।

ऋतस्य=जलस्य। ऋतस्य **''एकः समुद्रो धरुणो रयीणाम्''** इत्यादि सूक्तारम्भे (ऋक् १०।५।१) निघण्टौ च जलनामसु पठितत्वात्। सूर्यो हि वर्षणकर्मणि वृत्रहाभिहितो भवति। वृत्रो मेघ इत्युच्यते। इत्यादि रूपेण सङ्गन्तव्यम्। सुन्द इति बहुविज्ञानधृतगर्भः सूर्य उच्यते, दक्षशब्दस्य विष्णोर्नामसु संग्रहः। तुषारपातेनोत्पद्यमानः क्लेदो बहु शोभते, पुष्णाति च चिरकालमोषधीः। **''ओषधयः फलपाकान्ताः''** (मनुः १।४३)। लोकेऽपि च पश्यामो, मनुष्यो जलेन क्वचिद् बहुकृत्वः सिञ्चति, क्वचिच्चाल्पशः। एष यो नियमः स तस्यैव व्यापकस्य विष्णोः। शरीरेऽपि दृश्यते—प्रत्यक्षाप्रत्यक्षरूपेणाग्निना धृतेन जलेन शरीरं यथावश्यकं तर्प्यते। तथा—स्वेदेन त्वचनम्, मूत्रेण वस्तिम्, रक्तेन

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हृदयम्। पित्तमेव शरीरेऽग्निरित्यायुर्वेदविदां समयः। इदं मनुष्यशरीरमधिकृत्योक्तम्, एवमन्यत्रापि योजना कर्तव्या।

भवति चात्रास्माकम्—

विष्णुर्हि सुन्दः स उनत्ति भूमिं
सूर्यो हि मूलं पयसः प्रपाते।
मर्त्योऽपि लोके निजमर्थ्यमाप्तुं
तमेव गायन् करणान्युनत्ति।।१११२।।

लभ्यमन्तरा तदुपजीवकं सर्वं करणमेव भवतीति बोध्यम्।

मन्त्रलिङ्गञ्च—

ईशे यो वष्टेः..... अपां नेता। ऋक् ६।७४।३।।

ऋतस्य नाभिः। ऋक् ६।७४।४।।

रत्ननाभः—७६३

''रमु कीडायाम्'' इति भौवादिको धातुरन्तर्भावितण्यर्थः, तस्माद् ***''रमेस्त च''*** इत्युणादि (३।१४) सूत्रेण न-प्रत्ययस्तकारश्चान्तादेशः, अनिट्त्वान्नेट्, रत्नम्। नाभिशब्दो ''णह बन्धने'' इति भौवादिकाद्धातोः णस्य नत्वे ***''नहो भश्च''*** (उ० ४।१२६) इत्युणादिसूत्रेण इञ् प्रत्ययो, हस्य भकार, उपधावृद्धिश्चेति सिध्यति। नह्यति=बध्नातीति नाभिश्चक्रमध्यं प्राण्यवयवो वा। रत्नं नाभौ यस्येति बहुव्रीहौ ***''अच् प्रत्यन्ववपूर्वा०''*** (पा० ५।४।७५) इति सूत्रे, अच् इति योगविभागात् अच् प्रत्ययः समासान्तः, ***''यस्येति च''*** (पा० ६।४।१४८) इति सूत्रेणेकारलोपः, प्रातिपदिकसंज्ञायां स्वादिकार्ये च रत्ननाभ इति भवति। मन्त्रलिङ्गञ्च—

एकः समुद्रो धरुणो रयीणाम्.....उत्सस्य मध्ये निहितं पदं वेः।
ऋक् १०।५।१।।

तथा—

विश्वस्य नाभिं चरतो ध्रुवस्य कवेश्चित् तन्तुं मनसा वियन्तः।
ऋक् १०।५।३।।

इति निदर्शनमात्रमुक्तम्। सर्वकमत्रत्यं सूक्तं द्रष्टव्यम्। लोकेऽपि पश्यामः—चन्द्रदैवतकायाः स्त्रियो नाभावेव रमणीयानां जातकरूपाणां रत्नानां धारणं भवति। धरुणशब्देनापि नाभिरुच्यते। मन्त्रलिङ्गञ्च—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तं त्वा नरो दम आ नित्यमिद्धमग्ने सचन्त क्षितिषु ध्रुवासु।
अधिद्युम्नं नि दधुर्भूर्यस्मिन् भवा विश्वायुर्धरुणो रयीणाम्।।
ऋक् १।७३।४।।

श्रीणामुदारो धरुणो रयीणाम् । १०।४५।५।।
ऋतस्य नाभिरमृतं वि जायते। ऋक् ६।७४।४।।
चतस्रो नाभो निहिता अवो दिवः। ऋक् ६।७४।६।।

रत्नं हि रमयति। तथा च—
रास्व रत्नानि दाशुषे। ३।६।४।।
........**कविरग्नि**.........**दधद्रत्नानि दाशुषे।** ऋक् ४।१५।३।।
.........**देवो**.........**द्रधद्रत्नानि दाशुषे।** ऋक् ६।३।६।।

इत्यादि निदर्शनम्। या चेयं विश्वस्य रमयित्री व्यवस्था सा कुत इति चेत्? स सर्वव्यापको भगवान् विष्णुरेव सर्वत्र स्वीयं रामणीयकं दधानः सर्वमिदं रत्ननाभं कुरुत इति। सर्वञ्च यथास्वबुद्धि किञ्चिद्रत्नं मत्वा तत् सेवते।

भवतश्चात्रास्माकम्—

स रत्ननाभो भगवान् वरेण्यो
लोके समुद्रे विदधाति रत्नम् ।
स रत्नयोनिः [1]स्त्रियमेकमात्रं
रत्नप्रसूत्यै कुरुते सुनाभिम् ।।१११३।।

एवं हि यो वेत्ति च रत्ननाभं
लोके ततं रत्नहञ्च विष्णुम् ।
स रत्नचक्षुः सकलं हि रत्नं
पश्यन् श्रिया नैव विमुच्यतेऽतः।।१११४।।

सुलोचनः—७६४

सु उपसर्गः, "लोचृ दर्शने" धातुर्भौवादिकस्ततः करणेऽधिकरणे वा ल्युट्, योश्चानादेशः, लोच्यतेऽनेनास्मिन् वा लोचनः, सुष्ठु लोचने यस्य स सुलोचनो, बहुव्रीहिः। सम्यग् लोचन्ते वा प्राणिनो यस्मिन्नुदिते सतीति सुलोचनः सूर्यः। उक्तञ्च ज्येष्ठब्रह्मवर्णने सूर्याचन्द्रमसोश्चक्षुष्ट्वं तस्य। तथा च मन्त्रः—

१. सर्वयोनिसामान्ये स्त्रीग्रहणम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः।
अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः।।

अथर्व १०।७।३७।।

तथा च सूर्यपक्षे—

अग्निरस्मि जन्मना जातवेदा घृतम्मे चक्षुरमृतं म आसन्।
अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ।।

ऋक् ३।२६।७।।

इति निदर्शनमात्रमुक्तम्। चक्षुःशब्दस्य यद् विविधविभक्तिवचनेषु प्रयोगस्तच्चाक्षुषज्ञानस्यातिशयद्योतनाय, नैतद्विषयकं विशेषव्याख्यानमस्माकमिहाभिमतम्। लोकेऽपि च पश्यामः—पित्तदोषेण दृष्टिर्दुष्यति, आदित्यहृदय-स्तोत्रपाठेन च चाक्षुषदोषो निवर्तत इति दृश्यते।

भवति चात्रास्माकम्—

सुलोचनो विष्णुरिदं दधानः
करोति सूर्यञ्च सुलोचनं सः ।
जगत् प्रपश्यन्नुत दर्शयंश्च
सनातनो[1] याति यदाप्रमत्तः ।।१११५।।

वेदमधिकृत्यापि=

मथ्नाति यो ज्ञानपयोधिमग्र्यं
वेदं, स वेद्यं लभते च वेदात् ।
वेदो यतो ज्ञानमयात् प्रसूत-
स्तस्मात् सदास्थं स दधाति वाच्यम्।।१११६।।

अर्कः—७६५

"अर्क स्तवने" इति चौरादिको धातुस्तस्माण्णिजन्तादकर्तरि च कारके अधिकारे ***"एरच्"*** (पा० ३।३।५६) इति सूत्रेण कर्मणि 'अच्' प्रत्ययः णेर्लोपः। अर्च्यते=स्तूयत इत्यर्कः।

यद्वा—"ऋच स्तुतौ" इति तौदादिकाद्धातो ***"अकर्तरि च कारके संज्ञायाम्"*** (पा० ३।३।१९) सूत्रेण कर्मणि घञ् प्रत्ययः, ऋच्यते=स्तूयत इत्यर्कः। घिति

१. सनातनः=सूर्यः, इह संग्रहे पठितत्वात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

''चजोः कु घिण्ण्यतोः'' (पा० ७।३।५२) सूत्रेण चकारस्य ककारो गुणो रपरः। यद्वा ''अर्च पूजायाम्'' इति भौवादिको धातुस्ततः कर्मणि घञि कुत्वे च सत्यर्कः, अर्च्यते=पूज्यत इत्यर्कः। **''अचो रहाभ्यां द्वे''** इति द्वित्वपक्षे च अर्क्क इति। एतन्नामवाच्यश्च परमेश्वरः सूर्यो वा। मन्त्रलिङ्गञ्च—

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः। ऋक् १।१०।१।।

लोकेऽपि च पश्यामः—यदा कश्चित्स्वप्रयोजनं सिसाधयिषुस्तत्प्रयोजनसाधनक्षमं गत्वा विनम्रो हृद्यैः स्तुतिवचनैः स्वकार्यं साधयितुं प्रेरयति, तदा स प्रार्थयित्रा स्तुतः स्तुतिवचनैः प्रेरितो वा च प्रार्थयितारं तदभीष्टेन योजयति। अमुथैव जीवोऽपि तम् ईश्वर-सूर्य-बृहस्पति-देव-अग्नि-इत्यादिविविधनामभिर्विभक्तं स्तौति। तद्यथा—

अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्।
होतारं रत्नधातमम्। ऋक् १।१।१।।
उक्थशासचश्चरन्ति। ऋक् १०।८२।७।।
अर्चत प्रार्चत प्रियमेधासो अर्चत। ऋक् ८।६६।८।।

इत्यादि विविधभावदर्शनात् कर्मार्थे घञ्प्रत्ययान्त एवैष शब्दः साधुः प्रतीयते। करणार्थके घञ्प्रत्ययेऽपि चार्कशब्दः संगतो भवति, स्तूयते येन वाद्यादिना तदपि चार्कः। तेन वादित्रादिना करणेन स्तोता स्तवने समर्थो भवति। तद् वादित्रादिकमपि स्तोतृग्रहणेन गृह्यते, यः स्तूयते स एवार्कः अर्च्यः स्तुत्य इत्यादिशब्दैरुक्तो भवति **''सूर्य आत्मा जगतस्तस्थुषश्च''** इति (यजुः ७।४२, ऋक् १।११५।१) मन्त्रलिङ्गात्। एष दिवस्पुत्रः, सूर्योऽप्यर्कनाम्ना स्तूयते, तं महावीर्यम् ओजस्तेजोद्युतिधरं विद्वांसः स्तुवन्ति। तथा च मन्त्रः—

श्लोकं घोषं भरथेन्द्राय सोमिनः। ऋक् १०।६४।१।।

तथा—

एतं मे स्तोमं तना न सूर्ये द्युतद्यामानं वावृधन्त नृणाम्।
संवननं नाश्व्यं तष्टेवानपच्युतम्।। ऋक् १०।६३।१२।।

विविधा देवताः प्रति—

य ईशिरे भुवनस्य प्रचेतसो विश्वस्य स्थातुर्जगतश्च मन्तवः।
ते नः कृतादकृतादेनसस्पर्यद्या देवासः पिपृता स्वस्तये।।
भरेष्विन्द्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनम्।
अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये।।

ऋक् १०।६३।८, ९।।

तथा चार्चित एवार्कः। इति निदर्शनम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

अर्चन्ति यं सोऽर्क इहास्ति विष्णुः
सूर्योऽथवा सोऽग्निरुत प्रचेता ।
सदार्थिनो ह्यर्थ्यमभिस्तुवन्ति
प्रभुर्न तस्माद् 'घञ्' [1]अकर्तरीह।।१११७।।

य ईशिरे—इति मन्त्रलक्षिताः प्रचेतसस्तथान्येऽपि तत्पर्यायनामभिः स्तुता ग्राह्याः—गुणभेदेन शब्दभेदेन वा मूलन्न विहन्यते। तद्यथा—

एकं सद् विप्रा बहुधा वदन्ति अग्निं यमं मातरिश्वानमाहुः।

ऋक् १।१६४।४६।।

अग्निरिन्द्रो वरुणो मित्रो अर्यमा वायुः पूषा सरस्वती सजोषसः।
आदित्या विष्णुर्मरुतः स्वर्बृहत् सोमो रुद्रो अदितिर्ब्रह्मणस्पतिः।।
इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा समोकसा।
अन्तरिक्षं मह्या पप्रुरोजसा सोमो घृतश्रीर्महिमानमीरयन्।।
तेषां हि मह्ना महतामनर्वणां स्तोमाँ इयर्म्यृतज्ञा ऋतावृधाम्।
ये अप्सवमर्णवं चित्रराधसस्ते नो रासन्तां महये सुमित्र्याः।।

ऋक् १०।६५।१, २, ३।।

एकतस्तिः स्तोमान्—इयर्मि—ऋतज्ञा इति दिङ्मात्रं दर्शितम्। तेऽग्निप्रभृतयः प्रचेतसो देवाः स्तुवन्ति स्वयञ्च स्तुता भवन्ति।

वाजसनः—७६६ (वाजसनिः—वैदिक—पाठः)

"वज गतौ" इति भौवादिको धातुस्ततो ***"हेतुमति च"*** (पा० ३।१।२६) इति णिच्। "वज मार्गसंस्कारगत्योः" इति च चौरादिको धातुस्ततश्च स्वार्थिको णिच्, ताभ्यामुभाभ्यामकर्तरि कारके ***"एरच्"*** (पा० ३।३।५६) णेर्लोपः।

सनः—षण संभक्तौ इति भौवादिकः "षणु दाने" इति च तानादिकः ताभ्याम् ***"अज्विधिः सर्वधातुभ्यः"*** (महा० ३।१।१३४) इत्यनुशासनादच्। सनति, सनोति वा सनः, षस्य सः। ***"निमित्तापाये नैमित्तिकस्याप्यपाय"*** इति णस्य नः। सनिपक्षे च षणु दाने धातोः ***"सर्वधातुभ्य इन्"*** (उ० ४।११८) इत्यौणादिक इन् प्रत्ययः। सनति=ददाति, सनोति=संभजति वा सनः। वाजस्य सनः वाजसन

---

१. घञ्-अकर्तरि। कर्तृभिन्ने कारके भवतीत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति विष्णुः। वाजञ्चान्नं जीवनीयमुपकरणं, तद्ददाति इति वाजसनः। मन्त्रलिङ्गञ्च—

वाजसनिर्वरिवोविद्वयोधाः। ऋक् ६।११०।११।।

तथा—

वाजसनिं पूर्भिदम्। ऋक् ३।५१।२।।

वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम्।

ऋक् १०।६१।१५।।

सर्गादितः सर्वविधानां वाजानां दाता सर्वव्यापको विष्णुः। सूर्योऽपि वाजसनिरुच्यते, स हि यथाकालं वर्षित्वा वाजं सनति। जीवनार्होपकरणानां दाता मनुष्योऽपि वाजसन उच्यते। एवंविधोहा योजनाश्च योजनीयाः सुधीभिः। तद्यथा-वृषभोऽपि वाजसनो वाजसनिर्वोच्यते, यतो हि स हलाकर्षणेनान्नमुत्पाद्य जीवेभ्यो ददाति। एवं सर्वत्रैव विष्णोर्वाजसनित्वरूपो धर्मो विश्वे व्याप्त आस्ते।

भवति चात्रास्माकम्—

विष्णुर्हि वाजं सनतीति बोध्यं
सूर्यो वृषो वाजसनिश्च मर्त्यः।
एवं हि यो वेत्ति स वेत्ति विश्वं
दाता भवन् वाजसनित्वमेति ।।१११८।।

शृङ्गी—७६७

"शृ हिंसायाम्" इति क्रैयादिको धातुस्ततः ***"शृणातेर्ह्रस्वश्च"*** (पा० १।१२६) इत्युणादिसूत्रेण गन् प्रत्ययो, धातोर्ह्रस्वो नुडागमश्च। ***"नेड् वशिकृतिः"*** (पा० ७।२।२८) इतीण्निषेधः। गुणाभावोऽनुस्वारपरसवर्णौ। ततः शृङ्गमस्यास्तीति मत्वर्थीय इनिः ***"यस्येति च"*** (पा० ६।४।१४८) इत्यनेनाकारलोपः, इन्नन्तलक्षणो दीर्घः। शृङ्गमिति दीप्तेर्नामेति पूर्वमुक्तम् (संख्या ७६३) तथा च शृङ्गीति शब्देन सूर्यः, **"तस्य भासा सर्वमिदं विभाति"** (मुण्ड० उप० २।२।१०) इत्यादिवचनाद्विष्णुश्चोच्यते। तथा च मन्त्रलिङ्गम्—

इन्द्रो यातोऽवसितस्य राजा शमस्य च शृङ्गिणो वज्रबाहुः।
सेदु राजा क्षयति चर्षणीनामरान् न नेमिः परिता बभूव ।।

ऋक् १।३२।१५।।

वि शृङ्गिणमभिनच्छुष्णमिन्द्रः। ऋक् १।३३।१२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शृङ्गाणीवेच्छृङ्गिणां सन्ददृशे । ऋक् ३।८।१०।।

यस्ते शृङ्गवृषो नपात् । ऋक् ८।१७।१३।।

शृङ्गाणि ज्वलतो नामधेयानि। निघण्टुः १।१७।।

ज्वलनधर्मा सूर्यः शृङ्गीत्युच्यते। ज्वलनधर्मणो विष्णोः प्रतिवस्तु दृश्यमानेन ज्वलनरूपेण धर्मेण विष्णोः सर्वव्यापकता व्यज्यते। नैकशृङ्गनाम (सं ७६३) व्याख्याप्रसङ्गे बहु विचारितचरम्। तथा च सर्पाणामग्निरूपं विषं दन्तैर्बहिरायाति, वृश्चिकस्य पुच्छे भवति विषम्। कण्टकिनो वृक्षा ओषधयश्चापि विषरूपेणाग्निधर्मेण व्याप्ता भवन्ति, तदेव तेषां शृङ्गित्वम्। तच्च शृङ्गं क्वचिल्लोमरूपेण क्वचिद्दन्तनखादिरूपेण चाविर्भवति। तदेव च शृङ्गं विविधप्राणिनां यौवनोष्मणा बहिरायातं तेषां शृङ्गित्वं प्रकटयति। इयं विचित्रचित्रा रचना भगवतो ज्ञानमहत्त्वशालित्वं प्रकटयति प्रतिपदम्। **''इन्द्रो मायाभिः पुरुरूप ईयते''** (ऋक् ६।४७।१८) इति च वैदिकः सिद्धान्तः। तथा च **''तद्विष्णोः परमं पद ᳪ सदा पश्यन्ति सूरयः। दिवीव चक्षुराततम्''** इति (यजुः ६।५)।

भवति चात्रास्माकम्—

शृङ्गं हि नूनं ज्वलतोऽस्ति नाम
ते वा मयूखा रविरस्ति तद्वान् ।
अग्निर्विभक्त्या विविधात्मयोगै-
र्जगत् स्वभावेन भिनत्ति तस्मात्।।१११६।।

जयन्तः—७६८

''जि जये'' भौवादिको धातुस्ततः ***''तृभूवहिवसिभासिसाधिगण्डिमण्डि-जिनन्दिभ्यश्च''*** (उ० ३।१२८) इत्युणादिसूत्रेण झच् प्रत्ययस्तस्य चानुवृत्त्या षित्त्वमतिदिश्यते, तेन स्त्रियां ***''षिद् गौरादिभ्यश्च''*** (पा० ४।१।४१) इति सूत्रेण ङीष् प्रत्ययो भवति।

झस्य ***''झोऽन्तः''*** (पा० ७।१।३) इति सूत्रेणान्तादेशस्तेन स्वादिप्रथमैकवचने जयन्तः सिध्यति। विजेतुर्नाम जयन्त इति। यो हि सर्वदा जयति, न कदाचित् पराजयं लभत इति जयन्त-शब्दस्यार्थो भवति।

मन्त्रलिङ्गञ्च—

जयन्तं त्वामनुमदे सोम। ऋक् १।९१।२१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स च सोमः—

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।
त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ ॥

ऋक् १।९१।२२॥

इति ऋचा। सकार्यो वर्ण्यते। सूर्यपक्षेऽपि मन्त्रलिङ्गम्—

सोमो गौरी अधि श्रितः। ऋक् ६।१२।३॥

अत्र गौरीति सूर्यस्य नाम। सूर्य इत्यपि विष्णोर्नामातो विष्णुर्जयन्तः। विष्णुरेवैवंविधान् जयशीलत्वादिरूपान् गुणान् सूर्ये न्यधात्, सर्वत्र व्याप्तत्वाद्विष्णोः। यत्र हि भगवान् तत्र स्वल्पेष्वपि साधनेषु सत्सु जयः सुलभः। भगवानेव जयन्तो जयशीलेषु निजं बलं निदधाति, यथा सेनायां व्याप्तं राजबलं सेनां जापयति, तथा च मन्त्रलिङ्गम्—

देवसेनानामभिभञ्जतीनां जयन्तीनां मरुतो यन्त्वग्रम्।

ऋक् १०।१०३।८॥

भवति चात्रास्माकम्—

विष्णुर्जयन्तो वशयत्यशेषं
सूर्योऽपि [1]तस्माद् वशयत्यजस्रम्।
विश्वं तथा विश्वगतञ्च सर्वं
सूर्यो हि राजा जगतश्चरिष्णोः ॥११२०॥

मन्त्रः—**इन्द्रो राजा जगतश्चर्षणीनाम्।** ऋक् ७।२७।३॥

तथा च पुनरस्माकम्—

एवं हि यो वेत्ति जयन्तमग्र्यं
विष्णुं स सर्वं जयतीति बोध्यम्।
यस्यास्ति सव्ये भगवान् जयन्तः
किं शत्रवस्तस्य नरस्य कुर्युः ॥११२१॥

सर्वविज्जयी—७६६

सर्वशब्दो वन्नन्तो निपातित उणादौ (१।१५३) व्युत्पादितश्च सर्व इति (सं० २५) स्वतन्त्रनामव्याख्याने। वित्—वेत्तीति ***"क्विब्विधिः सर्वधातुभ्यः"*** (महा०

१. विष्णुप्रत्ताप्तशक्तेः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३।१।१३४) इति सामान्यनियमेन क्विप् कर्तरि। जयी—जयति तच्छीलस्तत्साधुस्तद्धर्मा वेति *''जिदृक्षिविश्रीवण्माव्यथाभ्यमपरिभूप्रसूभ्यश्च''* (पा० ३।२।१५७) इति सूत्रेण तच्छीलादिविशिष्टे कर्तरीनिः, गुणो, नान्तलक्षणो दीर्घः। सर्वं वेत्तीति सर्ववित्, सर्वविच्चासौ जयी सर्वविज्जयीत्येकं नाम सविशेषणम्। मन्त्रलिङ्गञ्च भावप्रधानम्—

शश्वदिन्द्रः पोप्रुथद्भिर्जिगाय नानाद्भिः शाश्वसद्भिर्धनानि ।
स नो हिरण्यरथं दसनावान्त्स नः सनिता सनये स नोऽदात्।।

ऋक् १।३०।१६।।

लोकेऽपि च स एव विजयते यो बहुवेदी, यद्वा परपक्षरहस्यं बहु वेत्ति। भगवांश्च सर्वं वेत्तीति सर्वविज्जयीत्युक्तो भवति। यदुक्तं वेदे **''तस्मिन् ह तस्थुर्भुवनानि विश्वा''** (यजुः ३१।१६) तत्राधारेणाधेयं जितं भवति धृतं वेति सैव सर्वविज्जयिता प्रकाश्यते।

भवति चात्रास्माकम्—

स सर्ववित्पूर्वपदो जयीशो
विश्वं सनात् [१]सत्यमना यथावत्।
व्यवस्थया न्यस्य तदन्तमित्वा
स्वाङ्कस्थवद्वेत्ति जिगीषुरेतत् ।।११२२।।

❖ ❖ ❖

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः।।६६।।

८०० सुवर्णबिन्दुः, ८०१ अक्षोभ्यः, ८०२ सर्ववागीश्वरेश्वरः।
८०३ महाह्रदः, ८०४ महागर्तः, ८०५ महाभूतः, ८०६ महानिधिः।।

सुवर्णबिन्दुः—८००

सु=शोभनं वर्णं=वरणीयं दृश्यं रूपं यस्य स सुवर्णः, सुवर्णा बिन्दवोऽवयवा यस्य स सुवर्णबिन्दुः।

१. सत्यमनाः=अबाधितज्ञानः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्णम्—वृणोतेः ***''कॄवॄजॄ''*** (उ० ३।१०) इत्याद्युणादिसूत्रेण 'नः' प्रत्ययः तस्य च नित्त्वातिदेशः स्वरार्थम्। गुणो रपरो ***''रषाभ्यां नो णः समानपदे''*** (पा० ८।४।१) सूत्रेण णत्वं ***''नेड् वशि कृति''*** (पा० ७।२।८) इतीण्निषेधः सुवर्ण इति।

बिन्दुरिति—'विद् ज्ञाने'' आदादिको धातुस्ततो ***''बिन्दुरिच्छुः''*** (पा० ३।२।१६०) सूत्रेणात्र नुम् निपातितस्तथा बवयोरभेदेन केचिद् बिन्दुरिति समर्थयन्ति। यद्वा—''बिदि अवयवे'' भौवादिको धातुस्ततः ***''शॄस्वृस्निहि''*** (उ० १।२०) इत्याद्युणादिसूत्रेण बाहुलकाद् उः प्रत्ययः। अवयवशब्देन चात्रावयवक्रियोच्यते। एवञ्च बिन्दति=अवयवान् करोतीति बिन्दुरिति सिद्धम्। एवं चिन्ततीति चिन्तुः, ग्रन्थत इति ग्रन्थुः, लोके चास्यैवापभ्रंशो गण्ठुरिति। एवं सर्वत्रोह्यं यथाप्रयोगम्। एवञ्च स्वयमवयवी भगवान् विष्णुर्विचित्रवर्णसुरूपावयवतामापद्य बिन्दुरूपावयवैर्विराजमानः सुवर्णबिन्दुरित्यभिधीयते, तथा चायमाकाशे भान् सूर्यो बिन्दुरिव वर्तुलः सुवर्णबिन्दुरिव बिन्दुरिति सुवर्णबिन्दुरभिधीयते। एतेन नाम्ना ब्रह्मणोऽनन्तत्वं व्याख्यातं भवति, **''ओ खं ब्रह्म''** (यजुः ४०।१७) इति याजुषन्मन्त्रलिङ्गात्। यथायं सूर्यस्तथायं समस्तः प्रपञ्चः परस्परमवयवावयवविभावमापन्नोऽपि तस्य परब्रह्मणो बिन्दुरूपः, पत्रफलपुष्पशाखादीनि वृक्षस्येव। तत्र वस्तुबहुत्वेऽपि वस्तुतत्त्वमवयविरूपमेकमेव केवलमिन्द्रो मायाभिः पुरुरूपत्वं=विविधभावरूपजगद्रूपतामापद्यते, तेन प्राकृता अज्ञा जनाः मुह्यन्ति, न तु तत्त्वविदः। एवमेवार्षग्रन्थेषु सिद्धान्तितमिति।

मन्त्रलिङ्गञ्चात्र—

यो अन्तरिक्षे रजसो विमानः। यजुः ३२।६।।

विमानः विना पक्षिणा मीयत इति, पक्षिवल्लघुः प्रतीयमान इत्यर्थः। अत एव हंस इति सूर्यस्य नाम वेदे।

यत् समुद्रो अभ्यक्रन्दत् पर्जन्यो विद्युता सह।
ततो हिरण्ययो बिन्दुस्ततो दर्भो अजायत ।। अथर्व १६।३०।५।।
उर्ध्वो बिन्दुरुदचरत्।। अथर्व १०।१०।१६।।
हिरण्ययो बिन्दुः ।। अथर्व ६।१।२१।।
न हि ते क्षत्रं न सहो न मन्युं वयश्च नामी पतयन्त आयुः।
नेमा अपो अनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम् ।।
ऋक् १।२४।६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वय इति दिवि दृश्यमानं सर्वं ग्रहोपग्रहसंवलितं नाक्षत्रं जगत्। यथा वयांसि पतन्ति, तथैवेमे ग्रहोपग्रहाः।

विश्वस्मा इत् स्वर्दृशे साधारणं रजस्तुरम्।

गोपामृतस्य विर्भरत्। ऋक् ६।४८।४।। विः=सूर्यः।

तथा च—

अस्य वामस्य....वेः। ऋक् १।१६४।७।।

एको अश्वो वहति सप्तनामा। ऋक् १।१६४।२।।

दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम्।

अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ।।

ऋक् १।१६४।५२।।

भवति चात्रास्माकम्—

सुवर्णबिन्दुः कथितो ह सूर्यः

खेऽनन्तपारे कणवद्विभान्तः ।

तथैव दृश्यास्त्वितरे ग्रहाश्च

खं ब्रह्म विष्णुः स बृहन्महत् सः।।११२३।।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृंहितसत्यभाष्ये
अष्टकं नामशतकं
सम्पूर्णम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अक्षोभ्यः—८०१

"क्षुभ सञ्चलने" धातुः क्रैयादिकस्तत ***"ऋहलोर्ण्यत्"*** (पा० ३।१।१२४) सूत्रेण ण्यत् प्रत्ययः शक्यार्थे, गुणः। न क्षोभ्यः अक्षोभ्यो नञ्समासो नञो नलोपश्च। न क्षोभयितुं=स्वव्यवस्थातः सञ्चालयितुं शक्यः अक्षोभ्य इत्यर्थः। तथा हि न कदाचिदपि तत्कृता विश्वव्यवस्था विकारमाप्नोति विकारमापादयितुं वा शक्यते कैश्चित् सूर्यादिभिरपि। यतो हि तेऽपि तद्व्यवस्थाबद्धा एव सर्वे भ्रामयन्ति, अतो न कदाचिदपि विचलन्ति व्यवस्थातः।

लोकेऽपि च पश्यामः—न विकारैर्विकृतः=क्षुब्धो भवति धीरपुरुषः। तथैवेदं विकारभूतं सर्वं जगन्न तं क्षोभयितुं शक्तम्, स च सर्वस्य जगतः क्षोभणे समर्थः। तथा च मन्त्रलिङ्गम्—

क्षोभणश्चर्षणीनाम्। ऋक् १०।१०३।१।।

सूर्योऽप्यक्षोभ्यो भगवद्गुणव्याप्तिमत्वात्।

भवति चात्रास्माकम्—

विकाररूपं हि जगत् समस्तं
विष्णु सदाऽक्षोभ्य इहास्ति सर्गात्।
क्षोभ्यः कथं सोऽत्र भवेद् विकारै-
स्तस्मिन् ह तस्थुर्भुवनानि विश्वा ।।११२४।।

सर्ववागीश्वरेश्वरः—८०२

सर्व-शब्दो वाक्—शब्दः, ईश्वर—शब्दश्च पृथक्-पृथक् कृतव्युत्पादनाः। सर्वा च सा वाक् सर्ववाक्, सर्ववाच ईश्वरः सर्ववागीश्वरः, सर्ववागीश्वराणामपीश्वरः सर्ववागीश्वरेश्वरः।

लोके चापि पश्यामः—सर्वेषां प्राणिनां परस्परं वाग् भिन्ना भिन्ना। स चैष वाचो भेदोऽग्निबलाबलकृतः कण्ठबिलकृतश्च। यतो हि सर्वेषां कण्ठबिलस्य निर्माणं भिन्नं भिन्नम्। मन्त्रलिङ्गञ्च—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत् पर्जन्य कनिक्रदत् स्तनयन् हंसि दुष्कृतः।
प्रतीदं विश्वं मोदते यत्किञ्च पृथिव्यामधि।। ऋक् ५।८३।६।।
दिवो न सानु स्तनयन्नचिक्रदत्। ऋक् १।५८।२।।
वैश्वानर नाभिरसि क्षितीनाम्। ऋक् १।५०।१।।
वाचस्पतिर्वाचन्नः स्वदतु। यजुः ११।७।।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे। अथर्व १।१।१।।

इति निदर्शनमात्रं नः प्रयोजनम्।

भवतश्चात्रास्माकम्—

स सर्ववाक्पूर्वपदेश्वरो यो
विभाति विष्णुर्विततः पुराणः।
अग्निर्हि वाचामधिदेवता सन्
सोऽग्निर्व्यनक्त्यात्मबलैः पृथक् ताः।।११२५।।
एवं हि यो वेत्ति स वेत्ति वाचां
गुप्तं रहस्यं [१]करणस्य भेदात्।
अग्नेः [२]समास्थापनभेदभेदाद्
[३]बलाबलं चापि [४]भिनत्ति वाचम्।।११२६।।

महाह्रदः—८०३

महानिति प्राग्बहुशो व्युत्पादितः।

ह्रदशब्दो "ह्राद अव्यक्ते शब्दे" इति भौवादिकाद् धातोः पचाद्यच्, पृषोदरादित्वाद्ध्रस्वः। ह्रादत इति ह्रदो महांश्चासौ ह्रदो महाह्रदः। महान्तमव्यक्तं शब्दं यः करोति स महाह्रद इत्युच्यते। मन्त्रलिङ्गञ्च—

ह्रदा इव कुक्षयः सोमधानाः। ऋक् ३।३६।८।।
अन्तरिक्षमुतोदरम्। अथर्व १०।७।३२।।

यस्यान्तरिक्षमुदरं स ज्येष्ठ इति ज्येष्ठनाम्नो (संख्या ६७) व्याख्याने द्रष्टव्यम्।

ह्रदं न हि त्वा न्यृषन्त्यूर्मयो०। १।५२।७।।

---

१. करणस्य=कण्ठस्य भेदात्। २. अग्न्याशयनिर्माणभेदात्। ३. बलाबलं=शरीरबलाबलम्। ४. विविधै रोगैरपि वाग्विहन्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गम्भीरां उदधींरिव क्रतुं पुष्यसि गा इव ।
प्र सुगोपः यवसं धेनवो यथा ह्रदं कुल्या इवाशत।। ऋक् ३।४५।३।।

ऊर्मयो हि परस्परं प्रतिहत्याव्यक्तं शब्दं कुर्वन्ति, तस्मात्समुद्रः ह्रादः सन् ह्रद इत्युक्तो भवति। स च यस्मिन् स्थितः सोऽपि महाह्रदः तात्स्थ्योपाधिना। इति निदर्शनमात्रम्।

महाह्रदो विष्णुरमोघकर्मा
करोति सर्वं सुविचार्य विश्वम् ।
शुष्येद्धरेयं यदि नोदधिः स्यात्
कुक्षिर्न चेत् स्याद्वपुरत्र[1] शुष्येत् ।।११२७।।

तथा च भावान्तरमभिप्रेत्यास्माकम्—

महाह्रदो विष्णुरमोघकर्मा
करोति विश्वं बहुसाधनाप्तम् ।
महाह्रदं सोऽम्बुनिधिं विधत्ते
शुष्येन्न भूः सूर्यखरांशुपातैः ।।११२८।।

यथान्तरिक्षे निदधाति सोऽभ्रं
तथा शरीरे कुरुते च कुक्षिम् ।
स स्वोदरं वै कुरुतेऽन्तरिक्षं
शब्दोऽप्यतोऽव्यक्त इतोऽस्ति सृप्तः।।११२९।।

महागर्तः—८०४

महच्छब्दो व्युत्पादितः।

गर्तः—"गॄ निगरणे" धातुस्तौदादिकस्ततो ***"हसिमृग्रिण्वाऽमिदमिलूपृधूर्विभ्यस्तन्"*** (उ० ३।६८) इत्युणादिसूत्रेण तन् प्रत्ययो, रपरो गुणः। ***"तितुत्र"*** (पा० ७।२।९) इत्यादिसूत्रेणेण्निषेधः। ***"अचो रहाभ्यां द्वे"*** (पा० ८।४।४६) सूत्रेण वैकल्पिको द्विर्भावः ***"सर्वत्र शाकल्यस्य"*** (पा० ८।४।५१) इति शाकल्याचार्यमते द्विर्भावाभावस्तेन गर्त्तः, गर्त इति च रूपद्वयं सिध्यति। महांश्चासौ गर्तः—महागर्तः। महागर्तो=महानिलयनस्थानं, यत्र सर्वं निलीयते=निगीर्णमिव भवति। मन्त्रलिङ्गञ्च—

१. अत्रेति जङ्गमवर्गे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिरण्यरूपमुषसो व्युष्टावयः स्थूणमुदिता सूर्यस्य ।
आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिञ्च।।

ऋक् ५।६२।८।।

वृष्टिद्यावा रीत्यापेषस्पती दानुमत्याः। बृहन्तं गर्त्तमाशाते।

ऋक् ५।६८।५।।

तथा चात्र ऋक् ५।६८।१ तः 'मित्रावरुणौ' अनुवर्तेते। गर्त्तोऽवटः=गढ्डा इति लोकप्रसिद्धः। अथापि च महागर्तो=महाकाशः। पश्यामश्च लोकेऽपि मुखत आरभ्य गुदान्तं यावद् यो महास्रोतः, स गर्त इव ज्ञेयो यतो सर्वमत्र निगीर्णमिव भवति। तथा च दुष्पूरोऽयमुदरगर्त आकाशरूपः। रथोऽप्यत एव गर्तो यतो हि तस्मिन् स्थितो रथी निगीर्ण इव प्रतीयते। "गर्तम्" ऋक् ७।६४।४।।

तथा "**आरोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिञ्च।**" यजुः १०।१६।। "**गर्ते**" ऋक् ५।६२।५ तथा ६।२०।६।

भवति चात्रास्माकम्—

महागर्तो महाकाशो यत्रस्थो वीक्षते जगत् ।
सूर्यो यत्र च लीनो वा दृश्यते चक्षुषा तथा।।११३०।।

यद्वा—

महागर्तं सनादाहुर्विष्णुं विश्वविभाविनम् ।
यस्मिन्नस्तोदयौ याति भ्रमन् [1]सूर्योऽपि नित्यशः।।११३१।।

लोके च दृश्यते, जन्तुर्गर्भाशयरूपाद् गर्तादुदेति, गर्ते च पुनर्निलीयते। गर्त्ते=भूगर्ते, काष्ठनिर्मिते गर्त्ते वा चितायामित्यर्थः। गर्तरूपे जलप्रवाहे वा। समुद्रोऽपि महागर्त उक्तो भवति, यतो हि सर्वा नद्यस्तस्मिन् निलीयन्ते। वेदवचनञ्च—"**समुद्रस्येव महिमा गभीरः।**" ऋक् ७।३३।८।।

एवं सर्वत्र योजना विधेया।

महाभूतः—८०५

भवतेरकर्मकात् कर्तरि क्तः *"श्रयुकः किति:"* (पा० ७।२।१२) इति नेट्। कित्त्वाद् गुणाभावः। भवतीति भूतः। महांश्चासौ भूतो महाभूतः। महतो महीयान् सत्स्वरूपश्चेत्यर्थः।

१. सूर्य इत्युपलक्षणम्, सर्वे ग्रहा ज्ञेयाः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

बण्महाँ असि सूर्य बडादित्यमहाँ असि । यजुः ३३।३६।।

घृतप्रतीक उर्विया व्यद्यौदग्निर्विश्वानि विद्वान्।
आ नो गहि सख्येभिः शिवेभिर्महान् महीभिरूतिभिः सरण्यन्।
अस्मे रयिं बहुलं सन्तरुत्रं सुवाचं भागं यशसं कृधी नः ।।
ऋक् ३।१।१८, १६।।

इति दिग्दर्शनम्। यतो हि स विष्णुर्महाभूतः तस्मात् स पञ्चमहाभूतैर्विश्वं जनयन् सर्वत्र च स्वमहाभूतत्वं व्यापयन्निव सूर्यादीन् महतो ग्रहानपि जनयति।

भवति चात्रास्माकम्—

विष्णुर्महाभूत इहास्ति गीतः
स पञ्चभूतैः कुरुते महद्भिः ।
जगन्महत्तच्च चराचरं यत्
स्वयं महाभूतगुणे न लीनः ।।११३२।।

महानिधिः—८०६

निरुपसर्गः, ''डुधाञ् धारणपोषणयोः'' इति धातुर्जौहोत्यादिकस्ततः ***''उपसर्गे घोः किः''*** (पा० ३।३।६२) सूत्रेण किः प्रत्ययः, आल्लोपश्च, निधीयतेऽस्मिन्निति निधिः। महान्तः सूर्यादयोऽपि ग्रहा यत्र पक्षिण इव निहिता इति महतां निधित्वात् स महानिधिरित्युक्तो भवति। स च विष्णुः स्वेन महानिधित्वरूपेण गुणेन सर्वं व्याप्नोति। लोकेऽपि च पश्यामः—प्रत्येकं किञ्चिन्निहितं भवति। यथा **''अग्निमीडे पुरोहितम्''** (ऋक् १।१।१) इत्यत्र मन्त्रे ''रत्नधातमम्'' इत्यग्नेर्विशेषणम्। **''समुद्रं धरुणं रयीणाम्''** (ऋक् १०।४७।२)

मन्त्रलिङ्गञ्च—

निधीनां त्वा निधिपतिꣳ हवामहे। यजुः २३।१६।।

इति निदर्शनमात्रम्।

भवति चात्रास्माकम्—

महानिधिर्विष्णुरिहास्ति गीत-
स्तस्मिन् ह तस्थुर्भुवनानि विश्वा।
यस्मिन्नह तस्थुर्भुवनानि विश्वा
महान् स लोके महतां निधित्वात्।।११३३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुमुदः कुन्दरः कुन्दः पर्जन्यः पावनोऽनिलः।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ॥१००॥

८०७ कुमुदः, ८०८ कुन्दरः, ८०९ कुन्दः, ८१० पर्जन्यः, ८११ पावनः, ८१२ अनिलः। ८१३ अमृताशः, ८१४ अमृतवपुः, ८१५ सर्वज्ञः, ८१६ सर्वतोमुखः॥

कुमुदः—८०७

"कै शब्दे" भौवादिको धातुस्ततः ***"क्रुर्भ्रश्च"*** (उ० १।२२) इत्युणादिसूत्रे चकारग्रहणाद् बाहुलकाद् वाऽन्यतोऽपि धातोः कुः प्रत्ययः। तस्मिंश्च ***"आदेच उपदेशेऽशिति"*** (पा० ६।१।४५) सूत्रेणात्वं, कोः कित्त्वात्तस्य लोपः कुरिति, कायतीति।

मुदः—"मुद हर्षे" इति धातोरिगुपधलक्षणो (उ० ३।१।१३५) मूलविभुजादि लक्षणो (द्र० पा० ३।३।५) वा कः प्रत्ययः, मोदत इति मुदः। कौ=शब्दाश्रये खे मोदत इति कुमुदः सूर्यः। यद्वा-अन्तर्भावितण्यर्थग्रहणेन कौ=शब्दवत्याकाशे मोदयतीति कुमुदो विष्णुः। कमलस्यापि नाम कुमुद इति, यतो हि तत् सूर्योदये विकसति, सूर्येऽस्तमिते च सङ्कुचति।

कानिचिच्च पुष्पाणि केवलं रात्रिविकाशीनि, चन्द्रोदयास्ताभ्यां तेषां विकाशसङ्कोचौ, तान्यपि पृथिवीमोदीनि कुमुदान्युच्यन्ते। तथाविधानि पुष्पाणि पर्वतेषु भ्रमद्भिरस्माभिर्दृष्टानि। मन्त्रलिङ्गञ्च—

याभिः सोमो मोदते हर्षते च कल्याणीभिर्युवतीभिर्न मर्यः।
ता अध्वर्यो अपो अच्छा परेहि यदासिञ्चा ओषधीभिः पुनीतात्॥

ऋक् १०।३०।५॥

सोममधिकृत्य सोमनामव्याख्याने (संख्या ५०५) विशदं व्याख्यातं, सोमः सूर्यः सोमश्चन्द्रोऽपि। लोकेऽपि पश्यामः-मनुष्यो गायन् यन्त्रेण वा शब्दं कुर्वन् भृशं मोदते, तथा वामाभिः साकं नृत्यन् गायंश्च मोदते। मनुष्यवच्च देवताभिधानम्। एष हि कुमुदत्वरूपो भगवतो गुणः सर्वत्र लोके व्याप्तः। कुमुदो विष्णुः सूर्यः सोमश्च।

भवति चात्रास्माकम्—

विष्णुर्हि लोके कुमुदः प्रसिद्धः
सोमोऽथवा सूर्य उतापि मर्त्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शब्दायमानो मुदमेति यस्मात्
तस्मात्तडिच्छब्दमुपैति चाभ्रे ।।११३४।।

मन्त्रलिङ्गञ्च—

तद्धावतोऽन्यानत्येति तिष्ठत् । तथा
तस्मिन्नपो मातरिश्वा दधाति। यजुः ४०।४।।

तस्मिन्निति ब्रह्मणि, खसंज्ञक आकाशे वा। विष्टारियज्ञवर्णने च—

एष यज्ञानां विततो वहिष्ठो विष्टारिणं पक्त्वा दिवमाविवेश।
आण्डीकं कुमुदं संतनोति बिसं शालूकं शफको मुलाली ।।
गतास्त्वाधाराः........। अथर्व ४।३४।५।।

कुमुदवद् वर्णनमत्र।

कुन्दरः—८०८

कुन्दः—''कमु कान्तौ'' इति भौवादिकाद्धातोः—***''अब्दादयश्च''*** (उ० ४।९८) इत्युणादिसूत्रेण दः प्रत्ययो धातोरुपधाया उत्वञ्च निपात्यते, काम्यत इति कुन्दः कमनीयः। तदुपपदाद् ''रा दाने'' धातोः—***''आतोऽनुपसर्गे कः''*** (पा० ३।२।३) सूत्रेण कः प्रत्ययस्तस्मिंश्च परत आल्लोपः। कुन्दं=कमनीयं वाञ्छितं ददातीति कुन्दरः।

मन्त्रलिङ्गञ्च—

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।।
ऋक् १०।१२१।१०; अथर्व ७।८०।३; यजुः १०।२०; २३।६५।।

तथा—

अहमेव स्वयमिदं वदामि जुष्टं देवेभिरुत मानुषेभिः।
यं कामये तं तमुग्रं करोमि तं ब्रह्माणं तमृषिं तं सुमेधाम्।।
ऋक् १०।१२५।५।।

अहं सोममाहनसं बिभर्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते सुप्राव्ये यजमानाय सुन्वते।।
ऋक् १०।१२५।२।। इत्यादि।

भवति चात्रास्माकम्—

स कुन्दरो विष्णुरहं ब्रुवाणो
दधाति कुन्दं पुरुरूपरत्नम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स सर्वकस्मै च ददाति तत्तद्
यद्यच्च यस्यास्त्यभिवाञ्छनीयम्।।११३५।।

लोकेऽपि पश्यामः—बहुवस्तुधरो वैपणिको ग्राहकाय वाञ्छितं वस्तु ददाति, तथैव कुन्दरो विष्णुर्व्याप्नोति स्वधर्मेण लोकमिति। यद्वा-कुं=पृथिवीं दारयतीति कुन्दरः। कुरिति भूवाचकः शब्दः पृषोदरादिलक्षणो नकारो मकारो वा वर्णोपजनस्तस्य चानुस्वारपरसवर्णौ। यद्वा कुमिति मान्तं पापार्थकमव्ययं कुं=पापं दृणाति स्वसेविनामिति कुन्दरः। तथा च मन्त्रलिङ्गम्—

अग्ने नय सुपथा..........युयोध्यस्मज्जुहुराणमेनः। यजुः ४०।१६।।

भवति चात्रास्माकम्—

स कुन्दरो नाम विदार्य भूमिं
स आत्मशक्त्या कुरुते समुद्रम्।
स एव बुद्धिं जरितुर्विशोध्य
सुमेधसं तं कुरुते ह विष्णुः।।११३६।।

कुन्दः—८०६

कुमिति पापार्थकमव्ययं पूर्वमुक्तं, तद् द्यति=खण्डयतीति कुन्दः। यद्वा कुम्=पापं दायति=शोधयतीति कुन्दः। दो अवखण्डने, दैप् शोधन एताभ्यां—आत्वे, क प्रत्यये, आल्लोपे च सिद्धः कुन्दशब्दः।

यद्वा कुं=पृथिवीं दायति=शोधयति कुन्दः। इह पृषोदरादित्वाद् मकारवर्णागमस्तस्य चानुस्वारपरसवर्णौ।

मन्त्रलिङ्गञ्च—

प्र ते धारा अत्यण्वानि मेष्यः पुनानस्य संयतो यन्ति रंहयः।

ऋक् ९।८६।४७।।

यद्वा—

स्वायुधः पवते देव इन्दुरशस्तिहा वृजनं रक्षमाणः। ऋक् ९।८७।२।।

महावीरं तुविबाधमृजीषम्। ऋक् १।३२।६।।

ऋजीषं=शुद्धं-अग्नि-सूर्यं वा। कुं=पृथिवीं वर्षणेन शोधयति कुन्दः।

मन्त्रलिङ्गञ्च—

अहन्नहिं पर्वते शिश्रियाणं त्वष्टास्मै वज्रं स्वर्यं ततक्ष।
वाश्रा इव धेनवः स्यन्दमाना अञ्जः समुद्रमव जग्मुरापः।।

ऋक् १।३२।२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति दिग्दर्शनम्।

भवति चात्रास्माकम्—

कुन्दो ह विष्णुः सविता ऋजीषः
स कोर्विशुद्ध्यै कुरुते च वृष्टिम्।
स्तोतुश्च हृत्स्थं हरते स पापं
तमेव कुन्दं प्रणमन्ति [1]कुन्दम् ।।११३७।।

कुं=पृथिवीं द्यति=खण्डयति कुन्दः। इह मन्त्रलिङ्गम्—

वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः। ऋक् १।६५।८।।

पर्जन्यः—८१०

पर्जन्य शब्दः पृषु सेचने धातोः ***"पर्जन्यः"*** (उणादि ३।१०३) इत्युणादिसूत्रेण निपात्यते "अन्यः" प्रत्ययः, षकारस्य जकारश्च निपातनाद् भवति। पर्षति=सिञ्चतीति पञ्चपाद्युणादिवृत्तौ स्वामिदयानन्दः।

यद्वा—परिपूर्वस्य वृषु सेचने धातोरिदं रूपं तथा च अन्यप्रत्ययो, धातोः षकारस्य जकारादेशः परेरिकारस्य धातोर्वृभागस्य लोपश्च निपात्यते वर्षति=सिञ्चतीति पर्जन्यः। परिपूर्वस्य 'गर्ज शब्दे' धातोर्वा अन्यप्रत्ययो गकाररेफोपसर्गान्त्यलोपश्च निपात्यते, परिगर्जतीति पर्जन्यः इति दशपाद्युणादिवृत्तौ।

यद्वा—अर्जतेः पुडागमोऽन्यः प्रत्ययश्च निपात्यते इति श्वेतवनवासी।

यद्वा—पृणातेरन्यप्रत्ययस्य जुडागम इति नारायणः, पृणातीति पर्जन्यः।

यद्वा—तृपेरन्यप्रत्ययान्तस्याद्यन्तविपर्ययेणेदं रूपं तकारलोपेन च इति निरुक्तसमुच्चयकारः। अस्माभिरयं पर्जन्यशब्दनिर्वचनप्रपञ्चो विदुषां प्रीतये संगृहीतः।

मन्त्रलिङ्गञ्च—

दिवा चित् तमः कृण्वन्ति पर्जन्येनोदवाहेन।
यत् पृथिवीं व्युन्दन्ति।। ऋक् १।३८।६।।
मिमीहि श्लोकमास्ये पर्जन्य इव ततनः।
गाय गायत्रमुक्थ्यम्।। ऋक् १।३८।१४।।
शुनं पर्जन्यो मधुना पयोभिः। ऋक् ४।५७।८।।

---

१. रमणीयम्। रमणीयस्य दातारं वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाचं सु मित्रावरुणाविरावतीं पर्जन्यश्चित्रां वदति त्विषीमतीम्।
अभ्रा वसत मरुतः सु मायया द्यां वर्षयतमरुणामरेपसम् ।।

ऋक् ५।६३।६।।

पर्जन्यः स्तनयन् हन्ति दुष्कृतः। ऋक् ५।८३।२।।

यस्य व्रते पृथिवी नंनमीति यस्य व्रते शफवज्जर्भुरीति ।
यस्य व्रत ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ।।

ऋक् ५।८३।५।।

पर्जन्यमूलं सूर्यमधिकृत्य स्तुतिः—

यस्मिन् विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः।
त्रयः कोशास उप सेनासो मध्यश्चोतन्त्यभिता विरप्शम् ।।

ऋक् ७।१०१।४।।

इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत्।

ऋक् ७।१०१।५।।

इति निदर्शनम्। यश्चैतस्य पर्जन्यस्य व्यवस्थाता स पर्जन्यः। अथवोपर्युक्त-धात्वर्थानुगमाद् विष्णुरेव पर्जन्यः, पर्जन्यव्याप्तिमन्तश्चान्ये। यच्चोक्तं=''**इदं वचः पर्जन्याय स्वराजे**'' इत्यत्र स्वराज्-शब्देन सूर्यः लक्ष्यते स्वेन= आत्मना राजत इति स्वराट् विष्णुर्वा स्वराट्। लोकेऽपि यथेन्द्रः सूर्यो वा भूमिं सिञ्चति तथाऽयं सशरीरो नृजीवो मेढ्रयुतेन रेतसा स्त्रीभूतां भूमिं सिञ्चति, यतो जायते सन्ततिः। स्थावरेऽपीयं प्रक्रिया यथा हलस्य भूमेर्विलेखनम्। येयं समाना प्रक्रिया स्थावरे जङ्गमे च। एवं पर्जन्याख्यस्य विष्णोः सर्वत्र व्यापकता दृश्यते, तस्मात् पर्जन्यो विष्णुः, विष्णुर्वा पर्जन्यः। पर्जन्यशब्दार्थबहुलतां व्यञ्जयितुं यथाबुद्धि धातुभेदमुपादाय लोपादेशागमांश्च विधाय पर्जन्यशब्दो व्युत्पादितः।

भवति चात्रास्माकम्—

पर्जन्यरूपो भगवान् ह विष्णुः
पर्जन्यरूपो भगवान् स सूर्यः ।
पर्जन्यरूपोदकवाहको वा
पर्जन्यनाम्ना स्तुतिमेति सर्वम्।।११३८।।

मित्रावरुणौ-अग्नि-वायु-स्तनयित्नु-आपः-इत्यादीनामन्तर्भावाय सर्वमिति पदमुपात्तम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पावनः—८११

"पूञ् पवने" क्रैय्यादिको धातुर्गतिकर्मेहायम्। वस्तुपवनकर्मणि हस्तचालन-दर्शनात्। तेन ***"चलनशब्दार्थादकर्मकाद्युच्"*** इति (पा० ३।१।१४८) सूत्रेण युच् प्रत्ययः, ल्युः, ल्युड् वा, यद्वा ***"बहुलमन्यत्रापि"*** (उ० २।७८) इत्युणादिविधानेन युच्, सर्वत्र, योरनादेशः, गुणः। पुनातीति पवनः, यः पवनः स एव पावनः। अत्यन्तस्वार्थिकोऽण् पा० ५।४।३८। ***"यस्येति च"*** (पा० ५।४।१४८) इत्यकारलोपः।

मन्त्रलिङ्गञ्च—

पुनाति धीरो भुवनानि मायया। ऋक् १।१६०।३।।

लोके चापि पश्यामः—वायुः पुनाति शोषणेन प्रवहेण वा, अग्निः पुनाति दहनेन-आपः पुनन्ति प्रवहणेन, पृथिवी पुनाति चषणेन। चषणं=भक्षणम्। 'चष भक्षणे' इति भौवादिको धातुः। एवं भगवतः पावनस्य पावनत्वरूपो गुणः सर्वत्र व्याप्तो दृश्यते। तस्मात् पावनो विष्णुरित्युक्तो भवति। मन्त्रोक्तो 'धीर' शब्दः सूर्यवाचकः।

भवति चात्रास्माकम्—

स पावनो विष्णुरमर्त्यकर्मा
पुनाति विश्वं विविधप्रभेदैः।
स एव सूर्ये स हि वास्ति वायौ
जले स्थले वा पविता स एव।।११३६।।

अनिलः—८१२

"इल स्वप्नक्षेपणयोः" इति तौदादिको धातुः, "इल प्रेरणे" इति च चौरादिकः। "क्षिप क्षेपणे" धातोर्निष्पन्नः क्षेपणशब्दोऽपि प्रेरणार्थकः। **बहुलमेतन्निदर्शन**मिति चुरादिगणसूत्रनिर्देशाद्-अनित्यण्यन्ताश्चुरादय इति स्वीकृतम्। उभयत्रापि— इगुपलक्षणः (पा० ३।१।१३५) कः, इलः प्रेरकः। नास्तीलः प्रेरको यस्य सोऽनिलः। नञ्पूर्वपदो बहुव्रीहिः। अनिलो वायुरप्येतस्मादेव स हि स्वयं स्वस्यैलक इत्यतः। यो हि सर्वस्यैलः=प्रेरको न च तस्य कश्चित् प्रेरयितेत्यतः स विष्णुरनिलः।

लोकेऽपि च पश्यामः-सूर्यादयो ग्रहाः स्वयमुदयन्ते, स्वस्थः प्राणी च स्वयमुत्तिष्ठति। अग्निः स्वयमुत्तिष्ठति। जीवात्मा चापि मृत्युकाले शरीरात्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वयमुत्तिष्ठति। एवं विष्णोरनिलत्वरूपो गुणः सर्वत्र जगति व्याप्तः। तस्मादनिलो विष्णुः।

भवति चात्रास्माकम्—

***इलो न यस्यास्त्यनिलः स्वयं स*[1]**
स वास्ति सर्वेलकविश्वविष्टः।
***स्वयं समग्रं कुरुतेऽनिलं वो*[2]**
दिनाधिपो वैलयते समग्रम्।।११४०।।

'सवः' (संख्या ७२७) नामप्रसङ्गे 'सः 'वः' इत्येवं विच्छिद्य व्याख्यातम्।

मन्त्रलिङ्गञ्च—

विष्णोः कर्माणि पश्यत यतो व्रतानि पस्पशे। इन्द्रस्य युज्य सखा। ऋक् १।२२।१९; अथर्व ७।२६।६; यजुः ६।४; १३।३३।।

विष्णोर्नु कं वीर्याणि। ऋक् १।१५४।१।।

विष्णुं स्तोमासः पुरुदस्मम्। ऋक् ३।५४।१४।।

इति निदर्शनम्।

अमृताशः—८१३

मृत शब्दो "मृङ् प्राणत्यागे" धातोः ***"ततिमृङ्भ्यां किच्च"*** (उ० ३।८८) इत्युणादिसूत्रेण किद्वद्भावभाविते तनि प्रत्यये सिध्यति।

मृत इति मृत्युवाचकः शब्दः। न विद्यते मृत्युर्यस्मादित्यमृतं तदश्नात्याशयति वा "अमृताशः"। आशशब्दश्च—"अश भोजने" धातोर्णिचि, तदन्तात् पचाद्यचि च सिध्यति। अमृतस्याशोऽमृताशः। अमृतं = जलं, घृतञ्चापि, तदश्नातीति कृत्वा अमृताशः सूर्योऽग्निश्च। यद्वा प्रवाहतो नित्यस्थानीदं चतुर्विधभेदविभक्तं यथातदर्हजीवनसाधनान्याशयति=भोजयतीति अमृताशो विष्णुः।

मन्त्रलिङ्गञ्च—

यो न जीवोऽसि न मृतो देवानाममृतगर्भोऽसि।
वरुणानी माता यमः पिता ररुर्नामासि।। अथर्व ४।४६।१।।

आशो हि गृहीतो भवत्यतो भवत्यमृतगर्भेण समानः। तथा च—

स्तोता वो अमृतः स्यात्। ऋक् १।३८।४।।

---

१. सः=विष्णुः। २. वः=विष्णुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते। यजुः ४० ।१४ ।।

इति निदर्शनमात्रम्।

भवति चात्रास्माकम्—

स वामृताशो भगवान् वरेण्यः
सूर्योऽमृताशो जलमापिपासुः ।
अग्निर्घृताशः पवनो घृताश[1]-
स्तथामृताशीह जगच्च सर्वम् ।।११४१।।

अमृतवपुः—८१४

अमृतशब्दो व्युत्पादितोऽ**मृताश** (संख्या ८१३) नामव्याख्याने। वपुः शब्दश्चापि **''अनिर्देश्यवपु''** (संख्या ६५६) नामव्याख्याने व्याख्यातः।

उप्यते यस्मिन् वपुः। अमृतं वपुर्यस्य सोऽमृतवपुर्विष्णुः। वपनं बीजसन्तानश्छेदनञ्च। यद्वा—उप्यते, छिद्यते च येन तद्वपुः—बीजसन्तानसाधनं, छेदनसाधनञ्च शरीरमित्यर्थः। यद्वा न म्रियते, वपति, च्छिनत्ति चेत्यमृतवपुः।

मन्त्रलिङ्गञ्च—

सनादसि। ऋक् १।१०२।८।।

यथा भगवान् प्रवाहनित्यमिदं विश्वं वपति सन्तनोति तथा सर्वमन्तकाले च्छिनत्यपि। भगवद्वितितनिषाया अनुकारी जीवोऽपि स्वेच्छयात्मानं वितितंसुः स्वसमानजातीययोनौ बीजं वपति। तथा चाथर्ववेदवचनं—

यस्यां बीजं मनुष्या वपन्ति। अथर्व १४।२।३८।।

स्वसमानजातीययोनौ बीजरूपमात्मानं वपन्तीत्यर्थः। नहि विजातीययोनावुप्तं बीजं विस्तारमाप्नोति। यथा—अश्वतरः (खच्चरः) नहि सन्तानाय कल्पते। एवञ्चामृतः=अविनाशी भगवान् विस्तारधर्माऽमृतवपुरित्युच्यते। नक्षत्राणि च न क्षीयन्त इति नाम व्युत्पत्त्यैवामृतवपूंषि उक्तानि भवन्ति। लोकोऽयं ब्रह्मणः कामः **''कामस्तदग्रे समवर्तताधिः''** (ऋक् १०।१२६।४) **कामपाल** इति नाम (संख्या ६५२) व्याख्याने विशदं व्याख्यातमेतत्। लोकेऽपि च पश्यामः सूर्यादयो ग्रहाः सर्गारम्भादद्य यावत् तममृतवपुषं विष्णुं व्याचक्षाणाः स्वयममृतवपुष आयान्ति। मन्त्रलिङ्गञ्च—

---

१. घृतं जलं। तच्च पवनोऽश्नाति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाक्षस्तप्यते भूरिभारः। ऋक् १।१६४।१३।।

सनादसि च। ऋक् १।१०२।८।।

इति सूर्यपक्षे मन्त्रलिङ्गम्। तथा च—

य ईशिरे भुवनस्य प्रचेतसः। ऋक् १०।६३।८।।

इति मन्त्रो विशदं व्याख्यातः। ते च सर्वे भुवनस्येशा अमृतवपुष एव। इति योजनाक्रमो दिङ्मात्रं प्रदर्शितः।

भवति चात्रास्माकम्—

लोकेऽस्त्ति वन्द्योऽमृतवर्ष्म विष्णु-
र्वन्द्याश्च सर्वेऽमृतवर्ष्मवित्ताः ।
सनातनः सूर्य इह प्रसिद्धः
वपुश्च विष्णोरिदमस्ति विश्वम्।।११४२।।

मन्त्रलिङ्गानि च—

यस्य भूमिः प्रमा अन्तरिक्षमथोदरम्।
दिवं यश्चक्रे मूर्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः।। अथर्व १०।७।३२।।

इत्यादीनि **ज्येष्ठ** (संख्या) नामव्याख्याप्रसङ्गे द्रष्टव्यानि।

सर्वज्ञः—८१५

सर्वशब्दो वन् प्रत्ययान्तः ***''सर्वघृष्व''*** (उ० १।१५३) इत्याद्युणादि सूत्रे निपातितः। **सर्व** इति (संख्या २५) स्वतन्त्रनामव्याख्याप्रसङ्गे द्रष्टव्यम्। सर्वरूपकर्मोपपदाद् ''ज्ञा अवबोधने'' धातोः क्रैय्यादिकाद् ***''आतोऽनुपसर्गे कः''*** इति (पा० ३।२।३) सूत्रेण कः प्रत्ययस्तस्मिंश्च परतो धातोराकारलोपः। सर्वं जानातीति सर्वज्ञः। मन्त्रलिङ्गञ्च—

विश्वानि देव वयुनानि विद्वान्। ऋक् ५।८२।५; यजुः ३०।३।।

विद्वान्—इत्यस्य जानाति, जानासीति वार्थः।

मन्द्रो विश्वानि काव्यानि विद्वान्। ऋक् ३।१।१७।।

अग्निर्विश्वानि काव्यानि विद्वान्। ऋक् ३।१।१८।।

'तथा—

एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि।
निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ।।
ऋक्० ४।३।१६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति दिङ्निदर्शनम्।

लोकेऽपि च पश्यामः—सर्वं ज्ञानेन्द्रियैर्विज्ञाय मनसि च निचित्य वर्तमानो मनुष्यः सर्वज्ञ इत्युक्तो भवति। मन्त्रलिङ्गञ्च—

येनेदं भूतं भुवनं भविष्यत् परिगृहीतममृतेन सर्वम्।
येन यज्ञस्तायते सप्तहोता तन्मे मनः शिवसंकल्पमस्तु।।
यस्मिन्नृचः साम यजूꣳषि यस्मिन् प्रतिष्ठिता रथानाभाविवाराः।
यस्मिंश्चित्तꣳसर्वमोतं प्रजानां तन्मे मनः शिवसंकल्पमस्तु।।

यजुः ३४।४, ५।।

भूतभवद्भविष्यादीनां ज्ञानञ्च ग्रहगणितेन भवति, ग्रहाणाममृतत्वात्—सदागतिशीलत्वाच्च सर्वदा सद्भावः। गतिश्च गणितसाध्या। दशवार्षिकाणि शतवार्षिकाणि वा पञ्चाङ्गानि लोकोपकाराय गणितकोविदैर्निर्मीयन्ते। इति दिग्दर्शनम्।

शाकुनमपि ज्ञानं भविष्यदावेदकम्।

तथा च ऋङ्मन्त्रः—

आवदंस्त्वं शकुने भद्रमावद। ऋक् २।४३।३।। इति।

शकुनिनिमित्तकं ज्ञानं, शकुनिसम्बन्धि वा ज्ञानं तत् प्रकाशञ्च शास्त्रं शाकुनं शास्त्रमुच्यते। गुरुनाम (संख्या २०६) प्रसंगे विशदं व्यख्यातं तत्र द्रष्टव्यम्।

यद्वा **सर्वलक्षणलक्षण्य**नामव्याख्याने द्रष्टव्यम्।

भवति चात्रास्माकम्—

विष्णुर्हि सर्वज्ञ इहास्ति गीतो
विश्वस्य सर्वाणि [1]वनानि यानि।
तस्मिन् ह तिष्ठन्ति चलाचलानि
सर्वज्ञभावाय च कल्पते ना ।।११४३।।

सर्वतोमुखः—८१६

सर्वत इति, सर्वशब्दाद्, ***''आद्यादिभ्य उपसंख्यानम्''*** इति (पा० ५।५।४४)

१. वनानि=विभागाः, दिनं—निशा—मासो—वर्षमित्यादयः। तेषां सर्वेषां ग्रहैरेव विभागः। तस्माज्ज्योतींषि वनानि। नक्षत्राणि वनानि, तानि राशिं विभजन्ति। ज्ञानानि वनानि, इदमिदं वेति तानि विभजन्ति। एवं सर्वत्रोह्यम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूत्रस्थवार्तिकेन सार्वविभक्तिकस्तसिः प्रत्ययः।

मुखम्—"खनु विदारणे" धातोः ***"डस खनेर्मुट् चोदात्तः"*** (उ० ५।२०) इत्युणादि सूत्रेण डस् प्रत्ययो मुट् चागमो धातोः। अननुनासिकत्वादुकारो नेत्, ट् इत्, टिलोपः। खन्यत इति मुखं, कर्म। सर्वतो मुखं यस्य स सर्वतोमुखः।

मन्त्रलिङ्गञ्च—

उत विश्वतो मुखः।

ऋक् १०।८१।३।। अथर्व १३।२।२६।। यजुः १७।१६।।

दृश्यते च तस्य विष्णोर्विश्वतः खातं शरीरम्। सुरवातं मुखञ्च तत्र दृश्यते शरीरे, यथावश्यम्भावं भिन्नं-भिन्नं—सुखातं तत्र भवति। मनुष्योऽपि सर्वतः खातं रथमिच्छति, रथं=रमणीयम्।

भवतश्चात्रास्माकम्—

सर्वतो हि मुखं तस्य व्याप्तं द्यौरिह दृश्यते ।
तत्र यान्ति खगाः सर्वे मुखे जिह्वा चला यथा ।।११४४।।
गृहीतञ्च जगत्तेन, मुखे दन्तग्रहा यथा ।
न चलन्ति यथा स्थानाच्चलन्ति च यथेहितताः ।।११४५।।

चलाचलस्वभावा दन्ता ग्रहा इव, मुखञ्च—आकाशमिव। द्यवि सूर्यः। मुखे वागग्निदैवतका। लोकोऽप्येवं सङ्गच्छते, व्याप्तिमत्त्वञ्च विष्णोर्ज्ञापयति। **"तं वो जम्भे दध्मः"**। (अथर्व ३।२७।१-६) इत्यादि मन्त्रोक्तञ्च सङ्गच्छते।

❖ ❖ ❖

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः।
न्यग्रोधोदु[१]म्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः।।१०१।।

८१७ सुलभः, ८१८ सुव्रतः, ८१९ सिद्धः, ८२० शत्रुजित्, ८२१ शत्रुतापनः। ८२२ न्यग्रोधः, ८२३ उदुम्बरः, ८२४ अश्वत्थः, ८२५ चाणूरान्ध्रनिषूदनः।

सुलभः—८१७

सु—उपसर्गः सुखार्थे सौकर्यार्थे वा। सुखेन, सौकर्येण वा लभ्यः सुलभः।

१. 'न्यग्रोधः उदुम्बरे'=न्यग्रोधोदुम्बरः सन्धिरार्षः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत्र *''लभेश्च''* (पा० ७।१।६४) इति नुमः प्राप्तिः *''न सुदुर्भ्यां केवलाभ्याम्''* (पा० ७।१।६८) इत्यनेन सूत्रेण निवार्यते।

मन्त्रलिङ्गञ्च—

यस्य द्यावापृथिवी पौंस्यं महद् यस्य व्रते वरुणो यस्य सूर्यः।
यस्येन्द्रस्य सिन्धवः सश्चति व्रतं मरुत्वन्तं सख्याय हवामहे।।

ऋक्० १।१०१।३।।

तथा—

यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो गा अविन्दत्।
इन्द्रो यो दस्यूंरधराँ अवातिरन् मरुत्वन्तं सख्याय हवामहे ।।

ऋक् १।१०१।५।।

इत्येतादृगुक्त इन्द्रः सुलभो भवति तदन्वेषकस्य, यथा कश्चिदप्रत्यक्षस्तत्पादचिह्नानुवर्तिनः सुलभः इति। एवं भगवान् विष्णुरपि स्वानुवर्तिनः सत्त्वनिष्ठस्य सुलभः=सुप्राप इति सुलभनाम्ना सङ्कीर्त्यते। सुलभशब्दो वेदेषु नोपलभ्यते। तथा च—

न यस्य देवा देवता न मर्ता आपश्चन शवसो अन्तमापुः ।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विन्द्र ऊती।।

ऋक् १।१००।१५।।

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः ।
यस्तन्न वेद किमृचा करिष्यति य इत् तद्विदुस्त इमे समासते।।

ऋक् १।१६४।३६।।

''अग्निम्=ईश्वरं भौतिकं वाग्निम्। पुरोहितं=पुरः स्थितः पुरः पोषयितारं धारयितारं वा—इत्यादि सुलभो विष्णुरग्निर्वा।

तथा—

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ।।

ऋक् १।१८९।१।।

अत्राग्निरीश्वरः, स हि हृदयस्थो मनुष्यं सद्बुद्धिदानेन सुपथा नयति अथवा भौतिकोऽग्निः सूर्यो वाऽत्राग्निशब्देनोच्यते, तथा हि स उपास्यमानः स्वदीप्त्या—उपासकस्य दुरितं निरस्य सुपथि गन्तुमर्हं तं करोति। इति दिङ्मात्रदर्शनं नः प्रयोजनम्, महार्थस्य वेदस्यान्तः प्रवेशस्तु सर्वथा सुविज्ञस्यापि न सुकरः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

विष्णुर्हि लोके सुलभः पुराणः
सूर्योदयो वा सुलभाः सनाथे ।
पुरोहितोऽग्निः सुलभश्च लोके
प्रार्थ्योऽस्ति मन्ये सुलभः स एकः ।।११४६।।

तथा च—मन्त्रलिङ्गम् प्रार्थनीयत्वे—

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय।
दिव्यो गन्धर्वः केतपूः केतं नः पुनातु वाचस्पतिर्वाचं नः स्वदतु।।

यजुः ९।१; ११।७; ३०।१।।

तथा कोऽयं सविता देवः, इत्यत्र मन्त्रलिङ्गम्—

देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान।
इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम् ।।

ऋक् ३।५५।१९।।

सुव्रतः—८१८

सु उपसर्गः ''व्रतिः'' सौत्रो धातुस्ततः पचाद्यच् प्रत्ययः। सुव्रतति नियमयतीति सुव्रतः। यद्वा ***''भयादीनामुपसंख्यानम्''*** (वा० ३।३।५६) इति वार्तिकेनाच् प्रत्ययो भावे, तथा व्रतनं=व्रतं नियमः, शोभनं व्रतं=जगद्व्यवस्थापनरूपो नियमो यस्य स सुव्रतः।

मन्त्रलिङ्गञ्च—

यस्य व्रते पृथिवी नन्नमीति यस्य व्रते शफवज्जर्भुरीति ।
यस्य व्रते ओषधीर्विश्वरूपाः स नः पर्जन्य महि शर्म यच्छ।।

ऋक् ५।८३।५।।

पर्जन्यशब्दो विष्णुसहस्रनामसंग्रहे पूर्वं (संख्या ८१०) व्याख्यातः।

भवति चात्रास्माकम्—

स सुव्रतो विष्णुरमोघशक्ति-
र्नियच्छतीदं सकलं व्रतेन ।
यद्भीषया चापि सदागतिर्वा
सूर्यो वशीवोदयमेत्यजस्रम् ।।११४७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्यमहिमा च—

त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः ।
विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान्।।

ऋक् १।५२।१३।।

भीषा च तस्य ब्रह्मणः—

त्वद्भियेन्द्र पार्थिवानि विश्वाच्युता चिच्च्यावयन्ते रजांसि ।
द्यावाक्षामा पर्वतासो वनानि विश्वं दृढं भयते अज्मन्ना ते।।

ऋक् ६।३१।२।।

वेदे भी धातोः प्रयोगः विविधनामविभक्त्यन्त आयाति।

सिद्धः—८१६

षिधु संराद्धौ दैवादिको धातुस्ततः षकारस्य सत्वे कर्तरि क्तः अनिट्। धत्वजश्त्वे सिद्ध इति। **सिद्धार्थ** (संख्या २५२) नामव्याख्याने विशदमुक्तम्। श्रमक्लमतन्द्राभिर्वर्जितो यत्नानपेक्षसिद्धिश्च सिद्धः। यद्वा सर्वतो भाविनी शाश्वती सिद्धिरस्यास्तीति सिद्धः, मत्वर्थीयोऽच्। सिद्धो विष्णुः सूर्यो वा।

मन्त्रलिङ्गञ्च—

न मा तमन्न श्रमन्नोत तन्द्रन्न वोचाम मा सुनोतेति सोमम् ।
यो मे पृणाद् यो ददत् यो निबोधाद् यो मा सुन्वन्तमुपगोभिरायत्।।

ऋक् २।३०।७।।

भगवत्कृतं च विश्वं सिद्धमिति सिद्धत्वरूपेण गुणेन भगवान् सर्वत्र व्याप्तः। भवति चात्रास्माकम्—

सिद्धः स विष्णुः कुरुते च सिद्धं
विश्वं सुपूर्णं नियमानुबद्धम्।
यथोप्तबीजा पृथिवी तथैव
बीजोपजीव्यानि [१]समाप्तुमीर्ते।।११४८।।

शत्रुजित्—८२०

शत्रुः—"शद्लृ विशरणगत्यवसादनेषु भौवादिको धातुः, ततो हेतुमण्णिच्,

१. समाप्तुमीर्ते=सम्यग्—एकीभावेन वा—आप्तुं प्रयतते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

णिचि च गतिभिन्नेऽर्थे ***''शदेरगतौ तः''*** (पा० ७।३।४२) इति सूत्रेण धातोरन्तादेशस्तकारः उपधावृद्धिः शाति, ततो ***''रुशातिभ्यां क्रुन्''*** (उ० ४।१०३) इत्युणादिसूत्रेण क्रुन् प्रत्ययः ***''नेड्वशि०''*** (पा० ७।२।८) इतीण्णिषेधः, ***''णेरनिटि''*** (पा० ६।४।५१) इति णिलोपः प्रज्ञादिह्रस्वपाठाद् ह्रस्वश्च। शातयतीति शत्रुः। शातयति=शृणात्यवसादयति वा। गत्यर्थे तु णिचि शादयति इत्येव रूपम्। गत्यर्थे क्रुन्नपि न, शातीति तकारान्तग्रहणात्। शत्रुं जयतीति शत्रुजित्, क्विप्, तस्य च सर्वापहारः, ततः, ***''ह्रस्वस्य पिति कृति तुक्''*** (पा० ६।१।७१) इति तुक्।

मन्त्रलिङ्गञ्च—

नि रिणाति शत्रून्। ऋक् १०।१२०।१।।

वावृधानः शवसा भूर्योजाः शत्रुर्दासाय भियसं दधाति।

ऋक् १०।१२०।२।।

तथा

त्वया वयं शाशद्महे रणेषु प्रपश्यन्तो युधेन्यानि भूरि ।
चोदयामि त आयुधा वचोभिः सं ते शिशामि ब्रह्मणा वयांसि।

ऋक् १०।१२०।५।।

आमातरा स्थावयसे जिगत्नू अत इनोषि कर्करा पुरूणि।

ऋक् १०।१२०।७।।

एवञ्च भगवान् सर्वत्र व्यष्टः शत्रुजिदित्युक्तो भवति।

एवं लोकं दृष्ट्वा सर्वत्रोह्यम्।

भवतश्चात्रास्माकम्—

स शत्रुजिद् विष्णुरनेकरूपो
निहन्ति वृत्रं स च मेघ उक्तः।
विघ्नापहारं स ददाति शृङ्गं
गोभ्यो नखान् वा स नखिभ्य ईशः।।११४६।।

एवं हि यः शत्रुजितं महान्तं
जानाति सर्वत्र गतञ्च विष्णुम्।
स एव विघ्नान् परिहृत्य शेते
यथानृणी याति च गाढनिद्राम्।।११५०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शत्रुतापनः—८२१

शत्रुरुक्तः। तापनः—"तप सन्तापे" भौवादिको धातुस्ततो हेतुमण्णिजन्ताल्ल्युल्र्युड् वा, योरनः, णिलोपः। शत्रून्, तापयतीति शत्रुतापनः। यद्यपि न तस्य कश्चिच्छत्रुर्भगवतः सर्वशक्तिसमन्वितस्य, तथापि ये सर्वसुहृदः साधून् द्विषन्ति त एव शत्रवस्तांश्च यः स्वप्रदत्तशक्तिभिर्महापुरुषैस्तापयतीति शत्रुतापनः।

मन्त्रलिङ्गञ्च—

द्विषस्तापयन् हृदः शत्रूणां तापयन् मनः ।
दुर्हार्दः सर्वास्त्वं दर्भ घर्म इवाभीन्त्सं तापयन्।। अथर्व १६।२८।२।।

भवति चात्रास्माकम्—

शत्रुतापन उक्तोऽसौ, विष्णुदर्भः सना [१]शुचिः ।
दर्भः सूर्यगुणो यस्माद् घर्मे दर्भो हि हृष्यति ।।११५१।।

मन्त्रलिङ्गञ्च—

शरासः कुशरासो दर्भासः सैर्या उत ।
मौञ्जा अदृष्टा बैरिणाः सर्वे साकं न्यलिप्सत।। ऋक् १।१९१।३।।

न्यग्रोधः—८२२

"अञ्चु गतिपूजनयोः" इति भौवादिको धातुर्निपूर्वः। ***"ऋत्विग्दधृक्स्त्रक्"*** (पा० ३।२।५०) इत्यादिसूत्रेण क्विन् प्रत्ययः, ***"क्विन् प्रत्ययस्य कुः"*** (पा० ८।२।६२) इति सूत्रेण कुत्वं चकारस्य ककारः। ***"झलां जशोऽन्ते"*** (पा० ८।२।३) सूत्रेण जश्त्वम्। नीचैरञ्चतीति न्यक्। रोध इति—"रुधिर् आवरणे" धातोः कर्मणि घञ्। न्यग्भी रुध्यत इति न्यग्रोधः। यद्वा न्यग्रुणद्धीति न्यग्रोधः, पचाद्यच्। न्यग्रोधो विष्णुः सूर्यश्च। सर्वं विश्वं यथास्थानं व्यवस्थापयितुं स सर्वस्य नीचैरुच्चैर्वा गमनं रुणद्धि। नीचैरित्युपलक्षणं, तेन स्वस्थानतश्च्यवनं लक्ष्यते। लोके चापि पश्यामः-शरीरे यदङ्गं यत्र स्थापितं तत्तत्रैव तिष्ठेदिति तस्य स्नायुभी रोधो विहितः, बद्धमित्यर्थः। यद्वा न्यग्भिरनुरुध्यते=प्रार्थ्यते ईप्सिताप्तय इति न्यग्रोधः। एवञ्च लोकशरीरयोः समाना स्थितिः। शरीरेण लोकस्य ज्ञानं, लोकेन च शरीरस्य ज्ञानं भवति।

१. सूर्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

वि यत् तिरो धरुणमच्युतं रजोऽतिष्ठिपो दिव आतासु बर्हणा।
स्वमीडे यन्मद इन्द्र हर्ष्याहन् वृत्रं निरपामौब्जो अर्णवम् ॥

ऋक् १।५६।५॥

तुर्वणिरिति सूर्यस्य नाम **"यो धृष्णुना शवसा बाधते तमः"** इति (ऋक् १।५६।४) मन्त्रे तथा वर्णनात्।

अच्युत इत्यत्र मन्त्रलिङ्गम्—

इदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं विश्वजिद्धनजिदुच्यते बृहत् ।
विश्वभ्राड् भ्राजो महि सूर्यो दृश उरु पप्रथे सह ओजो अच्युतम्॥

ऋक् १०।१७०।३॥

तथा—

अच्युतम्। ऋक् ६।१५।१॥

अच्युतशब्दो वेदे विविधविभक्तिवचनान्तः प्रयुक्तः।

भवति चात्रास्माकम्—

न्यग्रोधनामा भगवान् ह विष्णु-
र्यथा स्थितं विश्वमिदं बिभर्ति ।
सूर्यो धृतस्तेन रुणद्धि विश्वं
न्यग्रोधवृक्षोऽपि रुणद्धि शाखाम्॥११५२॥

यद्वा—न्यग्रोहतीति 'रुह' धातोः पचाद्यच् ***"न्यग्रोधस्य च केवलस्य"*** (पा० ७।३।५) इत्यत्र निपातनात्, पृषोदरादिलक्षणो वा हस्य धकारः। न्यग्रोधाख्यस्य वृक्षस्य जटानां नीचैः प्रसारमवलोक्यैवमुच्यते।

शरीरं चापि **"ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्"** (गीता १५।१) इति वचनान्न्यग्रोध इव अधःशाखमुच्यते।

भवति चात्रास्माकम्—

न्यग्रोधवृक्षो बहुमूल एष
चिरं हि तिष्ठन्न्यग्रोहतीति ।
सन्दृश्यतेऽस्मान्न्यग्रोधमेनं
रुधेः समानं न्यग्रोधमाहुः ॥११५३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उदुम्बरः—८२३

उदुपसर्गः, "अबि शब्दे" भौवादिको धातुरिदित्त्वान्नुम्। अनुस्वारपरसवर्णौ। ***"ऋच्छेररः"*** इत्यौणादिक (३।१३१) सूत्रे ***"बहुलमन्यत्रापीति"*** वचनादम्बेरप्यरः प्रत्ययः क्रियते। उत्पूर्वो बहुव्रीहिः। उदम्बर इत्यत्र पृषोदरादित्वादकारस्योकारे-उदुम्बर इति। उद्गतोऽम्बरमित्युदम्बरः सूर्यः। यद्वा—उच्चैः सर्वत उत्तमो वेदरूपः शब्दो यस्य स उदुम्बरः सर्वेश्वरो विष्णुः।

यद्वा-उत् सर्वत उत्कृष्टत्वेन अम्ब्यते=शब्द्यते=संकीर्त्यत इति उदुम्बरः। **"यादृगेव ददृशे तादृगुच्यते"** (ऋक् ५।४४।६) इति वैदिकनियमादम्बरं गतो दृष्टः सूर्योऽन्वर्थनामा उदुम्बर इति। अन्तरिक्षस्य दिवो वा पर्यायोऽम्बरशब्दः, शब्दस्य तत्र सद्भावात्। भावार्थप्रधानं मन्त्रलिङ्गम्—

उदसौ सूर्यो अगादुदिदं मामकं वचः।
यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा।। अथर्व १।२९।५।।

उदुम्बरो वृक्षोऽप्युद्गतोऽम्बरमुत्कृष्टत्वादुच्चैस्त्वाद् वा। पुष्पोद्गमादृते चायं वृक्षः फलितो भवत्यतोऽन्तःपुष्पोऽयमिति। काश्चन स्त्रियोऽप्यन्तःपुष्पा भवन्ति, विचित्रभोगायतनत्वाच्छरीरस्य। लोकोऽप्ययं विचित्रभोगायतनः। एवञ्चात्र सङ्गतिः—

यथा वानस्पत्यं पुष्पं फलोद्गते बोधकं, तथोषाः सूर्योद्गमस्य ज्ञापिका पुष्पवत्। मन्त्रलिङ्गञ्च—

यदुषो यासि भानुना सं सूर्येण रोचते। अथर्व २०।१४२।३।।

भवति चात्रास्माकम्—

उदुम्बरो विष्णुरुदेति नित्यं
लोकस्य दृश्योऽस्ति न संशयोऽतः।
उषाः प्रसूनेन समास्ति तस्य
लोके च पुष्पाणि फलान्यतः स्युः ।।११५४।।

मन्त्रलिङ्गञ्च—

महान् वै भद्रो बिल्वो महान् भद्र उदुम्बरः।
महां अभिक्त बाधते महतः साधु खोदनम्।। अथर्व २०।१३६।१५।।

वृक्षोऽप्युदुम्बर एतस्मादेव यज्ञिय उक्तो भवति। विष्णुसहस्रनाम्नः श्लोके च विसर्गलुप्तेऽपि सन्धिरार्षः 'न्यग्रोधोदुम्बर' इत्यत्र।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अश्वत्थः—८२४

'अशू व्याप्तौ' इति सौवादिकाद्धातोः ***''अशूप्रुषिप्लुषिलटिकटिकणिखटिविशिभ्यः क्वन्''*** (द्र० उ० १।१५१) इत्युणादिसूत्रेण क्वनि प्रत्यये अश्वशब्दः सिध्यति। विशेष्यनिघ्नश्चायमश्वशब्दो व्यापनार्थकः। अश्वनामक पशुवाचकस्तुरङ्गमपर्यायोऽश्वशब्दः पुँल्लिङ्गः, तथाश्वशब्दस्याजादिषु पाठात् स्त्रीत्वविवक्षायामश्वेति। अश्नुवते=व्याप्नुवन्ति विश्वमित्यश्वानि=पञ्चभूतानि, तेषु व्यापकत्वेन स्थितोऽश्वत्थः। सप्तम्यन्ताश्वशब्दोपपदाद् गतिनिवृत्त्यर्थकात् 'ष्ठा' धातोः ***''सुपि स्थः''*** (पा० ३।२।४) इति सूत्रेण के प्रत्यये धातोश्च किन्निमित्तक आकारलोपे पृषोदरादित्वात् सकारस्य तकाररूपवर्णविपर्यये चाश्वत्थशब्दः सिध्यति। अर्थप्रधानं मन्त्रलिङ्गञ्च—

समस्य हरिं हरयो मृजन्त्यश्वहयैरनिशितं नमोभिः।
आतिष्ठति रथमिन्द्रस्य सखा विद्वाँ एना सुमतिं यात्यच्छ।।

ऋक् ६।६६।२।।

आ सोमो वस्त्रा रभसानि दत्ते। ऋक् ६।६६।१।।

सोम इति पूर्वतोऽनुवर्तते, कीदृशः स सोम इति तत्स्वरूपं मन्त्र एव एवमुपलभ्यते। तथा हि—

सोमः पवते जनिता मतीनां जनिता दिवो जनिता पृथिव्याः।
जनिताग्नेर्जनिता सूर्यस्य जनितेन्द्रस्य जनितोत विष्णोः ।।

ऋक् ६।६६।५।।

उचथ्ये वपुषि यः स्वराडुत वायो घृतस्नाः।
अश्वेषितं रजेषितं शुनेषितं प्राज्म तदिदं नु तत्।। ऋक् ८।४६।२८।।

अश्वत्थनाम्नि मन्त्रलिङ्गम्—

यमश्वत्थमुपतिष्ठन्त जायवः। ऋक् १।१३५।८।।

अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता।
गोभाज इत्किलासथ यत् सनवथ पूरुषम्।। ऋक् १०।६७।५।।

अश्वत्थशब्दस्य वृक्षवाच्यत्वे मन्त्रलिङ्गम्—

भद्रात् प्लक्षान्निस्तिष्ठस्यश्वत्थात् खदिराद्धवात्।
भद्रान्न्यग्रोधात् पर्णात् सा न एह्यरुन्धति ।। अथर्व ५।५।५।।

तथा—

प्रैणान् वृक्षस्य शाखयाश्वत्थस्य नुदामहे। अथर्व ३।६।८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अश्वशब्दस्याश्नुतेऽध्वानमिति पशुविशेषवाच्यत्वे मन्त्रलिङ्गम्—

वृषो अग्निः समिध्यतेऽश्वो न देववाहनः। तं हविष्मन्त ईडते।

ऋक् ३।२७।१४।।

इति निदर्शनम्।

यद्वा—अश्नुत इत्यट्, तमशं वाति=गच्छति प्राप्नोति वेत्यश्वः। अश्रूपे कर्मण्युपपदे गत्यर्थकाद् वाधातोः *"आतोऽनुपसर्गे कः"* (पा० ३।२।३) इति सूत्रेण के प्रत्यये तथा आलोपे चाश्वः शब्दः सिध्यति। स चाश्वो लोकस्तस्मिन् तं व्याप्य तिष्ठतीत्यश्वत्थः। अयं हि लोकोऽन्ते विष्णुमेव गच्छति, तस्मिन् समाविशतीत्यर्थः।

यद्वा—अट्=व्यापको विष्णुस्तं वसते=आच्छादयति, सर्वस्याधारभूतत्वादित्यश्वांसि=भूतानि, तेषु तिष्ठतीत्यश्वत्थः, पृषोदरादिलक्षणो वर्णविपर्ययः।

यद्वा—श्वसित्यव्ययमनागताहःकालाभिधाय्यपीह केवलं सामान्यतः कालं लक्षयति एवञ्च। श्वः=काले तिष्ठतीति श्वत्थः सर्वभूतसमुदायः, पृषोदरादिलक्षणो वर्णविपर्ययः सकारस्य तकारः। न श्वत्थोऽश्वत्थः, कालबहिर्भूतो भगवान् विष्णुः। अत एव स सनातनाभिधानः। तथा च कठोपनिषदि—**"ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः"** (क० उप० २।३।१)।

प्रकृतिरपि सर्वस्य स्वविकारजातस्य व्यापिकातोऽश्वरूपेषु विकारेषु, अर्थात् प्रावाहिकनित्येषु तिष्ठतीति कृत्वाश्वत्थशब्दाभिधेया भवति। प्रकृतेरश्वत्थशब्द वाच्यत्वे मन्त्रलिङ्गम्—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।।

ऋक् १।१६४।२०।।

इनो विश्वस्य भुवनस्य·····। स नो धीरः पाकमत्राविवेश।

ऋक् १।१६४।२१।।

तथा—

यस्मिन् वृक्षे मध्वदः सुपर्णा निविशनो सुवते चाधिविश्वे।
तस्येदाहुः पिप्पलं स्वाद्वग्ने तन्नो नशधः पितरं न वेद ।।

ऋक् १।१६४।२२।।

दृश्यते च लोकेऽपि पुरुषः श्वत्थोऽप्यश्वत्थप्रतिनिधिभूतोऽश्वत्थरूपया प्रकृत्या संयुज्य श्वःस्थायिकार्यजातं प्रवाहतोऽश्वत्थरूपं विधत्ते। तथा च प्रत्येकं जीवः प्रकृतिरूपया स्त्रिया संयोगमेत्य श्वत्थानेव प्रवाहतोऽश्वत्थान् जातकान्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनयति, अर्थात् ते कालचक्रे बम्भ्रम्यमाणा उत्पादविनाशशालिनो भवन्ति। एवमियं सृष्टिरप्युत्पत्तिविनाशशीलेति शृणुमः। तथा च—**''कालोऽश्वो वहति सप्तरश्मिः''** (अथर्व० १९।५३।१) इत्यथर्ववचनात्। अश्वरूपं सप्तनामा कालः सर्वं वहतीत्यर्थः। अत एवाश्वस्य **सप्तिः**रिति नाम। मूलतः सर्वोऽयं दृश्यवर्गः काले तिष्ठति, कालबहिर्भूतस्तु भगवान् विष्णुरेक एवातोऽयमश्वत्थ इत्युच्यते।

भवतश्चात्रास्माकम्—

अश्वत्थमाहुः कवयो ह विष्णु-
मश्वत्थमाहुः सुधियो हि सूर्यम् ।
अश्वत्थमाहुः सुनिरूढमूलं
वृक्षं तथा तां प्रकृतिं सुपर्णाम् ।।११५५।।
अश्वत्थमेनं विविधप्रकारं
विद्वान् हि यो वेत्ति विमुक्तशङ्कः।
स एव तं विष्णुमथापि सूर्यं
वृक्षं त्वजां पश्यति सर्वयाताम् ।।११५६।।

चाणूरान्ध्रनिषूदनः—८२५

''चण शण श्रण दाने च'' इति भ्वादिगणपठितश्चण धातुर्दाने चाद् गतौ च। तस्मात् प्राकृतेऽर्थे ***''निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यते''*** इति वैयाकरणसमयानुसारं हेतुमण्णिज् विहितस्तथा चोपधावृद्धौ 'चाणि' धातुस्ततः ***''खर्जिपिञ्जादिभ्य ऊरोलचौ''*** (उ० ४।९५) इत्युणादिसूत्रेण खर्जिपिञ्जादेराकृतिगणत्वादूरः प्रत्ययो णिचो लोपः 'चाणूरः'।

यद्वा—शुद्धाच्चणेरेवोरश्चणूर इति चणूर एव च चाणूरः स्वार्थिकोऽण्।

यद्वा—चणतेरूरो बाहुलकाद् वृद्धिः चाणूरः। यद्वा चणूरशब्दस्थाने शिष्टैश्चाणूर इति प्रयुक्तः। अतएव ज्ञापकाद् ***''अन्येषामपि दृश्यते''*** (पा० ६।३।१३७) इति सूत्रेण नारकः पूरुषः इव दीर्घः। चणन्ति=ददति दानशीला सात्त्विकवृत्तयश्चाणूराः।

यद्वा—''चायृ पूजानिशामनयोः'' इति धातोर्बाहुलकादौणादिक ऊरः प्रत्ययः पृषोदरादिलक्षणो वर्णविपर्ययो यकारस्य णकारः शिष्टैः प्रयुक्तत्वात्तदनुसारिसाधनप्रयत्नः। चाय्यन्ते=पूज्यन्ते इति चाणूराः, प्रशस्तहृदयाः साधवः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्ध्र इति—'अन्ध दृष्ट्युपघाते" चौरादिको धातुस्ततः ***"ऋज्रेन्द्राग्रवज्र"*** (उ० २।२८) इत्युणादिसूत्रेण बाहुलकाद् रन् प्रत्ययः अतो लोपो णेर्लोपश्च—अन्धयतीति अन्ध्र इति। यद्वा ***"सर्वधातुभ्यः ष्ट्रन्"*** (उ० ४।१५६) इत्युणादिना ष्ट्रन् प्रत्ययः ष् इत्, झषः परत्वात्तस्य धः। तकारश्च षकारापाये स्वरूपसम्पन्नः। अन्धयन्ति=विप्रलभन्त इत्यन्ध्राः वञ्चका इत्यर्थः।

निषूदन इति निपूर्वाण्णिजन्तात् "षूद क्षरणे" धातोर्नन्द्यादित्वाल्ल्युः, योरनादेशो, णेर्लोपः। ***"सात् पदाद्योः"*** (पा० ८।३।१११) इति सूत्रेण प्राप्तः षत्वनिषेधः ***"सुषामादिषु च"*** (पा० ८।३।९८) इति सूत्रेण सुषामादेराकृतिगणत्वात् प्रतिषिध्यते। निषूदयति क्लेशयति=सर्वप्रकारेण नितरां बाधते=इत्यर्थः। एवञ्च सत्त्वनिष्ठानां दानशीलानां पूज्यानां ये विप्रलम्भकास्तेषां निषूदनः कर्मानुसारिफलदानेन दण्डविधानात् परितापयिता=बाधक इत्यर्थः सम्पन्नः। यथा च लोकेऽपि पश्यामः=ये दुर्मदा बलिनोऽसाधुस्वभावा विप्रलम्भन्ते निर्बलान् साधुस्वभावान्, तेषां धनापहरणकारावासादिना च राजा निषूदनः=बाधको दर्ण्डायता भवति।

यद्वा—अव्युत्पत्तिपक्षमाश्रित्य-मेघ एव चाणूरान्ध्रः-यतो हि सोऽन्न-फलोत्पत्तिहेतुभूतानि नेत्ररूपाणि पुष्पाणि हन्ति। पुष्पाणि हि फलानां नेत्राणि, पुष्पागमदर्शनेन फलागमदर्शनात्, तेषाञ्चान्धयिता मेघोऽतः स चाणूरान्ध्रः। तस्य च यो निषूदनो भेत्ता स चाणूरान्ध्रनिषूदनो विष्णुः, इन्द्रशब्दाभिधेयः सूर्यो वा। सूर्य एव विष्णुः विष्णुरेव च सूर्यः। तथा च वेदवचनम्-**"अग्निर्वृत्राणि जंघनत्"** (ऋक् ६।१६।३४) अग्निः=सूर्यः, वृत्रशब्दो मेघपर्यायः।

मन्त्रलिङ्गञ्च—

इन्द्रो दीर्घाय चक्षसे आ सूर्य रोहयद्दिवि। वि गोभिरद्रिमैरयत्।

ऋक् १।७।३।।

अद्रिशब्दो निघण्टौ १।१० मेघनामसु पठितः। तत्र त्रिंशन्नामानि मेघस्य न च तानीह लक्ष्यन्ते केवलं पथः प्रदर्शनं नोऽभिमतमिति।

एतदर्थाभिधायी मन्त्रश्च—

वज्रमेको बिभर्ति हस्त आहितं तेन वृत्राणि जिघ्नते।

ऋक् ८।२९।४।।

बभ्रुरित्यनुवर्तते-**"बभ्रुरेकः'** (ऋक् ८।२९।१) इति। तथा—

आशर्म पर्वतानां वृणीमहे नदीनाम्। आ विष्णोः साचाभुवः।

ऋक् ८।३१।१०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं—

ओजायमानं यो अहिं जघान दानुं शयानं स जनास स इन्द्रः।

ऋक् २।१२।११।।

ऐतु पूषा रयिर्भगः स्वस्ति सर्वधातमः। उरुरध्वा स्वस्तये।

ऋक् ८।३१।११।।

अत्रैक एव ऊरुरध्वा=सूर्यो बहुधा स्तुतो भवति। इत्यूहाक्रमः।

भवति चात्रास्माकम् शार्दूलविक्रीडित छन्दसि——

चाणूरान्ध्रनिषूदनः स भगवानिन्द्रोऽथवा स स्मृतः,
तं सूर्यं तमु वाग्निमुग्रयशसं तं वा सनाद् भास्करम्।
तं हंसं तमु वा सुपर्णमुरगं तं वा रथेष्ठं गुरुम्,
गायन्तीह विशुद्धचित्तकवयो वेदेऽस्ति येषां गतिः ।।११५७।।

❖❖❖

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः।
अमूर्तिरनघोऽचिन्त्यो भयकृद् भयनाशनः ।।१०२।।

८२६ सहस्रार्चिः, ८२७ सप्तजिह्वः, ८२८ सप्तैधाः, ८२६ सप्तवाहनः। ८३० अमूर्तिः, ८३१ अनघः, ८३२ अचिन्त्यः ८३३ भयकृत् ८३४ भयनाशनः।।

सहस्रार्चिः—८२६

सहस्रशब्दोऽनन्तपर्यायः प्राग्व्युत्पादितः।

अर्चि शब्दश्च—"अर्च पूजायाम्" इति भौवादिकाद्धातोः ***"अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः"*** (२।१०८) इत्युणादि सूत्रेण इसिः प्रत्ययः। अर्चिर्ज्वाला, हेतिर्वा। अनन्ता दीप्तयो, हेतयो वा यस्य स सहस्रार्चिः। यथायमपरिमितज्वालो विश्वं व्यश्नुवानो भगवान् भास्करः प्रकाशमानो दृश्यते सहस्रार्चिः, तथैवायं सर्वेषां नभश्चराणां, जलचराणां, भूचराणां, नभोभूचराणां, जलभूचराणाञ्च जीवानामात्मभूतो जीवयिता। तथा च मन्त्रलिङ्गम्—

सूर्य आत्मा जगतस्तस्थुषश्च। ऋक् १।११५।१।।

अत एव सर्वासु योनिषु जीवानामन्तर्भेदकृता, प्रकटभेदकृता वाकृतिर्बलञ्च सूर्यार्चिर्वैविध्याद् भिन्न-भिन्नं दृश्यते। दृश्यन्ते च स्थावरेष्वपि सहस्रार्चिसूर्यकृता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाना भेदाः। यथा च भगवतः सूर्यस्यार्चिषो न संख्यातुं शक्यन्ते, तथैव सूर्यादीनामपि प्रकाशकस्य जगतो व्यवस्थापयितुर्भगवतो विष्णो रूपं न मृल्लोष्ठवद् वाचाभिधातुं चक्षुर्भ्यां वा दर्शयितुं शक्यते, अतः स सहस्रार्चिर्विष्णुः। मन्त्रलिङ्गञ्च—

सहस्रकेतुं वनिनं शतद्वसुं। ऋक् १।११६।१।।

प्र गायत्रेण गायत पवमानं विचर्षिणम्। इन्दुं सहस्रचक्षसम्।
ऋक् ६।६०।१।।

तं त्वा सहस्रचक्षसमथो सहस्रमर्णसम्। ऋक् ६।६०।२।।

दीर्घतन्तुर्बृहदुक्षायमग्निः सहस्रस्तरीः शतनीथ ऋभ्वा।
द्युमान् द्युमत्सु नृभिर्मृज्यमानः सुमित्रेषु दीदयो देवयत्सु।।
ऋक् १०।६६।७।।

स वज्रभृद् दस्युहा भीमं उग्रः सहस्रचेताः शतनीथ ऋभ्वा।
ऋक् १।१००।१२।।

सहस्रणीतिर्यतिः। ऋक् ६।७१।७।।

बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते।
ऋक् ७।८८।५।।

सोमः पुनानो अर्षति सहस्रधारो अत्यविः। ऋक् ६।१३।१।।

सहस्रयाजसः। ऋक् ६।१३।३।।

सहस्रपर्णः। ऋक् ८।७७।७।।

सहस्रपात्। ऋक् १०।६०।१।।

सहस्रपोषम्। ऋक् २।३२।५।।

सहस्रपोषिणम्। ऋक् ८।१०३।४।।

सहस्रबाह्वे। ऋक् ८।४५।२६।।

सहस्रभृष्टिः। ऋक् १।१८०।१२।।

सहस्रमीडे। ऋक् १।११२।१०।।

सहस्रभरः। ऋक् २।६।१।।

सहस्रयामा। ऋक् ६।१०६।५।।

सहस्रवीरम्। ऋक् १।१८८।४।।

सहस्रशीर्षा। ऋक् १०।६०।१।।

सहस्रशृङ्गः। ऋक् ५।१।८।।

सहस्रस्थूणम्। ऋक् ५।६२।६।।

सहस्रपदमधिकृत्योक्तमेतत् स्थूलं निदर्शनम्, भवन्ति चात्रास्माकम्—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्ये सहस्रार्चिरिहास्ति विष्णुः
सूर्योऽथवाग्निः स उ सर्वविष्टः ।
रूपैः स्वकैः स्वं पुरतो विधत्ते
विपश्चितोऽयं न तु मूढबुद्धेः ।।११५८।।

तथा च—

अतोऽस्ति गीतः स सहस्रमूर्तिः
स विश्वरूपोऽस्ति च नैकरूपः ।
सहस्रशृङ्गः स सहस्रबाहुः
सहस्रपात् सोऽस्ति सहस्रशीर्षा ।।११५६।।

तथा च—

एवं हि यो वेत्ति सहस्रदीप्तिं
स एव जानाति विभुं वरेण्यम् ।
तमेव देवाः शिरसा नमन्तो
यजन्ति मन्त्रैर्हविषा यथेष्टम् ।।११६०।।

अथापि—

विष्णुः सहस्रार्चिरनन्तरश्मिः
शिल्पी च तद्रश्मिमिह प्रगृह्य ।
विभिन्नयन्त्रेषु नियुज्य विश्वे
गन्धानिहाप्नोति ततो विभिन्नान् ।।११६१।।

सप्तजिह्वः—८२७

"षप् समवाये" भौवादिको धातुस्ततः ***"सप्यशूभ्यां तुट् च"*** (१।१५७) इत्युणादिसूत्रेण 'कनिन्' प्रत्ययस्तुटश्चागमः। सपन्तीति सप्त, संख्यावाचकः शब्दः। नान्तत्वात् सप्तशब्दस्य ***"ष्णान्ता षट्"*** (पा० १।१।२३) सूत्रेण षट् संज्ञा, ततश्च ***"ऋन्नेभ्यो ङीप्"*** (पा० ४।१।५) इति सूत्रेण प्राप्तो ङीप् ***"न षट्स्वस्रादिभ्यः"*** (पा० ४।१।१०) सूत्रेण प्रतिषिध्यते सप्तेति। जिह्वेति— 'लिह आस्वादने धातुरादादिकस्ततः ***"शेवायह्वजिह्वाग्रीवाप्वामीवाः"*** (१।१५४) इत्युणादिसूत्रेण वन्प्रत्ययः लस्य जश्च, गुणाभावः निपातनात्। अनिट् चायं धातुः। स्त्रियां टाप् जिह्वति। सप्त जिह्वा यस्येति बहुव्रीहिः समास उपसर्जनह्रस्वः,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नलोपः। सप्तजिह्वाश्चोक्ता मुण्डकोपनिषदि। तथा च—

काली कराली च मनोजवा च सुलोहिता या च सुधूम्रवर्णा ।
स्फुलिङ्गिनी विश्वरुची च देवी लेलायमाना इति सप्तजिह्वाः।।

मु० उ० १।२।४।।

मन्त्रलिङ्गञ्च—

दिवश्चिदग्ने महिना पृथिव्या वच्यन्तां ते वह्नयः सप्तजिह्वाः।

ऋक् ३।६।२।।

यथा चायं सप्तजिह्वो भगवान् तथा विश्वमपि, सप्तेत्यनेकोपलक्षण-मनेकप्रकारजिह्वं विधत्त इत्यर्थः। जङ्गमवर्गे च प्रत्यक्षमिदं दृश्यते। एवं भगवान् विष्णुः सप्तजिह्वेतिनाम्ना स्तुतिमाप्नोति।

भवति चात्रास्माकम्—

स सप्तजिह्वोऽग्निरसौ च सूर्यः
स एव विष्णुः स उ सप्तरश्मिः।
सोऽग्निर्हि देवान् वहते हर्वीषि
तन्नामनुन्नानि यजद्भिरग्नौ ।।११६२।।

लोकेऽपि च पश्यामो मुखं स्वात्तं भक्ष्यं प्राणवायुप्रेरितया जिह्वया जाठराग्नये ददाति। भवति लोकेन समो वेदो वेदेन च समो लोकः।

सप्तैधाः—८२८

सप्तेति शब्दः प्राग्व्युत्पादितः सप्तजिह्वनामव्याख्याने।

एधः—"एध वृद्धौ" इति धातोर्भौवादिकात् ***"सर्वधातुभ्योऽसुन्"*** (४।१८६) इत्युणादिसूत्रेणासुन् प्रत्ययः। समासे च सप्त एधांसि यस्येत्यत्र विभक्तिलोपे, प्रातिपदिकत्वे, सौ ***"अत्वसन्तस्य चाधातोः"*** (पा० ६।४।१४) सूत्रेण दीर्घः-***"वृद्धिरेचि"*** (पा० ६।१।८५) इति सूत्रेण वृद्धिः, सप्त एधांसि=इन्धनानि, दीपनानि यस्य स इति। मन्त्रलिङ्गञ्च—

सप्त ते अग्ने समिधाः सप्त जिह्वाः। यजुः १७।७६।।
यः सप्तरश्मिर्वृषभः तुविष्मानवासृजत् सर्तवे सप्तसिन्धून्।
यो रौहिणमस्फुरद् वज्रबाहुर्द्यामारोहन्तं स जनास इन्द्रः ।।

ऋक् २।१२।१२।।

प्र सप्तमवध्रिराशसा धाराग्नेरशायत। ऋक् ८।७३।६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्मा अर्कं सप्तशीर्षाणमानृचुस्त्रिधातुमुत्तमे पदे ।
स त्विमा विश्वा भुवनानि चिक्रददादिज्जनिष्ट पौंस्यम्।।

ऋक् ८।५१।४।।

तथा–

पाति यह्वश्चरणं सूर्यस्य–पाति नाभा सप्तशीर्षाणमग्निः।

ऋक् ३।५।५।।

इति निदर्शनम्।

दीप्तिमत्सु सप्तग्रहेषु चैक एवाग्निरेधते– नामरूपगुणान् पृथक् पृथग्बिभर्ति। तथा चैतदप्यूह्यम्–

सप्ताश्वः । ऋ़क् ४।४५।६ ।।

सप्तस्वसा। ऋक् ६।६१।१०।।

सप्तहोता । ऋक् ३।२६।१४।।

सप्तास्यः । ऋक् ४।५०।४ ।।

साद्यन्तञ्च मन्त्रम्–

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त ऋषयः सप्त धाम प्रियाणि।
सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरापृणस्व घृतेन स्वाहा।।

यजुः १७।७९।।

भवति चात्रास्माकम्–

सप्तैधाश्च स एवाग्निः सूर्यो विष्णुर्यमोऽर्यमा ।
सप्ताश्वः सप्तहोता वा सप्तास्यः स हि वा स्मृतः।।११६३।।

सप्तवाहनः–८२६

सप्तशब्दो व्युत्पादितचरः सप्तजिह्वनामव्याख्याने।

वाहनमिति-'वह प्रापणे' इति णिजन्ताद्धातोः करणे ल्युट्, णिलोपः। योरनादेशः। सप्त वाहनानि यस्य स सप्तवाहन इति। यद्वा प्राकृतेऽर्थे णिच्, तदन्ताच्च नन्द्यादेराकृतिगणत्वात् ल्युः, योरनादेशः, णिलोप, एवञ्च सप्तभिर्वाह्यते, सप्त वा वाह्यन्तेऽनेन, सप्त वहतीति वेति व्युत्पत्तिः सम्पद्यते। मन्त्रलिङ्गञ्च–

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा।
त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः ।।

ऋक् १।१६४।२।।

तथा–

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्तचक्रं सप्त वहन्त्यश्वाः। ऋक् १।१६४।३।।

इति निदर्शनम्।

लोके च पश्यामः— एकचक्रमिदं शरीरं तत्र सप्ताश्वा इव सप्तधातवं इदं वहन्ति गमनसमर्थं विदधति, रसरूप एक एव धातुः सप्तधा विभक्तः सप्तधातुरूपतामापद्यते त एव धातव इह शरीरे सप्ताश्वाः। त्रिनाभिः=त्रिबन्धनः, अर्थात् वातपित्तकफरूपाणि त्रीणि बन्धनान्यस्य। यद्वा त्रिपर्ववदेतद्। यथा—आमणिबन्धमेकं पर्व मणिबन्धादाकफोणि द्वितीयं पर्व, आकफोणेराप्रगण्डास्थिमूलं तृतीयं पर्व, यद् बाहुमूलमुच्यते। एवं यथानामव्याख्याप्रसङ्गे बहुत्रोक्ता त्रिपर्वता।

दोषाः, धातवोऽजरमनर्वं=प्रत्यक्षतोऽदृश्यमानाश्वं चक्रं=चङ्क्रमणं, भ्रमणशीलं शरीरं वहन्ति। अस्मिंश्च शरीरे, विश्वानि भुवनप्रतीकानि सन्ति स्थितानि, स्थास्यन्ति चेति योजना। यथा-नेत्रे, सूर्यचन्द्रभुवनप्रतीके। श्रोत्रे-अन्तरिक्षलोकप्रतीके। मलमूत्रद्वारे, पृथिवीलोकप्रतीके। सप्तधातूनां सप्तग्रहाधिदेवताः। मूत्रोत्सर्गः पुरीषोत्सर्गश्च पृथिवीमधिकृत्यैव। सप्तधातूनामुपधातवश्च सप्त। रोमाणि च नक्षत्राणीव। इयञ्च स्थूला योजनोक्ता, सूक्ष्मज्ञानायाऽऽयुर्वेद एवाधिगन्तव्यः।

यश्चैवं सप्तवाहनाख्यं विष्णोः पदं=स्वरूपं वेत्ति, स सूर्यमग्निं, शरीराभिमानिनमात्मानमिन्द्रियाणि मनो वाऽवगन्तुं प्रभवति, व्यापकताञ्च तेषाम्। यच्चोक्तं, रथमेकचक्रमिति तत् समूहालम्बनेन, यथा देवदत्तोऽयं तिष्ठति-इत्यत्र सर्वावयवसम्पन्नस्य पिण्डस्य देवदत्तेतिनाम, विभागेनोच्यमाने तु हस्तोऽयं देवदत्तस्येति सम्बन्धस्य ग्रहो, न तु हस्तशब्देन देवदत्तस्य ग्रहणमिति इत्यायुर्वेदशास्त्रीयं ज्ञानमिह मयोपस्थापितमत एवायुर्वेदानूचानत्वं प्रशंसन्ति कुशलाः। क्व वयम्, क्व सप्तवाहनः, क्व शरीरं, क्वायुर्वेदानूचानत्वमिति चेत् पृच्छेत् कश्चित्- तत्र समाधानमिदम्- ज्ञानप्रदानहेतुकोऽयमार्षः क्रमः।

भवति चात्रास्माकम्—

सप्ताश्वविष्णुः स्वरथं प्रविष्टः
पश्यत्यशेषं स वपूंषि तक्षन्।
यो वेद गात्रं स हि वेद वेदं
सप्ताश्वरश्मिः कथितः स सूर्यः।।११६४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमूर्तिः—८३०

विश्वमूर्तिरित्यत्र मूर्तिशब्दो व्याख्यातः। नञ्पूर्वो बहुव्रीहिः। नास्ति मूर्तिर्यस्य सोऽमूर्तिः। मूर्तिराकारो मोहो वा, स न विद्यते यस्य सोऽमूर्तिः, अर्थादाकाररहितो मोहरहितश्च।

मन्त्रलिङ्गञ्च—

अग्निं होतारं प्रवृणे मियेधे गृत्सं कविं विश्वविदममूरम् ।
स नो यक्षद् देवताता यजीयान् राये वाजाय वनते मघानि।।

ऋक् ३।१९।१।।

अमूरं=अमूर्तमिति। इति निदर्शनम्।

लोके यदि प्रत्येकं व्यष्टिपदार्थमाश्रित्य विविच्येत ततोऽपि तत्स्वरूपावगतिर्दुर्लभा। तथा हि—

किं स सूर्यः ? नेति, यतो हि सर्वेऽन्येऽपि ग्रहास्तस्यैव स्वरूपम्। किं स मनुष्यः ? नेति, यतो ह्यन्या अपि योनयस्तस्यैव स्वरूपम्। किं स पर्वतः ? नेति, यतो हि न केवलं पर्वतोऽपितु सर्वा भूस्तद्रूपम्। किं स समुद्रः ? नेति, यतो हि सर्वोऽपि नदनद्यादिरूपो जलवर्गस्तद्रूपम्। एवं स स्वयममूरः=अमूर्तः परमात्मा सर्वाविष्टस्तत्तद्रूपावबोधं प्राप्नोति। यथाऽयं जीवात्मा तत्त्वत एकोऽपि शरीरभेदाद् तत्तत् शरीरानुरूपं भिन्नं भिन्नं स्वस्वरूपं व्यनक्ति। एवमसौ विश्वविदग्निर्विष्णुः सूर्यो वा विश्वमूर्तिरमूर्तिरित्युक्तो भवति।

भवतश्चात्रास्माकम्—

अमूर्तिरग्निः स हि विश्वविद्वा
स एव होता स उ रत्नधामा ।
स एव सर्वत्र विभिन्नरूपः
स्वयं ह्यमूर्तिः कुरुते च मूर्तम्।।११६५।।

तथा—

आत्मा ह्यमूर्तिर्वहते च मूर्तं
गात्रं यथा नाम तथाभ्युपैति ।
विष्णुर्ह्यमूर्तिः सकलं च विश्वं
वहन् तथा नामभिरुच्यते सः ।।११६६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनघः—८३१

नञ् पूर्वस्य हन्तेरघः। 'हन् हिंसागत्योः' इत्यादादिकाद्धातोः ***''अन्येष्वपि दृश्यते''*** (पा० ३।२।१०१) इति डः प्रत्ययो डित्वाट्टिलोपो—***'न्यङ् क्वादीनाञ्च'*** (पा० ७।३।५३) इति कुत्वं। न हन्ति पुण्यकर्माणमित्यनघः। न अघः-नञ्तत्पुरुष-समासो, नञो नलोपो, नुडागमोऽनघः। अघशब्दः पापवचनः तद्विरोधी चानघः, अघं विरुणद्धि। यद्वा-अघो नास्ति यस्मिन् सोऽनघः। यद्वा-''अघि गत्याक्षेपे'' इति धातोः पचाद्यच्, इदिल्लक्षणस्य नुमश्च पृषोदरादित्वाल्लोपः। गत्याक्षेपः=गतेर्निन्दा। अघः=कुत्सितगमनस्तद्रहितोऽनघः प्रशस्तगतिरित्यर्थः। एवञ्च प्रशस्तसर्वगमनः पापरहितो विशुद्ध इत्यर्थः।

मन्त्रलिङ्गञ्च—

आरे अस्मदमतिमारे अंह आरे विश्वां दुर्मतिं यन्निपासि ।
दोषा शिवः सहसः सूनो अग्ने यं देव आचित् सचसे स्वस्ति।।

ऋक् ४।११।६।।

इति निदर्शनम्। प्रपञ्चस्तु वेदे द्रष्टव्यः। लोके च पश्यामः-अग्निस्वरूप आत्मा वस्तुतोऽनघ एव। परन्तु रजस्तमोगुणानुसम्पृक्तो दुर्मतेरधिष्ठानं भवति। सत्त्वञ्च दोषरहितमतः **''सत्त्वे हि सत्यं नहि तत्र दोषः''** इत्युच्यते। अत एवानघः स सविता धियो विशुद्ध्यै प्रार्थ्यते।

मन्त्रलिङ्गञ्चात्र—

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्।। ऋक् ३।६२।१०।।

अनघो=भर्गः शुद्ध इत्यर्थः। भवति चात्रास्माकम्—

अघो हि दोषः स न तत्र भर्गे
ध्यायन्त्यतस्तं सवितारमुग्रम् ।
व्यपाययेन्नो दुरितानि देवो
यतोऽनघः 'सः'स हि विष्णुरस्मात्।।११६७।।

'स' इति विष्णोर्नाम, सव इत्यत्र तथा निर्वचनात्।

अचिन्त्यः—८३२

'चिति संज्ञाने' इति चौरादिकाद्धातोः शक्यार्थे 'ण्यत्', चिन्तयितुमियत्तया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पर्यवसितुं शक्यश्चिन्त्यः। न चिन्त्योऽचिन्त्यः। इयत्तयावगन्तुमशक्यः। यद्वा-मनसोऽप्यगोचर इत्यर्थः सम्पद्यते।

मन्त्रलिङ्गञ्च—

यद्वा घा सत्यमुत यन्न विद्म धियो हिन्वानो धिय इन्नो अव्याः।

ऋक् १०।१३६।५।।

सविता विद्वाननुवर्तते पूर्वतः। लोकेऽपि च पश्यामो, मानवोऽनित्यबुद्धिर्वैष्णवं कर्म संज्ञातुं नालं भवति। कियद्‌गुणः सूर्य इति च न केनाप्यवगन्तुं शक्यते। एवमेवात्माप्यचिन्त्यशक्तिः शरीररूपकारणभेदात्, मूलञ्चैतस्य सोऽचिन्त्यो विष्णुरेव सर्वत्र समाविष्टः।

भवति चात्रास्माकम्—

अचिन्त्यमेवं मुनयस्तमाहु-
विष्णुं सुपर्णं कविमग्निमर्कम् ।
दाधार यो द्यां पृथिवीं दृढाञ्च
कश्चिन्तयन् तस्य लभेत पारम्।।११६८।।

भयकृत्—८३३

'ञिभी भये' जौहोत्यादिको धातुस्ततः ***"एरच्"*** (पा० ३।३।५६) सूत्रेण भावेऽच् प्रत्ययः। भीतिः=भयं=त्रासः, तत्करोति, कृन्तति वेति भयकृत्, करोतेः कृन्ततेर्वा क्विप्। भगवत्कृतविश्वव्यवस्थाभञ्जकानां भयकृत्=भयंकरः, तथा तत्कृतव्यवस्थानुसारिणां भयकृत्=भयच्छेदक इत्यर्थः।

मन्त्रलिङ्गञ्च—

द्यावा चिदस्मै पृथिवी नमेते, शुष्माचिदस्य पर्वता भयन्ते ।
यः सोमपा निचितो वज्रबाहुर्यो वज्रहस्तः स जनास इन्द्रः।।

ऋक् २।१२।१३।।

लोकेऽपि सर्वत्र स्थावरे जङ्गमे च भयकृत्त्वं व्याप्तं दृश्यते। प्रत्येकं परस्परं भयकृद् भवति, कश्चित् कस्यचिद् भयं ददाति, कश्चिच्च कस्यचिद् भयं छिनत्ति। तथा च वैद्युतेन स्तनथुना क्षुपा निम्लोचन्ति, तत्र स्थावरेषु भयमस्फुटमपि लक्षणैर्लक्षितं भवति। भयेन तेजोऽपह्रियते, तेजोऽपहारे च वायुः प्रकुप्यति, प्रकुपिते च वायौ ज्ञानं बलं धैर्यं तथा स्मृत्यादिसर्वं भ्राम्यति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भयं कृन्ततीति भयकृदित्यत्र मन्त्रलिङ्गम्—

मा विभेनं मरिष्यसि जरदष्टिं कृणोमि त्वा । अथर्व ५।३०।८।।

सोऽरिष्ट न मरिष्यसि न मरिष्यसि मा विभेः।

न वै तत्र म्रियन्ते नो यन्त्यधमं तमः ।। अथर्व ८।२।२४।।

भवति चात्रास्माकम्—

विष्णुर्हि लोके भयकृत्[1] पुराणो
विष्णुर्हि लोके भयकृत्[2] पुराणः।
भयं बलिष्ठात् स हरेच्च तेज-
स्तेजःक्षये कुप्यति वायुरूर्ध्वम् ।।११६९।।

भयनाशनः—८३४

भयशब्दो व्याख्यातः। नाशनः—'णश् अदर्शने' धातुर्दैवादिकस्ततो णिजन्तान्नन्द्यादिल्युः। णिलोपो योरनादेशः। भयस्य नाशनो भयनाशनः।

मन्त्रलिङ्गञ्च—

यत इन्द्र भयामहे ततो नो अभयं कृधि। ऋक् ८।६१।१३।।

त्वं नः पश्चादधरादुत्तरात् पुर इन्द्र नि पाहि विश्वतः।

आरे अस्मत् कृणुहि दैव्यं भयमारे हेतीरदेवीः ।।

ऋक् ८।६१।१६।।

कृणुहि=नाशय इत्यर्थः।

भवति चात्रास्माकम्—

भयं हि सर्वस्य हृदि स्थितं यत्
तन्नाशयत्येव स विष्णुरेकः ।
स विश्वतः पाति बलं प्रयच्छन्
जीवं सुदुःस्थञ्च विरूपसंस्थः[3] ।।११७०।।

❖ ❖ ❖

१. भयं करोति। २. भयं कृन्तति। ३. विविधरूपेषु तत्तद्रूपेणाविर्भूत इत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आणुर्बृहत् कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः ।।१०३।।

८३५ अणुः, ८३६ बृहत्, ८३७ कृशः, ८३८ स्थूलः, ८३९ गुणभृत्, ८४० निर्गुणः, ८४१ महान्। ८४२ अधृतः, ८४३ स्वधृतः, ८४४ स्वास्यः, ८४५ प्राग्वंशः, ८४६ वंशवर्धनः।

अणुः—८३५; बृहत्—८३६

अनयोः समं व्याख्यानम्।

'अण शब्दे' इति भौवादिको धातुस्ततः ***''अणश्च''*** (१।८) इति सूत्रेणौणादिक उः प्रत्ययोऽणुरिति। गतिशब्दोभयकर्मेहायं धातुः। तथा च-अणितः सर्वत्र गतोऽणति शब्दायते विविधरूपेणेत्यणुः। अणुर्हि सूक्ष्मतः सूक्ष्मे स्थूलतश्च स्थूलेऽणितो=गतो (व्याप्तो) भवति शब्दायते च विविधम्। अणुशब्दश्चात्र सूक्ष्मपर्यायोऽपि। तथा च—अणूनां=सूक्ष्मतमानामनवयवानां पञ्चभूतहेतुभूत-शब्दादितन्मात्राणामुत्पत्तिहेतुभूतस्तत्र सर्वत्र व्याप्तश्चाणुत्वाद् भगवान् विष्णुरणुशब्देनोक्तो, यतो हि नहि स्थूलः किञ्चिद् व्याप्नोत्यपितु स्थूलोऽणुना व्याप्तो भवति। शब्दभूमिराकाशोऽप्यणुत्वात्सर्वत्र व्याप्तस्तथा शब्दोऽपि वातवीचिभिरुह्यमानो व्याप्नोति समग्रमाकाशम्। विद्युत्सखा च शब्दः स्तनथुनामा व्याप्नोति सर्वमियत्तया परिच्छिन्नं महाघोषवद् इति।

मन्त्रलिङ्गञ्चाणुनाम्नि

आपानासो विवस्वतो जनन्त उषसो भगम्। सूरा अण्वं वितन्वते।

ऋक् ६।१०।५।।

स्तनयित्नुमधिकृत्य मन्त्रलिङ्गम्—

आ स्वमद्म युवमानो अजरस्तृष्व विष्वन्नतसेषु तिष्ठति ।
अत्यो न पृष्ठं प्रुषितस्य रोचते दिवो न सानु स्तनयन्नचक्रदत्।।

ऋक् १।५८।२।।

प्रकाशोऽपि सूक्ष्मत्वात्सर्वं व्याप्नोति। मन्त्रलिङ्गञ्च—

यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित् सन् तडिदिवाति रोचसे।
रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव।।

ऋक् १।९४।७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाशवत् सर्वं व्यश्नुवानोऽणुनामा भगवान् विष्णुरेवमुक्तः स एव स्वसूक्ष्मया शक्त्या सूक्ष्मानपि कीटादीन् जीवान् जीवयति। सूक्ष्मा अपि जीवा आत्मानं पूर्णं सबलञ्च मन्यन्ते भगवतोऽणोर्व्याप्त्या। यतो हि-"**खं ब्रह्म च खम्।**" तथा "**बृहद् ब्रह्म ब्रह्म वा बृहद्**" इति प्रसङ्गतो व्याख्यातं भवति।

तत्र मन्त्रलिङ्गञ्च। यथा—

त्वामग्ने अतिथिं पूर्व्यं विशः शोचिष्कं शं गृहपतिं निषेदिरे।
बृहत्केतुं पुरुरूपं धनस्पृतं सुशर्माणं स्ववशं जरद्विषम् ।।

ऋक् ५।८।२।।

तथा—

दीर्घतन्तुबृर्हदुक्षायमग्निः। ऋक् १०।६६।७।।

प्र प्रायमग्निर्भरतस्य शृण्वे वि यत् सूर्यो न रोचते बृहद्भाः।

ऋक् ७।८।४।।

बृहद्रेणः। ऋक् ६।१८।२।। **बृहन्मते।** ऋक् ६।३६।१।। इति निदर्शनम्।

भवति चात्रास्माकमणुमधिकृत्य—

अणुर्हि विष्णुः स हि सर्वयातः
शब्दोऽपि खस्थोऽस्ति च सर्वयातः।
तडिच्च नूनं स्तनथुं विधत्ते
सूर्येरिताणुं विततं व्यनक्ति ।।११७१।।

बृहदधिकृत्य—

बृहत् स विष्णुः स हि सर्वविष्टो
बृहत् स्वधर्मेण विधत्त एतत् ।
यो वेद सूत्रस्य च सूत्रभूतं
विष्णुं बृहद् वेत्ति जगत् स विज्ञः ।।११७२।।

बृहच्छब्दश्चोणादौ *"वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च"* (२।८४) इति सूत्रेण शतृवद्भावभावितातिप्रत्ययान्तो निपात्यते, बृंहतेश्च नलोपः।

बृहद्भावे मन्त्रलिङ्गम्—

स भूमिं सर्वत स्पृत्वाऽत्यतिष्ठद्दशाङ्गुलम्।। यजु० ३१।१।।

तथा च—

अग्ने बृहतो अध्वरे। ऋक् ३।१६।६।।

जातवेदो बृहतः सुप्रणीते। ऋक् ३।१५।४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृशः—८३७

'कृश तनूकरणे' दैवादिको धातुः, ततः *"इगुपधज्ञाप्रीकिरः कः"* (पा० ३।१।१३५) इति सूत्रेण कर्तरि 'क' प्रत्ययः, कित्त्वाद् गुणाभावः। कृश्यति तनूकरोतीति कृशः। विकर्शं विकर्शं=वितक्षं वितक्षं नानाविधं विधत्तेऽतः स कृश इत्युक्तो भवति।

मन्त्रलिङ्गञ्च—

सत्यं तदिन्द्रावरुणा कृशस्य वसां मध्व ऊर्मिं दुहते सप्तवाणीः।

ऋक् ८।५६।३।।

तथा—

या सिस्रतू रजसः पारे अध्वनः। ऋक् ८।५६।२।।

रजसः अध्वन इति चानुवर्तते। 'तक्षू त्वक्षू तनूकरणे' इतिधात्वोरेवार्थमयं धातुरभिधत्ते। तथा चात्र मन्त्रलिङ्गम्—

त्वष्टा रूपाणि पिंशतु। ऋक् १०।१८४।१।।

यं त्वा द्यावापृथिवी यं त्वापस्त्वष्टा यं त्वा सुजनिमा जजान ।
पन्थामनु प्रविद्वान् पितृयाणं द्युमदग्ने समिधानो वि भाहि।।

ऋक् १०।२।७।।

त्वष्टा दुहित्रे वहतुं कृणोतीदं विश्वं भुवनं समेति।

ऋक् १०।१७।१।।

इह त्वष्टा सुजनिमा सजोषा दीर्घमायुः करति जीवसे वः।

ऋक् १०।१८।६।।

अयञ्च भगवतः क्रशिमगुणः सर्वत्र व्यष्टो दृश्यते। तथा च प्रत्येकं प्राणी शरीरेण भगवतः कृशस्य विभिन्नान् क्रशिमभेदान् विवृण्वते। इति निदर्शनमात्रं, विस्तरस्त्वपारो धात्वर्थसन्तानपरम्परया।

भवति चात्रास्माकम्—

कृशो हि विष्णुः स तनूकरोति
तथा यथा तस्य सुखाय यत् स्यात्।
चतुष्प्रकारां स वितत्य सृष्टिं
तदन्तराविष्ट इहास्ति तष्टा ।।११७३।।

तष्टा-त्वष्टा-कृश इति। लघुवचनोऽपि कृशशब्दः, **"क्रशिमा लघिमा चायम्"** इत्यादिवचनात्। तत्र *"मतिबुद्धिपूजार्थेभ्यश्च"* (पा० ३।२।१८८) इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वात् कर्तरि क्तः। ***''अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः''*** (पा० ८।२।५५) इति सूत्रेण तकारलोप इडागमाभावश्च निपात्यते।

स्थूलः—८३८

'ष्ठा गतिनिवृत्तौ' भौवादिको धातुः, षकारस्य सकारः, टोस्तुः, ततः ***''खर्जिपिञ्जादिभ्य ऊरोलचौ''*** (८।९०) इत्युणादिसूत्रेण पिञ्जरादेराकृतिगणत्वाद् बाहुलकाद् वा किद् ऊलच् प्रत्ययः, तिष्ठतेराकारलोपः। नानाविधविश्वरूपमभिव्याप्य तिष्ठतीति स्थूलः।

यद्वा—'स्थूल परिबृंहणे' कथादिश्चौरादिकस्ततो णिच्, अकारलोपः, पचाद्यच् णिलोपः। परिबृंहणं=वर्धनम्। एवञ्च स्थलयति=परिवर्धयतीति स्थूलः। यद्वा-तिष्ठतेरूरः कित् स्थूर इति।

मन्त्रलिङ्गञ्च—

अनेजदेकं मनसो जवीयो नैनद्देवा आप्नुवन् पूर्वमर्षत्।
तद्धावतोऽन्यानत्येति तिष्ठत् तस्मिन्नपो मातरिश्वा दधाति।।
यजु ४०।४।।

स्थूलमुपातसत्। यजु० २३।२८।।

स्थूरस्थूल शब्दौ समानार्थौ, स्थूर एव वा स्थूलः। मन्त्रलिङ्गम्—

नृवन्त इन्द्र नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः।
ईक्षे हि वस्व उभयस्य राजन् धा रत्नं महि स्थूरं बृहन्तम्।।
ऋक् ६।१९।१०।।

तथा—

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।
स भूमिꣳ सर्वत स्पृत्वाऽत्यतिष्ठद् दशाङ्गुलम्।। यजु० ३१।१।।

लोकेऽपि पश्यामः शारीरं स्थितिधर्मं बिभ्राणः स्थूलः शारीर आत्मा यावच्छरीरे तिष्ठति तावत् स्थूलं दृढं शरीरं तिष्ठति, गतिसमर्थञ्च भवति। तस्मिंश्चापयाते स्थूले स्थूरे वात्मनि, स्थूलं स्थूरं वैतच्छरीरं नश्यति।

अत उपपद्यते मन्त्रोक्तम्—

तस्मिन्ह तस्थुर्भुवनानि विश्वा। यजु० ३१।१९।।

एतेन च स्थूलत्वरूपेण गुणेन भगवान् सर्वत्र व्याप्तः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स्थूलो हि विष्णुः स दधाति सर्वं
स्थूलञ्च सर्वं स्थितिमेति तस्मिन्।
यथास्ति खं सर्वगतञ्च तस्मिन्
सूर्यादयः स्पर्शमियन्त्यजस्रम् ।।११७४।।

गुणभृत्—८३६

'सङ्केत ग्राम कुण गुण चामन्त्रणे' कथाद्यन्तर्गताश्चौरादिका धातवः, तेषु 'गुण' धातोरदन्ताण्णिच्, अतो लोपस्तस्य स्थानिवद्भावाच्च न गुणः। गुणि इत्यस्य ***"सनाद्यन्ता धातवः"*** (पा० ३।१।३२) इति सूत्रेण धातुसंज्ञा, कर्मणि घञ्, घञर्थे कविधिर्वा णिलोपश्च। गुण्यते=कर्तरि क्विप्, तस्य सर्वापहार-स्तुगागमश्च। गुणा दयादाक्षिण्यादयः सत्त्वरजस्तम आदयश्च, तेषां भृत्=धारक इत्यर्थः। प्रकृतेरध्यक्षत्वात् प्राकृतानां गुणानामपि स एव धारकः।

मन्त्रलिङ्गञ्च—

पुण्डरीकं नवद्वारं त्रिभिर्गुणेभिरावृतम् ।
तस्मिन् यद् यक्ष्ममात्मन्वत् तद्वै ब्रह्मविदो विदुः।। अथर्व १०।८।४३।।

पुण्डरीकाक्षनामव्याख्याप्रसङ्गे व्याख्यातोऽयं मन्त्रः। तथा चायं सृष्टेः पालनाय प्रत्यूषे वा प्रकाशस्वरूपं सत्त्वं, जगत्सर्जने व्यवहारकाले वा प्रवृत्तिरूपं रजो, रात्र्यागमे प्रलयकाले वा तन्द्रारूपं तमोगुणं बिभर्ति। अत उक्तं **"आ त्वेषं वर्तते तमः"** यजु० ३४।३२ इति। दृश्यते च गुणत्रयानुवृत्त्या सर्वत्र जगति त्रिपर्वता। यथा—

१—४—७—१०
२—५—८—११
३—६—९—१२

इति त्रिगुणात्मका राशयो द्वादश, यान् सूर्यः सपरिच्छेदो बिभर्ति=धारयति। तथा चाङ्गुलिभ्य आरभ्य मणिबन्धान्तमेकं पर्व, मणिबन्धात् कफोणिपर्यन्तं द्वितीयं पर्व, कफोणेरारभ्य प्रगण्डान्तं तृतीयं पर्वेति। एवंविधा योजना सर्वत्र विधेया, विस्तरस्तु प्राक् विहितः। सत्त्वरजस्तमोभेदादेव उत्तमाधममध्यमा भवन्ति।

तथा च मन्त्रलिङ्गम्—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यम् श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम ।। यजु० १२।१२।।

भगवतो गुणभृतो जातत्वात् सर्वं विश्वं गुणभृदतो भगवान् गुणभृन्नाम्ना स्तूयते। एवं समानो भवति लोको वेदेन।

उक्तञ्चास्माभिः स्वोपज्ञे, सत्याग्रहनीतिकाव्ये—

लोकज्ञो न च वेदज्ञो, वेदज्ञो न च लोकवित्।
एकपक्षखगस्येव, वाक्यं तस्यावसीदति ।। (५।३।१०)

भवति चात्रास्माकम्—

विष्णुर्हि लोके गुणभृत् पुराणः
गुणैर्विभक्तं विषमस्वभावैः ।
विश्वं मनो वा प्रतिजन्तुनिष्ठं
स्तुवन्ति तं भिन्नगुणानुबद्धाः ।।११७५।।

इति पथः प्रदर्शनम्।

निर्गुणः—८४०

निरुपसर्गः। गुण शब्दो व्युत्पादितः पूर्वम्। गुणेभ्यो निर्गतो 'निर्गुणः'। ''*निरादयः क्रान्ताद्यर्थे पञ्चम्या*'' (वा० २।२।१८) इति निर्गमनेऽर्थे तत्पुरुषः। प्राकृतानां सत्त्वरजस्तमःस्वरूपाणां गुणानां भगवति सद्भावो नेति निर्गुणः सः। गुणभृदपि सन् न स्वयं गुणी, गुणस्वरूपा हि प्रकृतिः सा च तदध्यक्षिका, तद्धारणात्स गुणभृदुच्यते, तद्व्यतिरिक्तश्चायं निर्गुण इति। यद्वा—सर्गसमयेऽसौ गुणभृत्, सर्गं समाहृत्यावस्थितश्चासौ निर्गुण इत्युभयथोपपद्यते।

मन्त्रलिङ्गञ्च—

विद्मा ते अग्ने त्रेधा त्रयाणि विद्मा ते धाम विभृता पुरुत्रा।
विद्मा ते नाम परमं गुहा यद् विद्मा तमुत्सं यत आजगन्थ।।
समुद्रे त्वा नृमणा अप्स्वन्तर्नृचक्षसा ईधे दिवो अग्न ऊधन्।
तृतीये त्वा रजसि तस्थिवांसमपामुपस्थे महिषा अवर्धन्।।
यजु० १२।१६; २०।।

इह न त्रित्वेन सह गुणानुवृत्तिरतः स निर्गुण इत्युक्तो भवति। यस्माच्चासौ त्रीणि धामानि व्याप्नोति तस्मात् स विष्णुरेव। एवं हि सर्वत्र योजना कर्तव्या भवति। इति सरणिक्रमः प्रदर्शितोऽसम्भवं चाद्यन्तं व्याख्यानमपारत्वाद

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भगवन्नामार्थमहिम्नः।

इदञ्च निभालयन्तु विद्वांसः—इमामस्मद्व्याख्यानसरणिमनुसृत्य यः कश्चिद्व्याचष्टे व्याख्यास्यति वा यादृग्, तादृग् तत् व्याख्यानमपि सत्यदेवो "वासिष्ठो" ऽनुमोदतेऽनुमोदिष्यते वा, यतो ह्यलभ्यपारत्वाद् व्याख्यानस्येति।

भवति चात्रास्माकम्—

स निर्गुणो विष्णुरलिप्त एको
धामानि सर्वाणि च वेद गत्या।
गुणा न तं क्षोभयितुं समर्थाः
स वा गुणातीत इहास्ति सूर्यः॥११७६॥

महान्—८४१

'मह पूजायाम्' इति भौवादिको धातुस्ततो ***"वर्तमाने पृषत्बृहन्महज्जगच्छतृवच्च"*** (२।४८) इत्युणादिसूत्रेणातिप्रत्ययान्तो निपात्यते। शतृवद्भावश्च तस्य विधीयते, तेनोगित्त्वान्नुम्, मित्त्वादन्त्यादचः परः। ***"सान्तमहतः संयोगस्य"*** (पा० ६।४।१०) इति सूत्रेण महतो नोपधाया दीर्घः, संयोगान्तलोपः, तस्यासिद्धत्वान्नलोपो न भवति, सिध्यति च महानिति। मह्यते=पूज्यत इति महान्। मन्त्रलिङ्गञ्च—

यो रायोवनिर्महान्त्सुपारः सुन्वतः सखा। तस्मा इन्द्राय गायत॥ ऋक् १।४।१०॥

महाँ अग्निर्मनसा रातहव्यः। ऋक् ४।७।७॥

बण्महाँ असि सूर्यः। ऋक् ८।१०१।११॥ इति निदर्शनम्।

भगवतः पूज्यता वरिष्ठता च लोके सर्वत्र व्यष्टा दृश्यते।

भवति चात्रास्माकम्—

विष्णुर्महान् पूज्यतमश्च विष्णुः
सूर्यो महान् पूज्यतमश्च सूर्यः।
अग्निर्महान् पूज्यतमश्च सोऽग्निः
मनीषिणस्तञ्च तथा स्तुवन्ति॥११७७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अधृतः—८४२

'धृञः' कर्मणि 'क्तः', अनिट्, गुणाभावः। नञ्तत्पुरुषे नञो न लोपः, न धृतः=अधृतः इति। यो हि सर्वस्य धाता स केन धृतः स्यादित्यधृत एव स उच्यते। तथा च यथा दिवि रोचमानस्य सूर्यस्य न कश्चिदस्ति प्राकृतः स्तम्भक इति सोऽधृतनाम्नोच्यते, एवं विश्वव्यवस्थापको विष्णुरपि स्वधारणानपेक्षोऽधृत इत्युक्तः।

मन्त्रलिङ्गञ्च—

गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम्।

ऋक् ७।८७।५।।

अवसिन्धुं वरुणो द्यौरिव स्थात्। ऋक् ७।८७।६।।

यतोऽयमधृतोऽत एव स्वयं जातः स्वाधारः इत्याद्यभिधानैरभिधेयो भवति।

भवति चात्रास्माकम्—

[1]खगोऽसहायो दिवमेत्यशङ्कः
[2]खगोऽसहायो दिवमेत्यशङ्कः ।
यस्तक्षकस्तक्षति तं [3]सुपर्णं
स सर्वगो विष्णुरिहाधृतोऽस्ति।।११७८।।

स्वधृतः—८४३

स्वरतेर्ड्प्रत्यये स्वरिति व्युत्पादितचरः। धृतश्चाप्युक्तो धृञः कर्मणि क्ते। स्वेन=आत्मना धृतः स्वधृत इति। अर्थादन्यसाहाय्यानपेक्षो य आत्मनात्मानं धारयति सः स्वधृतः। तस्य चायमात्मधारणरूपः स्वाभाविकः स्वरूपभूतो धर्मः।

तथा च मन्त्रलिङ्गम्—

स्वधर्मन् देववीतये श्रेष्ठं नो धेहि वार्यम्। ऋक् ३।२१।२।।

अस्मिन् पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम्।
आपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परिदीयन्ति यह्वी।।

ऋक् २।३५।१४।।

---

१. खगः—सूर्यः। सूर्य इत्युपलक्षणं ग्रहोपग्रहसमेतस्य नक्षत्रमण्डलस्य। २. खगः—पक्षी। ३. सुपर्णम्—सूर्यं सपरिच्छदम् पक्षिणं वा तथाविधोपकरणसमेतम्। "**स सुपर्णो गरुत्मान्।**" (ऋक् १।१६४।४६) इति च मन्त्रलिङ्गम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एता विश्वा सवना तूतुमाकृषे स्वयं सूनो सहसो यानि दधिषे।
वराय ते पात्रं धर्मणे तनः यज्ञो मन्त्रे ब्रह्मोद्यतं वचः।।

ऋक् १०।५०।६।।

इति निदर्शनम्।

लोके चापि पश्यामः, श्येनोऽन्ये वा पक्षिणः स्वयमुड्डयमानाः स्वजिगमिषितं मार्गं मृगयमाणा ख एकत्र तिष्ठन्ति निरुद्धाग्रेगतयः, तदानीं ते स्वधृता भवन्ति। यथा च पक्षिसर्वशरीरगा जीवशक्तिस्तं पक्षिणं धारयति, तथैव तेषां तष्टा सर्वव्यापको विष्णुः सूर्यो वा स्वधृत एवान्यपदाभिधेयस्यास्य विश्वस्याधारभूतः।

भवति चात्रास्माकम्—

सूर्यो हि विश्वे स्वधृतस्तथायं
स्वयन्धृतः खे च खगो यथास्ति।
खगे यथा शक्तिमयोऽस्ति जीवः
सर्वत्र विष्णुः स्वधृतस्तथास्ति ।।११७६।।

सूर्य इत्युपलक्षणं ग्रहोपग्रहसमेतस्य नक्षत्रमण्डलस्य।

स्वास्यः—८४४

स्वरिति, स्वरतेर्ड्प्रत्यये उक्तः।

आस्या—'आस उपवेशने' इत्यादादिको धातुस्तत ***''ऋहलोर्ण्यत्''*** (पा० ३।१।१२४) सूत्रेण वाऽसरूपन्यायेन भावे 'ण्यत्' प्रत्ययः, स्त्रियां टाप्। आसनमास्या, स्वयं स्वस्मिन् वा आस्या यस्य स 'स्वास्यः'। यद्वा—सु इति शोभनार्थक उपसर्गः, शोभना आस्या यस्य स 'स्वास्यः' इति सुपूर्वो बहुव्रीहिः।

'स्वास्थः' इतिनामपक्षे च सु-आङ् पूर्वात्तिष्ठतेः ***''आतश्चोपसर्गे''*** (पा० ३।३।१०६) सूत्रेण स्त्रीविशिष्टभावेऽङ्प्रत्यय आल्लोपः, ततष्टाप्। आस्थानमास्था, शोभना आस्था यस्य सः स्वास्थः। उपसर्जनह्रस्वो बहुव्रीहिसमासः। अर्थश्चोभयोः समानः।

मन्त्रलिङ्गञ्च—

अथेन्द्रो द्युम्न्या भवत्। ऋक् ८।८६।२।।
त्वं कविरभवो देववीतम आ सूर्य रोहयो दिवि। ऋक् ६।१०७।७।।
दिविक्षयं जयतं बर्हिरासदे। ऋक् ५।४६।५।।
विश्वेषां त्मना शोभिष्टमुपेव दिवि धावमानम्। ऋक् ८।३।२१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इत्यादि निदर्शनमात्रम्।

लोकेऽपि च पश्यामो यथा वृक्षशाखा दिवि स्थिता भवति, तस्याञ्च पक्षिण उपविशन्ति, इति ते पक्षिणः स्वास्या भवन्ति स्वधामस्थायित्वात्। तथाऽयं सर्वव्यापको विष्णुर्यथायोनिसमास्यया सर्वमुपवेशयति, यथा गा गोषु, मूर्खान् मूर्खेषु, विदुषश्च विद्वत्स्विति।

भवति चात्रास्माकम्—

स्वास्यो विभुर्विश्वविभूतिशाली
दत्ते समस्मै च समां स आस्याम्।
समानजातीयगणे स विष्ट्वा
स्वास्यः स्वयं स्वास्यमिह प्रणौति।।११८०।।

प्राग्वंशः—८४५

प्रोपसृष्टः 'अञ्चुगतिपूजनयोः' इति भौवादिको धातुस्तत इह गत्यर्थात् ***''ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चाञ्च''*** (पा० ३।२।५६) सूत्रेण 'क्विन्' प्रत्ययः। तस्य च सर्वस्यापहारः। ***''अनिदितां हल उपधायाः क्ङिति''*** (पा० ६।४।२४) सूत्रेण नलोपः। ***''क्विन् प्रत्ययस्य कुः''*** (पा० ८।२।६२) सूत्रेण कुत्वम्। तेन चस्य कः, तस्य जश्त्वे च गः। प्र-अक् सांहितिको दीर्घः—प्रागिति।

वंश इति—'ष्टन वन शब्दे' 'वन षण संभक्तौ', 'टुवम उद्गिरणे' इति चैते भौवादिका धातवस्तत्र वन शब्दे वन संभक्तौ, टुवम उद्गिरण एभ्यो धातुभ्योऽन्वर्थः ***''जनिदाच्युसृवृमदिषमिनमिभृञ्भ्य इत्वन्-त्वन्-त्नण्-क्निन्-शक्-स्य-ढ-ड-टो-अटच्''*** (४।१०४) इत्युणादिसूत्रेण विधीयमानाः प्रत्यया ***''अन्येभ्योऽपि दृश्यन्ते''*** (४।१०५) इत्युणादिसूत्रानुशासनान्निर्दिष्टधातुव्यतिरिक्तधातुभ्योऽपि दृश्यन्त इति 'शक्' प्रत्यय ऊहितः। शकः शकारस्येत्संज्ञा ***''लशक्वतद्धिते''*** (पा० १।३।८) इति सूत्रेण प्राप्ता तस्यास्तथेडागमस्याभावश्चोहितः। तथैव ***''अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति''*** (पा० ६।४।३७) सूत्रप्राप्तोऽनुनासिकलोपस्तथा ***''अनुनासिकस्य क्विझलोः क्ङिति''*** (पा० ६।४।१५) इति सूत्रप्राप्तो दीर्घश्च शिष्टप्रयोगानुरोधान्न भवति। वनतेर्वमतेर्वा नकारस्य मकारस्य चानुस्वारः।

प्रकर्षेण अञ्चति=गच्छति, वनति=शब्दयते संभजते च—'प्राग्वंशः' इति। यद्वा—प्रकर्षेण सर्वत्र गच्छति सर्वञ्च वमति=उद्गिरतीति। अन्तःस्थं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बहिरुद्गमयतीत्यर्थः। तथा च सूर्यः स्वगुणधर्मभिर्विश्वं धारयन् चेष्टयन् शब्दयंश्च सर्वं कालगणनया कालमुद्वमति।

मन्त्रलिङ्गञ्च—

न ते विष्णो जायमनो न जातो देव महिम्नः परमन्तमाप।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः।।

ऋक् ७।६६।२।।

दाधर्थ पृथिवीमभितो मयूखैः। ऋक् ७।६६।३।। इति च

सूर्य एव विष्णुर्विष्णुरेव च सूर्यः। लोकेऽपि च पश्यामो, यतः सूर्य उदयमानो दृश्यते, तदेव दृश्यं पदं प्राचो दिगिति नाम्नोच्यते। सदा चेमां वर्तुलां पृथिवीं परितो भ्राम्यन् सूर्यो जागतजनदृष्टिपथमायाति। एवं सर्वत्र प्राचीदिग्व्याप्ता सर्वत्रैव च सदा दृश्यते। सर्वत्र स्थितैर्जनैः सूर्य उदयमानोऽस्तं यंश्च दृश्यते। उदयमानं पश्यतः सा दिक् प्राची—अस्तं यन्तञ्च पश्यतस्तस्यैव सा दिक् प्रतीचीति। एवमुत्तरदक्षिणे चापि व्याप्नुत आत्मानं सूर्यगतिभेदात्। **''यादृगेव ददृशे तादृगुच्यते''** इत्यृङ्मन्त्रोक्तं नियममनुसरता प्रगमनमेव शब्दं करोति, प्रगमनमेव सङ्कलनहेतुर्भवति, प्रगमनमेव वमति=सौरमण्डलस्थान् मयूखान् बहिरुद्गिरति।

लोकेऽपि च पश्यामः प्रचलद् यानं वाष्पं धूमं वा वमति। यदुक्तं प्रगमनमेव शब्दं करोतीति, तत्रापि दृश्यते लोके—गर्भाशयाद्बहिरुद्यन् जातको रोदनरूपं शब्दं करोति। एवं लोकं दृष्ट्वा बहुविधा ऊहा ऊहितव्या भवन्ति। इति दिङ्मात्रं निदर्शनम्।

यदुक्तं प्रदिशोऽपि सूर्याश्रयास्तत्र मन्त्रलिङ्गम्—

सप्तार्धगर्भा भुवनस्य रेतो विष्णोस्तिष्ठन्ति प्रदिशा विधर्मणि ।
ते धीतिभिर्मनसा ते विपश्चितः परिभुवः परि भवन्ति विश्वतः।।

ऋक् १।१६४।३६।।

तथा—

राजा वृत्रं जङ्घनत् प्रागपागुदगथा यजाते वर आ पृथिव्याः।

ऋक् ३।५३।११।।

पूर्वामनु प्रदिशं याति चेकितत् संरश्मिभिर्यतते दर्शतो रथो दैव्यो दर्शतो रथः। ऋक् ६।१११।३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

प्राग्वंश उक्तः स हि विष्णुरेकः
सूर्यः स वा विष्णुरिलां दधानः ।
प्राची हि सा दिग् भुवनेऽस्ति रूढा
सूर्योदयो लग्नमियर्त्ति यत्र ।।११८१।।

तथा—

कालो हि सूर्यो गणनापि चार्कात्
स्वेष्टञ्च सर्वत्र पृथक् पृथक् स्यात्।
इष्टेन हीनो विफलस्तथा स्यात्
वन्ध्या सुसूषूः क्षयते यथायुः ।।११८२।।

वंशवर्धनः—८४६

वंशशब्दो व्युत्पादितो वनतेर्वमतेर्वौणादिके शकि प्रत्यये। वर्धनः इति—'वृधु वृद्धौ' इति भौवादिकाद्धातोर्णिच्, रपरो गुणः। वर्धि इत्यस्य धातु-संज्ञायां नन्द्यादि ल्युर्योरनो— वर्धनः। वंशस्य वर्धनो वंशवर्धनः। वंशशब्दो हि लोके पितृपितामहादिप्रबन्धपरम्परायां प्रसिद्धः, वेणुनामके काष्ठे च। वेणुनामके काष्ठे यथा पर्वाणि भवन्ति, तथा पित्रादिप्रबन्धे पुत्रपौत्रादिरूपं पर्व, काले च पलघटिकादिनमाससंवत्सरादिरूपं पर्व भवति। तस्मादेतावपि वंशनामधेयौ। तं च वंशं यो वर्धयति स वंशवर्धनो भगवान् विष्णुः सूर्यो वा।

कालो हि वंशः स च सूर्यगतिरूपः, तस्य च वर्धयिता भगवान् भास्करः स्वसातत्यगमनेन। द्वादशराशिषु सङ्क्रममाणस्य सूर्यस्यैकराशिसङ्क्रमो मासस्तथा द्वादशराशिषु सूर्यस्य सङ्क्रम एको वत्सरः संवत्सरो वा। एवञ्च मासपर्वमयः संवत्सरः संवत्सरपर्वमयञ्च भचक्रं, ततो युगं, ततो मन्वन्तराणि। एवं महार्थस्य मूलभूतं विष्णुं सूर्यं वा व्यञ्जयितुं वंशवर्धन इति विष्णोर्नाम।

मन्त्रलिङ्गञ्च—

यथाहान्यनुपूर्वं भवन्ति यथा ऋतवः ऋतुभिर्यन्ति साधु ।
यथा न पूर्वमपरो जहात्येवा धातरायूंषि कल्पयैषाम्।।

ऋक् १० ।१८ ।५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महत्तन्नाम गुह्यं पुरुस्पृग् येन भूतं जनयो येन भव्यम् ।
प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशन्त पञ्च।।

ऋक् १० ।५५ ।२।।

लोके च पश्यामो बीजे वृक्षस्य, क्षुपस्य प्राणिनो वा यावान् विस्तारस्तस्य मनुष्यबुद्ध्यगोचरस्य प्रत्यक्षं दर्शयिता सूर्य एवं कालकारणत्वात् कालरूपः। अतः स वंशवर्धन इति।

अथ च पुनर्लोके बाल्यावस्थातो वार्धक्यमुपगतो बालो न पुनः प्रत्यावृत्य बालभावमुपगच्छति तस्मिन्नेव शरीरे। कुत एवं? वंशवर्धनो हि स नहि वर्धमानं कालं प्रत्यावर्त्य लघयति=ह्रस्वयतीत्यर्थः। उक्तञ्चास्माभिः स्वोपज्ञसत्याग्रहनीतिकाव्ये—चतुर्थाध्यायस्य नानावर्षगणीये प्रथमे पादे—

पुरस्ताल्लम्बकेशोऽयं पृष्ठतश्चेन्द्रलुप्तवत् ।
आलम्ब्याग्रं नयेत् पृष्ठे गतः कालो न भूतिदः।। श्लोक ३१।।

भवति चात्रास्माकम्—

विष्णुर्हि लोके वत वंशवर्धनो
गुप्तं स दृश्यं कुरुते च वर्धनः ।
हिरण्यगर्भः पतिरस्य तस्थुषो
व्यनक्ति तत्तद् यदु तस्य गर्भगम्।।११८३।।

तस्मिन् ह तस्थुर्भुवनानि विश्वा। यजु० ३१।१९ इति च मन्त्रलिङ्गम्।

❖ ❖ ❖

भारभृत् कथितो योगी योगीशः सर्वकामदः।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ।।१०४।।

८४७ भारभृत्, ८४८ कथितः, ८४९ योगी, ८५० योगीशः, ८५१ सर्वकामदः। ८५२ आश्रमः, ८५३ श्रमणः, ८५४ क्षामः, ८५५ सुपर्णः, ८५६ वायुवाहनः।।

भारभृत्—८४७

भारः—भृञः ***"अकर्तरि च कारके संज्ञायाम्"*** (पा० ३।३।१९) इति सूत्रेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्मणि घञ् वृद्धी रपरा। भृत्—भृञः कर्तरि क्विपि तुगागमः। भारस्य भृदिति भारभृत्। भ्रियते=धार्यते पोष्यते वेति भारस्तं बिभर्तीति 'भारभृत्'। एवञ्च सर्वमिदं विश्वं भाररूपं तस्य धर्ता पोषयिता च यः स भारभृत्।

मन्त्रलिङ्गञ्च—

पञ्चारे चक्रे परिवर्तमाने तस्मिन्ना तस्थुर्भुवनानि विश्वा।

तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः।।

ऋक् १।१६४।१३।।

लोके च पश्यामः—यथा देहाभिमान्यात्मा अदृष्टवशात् प्राप्तं शरीररूपं भारं वहति न चोत्सीदति, एवं जगद्रूपं भारं वहन्नपि भगवान् क्लेशरहितो भारभृदुच्यते।

भवति चात्रास्माकम्—

स भारभृद् विश्वमसंख्यरूपं
बिभर्ति विष्णुः स हि भूरिभारः।
नोत्सादमन्वेति न शीर्यते वा
सनात् सनाभिर्वहते ह चक्रम् ।।११६४।।

कथितः—८४८

'कथ वाक्यप्रबन्धे' चौरादिको धातुरदन्तस्ततो 'णिच्' तस्मिंश्च परतोऽल्लोपः। अल्लोपस्य स्थानिवद्भावान्न वृद्धिः। तस्माण्ण्यन्तात् कर्मणि क्त इडागमो, ***''निष्ठायां सेटि''*** (पा० ६।४।५२) सूत्रेण णेर्लोपः—'कथितः' इति।

यं वेदवाचोऽचकथन्निति कथितः। तथा च मन्त्रलिङ्गम्—

अपूर्वेणेषिता वाचो यं वदन्ति यथायथम्।

वदन्तीर्यत्र गच्छन्ति तदाहुर्ब्राह्मणं महत्।। अथर्व १०।८।३३।।

भवति चात्रास्माकम्—

विष्णुर्हि लोके कथितः पुराण-
स्तस्यान्तमाप्नोति न वाग् वचोभिः।
तस्मात् सनादेव च वर्तमाना
वागस्ति वक्तुं प्रतिजन्तुनिष्ठा ।।११८५।।

इह वेदवाग्वचनान्यधिक्रियन्ते। वेदवाणीमधिकृत्य च पुनरस्माकम्—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुर्हि लोके कथितः पुराण-
स्तस्यान्तमाप्नोति न वेदवाणी ।
तस्मात् सनात् सा कथितं तदेव
वाग् यस्यतीहागमवस्तु वक्तुम् ।।११८६।।

लोकेऽपि च पश्यामः—भगवतः कथितस्य सनातनत्वात् तत्कथनसाधनेन जिह्वयापि सदैव भाव्यम्। तस्मात् कथितः कथनसाधनेन सर्वं विश्वं व्याप्नोति। यथा चायं विष्णुः कथितेति नाम बिभर्ति, तथा 'दर्शतः'=पश्यति सर्वं, पश्यन्ति वा सर्वे यमिति दर्शतो दर्शनो वा। 'श्रवणः'—शृणोति सर्वेषां सर्वाणि वचांसि, शृण्वन्ति सर्व एनमिति वा। 'स्पर्शनः'—स्पृशति सर्वाणि स्वव्याप्त्या स्पृशयन्ति सर्व एनमिति वा। 'रूपः'—रूपयति सर्वाणि सर्वे एनं रूपयन्तीति वा। 'घ्राणः'—जिघ्रति सर्वाणि, जिघ्रन्ति सर्वे एनमिति वा, इति बहूनि नामानि धत्ते।

यश्चैषां ज्ञानेन्द्रियविषयाणां विभक्ता तमिमे विषयाः प्रकटयन्तीति। तस्य च विषयरूपस्य नैतानीन्द्रियाणि पारं यान्ति, यतो हि स इन्द्रियाणां प्रवर्तयिताऽतो नेन्द्रियगोचरः स इति।

मन्त्रलिङ्गञ्च—

स रेवाँइव विश्पतिर्दैव्यः केतुः शृणोतु नः। उक्थैरग्निर्बृहद्भानुः।।

ऋक् १।२७।१२।।

दर्शं नु विश्वदर्शतं दर्शं रथमधि क्षमि। एता जुषत मे गिरः।।

ऋक् १।२५।१८।।

भवति चात्रास्माकम्—

यथास्ति शश्वन्निजशक्तिसिद्धो
विष्णुस्तथा खानि च शक्तिमन्ति।
सिद्धानि सिद्धं गमयन्त्यजस्रं
जीवं सनात्तञ्च बुभुत्सुमन्तः।।११८७।।

योगी—८४६

'युजिर् योगे' क्रैय्यादिको धातुस्ततो ***"हलश्च"*** (पा० ३।३।१२१) सूत्रेण करणे 'घञ्', गुणः, ***"चजोः कु घिण्यतोः"*** (पा० ७।३।५२) सूत्रेण जस्य गः="योगः"। ततः ***"अत इनिठनौ"*** (पा० ५।२।११५) सूत्रेण मत्वर्थीय इनिः,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

''यस्येति च'' (पा० ६।४।१४८) इति सूत्रेण अकारलोपः=योगीति। एवञ्च युज्यते=सम्बध्यते येनापरमपरेण स योग इति तु परमार्थः।

मन्त्रलिङ्गञ्च—

एकस्मिन् योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात्।
नवा यन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥

ऋक् ७।६७।८॥

लोके च दृढं बन्धनमेव योगः। योगैर्युक्तञ्चेदं शरीरं योगि, सकलञ्च विश्वं परस्परं बद्धं योगि, एष च योगरूपो गुणो भगवतो विष्णोरेव सर्वत्र व्याप्तः। पक्षतिबद्धः पक्षी योगी, सर्वत्रैवं ज्ञेयम्।

भवति चात्रास्माकम्—

योगी स विष्णू रथयोगयुक्तो
योगी स विश्वं न वियौति मार्गात्।
वपुस्तथैवास्ति च योगयुक्तं
सर्वायुरन्वेति च तद्धि जीवः ॥११८८॥

जीवोऽप्यत एव योगी।

योगीशः—८५०

उक्तः प्राग् 'योगी' शब्दः।

ईष्टे इतीशः। इगुपधलक्षणः 'कः'। योगानां योगिनां वेशिता 'योगीशः'। लोके चैतद् दृश्यते, स्थावरे जङ्गमे वा योगस्य विचित्रं माहात्म्यं दृश्यते सर्वत्र। तथाहि—शरीरे सर्वाण्यस्थीनि योगमूलकान्येव शरीरं वहन्ति। तेषामस्थ्नां क ईशितेति चेत्? स सर्वेश्वर एवेति। योगोऽस्यास्तीति योगी—आत्मा। तेषां सर्वत्रावस्थितानां योगिनां जीवात्मनां क ईशिता? स एव विश्वतश्चक्षुः सर्वेश्वर इति। अर्थाच्चैतदापद्यते—यो योगं जानाति स वियोगमपि जानाति एतेन वियोगीशोऽपि व्याख्यातो भवति।

लोकेऽपि च पश्यामः—सारथिरश्वान् रथे युनक्ति, स एव च वियुनक्ति गन्तव्यमध्वानमतिक्रम्य। एवं सर्वत्र प्रतिपदं तस्य योगीशस्य व्यापकता दृश्यते, तस्मात् स विष्णुर्योगीशः। मन्त्रलिङ्गञ्च—

तमीशानं जगतस्तस्थुषस्पतिं धियं जिन्वमवसे हूमहे वयम्।

यजुः २५।१८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

सर्वं हि मन्ये यदिहास्ति दृष्टं
योगेन युक्तञ्च विभाति तत्तत् ।
यस्तस्य बन्धुः स हि वात्र नाम्ना
योगीश उक्तः सविताथ विष्णुः ।।११८९।।

सर्वकामदः—८५१

सर्व-कामशब्दौ कृतव्युत्पादनौ। 'सर्व' शब्दः—*''सर्वधृष्व०''* (उ० १।१५३) इत्यादिनोणादिसूत्रेण वन्नन्तो निपातितः। 'काम' शब्दश्च 'कमेः' कर्मणि घञि वृद्धिः=कामः। सर्वान् कामान् ददातीति 'सर्वकामदः'। सर्वकामोपपदाद्ददातेः क आल्लोपश्च। मन्त्रलिङ्गञ्च—

एवा न इन्दो अभि देववीतिं परिस्रव नभो अर्णश्चमूषु।
सोमो अस्मभ्यं काम्यं बृहन्तं रयिं ददातु वीरवन्तमुग्रम्।।
ऋक् ६।६७।२१।।

यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।
ऋक् १०।१२१।१०।।

निधीनां त्वा निधिपतिँ हवामहे। यजुः २३।१६।।

परिपूर्णकाम एव सर्वस्य कामयितुः कामान् दातुं शक्नोत्यतः विष्णुरेव सर्वकामदः परिपूर्णकामः।

भवति चात्रास्माकम्—

स सर्वकामदो विष्णुर्यथाकामाभिसंस्तुतः ।
स्तोत्रे बुद्धिं प्रदायाशु, तं प्रीणात्यर्थकामिनम्।।११९०।।

तथा च मन्त्रलिङ्गम्—

स हि त्वं देव शश्वते वसु मर्ताय दाशुषे ।
इन्दो सहस्रिणं रयिं शतात्मानं[1] विवाससि।। ऋक् ६।६८।४।।

आश्रमः—८५२

आङुपसर्गः। 'श्रमु तपसि खेदे च' इति दैवादिको धातुस्ततो 'णिच्'

१. स एव तत्र बहुधा बोभवतीत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृद्धिश्च। **''अमन्ताश्च''** (धातु० १।५६०) इति घटादिगणसूत्रेणामन्तत्वात् मित्त्वे **''मितां ह्रस्वः''** (पा० ६।४।९२) सूत्रेण ह्रस्वः। **''एरच्''** (पा० ३।३।५६) सूत्रेण करणे 'अच्' प्रत्ययो णेर्लोपः। आश्रम्यन्ते कर्मानुरूपां योनिं प्रापय्य येनेत्याश्रमः। यद्वा—आश्राम्यन्ति=खेदं प्राप्नुवन्ति तपस्यन्तो यस्मा इति आश्रमः, घञ् प्रत्ययः सम्प्रदाने। **''नोदात्तोपदेशस्य०''** (पा० ७।३।३४) इति वृद्धिनिषेधश्च। मन्त्रलिङ्गञ्च—

भूम्या अन्तं पर्येके चरन्ति रथस्य धूर्षु युक्तासो अस्थुः।
श्रमस्य दायं विभजन्त्येभ्यो यदा यमो भवति हर्म्ये हितः॥

ऋक् १०।११४।१०॥

भवन्ति चात्रास्माकम्—

स आश्रमो विष्णुरिहास्ति सिद्धः
श्रमस्य दायं विभजत्यवश्यम्।
ते लब्धदायाः सुखिनः स्वयोनौ
दायं यथाकाममथो चरन्ति॥११६१॥

लोकेऽपि दायं श्रमजं मनुष्यो
ददाति मर्त्याय स वा पशुभ्यः।
एवं हि नित्यं स गभस्तिमाली
रात्रिं करोत्याश्रमणाय नित्यम्॥११६२॥

रात्रिः कफस्तत्र तमः स्वभावा-
न्निद्रास्ति वा श्लेष्मतमोऽनुसृष्टा।
दिनं श्रमायास्ति निशाऽश्रमाय
दायो निशा तत्र दिनं श्रमश्च॥११६३॥

सूर्यो हि स्वप्रकाशेनौजसा जागरणेन वा सर्वं विश्वं क्रियाभिः श्रमयतीति सूर्य 'आश्रमः'। निद्रा श्लेष्मतमो भवा भवतीत्यायुर्वेदविदां समयः।

श्रमणः—८५३

'श्रमु तपसि खेदे च' इति दैवादिको धातुस्ततः करणेऽधिकरणे वा 'ल्युट्' प्रत्ययः। श्रम्यतेऽनेन यत्र वेति 'श्रमणः'। यद्वा—श्रमीति ण्यन्ताद्धातोर्नन्द्यादिर्ल्युः, योरनो, णेर्लोपः। श्रमयति यत्तेजसेद्धो विश्वमिदमिति 'श्रमणो' विष्णुः सूर्यश्च।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

एकः सुपर्णः स समुद्रमाविवेश स इदं विश्वं भुवनं विचष्टे ।
तं पाकेन मनसापश्यमन्तितस्तं माता रेह्लि स उ रेह्लि मातरम्।।

ऋक् १० ।११४ ।४ ।।

सुपर्णं विप्राः कवयो वचोभिरेकं सन्तं बहुधा कल्पयन्ति ।
छन्दांसि च दधतो अध्वरेषु ग्रहान्त्सोमस्य मिमते द्वादश।।

ऋक् १० ।११४ ।५ ।।

लोकेऽपि च पश्यामो—येन यत्र वा श्रम्यते, यो वा श्रमयति, तावुभौ खेदं तापं वा प्राप्नुतः। तथा च—

न्यक् तपति सूर्यः। ऋक् १० ।६० ।११।। इति मन्त्रलिङ्गम्।

भवति चात्रास्माकम्—

स एव विष्णुः श्रमणस्तपस्वी
श्रमेण दाधार दिवं धरां च।
तपः श्रमो वास्त्युभयोः समानः
सन्तापयन् द्यां क्रमते रविश्च।।११६४।।

क्षामः—८५४

'क्षै जै षै क्षये' भौवादिका इमे धातवः क्षयार्थकाः। क्षामशब्दश्च 'क्षि क्षये' तथा 'क्षि निवासगत्योः' इत्युभाभ्यां धातुभ्यां निष्पन्नो, निवासं गतिं नाशञ्चाभिधत्ते। एवञ्च 'क्षै' धातोः क्षयार्थकात् कर्तरि 'क्त' स्तस्य च ***"क्षायो मः"*** (पा० ८ ।२ ।५३) इति सूत्रेण मकारादेशः=क्षाम इति। एवञ्चेहान्तर्गर्भितण्यर्थग्रहणात्, क्षायति=निवासयति, गमयति, नाशयति वा सर्वमिति 'क्षामः'।

यद्वा—क्षां=पृथिवी मिमीते इति 'क्षामः'। क्षारूपकर्मोपपदात् 'माङ् माने शब्दे च' इति धातोः ***"आतोऽनुपसर्गे कः"*** (पा० ३ ।२ ।३) इति सूत्रेण 'कः' प्रत्ययः, आल्लोपश्च। क्षा इति विश्वोपलक्षणम्। एवञ्च विश्वमिदं य इयत्तया निबध्नाति, गतिदानेन शब्दवच्च करोतीति 'क्षामः'।

यद्वा—'क्षमू सहने' धातोः पचाद्यचि, क्षमते यथाव्यवस्थं विश्वं नियन्तुमिति क्षमः। क्षम एव च 'क्षामः' स्वार्थिकोऽण्। मन्त्रलिङ्गञ्च—

प्र तद् विष्णुः स्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ।।

ऋक् १ ।१५४ ।२ ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वक्तुर्विवक्षाधीनानि च कारकाणि। तथा च यथेह 'भवने वसामि' इह वासे भवनप्रयुक्तं सौकर्यं द्योतयितुं 'भवनं मां वासयति' इति प्रयुङ्क्ते। अमुथैव, भुवनानि विष्णौ क्षियन्ति, विष्णुर्वा भुवनानि वासयति स्वस्मिन्निति 'क्षामो' विष्णुरित्युपपद्यते।

भवति चात्रास्माकम्—

क्षामोऽस्ति विष्णुः सकलाप्तविश्वो
विश्वञ्च वा क्षाममिहास्ति सर्वम्।
वक्तुर्विवक्षावश एव सर्वं
स्थाल्यां पचाम्यापचते च सैव[1] ।।११६५।।

सुपर्णः—८५५

'पार तीर कर्मसमाप्तौ' इति चौरादिको धातुः। तत्र 'पार' धातोः 'णिच्' ण्यन्ताच्च पचाद्यच्, ततो णिलोपः। पारयति=सम्यगाप्नोति भचक्रमिति 'पारः'। नयतेर्डः, टिलोपश्च। नयतीति 'नः'। भचक्रं सम्यक् समाप्नुवन्नयतीति 'सुपारणः'। 'सुपारण' एव पृषोदरादिलक्षण उपधाह्रस्वे तल्लोपे च 'सुपर्णः'। ***''पूर्वपदात् संज्ञायामगः''*** (पा० ८।४।३) इति सूत्रेण नकारस्य णकारः। रेफस्य भिन्नपदस्थत्वात् ***''रषाभ्यां नो णः समानपदे''*** (पा० ८।४।१) सूत्रस्येहाप्राप्तिः।

'पृणाते'र्वा पर्णः। **'अक्षरवर्णसामान्यान्निर्ब्रूयात् न त्वेव न निर्ब्रूयात्'** (नि० २।१) इति निरुक्तकारोक्तेः। तथा च सुपर्णः शोभनपर्णः शोभनपतनो वा। सुपर्णः=सूर्यः। तथा च मन्त्रलिङ्गम्—

सुपर्णो धावते दिवि। ऋक् १।१०५।१।।

इन्द्रं मित्रं वरुणमग्निमाहुरथो दिव्यः स सुपर्णो गरुत्मान्।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः ।।
ऋक् १।१६४।४६।।

यदुक्तं—नयतेर्डे 'न' इति, तत्र मन्त्रलिङ्गम्—

कृष्णं नियानं हरयः सुपर्णा अपो वसाना दिवमुत्पतन्ति।
ऋक् १।१६४।४७।।

---

१. सा एव स्थाली।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अत्र सुपर्णाः=मेधाः, हरयः=किरणाः, नियानं=नीचैर्यानम्। पृणातेः सुपर्णत्वे मन्त्रलिङ्गम्—

द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति।।

ऋक् १०।१६४।२०।।

यदुक्तं—'मेघः सुपर्णः', तत्र मन्त्रलिङ्गम्—

दिव्यं सुपर्णं वायसं बृहन्तमपां गर्भं दर्शतमोषधीनाम्।
अभीपतो वृष्टिभिस्तर्पयन्तं सरस्वन्तमवसे जोहवीमि ।।

ऋक् १।१६४।५२।।

यच्चोक्तम्—'अग्निः सुपर्णः', तत्र मन्त्रलिङ्गम्—

भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नयः। ऋक् १।१६४।५१।।

एवं विविधै रूपैः सुपर्ण आत्मानं व्यनक्ति।

भवतश्चात्रास्माम्—

विष्णुः सुपर्णः स हि वास्तु सूर्यः
सोऽग्निः स वा मेघ उतास्तु पक्षी।
तमेव मित्रं तमुवाच दिव्यं
तं वा गरुत्मन्तमुदाहरन्ति ।।११६६।।
वेदोऽस्ति काव्यं स हि शब्दरूपो
जगच्च काव्यं तदिहास्ति दृश्यम् ।
कर्ता द्वयोरस्ति सुपर्ण एकः
स एव वाच्यं वचनञ्च वेद ।।११६७।।

वायुवाहनः—८५६

वातीति—'वायुः'। 'वा गतिगन्धनयोः' इति धातुरादादिकः, ततः ***"कृवापाजिमिस्वदिसाध्यशूभ्यः उण्"*** (उ० १।१) इत्युणादिसूत्रेण 'उण्' प्रत्ययः, तस्मिंश्च ***"आतो युक् चिण्कृतोः"*** (पा० ७।३।३३) सूत्रेण 'युक्'। वाहनः—'वह प्रापणे' भौवादिको धातुस्ततो 'णिच्', ततो ल्युर्योरनः, णिलोपश्च। वाहयतीति 'वाहनः'। वायुना=तत्तद्भेदभिन्नैर्वायुविकारैर्वाहयति=प्रवर्तयति सर्वं जगदिति 'वायुवाहनो' विष्णुः सूर्यो वा। एवञ्च लोके प्रसिद्धो 'वादल' शब्द उपपन्नो भवति। तथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हि—वायूनां दलं वादलं जलरसपूर्णो वायुसमूहः वाष्पसमूहो वा वादलेत्यभिख्यां लभते।

मन्त्रलिङ्गञ्च—

अहमेव वात इव प्रवाम्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथिव्यै तावती महिना सम्बभूव।।

ऋक् १० ।१२५ ।८ ।।

सूर्य एव च वातदलस्य वाहनः प्राधान्येन, तस्मात् सूर्योऽपि 'वायुवाहन' इत्युक्तो भवति।

भवति चात्रास्माकम्—

वायुवाहन उक्तोऽसौ, लोके विष्णु रविश्च सः ।
शकुनिः स सुपर्णो वा, स वा वायुदलः स्मृतः ।।११६८।।

❖ ❖ ❖

धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्तानियमोयमः।।१०५।।

८५७ धनुर्धरः, ८५८ धनुर्वेदः, ८५६ दण्डः, ८६० दमयिता, ८६१ दमः। ८६२ अपराजितः, ८६३ सर्वसहः, ८६४ नियन्ता, ८६५ नियमः (अनियमः), ८६६ यमः (अयमः)।।

धनुर्धरः—८५७

'धन धान्ये' इति जौहोत्यादिको धातुस्ततः ''*अर्तिपृवपियजितनिधनितपिभ्यो नित्*'' (उ० २ ।११७) इत्युणादिसूत्रेण नित् 'उसिः' प्रत्ययः, तेन 'धनुः' इति। धृञः पचाद्यचि 'धरः' उक्तः। धनुषो धरः='धनुर्धरः', विष्णुः सूर्यो वा।

मन्त्रलिङ्गञ्च—

अहं रुद्राय धनुरातनोमि ब्रह्मद्विषे शरवे हन्तवा उ।
अहं जनाय समदं कृणोम्यहं द्यावापृथिवी आविवेश।।

ऋक् १० ।१२५ ।६ ।।

लोकेऽपि च पश्यामः—सूर्यकृतं प्रसिद्धमिन्द्रधनुर्द्यवि। नेत्रे सूर्यदैवते, ते च धनुरिव भ्रुवौ धारयतः। एवमसौ धनुर्धरो लोकं व्याप्नोति सर्वमिति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

धनुर्धरो विष्णुरनन्तशक्ति-
र्धनुर्दधानो दिवमाविवेश ।
दृश्यं धनुः सूर्यकृतञ्च तस्य
नेत्रे धनुर्धारयतस्तथैव ॥११९९॥

धनुर्वेदः—८५८

धनुरुक्तः। वेद—इति 'विद्लृ लाभे' धातोः पचाद्यच्, गुणः। यद्वा—धनुर्विन्दति=लभत इति 'धनुर्वेदः'। ***''कर्मण्यण्''*** (पा० ३।२।१) इत्यण्। यद्वा—धनुर्वेदयति=स्वरक्षार्थं सर्वेभ्य इति 'धनुर्वेदः'। 'विद्लृ' धातोर्ण्यन्ताद् ***'अज्विधिः सर्वधातुभ्यः'*** (वा० ३।१।१३४) इत्यनुशासनाद् 'अच्' प्रत्ययो णेर्लोपः। अन्तिमः पक्षः श्रेयान्।

मन्त्रलिङ्गञ्च्—

अवतत्य धनुष्ट्वँ सहस्राक्ष शतेषुधे ।
निशीर्य शल्यानां मुखा शिवो नः सुमना भव॥ यजुः १६।१३॥

भवति चात्रास्माकम्—

धनुर्हि लब्ध्वा स दधाति सर्वं
गवादिकानां धनुरस्ति शृङ्गम् ।
सिंहादिहिंस्रस्य नखादिरूपं
धनुश्च मर्त्यस्य सुबुद्धिरत्र ॥१२००॥

एवं तद्धनुषः सर्वत्र व्याप्तत्वात् स धनुर्धरो विष्णुः 'धनुर्वेदः' इत्युच्यते।

दण्डः—८५९

'दमु उपशमे' दैवादिको धातुस्ततो ***''ञमन्ताड्डः''*** (उ० १।११४) इत्युणादिसूत्रेण 'डः' प्रत्ययः। ञमिति प्रत्याहारस्तेन 'ञ म ङ ण न' इत्येते गृहीताः भवन्ति। बाहुलकाड्डस्य नेत्संज्ञा। दमयतीति 'दण्डो', डकारयोगेन मकारस्य परसवर्णो णकारः। दमयति=उपशमयति सर्वाणि ज्योतींषि स्वतेजसा, अतः सूर्यो 'दण्डः'। विष्णुश्च 'दण्डः', स दण्डरूपेण स्वनियमेन नियमयति सर्वं रुद्ररूपः।

मन्त्रलिङ्गञ्च—

ततो वि तिष्ठे भुवनानु विश्वोतामूं द्यां वर्ष्मणोपस्पृशामि।
ऋक् १०।१२५।७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

दण्डः स विष्णुर्दमयत्यशेषं
यथाव्यवस्थं नयते पुरुत्रा ।
तमेव दण्डं प्रणमन्ति धीराः
सूर्यं तथा विष्णुमुरुप्रगाथम् ॥१२०१॥

दमयिता—८६०

'दमु उपशमे' दैवादिकाद्धातोर्णिच्, वृद्धिः, अमन्तत्वान्मित्त्वे ***"मितां ह्रस्वः"*** (पा० ६।४।९२) सूत्रेण ह्रस्वः। दमि इत्यस्य ***"सनाद्यन्ता धातवः"*** (पा० ३।१।३२) सूत्रेण धातुसंज्ञा, ताच्छील्ये ***"तृन्"*** (पा० ३।२।१३५) इति तृन्। तस्य चेडागमो, गुणोऽयादेशः, प्रातिपदिकत्वे सावनङ्ङादि='दमयिता'। दमयति= उपशमयति तच्छीलो 'दमयिता'। अर्थाज्जगति जगदीशकृताया जगद्व्यवस्थाया भञ्जकमुपशम्य स्ववशे स्थापयितेत्यर्थः।

मन्त्रलिङ्गञ्च—

अथेदं विश्वं पवमान ते वशे त्वमिन्दो प्रथमो धामदा असि।

ऋक् ९।८६।२८॥

यदद्य कच्च वृत्रहन् उदगा अभि सूर्यः। सर्वं तदिन्द्र ते वशे।

ऋक् ८।९३।४॥

लोकेऽपि च पश्यामः—सबलो निर्बलो वा सर्वोऽपि स्वस्य विरोधयितारं यथाकथञ्चिदपि स्ववशगं कर्तुं प्रयतते। सोऽयं गुणो दमयितेति नाम बिभ्रतो भगवतो विष्णोरेव सर्वत्र जगति व्याप्तः। एवञ्च विष्णोः, सूर्यस्य, इन्द्रस्य, आत्मनो वा 'दमयिता' इति नाम।

भवति चात्रास्माकम्—

विष्णुर्हि विश्वं स्ववशे विधत्ते
तृन्नन्त[1] एषोऽथ दमोऽथ दण्डः।
विघ्नं विहन्तुं सबलोऽबलो वा
यथाबलं यस्यति[2] नौति[3] तं वा ॥१२०२॥

१. तृन्नन्तः=दमयिता। २. यस्यति=प्रयतते। ३. विघ्नापहाराय विधिर्नमस्यः॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दमः—८६१

'दमु उपशमे' दैवादिकाद्धातोः पचाद्यच् प्रत्ययः कर्तरि, दाम्यतीति 'दमः'। दुःस्वभावानां भगवत्कृतजगन्नियमभञ्जकानां दमितेत्यर्थः। अयञ्च दमनरूपो गुणो लोकेऽपि दृश्यते—यथा अंशतः सर्वेऽपीन्द्रियाणि दाम्यन्ति मनश्चोपशमयन्ति। यद्वा—सर्वोऽप्येकस्मिन् कर्मणि प्रसक्तोऽन्यतो दाम्यति स्वमात्मानमिति।

तथा च भगवान् विष्णुः सूर्यादीन् स्वस्वकर्मणि प्रसज्जयितुं सनियमं दाम्यति नितराम्। चक्षुषी दर्शने, श्रोत्रे श्रवणे, मनो मनने, नासिकां गन्धोपादाने, जिह्वां वचने, रसनां रसने चैव प्रसज्जयति। अयञ्चात्राभिप्रेतोऽर्थः—यस्य यत्कर्म नियतीकृतं, तत्तदेव कर्म करोति विकारादृते। एवं सर्वं दाम्यन् विष्णु'र्दम' उच्यते।

भवति चात्रास्माकम्—

दमो हि सर्वत्र विराजमानः
क्रियासु सर्वं स नियम्य युङ्क्ते ।
तमेव विष्णुं दममत्र वै ग्रहा
नमन्ति सर्वे परिधौ भ्रमन्तः ॥१२०३॥

अपराजितः—८६२

परा=उपसर्गः। 'जि जये' तथा 'जि अभिभवे' भौवादिकौ धातू। 'जि' भाषार्थश्चौरादिकोऽपि कैश्चिदिष्यते, तस्य नात्र ग्रहणम्। जयाभिभवार्थाभ्यां धातुभ्यां कर्मणि 'क्तः', अनिट्, गुणाभावः—पराजितः। न पराजित इति नञ्समासे नञो नलोपः। परैर्न पराजीयते, पराभिभूयते वा स 'अपराजितो' विष्णुः।

तथा च मन्त्रलिङ्गम्—

महाँ असि सोम ज्येष्ठ उग्राणामिन्द ओजिष्ठः।
युध्वा सञ्छश्वज्जिगेथ। ऋक् ६।६६।१६॥

इति निदर्शनम्। सर्वो हि लोकोऽपराजितो बुभूषुर्नितरां प्रयतमानो दृश्यते।

भवति चात्रास्माकम्—

विष्णुर्हि लोकेऽस्त्यपराजितः सखा
मनोऽपि लोकेऽस्त्यपराजितं सखा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सखापि लोकेऽस्त्यपराजितः सखा
सखाऽस्ति चात्मा यदि नापराजितः[1] ।।१२०४।।

सर्वसहः—८६३

'सर्व' शब्द उक्तः। 'षह मर्षणे' भौवादिको धातुः, ततः कर्त्रर्थे पचाद्यच् प्रत्ययः। सहत इति सहः, सर्वस्य सहः='सर्वसहः'। न च ***"पूःसर्वयोर्दारिसहोः"*** (पा० ३।२।४१) सूत्रेण खचः प्राप्तिः कर्मणः शेषत्वेन विवक्षणात् संज्ञात्वाद्वा। इह सूत्रे सहिग्रहणमसंज्ञार्थम्। एवञ्च समुद्रे पतद्भिर्नदनद्यादिप्रवाहैः समुद्र इव प्राकृतविकारैरविक्रियमाणः कूट इव तिष्ठन्नित्यर्थः।

मन्त्रलिङ्गञ्च—

नाक्षस्तप्यते भूरिभारः। ऋक् १।१६४।१३।। सर्वं सहत इत्यर्थः।

भवति चात्रास्माकम्—

विष्णुर्हि सर्वं सहते पुरुत्रा
स एव गां वापि दिवं तथा च।
स एव दाधार चरं स्थिरं वा
तस्मिन् ह तस्थुर्भुवनानि विश्वा ।।१२०५।।

लोके चापि पश्यामो—जीवोऽपि सर्वमायुः सर्वं सहमानः कुर्वंश्च कर्माणि क्षपयत्यायुः, स एष विष्णोरेव गुणः।

नियन्ता—८६४

नि—उपसर्गः। 'यम उपरमे' भौवादिको धातुस्ततः 'तृच्' प्रत्ययः, अनिट्। अनुस्वारपरसवर्णौ। सावनङ्ङादि। नियच्छति=निबध्नाति सर्वं व्यवस्थितवर्त्मना गमनायेति 'नियन्ता' विष्णुः।

तद्यथा लोकेऽपि पश्यामो—हृदयं नियन्त्रा नियन्त्रितं नित्यं स्वकक्षायामासीनं कर्मणि प्रवर्तते सततं विकारादृते। एवमूह्यं सर्वत्र। यत्तूक्तमृते विकारादिति, तत्रैवमवधार्यम्—सर्पदष्टो मृतोऽपि विषक्षपणकर्मणा जीवति। जले निमज्य मृतोऽप्येकमहोरात्रं पर्युषितोऽपि च कृतसम्यगुपचारो जीवति।

---

१. ना इति निषेधार्थे। पराजितः विषयैः पराभूतः, तथा नेति=नापराजितः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रसङ्गप्राप्तं किञ्चिदुच्यते—जले निमज्य मृतस्य मनुष्यस्याधरीकरणेन जलं निःसार्य पुनस्तं महति लवणराशौ निगूह्य, कम्बलैश्चात्यन्तमाच्छाद्य, घटिकानां सार्धद्वयमेवं रक्षित्वा, पुनर्लवणमपमृज्य जानुबाहुना शनैः शनैः क्रमयितव्यः प्रगृह्य। यदि चेत् स जीवनशेषस्ततो जीवति। निमग्नस्य हि प्राणवायुना सह जलं रक्ते निविशते, तच्च रक्तस्थं जलं लवणं विशोषयति। सफला दृष्टचरा चेयं क्रिया मया निर्दिष्टा। मन्त्रलिङ्गञ्च—

नरा वा शंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा।
सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना॥

ऋक् १०।६४।३॥

इति निदर्शनम्। भवति चात्रास्माकम्—

विष्णुर्नियन्ता स यमः प्रदिष्ट-
स्तेनैव यन्त्रा नियतं समस्तम्।
सर्गात् स्वकक्षां क्रमते यथार्क-
स्तथा शरीरे हृदयं नियन्तृ ॥१२०६॥

'अर्क' इति ज्योतिषामुपलक्षणमत्र, स्तुत्या हि सर्वे ग्रहाः। अर्च्यत इत्यर्कः, स्तोतव्यो विष्णुः सूर्यो वा।

मन्त्रलिङ्गञ्च—

यमग्ने पृत्सु मर्त्यमवा वाजेषु यं जुनाः। स यन्ता शश्वतीरिषः।

ऋक् १।२७।७॥

नियमः—८६५

'नि'—उपसर्गः। 'यम उपरमे' इति भौवादिकाद्धातोः ***''यमः समुपनिविषु च''*** (पा० ३।३।६३) सूत्रेण करणेऽधिकरणे वा 'अप्' प्रत्ययः। नियम्यतेऽनेनास्मिन् वेति 'नियमः'। सर्वं स्थावरं जङ्गमञ्च भगवता नियम्यते, भगवत्येव च नियम्यते, भगवतः सर्वगतत्वादिति।

मन्त्रलिङ्गञ्च—

निषहमाणो यमते नायते धन्वासहा नायते। ऋक् १।१२७।३॥
नि स्थिराणि चिदोजसा। ऋक् १।१२७।४॥

यथा शरीरे सर्वं नियन्त्रितं तथैव लोके, लोकश्च तस्मिन्निति नियमो विष्णुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

सर्वं निबद्धं नियमे हि विष्णौ
यथा शरीरेऽङ्गगणं निबद्धम् ।
तथा च विष्णौ क्रमते निबद्धं
स्तब्धं च विश्वं निखिलं हि तस्मिन् ।।१२०७।।

यमः—८६६

यच्छति=उपसंहरति सर्वं सर्गान्ते, सर्गस्थितौ च नियमयतीति 'यमः'। 'यमेः' पचाद्यच् प्रत्ययः। सर्वस्योपसंहारको नियामकश्च 'यम' इत्यर्थः।

मन्त्रलिङ्गञ्च—

नरा वा शंसं पूषणमगोह्यमग्निं देवेद्धमभ्यर्चसे गिरा ।
सूर्यामासा चन्द्रमसा यमं दिवि त्रितं वातमुषसमक्तुमश्विना।।
ऋक् १० ।६४ ।३ ।।

भवति चात्रास्माकम्—

यमो नियन्ता स रविः स विष्णु-
र्व्याप्नोति विश्वं स्वमयूखभासा ।
तस्मिन् स्थितं विश्वमिदं विभाति
विष्णुं रविं वा प्रणमन्ति तस्मात् ।।१२०८।।

❖ ❖ ❖

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत् प्रीतिवर्धनः।।१०६।।

८६७ सत्त्ववान्, ८६८ सात्त्विकः, ८६९ सत्यः, ८७० सत्यधर्मपरायणः। ८७१ अभिप्रायः, ८७२ प्रियार्हः, ८७३ अर्हः, ८७४ प्रियकृत्, ८७५ प्रीतिवर्धनः।।

सत्त्ववान्—८६७

अस्तेश्शतरि 'सच्छब्दो' व्युत्पादितः। तस्मात् ***"तस्य भावस्त्वतलौ"*** (पा० ५।१।११८) इति सूत्रेण षष्ठ्यन्तात्सतो भावे 'त्व' प्रत्ययः। 'सत्त्व' शब्दाच्च

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

''तदस्यास्त्यस्मिन्निति मतुप्'' (पा० ५।२।९४) सूत्रेणास्त्यर्थे 'मतुप्' प्रत्ययः, सत्त्वमस्यास्तीति 'सत्त्ववान्'। ***''मादुपधायाश्च मतोर्वोऽयवादिभ्यः''*** (पा० ८।२।९) सूत्रेण मकारस्य वकारः। सुबादिकार्यं, नुम् दीर्घः, संयोगान्तलोपश्च। मतुबर्थाश्च–

भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने ।
संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः।।

मन्त्रलिङ्गञ्च तदर्थे–

अभि त्वा देव सवितरीशानं वार्य्याणाम्। सदावन् भागमीमहे।।

ऋक् १।२४।३।।

सदेति नित्यार्थकमव्ययम्। तत्सदावतः सम्बुद्धौ सदावन्निति। स पुनर्भूम्ना स्तूयते–

न हि ते क्षत्रं न सहो न मन्युं वयश्च नामी पतयन्त आपुः।
नेमा आपोऽनिमिषं चरन्तीर्न ये वातस्य प्रमिनन्त्यभ्वम् ।।

ऋक् १।२४।६।।

वयः शब्दस्यार्थोऽत्र ग्रहास्तदुपजीवनाश्चेति सङ्गच्छते। लोकेऽपि च पश्यामो–यथा शरीरमधिष्ठाय शरीरवान् जीवः सर्वमायुस्तद् गमयति, तथैवायं विष्णुः समग्रमिदं जीवयन् प्रवर्तयति स्वसाद्भाव्यात्।

भवति चात्रास्माकम्–

स सत्त्ववान् विष्णुरनन्तगर्भः
स्वसत्तया विश्वमिदं बिभर्ति ।
तथा यथा देहमिमं ह देही
देहो न तस्यान्तमियात् कदाचित्।।१२०६।।

सात्त्विकः–८६८

'सत्त्व' शब्दो व्युत्पादितस्तस्मादार्हीयष्ठक्, ***''ठस्येकः''*** (पा० ७।३।५०) इति ठस्येकादेशः। ठक्यकार उच्चारणार्थः। ***''किति च''*** (पा० ७।२।११८) सूत्रेणादिपदवृद्धिः। ***''यस्येति च''*** (पा० ६।४।१४८) सूत्रेणाकारलोपः–'सात्त्विकः'।

सत्त्ववानित्यनेन तस्य भगवतः सल्लक्षणता प्रतीयते। 'सात्त्विक' इत्यनेन नाम्ना च प्रकाशरूपता, ज्ञानरूपता वा प्रतीयते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

स सत्यसत्वन् महते रणाय रथमातिष्ठ तुविनृम्ण भीमम्।
याहि प्रपथिन्नवसोप मद्रिक् प्र च श्रुत श्रावय चर्षणिभ्यः।।

ऋक् ६।३१।५।।

त्वमित्यनुवर्तते, स त्वं सत्यसत्वन्!

भवति चात्रास्माकम्—

स सात्त्विकः सत्यजवः स्वयम्भूः
सत्त्वेन युक्तं कुरुतेऽत्र विश्वम्।
सत्त्वं स्वकञ्चार्हति दृश्यलोके
सत्त्वार्हमेतज्जगदस्ति सर्वम् ।।१२१०।।

तथा च सर्वो मनुष्यादिर्वनस्पत्यादिवर्गश्च सत्त्वार्हः, सत्त्वसम्बन्धी वा।

सत्यः—८६६

अस्तीति सत्, सत्सु साधुः='सत्यः', ***''तत्र साधुः''*** (पा० ४।४।९८) सूत्रेण 'यत्' प्रत्ययः। सत्सु साधुस्वभावेषु परमहितकारित्वेन लब्धसपर्यः। महापुरुषपूज्यो नित्यपरमहितकारी चेत्यर्थः।

मन्त्रलिङ्गञ्च—

अग्निर्होता कविक्रतुः सत्यश्चित्रश्रवस्तमः। देवो देवेभिरागमत्।

ऋक् १।१।५।।

दृश्यते चैतत्सर्वं सत्येनैव व्याप्तम्। तस्मात् सत्योऽग्निर्विष्णुर्वा, विष्णुरग्निर्वा 'सत्यः'। जगद्रूपञ्चैतद् दृश्यं काव्यं भगवतस्तथा च—

देवस्य पश्य काव्यम्। ऋक् १०।५५।५।।

इति श्रुतिवचनम्। भवति चात्रास्माकम्—

सत्यः कविः काव्यमिदं चकार
दृश्यं सदालङ्कृतमेव तस्य।
न तत्र मोहो न विकारभावो
द्रष्टा पुनर्मुह्यति नौति तञ्च।।१२११।।

यथा च तस्येदं जगद्रूपं दृश्यं काव्यं तथा तस्य श्रव्यमपि काव्यं भवति वेदरूपम्। यथा च मन्त्रलिङ्गम्—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्मा इत् काव्यं वच उक्थमिन्द्राय शंस्यम्।
तस्मा उ ब्रह्मवाहसे गिरो वर्धन्त्यत्रयो गिरः शुम्भन्त्यत्रयः।।

ऋक् ५।३६।५।।

सत्यधर्मपरायणः—८७०

'अस्तेः' शत्रन्ताद् यति 'सत्य' शब्द उक्तः। 'पृ' धातोरपि 'परः' शब्दः व्युत्पादितोऽस्ति। 'धरते'र्मनिनि 'धर्मः'। 'एतेरयतेर्वा' ल्युटि 'अयन' शब्दः साधुर्भवति। सत्यश्चासौ धर्मः सत्यधर्मः सच्चिदानन्दलक्षणः, स एव परं=परमः अयनं=आश्रयः स्वरूपं वा यस्य स 'सत्यधर्मपरायणः'। अथवा—सत्यरूपस्य धर्मस्य परम्=ऐकान्तिकः अयनम्=आश्रयो यः स 'सत्यधर्मपरायण' इति, विष्णुः सूर्यो वा। मन्त्रलिङ्गञ्च—

कविमग्निमुप स्तुहि सत्यधर्माणमध्वरे। देवममीवचातनम्।।

ऋक् १।१२।७।।

परायणत्वे मन्त्रलिङ्गम्—

यन्नियानं न्ययनं संज्ञानं यत् परायणम्।
आवर्तनं निवर्तनं यो गोपा अपि तं हुवे ।। ऋक् १०।१६।४।।

परमत्वे च—

यो अस्याध्यक्षः परमे व्योमन्त्सोऽङ्ग वेद यदि वा न वेद।।

ऋक् १०।१२६।७।।

एतेन हृदयाख्ये परमे व्योम्नि अयनं=गमनं यस्येति विष्णुस्तथा परमे महाकाशे गमनं यस्येति सूर्यश्चोक्तो भवति। तथा च मन्त्रः—

इन्द्रो दिव इन्द्र ईशे पृथिव्याः। ऋक् १०।८६।१०।।
सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधिश्रितः।। ऋक् १०।८५।१।।

पूर्वापरं चरतो माययैतौ शिशू (सूर्याचन्द्रमसौ) क्रीडन्तौ परियातो अध्वरम्। विश्वान्यन्यो भुवनाभिचष्ट (सूर्यः) ऋतूँरन्यो विदधज्जायते पुनः (चन्द्रमाः)।।

ऋक् १०।८५।१८।।

भवति चात्रास्माकम्—

सत्येनोत्तभिता भूमिः, सत्त्येनोत्तभिता च द्यौः।
विष्णुरस्ति स गेयो यः, सत्यधर्मपरायणः ।।१२१२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकेऽपि च दृश्यते—सत्यधर्मपरायणस्य विष्णोः सूर्यस्य वानुकरणं कुर्वाणो मनुष्योऽपि सत्यधर्मभाषणपरस्ताद्भव्याय कल्पते। स च तथाभूतो मनुष्यः सर्वैः स्तूयते, यतो ह्ययं वैष्णवपथपथिकः।

अभिप्रायः—८७१

अभि-प्र चोपसर्गौ तत्पूर्व 'इण् गतौ' इत्यादादिको धातुस्ततः कर्तरि पचाद्यच् प्रत्ययो गुणायादेशौ, सांहितिको दीर्घश्च='अभिप्रायः'। अभिप्रैति सर्वमिति 'अभिप्रायः'। यद्वा-अभिप्रपूर्वाद् 'इणः' कर्मणि ***''एरच्''*** (पा० ३।३।५६) इत्यच् प्रत्ययः। अभिप्रेयते सर्वतो गम्यते सर्वैः प्रार्थयमाणैरिति 'अभिप्रायः'।

मन्त्रलिङ्गञ्च—

स्वायुधः सोतृभिः पूयमनोऽभ्यर्ष गुह्यं चारु नाम ।
अभि वाजं सप्तिरिव श्रवस्याभिवायुमभिगा देव सोम।।

ऋक् ६।६६।१६।।

अभी नो अर्ष दिव्या वसून्यभि विश्वा पार्थिवा पूयमानः।
अभि येन द्रविणमश्नवामाभ्यार्षेयं जमदग्निवन्नः ।।

ऋक् ६।६७।५१।।

त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः। प्र दाश्वाँ अग्ने अस्थात्।।

ऋक् १।७४।८।।

लोकेऽपि च पश्यामः—सर्वोऽयं सर्गरूपः स्थावरजङ्गमवर्गस्तमभिप्रायाख्यं विष्णुमभिप्रैति, परस्परञ्च। तथा हि—शिष्यो गुरुमभिप्रैति, पत्नी पतिं, अभियोक्ताभियुक्तश्चाधिकरणिकं, क्रेता विक्रेता च विपणिकमित्यादिव्यवहारजातं तस्यैवाभिप्रायनाम्नो भगवतो व्यापकतां दर्शयति।

भवति चात्रास्माकम्—

अभिप्रायः स सूर्योऽस्ति विष्णुर्वा स विभुः कविः ।
नानारूपधरं मर्त्या अभिप्रायं नमन्ति तम् ।।१२१३।।

प्रियार्हः—८७२

'प्रीञ् तर्पणे कान्तौ च' इति क्रैयादिको धातुस्तत ***''इगुपधज्ञाप्रीकिर' कः''*** (पा० ३।१।१३५) सूत्रेण 'कः' प्रत्ययः कर्तरि, कित्त्वाद् गुणाभावः। ***''अचि श्नुधातुभ्रुवां य्वोरियङुवङौ''*** (पा० ६।४।७७) सूत्रेण 'इयङ्'—'प्रिय' इति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रियोपपदाद् 'अर्ह पूजायाम्' इति भौवादिकाद्धातोः कर्तर्यच्। प्रियमर्हतीति 'प्रियार्हः' यद्वा—अर्हतेः पचाद्यच्, सप्तमीति योगविभागात्समासः। प्रियेषु—अर्हः=योग्यः प्रिय इति 'प्रियार्हः'। मन्त्रलिङ्गञ्च—

प्रियाणां त्वा प्रियपतिँ हवामहे। यजुः २३।१९।।

लोकेऽपि च पश्यामो—लोके हि यस्य यत् प्रियतोऽपि प्रियं तद् वस्तु स पूज्यायार्पयति। पूज्योऽपि च स्वप्रियं वस्तु तदर्हते ददाति। यद्वा—प्रियेषु भोगेषु निरपेक्षस्य अर्हः=पूज्यो भगवान् विष्णुरेवेति सः 'प्रियार्हः' इति। सोऽयं भगवतो व्यापकस्य गुणः सर्वत्रानुस्यूतः।

भवति चात्रास्माकम्—

विष्णुः प्रियार्हः स जगत्प्रसिद्धः
प्रियाणि धामानि स चैति नित्यम्।
प्रियं प्रियार्हाय जनो ददाति
प्रियं स लब्ध्वा मनुते स्वपूजाम् ।।१२१४।।

अर्हः—८७३

'अर्ह पूजायाम्' इति भौवादिकाद्धातोः कर्मणि 'घञ्' प्रत्ययः। अर्ह्यते=प्राप्तुं युज्यत इति 'अर्हः'। सर्गान्तर्गतान् सर्वान् भोगान् विहाय श्रेयोऽर्थिनां विदुषां सर्वप्रकारैः साधनैः, सोपकरणैः पूजाविधानैः, सर्वकर्मार्पणेन निष्कामकर्मभिश्च स एव प्राप्तुं योग्य इत्यर्थः। अत एवार्ह्यते=पूज्यते=सम्मान्यते वा यः सोऽर्हो विष्णुरित्युक्तो भवति। मन्त्रलिङ्गञ्च—

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया ।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव।।

इतिनिदर्शनम्। बहुत्रार्हतेः प्रयोगो वेदे। ऋक् १।९४।१

भवति चात्रास्माकम्—

अर्होऽस्ति विष्णुर्बहुधा विभक्तः
सर्वं करोत्यात्मगुणेन युक्तम् ।
अर्होऽस्ति सः[1] *सर्वमिहास्ति चार्ह्यं*
परस्परं लोकसृतस्तथार्हः ।।१२१५।।

१. स इति कृतव्याख्यानं विष्णोर्नाम।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रियकृत्—८७४

'प्रिय शब्दो व्युत्पादितः प्रीणातेः के प्रत्यये। तद्रूपकर्मोपपदात्, 'कृञ्' धातोः क्विपि तुगागमे च 'प्रियकृत्' इति। प्रियं करोति, प्रियम्=इष्टं मनस ईप्सितं वा करोतीति 'प्रियकृत्'।

यथा च लोकेऽपि जीवो यावच्छरीरमधितिष्ठति, तावच्छरीरं कान्तं, प्रीणाति च स तच्छरीरम्। अमुथैवायं सर्वत्र व्याप्तो भगवान् विष्णुः सूर्यो वा सर्वस्येप्सितं कमनीयकञ्च विधत्ते, इति स प्रीणातीति कृत्वा 'प्रियकृद्' उच्यते।

मन्त्रलिङ्गञ्च—

वषट् ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥

ऋक्० ७।६६।७॥

अत्र मन्त्रे पात इति स्तोतुरीहा, स च तदनुसारं करोतीति 'प्रियकृत्'। बह्वर्थोऽयं प्रियकृच्छब्दो मन्त्रेषु लभ्यते।

भवति चात्रास्माकम्—

विष्णुर्हि लोके प्रियकृत् पुरुत्रा
प्रियं करोत्येव समस्तजन्तोः ।
स्तोतारमप्येष करोति युक्तं
यष्टीहया वा च हविः प्रणुन्नम्॥१२१६॥

बह्वर्थो हि हविः शब्दो, मन्त्रोच्चारणपुरःसरं प्रदीयमानेन हविषा होतुर्वाञ्छितार्थसिद्धिर्भवति। वाञ्छितार्थबहुत्वाच्च मन्त्रबहुत्वम्। महार्थस्य लब्ध्यै वेदोऽनुसन्धेयः। तथा च—

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्।
युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम ॥

ऋक् १।१८९।१॥

युयोध्यस्मत् जुहुराणं=कुटिलं दुरभ्यस्तम्, एनः=पापं कर्म इति होतुर्वाञ्छा तथा—

तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्॥ ऋक् ३।६२।१०॥

धियो यो नः प्रचोदयादिति ध्यातुर्वाञ्छा, तां पूरयतीति 'प्रियकृत्', विष्णुः सूर्यो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रीतिवर्धनः—८७५

'प्रीञ् तर्पणे कान्तौ च' इति क्रैय्यादिको धातुस्ततः स्त्रियां भावे 'क्तिन्,'—'प्रीतिः'। वर्धनः-'वृधु वृद्धौ'' इति भौवादिकाण्णिजन्ताद्धातोर्नन्द्यादिल्युर्योरनो णिलोपो वर्धयतीति वर्धनः, प्रीतेर्वर्धनः='प्रीतिवर्धनः'। यद्वा-'वर्ध छेदनपूरणयोः' चौरादिको धातुः, पूरणकर्मा चेहायं, तस्माल्ल्युर्योरनो, णिलोपः। प्रीतिं वर्धयति=पूरयतीति 'प्रीतिवर्धन' इत्यर्थः।

मन्त्रलिङ्गञ्च, 'अग्ने' इत्यनुवर्तते—

इमा अस्मै मतयो वाचो अस्मदाँ ऋचो गिरः सुष्टुतयः समग्मत।
वसूयवो वसवे जातवेदसे वृद्धासु चिद्वर्धनो यासु चाकनत् ॥

ऋक् १०।६१।१२॥

वाञ्छित-पूर्त्यै प्रार्थना—

वाजसनिं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम्॥

ऋक् १०।६१।१५॥

सर्वार्थानां समर्धनः 'प्रीतिवर्धनः' इत्यनर्थान्तरम्। तथा च मन्त्रलिङ्गम्—

उद्बुध्यस्वाग्ने प्रतिजागृहि त्वमिष्टापूर्ते सँ सृजेथाम्॥

यजुः १५।५४॥

भवति चात्रास्माकम्—

प्रीतिवर्धन उक्तोऽसौ, विष्णुः सूर्योऽग्निरर्यमा।
तं स्तुवन्ति बृहद्वाग्भिर्यथा वाञ्छाप्तिलिप्सवः ॥१२१७॥

❖ ❖ ❖

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग् विभुः।
रविर्विरोचनः सूर्यः सविता रविलोचनः ॥१०७॥

८७६ विहायसगतिः ८७७ ज्योतिः, ८७८ सुरुचिः, ८७९ हुतभुक्, ८८० विभुः। ८८१ रविः, ८८२ विरोचनः, ८८३ सूर्यः, ८८४ सविता, ८८५ रविलोचनः॥

विहायसगतिः—८७६

वि—उपसर्गः। 'ओहाक् त्यागे', 'ओहाङ् गतौ' वेति जौहोत्यादिकौ धातू

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ताभ्यां यथार्थं ***''वहिहाधाञ्भ्यश्छन्दसि''*** (उ० ४।२२१) इत्यनेनोणादिसूत्रेण 'असुन्' प्रत्ययो, ***''वसेर्णित्''*** (४।२१८) इत्यतो णिदनुवर्तनाच्च स णिद् भवति। छान्दसत्वञ्च नाम्नां **''ऋषिभिः परिगीतानि''** (महा० शान्ति०) इत्युक्त्यैव सिद्धम्। अत एव चास्माभिरपि प्रतिनामान्ते **''अग्ने संसृज्महे गिरः''** (ऋक् ६।१६।३७) इति मन्त्रमूलकं 'भवति चात्रास्माकम्' इति वाक्यं लिख्यते। विहा अस—इति स्थितौ ***''आतो युक् चिण्कृतोः''*** (पा० ७।३।३३) इति सूत्रेण धातोर्युगागमो, बाहुलकात् 'पृषोदरादित्वाद् वा अकारवर्णागमो—'विहायस' इति।

गतिः—'गमेः' स्त्रियां भावे क्तिनि—'गतिः', कर्मणि वा गम्यते=प्राप्यत इति 'गतिः'। एवञ्च विजिहते यत्रेति 'विहायसम्' अन्तरिक्षम्। यद्वा-विजहतीति 'विहायसाः' त्यागशीलास्तपोनिष्ठा ऋषयः। विहायसेऽन्तरिक्षे गतिर्गमनं यस्य स 'विहायसगतिः' सूर्यः। विहायसैः तपस्विभिर्गम्यते=प्राप्यत इति 'विहायसगतिः' विष्णुः। **''यादृगेव ददृशे तादृगुच्यते''** (ऋक् ५।४४।६) इति मन्त्रलिङ्गानुसारं सर्वैरेव पृथिवीस्थैर्विहायसे गच्छन्नवलोक्यते सूर्योऽतो 'विहायसगतिः' उक्तो भवति।

मन्त्रलिङ्गञ्च—

नूनमर्च विहायसे स्तोमेभिः स्थूरयूपवत्।
ऋषे वैयश्व दम्यायाग्ने।। ऋक् ८।२३।२४।।

जातवेदसं, चरिष्णुम् अङ्गिरस्तमः, बृहद्भाः, व्यश्वः, पावकं, कृष्णवर्तनिं, विहायसम्, इत्यादीनि विशेषणानि सूक्तेऽस्मिन् यत्र तत्र मन्त्रेषु प्रयुक्तानि विष्णुमग्निं सूर्यं वा विहायसगतिनाम्नोऽर्थं प्रकटयन्ति। लोकेऽपि च—भगवतो गुणस्य व्याप्तिर्दृश्यते। तथा च—विहायसे अन्तरिक्षे पक्षिणां गतिर्मनुष्यकृतानाञ्च विमानानामग्निशक्त्युज्जृम्भितानां क्रीडनकानाञ्चेति सर्वं तमेवानुकुर्वत् तस्य व्यापकतां प्रकटयति।

भवन्ति चात्रास्माकम्—

विहायसगतिर्विष्णुः, सूर्यो विश्वमनाः कविः।
गतिं ददाति सर्वस्मै, यथाखं यस्य युज्यते ।।१२१८।।
तस्यानुकरणं लोके, वीनां खेऽव्याहता गतिः।
विमानानि च मार्त्यानि, यान्त्यायान्ति विहायसे।।१२१९।।
विहायसगतिं विष्णुं, यः स्तौति ज्ञानचक्षुषा।
स शक्नोति गतिं कर्तुं, प्राणायामपरायणः ।।१२२०।।

श्रूयते च योगिन उड्डीयन्ते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्योतिः—८७७

'द्युत दीप्तौ' भौवादिको धातुस्ततो *''द्युतेरिसन्नादेश्च जः''* (उ० २।११०) इत्युणादिसूत्रेण ''इसन्'' प्रत्ययो धातोरादेश्च जकारादेशः। तेन द्योतत इति 'ज्योतिः', सूर्यनक्षत्रादयः। अग्निश्च सूर्यस्यैवापरं रूपम्। तथा चोक्तं भवति—

अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा ।
सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा।। यजुः ३।६।।

एवञ्च वेदे यत्राग्नेर्वर्णनं तत्सर्वं ज्योतिष एवेति ज्ञेयम्। यावद्वा च सूर्यवर्णनं तत्सर्वं ज्योतिस्वरूपस्य भगवतो विष्णोरेवान्वाख्यानम्। ज्योतिः शब्देन सर्वत्र सूर्याग्नी बोध्यौ, भगवाँश्च तयोरपि भासक इति ज्योतिःस्वरूपोऽस्त्येव।

मन्त्रलिङ्गञ्च—

उद्वयं तमसस्परि ज्योतिष् पश्यन्त उत्तरम्।
देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् ।। ऋक् १।५०।१०।।

अथर्वणि यजुषि चापि।

लोकेऽपि च पश्यामो—यद्यस्य जीवनं तत्तस्य ज्योतिः। चक्षुरपि सूर्यदैवतं ज्योतिः स्वरूपमृते विकारात्। सूर्यो हि सदा स्वत्विषा भासयत्यात्मानं बहुधा तेजोमयत्वादूष्मधर्मत्वाच्च। सूर्यस्य सर्वदा सत्त्वात् पशवो रात्रावपि पश्यन्ति। एवं ज्योतिषः सर्वत्र व्यापकता दृश्यते।

भवतश्चात्रास्माकम्—

ज्योतिर्हि विष्णुः स च सर्वविष्टः
सूर्यादिकेष्वात्मततिं विचष्टे ।
तस्योपजीव्येष्वपि तस्य दीप्ति-
श्चक्षुर्यथा पश्यति दृश्यमात्रम्।।१२२१।।

सूर्यो हि वा ज्योतिरसौ च वह्निः
सूर्यं यमं चाहुरमेयमिन्द्रम् ।
छाया यथा च्छायिनमेव याति
तथैव सर्वत्र विभज्य चोह्यम्।।१२२२।।

सूर्यो ज्योतिर्ज्योतिः सूर्यः, अग्निर्ज्योतिर्ज्योतिरग्निः, सूर्य आत्मा, आत्मा सूर्यः, सूर्यश्चक्षुः चक्षुः सूर्यः, सूर्य आतप, आतपो वा सूर्यः, चन्द्रो मनो, मनो वा चन्द्रः, शेषेष्वपि ग्रहेष्वप्येवमूह्यम् भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरुचिः—८७८

'सु' उपसर्गः। 'रुच दीप्तौ' भौवादिको धातुस्तत *''इगुपधात् कित्''* (उ० ४।१२०) इत्युणादिसूत्रेण 'इन्' प्रत्ययः किच्च स, तस्माद् गुणाभावः। सुष्ठु रोचत इति 'सुरुचिः' सूर्यो विष्णुर्वा। तस्य चेदं विचित्रं जगत् सुतरां दीप्तिमत्, सर्वथा भास्वद् दृश्यत इति।

मन्त्रलिङ्गञ्च—

तमुक्षमाणं रजसि स्व आ दमे चन्द्रमिव सुरुचं ह्वार आ दधुः।

ऋक् २।२।४।।

यतस्त्रुचः सुरुचं विश्वदेव्यं रुद्रं यज्ञानां साधदिष्टिमयसाम्।

ऋक् ३।२।५।।

इति निदर्शनम्। भवति चात्रास्माकम्—

यद्यद् विशुद्धं सुरुचीति बोध्यं
तद्विष्णुसूर्येन्दुकृतञ्च सर्वम् ।
व्याप्नोति सर्वं सुरुचिर्हि विष्णुः
सूर्योऽपि तस्मात् सुरुचिश्च चन्द्रः।।१२२३।।

हुतभुक्—८७९

'हु दानादानयोः' इति जौहोत्यादिको धातुस्ततः कर्मणि 'क्तः' भवति, कित्त्वाद् गुणाभावो'=हुतम्'।

भुगिति—'भुज पालनाभ्यवहारयो' रौधादिको धातुरभ्यवहारकर्मा चेहायं, ततः 'क्विप्' गुणाभावः, कुत्वम्, वा च चर्त्वम्। हुतं भुङ्क्ते='हुतभुग्' हुतभुक्। हुतमित्यग्नौ प्रक्षिप्तं समन्त्रम्।

मन्त्रलिङ्गञ्च—

सप्त ते अग्ने समिधः सप्तः जिह्वाः। यजुः १७।७९।।

लोके च पश्यामः—शरीराग्निर्हि जिह्वया मुखे हुतं भुङ्क्ते। प्राणवायुना च तत्सर्वत्र प्रसार्यते। एवञ्च सूर्योऽग्निर्वा शरीरे वैश्वानरनाम्नोच्येते।

भवति चात्रास्माकम्—

विष्णुर्हि लोके हुतभुक् प्रसिद्धः
सोऽग्निः स वा यज्ञसमिद्धतेजाः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैश्वानरो वास्ति स वास्ति सूर्यो
दावानलो वा स हि वाडवो वा ।।१२२४।।

विभुः—८८०

'वि' उपसर्गः। 'भू सत्तायां' भौवादिको धातुस्ततो ***"विप्रसम्भ्यो ड्वसंज्ञायाम्"*** (पा०३।२।१८०) सूत्रेणासंज्ञायां 'डुः' प्रत्ययः, टिलोपः='विभुः'। विविधो भवतीति 'विभुः'।

यद्वा—***"अश्रवादयश्च"*** (उ० ५।२६) इत्युणादिसूत्रे, *'अन्येभ्योऽपि डुन् प्रत्ययो दृश्यते'* इत्यनुशासनात्,—यथा कुत्सितं द्रवतीति कद्रुः, तथा विविधो भवति, विविधं भावयति वा 'विभुः' इति ज्ञेयम्।

लोकेऽपि चैतद्दृश्यते—यथैक एवात्मा पुत्रभावं, पुत्रीभावं, सर्वाङ्गपूर्णतां, विकलाङ्गतां वापद्य बहुधा भवति, तथैवायं विष्णुः सूर्यो वा, स्वं भवितृरूपं यथादृश्यवस्तु वैविध्येन भावयति। तत्र कश्चिदेव न मुह्यति पारोवर्यविद्, अन्ये तु सर्वे मुह्यन्ति। तदेवं यथा, गोमनुष्याश्वादिषु जातिरेकापि सा स्वं रूपं पृथक् पृथक् व्यनक्ति। तत्र पृथग्दृशो मुह्यन्ति, न तु तदेकतां पश्यन्निति। एवमिव विश्वे सर्वत्र वैविध्येन ततं विष्णुं पश्यन् न मोहमेति, मुह्यति च पृथग्वस्तुदृष्टिः। एवं बहुत्रोह्यम्। मन्त्रलिङ्गञ्च—

एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनुप्रभूतः।
एकैवोषाः सर्वमिदं विभात्येकं वा इदं वि बभूव सर्वम्।।

ऋक् ८।५८।२।।

त्वमग्ने प्रथमो अङ्गिरस्तमः कविर्देवानां परिभूषसि व्रतम् ।
विभुर्विश्वस्मै भुवनाय मेधिरो द्विमाता शयुः कतिधा चिदायवे।।

ऋक् १।३१।२।।

ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि।

ऋक् ७।४८।२।।

भवति चात्रास्माकम्—

विभुर्हि विष्णुः स च वापि सूर्यः
कविः स वाग्निः प्रथमः स वोषाः।
स एव सर्वत्र विभुः प्रसृप्तः
स भाति विश्वे विबभूव चैकः ।।१२२५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रविः—८८१

'रु शब्द' आदादिको धातुस्ततः कर्तरि करणे वा ***"अच इः"*** (उ० ४।१३६) इत्युणादिसूत्रेण 'इः' प्रत्ययः। रौतीति 'रविः', रूयते वानेनेति 'रविः', शब्दकर्ता, शब्दकारयिता वेत्यर्थः। मन्त्रलिङ्गञ्च—

त्वं वृषाक्षुं मघवन्नम्रं मर्याकरो रविः ।

त्वं रौहिणं व्यास्यो विवृत्रस्याभिनच्छिरः।। अथर्व २०।१२८।१३।।

सद्यो जातो वृषभो रोरवीति। ऋक् ७।१०१।१।।

लोकेऽपि पश्यामः-आत्मवच्छब्दते ऋते विकारात् चेतन इत्यर्थः। वायुना पूर्णं निघृष्टञ्चानात्मवच्चापि शब्दते। एवं भगवतः सर्वत्र व्याप्तिर्दृश्यते।

सूर्य आत्मा, आत्मा वा सूर्यः। रविरात्मा, आत्मा वा रविः। रविर्विष्णुर्विष्णुर्वा रविः, इत्यादि योजना कार्या ज्ञानवृद्ध्यै।

भवति चात्रास्माकम्—

रविर्हि विष्णू रविरस्ति सूर्यः
सोऽग्निः स वा सर्वगतः स मूलम्।
विश्वस्य शब्दस्य च जन्तुमात्रे
वायूत्थसंघर्षणजस्य चापि ।।१२२६।।

विरोचनः—८८२

'वि' उपसर्गः। 'रुच् दीप्तौ' इति भौवादिको धातुस्ततः 'णिच्', गुणस्ततो ल्युर्योरनो णिलोपो, विरोचयतीति 'विरोचन;'। यद्वा-रोचतेः ***"अनुदात्तेतश्च हलादेः"*** (पा० ३।२।१४६) इति सूत्रेण तच्छीले कर्तरि 'युच्', योरनः। विरोचते तच्छीलो 'विरोचनः'। स्वयं भासमानो विश्वं भासयतीत्यर्थः। मन्त्रलिङ्गञ्च—

तस्या विरोचनः प्राह्रादिर्वत्स आसीदयस्पात्रं पात्रम्।।

अथर्व ८।१०(४)।२।।

तदर्थकविरोचमानपदान्वितमन्त्रश्च—

श्रिये सुदृशीरुपरस्य याः स्वर्विरोचमानः ककुभामचोदते ।
सुगोपा असि न दभाय सुक्रतो परो मायाभिर्ऋत आस नाम ते।।

ऋक् ५।४४।२।।

अयं पुनान उषसो विरोचयत्। ऋक् ९।८६।२१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इतीन्द्रमहिम्नि। तत्रैव च–

अथेदं विश्वं पवमान ते वशे। ऋक् ६।८६।२८।।

इत्यादि निदर्शनम्। लोके चाप्येकैव जातिर्विविधं रोचते।

भवति चात्रास्माकम्–

विरोचते विश्वमिदं समस्तं
विरोचमानेन विभिन्नरूपैः ।
बिभ्रच्च नामानि परश्शतानि
विष्णू रविश्चात्र विभात एवम् ।।१२२७।।

सूर्यः–८८३

'सृ गतौ' इति भौवादिको धातुः 'षू प्रेरणे' इति तौदादिको वा, ताभ्यां ***''राजसूयसूर्यमृषोद्य०''*** (पा० ३।१।११४) इत्यादिना सूत्रेण 'क्यप्' प्रत्ययान्तः 'सूर्य' शब्दो निपात्यते, सरते रुत्वं, सुवतेरुडागमश्च। सरति, सुवति वा सूर्यः। ***''हलि च''*** (पा० ८।२।७७) सूत्रेण दीर्घः। उभयत्रापि कित्त्वाद् गुणाभावः। सरति सर्वत्र विश्वे–आकाशे, सुवति=प्रेरयति लोकं कर्मणि वा सूर्यो विष्णुर्भास्करो वा। मन्त्रलिङ्गञ्च–

यथा सूर्यो नक्षत्राणामुद्यंस्तेजाँस्याददे ।
एवा स्त्रीणाञ्च पुंसाञ्च द्विषतां वर्च आददे।। अथर्व ७।१३।१।।
तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य।
विश्वमाभासि रोचनम्।। ऋक् १।५०।४।।

सुवतेः–**देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय।** यजु ६।१।।

उदयाद् यावदस्तं यतः सूर्यस्यैव सवितेति संज्ञा। लोकेऽपि च पश्यामः– सकलमेतज्जगत् सरणसुवनक्रियाभ्यां व्याप्तं सत् मूलाधारं सूर्यं विष्णुं वा स्तौति।

भवति चात्रास्माकम्–

सूर्यः सृषूभ्यां क्यपि चास्ति सिद्ध-
स्तस्य क्रियाभिश्च जगत्समाप्तम्।
विशेषणं सूर्यनिमित्तकं यत्
तत् स्वार्थवद्[1] विश्वमिदं विधत्ते।।१२२८।।

१. स्वार्थवद्–विशेषणकृतः, उपसर्गविद्योतितश्च योऽर्थस्तद्वदित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पूर्वं व्याख्यातानि विरोचन-विहायसगति-स्वधृतेत्यादिनामानि तमेव सूर्यं स्तुवन्ति विष्णु-धर्मकम्।

सविता—८८४

'षूङ् प्राणिगर्भविमोचने' इति आदादिको धातुस्ततः 'तृच्' कर्तरि, ***''स्वरतिसूतिसूयतिधूञूदितो वा''*** (पा० ७।२।४४) सूत्रेण पाक्षिक इट्, गुणः, अवादेशः, अनङ्ङादि—सवितेति। सूते=सूर्यद्वारा वृष्टिसस्यादिकमुत्पाद्य जगज्जनयतीति सवितोच्यते। मन्त्रलिङ्गञ्च—

विभक्तारं हवामहे वसोश्चित्रस्य राधसः। सवितारं नृचक्षसम्।।

सखाय आ निषीदत सविता स्तोम्यो नु नः। दाता राधांसि शुम्भति।।

ऋक् १।२२।७, ८।।

भवति चात्रास्माकम्—

सर्वं जगत्तस्य यदस्ति राधो
विभक्तरूपं सविता प्रसूते।
प्रसूत एषोऽप्युषसः स्वयञ्च
सुवर्णविन्दोरिव दृश्यमानः।।१२२६।।

विभक्तारमिति विशेषणेन सवितृत्वरूपो गुणो जगति व्याप्तः सर्वं सवितृपदेन युनक्ति। मातुरुपस्थाज्जायते=बहिर्यातीति माता 'सावित्री' इत्युच्यते।

तथा च मन्त्रलिङ्गम्—

वि तिष्ठन्तां मातुरस्या उपस्थात् नानारूपाः पशवो जायमानाः।

अथर्व० १०।२।२५।।

रविलोचनः—८८५

'रवि'रुक्तः। 'लोचनः'—'लोचृ दर्शने' इति भौवादिको धातुस्ततो णिजन्तात् 'ल्युः', योरनः, अनादेशः, णिलोपः। रविणा लोचयति सर्वमिति 'रविलोचनः'। सूर्याचन्द्रमसौ भगवतो ज्येष्ठस्य ब्रह्मणो नेत्रे, इत्यथर्ववेदे, ताभ्यां लोचयति विश्वमिति। यद्वा—लोचते=लोचनशीलो द्रष्टा, रविरूपेण साधनेन लोचते सर्वं विश्वमिति 'रविलोचनः'।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

सूर्य एकाकी चरति चन्द्रमा जायते पुनः। यजुः २३।१०।।

द्वित्वेन विश्वं व्याप्तम्।

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्।

ऋक् १।३५।२।। यजुः ३३।४३।।

भवति चात्रास्माकम्—

लोकेऽस्ति विष्णू रविलोचनाख्यः
स लोचते विश्वमतोऽर्कनेत्रः।
ज्येष्ठं ब्रुवन्तीह सनातनं तं
विज्ञा नमन्त्यत्र सहस्रकृत्वः।।१२३०।।

तस्मै ज्येष्ठाय ब्रह्मणे नमः (अथर्व १०।७।३२)।। ज्येष्ठनाम्नि विस्तरेणोक्तम्।

❖ ❖ ❖

अनन्तो हुतभुग् भोक्ता सुखदो नैकजोऽग्रजः।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ।।१०८।।

८८६ अनन्तः, ८८७ हुतभुक्, ८८८ भोक्ता, ८८६ सुखदः (असुखदः), ८६० नैकजः, ८६१ अग्रजः।

८६२ अनिर्विण्णः, ८६३ सदामर्षी, ८६४ लोकाधिष्ठानम्, ८६५ अद्भुतः।।

अनन्तः—८८६

'अन्त'—'अम गत्यादिषु' भौवादिको धातुस्ततो ***"हसिमृग्रि०"*** (उ० ३।८६) इत्यादिनोणादिसूत्रेण 'तन्' प्रत्ययः—अन्तः। अमति=गच्छति यत्रेत्यन्तः। नञ् निषेधार्थीयस्तेन बहुव्रीहिः समासो, न अन्तं यस्य स 'अनन्तः'।

मन्त्रलिङ्गञ्च—

समानो अध्वा स्वस्रोरनन्तस्तमन्यान्या चरतो देवशिष्टे।
न मेथेते न तस्थुः सुमेके नक्तोषासा समनसा विरूपे ।।

ऋक् १।११३।३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनन्तमन्यद्रुशदस्य पाजः। ऋक् १।११५।५।।

अजिरासस्तदप ईयमाना आतस्थिवांसो अमृतस्य नाभिम् ।

अनन्तास उरवो विश्वतः सीं परि द्यावापृथिवी यन्ति पन्थाः।।

ऋक् ५।४७।२।।

अश्मन्यनन्ते अन्तरश्मनि। ऋक् १।१३०।३।।

दिविस्वनो यतते भूम्योपर्यनन्तं शुष्ममुदियर्त्ति भानुना।

अभ्रादिव प्रस्तनयन्ति वृष्टय सिन्धुर्यदेति वृषभो न रोरुवत्।।

ऋक् १०।७५।३।।

लोकेऽपि च पश्यामः—स्वयमध्वा नामति, बहुत्वञ्चाध्वनामिह, तैश्चानन्तैरध्वभिर्व्याप्तो लोकोऽयमनन्त उच्यते। यथा च शरीरे मांसमयीनां—सिराणामनन्तैः स्रोतोभिः पृथक् पृथगिन्द्रियज्ञानं मनसश्चिन्तनं मलोपमलधातूपधातुतत्त्वरूपञ्च जलमुह्यतेऽनन्तम्, तथाऽयमनन्तो लोकोऽनन्तेन विष्णुनोह्यतेऽनन्ताध्वव्याप्तः।

भवति चात्रास्माकम्—

अनन्तनामा भगवान् स विष्णुः
करोत्यनन्ताध्वविवर्ति विश्वम्।
नरश्च नान्तं लभते हि तस्य
सूर्यादयोऽतन्ति सदात्मपारे[१] ।।१२३१।।

हुतभुक्—८८७

जुहोतेः क्ते 'हुतम्' उक्तम्'। 'भुग्' इति 'भुज पालनाभ्यवहारयोः' रौधादिको धातुस्ततः 'क्विप्'। गुणाभावः, कुत्वं गकारः, वा च चर्त्त्वम्। हुतं भुङ्क्ते 'हुतभुक्'। लोके चाग्नौ प्रक्षिप्तं हविरग्निः प्रज्वलन् भक्षति, तस्मादग्निः 'हुतभुग्' उच्यते।

यथा चायमग्निर्हुतमात्मगतं कुरुते, तथा भगवान् विष्णुरपि हुतरूपमिमं सर्वं भूतसमुदायमात्मगतं कुरुते, स्वस्मिन् समावेशयतीत्यर्थः। अग्निश्चायं सूर्यदैवतस् तस्मात् सूर्य एव विष्णुरेव वा, तयोरेकरूपत्वात्। अत एव विष्णुसहस्रनामसु 'हुतभुक्' नाम्नो निर्देशः।

व्यापकता च हुतभुजः सर्वत्र दृग्गोचरैव।

---

१. स्वपरिधौ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम्।।

ऋक् ७।६६।४।।

वषट् ते विष्णवास आकृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ।।

ऋक् ७।६६।७।।

बृहस्पते जुषस्व नो हव्यानि विश्वदेव्य। रास्व रत्नानि दाशुषे।।

ऋक् ३।६२।४।।

बृहस्पतिः=सूर्यः—

वृषभं चर्षणीनां विश्वरूपमदाभ्यम्। बृहस्पतिं वरेण्यम्।।

ऋक् ३।६२।६।।

यज्ञेन वर्धत जातवेदसमग्निं यजध्वं हविषा तना गिरा।
समिधानं सुप्रयसं स्वर्णरं द्युक्षं होतारं वृजनेषु धूर्षदम्।।

ऋक् २।२।१।।

भुङ्क्तेऽर्थे—

त्वे अग्ने विश्वे अमृतासो अद्रुह आसा देवा हविरदन्त्या हुतम्।

ऋक् २।१।१४।।

इति निदर्शनम्। भवन्ति चात्रास्माकम्—

लोकेऽस्ति विष्णुर्हुतभुक् प्रसिद्धः
सूर्योऽग्निरापः पृथिवी मरुच्च ।
स्तोत्रा प्रदत्तानि हवींषि सद्यो
भोक्तृस्वरूपे परियन्ति तानि ।।१२३२।।

यस्यास्ति या या स्तुतिमार्गरूढा
वाञ्छा स तां तां मनुजस्य भुङ्क्ते।
वाञ्छानुरूपञ्च फलं प्रदातुं
ददाति तस्मै धिषणां च सत्याम् ।।१२३३।।

मर्त्योऽपि तद्वद्धुतभुग्भविष्णु-
र्ददाति वाञ्छ्यानि यथेप्सितानि ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वशक्तिगर्भाणि च सर्वकस्मै
[1]दातारमग्र्यं प्रपदं नमस्यन् ।।१२३४।।

भोक्ता—८८८

'भुजि' अत्राभ्यवहारकर्मा, ततः 'तृच्' कर्तरि, अनिट्, गुणोऽनङ्ङादि सुप्कार्यम्, कुत्वं गकारस्तस्य चर्त्वञ्च—'भोक्ता'। भुङ्क्त इति 'भोक्ता'। कालरूपो हि भगवान् कालक्रमेण सर्वं भुङ्क्ते। अग्निसूर्यादिद्वारा सर्वस्य भोक्ता वेत्यादि सर्वं हुतभुङ्नाम्नि विशदीकृतं द्रष्टव्यम्।

भवति चात्रास्माकम्—

भोक्तास्ति विष्णुर्हुतभुक् स एव
यथाभिलाषं हुतमस्ति यद्यत् ।
तत्तत् स भुङ्क्ते विविधस्वरूपः[2]
नाम्नां[3] शतैश्चात्र स एव गीतः ।।१२३५।।

सुखदः—८८९

'सु' उपसर्गः। 'खनु अवदारणे' भौवादिको धातुः, ततः ***''अन्येष्वपि दृश्यते''*** (पा० ३।२।३) इति सूत्रेण 'कः' प्रत्ययः, टेर्लोपः='सुखम्'। सुखं ददातीति 'ददातेः' ***''आतोऽनुपसर्गे क;''*** (पा० ३।२।३) इति सूत्रेण 'कः' प्रत्ययः, आल्लोपः='सुखदः' इति। सुखमित्युदकनामसु निघण्टौ (१।१२) पठितम्।

तथा च मन्त्रलिङ्गम्—

या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु।।

ऋक् ७।४९।२।।

सुखदस्य=विष्णोः सूर्यस्य जलदातुरनुकरणमेतद्यत् तडागवापीकूपादीनां निर्माणम्।

---

१. दातारमग्र्यमिति=विष्णुं सूर्यम् अग्निं वा। लोके चापि पश्यामः—वैश्वानरोऽग्निः सर्वान्तः प्रविष्टः सर्वं यथाकामं प्रीणाति। २. विविधस्वरूपः=विविधदेवरूप इत्यर्थः। ३. शतशब्दो बहुपर्यायः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

विष्णुर्हि लोके सुखदः प्रसिद्ध
इन्द्रोऽथ वज्री वृषभः स एव।
स एव लोकाय जलं ददाति
समुद्रवृष्टिस्त्रवणैर्यथर्तु ।।१२३६।।

सुखमधिकृत्य—

तक्षन् नासत्याभ्यां परिज्मानं सुखं रथम्। तक्षन् धेनुं सर्वदुघाम्।।
ऋक् १।२०।३।।

सुपेशसं सुखं रथम् यमध्यस्था उषस्त्वम्।
तेना सुश्रवसं जनं प्रावाद्य दुहितर्दिवः ।। ऋक् १।४६।२।।

द्यौरिह सुखं रथम्। सुखम्=अवकाशः, तस्य दाता वा 'सुखदः'। पूर्वमन्त्रगतं सुखदेति नामान्यथा व्याख्यातं, तत्तत्रैव द्रष्टव्यम्।

भवति चात्रास्माकम्—

सुखं शरीरेऽस्ति चित्[1] समग्रं
रथं शरीरं सुषिरं कृतं तत् ।
कर्मानुरूपं जनुषे[2] पृथक्शो
ददाति मन्ये सुखदोऽस्ति विष्णुः ।।१२३७।।

नैकजः—८६०

'इण्' धातोरौणादिके 'कनि' प्रत्यये, एतीति एकः, प्राग्व्युत्पादितः। संख्याभिधायी वैकशब्दः। 'जनी प्रादुर्भावे' इति दैवादिको धातुस्ततः पञ्चम्यन्तसप्तम्यन्तैकशब्दोपपदाद् ***''पञ्चम्यामजातौ''*** (पा० ३।२।९८) सूत्रेण ***''सप्तम्यां जनेर्डः''*** (पा० ३।२।९७) इति सूत्रेण वा 'डः' प्रत्ययः। एकस्मादेकस्मिन् वा जायते इत्येकजो, निषेधार्थकेन न शब्देन समासे 'नैकजः' इति।

बहुत्र बहुधा जायमानो 'नैकज' उच्यते, असकृज्जो वा नैकजः। ***''अन्येष्वपि दृश्यते''*** (पा० ३।२।१०१) इति सूत्रेण 'ड' प्रत्ययस्तस्मिन् टेर्लोपश्च। सूर्योऽसकृज्जायमानो दृश्यते, तदर्थाभिधायि चैतन्नाम। यद्वा—अनेकेषु स्थानेषु जायते स्थानेभ्य इति वा, स तथोच्यते नैकजत्वेन व्यवस्थापयिता विष्णुश्च।

१. सुषिराण्यङ्गप्रत्यङ्गानि समूह्यैकीकृतम्। २. जायत इति जनुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्य च लोके सर्वत्र व्यापकता, सर्व एव हि नैकजाः जन्तवः। ज्ञायते चैतत् पौर्वदेहिकवृत्तस्मर्तॄणां वचांसि श्रुत्वा। श्रुतानि च (ई० सन् १६३६ जनवरीमासे) लवपुरमधिवसता मया पूर्वजन्मवृत्तवक्तुर्वचांसि परिप्रश्नपूर्वकाणि।

मन्त्रलिङ्गञ्च—

नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।

ऋक् १० ।८५ ।१६ ।।

नहि ग्रभायारण सुशेवोऽन्योदर्यो मनसा मन्तवा उ।
अधा चिदोकः पुनरित् स एत्या नो वाज्यभीषाडेतु नव्यः।।

ऋक् ७ ।४ ।८ ।।

इति निदर्शनम्। भवति चात्रास्माकम्—

स नैकजो विष्णुरिहास्ति सूर्यो
नवो नवो चन्द्रमसा सहैति।
शिशू अमू क्रीडनतत्परौ तौ
स्वतेजसा विश्वमिदंविभातः।।१२३८।।

शिशुमधिकृत्य मन्त्रलिङ्गम्—

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परियातो अध्वरम्।
विश्वान्यन्यो भुवनाभिचष्टे ऋतूंरन्यो विदधज्जायते पुनः ।।

ऋक् १० ।८५ ।१८ ।।

अग्रजः—८६१

'अग्र' शब्दः ***''ऋज्रेन्द्राग्र०''*** (उ० २ ।२८) इत्यादिनोणादिसूत्रेण गत्यर्थाद् 'अगि' धातो 'रनि' निपातितः। ***''सप्तम्यां जनेर्डः''*** (पा० ३ ।२ ।६७) इति सूत्रेण अग्रोपपदात् 'जन्' धातोः 'डः' प्रत्ययः, टेर्लोपः। अग्रे जायत इति 'अग्रजः'। सर्वेषामग्रे भव इत्यर्थः।

मन्त्रलिङ्गञ्च सूर्यमधिकृत्य—

नवो नवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रम्।

ऋक् १० ।८५ ।१६ ।।

प्रथमजो वाग्रजः। विष्णुमधिकृत्य—

पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये।। यजुः ३१ ।२० ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्रजो ज्येष्ठ इति लोके। भवति चात्रास्माकम्—

सूर्योऽग्रजो दृश्यदृशास्ति दृश्ये
ज्येष्ठः स वा लोकवचःप्रसिद्धः ।
आत्मा पृथक् पूर्वभवः शरीरात्
स जायते वा म्रियते न कर्हि ।।१२३६।।

अनिर्विण्णः—८६२

'विद सत्तायां' दैवादिको, 'विद विचारणे' रौधादिको वा धातुः, निरुपसर्गो निस् वा, निसः सोरुत्वम्। ततः कर्तरि 'क्तः' अनिट्, गुणाभावः। ***''रदाभ्यां निष्ठातो नः पूर्वस्य च दः''*** (पा० ८।२।४२) इति सूत्रेण निष्ठातकारस्य नकारः, पूर्वस्य धातोर्दकारस्य च नकारः। ततोऽचः परत्वाभावात् ***''कृत्यचः''*** (पा० ८।४।२८) इत्यनेनाप्राप्ते णत्वे ***''निर्विण्णस्योपसंख्यानम्''*** (वा० ८।४।२८) इति वार्तिकेन परस्य नकारस्य णत्वे पूर्वस्य ष्टुत्वम्। नञा समासे नञो नलोपः—'अनिर्विण्णः' इति।

यो न कदाचिदपि निर्वेदं=खिन्नतां (विरक्ततां) प्राप्नोति सोऽनिर्विण्णः। यो हि रज्यति, स कदाचिद्विरज्यति नायं तथा किन्तु सदा तटस्थः। यद्वा—***''उपसर्गेण धात्वर्थो बलादन्यत्र नीयते''*** इति वैयाकरणनियमान्निर्वेदो= दुःखं विवेकहीनता वा, सा नञा प्रतिहन्यते। अर्थात् सदानन्दरूपो, विवेकरूपश्च (ज्ञानरूपश्च) सः।

मन्त्रलिङ्गञ्च—

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। ऋक् १।१८।६।।

एवं प्रसङ्गतः—

सत्यसत्वन। ऋक् ६।३१।५।
सत्ययोनिः। ऋक् ४।१९।२।।
सत्यवर्त्मा। अथर्व ४।२९।७।।
सत्यज्योतिः। यजुः १७।८०।।
सत्यौजाः। यजुः १०।२८।।
सत्यराधः। ऋक् ७।४१।३।।
सत्यशवसः। ऋक् १।८६।८।।
सत्यशुष्मः। ऋक् ३।३०।२१।।

इत्यादीनि वेदवचनानि तं सदानन्दज्ञानरूपमेव प्रत्याययन्ति। स एवात्र 'अनिर्विण्ण' इति नाम्नोच्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

अनिर्विण्णः स एवास्ति, विष्णुः सूर्यः स्वयम्प्रभुः।
स्रोतांसि च स्रवन्त्येव, जगच्चातो विचारवत्[1] ।।१२४०।।

सदामर्षी—८६३

'सदा' सर्वकालेऽर्थेऽव्ययम्। सदेत्युपपदात्—'मृष तितिक्षायाम्' इति दैवादिकाद्धातोः ***"सुप्यजातौ णिनिस्ताच्छील्ये"*** (पा० ३।२।७८) सूत्रेण 'णिनिः', गुणो रपरः, सुपीनन्तलक्षणो दीर्घो, नलोपः—'सदामर्षी'। मृष्यतिरत्र वहनकर्मा सहनकर्मणाऽभिन्नार्थः।

तथा च मन्त्रलिङ्गम्—

नाक्षस्तप्यते भूरिभारः। ऋक् १।१६४।१३।।

वहन्न तप्यते, सहत इत्यर्थः। लोकेऽपि—शरीरं वहद्धृदयं न तप्यते, विकारादृते। एवं सर्वेष्वङ्गेषु योजनीयम्। समुद्रः सदामर्षी, नदीः सर्वान् जन्तूँश्च वहमानः।

भवति चात्रास्माकम्—

सदामर्षी स एवास्ति, विष्णुः सूर्यः सनातनः ।
तद्गुणञ्च जगत् सर्वं, सदामर्षि वपुर्यथा ।।१२४१।।

लोकाधिष्ठानम्—८६४

'लोक' शब्दो व्युत्पादितो घञि, कर्तर्यचि वा। 'अधिष्ठानम्'— इति 'अधि' पूर्वात् तिष्ठतेः' भौवादिकादधिकरणे 'ल्युट्' योरनः, दीर्घः। ***उपसर्गात्सुनोतिसुवतिस्वति०*** (पा० ८।३।६५) इत्यादिना सूत्रेण सस्य षः, ष्टुत्वम्= 'अधिष्ठानम्'। लोकस्य अधिष्ठानम्=लोकाधिष्ठानम्—ब्रह्म, विष्णुः, सूर्यो वेति। ***"लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य"*** (४।१।३) इति च महाभाष्यम्।

मन्त्रलिङ्गञ्च—

तस्मिन्नातस्थुर्भुवनानि विश्वा। ऋक् १।१६४।१३।।

अथर्व ६।६।११।।

---

१. विचारवत्=विचारयुक्तम्, गतिशीलमित्यर्थः। विचरणयुक्तं वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋचो अक्षरे परमे व्योमन् यस्मिन् देवा अधि विश्वे निषेदुः।

ऋक् १।१६४।३६।।

यस्मिन्निदं सं च विचैति सर्वम्। तै० आ० १०।१।१।।

भवति चात्रास्माकम्—

लोकाधिष्ठानमस्त्यर्को, विष्णुर्ब्रह्मादिनामधृत् ।
सति तस्मिन् स्थितं सर्वं, जीवे वर्ष्म[1] स्थितं यथा।।१२४२।।

अद्भुतः—८६५

'अद्' इत्यव्ययं कदाचिदर्थे। अदुपपदाद् 'भू धातोः' ***''अदि भुवो डुतच्''*** (उ० ५।१) इत्युणादिसूत्रेण 'डुतच्' प्रत्ययो, डित्वाट्टिलोपः। अद्=कदाचिद् भवतीत्यद्भुतम्। सन्नप्यभूतमिवेत्यर्थः। **''यादृगेव ददृशे तादृगुच्यते''** (ऋक् ५।४४।६) इति वैदिकनियममनुसृत्य लोकेऽपि पश्यामः—सन्नपि सूर्यो भूचक्रेण व्यवहितत्वान्न दृश्यते। सन्नपि पुरुषः स्थानेन व्यवहितो न दृश्यते। येयमीदृशी दशा तामेषोऽद्भुतशब्द आचष्टे। अद्भुतशब्दस्याश्चर्यवाचकताप्येतस्मादेव, यत् सदपि वस्तु न दृश्यते, दृश्यते च कदाचिदिति।

मन्त्रलिङ्गञ्च—

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। ऋक् १।१८।६।।

वषट्कृतस्याद्भुतस्य दस्रा। ऋक् १।१२०।४।।

अद्भुतशब्दस्याश्चर्यवाचकत्वे—अद्भुतमधीते, अद्भुताध्यापक इति। निरुक्ते च——**'इदमपीतरदद्भुतमभूतमिव।'** नि० १।६।।

भवति चात्रास्माकम्—

सूर्योऽद्भुतः शाश्वतिकोऽथ विष्णुः
सदास्तिमानक्षिपथन्न याति ।
यथा जनः सन्नपि नैव दृश्यो[2]
लब्धान्तरश्चास्ति तथात्र सूर्यः[3] ।।१२४३।।

❖ ❖ ❖

१. वर्ष्म=शरीरम्। २. नैव दृश्यः=द्रष्टुमशक्यः ३. सूर्यः=संरणशीलं सर्वम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सनात् सनातनतमः, कपिलः कपिरप्ययः ।
स्वस्तिदः स्वस्तिकृत् स्वस्ति, स्वस्तिभुक् स्वस्तिदक्षिणः ।।१०६।।

८६६ सनात्, ८६७ सनातनतमः, ८६८ कपिलः, ८६६ कपिः, ६०० अप्ययः। ६०१ स्वस्तिदः, ६०२ स्वस्तिकृत्, ६०३ स्वस्ति, ६०४ स्वस्तिभुक्, ६०५ स्वस्तिदक्षिणः।।

सनात्—८६६

'सनात्' इति शश्वदर्थकमव्ययम्। सनान्नित्योऽविकार्येकरस इत्यर्थः। मन्त्रलिङ्गञ्च—

सनात् युवानमवसे हवामहे। ऋक् २।१६।१।।

युवानमिन्द्रम्।

सनादेव सहसे जात उग्रः। ऋक् ४।२०।६।।

आ यो महः शूरः सनादनीडः। ऋक् १०।५५।६।।

इत्यादि निदर्शनम्। 'सनात्' शब्दो बहुत्र प्रयुक्तो वेदे। जगदिदं सनात् प्रवाहतः। भवति चात्रास्माकम्—

सनात् स सूर्यः स युवा स इन्द्रः
स वास्तु विष्णुः स सखा स उग्रः।
स एव शूरः स महाननीडः
सनात्तथात्मास्ति जगत् सनाच्च ।।१२४४।।

सनातनतमः—८६७

'सना' इति सदार्थेऽव्ययम्। तस्मात् भवार्थे ***"सायञ्चिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च"*** (पा० ४।३।२३) इति सूत्रेण 'ट्युः' प्रत्ययो, योरनादेशस्तुडागमश्च 'सनातनः'। तस्माच्चातिशायनिकस्तमप्। अतिशयेन सनातनः=सनातनतमः। सर्वस्य जगतो व्यापकत्वात् समकालीन आद्योऽन्त्यश्चेत्यर्थः।

मन्त्रलिङ्गञ्च—

सनातनमेनमाहुरुताद्यः स्यात्पुनर्णवः ।
अहोरात्रे प्रजायेते अन्यो अन्यस्य रूपयोः।। अथर्व १०।८।२३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोके चापि सर्वं सनातनं=सदाभवं प्रवाहतः पुरातनमित्यर्थः।
भवति चात्रास्माकम्—

सनातनो विष्णुरुतापि सूर्यः
सनाद्दिनं नक्तमुषाः सनाच्च ।
सनाभवं जन्म जरा मृतिश्च
सनादयं याति जगत् प्रपश्यन् ।।१२४५।।

कपिलः—८६८

'कमेः' ***''कमेः पश्च''*** (उ० १।५५) इत्युणादिसूत्रेण 'इलच्' प्रत्ययो, मकारस्य पकारादेशश्च—'कपिलः', इति पिङ्गलवर्णो लोके प्रसिद्धः, स च सूर्यः। कपिं सूर्यं वा लाति=आदत्ते सर्वस्य जगतः प्रवर्तनायेति 'कपिलः' विष्णुः।

मन्त्रलिङ्गञ्च—

दशानामेकं कपिलं समानम्। ऋक् १०।२७।१६।।

लोकेऽपि—इन्द्रधनुषि सूर्यरश्मिषु च स्पष्टं कपिलता दृश्यते। सूर्यरश्मिभिरेव सनान्मेघा रज्यन्ते=कपिलीक्रियन्ते। तस्मात् 'कपिलः' सूर्यो वर्णश्च लोके।

भवति चात्रास्माकम्—

सूर्यो हि लोके कपिलः प्रजातः
सोऽब्दान् विधत्ते कपिलान् स्वगोभिः।
तथा यथा पिङ्गलकेशमूर्धा
बालो विभात्यत्र शिरोरुहैः स्वैः ।।१२४६।।

कपिः—८६६

कः—'कै शब्दे' भौवादिकः, 'कृ विक्षेपे' तौदादिकः, 'कनी दीप्तिकान्तिगतिषु' भौवादिकः, एभ्यो यथेप्सितार्थम् ***''अन्येष्वपि दृश्यते''*** (पा० ३।२।१०१) सूत्रेण 'डः' प्रत्ययस्तस्मिंश्च टेर्लोपः। कायति=शब्दायते, किरति=जलं विकिरति, कनति=दीप्तो भवतीति वा 'कः', तं पाति=रक्षति, पिबति=संहृतिसमयेऽन्तः समावेशयतीति 'कपिः' विष्णुः। कं=जलं पातीति 'कपिः' सूर्यश्च। 'पातेः पिबतेर्वा' ***''अच इः''*** (उ० ४।१३६) इत्युणादिसूत्रेण 'इः' प्रत्ययो बाहुलकात् किच्च स, अत आतो लोपः—'कपिः'।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

प्रिया तष्टानि मे कपिर्व्यक्ताव्यदूदुषत्। ऋक् १०।८६।५।।

इन्द्रो दिव इन्द्र ईशे पृथिव्या इन्द्रो अपामिन्द्र इत् पर्वतानाम्।।

ऋक् १०।८६।१०।।

इन्द्र पिब प्रतिकामं सुतस्य प्रातः सावस्तव हि पूर्वपीतिः।
हर्षस्व हन्तवे शूर शत्रूनुक्थेभिष्टे वीर्या प्रब्रवाम ।।

ऋक् १०।११२।१।।

उक्थः=स्तवः। सच शब्दरूपस्तं पिबतीति कपिः। कपिः सोमप उक्थपश्चेति जले शब्दे च सङ्गतिः। आदित्योऽप्यत एव कपिर्यतो हि स रसमादत्ते। लोकेऽपि च पश्यामः—स्तुत्या मनो, जलपानेन च शारीरमोजस्तरुणायते। समानश्च लोको वेदेन।

भवति चात्रास्माकम्—

कपिर्हि सूर्यो रसहृत् स वास्ति
लोके तृषार्तो रसमाजिहीते[1]।
उक्थः स्तुतिर्हृष्टमनास्तया सन्
कपिर्मनो वापि च हर्षमेति ।।१२४७।।

अप्ययः—६००

'अपि'—उपसर्गः। 'इण् गतौ' आदादिको धातुस्ततः ***"एरच्"*** (पा० ३।३।५६) इति सूत्रेणाधिकरणे 'अच्' प्रत्ययो, गुणायादेशौ, उपसर्गेकारस्य यणि च 'अप्ययः' इति सिध्यति। अपियन्ति=लीयन्तेऽस्मिन् भूतानि प्रलयकालेऽतः 'अप्ययः' इत्युच्यते, विष्णुः सूर्यो वा।

मन्त्रलिङ्गञ्च—

महो दिवः पृथिव्याश्च सम्राट्। ऋक् १।१००।१।।

न यस्य देवा देवता न मर्ता आपश्च न शवसो अन्तमापुः ।
स प्ररिक्वा त्वक्षसा क्ष्मो दिवश्च मरुत्वान्नो भवत्विन्द्र ऊती।।

ऋक् १।१००।१५।।

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५२।२।।

---

१. आजिहीते=आदत्ते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्मिन् क्षयं=निवासं प्रलयं वाप्नुवन्ति सः 'अप्ययः'। उपसर्गवशादन्तर्निगरणरूपोऽत्र धात्वर्थः।

भवति चात्रास्माकम्—

यस्माज्जनुर्यस्य लयोऽपि तत्र
मृदो घटोऽसौ मृदि लीयते वा।
सूर्यात् प्रसूतिः प्रलयश्च सूर्ये
विष्णोः समस्तं, तमुपैति चान्ते।।१२४८।।

लोके च पश्यामो=यस्मात् स्वस्थानाज्जन्तुः प्रातर्बहिर्निर्गच्छति, रात्रौ पुनस्तस्मिन्नेवायाति।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृंहितसत्यभाष्ये
नवमं नामशतकं
सम्पूर्णम्।

❖ समाप्तमिदं नवमं शतकं सव्याख्यम् ❖

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्तिदः—६०१, स्वस्तिकृत्—६०२, स्वस्ति—६०३, स्वस्तिभुक्—६०४, स्वस्तिदक्षिणः—६०५

'सु' उपसर्गस्तदुपपदाद् 'अस् भुवि' धातोः ***''सावसे शित्''*** (उ० ४।१८१) इत्युणादिसूत्रेण 'ति' प्रत्ययः, स च शित्। शित्त्वात् सार्वधातुकसंज्ञा, तेन चार्धधातुकलक्षणो भूभावो न भवति। सु+अस्ति—यण्='स्वस्ति'। मङ्गलवाचकोऽयं स्वस्तिशब्दोऽव्ययञ्च स्वरादिपाठात्। अनव्ययमपि क्वचित्तथाविधप्रयोगदर्शनात्। तदुपपदाद्ददातेः ***''आतोऽनुपसर्गे कः''*** (पा० ३।२।३) सूत्रेण 'कः' प्रत्ययः कर्तरि, आतो लोपः। स्वस्ति ददातीति 'स्वस्तिदः' कल्याणदो विष्णुः सूर्यो वा।

यद्वा—सत्त्वाय=आत्मधारणाय—अर्थाज्जीवनाय जीवनोपयोगीनि साधनानि ददाति स, तथाभूतः। इह च परस्परापेक्षं सर्वमपि स्वस्तिदं, यतो हि यद्यस्योपकारि तत्तस्य स्वस्तिदमिति सुबोधा भगवतः स्वस्तिदस्य सर्वव्यापकता।

स एव च 'स्वस्तिकृत्'—स्वस्त्युपपदात् 'करोतेः' क्विप् तुक् च।

'स्वस्तिभुक्'—स्वस्त्युपपदाद् 'भुजेः'—अवनार्थकात् 'क्विप्'। स्वदत्तस्य जीवनसाधनस्य शुभस्य वा रक्षकः, स एव स्वस्तिरूपः=कल्याणरूपः सर्वस्य शुभाशंसीति भावः।

स एव च स्वस्तिं दक्षते=वर्धयतीति 'स्वस्तिदक्षिणो' वरदहस्तो मङ्गलहस्त इति।

स्वस्तिपदार्थप्राधान्यात् पञ्चानामपि नाम्नां युगपदेव व्याख्या विहिता।

मन्त्रलिङ्गञ्च—

स्वस्तिदा विशस्पतिः। ऋक् १०।१५२।२।।

स्वस्ति नो दिवो अग्ने। ऋक् १०।७।१।।

स्वस्ति मित्रावरुणौ। ऋक् ५।५१।१४।।

''स्वस्तिगर्भसूक्तम्'' (ऋक् १०।६३।३—१६) मन्त्रान्तरञ्च समुदायगमकमुदाहरणम्—

विश्वा हि वो नमस्यानि वन्द्या नामानि देवा उत यज्ञियानि वः।
ये स्थ जाता अदितेरद्भ्यस्परि ये पृथिव्यास्ते म इह श्रुता हवम्।।

ऋक् १०।६३।२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

स स्वस्तिदः स्वस्तिकृदत्र नः स्यात्,
स स्वस्तिभुक् स्वस्तिपदाभिधानः।
स स्वस्तिमद्दक्षिण एव नः स्यात्
स्वस्तिश्च भूयः परिपातु चास्मान्।।१२४६।।

❖❖❖

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ।।११०।।

६०६ अरौद्रः, ६०७ कुण्डली, ६०८ चक्री, ६०६ विक्रमी, ६१० ऊर्जितशासनः। ६११ शब्दातिगः, ६१२ शब्दसहः, ६१३ शिशिरः, ६१४ शर्वरीकरः।।

अरौद्रः—६०६

'रुदिर्' अश्रुविमोचने' धातुरादादिकस्तस्मात् 'णिच्', ततो ***''रोदेर्णिलुक् च''*** (उ० २।२२) इत्युणादिना 'रक्' प्रत्ययो णेर्लुक् च भवति। णिलोपश्च न स्थानिवत्, लुका लुप्तत्वात्, तेन रकः कित्त्वाद् गुणाभावो, ***''नेड्वशि कृति''*** (पा० ७।२।८) इति सूत्रेण इटो निषेधः। रोदयतीति 'रुद्रः', स देवता अस्येति ***''साऽस्य देवता''*** (पा० ४।२।२४) इति सूत्रेण 'अण्' प्रत्ययः, आदिवृद्धिः, ***''यस्येति च''*** (पा० ६।४।१४८) इति सूत्रेणाकारलोपः—'रौद्रः'। रौद्रोऽस्यास्ति मत्वर्थीयोऽर्शाद्यच्। न रौद्रः—'अरौद्रः', नञ्समासः। एवञ्च रुद्रदैवतका भयक्रोधादयोऽस्य न सन्तीति वाच्योऽर्थोऽरौद्रनाम्नः। एवंविधश्च विष्णुः सूर्यो वा।.

मन्त्रलिङ्गञ्च—

ताविदा चिदहानां तावश्विना वन्दमान उपब्रुवे। ता उ नमोभिरीमहे।।
ताविद् दोषा ता उषसि शुभस्पती ता यामन् रुद्रवर्तनी।
मा नो मर्ताय रिपवे वाजिनीवसू परो रुद्रावति रव्यतम्।।

ऋक् ८।२२।१३, १४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अरौद्रशब्दार्थे च—

इन्द्रश्च मृडयाति नो न नः पश्चादघं नशत्।

भद्रं भवाति नः पुरः।। ऋक् २।४१।११।।

यतोऽरौद्रस्ततो वसूनि दयते। अत्र मन्त्रलिङ्गम्—

यो विश्वा दयते वसु। ऋक् ८।१०३।६।।

यो भोजनं च दयसे च वर्धनमार्द्रादा शुष्कं मधुमद् दुदोहिथ।

स शेवधिं निदधिषे विवस्वति विश्वस्यैक ईशिषे सास्युक्थ्यः ।।

ऋक् २।१३।६।।

स=इन्द्रः।

अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति।

ऋक् २।३३।१०।।

इत्यादि निदर्शनम्।

भवति चात्रास्माकम्—

अरौद्र इत्येव मनो निधाय
यः स्तौति तं शम्भुमनन्तरूपम्।
तस्मै ददातीह स भोजनानि
वसूनि काम्यानि च सर्वकाणि।।१२५०।।

कुण्डली—६०७

'कुडि दाहे' भौवादिकः, 'कुडि रक्षणे' चौरादिको वा धातुरिदित्, इदित्त्वाच्च नुम्। ताभ्यां ***''कालस्तृपश्च''*** (उ० १।१०४) इत्युणादिसूत्रे चकारपाठादन्यतोऽपि 'कलः' प्रत्ययः, ककार इत्, अनुस्वारपरसवर्णौ। 'कुण्डल' शब्दाच्च नित्ययोगे मत्वर्थीयः 'इनिः'। ***''यस्येति च''*** (पा० ६।४।१४८) सूत्रेणाकारलोप इन्नन्तलक्षणो दीर्घः='कुण्डली'। एवञ्च कुण्डलं दाहो रक्षणं वा, सोऽस्यास्तीति 'कुण्डली' 'सूर्यः' अग्निस्तज्जनकत्वाद्विष्णुश्च।

तथा च मन्त्रलिङ्गम्—

अजीजनो हि पवमान सूर्यम्। यजुः २२।१८।।

सूर्योऽग्निश्च, प्रकाशपाकाभ्यां जगत् रक्षतः। सूर्ये च कदाचित्कुण्डलं दृश्यत एव प्रकाशरूपम्। नेत्रयोरपि सूर्यदेवतयोः कुण्डलता प्रत्यक्षं दृश्यते। समानता हि ब्रह्माण्डपिण्डयोः, **''लोकसम्मितः पुरुषः''** इत्यायुर्वेदवित्समयात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवञ्च कुण्डलिनो भगवतो विष्णोः सूर्यस्य वा व्यापकता सिद्धा।

भवति चात्रास्माकम्—

स कुण्डली सूर्य इहास्ति बोध्य-
स्तस्यौजसा पाकमुपैति सर्वम्।
स कुण्डली कुण्डलमेति तद्व-
न्नेत्रञ्च तद्दैवतकं यतस्तत् ॥१२५१॥

चक्री—६०८

'चक तृप्तौ प्रतिघाते च' इति भौवादिको धातुस्ततः ***''चकिरम्योरुच्चोपधायाः''*** (उ० २।१४) इत्युणादिसूत्रेण 'रक्' प्रत्ययो बाहुलकाच्च नोत्वम्। ***''नेड् वशि कृति''*** (पा० ७।२।८) सूत्रेण चेटो निषेधः।

यद्वा—***''घञर्थे कविधनाम्''*** (वा० ३।३।५८) इति 'क' प्रत्ययः, तस्मिन् ***''कृञादीनां द्वे भवतः''*** (वा० ६।१।१२) इति द्वित्त्वम्, अभ्यासकार्ये यणादेशे च—'चक्रम्'। चक्यते=तृप्यते जगत्, प्रतिहन्यते च तमो येन तच्चक्रं सूर्यः, सोऽस्यास्तीति 'चक्री'।

यद्वा—क्रियते घटादिकमिव विभिन्नरूपं जगद्येन तच्चक्रम्, भगवतः संकल्पादिरूपा शक्तिः, तदस्यास्तीति 'चक्री' विष्णुः।

एतदर्थकं मन्त्रलिङ्गम्—

चक्रियो विश्वा भुवनाभि सासहिश्चक्रिर्देवेष्वादुवः।
आ देवेषु यतत आ सुवीर्य आशंस उत नृणाम् ॥ ऋक् ३।१६।४॥

जगति प्रत्येकं भ्रमन्निव दृश्यतेऽतश्चक्रत्वरूपस्य गुणस्य व्यापकता सर्वत्र दृश्यते।

भवति चात्रास्माकम्—

विष्णुर्ह चक्री स उ वास्ति सूर्यो
विश्वञ्च चक्रे भ्रमतीव तस्य।
यो दण्डभूतः स च[1] चक्रभूतः
पश्यन्ति विज्ञा न तु तं विमूढाः ॥१२५२॥

इतरोऽपि चक्रमेतस्मादेव, भ्रमता तेन सर्वं भ्रमति।

---

१. चोऽप्यर्थे।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विक्रमी—६०६

विपूर्वः 'क्रमु पादविक्षेपे' धातुस्तस्माद् भावे 'घञ्'। ***''नोदात्तोपदेशस्य मान्तस्यानाचमेः''*** (पा० ७।३।३४) सूत्रेण घञि वृद्धि-निषेधः। विक्रमणं विक्रमः, सोऽस्यास्तीति 'विक्रमी'। मतुबर्थे 'इनिः'। ***''यस्येति च''*** (पा० ६।४।१४८) इत्यलोपः। इन्नन्तलक्षणो दीर्घः। प्रातिपदिकान्तनलोपः। यद्वा— विक्रमणमस्मिन्नस्तीति 'विक्रमी'।

तथा चानुरूपं मन्त्रलिङ्गम्—

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।२।।

भवति चात्रास्माकम्—

स विक्रमी विष्णुरुतास्ति सूर्यः
सर्वञ्च तस्मिन् क्रमते सनाच्च।
स विक्रमं स्वं वितरन् समग्रे
सर्वं करोत्यात्मगुणेन तुल्यम्[1] ।।१२५३।।

ऊर्जितशासनः—६१०

'ऊर्ज बलप्राणनयोः' इति चौरादिको धातुस्ततो 'णिच्', णिजन्ताच्च कर्तरि 'क्तः', अकर्मकत्वात् इडागमः। ***''निष्ठायां सेटि''*** (पा० ६।४।५३) सूत्रेण णेर्लोपे—'ऊर्जितम्' बलवदित्यर्थः।

यद्वा— ***'अनित्यण्यन्ताश्चुरादय'*** इत्यनुशासनात् केवलादेवोर्जेः कर्तरि 'क्त', इट्—'ऊर्जितम्'।

यद्वा—'ऊर्ज' धातो ***''गुरोश्च हलः''*** (पा० ३।३।१०३) सूत्रेण स्त्रीत्वविशिष्टे भावे अकारस्ततश्च 'टाप्'—ऊर्जा, सा सञ्जातास्येति ***''तदस्य सञ्जातं तारकादिभ्य इतच्''*** (पा० ५।२।३६) इतीतच् प्रत्ययो, ***''यस्येति च''*** (पा० ६।४।१४८) इत्याकारलोपः—'ऊर्जितम्' इति।

शासनम्—'शासु अनुशिष्टौ' इत्यादादिको धातुस्ततः करणे 'ल्युट्', योरनः—'शासनो' विष्णुरनतिक्रमणीयनियमः।

---

१. विक्रमधर्माणं=गतिशीलमित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

सो अपां नपादूर्जयन्नप्स्वन्तर्वसुदेयाय विधत्ते विभाति।

ऋक् २।३५।७।।

तथा—

तव प्रशास्त्रं त्वमध्वरीयसि ब्रह्मा चासि गृहपतिश्च नो दमे।

ऋक् १०।९१।१०।।

लोकेऽपि च—सर्वं दृश्यमूर्जायुक्तं शासनबद्धञ्च दृश्यते। हस्तावन्तरिक्षस्थानीयौ अन्तरिक्षे एवावलम्बेते, तथान्यदपि भगवता यथानियमशिष्टं यद्विरचितम् तन्नातिक्रामति तन्नियममिति।

भवति चात्रास्माकम्—

स विष्णुरेवोर्जितशासनोऽस्ति
स शासदूर्जां नियतां विधत्ते ।
जले स्थले यच्च पदार्थजातं
सर्वं बलं यच्छति भुक्तमात्रम्[1] ।।१२५४।।

शब्दातिगः—६११

शब्दमतिगच्छति=वाचमतिक्रम्य वर्तते इति 'शब्दातिगः'। शप्यते= आक्रोश्यतेऽनेनेति 'शब्दः'। 'शप् आक्रोशे' धातोः ***"शाशपिभ्यां ददनौ"*** (उ० ४।९७) इत्युणादिसूत्रेण 'दन्' प्रत्ययो, अनिट्। ***"झलां जश् झशि"*** (पा० ८।४।५३) सूत्रेण जशत्वम्। 'अति' पूर्वाद् 'गम्लृ गतौ' धातोश्च ***"अन्येष्वपि दृश्यते"*** (पा० ३।२।१०१) इति 'डः', टिलोपः। स्तुत्यो हि विष्णुः सूर्यश्च नाक्रोशार्थकापशब्दविषय इत्यर्थः। वस्तुतस्तु सर्वविधवागविषयः सः।

सर्वो हि प्राणी स्ववाञ्छानुरूपं स्तौति, शपति वा, किन्तु स सर्वविधस्तुति-शापाविषय इति भावः। स च सर्वान्तःस्थः सर्वं जानाति। व्यापकता चैवं तस्य सिध्यति, यतो हि जगति जातो जन्तुः किञ्चिन्न किञ्चिज्जानाति।

मन्त्रलिङ्गञ्च—

मा वो घ्नन्तं मा शपन्तं प्रतिवोचे देवयन्तम्।
सुम्नैरिद्व आ विवासे। ऋक् १।४१।८।।
प्रत्यगेनं शपथा यन्तु तृष्टाः। ऋक् १०।८७।१५।।

१. भुक्तमात्रं=भोग्यतामितम्। व्यवहृतमित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अशपत यः करस्नं व आददे। ऋक् १।१६१।१२।। इति निदर्शनम्।

शब्दः=शपथरूपः शापरूपो वा, यथा—

यो न शपादशपतः शपतो यश्च नः शपात्।
वृक्ष इव विद्युता इत आमूलादनुशुष्यतु।।

अथर्व ७।५६।१।।

भवति चात्रास्माकम्—

शब्दातिगः शब्दविलेपहीनः
सर्वं विलङ्घ्याक्रमतेऽथ विष्णुः।
जन्तुर्यथा स्वार्थवशं हवींषि
जुहोति लब्धुं निजवाञ्छितानि ।।१२५५।।

शब्दसहः—६१२

'शब्दः' उक्तः शपतेरौणादिके दनि। 'षह मर्षणे' भौवादिको धातुस्ततः पचाद्यच्। सहत इति 'सहः', शब्दानां सहः 'शब्दसहः' विष्णुः सूर्यो वा। यद्यपि लोके शब्दः सदसद्वचनसमानार्थः प्रयुज्यते, तथापीहासद्वचनार्थाभिधायिनं शब्दमभिप्रेत्य 'शब्दसह' इति नाम। यथा हि—लोकेऽपशब्दान् प्रयुञ्जानमात्मानं प्रति निर्बलं दीनं सक्षमः सबल औदासीन्येन सहते, न तु प्रतिचिकीर्षुस्तं किञ्चिद् ब्रूते तस्मै क्रुध्यति वा; तथा विष्णुः सूर्यो वापि सर्वस्य दुरुक्तं सहमानौ न तद्विरुद्धमनुध्यायत इति तयोः 'शब्दसहः' इति नाम।

बहुधा च वाञ्छितमुद्दिश्य शब्द-सन्ततिः। तथा च मन्त्रलिङ्गम्—

तद् राधो अद्य सवितुर्वरेण्यं वयं देवस्य प्रसवे मनामहे ।
अस्मभ्यं द्यावापृथिवी सुचेतुना रयिं धत्तं वसुमन्तं शतग्विनम्।।

ऋक् १।१५६।५।।

मुञ्चतु मा शपथ्यात्। ऋक् १०।६७।१६।।

सर्वस्मात् किल्विषादित्यर्थः।

भवति चात्रास्माकम्—

लोकेऽस्ति कः शब्दसहः प्रसिद्धः
सूर्योऽथ विष्णुस्तदुपासको वा ।
क्षमा विभूषा सकलस्य लोके
सर्वं क्षमावान् सहते क्षमायाम् ।।१२५६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिशिरः—६१३

'शश प्लुतगतौ' धातुः, तत *''अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः''* (उ० १।५३) इत्युणादिसूत्रेण 'किरच्' प्रत्ययः उपधाया इत्वञ्च निपात्यते। कित्त्वाद् गुणाभावः—'शिशिर' इति। शशति=शीघ्रमुत्प्लुत्य गच्छतीति 'शिशिरः' विष्णुश्च। सूर्यो हि सर्वस्य गतेर्दाता तद्गतिरूपश्च सर्व ऋतुगणः।

तथा च मन्त्रलिङ्गम्—

ग्रीष्मो हेमन्तः शिशिरो वसन्तः शरद्वर्षाः स्विते नो दधात।
आ नो गोषु भजता प्रजायां निवात इद्धः शरणे स्याम।। अथर्व ६।५५।२।।

तथा स 'इद्'—

इदावत्सराय परिवत्सराय संवत्सराय कृणुता बृहन्नमः।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम।। अथर्व ६।५५।३।।

इति निदर्शनम्। एतेन सर्वेषामृतुनाम्नां वाच्यः स विष्णुः सूर्यो वा भवतीति विज्ञायते, अतएव च स 'माधवः' इति लोके प्रसिद्धः। सूर्यस्य गतिरूपैर्ऋतुभिः सर्वं विश्वं व्याप्यते। तस्माद् विष्णुः सूर्यो वा तन्नाम्नोक्तो भवति—'शिशिर' इति।

भवति चात्रास्माकम्—

गत्या हि सूर्यो निजया पृथक्शो
जगत्यृतूनां कुरुते बहुत्वम् ।
स सूर्य आत्मा सकलस्य लोके
तन्नामभिर्गायति तत्त्ववित्तम्।।१२५७।।

शर्वरीकरः—६१४

'शृ हिंसायां' क्रैय्यादिको धातुस्ततः *''कृगॄशॄवृञ्चतिभ्य ष्वरच्''* (उ० २।१२१) इत्युणादिसूत्रेण 'ष्वरच्' प्रत्ययः। षस्य *''षः प्रत्ययस्य''* (पा० १।३।६) सूत्रेणेत्संज्ञा, तस्य लोपः। गुणो रपरः। स्त्रियाञ्च *''षिद्गौरादिभ्यश्च''* (पा० ४।१।४१) इति सूत्रेण ङीषि—'शर्वरी' इति। कर इति करोतेः पचाद्यच्, शर्वर्याः करः='शर्वरीकरः' सूर्यः। शर्वरी=रात्रिस्तमो वा, तच्चास्तं यन्नेष करोतीति तथोच्यते।

मन्त्रलिङ्गञ्च—

सनातनमेनमाहुरुताद्य स्यात् पुनर्णवः।
अहोरात्रे प्रजायेते अन्यो अन्यस्य रूपयोः।।अथर्व १०।८।२३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा—**''आ त्वेषं वर्तते तमः''**। यजुः ३४।३२।।

लोके च प्रत्यक्षं पश्यामः प्रकाशावरणं तमः सर्वत्र सर्वदा तिष्ठति।

भवति चात्रास्माकम्—

ज्योतिर्हि सूर्यस्तमसः परस्ताद्
भूगोलविक्षेपवशाद् विधत्ते।
दिनं च रात्रिः परिवर्तमाने
तमः प्रकाशौ च सदैकरूपौ।।१२५८।।

❖ ❖ ❖

अक्रूरः पेशलो दक्षो, दक्षिणः क्षमिणां वरः।
विद्वत्तमो वीतभयः, पुण्यश्रवणकीर्तनः ।।१११।।

६१५, अक्रूरः, ६१६ पेशलः, ६१७ दक्षः, ६१८ दक्षिणः, ६१९ क्षमिणां वरः। ६२० विद्वत्तमः, ६२१ वीतभयः, ६२२ पुण्यश्रवणकीर्तनः।

अक्रूरः—६१५

'कृती छेदने' तौदादिको धातुस्ततः ***''कृतेश्च क्रू च''*** (उ० २।२१) इत्युणादिसूत्रेण 'रक्' प्रत्ययः 'क्रू' चादेशो धातोः सर्वस्यानेकाल्त्वात्। कृन्ततीति 'क्रूरः'। नञा समासो नञो नलोपः, न क्रूरो 'अक्रूर' इति। स च विष्णुः सूर्यो वा।

सूर्यो हि न किञ्चित् कृन्तति, परन्तु संयोगवशतो विकारोत्पादकः कालवशाच्च। षड् भावविकाराः उक्ताः। तथा च यथा कर्त्री (कर्तनसाधनविशेषः) हस्तसंयोगमापद्य वस्त्रादिकं कृन्तति, एवं सूर्यादयो ग्रहा न स्वरूपेण क्रूरा अक्रूरा वा, किन्त्वन्येन संयोग एवैषां क्रूराक्रूरत्वसम्पादकः। एष विषयः पराशरादिमहर्षिभिर्विशदं विवेचितः।

तथा च—सर्व ऋतव एकस्य जीवयितारोऽन्यस्य च मारयितारः। एवं दिनं निशा च किञ्चित्प्रसूते, किञ्चिच्च हन्ति। न तत्र दिनं निशा वा स्वरूपेण हेतुः, किन्तु कालसंयोगः, ग्रहसंयोगो, ग्रहाणां दशानुदशानाञ्च योगस्तेन युक्ते तत्र कारणम्। एवं सत्यपि मानवा यथामनोऽनुरूपं व्यवहरन्ति स्वमनस्तोषाय।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

क्रूरमस्या आशंसनं·······तद्वै पितृषु किल्बिषम्। अथर्व ५।१६।५।।

यस्मिंश्च किल्बिषं नास्ति सोऽक्रूरः इत्यर्थादापद्यते। बहुत्र यजुष्यथर्वणि च विभिन्नविभक्तिवचनान्तः क्रूर शब्दः। तथा च—

''**क्रूरम्**'' यजुः ६।२; ''**क्रूरस्य**'' यजुः १।२८; ''**क्रूराणि**'' अथर्व १२।७।३; ''**क्रूरैः**'' अथर्व १६।७।२; ''**क्रूरम्**'' अथर्व ५।१६।५; ६।४६।१; १८।४।८३; १६।६।१४; १६।५६।५ इत्यादि निदर्शनम्।

भवति चात्रास्माकम्—

अक्रूरमेतत् सकलं हि दृश्यं
क्रूरं भवेत् कर्मवशेन सर्वम् ।
लोको यथाकामवशं ब्रवीति
क्रूरेण दैवेन विनाशितोऽसौ[1] ***।।१२५६।।***

पेशलः—६१६

'पिश अवयवे' तौदादिको धातुर्मुचादिस्ततो ''*वृषादिभ्यश्चित्*'' (उ० १।१०६) इत्युणादिसूत्रेण 'कल' प्रत्ययः स च कित्, कित्त्वेऽपि च बाहुलकाद् गुणः='पेशलः' इति।

लोके च पश्यामः—शरीरमिदमेकं रोचिष्णु च दृश्यते, किन्तु यदि तत्त्वतो विलोक्येत ततोऽवयवेषु विभक्तं दृश्यते, अवयवाः अपि स्वप्रत्यवयवेषु विभक्ता दृश्यन्ते। एवं नक्षत्राणामेकं मण्डलं, तस्मिन् मण्डले च प्रत्येकं नक्षत्राण्यवयवाः। एवमेव च कालसमष्ट्यां क्षणघटिदिनमासवर्षाणां भेद उपपद्यत इति। तथा कलाविकलांशराशिगणनामार्गोऽपि सम्यगूह्यते।

मन्त्रलिङ्गञ्च—

सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः।
रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तरसरं न वेम ।।
यजुः १६।८३।।

लोके च पेशलशब्दः कोमलार्थकः। भवतश्चात्रास्माकम्—

सर्वं हि लोके यदिहास्ति दृश्यं
तच्छोभते खण्डकृतैकरूपम् ।

---

१. असावहमिति वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा वपुः पेशलमत्र दृश्यं
परन्तु तत् खण्डशतैर्निबद्धम्।।१२६०।।

तथैव कालः क्षणवृद्धिवृद्धः
क्षयाय विश्वस्य सदोपयाति ।
तं पेशलं सत्यधियोऽनुयोगान्
नयन्ति पुण्यैर्विनमन्ति सूर्यम्।।१२६१।।

दक्षः—६१७

'दक्ष वृद्धौ शीघ्रार्थे च' इति भौवादिको धातुस्ततः 'पचाद्यच्' प्रत्ययः, शीघ्रकर्मा चेहायम्। **''अग्न आयाहि वीतये''** इत्यादिमन्त्रेषु भगवत आह्वानं सुस्पष्टम्, अत आहूतः क्षिप्रं दक्षति=आगच्छतीति 'दक्षः'।

मन्त्रलिङ्गञ्च—

त्वं दक्षैः सुदक्षो विश्ववेदाः। ऋक् १।६२।२।।

शुचिष्ट्वमसि प्रियो न मित्रो दक्षाय्यो अर्यमेवासि सोम।
ऋक् १।६१।३।।

दक्षाय्यः=शीघ्रगन्ता।

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेडन् राजन्त्सोम प्रतिहव्या गृभाय।।
ऋक् १।६१।४।।

तं दक्षः सचते कविः। ऋक् १।६१।१४।।

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।
त्वमाततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वितमो ववर्थ।। ऋक् १।६१।२२।।

दक्षः=सोमः, सूर्यो विष्णुश्च। तथा च मन्त्रः—

सोम रारन्धि नो हृदि गावो न यवसेष्वा। मर्य इव स्व ओक्ये।।
ऋक् १।६१।१३।।

लोकेऽपि च पश्यामः सर्वोऽयं—लोकः शीघ्रायते कार्यकरणाय, न च कश्चिदकर्मकृत्तिष्ठति। एवं सर्वव्यापकता भगवतो दक्षस्य स्पस्टं दृश्यते। दक्षते इति पदञ्च स्पष्टं मन्त्रे। यथा—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि ।
आ न ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते।।

ऋक् ७।१६।६।।

भवति चात्रास्माकम्—

दक्षो हि सूर्यः स हि वास्ति सोमः
सोमो हि विष्णुर्हृदि सन्निविष्टः।
स एव राजा वरुणः स एव
स ज्योतिषा विश्वतमोऽपहन्ति ।।१२६२।।

प्रवृद्धः, शक्तः, शीघ्रकारी च दक्षपदवाच्यः। तस्मात् सूर्यः, अग्निः, चन्द्रमाः, वरुणः, विष्णुश्चेति सर्वे दक्षपदाभिधेयाः।

तथा च—**''अर्वन्तमाशुं''** (ऋक् १।६१।२०) ददातीति शेषः। अनेन मन्त्रवाक्येन शीघ्रकारिता व्यज्यते। अधिसोमोक्ताः सर्वे गुणा अपि सोमा एव, यथा सूर्यस्य गुणो ज्योतिस्ततो ज्योतिरपि सूर्य एव।

दक्षिणः—६१८

'दक्षतेः'—***''द्रुदक्षिभ्यामिनन्''*** (उ० २।५०) इत्युणादिसूत्रेण 'इनन्' प्रत्ययः। दक्षते=क्षिप्रमागच्छत्याहूत आगत्य च सन्तुष्टो मुक्तहस्तं ददातीत्युदारः स 'दक्षिण' उच्यते, दक्ष एव वा 'दक्षिणः'।

मन्त्रलिङ्गञ्च—

सु सन्दृशं त्वा वयं मघवन् वन्दिषीमहि।
प्र नूनं पूर्णबन्धुरः स्तुतो याहि वशां अनु योजा न्विन्द्र ते हरी।।

ऋक् १।८२।३।।

लोकेऽपि दक्षिणोत्तराभिधेये द्वे अयने, तत्र दक्षिणतोऽयमानः सूर्यः 'दक्षिण' उच्यते। तथा च मन्त्रलिङ्गम्—

युक्तस्ते अस्तु दक्षिण उत सव्य शतक्रतो।
तेन जायामुप प्रियां मन्दानो याह्यन्धसो योजा न्विन्द्र ते हरी।।

ऋक् १।८२।५।।

सव्यशब्देनोत्तरायण मुच्यते। एवञ्च दक्षिणेन यन् सूर्यः यथा 'दक्षिणः' तथोत्तरेण यन् 'उत्तरः' उच्यते। वेदे चोत्तराभिधायी सव्यशब्दो, यथा—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उदीराणा उतासीनास्तिष्ठन्तः प्रक्रामन्तः ।
पद्भ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम्।। अथर्व १२।१।२८।।

बहुत्र वेदे विभिन्नविभक्तिवचनान्तोऽयं दक्षिणः शब्दः प्रयुक्तः। निदर्शनमात्रन्नः प्रयोजनम्।

भवति चात्रास्माकम्—

स दक्षिणः सूर्य इहास्ति वाच्यः
स एव चाप्युत्तरतोऽभियाति ।
तस्य प्रतीकौ च करौ[1] प्रसिद्धौ
यद्वास्ति सर्वं द्विविभक्तमत्र ।।१२६३।।

क्षमिणां वरः—६१६

'क्षमूष सहने' भौवादिको धातुस्ततः षित्त्वाद् भावे ***''षिद्भिदादिभ्योऽङ्''*** (पा० ३।३।१०४) सूत्रेण 'अङ्' प्रत्यये 'टापि' च 'क्षमा', ततः सा अस्यास्मिन्नित्यर्थे मत्वर्थीय 'इनिः'=क्षमी।

वरः—'वृणोतेः' कर्मण्यच् 'वर' इति। क्षमिणां=सहनशीलानां, क्षमावतां मध्ये वरः=श्रेष्ठ इत्यर्थः, सूर्यो विष्णुर्वा।

तथा चा मन्त्रलिङ्गम्—

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
ऋक् १०।१२१।५।। यजुः ३२।६।।

भवति चात्रास्माकम्—

सर्वं क्षमावत् स्वपरानुरक्तं
स सूर्य एकः क्षमिणां वरः सन्।
दाधार यो द्यां पृथिवीमुत स्वस्
तस्मै च मे स्यान्नम उक्तिरद्य ।।१२६४।।

विद्वत्तमः—६२०

विदन्तीति विद्वांसो ज्ञानिनस्तेष्वतिशयेन श्रेष्ठः सर्वज्ञत्वादिति 'विद्वत्तमो'

१. सबाहुमूलकौ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुः। ज्ञानरूपो ज्ञानागारो वा भगवान् विष्णुः सूर्यश्च। तस्यैव ज्ञानं सर्वत्र प्राणिषु विभक्तं सत्तमेवैकं प्रतिपदं विदुषां श्रेष्ठमाचष्टे।

मन्त्रलिङ्गञ्च—

मन्द्रो विश्वानि काव्यानि विद्वान्। ऋक् ३।१।१७।।

अग्निर्विश्वानि काव्यानि विद्वान्। ऋक् ३।१।१८।।

भवति चात्रास्माकम्—

विद्वत्तमो विष्णुरथाऽस्ति सूर्यो
धामानि सर्वाणि च वेद सर्गात् ।
विद्वत्तमोऽतो न तथा मनुष्यो
विद्वत्तमं तञ्च गृणन्ति वेदाः ।।१२६५।।

वीतभयः—६२१

'वि' उपसर्गः। 'इण् गतौ' आदादिको धातुस्ततः कर्तरि भूते 'क्तः' कित्त्वाद् गुणाभावे='इतः'।

'ञिभी भये' जौहोत्यादिकाद्धातोः ***''अज्विधौ भयादीनामुपसंख्यानं नपुंसके क्तादिनिवृत्त्यर्थम्''*** (वा० ३।३।५६) इति भावे 'अच्' प्रत्ययः, गुणायादेशौ। तेन 'भय'मिति सिध्यति। वि=विशेषेण इतं=गतं भयं=भीतिर्यस्येति 'वीतभयः' विष्णुः सूर्यो वा। भयं हि निर्बलस्य भवति न तु बलिनः। सूर्यो विष्णुर्वा सर्वतो बली, अतो 'वीतभयः'।

तथा च मन्त्रलिङ्गम्—

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य। सर्वं तदिन्द्र ते वशे।।

ऋक् ८।९३।४।।

महाँ असि सोम ज्येष्ठ उग्राणामिन्द्र ओजिष्ठः। युध्वा सञ्छश्वज्जिगेथ।।

ऋक् ६।६६।१६।।

ओजिष्ठस्येन्द्रस्य सूर्यस्य विष्णोर्वा वशे सर्वमतोऽभयः स विष्णुरुक्तो भवति। लोकेऽपि च पश्यामः—सबलो वीतभयो भवति, तस्माद् वीतभयत्वरूपो विष्णोर्गुणः सर्वत्र व्याप्तः।

भवति चात्रास्माकम्—

भयं बलिष्ठादिति विश्वसिद्ध—
मोजिष्ठ इन्द्रः स कुतो बिभीयात्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्मादसौ वीतभयः प्रदिष्टः
स एव सूर्यः स हि विष्णुरिन्द्रः।।१२६६।।

पुण्यश्रवणकीर्तनः—६२२

'पूञ् पवने' भौवादिको धातुस्ततः ***"पूञे यण् णुक् ह्रस्वश्च"*** (उ० ५।१५) इत्युणादिसूत्रेण 'यत्' प्रत्ययो णुगागमो धातोरूकारस्य ह्रस्वश्च। पवते पूयते वानेनेति 'पुण्यम्'। 'श्रु श्रवणे' धातुर्भौवादिकस्ततः करणे 'ल्युट्'। श्रूयतेऽनेनेति 'श्रवणम्'। 'कृत संशब्दने' चौरादिको धातुस्ततः णिजन्ताद् भावे 'युच्' योरनः='कीर्तनम्' एवञ्च पुण्यं=पवित्रीकरणं, नाम्नां श्रवणं कीर्तनञ्च यस्य स 'पुण्यश्रवणकीर्तनो' विष्णुः सूर्यो वा।

यस्य विष्णोर्नाम्नामन्यतः श्रवणं तथा स्वमुखत उच्चार्य कीर्तनमित्युभयथा पवित्रीकरणं भवति, स एतन्नाम्नाभिधीयते।

मन्त्रलिङ्गञ्चैतदर्थसमर्थकम्। यथा—

मनामहे चारु देवस्य नाम। ऋक् १।२४।१।।
अर्चत प्रार्चत प्रियमेधासो अर्चत। ऋक् ८।६९।८।।
तस्मा इन्द्राय गायत। ऋक् १।५।४।।
पवमान ऋतं बृहच्छुक्रं ज्योतिरजीजनत्। कृष्णा तमांसि जङ्घनत्।।
ऋक् ९।६६।२४।।

यथा चायं पवमानः सूर्येन्द्रसोममहागयाग्निकविविपुरोहितादिनामा कृष्णानि तमांसि हन्ति, तथैव भगवतो नाम्नां श्रवणं सङ्कीर्तनञ्च कृष्णानि तमांसि= अज्ञानरूपाणि तथा जुहुराणमेनश्चापहन्ति। तस्माद् भगवान् 'पुण्यश्रवणकीर्तनः' उदीयते।

अत्र नामसंग्रहे नामश्रवणमाहात्म्यमप्युक्तम्। यथा—

य इदं शृणुयान्नित्यं, यश्चापि परिकीर्तयेत्।
नाशुभं प्राप्नुयात् किञ्चित्, सोऽमुत्रेह च मानवः।।
वि० स० श्लोकः १२२।।

भवति चात्रास्माकम्—

यस्यास्ति नाम्नां श्रवणं पवित्रं
सङ्कीर्तनं चाप्यमलं हि तस्य।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोऽनन्तनामा भगवान् हि विष्णुः
स्वनामभिर्विश्वमिदं पुनाति ॥१२६७॥

❖ ❖ ❖

उत्तारणो दुष्कृतिहा पुण्यो, दुःस्वप्ननाशनः।
वीरहा रक्षणः सन्तो, जीवनः पर्यवस्थितः ॥११२॥

६२३ उत्तारणः, ६२४ दुष्कृतिहा, ६२५ पुण्यः, ६२६ दुःस्वप्ननाशनः।
६२७ वीरहा, ६२८ रक्षणः, ६२९ सन्तः, ६३० जीवनः, ६३१ पर्यवस्थितः॥

उत्तारणः—६२३

'उत्' उपसर्गः। 'तृ प्लवनसंतरणयोः' इति भौवादिको धातुस्तरणकर्मेहायम्। ततो णिजन्ता'ल्ल्युः' योरनः, णिलोपः, णत्वम्। उत्तारयतीति—'उत्तारणः'। भवार्तिसन्तप्तानां भगवच्छरणागतानाम् उत्तितीर्षूणामुत्तारणो नाविको नावेवेत्यर्थः।

मन्त्रलिङ्गञ्च—

वीहि स्वस्तिं सुक्षितिं दिवो नृन् द्विषो अंहासि।
दुरिता तरेम ता तरेम तवाऽवसा तरेम ॥ ऋक् ६।२।११॥
जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः॥
ऋक् १।९९।१॥

नाविको नावोत्तितीर्षूनब्धेस्तारयतीति लोकदृष्टिः। तथैवायं ध्यातो भर्गः सूर्यो विष्णुर्वा धियः प्रदानेन तारयतीति स 'उत्तारण' उच्यते।

भवति चात्रास्माकम्—

उत्तारणो विष्णुरिहास्ति सिद्धो
योऽहांसि हन्तुं धिषणां ददाति।
ध्यात्रे, स शुद्धो लभतेऽप्रमेयं
यशः सुखं जन्म च पुण्यवर्गे ॥१२६८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुष्कृतिहा—६२४

'दुस्' उपसर्गः। करोतेः 'क्तः', गुणाभावः, अनिट्, दुसः सो रुत्वम्, रोर्विसर्गः। विसर्जनीयस्य ***''इदुदुपधस्य चाप्रत्ययस्य''*** (पा० ८।३।४१) सूत्रेण षः। 'दुष्कृत' शब्दाददन्तलक्षणो मत्वर्थीय 'इनिः'। ***''यस्येति च''*** (पा० ६।४।१४८) सूत्रेणाकारलोपो=दुष्कृतिनं हन्तीति हतवान् वा स 'दुष्कृतिहा'। हन्तेः सार्वकालिकः 'क्विप्', तस्य च सर्वापहारः, इन्नन्तलक्षणो दीर्घो नलोपश्च। 'दुष्कृतिहा' विष्णुः सूर्यो वा। दुष्कर्मकारिणो दण्डलक्षणाशुभफलदानेन हन्तीति भावः।

तदर्थे मन्त्रलिङ्गञ्च—

ऋतस्य पन्थां न तरन्ति दुष्कृतः। ऋक् ६।७३।६।।

लोकेऽपि च पश्यामो—लोकवेदमर्यादया हीनं कर्म कुर्वाणस्तेनैव विघ्नरूपतां गतेन कर्मणा तदिष्टात् प्रच्याव्यते। तथा च यः कस्यचिद् घातको राज्ञा स मृत्युदण्डेन दण्डनीयः, पाशेन शूलेन वा हन्तव्य इत्युद्घोष्यते। तत्र तत्कर्तृकहननक्रियैव तस्य घातिका सर्वत्र प्रतिपदञ्चैतत्पश्यामः।

तत्र राज्ञः प्रतिनिधिर्न्यायकर्ता विष्णुस्थानीयः सूर्यस्थानीयो वा भवति। एवं सर्वत्र योजनीयम्। मन्त्रलिङ्गञ्च—

यो मायातुं यातुधानेत्याह, यो वा रक्षाः शुचिरस्मीत्याह।
इन्द्रस्तं हन्तुं महता वधेन, विश्वस्य जन्तोरधमस्पदीष्ट।।

ऋक् ७।१०४।१६।।

हन्ति रक्षो हन्त्यासद् वदन्तमुभाविन्द्रस्य प्रसितौ शयाते।

ऋक् ७।१०४।१३।।

ते नो मुञ्चन्त्वंहसः। ऋक् १०।६७।१५।।

पृथिवी नः पार्थिवात् पात्वंहसोऽन्तरिक्षं दिव्यात् पात्वस्मान्।

ऋक् ७।१०४।२३।।

इत्यादि निदर्शनम्। भवति चात्रास्माकम्—

लोके दुष्कृतिहा विष्णुर्हृद्देशमधितिष्ठति ।
दुष्कृतं बाधकं कर्तुः, स्वयमेव भवेदिह।।१२६६।।

पुण्यः—६२५

पूञः पुणतेर्वा 'पुण्यम्'।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पवित्वा पुण्ययति=शुभकर्मवतः करोतीति 'पुण्यः'। अर्थाद् यः स्वयं शुभकर्मा दुष्कृतान् शरणागतान् पवित्रीकृत्य शुभकर्मभाजो विधत्ते, स 'पुण्यः' इत्युच्यते भगवान् विष्णुः सूर्यो वा। मन्त्रलिङ्गञ्च—

विश्वतो नः शकुने पुण्यमावद। ऋक् २।४३।२।।

कालेऽयमङ्गिरा देवोऽथर्वा चाधितिष्ठतः।
इमं च लोकं परमञ्च लोकं पुण्यांश्च लोकान् विधृतीश्च पुण्याः।
सर्वांल्लोकानभिजित्य ब्रह्मणा कालः स ईयते परमो नु देवः ।।
अथर्व १६।५४।५।।

भवति चात्रास्माकम्—

पुण्योऽस्ति विष्णुः कुरुते पवित्रं
सूर्यं ह्यतोऽसौ तमसः परस्तात् ।
तस्मिन् पवित्रे सकलं पवित्रं
खं वायुरापः पृथिवी तथाग्निः ।।१२७०।।

दुःस्वप्ननाशनः—६२६

'दुस्' उपसर्गः। 'ञिष्वप् शये' आदादिको धातुः, ततः ***''स्वपो नन्''*** (पा० ३।३।६१) सूत्रेण 'नन्' प्रत्यये—'स्वप्नः'। दुष्टः स्वप्नो 'दुःस्वप्नः'। नाशन— इति 'णश् अदर्शने' दैवादिको धातुस्ततो हेतुमण्णिच्, वृद्धिः, ल्युः, अनादेशः, णिलोपः—'नाशन' इति। दुःस्वप्नस्य नाशनो 'दुःस्वप्ननाशनः' विष्णुः सूर्यो वा। तदर्थे मन्त्रलिङ्गञ्च—

पुनरेहि वृषाकपे सुविता कल्पयावहै।
य एष स्वप्ननंशनोऽस्तमेषि पथा पुनर्विश्वस्मादिन्द्र उत्तरः।।
ऋक् १०।८६।२१।।

जाग्रद्दुःष्वप्न्यं स्वप्नेदुःष्वप्न्यम्। अथर्व १६।६।६।।

भवति चात्रास्माकम्—

वैश्वानरोऽग्निः सुसमिद्धदीप्रो
विभज्य भोज्यं परिपच्य दोषान् ।
दुःस्वप्ननाशं कुरुते हि नूनं
वैश्वानरोऽग्निः सविता स इन्द्रः ।।१२७१।।

अग्निमात्रं सूर्यदैवतकम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वीरहा—६२७

'वीरहा' शब्दो बहुधा व्युत्पादितचरः। विविधमीरत इति 'वीराः' अश्वा, विविधा गतिर्गतिचातुर्यञ्चाश्वानामेवेति प्रत्यक्षं सर्वेषाम्। तांश्च यो हन्ति=गमयति। हनिरिह गतिकर्मान्तर्भावितण्यर्थश्च। एवञ्च योऽश्वानां गतेर्दाता सोऽत्र 'वीरहा' शब्देनोच्यते सूर्यः। सर्वेषां वा बहुधेराणानां जन्तूनां गमयिता विष्णुः।

सूर्यपक्षे मन्त्रलिङ्गम्—

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः।
वन्वन्नवातः परिधीरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ॥

ऋक् ९।९६।११॥

तथा च लोकेऽपि पश्यामः—शीघ्रं गमनाय सारथिरश्वं कशया ताडयति। यद्वा—विविधमीरयितुं मेघान् हन्तीति।

भवति चात्रास्माकम्—

स वीरहा विष्णुरुतापि सूर्यो
वीरेभिरश्वैः[1] सकलोपयातः।
गतिञ्च लब्ध्वा तत एव सर्वं
यथेरितं याति विचित्रगत्या॥१२७२॥

रक्षणः—६२८

'रक्ष पालने' भौवादिको धातुः, ततः ***''कृत्यल्युटो०''*** (पा० ३।३।११३) सूत्रेण बाहुलकात् कर्तरि 'ल्युट्'।

''बहुलमन्यत्रापि'' (उ० २।७८) इत्युणादिसूत्रेण युज्वा, योरनः। ***''अट्कुप्वाङ्०''*** (पा० ८।४।२) इति सूत्रेण णत्वं='रक्षणः'। रक्षति=पालयति सकलं विश्वमिति 'रक्षणः' सूर्यो विष्णुश्च।

१. **''अतो भिस ऐस् वा''** इति (कातन्त्र-व्याकरणे) सूत्रं, तेन मनुष्येभिः, देवेभिः, रथेभिरिति वेदे प्रयुक्ताः शब्दा लोकेऽपि प्रयुज्यन्ते। वेदे च भिस ऐस् वैकल्पिको दृश्यते सामान्येन, तथा च यथा—**''वीरेभिरश्वैः''**।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।
प्रतिष्फुट विरुज वीड्वंहो जहि रक्षो महि चिद् वावृधानम् ।।

ऋक् ४।३।१४।।

इति निदर्शनम्। भवति चात्रास्माकम्—

स रक्षणोऽग्निः सविता स विष्णुः
स वार्यमा विश्वभवांश्च बिभ्रत्।
खं वायुरापः पृथिवी मरुच्च
रक्षन्ति धर्मेण च रक्षणस्य।।१२७३।।

सन्तः—६२९

'सम्' उपसर्गः। तत्पूर्वकात् 'तनु विस्तारे' इति धातोः ***''अन्येष्वपि दृश्यते''*** (पा० ३।२।१०१) इति सूत्रेण 'डः' प्रत्ययः। टेर्लोपः, समो मोऽनुस्वारपरसवर्णौ। सम्यक् तनोति विस्तारयति जगदिति 'सन्तः'।

मन्त्रलिङ्गञ्च—

अस्मै वत्सं परिषन्तं न विन्दन्निच्छन्तो विश्वे अमृता अमूराः।
श्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ।।

ऋक् १।७२।२।।

अत्र 'परि' उपसर्गः, असेः तनोतेर्वा सन्तं 'परिषन्तं'। तनोतेः सम्पूर्वकस्य सन्तमिति परिपूर्वकस्यातेर्वा सन्तमिति समान एवार्थ उभयथा।

भवति चात्रास्माकम्—

सन्तो हि विष्णुः स हि सन्तनोति
बुधो यथा सम्यगवाप्तवाक्यम् ।
तस्मिन् तते विश्वमिदं ततं सत्
तमेव सन्तं परितोऽभ्युपैति ।।१२७४।।

जीवनः—६३०

'जीव प्राणधारणे' धातुर्भौवादिकस्ततो हेतुमण्णिच्, णिजन्ता'ल्ल्युः' योरनः, णेर्लोपः=जीवनः। प्रक्रिया पूर्वत्रोक्ता।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जीवयति=प्राणयति जीवनोपयोगिसाधनैरिति 'जीवनो' विष्णुः सूर्यो वा।

मन्त्रलिङ्गञ्च—

विश्वस्य हि प्राणनं जीवनं त्ववे वियदुच्छसि सूनरि।
सा नो रथेन बृहता विभावरि श्रुधि चित्रामधे हवम् ।।

ऋक् १।४८।१०।।

लोकेऽपि च पश्यामः—ब्राह्ममुहूर्त उत्थाय भ्रमणं, स्नानं, जपनं, व्यायमनं, पठनादिकञ्च, मैथुनादृते जीवनं ददातीति।

भवति चात्रास्माकम्—

स जीवनो विष्णुरुतापि सूर्यो
विभावरी वा बृहता रथेन ।
सा जीवनं प्राणवतो ह विश्वे
तस्यां सुखं कामवशं[1] लषन्ति[2] ।।१२७५।।

पर्यवस्थितः—६३१

'ष्ठा गतिनिवृत्तौ' भौवादिको धातुः। पर्यवोपसर्गपूर्वात्तस्मात् तिष्ठतेः षस्य सत्वे, परेरिकारस्य यणादेशे च कर्तरि 'क्तः'—***'गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च''*** (पा० ३।४।७२) इति सूत्रेण। परितः=सर्वत ऊर्ध्वाधस्तिर्यक् चावस्थित इत्यर्थः सर्वव्यापक इति भावः।

मन्त्रलिङ्गञ्च—

पूषा विष्णुस्त्रीणि सरांसि धावन्। ऋक् ६।१७।११।।
एवा ता विश्वा चकृवांसमिन्द्रम्। ऋक् ६।१७।१३।।
स पर्यगाच्छुक्रमकायमव्रणमस्नाविरम्०। यजु० ४०।८।।
वेत्यग्रुर्जनिवान् वा अतिस्पृधः समर्यता मनसा सूर्यः कविः।
घ्रंसं रक्षन्तं परिविश्वतो गयमस्माकं शर्म वनवत् स्वावसुः ।।

ऋक् ५।४४।७।।

''यादृगेव ददृशे तादृगुच्यते'' ऋक् ५।४४।६—यथायं विष्णुः पूषा सूर्यः कविश्च दिवि पृथिव्यां समुद्रादिषु च सर्वत्रावस्थितः, तथायमात्मापि शरीरे सर्वत्रावस्थितः। राजापि चारैः सर्वत्र दिवि भुवि जले वावस्थितो भवतीति कृत्वा

१. कामवशं=यथेष्टम्। २. लषन्ति=कामयन्ते। प्राणवन्त इति शेषः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वं व्यश्नुते। अतः स विष्णुः सूर्यः कविर्वा सर्वत्र व्याप्तः 'पर्यवस्थित' उच्यते।

भवति चात्रास्माकम्—

तं पर्यवस्थितं मन्ये, विष्णुं सूर्यं कविं सनात्।
द्यवि स्थले जले वापि, तमूर्ध्वाधः परिष्ठितम्।।१२७६।।

❖ ❖ ❖

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः।
चतुरश्रो गभीरात्मा विदिशो व्यादिशो दिशः।।११३।।

६३२ अनन्तरूपः, ६३३ अनन्तश्रीः, ६३४ जितमन्युः, ६३५ भयापहः। ६३६ चतुरश्रः, ६३७ गभीरात्मा, ६३८ विदिशः, ६३६ व्यादिशः, ६४० दिशः।।

अनन्तरूपः—६३२

'अनन्त' शब्दोऽनन्तमूर्तिनाम्नि व्युत्पादितचरः। 'रूप' शब्दश्च—'रु शब्दे' इत्यादादिकाद्धातोः ***''खष्पशिल्प०''*** (उ० ३।२६) इत्युणादिसूत्रेण 'पः' प्रत्यय इडभावो धातोर्दीर्घत्वञ्च निपात्यते। रूप्यते=प्रकाश्यतेऽनेनेति 'रूपम्'। अनन्तानि रूपाणि यस्य सः 'अनन्तरूपः'=विविधरूपो विष्णुः। यद्वा—अमतिर्गतिकर्मा, ततो न अन्तं=चलं रूपं यस्य स 'अनन्तरूपः', अविचलरूप इत्यर्थः।

तथा च मन्त्रलिङ्गम्—

विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्।
सम्बाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः।।

ऋक् १०।८१।३; यजु० १७।१६।।

येयं केवलस्यैकरूपस्य देवस्य रूपगुणवर्णना सा न कदाचित् विचलति तस्माद् 'अनन्तरूपः' सः। अनन्तशब्दो बहुपर्यायोऽपि। तत्र विश्वरूपपदं वेदे, यथा—

सुप्राङ्जो मेम्यद् विश्वरूपः। ऋक् १।१६२।२।।
न वा उ एतन्म्रियसे न रिष्यसि देवाँ इदेषि पथिभिः सुगेभिः।

ऋक् १।१६२।२१।।

आतिष्ठन्तं परिविश्वे अभूषञ्छ्रियो वसानश्चरति स्वरोचिः।
महत् तद् वृष्णो असुरस्य नामा विश्वरूपो अमृतानि तस्थौ।।

ऋक् ३।३८।४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देवस्त्वष्टा सविता विश्वरूपः पुपोष प्रजाः पुरुधा जजान।
इमा च विश्वा भुवनान्यस्य महद्देवानामसुरत्वमेकम्।।
ऋक् ३।५५।१६।।

इति निदर्शनम्।

अनन्तशब्दमधिकृत्य प्राग् बहूक्तम्। लोके च पश्यामः—प्रत्येकं वस्तु सजातीयं विजातीयं वा परस्परं रूपेण भिन्नं सत्तस्य बहुरूपतामाचष्टे। अत एव च—

विश्वमनः। ऋक् ८।३३।२।। **विश्वमानुषः।** ऋक् ८।४५।४२।।
विश्वभानुषु। ऋक् ४।१।३।। **विश्ववार्यः।** ऋक् ८।१६।११।।

इत्यादि—बहुत्र विश्वशब्दविशिष्टानि पदानि वेदे दृश्यन्ते।

भवति चात्रास्माकम्—

सोऽनन्तरूपो भगवान् वरेण्यो
रूपाणि कुर्वन् प्रतिरूपरूप्यः ।
निजं स्वरूपं प्रतिजन्मगुप्तं
कृत्वा जगद्धारयते ह्यतर्क्यम् ।।१२७७।।

अनन्तश्रीः—६३३

'अनन्त' शब्दो व्याकृतः पूर्वम्। श्रीः=विभूतिः, विविधीभवनमित्यर्थः। 'श्रियः' ***''क्विब्वचिप्रच्छिश्रि०''*** (उ० २।५७) इत्यादिनौणादिसूत्रेण 'क्विप्' प्रत्ययो दीर्घश्च। अनन्ता श्रीः=विभूतिः, विविधभावो यस्य सः—'अनन्तश्रीः'। यद्वा—अचलविविधसत्त इति।

मन्त्रलिङ्गञ्च—

नहि ते शूर राधसोऽन्तं विन्दामि सत्रा। ऋक् ८।४६।११।।

तथा च लोकेऽपि पश्यामो—यथाकालभवानां पुष्पाणां श्रियः सूर्योदये प्रकाशन्ते, तासाञ्च श्रीणामनन्तता प्रतिपदं दृश्यते। बहुविस्तारवती पृथिवी विचित्रगर्भा च।

भवति चात्रास्माकम्—

यदेकदा यद्रचितञ्च विष्णुना
तथाविधं तच्छ्रियया च भासते ।
अनन्तताऽतो भुवने श्रियो मता
यद्यस्ति तद्वान् स उ वास्ति तद्विधः।।१२७८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जितमन्युः—६३४

'जि जये' भौवादिको धातुः, ततः कर्मणि 'क्तः', गुणाभावः, अनिट्='जितम्'।

मन्युः—'मन ज्ञाने', 'मनु अवबोधने' इति दैवादिकतानादिकौ धातू, ताभ्यां यथार्थं ***''यजिमनिशुन्धिदसिजनिभ्यो युच्''*** (उ० ३।२०) इत्युणादिसूत्रेण 'युच्' प्रत्ययः। मन्यते ज्ञायते='मन्युः' क्रोधः। ज्ञानपूर्वकः क्रोधो 'मन्युः' स जितो येन स 'जितमन्यु'र्विष्णुः। मन्युर्हि स्वतो बलवति भवति, न च भगवतो विष्णोः कश्चिद् बलवान् अतो भगवति मन्योरभाव एव तस्य जितमन्युता। यद्वा—स्वयं मन्युरूपः स, न तस्य कश्चिज्जेता। मन्त्रलिङ्गञ्च—

मन्युरसि मन्युं मयि धेहि। यजुः १६।६॥

जितमन्युत्वे मन्त्रलिङ्गम्—

अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः।

यजुः १८।४६॥

भवति चात्रास्माकम्—

अहेडमानो वरुणो ह विश्वं
श्रेयस्करे वर्त्मनि वर्तनाय।
कामानुरूपं प्रददाति वाञ्छ्यं
जनाय तस्मै य उ ते जुहोति॥१२७६॥

भयावहः—६३५

बिभेतेरचि 'भय' शब्द उक्तः। भयरूपकर्मण्युपपदेऽवपूर्वाद् 'हन' धातोः ***''आशिषि हनः''*** (पा० ३।२।४६) सूत्रेण 'ड' प्रत्ययष्टेर्लोपः। भयमवहन्यादिति 'भयावहः'। आशिषाशंसया भगवतो विष्णोः 'भयावहः' इति नाम।

मन्त्रलिङ्गञ्च—

यतो यतः समीहसे ततो नो अभयं कुरु।
शन्नः कुरु प्रजाभ्यो अभयं न पशुभ्यः॥ यजुः ३६।२२॥

लोकेऽपि च पश्यामः—सर्वो हि जीवो भगवन्तं प्रार्थयमानो भयाभावमाशंसते।

भवति चात्रास्माकम्—

भयं न मे स्यादिति कामयन्ते
देवा मनुष्याः किमुतान्यजीवाः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भयावहस्तानभयान् विधत्ते
यतो यतो गन्तुमनाश्च यः स्यात्।।१२८०।।

चतुरश्रः—६३६

'चते याचने' भौवादिको धातुः, ततः ***''चतेरुरन्''*** (उ० ५।५८) इत्युणादि सूत्रेण 'उरन्' प्रत्यये 'चतुर्' इति पूर्वं व्युत्पादितः। चतति चत्यते वेति चतुर्।

'अशू व्याप्तौ' सौवादिकः, 'अश भोजने' क्रैय्यादिको वा धातुस्ताभ्यां यथार्थं ***''वङ्क्र्यादयश्च''*** (उ० ४।६६) इत्युणादिसूत्रे वङ्क्र्यादीनामाकृतिगणत्वेन 'क्रिन्' प्रत्ययान्तः 'अश्रिः' शब्दो निपात्यते। स्त्रियां नित्त्वात् 'ङीप्'—'अश्री'।

चतस्रोऽश्रयो यस्य स 'चतुरश्रः'। ***''सुप्रातसुश्वसुदिवशारिकुक्षचतुरश्र०''*** (पा० ५।४।१२०) इत्यादिसूत्रेण समासान्तोऽच्प्रत्ययान्तो निपात्यते। तत्र पूर्वपदस्य पुंवद्भावः। ***''यस्येति च''*** (पा० ६।४।१४८) सूत्रेणाकारलोपश्च। चतस्रो दिशोऽश्नुते—'चतुरश्रः'। यद्वा—चतसृषु दिक्षु स्थितानां प्राणिनां भोजनस्य दातेति विष्णुः। यद्वा—याचकानां सर्वविधकामानां पूरयिता।

मन्त्रलिङ्गञ्च—

अहं दाशुषे विभजामि भोजनम्। ऋक् १०।४८।१।।

स पर्यगात्·····याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः।।

यजुः ४०।८।।

लोके चापि पश्यामः—यो हि यस्य व्यवस्थापकः स तस्य सर्वापेक्षापूरको यथार्थिमनोरथञ्चार्थं ददाति। एवञ्च लोके दृश्यमानेनानेन क्रमेण प्रतिपदं सर्वव्यापको भगवान् विष्णुर्व्यज्यते।

प्रासङ्गिकञ्च किञ्चिदुच्यते। तथा चैतज्ज्ञेयम्—

यत्र सूर्य इहोच्यते तत्र यथाव्याख्यानं सूर्यादयः सर्वे ग्रहा ग्राह्या। कुतः एवं, यतो हि यो ग्रहो यस्य कामस्याधिपतिस्तत एव तं कामं याचतेऽर्थी। तथा च यथा—ऋणान्मुक्त्यर्थं जनाः कुजं (भूमिसुतं) स्तुवन्ति, तस्य च स्तोत्रस्य नाम 'ऋणमोचनस्तोत्रम्' इति। अमुथैव **''यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद्दधातु''** (यजुः ३६।२) अत्र बृहस्पतिराराध्यते। तस्मादुपर्युक्तमुपपद्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवतश्चात्रास्माकम्—

स विष्णुरेकश्चतुरश्र उक्तः
स एव सूर्यः स हि वास्ति दाता ।
यदर्थकामी हविषा च सम्यग्
जुहोति तस्मै स ददाति काम्यम् ।।१२८१।।

तथा—

सर्वे ग्रहा वैष्णवशक्तिमन्तः
स्तुत्यास्तथैवेति च धार्यमत्र ।
नक्षत्रमप्येति तथैव चार्चा
स्वदेवतायाः स्तवनेन लोके ।।१२८२।।

तथा च मन्त्रलिङ्गम्—

"शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा।
शन्न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः।।"

ऋक् १।६०।६; यजुः ३६।६।।

मित्रः=अनुराधा, वरुणः=शतभिषा, अर्यमा=उत्तराफाल्गुनी, इन्द्रः=ज्येष्ठा, बृहस्पतिः=पुष्यः, विष्णुः=श्रवणः। पृथक्शश्च मन्त्रलिङ्गानि तद्दैवतकानि। यथा—

नमो मित्रस्य वरुणस्य चक्षसे। ऋक् १०।३७।१; यजुः ४।३५।।
शन्नः सूर्य उरुचक्षाः। ऋक् ७।३५।८; अथर्व १६।१०।८।।
शन्नो दिविचरा ग्रहाः। अथर्व० १६।६।७।।

गभीरात्मा—६३७

'गभीर' इति—'गम्लृ गतौ' भौवादिको धातुः, ततो ***"गभीरगम्भीरौ"*** (उ० ४।३५) इत्युणादिसूत्रेण 'ईरन्' प्रत्ययान्तो निपात्यते। गमो मस्य भकारः पाक्षिको नुमागमश्च। तेन गभीरगम्भीरौ समानार्थौ शब्दौ। 'आत्म' शब्दो व्युत्पादितचरः, स चेह स्वरूपवचनः।

गच्छति गम्यतेऽनेन, गच्छन्ति यमिति वा गभीरो गम्भीरो वा। अर्थाद् यो गच्छति=गमनशीलः, येन वा गम्यते=प्राप्यते सर्वं सः। यं वा गच्छन्ति=प्राप्नुवन्ति ध्यायन्ति प्रार्थयन्ते वा स गभीरो गम्भीरश्च विष्णुः सूर्यो वा।

जगद् गच्छति, समुद्रो गच्छति, समुद्रान्तस्तरङ्गाः स्रोतांसि च गच्छन्तीति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृत्वा सर्वथा स गतिरूपेण गुणेन सर्वत्र व्याप्तः। लोके चापि पश्यामः—शारीरिकेषु स्रोतःस्वपि दोषा, धातवो, मलांशाः वा सततं गच्छन्तीति।

मन्त्रलिङ्गञ्च—

न त्वा गभीरः पुरुहूत सिन्धुर्नाद्रयः परिषन्तो वरन्त ।
इत्था सखिभ्य इषितो यदिन्द्रा दृढं चिदरुजो गव्यमूर्वम्।।

ऋक् ३।३२।१६।।

समुद्रस्येव महिमा गभीरः०। ऋक् ७।३३।८।।

इति निदर्शनम्। भवति चात्रास्माकम्—

गभीरात्मा स सूर्योऽस्ति, सर्वञ्च गमयत्यसौ।
अचलं दृश्यमानं यन्मृत्युस्तदपि चालयेत् ।।१२८३।।

मृत्युः=नाशः।

विदिशः—६३८

'वि' उपसर्गः। 'दिश अतिसर्जने' तौदादिको धातुः। अतिसर्जनं=दानम्। ततः सामान्येन 'क्विप्' प्रत्ययस्तस्य च सर्वापहारः। दिशति=ददात्यवकाशमिति दिक्। दिगेव दिशा, तथा च भागुरेर्मते **''आपं चैव हलन्तानां यथा वाचा निशा दिशा''** इति हलन्तेभ्योऽपि टाप इष्टत्वात्। विविधा दिशो यस्य स 'विदिशः' विष्णुः सूर्यो वा। बहुव्रीहिसमास उपसर्जनह्रस्वः।

मन्त्रलिङ्गञ्च—

दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्। यजुः ३१।१३।।

सूर्यगतिकृतश्च दिशानामुत्तरदक्षिणादिव्यवहारः। तथा च—

यत इन्द्र भयामहे ततो नोऽभयं कुरु। अथर्व १६।१५।१। इत्यारभ्य—

अभयं नः करत्यन्तरिक्षमभयं द्यावापृथिवी उभे इमे।
अभयं पश्चादभयं पुरस्तादुत्तरादधरादभयं नो अस्तु।।

अथर्व १६।१५।५।।

भवति चात्रास्माकम्—

लोकेऽस्ति सिद्धो विदिशः स विष्णुः
स्थानं न तद्यत्र न सोऽस्ति सृप्तः।
दिशः समग्राः श्रवणाच्च तस्य
प्रकाशमीयुर्विदिशोऽस्त्यतः सः ।।१२८४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यादिशः—६३६

वि-आङ्पूर्वादतिसर्जनार्थाद् 'दिश' इगुपधलक्षणः 'कः'। विविधमा समन्ताद्दिशति=ददातीति 'व्यादिशः'। दानाय वा अन्यान् विविधं प्रेरयतीति।

मन्त्रलिङ्गञ्च—

प्रजां देवि दिदिड्ढ नः। ऋक् २।३२।६; २।४१।१७।।

भवति चात्रास्माकम्—

स व्यादिशो विष्णुरदभ्रदाता
तं वापि सर्वे नम आदिशन्ति ।
तदात्मतां याति हुतञ्च सर्वं
स सर्वकस्मै च ददाति देयम् ।।१२८५।।

दिशः—६४०

'दिशतेः' अतिसर्जनार्थादिगुपधलक्षणः 'कः'। आज्ञापनकर्मा चेहायम्। दिशति= आज्ञापयति वेदमुखेन विश्वनिबन्धनेन च, एवं कर्तव्यमेव नेति='दिशः'। अनेकार्था हि धातवो भवन्ति।

मन्त्रलिङ्गञ्च—

दैव्या होतारा प्रथमा सुवाचा मिमाना यज्ञं मनुषो यजध्यै ।
प्रचोदयन्ता विदथेषु कारू प्राचीनं ज्योतिः प्रदिशा दिशन्ता।।

ऋक् १०।११०।७।।

भवति चात्रास्माकम्—

दिशो हि विष्णुः सकलाय सर्वं
यथेष्टभोगाय ददाति नित्यम् ।
सूर्याय यो द्यां च खगाय पक्षौ
घासञ्च गोभ्यो मनुजाय मेधाम्।।१२८६।।

❖ ❖ ❖

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ।।११४।।

६४१ अनादिः, ६४२ भूर्भुवः, ६४३ लक्ष्मीः, ६४४ सुवीरः, ६४५ रुचिराङ्गदः।
६४६ जननः, ६४७ जनजन्मादिः, ६४८ भीमः, ६४६ भीमपराक्रमः।

अनादिः—६४१

'डुदाञ् दाने' जौहोत्यादिको धातुः, तत आङ्पूर्वकात् ***''उपसर्गे घोः किः''*** (पा० ३।३।६२) सूत्रेण कर्मणि 'किः' प्रत्ययस्तस्मिन्नाल्लोप आदीयत इत्यादिः। निषेधार्थीयेन नञा समासे, नञो नलोपः। न आदीयते=न गृह्यते समनस्कैर्ज्ञानेन्द्रियैः कर्मेन्द्रियैश्च मृल्लोष्ठवदिति—'अनादिः', अचिन्त्यरूपो विष्णुः। यद्वा—न आदीयते= स्वीक्रियते स्वोद्भवाय किञ्चिदपरं निमित्तकारणमनेन सो 'अनादिः' स्वयंम्भूः, स्वयञ्जातः, स्वयंसिद्ध इत्यर्थः।

मन्त्रलिङ्गञ्च—

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।
यजुः ३२।१०।।

अपूर्वेणेषिता वाचस्ता वदन्ति यथायथम्।
वदन्तीर्यत्र गच्छति तदाहुर्ब्राह्मणं महत् ।। अथर्व १०।८।३३।।
सदसस्पतिमद्भुतम्। यजुः ३२।१३।। इति निदर्शनम्।

लोकेऽपि च पश्यामो—यथा कुम्भकारमृत्तिकाद्यपेक्षया घटरूपकार्यस्य सादित्वं न तथा विष्णोः कार्यत्वाभावात्। अतः सोऽनादिरुच्यते विष्णुः। यद्वा— देशकालवस्तुपरिच्छेदराहित्येनेयत्तया अनादीयमान=अगृह्यमाणः सोऽनादिरिति।

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।

इति श्रीकृष्णगीता (अ० २।२५) वचनात्।

भवति चात्रास्माकम्—

संयोगजं विश्वमिदं समस्तं
यः संयुनक्त्यात्मभवः पृथक् सः ।
सोऽनादिरुक्तः कविभिः पुराणै-
र्विष्णुं विना नान्यदिहास्ति किञ्चित्।।१२८७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूर्भुवः—६४२

'भू सत्तायाम्' भौवादिको धातुः, ततः ***"सम्पदादिभ्यः०"*** (वा० ३।३।६४) इत्यनेनाधिकरणे 'क्विप्'। भवन्त्यस्यामिति 'भूः' पृथिवी। तस्या भूः=आधारः। प्रथमश्च भूशब्दः प्रथमान्तो ***"भुवः संज्ञान्तरयोः"*** (पा० ३।२।१७६) सूत्रेण कर्तरि 'क्विपि' सिध्यति। एवञ्च प्रथमो भू शब्द आधारवाचकः प्रथमान्तो, द्वितीयश्च षष्ठ्यन्तः पृथिवीवाचकः। भुवर्यो भावयिता=उत्पादको मूलाधारः स 'भूर्भुव' इत्युच्यते।

स्वयं स्वस्मिन् भवतीति वा 'भूर्भुव' इति। लोकेऽपि च दृश्यते—घटादिकार्य-सत्तासम्पादयिता, घटादेरादौ स्वयं सिद्धो घटादीन् कर्तुमुपक्रमते, सोऽयमेव भावो 'भूर्भुव' इति नाम्ना व्यज्यते। मन्त्रलिङ्गञ्च—

अकामो धीरो अमृतः स्वयंभू रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न विभाय मृत्योरात्मानं धीरमजरं युवानम् ॥

अथर्व० १०।८।४४॥

तथा च—

अनन्तं विततं पुरुत्रानन्तमन्तवच्चा समन्ते।
ते नाकपालश्चरति विचिन्वन् विद्वान् भूतमुत भव्यमस्य॥

अथर्व १०।८।१२॥

भवति चात्रास्माकम्—

स भूर्भुवः सत्यमनन्तरूपो
विष्णुर्हि विश्वं कुरुतेऽन्तवच्च।
तस्मिन् हि तस्थुर्भुवनानि विश्वा
स्तभ्नाति तन्नैव परान्यशक्तिः॥१२८८॥

लक्ष्मीः—६४३

'लक्ष दर्शनाङ्कनयोः' चौरादिको धातुः, ततो ***"लक्षेर्मुट् च"*** (उ० ३।१६०) इत्युणादिसूत्रेण 'ईः' प्रत्ययो मुटश्चागमः, णिलोपः, नेड्वशीतीण्निषेधो 'लक्ष्मीः'। लक्षयति=दर्शयतीति 'लक्ष्मीः'। सम्पत्ते शोभाया वा नाम 'लक्ष्मीः' इति स एव च लक्ष्मीरूपेण शोभारूपेण च सर्वत्र प्रसृतस्तथा च तेनैतद्रूपेण सर्वमङ्कितं दर्शितं वा भवति। लक्ष्मीवन्तो हि दूरस्था अपि दृश्यन्तेऽङ्किता इव।

यद्वा—यो जगद्रूपेण तटस्थलक्षणेन लक्षितो भवति, स 'लक्ष्मीः' इति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाम्नाभिधीयते। आविष्टलिङ्गोऽयम्, सा देवता लक्ष्मीरिति वा ज्ञेयम्।

मन्त्रलिङ्गञ्च–

भद्रैषां लक्ष्मीर्निहिताधिवाचि। ऋक् १० ।७१ ।२ ।।

लक्ष्मण्यस्य सुरुचो यतानाः। ऋक् ५ ।३३ ।१० ।।

श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे। यजुः ३१ ।२२ ।।

लोकेऽपि च पश्यामः–सूर्यो हि प्रभयाङ्कितः सर्वैरेव दृश्यते दूरस्थोऽपि। तथा चाङ्कितः सूर्यो दिनादिमध्यान्तं, रात्र्यादिमध्यान्तञ्चाङ्कयति, तस्माल्लक्ष्मीः सूर्यः। तथा च–

पश्यन्ति सर्वे चक्षुषा न सर्वे मनसा विदुः। अथर्व १० ।८ ।१४ ।।

इत्यपि लिङ्गं भवति। भवति चात्रास्माकम्–

लक्ष्मीर्हि विष्णुः स हि वास्ति सूर्यः
स दृश्यते सर्वजनैः पृथक्शः।
पश्यंश्च लोकान् दिनरात्रिभागान्
दिव्यङ्कयन् याति रथेन देवः।।१२८६।।

सुवीरः–६४४

सु–वि–उपसर्गौ। 'ईर गतौ कम्पने च' इति धातुरादादिकस्ततः ***''इगुपधज्ञाप्रीकिरः कः''*** (पा० ३ ।१ ।१३५) इति सूत्रेण इगुपधलक्षणः 'कः' प्रत्ययः। शोभना=सरला विविधा च ईरा=गतिर्यस्य स 'सुवीरः'। यद्वा–शोभना, दक्षिणोत्तरायणभेदेन विविधा च गतिर्यस्य स 'सुवीरः' सूर्यः।

मन्त्रलिङ्गञ्च–

या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान्।।
ऋक् १ ।९१ ।१९ ।।

बहुत्र विविधविभक्तिवचनान्तः सुवीरशब्दो वेदे।

भवति चात्रास्माकम्–

सुवीरः कथितो विष्णुः, सूर्यो वास्ति सनातनः।
विविधा हि गतिर्लोके, सूर्यमूला विनानृजुम्[1] ।।१२९०।।

---

१. सूर्य-चन्द्रमसोर्वक्रता न भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्र विविधा गतयो, यथा 'सूर्यसिद्धान्ते'—

वक्रानुवक्रा कुटिला, मन्दा मन्दतरा समा।
तथा शीघ्रतरा शीघ्रा ग्रहाणामष्टधा गतिः।

अजतेर्वीरः पूर्वत्र बहुधा साधितः।

रुचिराङ्गदः—६४५

रुचिरमिति—'रुच दीप्तावभिप्रीतौ च' इति भौवादिको धातुः, ततः *''इसिमदिमुदिविदिच्छिदिभिदिमन्दिचन्दितिमिमिहिमुहिमुचिरुचिरुधिबन्धिशुषिभ्यः किरच्''* (उ० १।५१) इत्युणादिसूत्रेण 'किरच्' प्रत्ययः, कित्त्वाद् गुणाभावो—'रुचिरम्' इति।

अङ्ग इति—'अङ्गतेः' गतिकर्मणो ***''हलश्च''*** (पा० ३।३।१२१) इति संज्ञायामधिकरणे 'घञ्'। अङ्गत्यत्रावयवीति 'अङ्गम्'। यद्वा—अङ्गनमङ्गो, गतिवचनः। इदित्त्वान्नुम्, अनुस्वारपरसवर्णौ। रुचिरश्चासावङ्गो 'रुचिराङ्गः'।

रुचिराङ्गोपपदात् 'ददातेः' ***''आतोऽनुपसर्गे कः''*** (पा० ३।२।३) सूत्रेण 'कः' प्रत्ययस्तस्मिंश्चाल्लोप ***''आतो लोप इटि च''*** (पा० ६।४।६४) सूत्रेण। रुचिराङ्गं ददातीति 'रुचिराङ्गदः' विष्णुः सूर्यश्च। एवञ्च सुन्दरगतियुक्तं शरीरं, सुन्दरं गमनं वा यो ददाति स 'रुचिराङ्गदः'।

दृश्यते च लोकेऽपि—रुचिरैर्गमनशीलैरङ्गैर्युक्तं विविधप्राणिवर्गस्य शरीरं क्रियादक्षं भवति। एवं प्राणिनां गतिशीलानामङ्गानां दाता स एव सर्वप्राणिहृदयसन्निविष्टः सर्वं पश्यन्निव गुप्तः सर्वस्य गोप्ता विष्णुरिति। एष एव रुचिराङ्गदस्य रुचिराङ्गदत्वरूपो गुणः सर्वत्र विश्वे वर्तमानः विष्णुमाचष्टे। सूर्यदृष्टाङ्गे च विशिष्टा रुचिरता भवति। इत्यादि सर्वं लोकं दृष्ट्वा स्पष्टं भवति।

मन्त्रलिङ्गञ्च—

त्वं कृपा पावक रोचसे। ऋक् ६।२।६।।

भवति चात्रास्माकम्—

विष्णुर्हि लोके रुचिराङ्गदोऽस्ति
सूर्योऽथवा विश्वसृडस्ति वेत्ता।
कस्मै शरीराय कथंविधं वा
दत्तं सुखायास्तु तदङ्गमङ्गम् ।।१२६१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यच्चात्र लोके सरलं सुविधाजनकं यन्त्रादिकं शिल्पिभिः क्रियते, तद्विष्णोरेवानुकरणम्। ज्ञानस्यादिमः स्रोतो विष्णुरेव।

जननः—६४६

'जनी प्रादुर्भावे' दैवादिको धातुः, ततो 'णिच्' तस्मिन् प्राप्ताया उपधावृद्धेः ***''जनिवध्योश्च''*** (पा० ७।३।३५) सूत्रेण निषेधः। ततो 'ल्युः' योरनादेशः, णिलोपः। जनयतीति 'जननः' सर्वस्य जगतो जननः, स्वयमजोऽपि।

मन्त्रलिङ्गञ्च—

सोमापूषणा जनना रयीणां जनना दिवो जनना पृथिव्याः ।
जातौ विश्वस्य भुवनस्य गोपौ देवा अकृण्वन्नमृतस्य नाभिम्।।

ऋक् २।४०।१।।

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा।

यजुः ३२।१०।।

लोकेऽप्येषो जननरूपो गुणः सर्वत्र व्याप्तो दृश्यते, यतो हि सर्वे जीवा जननाः स्वापत्यानाम्।

भवति चात्रास्माकम्—

स बन्धुरुक्तो जननो हि विष्णुः
सूर्यः स जज्ञे सवितारमग्र्यम्।
विष्णुः पुनर्बीजमिवात्मशक्त्या
[1]वशासहायः प्रकरोति विश्वम्।।१२६२।।

जनजन्मादिः—६४७

जायन्ते इति 'जनाः', 'जनी प्रादुर्भावे' धातोः कर्तरि पचादि 'अच्'। जननं='जन्म', उणादि 'मनिन्' प्रत्ययः। 'आदिः'—'ददातेः' ***''उपसर्गे घोः किः''*** (पा० ३।३।९२) इति 'किः' प्रत्ययः, कित्त्वादालोपः। जनानां जन्मन आदिः='जनजन्मादिः' मूलकारणमित्यर्थः। स च विष्णुः सूर्योऽग्निर्वा।

मन्त्रलिङ्गञ्च—

---

१. **''वशेदं सर्वमभवत्, यावत् सूर्यो विपश्यति''**। अथर्व १०।१०।३४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनं जनं धायसे चक्षसे च। ऋक् ५।१५।४।।
विद्यामेषि रजस्पृथ्वहा मिमानो अक्तुभिः। पश्यञ्जन्मानि सूर्य।।
ऋक् १।५०।७।।
अग्निर्जन्मानि देव आवि विद्वान्। ऋक् ७।१०।२।।
ते हि द्यावापृथिवी मातरा मही देवी देवाञ्जन्मना यज्ञिये इतः।
उभे बिभृत उभयं भरीमभिः पुरू रेतांसि पितृभिश्च सिञ्चतः ।।
ऋक् १०।६४।१४।।
अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य।
ऋक् ७।११।४।।
अग्निर्हवि..... यथा देवानां जनिमानि वेद। ऋक् ३।४।१०।।
त्रिरस्य ता परमा सन्ति सत्या स्पार्हा देवस्य जनिमान्यग्नेः।
अनन्ते अन्तः परिवीत आगाच्छुचिः शुक्रो अर्यो रोरुचानः ।।
ऋक् ४।१।७।।

इति निदर्शनम्। बहुत्र वेदे जनेः सुप्तिङ्ङन्ताः प्रयोगाः। निदर्शनमात्रन्नः प्रयोजनं न प्रपञ्चः। जनजन्मादेः प्रतीकभूतौ पितरौ जन्मभृतां लोके चापि दृश्येते। पृथिवीहलयोरिव, पृथिवी स्त्री, हलश्च पुरुषशक्तियुक्तः पुमान्, रेतः स्थानीयं बीजं प्रकीर्य जनयति सस्यम्। तत्र बीजप्रकिरणे सस्यजनने च मूलकारणता पृथिवीहलयोरेव। एवमयं विष्णुरपि जीवजन्ममूलकारणत्वात् 'जनजन्मादिः' उक्तो भवति।

भवति चात्रास्माकम्—

अग्निर्हि विष्णुः स हि वास्ति सूर्यो
यज्ञः स वा सर्वजनस्य चादिः।
तस्मात् स विष्णुः सकलं प्रपश्यन्
पुंस्त्रीस्वरूपेण विभाति जन्ये ।।१२६३।।

सर्वजनस्य=सर्वजन्मवत इति। जायत इति जन उक्तः। यदि कदाचिदघटितघटनापटीयस्या भगवन्मायया, स्त्रिया सह सङ्गमेन स्त्री गर्भमादध्यात्तदा तस्यां निर्जीवोऽस्थिरहितो मांसपिण्डो जायते। कुतः ? जनजन्मादिं सूर्यरूपपुरुषबीजस्य तत्राभावात्। अयमेवाऽव्यभिचारी नियमो जनजन्मादिं नियन्तारं विष्णुं सर्वत्रावस्थितं ज्ञापयति। संगच्छते चैतस्य 'जनजन्मादिः' नामवत्ता।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भीमः—६४८

'ञिभी भये' जौहोत्यादिको धातुः, ततो *''भियः षुग्वा''* (उ० १।१४८) इत्युणादिसूत्रेण 'मक्' प्रत्ययो, धातोः षुगागमश्च पाक्षिकः क्रियते। षुगागमाभावे केवले मक्प्रत्यये, गुणाभावे, इडभावे च बिभेत्यस्मादिति—'भीमः'।

मन्त्रलिङ्गञ्च—

स वज्रभृद् दस्युहा भीम उग्रः। ऋक् १।१००।१२।।

सिंहो न भीम आयुधानि बिभ्रत्। ऋक् ४।१६।१४।।

बहुत्रायं भीमशब्दो वेदे। लोकेऽपि च पश्यामः—सर्व एव जीववर्गः सभयः, तथा च कपोतादयः श्येनाद् बिभ्यति, सिंहान्मृगा, राज्ञश्च चौरा बिभ्यति। एवमयं भीमत्वरूपेण गुणेन सर्वत्र व्याप्तो विष्णुः 'भीम' इत्युच्यते।

भवति चात्रास्माकम्—

भीमो हि विष्णुः स हि वास्ति सूर्यः
सूर्यात्तमो याति परात् परस्तात्।
यथा विवाहाज्जरठेन[1] बाला
तथा हि सर्वं भयते च भीमात्।।१२६४।।

भीमपराक्रमः—६४६

भीमशब्द उक्तः। परोपसर्गपूर्वात् 'क्रमतेः' 'घञ्' भावे *''नोदात्त०''* (पा० ७।३।३४) इत्यादिना सूत्रेण वृद्धिनिषेधः। भीमः पराक्रमो यस्य स 'भीमपराक्रमः'। सर्वान् पराक्रमशालिनोऽतिशय्य वर्तत इति भावः।

मन्त्रलिङ्गञ्च—

यत्र तमः पराक्रम्य व्रतं धारयत्युत्तरम्। अथर्व १०।७।११।।

यस्मिन् भूमिरन्तरिक्षं द्यौर्यस्मिन्नध्याहिता। सूर्यो वातस्तिष्ठन्त्यार्पिताः यत्राग्निश्चन्द्रमाः। स्कम्भं तं ब्रूहि कतमः स्विदेव सः।।

अथर्व १०।७।१२।।

इत्यादि सूक्तं भीमपराक्रमं तं वर्णयति, तत्र विस्तरशो द्रष्टव्यम्।

---

१. जरठो=वृद्धः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवन्ति चात्रास्माकम्—

विष्णुर्भीमपराक्रमः स भगवान् सर्वानधस्तान्नयेत्
यस्मिन् तस्य महाबलस्य कणशो भूयो बलं वा भवेत्।
मर्त्यो भीमपराक्रमोऽपि न पुनर्जीवेदसद्विक्रमः
विष्णुः स्वेन पराक्रमेण सहते विश्वं भिया योजयन्[1] *।।१२६५।।*

तथा यथा स्वात्मबलेन हीनो
राज्ञाप्तशक्तिर्भयदो नरः स्यात् ।
तस्माज्जना बिभ्यति दुर्बलाङ्गाद्
राज्ञो भयं तत्र यतोऽस्ति विष्टम्।।१२६६।।

यदा स राजा हरते बलं स्वं
तदा मनुष्यः स भवेत् पुरावत् ।
पराक्रमस्तस्य ततोऽपयाति
विष्णुर्हि राजा स बलं क्षिणोति ।।१२६७।।

❖ ❖ ❖

आधारनिलयोऽधाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः।।११५।।

६५० आधारनिलयः, ६५१ अधाता (धाता), ६५२ पुष्पहासः, ६५३ प्रजागरः।
६५४ ऊर्ध्वगः, ६५५ सत्पथाचारः, ६५६ प्राणदः, ६५७ प्रणवः, ६५८ पणः।।

आधारनिलयः—६५०

'आङ्' उपसर्गः। 'धृञ् धारणे' भौवादिको धातुः, ततः ***"अकर्तरि च कारके०"*** (पा० ३।३।१६) सूत्रेण 'घञ्', रपरा वृद्धिः। आध्रियते यस्मिन् येन वा स='आधारः'।

'निलय' इति—'नि' उपसर्गः। 'लीङ् श्लेषणे' क्रैय्यादिको धातुः, तत

---

१. शार्दूलविक्रीडितं छन्दः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

"एरच्" (पा० ३।३।५६) इति सूत्रेणाधिकरणे 'अच्' प्रत्ययः। ***"विभाषा लीयतेः"*** (पा० ६।१।५१) सूत्रेणात्वे प्राप्ते वैकल्पिके ***"निमिमीलियां खलचोरात्वं नेति वक्तव्यम्"*** इति वार्तिकेन निषिध्यते। ततो गुणायादेशौ। निलीयन्तेऽस्मिन्निति 'निलयः', आधाराणां निलयः='आधारनिलयः' इति। जगदाधाराणामपि धारक इति भावः।

मन्त्रलिङ्गञ्च—

येन द्यौरुग्रा पृथिवी च दृढा येन स्वः स्तभितं येन नाकः।
यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम ।।

यजुः ३२।६।।

यत्राधि सूर उदितो विभाति कस्मै देवाय हविषा विधेम।

यजुः ३२।७।।

यतः सूर्य उदेत्यस्तं यत्र च गच्छति ।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किञ्चन।। अथर्व १०।८।१६।।
न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप।
उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः ।।

ऋक् ७।६६।२।।

उच्छिष्टे नाम रूपं चोच्छिष्टे लोक आहितः ।
उच्छिष्ट इन्द्रश्चाग्निश्च विश्वमन्तः समाहितम्।। अथर्व ११।७।१।।
नव भूमीः समुद्रा उच्छिष्टेऽधि श्रिता दिवः।
आ सूर्यो भात्युच्छिष्टेऽहोरात्रे अपि तन्मयि ।। अथर्व ११।७।१४।।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।२।।

इति निदर्शनम्। भवति चात्रास्माकम्—

आधारनिलयो विष्णुस्तस्मिन्त्सर्वं समाश्रितम्।
स्वाधारं हि यथा व्योम, तथा सः[1] स्वयमाश्रितः।।१२६८।।

अधाता (धाता)—६५१

'डुधाञ् धारणपोषणयोः' इति जौहोत्यदिको धातुः, ततः 'तृच्' प्रत्ययः

१. सः=विष्णुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्तरि। अनिट्, अनङ्ङादि। धयति=पिबति विश्वमिति धाता, रसानां वा समाहर्ता सूर्यः।

मन्त्रलिङ्गञ्च—

स पुनान उप सूरे न धाता। ऋक् ६।६७।३८।।

श्लोके सन्धिच्छेदे—अधातेत्यपि छेत्तुं शक्यते। तथा च न अन्यो धाता यस्य, सोऽधाता, न चेह ***''नद्यृतश्च''*** (पा० ५।४।१५३) सूत्रेण कप् प्रत्ययः स्यादिति, समासान्तविधेरनित्यत्वात्। अधातृक एव—अधाता।

भवति चात्रास्माकम्—

धाताऽथ धर्ता स हि विष्णुरेको
धाताऽथ पाता स पपान[1] उक्तः।
अधातृको वा स कपिः स्वयम्भूः
[1]पपिः स एवास्त्यथवाप्यधाता ।।१२६६।।

लोकेऽपि च कदाचिद्धाताप्यधातृको भवति यथारुचि। एवंगुणकश्च विष्णुर्व्याप्नोति लोकम्। धाता—अधाता—अधातृको वा।

पुष्पहासः—६५२

'पुष्प विकसने' दैवादिको धातुः, ततः पचादि 'अच्'। पुष्प्यति=विकसतीति 'पुष्पः'। 'हासः'—'हसे हसने' भौवादिको धातुस्ततो भावे 'घञ्, हसनं 'हासः' इति। पुष्पेषु यो विकासरूपो धर्मः स एवं हासो यस्य सः 'पुष्पहासः'।

यद्वा—पुष्प इव प्रफुल्लमुखमुद्रः स्मेरमुखः शोकराहित्यात्। यद्वा—पुष्पनं पुष्पो, भावे 'घञ्'। पुष्पो=विकाश एव हासो यस्य सः। एतेन भगवतः शोकराहित्यमानन्दरूपत्वञ्च बोध्यते।

विशोक-शोकनाशने नामनी विष्णोः पूर्वमुक्ते व्याख्याते च। योऽस्मिन् जगति प्रत्येकं वस्तुनो विकाशरूपो धर्मः स तस्यैव भगवतो विष्णोः सर्वव्यापकस्य। एवञ्च ज्ञेयं—जगति यः सदा प्रसन्नमुखमुद्रः शोकरहितश्च भवति, तस्मिन् निष्पापे शोकमोहरहिते स्वयं भगवान् विराजते। यतो हि स विष्णुः, 'अंहोमुक्' इत्युच्यते।

---

१. पपिः सोमः। **''पपानो देवेभ्यो०''** ऋक् ६।४४।७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

भरेष्विन्द्रं सुहवं हवामहेंऽहोमुचं सुकृतं दैव्यं जनम् ।
अग्निं मित्रं वरुणं सातये भगं द्यावापृथिवी मरुतः स्वस्तये।।

ऋक् १० ।६३ ।६ ।।

अन्यच्च—

सुत्रामाणं पृथिवीं द्यामनेहसम्०। १० ।६३ ।१० ।।

विश्वे क एधते, इति प्रश्ने—अरिष्टः स मर्तः इत्युत्तरम्। अरिष्टः=दुःखरहितः। रुष रिष हिंसायां धातू। तथा च मन्त्रलिङ्गम्—

अरिष्टः स मर्त्तो विश्व एधते प्रप्रजाभिर्जायते धर्मणस्परि ।
यमादित्यासो नयथा सुनीतिभिरति विश्वानि दुरिता स्वस्तये।।

ऋक् १० ।६३ ।१३ ।।

हसमधिकृत्य—

ऋतावानं विचेतसं पश्यन्तो द्यामिव स्तृभिः।
विश्वेषामध्वराणां हस्कर्त्तारं दमे दमे ।। ऋक् ४ ।७ ।३ ।।

पुष्पमधिकृत्य—

तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत०। अथर्व ५ ।४ ।४ ।।

अमृतस्य=जलस्य। लोकेऽपि च पश्यामः—कफमूलकः कुष्ठात्मकः रोगोऽपि पुष्पवद् भासते, कण्डूमांश्च स भवति, कण्डूरपि कफमूलिका। इति पृथक् पृथक् निदर्शनम्।

भवति चात्रास्माकम्—

स पुष्पहासो भगवान् वरेण्यः
स पुष्पहासोपमितं विधत्ते ।
विश्वं मनोहारि विराजितान्तः
स्वपुष्पहासत्वगुणं वितन्वन्।।१३००।।

प्रजागरः—६५३

'प्र' उपसर्गः। 'जागृ निद्राक्षये' आदादिको धातुः ततः कर्तरि पचादि 'अच्'। प्रकर्षेण जागर्तीति 'प्रजागरः'। गुणो रपरः। सदा जागरणशीलः प्रबोधरूप इत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

अग्ने त्वं सुजागृहि वयं सुमन्दिषीमहि।
रक्षा णो अप्रयुच्छन् प्रबुधे नः पुनस्कृधि।। यजुः ४।१४।।
त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि। ऋक् १०।२५।८।।
अग्निर्जागार तमृचः कामयन्तेऽग्निर्जागार तमु सामानि यन्ति।
अग्निर्जागार तमयं सोम आह तवाहमस्मि सख्ये न्योकाः ।।
ऋक् ५।४४।१५।।

लोकेऽपि च पश्यामः—अग्निर्न स्वपिति सूर्यदैवतकत्वात्, सूर्योऽपि न स्वपिति, आत्मापि न स्वपिति, तथा प्राणा अपि न स्वपन्ति—**''देवो याति भुवनानि पश्यन्''** (ऋक् १।३५।२) इतिश्रुतिप्रतिज्ञावचनात्।

भवति चात्रास्माकम्—

प्रजागरो विष्णुरहस्करो वा
प्राणाः खमग्निर्मरुदाप आत्मा।
मनश्च जागर्ति सदा च तस्मिन्
प्रजागरे विश्वमिदं समाप्यम्[1] ***।।१३०१।।***

ऊर्ध्वगः—६५४

'उर्द माने क्रीडायाञ्च' इति भौवादिको धातुः, तत ***''इण्शीभ्यां वन्''*** (उ० १।१५२) ***''कृगृशृदृभ्यो वः''*** (उ० १।१५५) इत्युणादिना वा 'वन्' 'वो' वा प्रत्ययो बाहुलकात्। ***''उपधायां च''*** (पा० ८।२।७८) इति सूत्रेणोंकारस्य दीर्घः। पृषोदरादित्वाद्दस्य धः। ***''नेड् वशि कृति''*** (पा० ७।२।८) इतीण्निषेधः—'ऊर्ध्वम्'। तदुपपदाद् 'गमेः' ***''अन्यत्रापि दृश्यते''*** (वा० ३।२।४८) इति 'डः' प्रत्ययो डित्त्वाट्टेर्लोपः। ऊर्ध्वं गच्छतीति 'ऊर्ध्वगः' सूर्यो विष्णुर्वा, सर्वेषामूर्ध्वस्थितिशालित्वात्, सर्वतः श्रेष्ठत्वाद् वा।

लोकेऽपि च पश्यामः—समस्तप्राणिवर्गे ज्ञानाधारत्वात् सर्वेभ्योऽङ्गेभ्यः श्रेष्ठं मस्तिष्कमेवोर्ध्वगम्।

मन्त्रलिङ्गञ्च—

ऊर्ध्व ऊ षु णो अध्वरस्य। ऋक् ४।६।१।।

---

१. समाप्यम्=सम्यगाप्तं सम्पूर्णतया व्याप्तमित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऊर्ध्वस्तिष्ठा न ऊतये। ऋक् १।३०।६।।
ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्। ऋक् ७।३६।१।।
स ह श्रुत इन्द्रो नाम देव ऊर्ध्वो भुवन् मनुषे दस्मतमः।
ऋक् २।२०।६।।

इति निदर्शनम्। लोकेऽपि पश्यामः—सर्वो हि लोकः सर्वत उपरि श्रेष्ठो वा भवितुमीहते, स एष ऊर्ध्वबुभूषारूपो गुणः विष्णोरेव सर्वत्र व्याप्तो लोके। अतो विष्णोः 'ऊर्ध्वगः' इति स्तुत्यं नाम सङ्कीर्तितं विष्णुनामसु।

भवति चात्रास्माकम्—

स ऊर्ध्वगो विष्णुरनन्तलोकान्
पश्यन् सदा याति दिवं वसानः।
ऊर्ध्वं प्रकाशाधिपतिर्विभाति
ज्ञानप्रकाशोऽप्यत उत्तमाङ्गे ।।१३०२।।

सत्पथाचारः—६५५

'अस्तेः' शतरि 'सत्' इति साधुपर्य्यायो नित्यपर्य्यायो वा। 'पत्लृ गतौ' इति भौवादिकाद्धातोः ***''पतः स्थ च''*** (उ० ४।२२) इत्युणादिसूत्रेण 'इनिः' प्रत्ययः थश्चान्तादेशः—''पथिन्', तस्य सौ 'पन्थाः'। सच्चासौ पन्थाः—'सत्पथः'। ***''ऋक्पूरब्धूःपथामानक्षे''*** (पा० ५।४।७४) समासान्तः 'अः' प्रत्ययः, स च ***''तद्धिताः''*** (पा० ४।१।७६) इति सूत्रेण तद्धितसंज्ञः। तस्मान् ***''नस्तद्धिते''*** (पा० ६।४।१४४) इति सूत्रेण नान्तस्य भस्य टेर्लोपः। यद्वा—'पथे गतौ' भौवादिकाद्धातोः पचादि 'अच्', ततः पथः पथौ पथा इत्यादीनि रूपाणि।

'आचार' इति—आङ्पूर्वात् 'चर गतिभक्षणयोः' इति भौवादिकाद् धातोर्भावे 'घञ्' प्रत्ययो भवति। आचरणमाचारः। यद्वा—'आङ्' पूर्वात् 'चरतेर्णिच्', ततः ***''एरच्''*** (पा० ३।३।५६) इति भावे 'अच्' णिलोपश्च। सत्पथे आचारो यस्य स 'सत्पथाचारः' विष्णुः सूर्यो वा। इयं भानां कक्षा सनातनी, यस्यां ग्रहाः पतन्ति=गच्छन्ति। एतेन नाम्ना विज्ञायते यन्नायमतिक्रमते पन्थानम्। अत एवैतस्याव्ययमिति नाम पुष्टं भवति।

मन्त्रलिङ्गञ्च—

स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव। ऋक् ५।५१।१५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकेऽपि च पश्यामः—यस्य यस्य यो यो मार्गोऽस्ति शुभस्तेन गच्छन्न रिष्यतेऽसौ। अतः भगवतः सत्पथाचारत्वरूपो गुणः सर्वत्र व्याप्तः।

भवति चात्रास्माकम्—

विष्णुर्हि सत्पथाचारः सूर्यो वास्ति सनातनः।
मार्गो यस्यास्ति यो यो वा, तेन गच्छन्न रिष्यति।।१३०३।।

मन्त्रलिङ्गञ्च—

सूर्य एकाकी चरति चन्द्रमा जायते पुनः। यजुः २३।४६।।

यस्या अनन्तो अह्रुतस्त्वेषश्चरिष्णुरर्णवः। अमश्चरिति रोरुवत्।।
ऋक् ६।६१।८।।

इति निदर्शनम्। भूयान् प्रपञ्चोऽस्य सुप्तिङन्तशब्दैः।

प्राणदः—६५६

'प्र' उपसर्गः। 'अन प्राणने' भौवादिको धातुस्ततो ***''हलश्च''*** (पा० ३।३।१२१) सूत्रेण करणे 'घञ्', वृद्धिः। ***''अनितेरन्तः''*** (पा० ८।४।१९) सूत्रेण नस्य णत्वम्। प्राण्यते=जीव्यतेऽनेनेति 'प्राणः' वायुरित्यर्थः। प्राणोपपदाद् 'ददातेः' ***''आतोऽनुपसर्गे कः''*** (पा० ३।२।३) इति सूत्रेण 'कः' प्रत्ययः, तस्मिन् आल्लोपः। प्राणं=जीवनं ददातीति 'प्राणदः' विष्णुः सूर्यो वा।

लोकेऽपि पश्यामः—यावच्छरीरेऽग्निस्तावत् प्राणिति, तन्नाशाच्च नश्यति। अग्निर्हि सूर्यदैवतः, तस्मात् सूर्य एव जगत् प्राणयति। अतः स प्राणद इत्युक्तो भवति।

मन्त्रलिङ्गञ्च—

असुनीते पुनरस्मासु चक्षुः पुनः प्राणमिह नो धेहि भोगान्।
ऋक् १०।५९।६।।

प्राणदाऽअपानदा व्यानदा वर्चोदा वरिवोदाः। यजुः १७।१५।।

भवति चात्रास्माकम्—

स प्राणदः प्राणयतीह विश्वं
स प्राणदः प्राणयतीह वह्निम्।
स प्राणदो विष्णुरनेकरूपः
प्राणो ह्यपानादिविधो विभिन्नः।।१३०४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धातुजन्यार्थभेदान्नामभेदः, तथा च यदि 'दैप् शोधने' यद्वा 'दोऽवखण्डने' धातोः 'प्राणदः' नामनिष्पादनेन विष्णौ सूर्ये वा समीचीनार्थसङ्गतिः स्यात्तदा तदपि विधेयम्, अत्र सुधियः प्रमाणम्।

प्रणवः—६५७

'प्र' उपसर्गः। 'णु स्तुतौ' धातुरादादिकः ***"उपसर्गादसमासेऽपि०"*** (पा० ८।४।१४) सूत्रेण प्रोपसृष्टस्य 'णत्वम्'—प्रणौतीति 'प्रणवः', प्रणमयतीति वा। पचादि 'अच्' गुणावादेशौ। इहायं ण्यन्तस्य नमेरर्थे वर्तते।

यद्वा—***"संज्ञायां घः प्रायेण"*** (पा० ३।३।११८) इति सूत्रेण करणे 'घः' प्रत्ययः। प्रणूयतेऽनेनेति 'प्रणवः' इति त्र्यक्षरसमुदाय 'ओम्' इति। सोऽस्यास्तीति मत्वर्थीयः 'अच्'।

यद्वा—नौतेः ***"ऋदोरप्"*** (पा० ३।४।५७) सूत्रेण कर्मण्यप्। गुणः, अवादेशः। प्रणूयत इति 'प्रणवः'।

'प्रणमः' इत्यपि क्वचित्—तत्र 'प्र'पूर्वको 'णम् प्रह्वत्वे शब्दे च' इति भौवादिको धातुः, तस्य णस्य नः। ततो णिच्, वृद्धिः। सोपसर्गस्यामन्तस्य ***"ज्वलह्वलह्मलनमामनुपसर्गाद् वा"*** इति मिद्धातुगणसूत्रेण नित्या मित्संज्ञा, ***"मितां ह्रस्वः"*** (पा० ६।४।९२) इति ह्रस्वः, तत पचाद्यच् णिलोपः, प्रणम इति।

मन्त्रलिङ्गञ्च—

त्वामभि प्रणोनुमो जेतारमपराजितम्। ऋक् १।१२।२।।

प्रणवशब्द ओङ्कारपर्यायः। सर्वे वेदाः प्रणवस्यैव महिमानं व्याचक्षते। तथा च—

सर्वे वेदा यत्पदमामनन्ति, तपांसि सर्वाणि च यद् वदन्ति ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति, तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्।।

कठोपनिषत् अ १। व. २। मन्त्र १५।।

भवति चात्रास्माकम्—

विष्णुर्हि मन्ये प्रणवः प्रसिद्धः
स एव वा व्योम् परमेश्वरोऽस्ति।
स एव सूर्यः स हि वेन्द्रनामा
नमन्ति तं वा प्रणमोऽप्यतः सः ।।१३०५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पणः—६५८

'पण व्यवहारे स्तुतौ च' भौवादिको धातुः, ततः पचादि 'अच्' प्रत्ययः। व्यवहारार्थेऽयमत्र—पणते=व्यवहरति, व्यवहारयति वा विश्वं सः 'पणः'। तदर्थे मन्त्रलिङ्गञ्च—

योे अग्निषोमा हविषा सपर्य्याद् देवद्रीचा मनसा यो घृतेन।
तस्य व्रतं रक्षतं पातमंहसो विशे जनाय महि शर्म यच्छतम्।।

ऋक् १।९३।८।।

अग्नि पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत।
स देवां एह वक्षति।। ऋक् १।१।२।।
अग्ने नय सुपथा राये। ऋक् १।१८९।१।।

इति व्यवहार-निदर्शनम्। अत एव च यत्र सर्वे व्यवहरन्ति, तत् स्थान-मापणमित्युच्यते।

भवति चात्रास्माकम्—

पणिर्हि विष्णुः स जगद्विरच्य
यथायथं तत् पणने प्रयुङ्क्ते।
स्त्रिया पतिः सापि तथा च पत्या
यथायथं तौ पणतः[1] सबन्धू।।१३०६।।

❖ ❖ ❖

प्रमाणं प्राणनिलयः प्राणभृत् प्राणजीवनः।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः।।११९।।

६५९ प्रमाणम्, ६६० प्राणनिलयः, ६६१ प्राणभृत्, ६६२ प्राणजीवनः। ६६३ तत्त्वम्, ६६४ तत्त्ववित्, ६६५ एकात्मा, ६६६ जन्ममृत्युजरातिगः।।

---

१. व्यवहारे आयप्रत्ययस्याभावाद् अनुदात्तेत्त्वादात्मनेदं प्राप्तमपि **'छन्दोवत् कवयः कुर्वन्ति'** (महा० १।४।३) इति वचनात् परस्मैपदमपि साधु।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रमाणम्—६५६

'प्र' उपसर्गः। 'माङ् माने' जुहोत्यादिः, ततः करणेऽधिकरणे वा 'ल्युट्' योरनः' दीर्घः। *''कृत्यचः''* (पा० ८।४।२६) सूत्रेण णत्वम्। प्रमीयते सर्वं जगदस्मिन्निति वा 'प्रमाणम्'। नह्यन्येन केनचिज्जगदिदं प्रमातुं शक्यं, न च क्वचिदन्यत्र सर्वमिदं जगत् प्रमिमीते=अन्तर्भवति। अतो विष्णुरेव प्रमाणशब्दवाच्यः।

मन्त्रलिङ्गञ्च—

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।२।।

यस्य भूमिः प्रमान्तरिक्षमुतोदरम्। अथर्व १०।७।३२।।

तद् ब्रह्म प्रमाणम्। बहुत्र विशदं व्याख्यातम्।

भवति चात्रास्माकम्—

विष्णुः प्रमाणं जगतोऽस्ति गम्यो
यस्मिन्निदं सं च वि चैति विश्वम्।
शरीरचेष्टा ज्ञपयन्ति जीवं
यथा तथा तञ्च जगद् व्यनक्ति ।।१३०७।।

प्राणनिलयः—६६०

'प्राण' शब्दो व्याख्यातः प्राणदनामव्याख्याने। तथा 'निलय'शब्दोऽपि आधारनिलयनामव्याख्याने व्याख्यातः। प्राणा निलीयन्ते यस्मिन् स 'प्राणनिलयो' विष्णुः सूर्यो वा। यतो हि स सर्वेषां स्थावराणाञ्जङ्गमानाञ्च यथायोग्यसाधनप्रदानेन वासयिताऽतः स 'प्राणनिलयः' उच्यते।

लोके चापि पश्यामो—विना सूर्यप्रकाशं क्षुपा वनस्पतयोऽन्ये वृक्षाश्च न पुष्पिताः फलिताश्च भवन्ति, शमीवृक्षादृते। शमीवृक्षो हि सूर्यदैवतोऽतो वैशाखे मासि पल्लवितो भवति।

विष्णुरेव यमरूपः सर्वं ग्रसते च।

तथा च मन्त्रलिङ्गम्—

यमो ददात्यवसानमस्मै। ऋक् १०।१४।६।।

एवं प्राणनिलयत्वेन स भगवान् सर्वत्र व्याप्तो दृश्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भद्रा अश्वा हरितः सूर्यस्य। ऋक् १।११५।३।।

अत्र—अश्नुवते=व्याप्नुवन्तीत्यश्वाः किरणास्त एव च प्राणास्तेषां निलयः सूर्यः इति ज्ञेयम्। तथा च—

पुनर्मैत्विन्द्रियं पुनरात्मा द्रविणं ब्राह्मणं च।
पुनरग्नयो धिष्ण्या यथा स्थाम प्रकल्पयन्तामिहैव।। अथर्व ७।६७।१।।
पुनः प्राणः पुनरात्मा न एतु पुनश्चक्षुः पुनरसुर्न एतु ।
वैश्वानरो नो अदब्धस्तनूपा अन्तस्तिष्ठाति दुरितानि विश्वा।।
अथर्व ६।५३।२।।

इति निदर्शनम्। भवतश्चात्रास्माकम्—

प्राणानां निलयो विष्णुः प्राणास्तस्मिन् प्रतिष्ठिताः।
स युनक्ति पुनः प्राणैरात्मना चक्षुषा च सः।।१३०८।।

तस्मिन्नेव निलीयन्ते, प्राणाः प्राणभृतां पुनः ।
सत्यर्के सति वायौ च, विष्णुस्तिष्ठति केवलः ।।१३०९।।

निलयः=आधारः। विष्णुनामसङ्ग्रहे विष्णोः (व्यवस्था) तथा (व्यवस्थानं) इत्यपि नाम सङ्गृहीतम्।

अथर्ववेदस्य ११।४ सूक्तं सर्वं प्राणमहिमानमाचष्टे, तत्तत्रैव द्रष्टव्यम्। तथा च—

प्राणो ह सूर्यश्चन्द्रमाः प्राणमाहुः प्रजापतिम्। अथर्व ११।४।१२।।

प्राणभृत्—६६१

प्राणान् बिभर्तीति 'प्राणभृत्'। 'प्राण' शब्द उक्तः। प्राणरूपकर्मोपपदाद् 'भृञः' क्विप्', तुक्, गुणाभावो, जश्त्वचर्त्वे। सर्वत्र व्याप्तः सर्वेषां प्राणिनां प्राणान् बिभर्ति=पोषयति धारयति वा सः 'प्राणभृद्' विष्णुः सूर्यो वा।

मन्त्रलिङ्गञ्च—

पृथक् सर्वे प्राजापत्याः प्राणानात्मसु बिभ्रति।
तान् सर्वान् ब्रह्म रक्षति ब्रह्मचारिण्याभृतम् ।। अथर्व ११।५।२२।।

ब्रह्मचारी=इन्द्रः। तद्यथा—

इन्द्रो ह भूत्वासुरांस्ततर्ह। अथर्व ११।५।७।।
विराडिन्द्रोऽभवद् वशी। अथर्व ११।५।१६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तथा च यथा—

आचार्यो ब्रह्मचारी ब्रह्मचारी प्रजापतिः ।

प्रजापतिर्विराजति विराडिन्द्रोऽभवद् वशी।। अथर्व ११।५।१६।।

लोकेऽपि च पश्यामः—आत्मा शरीरस्येन्द्रः, इन्द्र एव वात्मा। स यावच्छरीरे तिष्ठति तावत् प्राणान् बिभर्ति। तस्मात् प्राणभृदिन्द्रः, आत्मा, अग्निः, सूर्यः, चन्द्रमा मातरिश्वा च। तस्मादेतेषामात्माग्न्यादीनामन्तःस्थः सन्नेषां भर्त्ता विष्णुरेव प्राणभृत् एवं तस्य भगवतः प्रतिपदं व्यापकता दृश्यते।

भवति चात्रास्माकम्—

स प्राणभृत् सूर्य उतापि विष्णुः
स मातरिश्वा स विराट् स इन्द्रः।
आत्मा स वा सोऽग्निरसौ च सोमः
स [1]ब्रह्मचारी विविधस्वरूपः ।।१३१०।।

प्राणजीवनः—६६२

'जीव प्राणधारणे' भौवादिको धातुः, ततो णिच्, 'ल्यु' योरनः, णिलोपः। जीवयतीति 'जीवनः', प्राणानां जीवनः 'प्राणजीवनः'। रससरूपेण प्राणजीवन इत्यर्थः।

तदर्थे मन्त्रलिङ्गञ्च—

यो अस्य सर्वजन्मन ईशे सर्वस्य चेष्टतः।

अतन्द्रो ब्रह्मणा धीरः प्राणो मा नु तिष्ठतु।। अथर्व ११।४।२४।।

प्राणो=विष्णुः।

प्राणाय नमो यस्य सर्वमिदं वशे। अथर्व ११।४।१।।

प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते।

प्राणे ह भूतं भव्यञ्च प्राणे सर्वं प्रतिष्ठितम्।। अथर्व ११।४।१५।।

लोके चापि दृश्यते—न हि वायुं विना जीवितुं शक्यमिति। तथा च—

तस्मिन्नपो मातरिश्वा दधाति। यजुः ४०।४।।

भवति चात्रास्माकम्—

वायुः प्राणभृतां लोके, जीवनः परिकीर्तितः ।
विष्णुः स्वस्मिन् हि तं धत्ते, नमामि प्राणजीवनम्।।१३११।।

---

१. सूर्यः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्त्वम्—६६३

'तनु विस्तारे' तानादिकाद्धातोः ***''त्यजितनियजिभ्यो डित्''*** (उ० १।१३२) इत्युणादिसूत्रेण डिद्वद्भावभावितो 'अदिः' प्रत्ययः, डित्त्वाट्टेर्लोपः='तद्' इति। तदो भावस् ***''तस्य भावस्त्वतलौ''*** (पा० ५।१।११८) सूत्रेण भावे 'त्व' प्रत्ययः, ***''खरि च''*** (पा० ८।४।५४) सूत्रेण चर्त्वम्—आविष्टलिङ्गोऽयम्—'तत्त्वम्' इति। तन्यत इति 'तत्' स्थावरजङ्गमात्मकं जगत्, तस्य सारभूतं वस्तु 'तत्त्वम्' इत्यर्थः।

मन्त्रलिङ्गञ्च—

यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजा इमाः।
सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत्॥

अथर्व १०।८।३७॥

लोकेऽपि च—यद्विना यत् कार्यकारि यद्वा आत्मधारणक्षमन्न भवति तत्तस्य तत्त्वं, यथा यन्त्रस्य तैलं वाष्पं वा। एवमिदं जगन्न विष्णुं विनात्मधारणक्षमम्, अतः स विष्णुर्जगतस्तत्त्वम्।

भवति चात्रास्माकम्—

तत्त्वं स विष्णुर्जगदस्ति तस्मिन्
तत्त्वं विना नान्यदिहास्ति किञ्चित्।
यदत्र दृश्यं न हि तद्विनास्ति
यो वेत्ति सूत्रं स हि वेत्ति तत्त्वम् ॥१३१२॥

तत्त्ववित्—६६४

'तत्त्व' शब्दो व्युत्पादितः। 'वेत्तेः' 'क्विप्', गुणाभावो ***''वाऽवसाने''*** (पा० ८।४।५५) इति दस्य तकारश्चर्त्वम्। दुग्धे दध्नि वा सर्वत्र ततं घृतमिव यः सर्वत्र ततं तत्त्वं विजानाति स 'तत्त्वविद्' उच्यते।

सर्वस्मिन् दृश्येऽदृश्ये, ज्ञानगम्येऽज्ञेये च यावत्यो यद्विधाः शक्तयः तावत्यस्ताः सर्वविधाः सूर्यादिग्रहाणां नक्षत्राणाञ्च, तेषां च सूर्यादीनां व्यवस्थापयिता स विष्णुरेव। स एव च सर्वत्र विततं सर्वविधशक्तितत्त्वं वेत्त्यतः स 'तत्त्वविद्' उच्यते।

लोकेऽपि च पश्यामो—यथा दुग्धाद्विलोड्य निष्कासितं घृतं न पुनस्तथा तत्र संयवितुं शक्यते, यथा विलोडनात् प्राक् प्रभविष्णुना विष्णुना तत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मिश्रीकृतमासीत्। तथा पार्थिवे शरीरे आत्मा, मनः, प्राणा इन्द्रियाणि वा यथा तत्त्वविदा ब्रह्मणा प्रतिष्ठापितान्यासन्, न तथा मृते शरीरे केनचित् प्रतिष्ठापयितुं शक्यन्ते। तस्मात् सूत्रधारः स विष्णुरेव वस्तुतः 'तत्त्ववित्'। यश्चापि कश्चिद् विष्णुमंशतोऽपि वेत्ति सोऽपि 'तत्त्ववित्'।

मन्त्रलिङ्गञ्च–

यो विद्यात् सूत्रं विततं यस्मिन्नोताः प्रजाः इमाः।
सूत्रं सूत्रस्य यो विद्यात् स विद्याद् ब्राह्मणं महत्॥

अथर्व १०।८।३७॥

भवति चात्रास्माकम्–

स तत्त्ववित् सर्वजगन्नियन्ता
सूर्योऽथ विष्णुर्बहुनामकीर्त्यः ।
ततं हि सर्वत्र तमेकमेव
यो वेत्ति ना[1] तत्त्वविदस्त्यसौ वा॥१३१३॥

एकात्मा–६६५

'अततेः' औणादिके 'मनिनि' सिध्यति 'आत्म शब्दः'। इणश्च 'कनि='एकः'। एकश्चासावात्मा=एकात्मा, सांहितिको दीर्घः। सौ नान्तलक्षणो दीर्घः। एवञ्च स विष्णुरेव सर्वस्य स्थावरजङ्गमरूपस्य विश्वस्य एक आत्मा सर्वत्र व्याप्तत्वात्।

तथा च मन्त्रलिङ्गम्–

यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः ।
तत्र को मोहः कः शोक एकत्वमनुपश्यतः॥ यजुः ४०।७॥

लोकेऽपि च पश्यामो–यो यत्करोत्याविष्करोति वा, स सर्वं तदात्मत्वेन मन्यते, तत्रैकत्वेन मनोनिधानात्। तथा च नष्टे तस्मिन् नष्टोऽस्मीति तत्कर्ता आविष्कर्ता वा ब्रवीति। एवं स विष्णुरैकात्म्येन सर्वं विश्वं व्याप्नोति, तस्मात् स 'एकात्मा' उच्यते।

तथा च मन्त्रलिङ्गम्–

तस्माद् वै विद्वान् पुरुषमिदं ब्रह्मेति मन्यते।
सर्वा ह्यस्मिन् देवता गावो गोष्ठ इवासते ॥

१. ना=पुरुषः। बहुनामकीर्त्यः=बहुभिर्नामभिः कीर्तयितुं योग्य इति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रथमेन प्रभारेण त्रेधा विष्वङ् विगच्छति ।
अद एकेन गच्छत्यद एकेन गच्छतीहैकेन निषेवते।।

अथर्व ११।८।३२-३३।।

एकद्यूः। ऋक् ८।८०।१०।।
एकनीडम्। यजुः ३२।८।।
अज एकपाद्। ऋक् २।३१।६।।
एकराट्। ऋक् ८।३७।३।।
एकवीरः। ऋक् १०।१०३।१।।

तथा–

यमस्य लोकादध्वा बभूविथ प्रमदा मर्त्यान् प्रयुनक्षि धीरः ।
एकाकिना सरथं यासि विद्वान्त्स्वप्नं मिमानो असुरस्य योनौ।।

अथर्व १६।५६।१।।

इति निदर्शनम्। भवति चात्रास्माकम्–

एकात्मा सकले विश्वे, विष्णुर्व्याप्नोति स्वं पदम्।
सूर्यो वाग्निस्वरूपो वा, विष्णुः सर्वत्र राजते ।।१३१४।।

जन्ममृत्युजरातिगः–६६६

जन्म इति–'जनी प्रादुर्भावे' दिवादिस्ततः ***''सर्वधातुभ्यो मनिन्''*** (उ० ४।१४५) इत्युणादिना 'मनिन्' प्रत्ययो, ***''नेड्वशि कृति''*** (पा० ७।२।८) इतीण्निषेधः, जननं='जन्म'।

मृत्युरिति–'मृङ् प्राणत्यागे' इति तौदादिको धातुः, ततो ***''भुजिमृङ्भ्यां युक्त्युकौ''*** (उ० ३।२१) इत्युणादिना 'त्युक्' प्रत्ययो, गुणाभावोऽनिट् च, मरणं='मृत्युः'।

जरेति–'जृष् वयोहानौ' दैवादिको धातुः, ततः ***''षिद्भिदादिभ्योऽङ्''*** (पा० ३।३।१०४) इति सूत्रेण 'अङ्' प्रत्ययः, ***''ऋदृशोऽङि गुणः''*** (पा० ७।४।१६) सूत्रेण गुणो, रपरः। ततः ***''अजाद्यतष्टाप्''*** (पा० ४।१।४) इत्यनेन स्त्रियां 'टाप्', जरणं=जरा।

अतिग इति–'अति' पूर्वो 'गम्लृ' गतौ भौवादिको धातुः, ततः ***''अन्येष्वपि दृश्यते''*** (पा० ३।२।१०१) सूत्रेण 'डः' प्रत्ययः, टिलोपः। अतिगच्छतीति 'अतिगः'। जन्ममृत्युजरा अतिगच्छतीति='जन्ममृत्युजरातिगः' विष्णुः सूर्यो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

अकामो धीरो अमृतः स्वयम्भू रसेन तृप्तो न कुतश्चनोनः।
तमेव विद्वान् न विभाय मृत्योरात्मानं धीरमजरं युवानम् ॥

अथर्व १०।८।४४॥

लोकेऽपि च पश्यामः—शरीरे जन्मृत्युजराः प्राप्नुवत्यपि शारीर आत्मा जन्ममृत्युजरा न प्राप्नोति, **"भस्मान्त ँ शरीरम्"** (यजुः ४०।१५) इति याजुषात् मन्त्रलिङ्गात्। तथा—

अङ्गादङ्गात्संभवसि हृदयादधिजायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम्॥

सा० मं० ब्रा० १।५।१६॥

इत्याद्यधिशरीरमुक्तं भवति। भवति चात्रास्माकम्—

जगत् स विष्णुर्बहुधा विरच्य
स्वस्मिन् सदा तत् सुतरां दधाति।
न जन्ममृत्यू लभते कदाचित्
स वा जरां नैति सदैकरूपः ॥१३१५॥

❖ ❖ ❖

भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥११७॥

६६७ भूर्भुवःस्वस्तरुः, ६६८ तारः, ६६९ सविता, ६७० प्रपितामहः।
६७१ यज्ञः, ६७२ यज्ञपतिः, ६७३ यज्वा, ६७४ यज्ञाङ्गः, ६७५ यज्ञवाहनः॥

भूर्भुवःस्वस्तरुः—६६७

'भूः भुवः स्वः' इति तिस्रो महाव्याहृतयः। भूरिति भूलोकः, भुवरित्यन्तरिक्षं, स्वरिति द्युलोकः, एते त्रयो लोकाः त्रयः स्कन्धा इव यमाश्रित्य तिष्ठन्ति, स एतेषामाधारो मूलभूतः परमेश्वरस्तरुरिव स्थितो 'भूर्भुवःस्वस्तरुः' इत्यभिधीयते।

भू शब्दो—'भू सत्तायां' धातोः ***"सम्पदादिभ्यः क्विप्"*** (वा० ३।३।९४) वार्तिकेनाधिकरणे 'क्विपि' सिध्यति। भवन्त्यस्यामिति 'भूः'।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भुवः शब्दो—'भू' धातोः ***''भूरञ्जिभ्यां कित्''*** (उ० ४।२१७) इत्युणादिसूत्रेण 'असुन्' प्रत्ययः, स च कित्, कित्त्वाद् गुणाभावः। ***''अचि श्नुधातुभ्रुवां य्वोरियङुवङौ''*** (पा० ६।४।७७) सूत्रेण 'उवङ्' आदेशे सिध्यति।

स्वरिति शब्दः—'स्वृ शब्दोपतापयोः' इति भौवादिकाद्धातोः ***''अन्येभ्योऽपि दृश्यन्ते''*** (पा० ३।२।७५) सूत्रेण 'विच्' प्रत्ययः। छन्दसीति तु नात्रानुवर्तते, गुणे रपरे च सिध्यति। ***''स्वरादिनिपातमव्ययम्''*** (पा० १।१।३६) सूत्रेणाव्ययसंज्ञा। स्वरति=शरणागताय त्वं ममासीति स्वीकारशब्दं ददातीति 'स्वः' सुखरूपश्च।

क्रमशो मन्त्रलिङ्गानि—

भूशब्दस्य—**त्वं त्राता तरणे चेत्यो भूः।** ऋक् ६।१।५।।

भुवश्शब्दस्य—**भुवः सम्राडिन्द्र सत्ययोनिः।** ऋक् ४।१६।२।।

भुवश्चक्षुर्मह ऋतस्य गोपा भुवो वरुणो यदृताय वेषि ।
भुवो अपां नपाज्जातवेदो भुवो दूतो यस्य हव्यं जुजोषः।।
ऋक् १०।८।५।।

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः।
दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ।।
ऋक् १०।८।६।।

स्वश्शब्दस्य—**स्वः स्वाय धायसे।** ऋक् २।५।७।।

यो नः स्वो अरणः। ऋक् ६।७५।१६।।

अव स्वः सखा। ऋक् ८।७०।११।।

तरुरिति—'तॄ प्लवनतरणयोः' भौवादिको धातुः, ततो ***''भृमृशीङ्तॄचरि०''*** (उ० १।७) इत्याद्युणादिना सूत्रेण 'उः' प्रत्ययो, रपरो गुणः। तरन्त्यनेन 'तरुः' तरणसाधनं, यमवलम्ब्य सर्वे लोकास्तरन्तीति भावः। मन्त्रलिङ्गञ्च—

अर्वद्भिरस्तु तरुता। ऋक् १।२७।६।।

यः शूरैः स्वः सनिता यो विप्रैर्वाजं तरुता। ऋक् १।१२९।२।।

लोके चापि पश्यामः—लौकिकोऽयं तरुः स्वावयवभूतस्कन्धशाखादीनामाश्रयस्तथा तरणसाधनञ्च। वृक्षोऽपि तरुनामा एतस्मादेव, यतो हि स जले स्वयं तरति तारयति च तदाश्रितमिति।

तदर्थे मन्त्रलिङ्गञ्च—

रोचसे दिवि रोचसे अन्तरिक्षे पतङ्ग पृथिव्यां रोचते रोचसे अप्स्वन्तः।
उभौ समुद्रौ रुच्या व्यापिथ देवो देवासि महिषः स्वर्जित्।।
ऋक् १३।२।१३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अहोरात्रे परि सूर्य वसाने। अथर्व १३।२।३२।।
दिवाकरोऽति द्युम्नैस्तमांसि विश्वातारीद् दुरितानि शुक्रः।
अथर्व १३।२।३४।।

रोहितः कालो अभवत् रोहितोऽग्रे प्रजापतिः।
रोहितो यज्ञानां मुखं रोहितः स्वराभरत् ।। अथर्व १३।२।३६।।
रोहितो लोको अभवत् रोहितोऽत्यतपद् दिवम्।
रोहितो रश्मिभिर्भूमिं समुद्रमनुसञ्चरत् ।। अथर्व १३।२।४०।।

इति निदर्शनम्। भवति चात्रास्माकम्—

भूर्भुवःस्वस्तरुर्विष्णुः सूर्यो वाग्निः प्रजापतिः ।
स भुवं स समुद्रान्तः स्वर्वा याति स्वरोचिषा।।१३१६।।

तारः—६६८

'तरतेः' णिच् ततः पचादि 'अच्', णिलोपः। तारयतीति 'तारः'। सर्वस्य जगतः तारयिता=अवलम्बो, न तेन विनान्यः कश्चित् जगत्तारयितुं क्षम इत्यर्थः।

मन्त्रलिङ्गञ्च—

त्वं भुवः प्रतिमानं पृथिव्याः। ऋक् १।५२।१३।।
नदीं यन्त्वप्सरसोऽपां तारमवश्वसम्। अथर्व ४।३७।३।।
नमस्ताराय। यजुः १६।४०।।
विश्वा द्वेषांसि तरति स्वयुग्वभिः। ऋक् ६।१११।१।।

इति निदर्शनम्।

लोकेऽपि च पश्यामः—यो हि स्वयं तरति स एवान्यान् तारयति, तारयितुं क्षमो वा भवति। एष तारत्वरूपो गुणो भवगतः सर्वत्र लोके व्याप्तः।

भवति चात्रास्माकम्—

तारो हि विष्णुः स च वास्ति सूर्यो
द्वेषांसि तारो तरते हि शश्वत् ।
द्वेषस्तमोऽतो[१] जगतः स तारो
दीपो यथा हस्तगतोऽस्ति तारः।।१३१७।।

१. द्वेष एव तमः, अस्माच्च तमसस्तारयितेत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सविता—६६६

'षूङ् प्राणिगर्भविमोचने' धातुरादादिकस्तस्मात् 'तृच्' प्रत्ययः कर्तरि, ***''स्वरतिसूति०''*** (पा० ७।२।४४) इत्यादिसूत्रेण पाक्षिक इट्, गुणावादेशौ। सुविभक्तौ अनङ्ङादि। सूते सर्वं जगदिति 'सविता'। सर्वस्योत्पादक इत्यर्थः।

मन्त्रलिङ्गञ्च—

सखाय आ निषीदत सविता स्तोभ्यो नु नः। दाता राधांसि शुम्भति।।

ऋक् १।२२।८।।

हिरण्यपाणिमूतये सवितारमुपह्वये। स चेत्ता देवता पदम्।।

ऋक् १।२२।५।।

बहुत्रायं शब्दो वेदे विभिन्नविभक्त्यन्तः प्रयुक्तः। इति निदर्शनम्।

लोके चापि पश्यामः—सूर्यो हि नियतकालप्राप्तं गर्भमपानवायुं प्रेर्य प्रसावयति, तस्मात् स सवितोच्यते।

भवति चात्रास्माकम्—

विष्णुर्हि लोके सविता प्रसिद्धः
सूर्यः स्वकैर्नामशतैः स एव।
सूर्यः स्वशक्त्या समुदीर्य वायुं
सोऽपानसंज्ञो जगदत्र सूते।।१३१८।।

शरीरे प्राणः, अपानः, उदानः, व्यानः, समान इति प्राणपञ्चकम्। एतस्यैव प्राणपञ्चकस्य—नागकूर्मकृकलदेवदत्तधनञ्जयपञ्चकरूपेण भेद-प्रपञ्चः।

प्रपितामहः—६७०

'पा रक्षणे' धातुरादादिकस्तस्य ***''नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृयातृपितृदुहितृ''*** (उ० २।९५) इत्युणादिसूत्रेण 'तृच्' प्रत्ययः, आत इत्वञ्च निपात्यते। अनिट् चायम्। एवं सिद्धात् 'पितृ'शब्दात् पितुः पितर्यभिधेये ***''पितृव्यमातुलमातामहपितामहाः''*** (पा० ४।२।३५) इति सूत्रेण 'डामहच्' प्रत्ययो निपात्यते, स च तद्धितः। भसंज्ञायां ***''टेः''*** (पा० ६।४।१४३) सूत्रेण टेर्लोपः। ततः प्रपूर्वः, ***''कुगतिप्रादयः''*** (पा० २।२।१८) इति सूत्रेण प्रादिसमासः। प्रकृष्टः पितामहः 'प्रपितामहः' इति। पितामहादीनामपि पिता जनकः सः 'प्रपितामह' उच्यते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

रात्री माता नभः पितार्यमा ते पितामहः ।

सिलाची नाम वा असि देवानामसि स्वसा।। अथर्व ५।५।१।।

प्रकृष्टो विष्णुः 'प्रपितामह' उक्तो भवति।

पिता जनितुरुच्छिष्टोऽसोः पौत्रः पितामहः। अथर्व ११।७।१६।।

लोकेऽपि च पश्यामः—प्रपितामहो हि सर्वस्य कुटुम्बस्य द्रष्टा सत्यपथदर्शिता वा भवति। तथा च—

पश्यन् जन्मानि सूर्यः। अथर्व १३।२।२१।।

भवति चात्रास्माकम्—

विष्णुर्हि लोके प्रपितामहोऽस्ति
पश्यन् स देवो भुवनानि याति।
तमेव सूर्यं प्रणमन्ति सर्वे
मत्वाजरं तं प्रपितामहं वा ।।१३१६।।

यज्ञः—६७१

'यज देवपूजासङ्गतिकरणदानेषु' इति भौवादिको धातुः, ततो ***''यजयाचयतविच्छप्रच्छरक्षो नङ्''*** (पा० ३।३।९०) इति सूत्रेण भावेऽकर्तरि च कारके 'नङ्' प्रत्ययः। अनिट्, श्चुत्वं, नस्य ञः। यजनं 'यज्ञः'। य इज्यते स 'यज्ञः'। यजन्ति यत्रेति 'यज्ञः'। इज्यतेऽनेन वा 'यज्ञः' साधनम्। एवं यथार्थमूह्यम्।

मन्त्रलिङ्गञ्च—

यज्ञो बभूव स आबभूव स प्रजज्ञे स उ वावृधे पुनः।

स देवानामधिपतिर्बभूव सोऽस्मासु द्रविणमादधातु।। अथर्व ७।५।२।।

यज्ञस्य केतुं प्रथमं पुरोहितमग्निम्। ऋक् ५।११।२।।

यज्ञेन वर्धत जातवेदसम्। ऋक् २।२।१।।

यज्ञ इन्द्रमवर्धयत्। ऋक् ८।१४।५।।

इति निदर्शनम्।

सर्वं विश्वं यज्ञात्मकं, सूर्यो विष्णुरग्निर्वा प्रधानदेवताः यज्ञस्य। **''यज्ञो वै विष्णुः''** इति च ब्राह्मणम्।

यज्ञो हि त इन्द्र वर्धनोऽभूत्। ऋक् ३।३२।१२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवतश्चात्रास्माकम्—

सकामभावेन कृतोऽपि यज्ञः
स यज्वनेऽर्थ्यञ्च ददाति नित्यम्।
यदीज्यते विष्णुरकामपूर्वं
स एव यज्ञोऽमितदस्तदा स्यात् ॥१३२०॥

यज्ञेन देवा अयजन्त यज्ञं
शरद्धविस्तत्र वसन्त आज्यम् ।
पुरोहितोऽग्निः स पुनाति नित्यं
यज्ञस्य कर्तारमनिन्द्यमर्यम्[1] ॥१३२१॥

यज्ञपतिः—६७२

'यज्ञ' शब्दो व्युत्पादितः। 'पाते' डतौ टिलोपे च 'पतिः' उक्तः। स्वयं यज्ञरूपो यजनीयो यज्ञसाधनञ्च भगवान् यज्ञं पाति, इत्यतो 'यज्ञपतिः' उक्तो भवति। मन्त्रलिङ्गञ्च—

देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय। यजुः ६।१०॥

मा ते यज्ञपतिर्ह्वार्षीत्। यजुः १।२॥

यज्ञं कर्तुमनसि यज्ञपतौ मनुष्येऽपि भगवान् यज्ञाख्यो विष्णुरेव विशति, ततोऽसौ यियक्षतीति प्रतिपदं पश्यामः।

भवति चात्रास्माकम्—

विष्णुर्हि यज्ञस्य पतिः प्रसिद्धो
[2]मर्त्योऽपि तत्रास्ति च विष्णुरूपः।
समिद्धवींषीह च सर्वमाज्यं
होता च यज्ञस्य पतिः स विष्णुः ॥१३२२॥

यज्वा—६७३

'यजतेः' ''*सुयजोर्ङ्वनिप्*'' (पा० ३।२।१०३) सूत्रेण 'ङ्वनिप्' प्रत्ययः।

---

१. अर्य=स्वामिनम्। **'अर्यः स्वामिवैश्ययोः'** (पा० ३।२।१०३) २. मर्त्यो=होता यजमानादिरूपश्च, तथा वस्तु च यज्ञीयं सर्वं विष्णुरूपमित्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनिडयम्। कित्त्वाभावाद् ***''वचिस्वपियजादीनां किति''*** (पा० ६।१।१५) सूत्रेण सम्प्रसारणं न भवति। सुविभक्तौ नान्तलक्षणो दीर्घः। यद्यप्येषः प्रत्ययो भूते भवति, तथापि भगवतः कालपरिच्छेदराहित्यात् कालसामान्ये भवति। विश्वनिर्माणरूपेण, तदर्थसाधनसम्पादनरूपेण च यज्ञेन इष्टवान्-यजते-यक्ष्यतीति वा स 'यज्वा' विष्णुः।

मन्त्रलिङ्गञ्च—

यज्वेदयज्योर्वि भजाति भोजनम्। ऋक् २।२६।१।।

तथा यज्वेत्यनुवर्तते—

यो अस्मै हव्यैर्घृतवद्भिः.....ब्रह्मणस्पतिः। ऋक् २।२६।४।।

इतिमन्त्रोक्तो 'ब्रह्मणस्पतिः' सूर्यः।

इन्द्रो यज्वने पृणते। ऋक् ६।२८।२।।

लोकेऽपि च विविधं कर्म कुर्वाणः सर्व एव प्राणिवर्गो 'यज्वा'।

भवति चात्रास्माकम्—

सर्वो मनुष्यः स्वयमर्थदासो
यज्वा भवन् कर्मशतं विधत्ते ।
सूर्योऽपि यज्वा बृहतां पतिर्वा
स ब्रह्मणो वा च पतिर्हि यज्वा।।१३२३।।

यज्ञाङ्गः—६७४

'यज्ञ' शब्दो 'यजते'र्नडि प्राग्व्युत्पादितः। 'अङ्ग'शब्दश्च गतिकर्मणोः 'अङ्गतेः' पचाद्यचि व्याकृतः। एवञ्च—इज्यते यः, इज्यते येन, इज्यते यस्मै, इज्यते यत्रेति वा यजनीयो, यजनसाधनं हविरादि, यजनसम्प्रदानमुद्देशो, यजनस्थलादिकञ्च सर्वं 'यज्ञ' शब्देन गृहीतं भवति। अङ्गश्च=गन्ता प्राप्ता वा। तथा च स्वयं यजनीयो यज्ञरूपः सन्, यज्ञरूपाणि हविरादीनि यज्ञस्थलं गत्वा प्राप्नोतीति 'यज्ञाङ्गः'सूर्यो विष्णुर्वा सर्वव्यापकः।

यद्वा—'अङ्ग' इत्यत्र भावे 'घञ्'। एवञ्च यज्ञे अङ्गः-अङ्गनं=गतिर्यस्य स 'यज्ञाङ्गः'। यद्वा—यज्ञैः=र्यजनकर्मभिरङ्गः=प्राप्तिर्यस्य स 'यज्ञाङ्गः' इति। यजनीयः सूर्यो गच्छतीति प्रत्यक्षञ्च।

यद्वा—अङ्गेरिति णिजन्तात् पचादि 'अच्' णेर्लोपे चाङ्ग इति। तथा च—अङ्गयति=प्रापयति हविरादिकं मन्त्रहुतं सूर्यं विष्णुं वा स 'यज्ञाङ्गः'

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निरुक्तो भवति।

लोके चापि पश्यामो—जाठरोऽग्निः सर्वं विकृतमङ्गं रसविशेषेण नीरुजं विधाय तं भक्षितं रसं सर्वत्राङ्गेषु प्रापयति। विष्णोश्च यज्ञाङ्गनामवदन्यान्यपि नामानि भवन्ति।

यथा वेदे यज्ञाङ्गनामार्थपरिपोषकाणि, तथा च—

यज्ञकामः। ऋक् १० ।५१ ।५ ।।

यज्ञनीः। ऋक् १ ।१५ ।१२ ।।

यज्ञप्रियः। ऋक् १० ।१२२ ।६ ।।

यज्ञमन्मा। ऋक् ७ ।६१ ।४ ।।

यज्ञवाहसम्। ऋक् ८ ।१२ ।२० ।।

यज्ञश्रियम्। ऋक् १ ।४ ।७ ।।

यज्ञसाधनः। ऋक् १ ।१४५ ।३ ।।

यज्ञकेतुः। ऋक् ४ ।५१ ।११ ।।

यज्ञपतिः। यजुः १ ।२ ।।

यज्ञबन्धुः। ऋक् ४ ।१ ।६ ।।

यज्ञवनसम्। ऋक् ४ ।१ ।२ ।।

यज्ञवृद्धम्। ऋक् १० ।५ ।३१ ।।

यज्ञसंशितः। अथर्व १० ।५ ।३१ ।।

यज्ञहोतः। ऋक् ८ ।६ ।१७ ।।

इत्यादि निदर्शनम्।

अत्राङ्गतिरेव गतिकर्मा धातुर्गतिभेदेन विष्णुनाम्नां वैविध्यं प्रकटयति गुणभेदतश्च। सङ्गच्छते च पूर्वोक्तं सुवीरेति नाम, शोभना विविधा इरा गतयो यस्येति='सुवीर' इति। सूर्यस्य स्वस्य वक्रादिगतिराहित्येऽपि, सोऽन्येषां ग्रहाणां गतीर्विविधयति।

मन्त्रलिङ्गञ्च—

यज्ञ यज्ञं गच्छ। यजुः ८ ।२२ ।।

यद्वा—यज्ञस्य पूरणानि यानि साधनरूपाण्यङ्गानि होता, अध्वर्युः, ब्रह्मा, आपो, हविश्चेत्यादिरूपस्त्वमेवासि सर्वत्र स्थितः। तथा च भगवद्गीता—

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया।। भग० गी० १८ ।६१ ।।

एवं सर्वत्र लोकेऽनुस्यूतो यज्ञाङ्गनामार्थः। निदर्शनमात्रदर्शनं नः प्रयोजनम्।

भवति चात्रास्माकम्—

विष्णुर्हि यज्ञाङ्ग इहोपदिष्टो
यज्ञो विचित्र[1] कुरुते सचित्रम् ।
यज्ञो हविस्तच्च नयत्यशेषं
यां देवतां प्रत्यभिलक्ष्य[2] तत्स्यात् ।।१३२४ ।।

१. विचित्रचित्ररमणीयं यज्ञमित्यर्थः। २. तत्=हविः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञवाहनः—६७५

'यज्ञ' शब्दो व्युत्पादितचरः। 'वह प्रापणे' भौवादिको धातुः, तस्माद् वहते 'णिच्', ततो ल्युः, योरनः, णिलोपः='यज्ञवाहनः'। यद्वा—***''वाहनमाहितात्''*** (पा० ८।४।८) इति सूत्रे निपातनात् बाहुलकनिमित्तः कर्तरि 'ल्युट्'। वृद्धिश्चापि निपातनसिद्धा। एवञ्च यज्ञं वहति, वाहयति वा 'यज्ञवाहनः'। कर्मषठ्या समासः। तथा च—सूर्य एवाग्निरूपो यज्ञं हविरादिकं वाहयति, वहति वा।

तथा च मन्त्रलिङ्गम्—

अग्निर्यज्ञस्य हव्यवाट्। ऋक् ३।२७।५।।

यज्ञवाहसम्। ऋक् ८।१२।२०।।

लोकेऽपि पश्यामो—युक्तियुक्तोऽग्निः सर्वं वहति तथा चात्र यन्त्राणि प्रमाणम्।

भवति चात्रास्माकम्—

यज्ञवाहन उक्तोऽसौ विष्णुः सूर्यः पुरोहितः।
अग्निर्वा यज्ञकेतुर्वा यज्ञे सर्वं प्रतिष्ठितम्।।१३२५।।

❖ ❖ ❖

यज्ञभृद् यज्ञकृद् यज्ञी यज्ञभुग् यज्ञसाधनः।
यज्ञान्तकृद् यज्ञगुह्यमन्नमन्नाद एव च ।।११८।।

६७६ यज्ञभृत्, ६७७ यज्ञकृत्, ६७८ यज्ञी, ६७९ यज्ञभुक्, ६८० यज्ञसाधनः। ६८१ यज्ञान्तकृत्, ६८२ यज्ञगुह्यम्, ६८३ अन्नम्, ६८४ अन्नादः, एव च।

यज्ञभृत्—६७६

'यज्ञ' शब्दो व्युत्पादितः। भृच्चेति—यज्ञशब्दोपपदाद् 'भृञः' क्विपि, तुकि, गुणाभावे, जश्त्वचर्त्वे च सिध्यति। यज्ञं बिभर्ति=पुष्णाति धारयतीति यज्ञभृदित्यग्नेरपि नाम। एवञ्च विष्णुः सूर्योऽग्निर्वा 'यज्ञभृत्'।

यज्ञे चाग्न्याख्यस्य पुरोहितस्यैव प्राधान्यं, तथा च मन्त्रलिङ्गम्—

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।। ऋक् १।१।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निशब्देनेश्वरस्यापि ग्रहणम्। लोकेऽपि च पश्यामो—न ह्यग्निं विना क्वचिदपि लोके इज्यते, होमरूपो हि एष यज्ञः।

भवति चात्रास्माकम्—

विष्णुर्हि यज्ञभृल्लोके, सोऽग्निर्वा स पुरोहितः।
यज्ञो वै रत्नधा तस्माद्, धीरा यज्ञं वितन्वते ॥१३२६॥

यज्ञकृत्—९७७

'यज्ञ' शब्दो व्युत्पादितः। यज्ञशब्दोपपदात् 'करोतेः' क्विपि, तुकि, यज्ञं करोतीति 'यज्ञकृत्', विष्णुः सूर्योऽग्निर्वा। विष्णुसूर्योऽग्निसाध्यो हि यज्ञ एतद्रूप एव, अतएव च विष्णुः सूर्योऽग्निर्वा 'यज्ञकृत्' उच्यते।

तथा च मन्त्रलिङ्गम्—

ब्रह्म होता ब्रह्म यज्ञः। अथर्व १९।४२।१॥

लोकेऽपि च पश्यामो—यावज्जीवं मनुजः कर्माणि कुरुते, तत्र शुभानि कर्माणि यज्ञस्वरूपाणि, पापानि च कर्माणि यज्ञीयप्रायश्चित्तार्हविकलाङ्गकर्मवत् प्रायश्चित्तार्हाणि भवन्ति। तत्र—

यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम्। अग्निष्टत् स्विष्टकृद्विद्यात् सर्वं स्विष्टं सुहुतं करोतु मेऽग्नये स्विष्टकृते सुहुतहुते सर्वप्रायश्चित्ताहुतीनां कामानां समर्धयित्रे सर्वान्नः कामान्त्समर्धय स्वाहा॥ आश्वला० गृ० १।१०।२२॥

इत्यनेन प्रायश्चित्ताहुतिर्दीयते। मन्त्रलिङ्गञ्च—

यज्ञकृतः सुकृतो येन यन्ति। अथर्व १८।४।७॥

एकस्त्रेधा विहितो जातवेदः। अथर्व १८।४।११॥

त्रिविधो ह्यग्नि—आहवनीयोऽग्निः, गार्हपत्योऽग्निः, दक्षिणाग्निश्चेति। तथा च—

यज्ञ एति विततः कल्पमान ईजानभि लोकं स्वर्गम्।
अथर्व १८।४।१३॥

ईजानम्—यज्ञकर्तारमिति। इति निदर्शनम्।

क्वचिद् विद्वान् पाठोऽपि लभ्यते।

भवति चात्रास्माकम्—

यज्ञकृत् कथितो लोके, विष्णुः सूर्यः पुरोहितः।
जनो वाऽनुकरोत्येनं, स्वर्गं यज्ञकृते ददत् ॥१३२७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञी—६७८

प्राग्व्युत्पादितादकारान्ताद् यज्ञशब्दान्मत्वर्थीय 'इनिः' प्रत्ययः, इन्नन्तलक्षणो दीर्घः। यज्ञोऽस्यास्तीति 'यज्ञी'।

यज्ञपतिरेव 'यज्ञी'। अयञ्च जगद्रूपो यज्ञस्तस्यैव, स एव चैतस्य पतिः=रक्षितेति विष्णुः सूर्यो वा।

भवति चात्रास्माकम्—

यज्ञी हि विष्णुः स सनात् पतिर्हि
यज्ञस्य तस्मिन् वितता हि यज्ञाः।
सूर्यादयो यज्ञविधौ प्रवृत्ता
विना प्रमादं सरथा यजन्ति ।।१३२८।।

यज्ञभुक्—६७९

'यज्ञ' शब्द उक्तः। यज्ञं भुङ्क्ते, भुनक्ति वा स 'यज्ञभुगि'ति। यज्ञोपपदाद् 'भुज पालनाभ्यवहारयोः' इति रौधादिको धातुः, ततः 'क्विप्' गुणाभावः, ***''चोः कुः''*** (पा० ८।२।३०) इति कुत्वम्, पाक्षिकं चर्त्वम्। यज्ञं=हविर्भुङ्क्ते यज्ञरूप कर्म च भुनक्ति=रक्षति। विष्णुः सूर्योऽग्निर्वा 'यज्ञभुग्' उच्यते।

लोकेऽपि च पश्यामः—अग्निरेव स्वसत्तया यज्ञं कर्म रक्षति, यज्ञ हविश्च भुङ्क्ते। तथा च—यावदात्मा शरीरे तावत् स शरीरं रक्षति, भोज्यञ्च भुङ्क्त इति। उक्तञ्च—**'सूर्य आत्मा जगतस्तस्थुषश्च''** ऋक् १।११५।१ इति।

सूर्यः—अग्निः अग्निर्वा सूर्यः। आत्मा—अग्निः अग्निर्वात्मा। इत्येवंविधा योजना सर्वं लोकं व्याप्नोति, विष्णुरतो 'यज्ञभुक्' नामेति।

तदर्थे मन्त्रलिङ्गञ्च—

जुष्टो दमूना अतिथिर्दुरोण इमं ना यज्ञमुपयाहि विद्वान्।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामाभरा भोजनानि।।

ऋक् ५।४।५।।

यत्काम ऋषिर्यस्यां देवतायामार्थ्यपत्यमिच्छन् स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति। निरुक्तम् ७।५।।

स चैक एवाग्निर्बहुधा विशिष्यते। यथा—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समिद्धमग्निं समिधा गिरा गृणे शुचिं पावकं पुरो अध्वरे ध्रुवम्।
विप्रं होतारं पुरुवारमद्रुहं कविं सुम्नैरीमहे जातवेदसम् ।।

ऋक् ६।१५।७।।

त्वां दूतमग्ने अमृतं युगेयुगे हव्यवाहं दधिरे पायुमीड्यम् ।
देवासश्च मर्तासश्च जागृविं विभुं विश्वपतिं नमसा निषेदिरे।।

ऋक् ६।१५।८।।

एवं बहुप्रपञ्चोऽयं यज्ञभुक्शब्दो विश्वं व्यश्नुवानस्य विष्णोर्नाम।
भवति चात्रास्माकम्—

स यज्ञभुग् विष्णुरभीद्धतेजाः
स्तोतारमर्ह्यैश्च युनक्ति भोज्यैः ।
स एव वा पाति च दुर्गतं तं
कविः स होता स शुचिः स वेड्यः।।१३२६।।

यज्ञसाधनः—६८०

'साधन' शब्दो, सौवादिक 'साध संसिद्धौ' धातोः करणे 'ल्युट्', ण्यन्ताद् वा कर्तरि 'ल्युः', अनः, णिलोपे च सिध्यति। यज्ञः साध्यतेऽनेन, यज्ञं साधयतीति वा 'यज्ञसाधनः'। 'यज्ञसाधनः' अग्निः, यज्ञं साधयति=समृद्धं कुरुते कारयति वा। 'यज्ञसाधनो' विष्णुः सूर्यश्च।

मन्त्रलिङ्गञ्च—

तमिद् गच्छन्ति जुह्वस्तमर्वतीर्विश्वान्येकः शृण्वद् वचांसि मे।
पुरुप्रैषस्ततुरिर्यज्ञसाधनोऽच्छिद्रोतिः शिशुरादत्त सं रभः ।।

ऋक् १।१४५।३।।

लोकेऽपि च पश्यामः—स एव भगवान् विष्णुरनुकूलः सन् सर्वाणि साधनान्यनुकूलयति, यथानुकूलः स्वामी सर्वमनुकूलयति।

भवति चात्रास्माकम्—

यज्ञसाधन उद्दिष्टो, लोके विष्णुः सनातनः ।
अग्निर्मुख्यतमस्तेषां, यो [1]विभुर्योऽध्वरे ध्रुवः[2] ।।१३३०।।

इति द्वयोः पदयोर्मन्त्रलिङ्गम्।

---

१. ''जागृविं विभुं विश्पतिम्''। ऋक् ६।१५।८।। २. ''अध्वरे ध्रुवम्''। ऋक् ६।१५।७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञान्तकृत्—९८१

'अन्त' शब्दः—अमेस्तन्युणादिप्रत्यये सिद्धचरः। तदुपपदात् कृञः' 'क्विपि' तुकि च 'यज्ञान्तकृत्' इति। यज्ञस्य अन्तं=समाप्तिं फलं वा करोतीति 'यज्ञान्तकृत्' विष्णुः सूर्यो वा। तथा च विघ्नान् विहत्य यो यज्ञं समापयति, सम्पादितस्य तस्य यज्ञस्य योऽन्तं=फलञ्च ददाति स 'यज्ञान्तकृद्' अभिधीयते।

मन्त्रलिङ्गञ्च—

जुष्टो दमूना अतिथिर्दुरोण इमं नो यामुपयाहि विद्वान् ।
विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि।।

ऋक् ५।४।५।।

लोकेऽपि च पश्यामः—कस्यचित् सखिभावमापन्नः समर्थः सख्युरारब्धं कार्यं स्वसाहाय्येन समापयति=अन्तं गमयति, एवं विष्णुः-अग्नि-सूर्य- आत्मा-मनः-पुण्योदयो वा यज्ञसम्पादने यज्ञफलादाने च हेतवो भवन्ति। दुरितोदयश्च तत्र विघ्नः, तञ्चानुकूलः सर्वथा समर्थो भगवान् परास्यति। एवं सर्वत्र भगवतो व्यापकत्वमुन्नेयम्। भगवति विपरीते महतामपि सर्वारम्भविफलीभावो विनाशश्च। अतएव स 'यज्ञान्तकृद्' इत्युक्तो भवति।

भवति चात्रास्माकम्—

यज्ञान्तकृद् ब्रह्म जगद्दधानं
यज्ञान्तकृद् विष्णुरभिप्रसन्नः ।
तथा च यज्ञान्तकृदस्ति सूर्यः
स विश्वयज्ञं कुरुते समृद्धम्।।१३३१।।

यज्ञगुह्यम्—९८२

गुह्यमिति—'गुहू 'संवरणे' भौवादिको धातुस्ततः ***''एतिस्तुशास्वृदृजुषः क्यप्''*** (पा० ३।१।१०६) सूत्रस्थ ***''शंसिदुहिगुहिभ्यो वेति वक्तव्यम्''*** (वा० ३।१।१०६) इति वार्तिकेन 'क्यप्' प्रत्ययः। गूहितुं=संवरितुं योग्यं 'गुह्यम्'। यद् यज्ञस्य गोपनीयं=रहस्यं तदित्यर्थः। यद्वा—तत्त्वविदमन्तरेण वेत्तुमशक्यमनिर्वचनीयं ब्रह्म। गुह्यम्=रहस्यम्। तथा च यज्ञस्याग्नीषोमीयत्वात यज्ञसाधनेषु विष्णुसूर्ययोरपि गुह्यत्वादर्थाद्रहस्यमयत्वात्तावपि यज्ञगुह्यशब्देनोच्येते।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

समुद्रादूर्मिर्मधुमाँ उदारदुपांशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः।।
वयं नाम प्रब्रवामा घृतस्यास्मिन् यज्ञे धारयामा नमोभिः।
उप ब्रह्मा शृणवच्छस्यमान चतुःशृङ्गोऽवमीद् गौर एतत् ।।

ऋक् ४।५८।१, २।।

पृतस्य=दीप्तस्य सूर्यस्येत्यर्थः। यतो हि घृतं जलवर्गीयमयाग्नेयत्वात् सूर्ययोनिमग्निं प्रदीपयति, अत एवाग्निरूर्ध्वशिखो भवति।

तथा च मन्त्रलिङ्गम्—

घृतैर्बोधयतातिथिम् यजुः ३।१।। **घृतं तीव्रं जुहोतन** यजुः ३।२।। इत्यादि।

यज्ञस्य गुह्यम्—

त्वमर्यमा भवसि यत् कनीनां नाम स्वधावन् गुह्यं विभर्षि।

ऋक् ५।३।२।।

तेन पासि गुह्यं नाम गोनाम्।। ५।३।३।।
स यज्ञेन वनवद् देव मर्तान्।। ऋक् ५।३।५।।

इत्यादौ बहुत्र सूर्यस्य नाम वेदे। तथा च—

ऋषिविप्रः पुरएता जनानामृभुर्धीर उशना काव्येन।
स चिद्....गुह्यं नाम गोनाम्।। ऋक् ६।८७।३।।
महत् तन्नाम गुह्यं पुरुस्पृग् येन भूतं जनयो येन भव्यम् ।
प्रत्नं जातं ज्योतिर्यदस्य प्रियं प्रियाः समविशन्त पञ्च।।

ऋक् १०।५५।२।।

सूर्य एव यज्ञगुह्यम्।

लोकेऽपि च पश्यामः—यज्ञे कुण्डस्थितोऽग्निर्गुह्यः सन् यजमानाय ज्ञानं, धनं, यशः पुत्रपौत्रांश्च ददाति।

भवति चात्रास्माकम्—

यज्ञगुह्योऽयमस्त्यर्कः, सोऽग्निर्विप्रः स वोशनाः ।
स ऋषिः स कविर्द्रष्टा, यज्ञे पञ्च प्रिया जनाः[1] ।।१३३२।।

---

१. ''विश्वेदेवा यजमानश्च सीदत''। यजुः १५।५४ इति च मन्त्रलिङ्गम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अन्नम्—६८३

'अद्' भक्षणे धातुरादादिकः, ततो ***''मतिबुद्धिपूजार्थेभ्यश्च''*** (पा० ३।२।१८८) इति सूत्रपठितचकारस्यानुक्तसमुच्चयार्थत्वात् वर्तमाने कर्तरि च 'क्तः' विहितः। अत्ति=भक्षतीति 'अन्नम्'। न चादो जग्ध्यादेशः ***''अन्नाण्णः''*** (पा० ४।४।८५), यद्वा—***''अदोऽनन्ने''*** (पा० ३।२।६८) इति ज्ञापकात्। अतो ***''रदाभ्यां निष्ठातो नः पूर्वस्य च दः''*** (पा० ८।२।४२) सूत्रेण निष्ठातकारस्य नकारः, पूर्वस्य च दकारस्य नकारः क्रियते।

यद्वा—अद्यः इति 'अन्नं', कर्मणि क्तः, साधनप्रक्रिया समाना। यच्च सस्यसंवर्धनाय क्षेत्रेषु विकीर्यते तदप्यन्नमेव, खादनाम्ना व्यवह्रियते। अतः खादशब्दोऽप्यन्नवचनः।

यद्वा—'अन प्राणने' आदादिको धातुस्ततः ***''कॄवृजॄसिद्रुपन्यनिस्वपिभ्यो नित्''*** (उ० ३।१०) इत्युणादिसूत्रेण 'नः' प्रत्ययः, स च नित्संज्ञकः। ***''नेड्वशि कृति''*** (पा० ७।२।८) इति नेट्। अनितीति 'अन्नम्'। यद्वा—अन्यते=प्राण्यते येन तद् 'अन्नम्'।

मन्त्रलिङ्गञ्च—

ज्योतीरथं शुक्रवर्णं तमोहनम्। ऋक् १।१४०।१।।

ज्योतीरथोऽग्निः सूर्यो वा।

अभि द्विजन्मा त्रिवृदन्नमृज्यते संवत्सरे वावृधे जग्धमी पुनः।

ऋक् १।१४०।२।।

हविः=अन्नम्। तथा च—

अच्छेन्द्राब्रह्मणस्पती हविर्नोऽन्नं युजेव वाजिना जिगातम्।

ऋक् २।२४।१२।।

घृतम्=अन्नम्। तथा च—

अस्मिन् पदे परमे तस्थिवांसमध्वस्मभिर्विश्वहा दीदिवांसम्।
अपो नप्त्रे घृतमन्नं वहन्तीः स्वयमत्कैः परि दीयन्ती यह्वीः।।

ऋक् २।३५।१४।।

इति निदर्शनम्। बहुत्रायमन्नशब्दो वेदे विविधविभक्तिवचनान्तः।

लोकेऽपि च पश्यामः—सर्वे जन्तवः भुक्त्वाग्निं तर्पयन्ति, तच्च भुक्तमन्नं सर्वत्र शरीरे व्याप्तं भवति। देहे चात्मा सूर्यस्थानीयो यावज्जीवमश्नाति, तस्मादन्नम्। यथा चात्मा तथा सूर्योऽपि कालेन सर्वं शोषयति, तदेव चादनं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्य, तस्मात् सूर्यो विष्णुर्वान्नमिति। अतएव च ग्रहाणां समिधः, सामग्री, मन्त्राश्च पृथक् पृथक् सन्ति, तेषां युक्ततोपपद्यते।

भवति चात्रास्माकम्—

अन्नं हि सर्वत्र जगत्प्रसृप्तं
तस्मिन् स्थितं विश्वमिदं समस्तम्।
अन्नं हि विष्णुः प्रपुनाति भोक्तॄन्
निगूढमन्नेषु यतः स्वयं सः ॥१३३३॥

अन्नादः—९८४

'अन्न' शब्दो व्युत्पादितः। तदुपपदाद् भक्षणार्थाद् अदेः ***"कर्मण्यण्"*** (पा० ३।२।१) इति सूत्रेण 'अण्' प्रत्ययः, उपधावृद्धिः, सवर्णदीर्घश्च। अन्नमत्तीति 'अन्नादः'। स्वयमन्नं स्वयञ्चान्नादः, स्वस्वरूपभूतमिदमन्नरूपं जगदन्नादरूपेण स्वान्तः समावेशयतीति भावः।

तथा च मन्त्रलिङ्गम्—

यो अन्नादो अन्नपतिर्बभूव ब्रह्मणस्पतिरुत यः।
भूतो भविष्यत् भुवनस्य यस्पतिः॥
तस्य देवस्य क्रुद्धस्यैतदागो य एवं विद्वांसं ब्राह्मणं जिनाति।
उद्वेपय रोहित प्र क्षिणीहि ब्रह्मज्यस्य प्रति मुञ्च पाशान् ॥
अथर्व १३।३।७॥

अन्नादम्। यजुः ३।५॥ **अन्नादाय।** अथर्व १६।५५।५॥
अन्नादेन। अथर्व १५।१४।२॥

अन्नसम्बद्धा अन्येऽपि शब्दा वेदे सन्ति। यथा—

अन्नकामाय। ऋक् १०।११७।३॥
अन्नतेजाः। अथर्व १०।५।३४॥
अन्नपतये। अथर्व १६।५५।५॥
अन्नभागः। अथर्व ३।३०।६॥
अन्नवृधम्। ऋक् १०।१।४॥

समस्ता अन्नपूर्वपदाः शब्दाः अन्नादशब्दस्यार्थं विशदयन्ति।

लोकेऽपि च—अन्नादो बालः, अन्नकामो भ्रमति बुभुक्षितः, इत्यादि रूपेणास्य भगवतो नामार्थस्य भूयसी व्यापकता दृश्यते। यद्वा—हविः=अन्नं, तद् भुङ्क्तेऽन्नादो विष्णुरग्निः सूर्यो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवतश्चात्रास्माकम्—

अन्नं हि जीवनं लोके, यद्यद् यस्यास्ति तस्य तत्।
तस्मादन्नाद आत्मायं, सूर्यो वाग्निस्तु यज्ञियः ।।१३३४।।
अन्नकामोऽन्नतेजा वा, यान्नभागस्य च स्पृहा ।
अन्नादोऽन्नपतिर्भूत्वा, सोऽन्नार्थं कुरुते क्रियाः ।।१३३५।।

विष्णुसहस्रनाम-संग्रहे (१०८) श्लोकोक्त 'एव' शब्दो समस्तानां नाम्नां विष्णुर्वाच्यार्थ इति। तथा 'च' शब्दश्च, अनुक्तानां विशेषणानामपि विष्णौ सूर्ये वा समन्वय इति द्योतयति। बहुत्र यथास्थानमुक्तम्।

तथा च यथा-'ज्योतीरथः', 'तमोहा', 'हिरण्यवर्णः', 'हिरण्यपाणिः' इत्यादीनि सूर्यनामानि। एवमनन्तस्य विष्णोरनन्तानि नामानि गुणानुसारीणि। अयमेव समस्तशास्त्रेषु नियमो। यथा—*''बहुलं छन्दसि''* बहुलमेतन्निदर्शनम्। *''पृषोदरादीनि यथोपदिष्टम्''* इत्यादि व्याकरणे। *'निघण्टवो बहुलम्'* इत्यादि च निरुक्ते।

❖❖❖

आत्मयोनिः स्वयञ्जातो वैखानः सामगायनः।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ।।११६।।

६८५ आत्मयोनिः, ६८६ स्वयञ्जातः, ६८७ वैखानः, ६८८ सामगायनः। ६८९ देवकीनन्दनः, ६९० स्रष्टा, ६९१ क्षितीशः, ६९२ पापनाशनः।।

आत्मयोनिः—६८५

'आत्म' शब्दो व्युत्पादितः। 'योनिः' इति, यौतेः *''बहिश्रिश्रुयुद्रुग्लांहात्वरिभ्यो नित्''* (उ० ४।५१) इत्युणादिना 'निः' प्रत्ययो, निच्च सः। *''नेड् वशि कृति''* (पा० ७।२।८) इति सूत्रेणेटो निषेधः। आत्मशब्दः स्वरूपवचनः। एवञ्च-आत्मा स्वयमेव स्वस्य योनिः=कारणमित्यर्थः। स्वयंसिद्धस्वरूप इति भावः।

मन्त्रलिङ्गञ्च—

आत्मा ते वातो रज नवीनोत् पशुर्न भूर्णिर्यवसे ससवान्।
अन्तर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि।।

ऋक् ७।८७।२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकेऽपि च पश्यामः—साधुपुरुषा आत्मजातप्रेरणा लोकहिताय सर्वदा प्रयत्नशीला दृश्यन्ते। आत्मशब्दो वातशब्दश्च गत्यर्थप्रधानौ, गतिरेव च सर्वस्य मूलम्। तथा च—

आत्मा देवानां भुवनस्य गर्भो यथावशं चरति देव एषः ।
घोषा इदस्य शृण्विरे न रूपं तस्मै वाताय हविषा विधेम।।

ऋक् १० ।१६८ ।४ ।।

वातस्य नु महिमानं रथस्य ..... दिविस्पृग् यात्यरुणानि कृण्वन्।

ऋक् १० ।१६८ ।१ ।।

भवति चात्रास्माकम्—

आत्मयोनिः स्वयं सूर्यो, विष्णुर्वातः स्वयम्प्रभुः ।
स्वयं यौति स्वधामानि[1], राजा[2] विश्वस्य चर्षणिः ।।१३३६ ।।

स्वयंजातः—६८६

'स्वयम्'—इति स्वरादित्वादव्ययम्।

'जात'—इति जनी प्रादुर्भावे दैवादिको धातुरीदित्, तस्मादकर्मकात् कर्तरि 'क्तः'। ***''श्वीदितो निष्ठायाम्''*** (पा० ७ ।२ ।१४) सूत्रेण इटो निषेधः। ***''जनसनखनां सञ्झलोः''*** (पा० ६ ।४ ।४२) सूत्रेण जनो नकारस्यात्वम्, ***''अलोऽन्त्यस्य''*** (पा० १ ।१ ।५२) सूत्रेणान्त्यस्य। ***''अकः सवर्णे दीर्घः''।*** (पा० ६ ।१ ।१०१) सूत्रेण सवर्णदीर्घः। स्वयं जायतेऽजनिष्टेति वा 'स्वयंजात': स्वज इत्यर्थः।

लोकेऽपि च पश्यामः—सूर्यो देवः सविता ज्योतीरथो भुवनानि पश्यन् स्वयं प्रादुर्भवति, जनदृष्टिगोचरमायातीति भावः।

मन्त्रलिङ्गञ्च—

उदीची दिक् सोमोऽधिपतिः स्वजो रक्षिताशनिरिषवः।

अथर्व ३ ।२७ ।४ ।।

स्वजम्। अ० १० ।४ ।१७ ।। **स्वजस्य।** अथर्व० १० ।४ ।१० ।।

स्वजाय। अ० ६ ।५६ ।२ ।।

तथा च मन्त्रलिङ्गम्—

१. **''ताभिः सयुक् सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य राजा''।** ऋक् १० ।१६८ ।२।

२. **''विश्वा ते धाम वरुण प्रियाणि।''** ऋक् ७ ।८७ ।२।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकेऽपि च पश्यामः—स्वयंजातः परान् जनयति। तथा च यथा—सर्वतः प्रथमं सदसि सदस्यानां नामान्यङ्क्यन्ते, ते पुनः स्वेष्टानि कर्माणि कुर्वते, इति भगवतोऽनुकरणमात्रम्। अयञ्च गुणः स्वयंजातस्य विष्णोरेव सर्वत्र व्याप्तः।

भवति चात्रास्माकम्—

स्वयंजातः, स्वयं सूर्यो, विष्णुर्ब्रह्म पुरोहितः।
स यज्ञः सर्वभूतानि, जज्ञे स्वाभीद्धतेजसा[1] ।।१३३७।।

ऋतस्य तन्तुर्विततः पवित्रः। ऋक् ६।७३।६।।

विद्वान्त्स विश्वा भुवनानि पश्यति। ऋक् ६।७३।८।

†दिवो यः स्कम्भो धरुणः स्वातत आपूर्णो अंशुः पर्येति विश्वतः।।
ऋक् ६।७४।२।।

स्वयमाततः=स्वाततः।

‡तस्माद्यज्ञात् सर्वहुत ऋचः सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्मात् यजुस्तस्मादजायतः।। यजुः ३।१७।।

वैखानः—६८७

'वि' उपसर्गः, 'खनु अवदारणे' धातुः, ततः ***''खनो घ च''*** (पा० ३।३।१२५) इति सूत्रेण चकाराद् भावे 'घञ्'। विखननं 'विखानः' वृद्धिः।

यद्वा—विशिष्टः खानो यस्य स 'विखानः'। विखान एव वैखानः, स्वार्थे 'अण्'। तस्य च विशिष्टः, खानो यथा समुद्रस्य। नहीदृक्खननं केनचित् तदन्येन कर्तुं शक्यम्। तदनुकरणभूताश्चापरे कूपतडागादिखाताः।

यद्वा—विखानं करोत्याचटे वेत्यर्थे, ***''तत्करोति तदाचष्टे''*** इति चुरादिगणसूत्रेण 'णिच्'। णाविष्ठवद्भावाट्टेर्लोपः, ततश्च पचादि 'अच्', तस्मिन् णेर्लोपः। विखानयतीति विखानः, विखान एव 'वैखानः' स्वार्थे अण्'। एवञ्च यथा स्वयं विशिष्टं खनति तथा स्वशक्तिं प्रदायान्यैरपि विशिष्टं खानयतीति 'वैखानः' उक्तो भवति।

लोकेऽपि चाग्नेयविस्फोटकृतः पृथिवीखातरूपो विशिष्टः खानो दृश्यते। तथा च मन्त्रलिङ्गम्—

खे रथस्य खेऽनसः खे युगस्य शतक्रतो।
अपालामिन्द्र त्रिष्पूव्यत्कृणोः सूर्यत्वचम् ।। ऋक् ८।९१।७।।

१. **''ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।''** ऋक् १०।१९०।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

या आपो दिव्या उत वा सुवन्ति खनित्रिमा उत वा या स्वयंजाः।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु ।।
ऋक् ७।४६।२।।

भवति चात्रास्माकम्—

वैखानः कुरुते खानं, सामुद्रं रत्नधातमम् ।
तत्र यान्ति नदाः सर्वे, दुष्पूरश्च तथापि सः।।१३३८।।

सामगायनः—६८८

'साम' शब्दः 'षो अन्तःकर्मणि' दैवादिकाद्धातोः ***''सातिभ्यां मनिन्मनिणौ''*** (उ० ४।१५३) इत्युणादिसूत्रेण 'मनिन्' प्रत्ययः, स्यतीति—'साम'। अयञ्च शब्दः सामाख्यासु गीतिषु रुढः। तद् गायन्तीति सामगाः। 'साम' कर्मोपपदाद् 'गै' धातोः ***''गापोष्टक्''*** (पा० ३।२।८) सूत्रेण 'टक्' प्रत्ययः, ***''आदेच उपदेशेऽशिति''*** (पा० ६।१।४४) सूत्रेण एच आत्वम्। तथा—***''आतो लोप इटि च''*** (पा० ६।४।६४) इत्याल्लोपः। सामगानामयनम्=आश्रयः परमो लक्ष्य इत्यर्थः।

यद्वा—'साम'पूर्वक 'गै' धातोः ***''ण्युट् च''*** (पा० ३।१।१४७) इति सूत्रेण 'ण्युट्' प्रत्ययः, एच आत्वं, योरनः। ***''आतो युक्चिण्कृतोः''*** (पा० ७।३।३६) सूत्रेण धातोर्युगागमः। साम गायतीति सामगायन इति। सामगायनानामयनं=आश्रय इति सामगायनायन इति वक्तव्ये 'सामगायनः' इत्युच्यते।

मन्त्रलिङ्गञ्च तदर्थे—

प्रदक्षिणिदभि गृणन्ति कारवो वयो वदन्त ऋतुथा शकुन्तयः।
उभे वाचौ वदति सामगा इव गायत्रञ्च त्रैष्टुभं चानुराजति ।।
ऋक् २।४३।१।।

उद्गातेव शकुने साम गायसि।। ऋक् २।४३।२।।
प्र वो महे महि नमो भरध्वमाङ् गूष्यं शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चन्तो अङ्गिरसो गा अविन्दन्।।
ऋक् १।६२।२।।

अशीतिभिस्तिसृभिः सामगेभिरादित्येभिर्वसुभिरङ्गिरोभिः।
इष्टापूर्तमवतु नः पितृणामामुं ददे हरसा दैव्येन ।।
अथर्व २।१२।४।।

गायन्ति त्वा गायत्रिणः।। ऋक् १।१०।१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति निदर्शनम्।

सामेति नामव्याख्याप्रसङ्गे विशदमुक्तमस्माभिस्तत्र द्रष्टव्यम्।

लोकेऽपि च पश्यामः—सामगायनं विष्णुमेव स्तोतुं साम्न उपवेदो गान्धर्ववेदः प्रवृत्तः। तत्र च शब्दस्य विविधा गतयो रागस्य भिन्नत्वं सम्पादयन्ति। एवञ्च सामगायनाभिधो विष्णुर्मातुर्हृदयं व्याप्नोति। यच्च स ध्यायन् गायति तत्तस्य विष्णुवत् स्तुत्यं प्रसाद्यं चिन्त्यञ्च भवति।

भवति चात्रास्माकम्—

सामगायन उक्तोऽसौ, सर्ववागीश्वरेश्वरः।
स एव वेत्ति गीतानां, गतीर्वा सर्वभावतः।।१३३६।।

तथा च यथा—

सप्तस्वरास्त्रयो ग्रामा, मूर्च्छनास्त्वेकविंशतिः।
ताना एकोनपञ्चाशदित्येतत् स्वरमण्डलम् ।।

इति सामवेदीय नारदीयशिक्षा (१।२।४)। सर्वा वाङ्नैतदतिक्रामति।

देवकीनन्दनः—६८६

'दिवु' धातुर्दैवादिकः क्रीडादौ, ततौ ***"ण्वुल तृचौ"*** (पा० ३।१।१३३) सूत्रेण 'ण्वुल्' प्रत्ययः। ***"पुगन्तलघूपधस्य च"*** (पा० ७।३।८६) सूत्रेण गुणः, ***"युवोरनाकौ"*** (पा० ७।१।१) सूत्रेण वु इत्यस्य स्थाने अकादेशः। दीव्यतीति 'देवकः'। देव एव देवको वा स्वार्थिक 'क' प्रत्ययान्तः। देवकः=सूर्यः, तत्सन्नियोगेन देवकी=उषाः। तत्र ***"पुंयोगादाख्यायाम्"*** (पा० ४।१।४८) सूत्रेण 'ङीष्'। एवञ्च देवकी=उषाः, तस्या नन्दन आत्मज इव नन्दयिता 'देवकीनन्दनः'=सूर्यः।

तत्र मन्त्रलिङ्गञ्च—

देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे। यजुः १।१।।

यद्वा—**देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय।** यजुः ६।१।।

उषोनन्दन एव देवकीनन्दनः। स एव स्वैर्गुणैः सर्वं विश्वं व्याप्नोति। सर्वञ्चैतद् विश्वं व्याप्नुवन् देवकीनन्दनो विष्णुः। नन्दयतीति नन्दन इति नन्दनशब्दव्युत्पत्तिर्बहुत्रोक्ता। मन्त्रलिङ्गञ्च—

गृणानो अङ्गिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरन्धः।
विभूम्या अप्रथय इन्द्र सानु दिवो रज उपरमस्तभाय।।

ऋक् १।६२।५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भगो न मेने परमे व्योमन्नधारयद् रोदसी सुदंसाः।।

ऋक् १।६२।७।।

पत्नीवत्—**पुरुसहस्रा जनयो न पत्नीर्दुवस्यन्ति स्वसारो अह्रयाणम्।।**

ऋक् १।६२।१०।।

जनयो=जामयः। तत्रैव पुनः—

सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दद्रुः ।
पतिं न पत्नीरुशतीरुशन्तं स्पृशन्ति त्वा शवसावन् मनीषाः।।

ऋक् १।६२।११।।

आर्की सूर्यस्य रोचनात् विश्वान् देवान् उषर्बुधः।
विप्रो होतेह वक्षति।। ऋक् १।१४।६।।
शुचि न याममन्निषिरं स्वर्दृशं केतुं दिवो रोचनस्थामुषर्बुधम् ।
अग्निं मूर्धानं दिवो अप्रतिष्कुतं तमीमहे नमसा वाजिनं बृहत्।।

ऋक् ३।२।१४।।

उषर्बुधे.....स्तोमो भवत्वग्नये।। ऋक् १।१२७।१०।।

एवं प्राग्वंशवर्धननामव्याख्याने पूर्वदिशः सूर्येण सम्बन्धो विस्तरेण प्रतिपादितः।

नन्दनः=समर्धनः।

ऋचा स्तोमं समर्धय। यजुः ११।८।। इत्यपि लिङ्गं भवति।

भवतश्चात्रास्माकम्—

"देवकीनन्दनः सूर्यः, उषा देवी यतः स्मृता ।
देवसूर्यस्य संयोगात्, देवकी कथिताप्युषाः ।।१३४०।।

सूर्यो=विष्णुः, विष्णु—र्वा सूर्य इति बहुत्र संगमितम्।

उषर्बुधः स सूर्योऽस्ति, स्वसुर्जारः स वा स्मृतः।
[1]तावत् तमो न वा यावद्, दृश्यते देवकीसुतः ।।१३४१।।

व्यस्तभ्नाद् रोदसी मित्रो अद्रुतोऽन्तर्वावदकृणोज्ज्योतिषा तमः।
वि वैश्वानरो विश्वमधत्त वृष्ण्यम्।। ऋक् ६।८।३।।
अहश्च कृष्णमहरर्जुनञ्च विवर्तेते रजसी वेद्याभिः ।
वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमाँसि।।

ऋक् ६।६।१।।

१. **स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत ।**
व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत्। (ऋक् ६।८।२)

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अग्निरग्र उषसामशोचि। ऋक् ७।८।१।।

उषो यदग्निं समिधे चकर्थ। ऋक् १।११३।६।।

उषा अप स्वसुस्तमः। ऋक् १०।१७२।४।।

उषो न जारः पृथुपाजः। ऋक् ७।१०।१।।

उष आभाहि भानुना। ऋक् १।४८।६।।

उषो देव्यमर्त्या विभाहि। ऋक् ३।६१।२।।

इत्यादीनि मन्त्रलिङ्गानि निदर्शनार्थानि।

तथा च—

सूर्यो देवीमुषसं रोचमानां मर्यो न योषामभ्येति पश्चात्।
यत्रा नरो देवयन्तो युगानि वितन्वते प्रतिभद्राय भद्रम् ।।

ऋक् १।११५।२।।

स्रष्टा—६६०

"सृज विसर्गे" तौदादिको धातुः ततः 'तृच्' कर्तरि, अनिट्। ***"सृजिदृशोर्झल्यमकिति"*** (पा० ६।१।५७) सूत्रेणामागमः, सः च मित्त्वादन्त्यादचः परः। 'सृ-अ-ज्-तृ' इति स्थितौ यणादेशः, ऋकारस्य रेफः। ***"व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः"*** (पा० ८।२।३६) सूत्रेण जस्य षः, ष्टुत्वम्। ततः सावनङ्‌ङादि। ***"अप्तृन्तृच्स्वसृ०"*** (पा० ६।४।११) सूत्रेण दीर्घो, नलोपः। सृजतीति 'स्रष्टा' विष्णुः।

मन्त्रलिङ्गञ्च—

इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न।
योऽस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद।।

ऋक् १८।१२७।७।।

अयमुष्यः सुमहाँ अवेदि होता, मन्द्रो मनुषो यह्वो अग्निः।
वि भा चकः ससृजान पृथिव्या कृष्णपविरोषधीभिर्ववक्षे ।।

ऋक् ७।८।२।।

लोकेऽपि च पश्यामः—इह शरीरे यावदात्मनः स्थितिस्तावत् स मनुष्यः स्रष्टृरूपः कर्माणि करोति, सृज्यानि च सृजति। कर्मणां करणे सर्जने वा प्रधानं कारणं सूर्य एव।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च, यथा—

त्वया हि नः पितरः सोम पूर्वे कर्माणि चक्रुः पवमान धीराः।
वन्वन्नवातः परिधीरपोर्णु वीरेभिरश्वैर्मघवा भवा नः ।।

ऋक् ६।६६।११।।

एवं स्रष्टुर्भगवतो गुणः सर्जनरूपो विश्वं व्यश्नुवानस्तं भगवन्तमाचष्टे।

भवति चात्रास्माकम्—

स्रष्टा स विष्णुः किमु वास्ति सूर्यो
यतः स एवास्ति गतेर्विधाता।
मर्त्यो [1]मनःशुक्रसमानबन्धुः
सृज्यानि नित्यं सृजते यथौजः।।१३४२।।

क्षितीशः—६६१

क्षितिः—'क्षि निवासगत्योः' तौदादिको धातुः, ततोऽधिकरणे ***''स्त्रियां क्तिन्''*** (पा० ३।३।९४) सूत्रेण 'क्तिन्' प्रत्ययः। क्तिनः कित्त्वाद् गुणाभावः, अनिट्। क्षियन्ति=निवसन्ति गच्छन्ति वा नाशं भूतानि यस्यां सा 'क्षितिः'=भूः तस्या ईशः= 'क्षितीशः'। ईश इति—'ईश ऐश्वर्ये' धातुरादादिकः, ततः ***''इगुपधज्ञाप्रीकिरः कः''*** (पा० ३।१।१३५) इति सूत्रेण 'कः' प्रत्ययः। इष्टे इति ईशः।

मन्त्रलिङ्गञ्च—

तमीशानं जगतस्तस्थुषस्पतिम्। यजुः २५।१८।।
स इत् स्ववपा भुवनेष्वास य इमे द्यावापृथिवी जजान।

ऋक् ४।५६।३।।

ईशान इमा भुवनानि वीयसे। ऋक् ६।८६।३७।।
यस्मिन् विश्वानि भुवनानि। ऋक् ७।१०१।४।।

इति निदर्शनम्।

लोकेऽपि च पश्यामः—सर्वो मनुष्यः सर्वस्या भूमेरीशत्वमभिलषति, भवति च क्षितेरेकभागस्येशः। सोऽयं क्षितीशस्य भगवतोऽनुकरणमात्रम्। सर्वत्र चायं व्याप्तो गुणः। तेन विष्णुः 'क्षितीशः'।

१. मनःशुक्रौ=चन्द्रशुक्रौ, सूर्यसमानवर्गराशिगौ चेत्। मनः=चन्द्रः। सूर्यः=आत्मा। समानबन्धुः=समानबन्धनः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवति चात्रास्माकम्—

विष्णुः क्षितीशः स हि वास्ति सूर्यः
तस्मिन् स्थितं विश्वमिदं विभाति।
क्षितिर्निवासादुत वा विनाशात्
क्षितौ च ना कर्मशतं करोति ॥१३४३॥

पापनाशनः—६६२

'पाप' शब्दः—*"पानिविषिभ्यः पः"* (उ० ३।२३) इत्युणादिसूत्रेण 'पा' रक्षणे धातोरादादिकात् 'प' प्रत्यये सिध्यति। पात्यस्मादात्मानमिति 'पापः' तद्योगात् जन्तुरपि पापः। नाशन इति—प्राक्प्रदर्शितसिद्धिः। नाशयतीति नाशनः, पापस्य नाशनः 'पापनाशनः' इति। भयं वा पापम्, पापस्य नाशने केवलो विष्णुरेव समर्थः, इति स एव 'पापनाशनः' इत्युच्यते।

मन्त्रलिङ्गञ्च—

विश्वानि देव सवितर्दुरितानि परासुव। यजुः ३०।३॥
यत इन्द्र भयामहे ततो नो अभयं कुरु। ऋक् ८।६१।१३॥
रक्षोहो विश्वचर्षणिः। ऋक् ६।१।२॥
रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः।
प्रतिष्फुर वि रुज विड्वंहो जहि रक्षो महि चिद् वावृधानम्॥
ऋक् ४।३।१४॥

लोकेऽपि पश्यामः—सर्व एव निर्बलः प्राणी पापनाशनं=दुःखनाशनं रक्षोहणं वा बलवन्तमाश्रयति। तस्मात् सर्वदुःख-निवारणक्षमो विष्णुः सूर्यश्च 'पापनाशन' इति।

भवति चात्रास्माकम्—

पापनाशन उक्तोऽसौ, विष्णुः सूर्यः सनातनः।
[१]तमाह्वयन्ति वा मन्त्रैः, स नो पायान्महेश्वरः॥१३४४॥
प्र नूनं ब्रह्मणस्पतिर्मन्त्रं वदत्युक्थ्यम्।
यस्मिन्निन्द्रो वरुणो मित्रो अर्यमा देवा ओकांसि चक्रिरे।
ऋक् १।४०।५॥

१. **"तस्मा इडां सुवीरामायजामहे सुप्रतूर्त्तिमनेहसम्।"** ऋक् १।४०।४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स नो हिरण्यजाः शंखः कृशनः पात्वंहसः। अथर्व ४।१०।१।।

शंखः=सूर्यः।

ऊर्ध्वो नः पाह्यंहसः। ऋक् १।३६।१४।।

पाहि नो अग्ने रक्षसः पाहि धूर्तेरराव्णः ।
पाहिरीषत उत त्रा जिघांसतो बृहद्भानो यविष्ठ्य।

ऋक् १।३६।१५।।

❖ ❖ ❖

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ।।
सर्वप्रहरणायुधः ॐ नमः ।।१२०।।

६६३ शङ्खभृत्, ६६४ नन्दकी, ६६५ चक्री, ६६६ शार्ङ्गधन्वा, ६६७ गदाधरः। ६६८ रथाङ्गपाणिः, ६६६ अक्षोभ्यः, १००० सर्वप्रहरणायुधः।। सर्वप्रहरणायुधः ॐ नमः।।

शङ्खभृत्—६६३

'शमु उपशमे' दैवादिको धातुः, ततः ***"शमेः खः"*** (उ० १।१०२) इत्युणादिसूत्रेण 'खः' प्रत्ययः। खस्य च नेत्त्वं विधानसामर्थ्याद् बाहुलकाद् वा—'शङ्खः' इति। तं बिभर्तीति 'शंखभृत्'। शङ्खोपपदात्, 'डुभृञ् धारणपोषणयोः' इति जौहोत्यादिकाद्धातोः 'क्विपि' तुकि च 'शङ्खभृत्' इति। शङ्खः सूर्यस्तं स्वतेजोदानेन पुष्णातीति 'शङ्खभृद्' विष्णुः।

मन्त्रलिङ्गञ्च—

वाताज्जातो अन्तरिक्षात् विद्युतो ज्योतिषस्परि।
स नो हिरण्यजाः शङ्खः कृशनः पात्वंहसः।।
यो अग्रतो रोचनानां समुद्रादधि जज्ञिषे।
शङ्खेन हत्वा रक्षांस्यत्रिणो वि षहामहे।।
शङ्खेनामीवाममतिं शङ्खेनोत सदान्वाः ।
शङ्खो नो विश्वभेषजः कृशनः पात्वंहसः।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स नो हिरण्यजाः शङ्खः आयुष्प्रतरणो मणिः।

अथर्व ४।१०।१-४।।

लोकेऽपि च पश्यामः—यथा सूर्यः समुद्राज्जायते, तथाऽयमपि लौकिकः शङ्खः समुद्राज्जायते। तथा चैतदर्थप्रतिपादको मन्त्रः—

यो अग्रतो रोचनानां समुद्रादधि जज्ञिषे। अथर्व ४।१०।१।।

तथा च—

यतः सूर्य उदेत्यस्तं यत्र च गच्छति।
तदेव मन्येऽहं ज्येष्ठं तदु नात्येति किञ्चन।। अथर्व १०।८।१६।।

इति वेदमन्त्रानुसारं सूर्यो विष्णुना धार्यते। तथा लौकिकं शङ्खं कश्चिद् धृत्वा धमति, ततौऽसौ शब्दायते। अतः स शङ्खस्य धर्ताऽपि=ध्माताऽपि 'शङ्खभृद्' उच्यते।

तथा च—

शङ्खध्मम्। इति यजुः ३०।१६।।

तथा च—

द्यौः शान्तिरन्तरिक्षं शान्तिः। (यजुः ३६।१७) इत्यादि यजुः।

शब्दो ह्याकाशस्य गुणः। शङ्खप्रतिकृतय एव व्योममध्यगाः वाद्ययन्त्रविशेषा मनुष्यैः कल्पिताः।

भवति चात्रास्माकम्—

शंखोऽस्ति सूर्यास्तमु यो बिभर्ति
स शंखभृन्नामधरोऽस्ति विष्णुः।
लोक्योऽपि[1] शंखः सबलं प्रणुन्नो
रवेण विश्वस्य विषं निहन्ति।।१३४५।।

नन्दकी—६६४

'टु नदि समृद्धौ' भौवादिको धातुः, तस्य इदित्त्वान्नुम्, नुमश्चानुस्वारः। ***''आशिषि च''*** (पा० ३।१।१५०। सूत्रेणाशीर्विशिष्टमाशंसनार्हं प्रियं वस्तु नित्यमस्यास्तीति 'नन्दकी'। नित्ययोगे मत्वर्थीय इनिः, सौ इन्नन्तलक्षणो दीर्घः। 'नन्दकी' विष्णुः सूर्यो वा, यतो ह्येतौ स्वोपासकानानन्दयुतान् नित्यमाशासाते। यद्वा—नन्दको विष्णुस्तेन नित्ययोगात् 'नन्दकी' सूर्यः।

१. लोक्यः— लोके भवो दृश्यो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रलिङ्गञ्च—

त्रिर्नान्द्यं वहतमश्विना युवम्। ऋक् १।३४।४।।

त्रित्वमधिकृत्य द्वादशर्चं सूक्तमेतत्।

उपस्थायं चरति यत् समारत सद्यो जातस्तत्सार युज्येभिः।
अभि श्वान्तं मृशते नान्द्ये मुदे यदीं गच्छन्त्युशतीरपिष्ठितम्।।

ऋक् १।१४५।५।।

लोकेऽपि च पश्यामः—यतोऽयं सूर्यो विष्णुर्वा नन्दकी, तत एव तस्यानन्दनरूपो गुणो लोके सर्वत्र व्याप्तः। सर्व एव स्वतः कनिष्ठं पुत्रशिष्यादिकं वाशिषा युनक्ति—"चिरं जीव, सानन्दो भव" इति। "आनन्द रहो" इति च हिन्दीभाषा आशीर्वचनस्य। सूर्यविष्णुशब्दौ परस्परं पर्यायवचनौ। तथा च—**"इन्द्रो विष्णुं जजान", "स जजान विष्णुम्"** इत्यपि लिङ्गं भवति।

भवति चत्रास्माकम्—

स नन्दको विष्णुरिहास्ति गीतः
तेनास्य योगोऽस्ति च नित्यमेव।
स नन्दकी सूर्य इहास्ति बोध्यः
स आशिषा सर्वजगत् पिपर्ति।।१३४६।।

चक्री—६६५

'डुकृ ञ् करणे' धातोः ***"घञर्थे कविधानम्"*** (पा० ३।३।५८ वा०) इति 'कः' प्रत्ययः। ***"द्वित्वप्रकरणे के कृञादीनामुपसंख्यानम्"*** (पा० ६।१।१२ वा०) इत्यनेन घञर्थे के द्वित्वम्। पूर्वस्याभ्याससंज्ञा, चुत्वादि='चक्रम्'।

यद्वा—'चक्र प्रतिघाते' धातोः ***"चकिरम्यो०"*** (उ० २।१४) इत्याद्युणादिसूत्रेण करणे 'रकि', बाहुलकादुत्वाभावे, प्रतिहन्यतेऽध्वानेनेति चक्रम्'। एवं निष्पन्नाच्चक्रशब्दात् ***"अत इनिठनौ"*** (पा० ६।४।१४८) इति सूत्रेण मत्वर्थीय इनिः प्रत्ययः। ***'यस्येति च'*** (पा० ६।४।१४८) सूत्रेणाकारलोपः। चक्रमस्यास्तीति 'चक्री'। इन्नन्तलक्षणो दीर्घः। एवञ्च—करोति क्रियते करणं वा चक्रमिति सिध्यति। तच्चक्रञ्चास्यास्तीति विश्वस्य कर्ता विष्णुः 'चक्री'। मन्त्रलिङ्गञ्च—

नकिरिन्द्र त्वदुत्तरो न ज्यायाँ अस्ति वृत्रहन्। नकिरेवा यथा त्वम्।
सत्रा ते अनुकृष्टयो विश्वा चक्रेण वावृतुः। सत्रा महाँ असि श्रुतः।

ऋक् ४।३०।१-२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभी न आ ववृत्स्व चक्रं न वृत्तमर्वतः। नियुद्भिश्चर्षणीनाम्।।

ऋक् ४।३१।४।।

चक्री=भ्रमिमत्।

सं यत् त इन्द्र मन्यवः सं चक्राणि दधन्विरे।

अध त्वे सूर्ये।। ऋक् ४।३१।६।।

इति निदर्शनम्। चक्री=रथी रथश्च, रथे चक्रस्य नित्यसम्बद्धात्।

रथीतमः (ऋक् ६।४५।१५); **रथीतमम्** (ऋक् १।११।१); **रथीतरः** (ऋक् १।८४।६) एवं बहुत्र।

रथोऽस्यास्तीति रथी। एवं पर्य्यालोचनेन भगवान् विष्णुः सूर्य एव वैतस्य नाम्नो वाच्यार्थः।

लोके चापि पश्यामः—सकलोऽयं लोकः चक्रवद् भ्राम्यन्निव दृश्यते। पौनः-पुन्येनावर्तनं हि भ्रमः। वसन्तर्तुः प्रतिवर्षमावर्ततेऽन्यैः पञ्चभिर्ऋतुभिः सह। सूर्याचन्द्रमसोश्चापि प्रातिदैनिकमावर्तनम्। एवं विश्वव्यापकस्य चक्रस्य योऽधिष्ठानं स 'चक्री', विष्णुः सूर्यश्चन्द्रो वा। ग्रहा वा चक्रिणः।

या चेयमन्नपेषणी सा चक्रिणी सती 'चक्की' इत्युच्यते। एतस्मादेव च कुम्भकारोऽपि 'चक्री', यतः स चक्रमाध्यम्येन पात्राणि निर्माति। एवमिदं चक्ररूपं विश्वं यस्मिन् निवसति स 'चक्री'। मन्त्रलिङ्गञ्च—

यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा।

ऋक् १।१५४।२।।

भवति चात्रास्माकम्—

चक्री ह विष्णुः स करोति विश्वं
चक्रेण तुल्यं परिवर्तमानम् ।
रथश्च चक्री रथवांश्च चक्री
सूर्यश्च चक्री क्रमते च चक्रे[1] ।।१३४७।।

शार्ङ्गधन्वा—६६६

'शृ हिसायां' क्रैय्यादिको धातुः ततः ***"शृणातेर्ह्रस्वश्च"*** (उ० १।१२६) इत्युणादिसूत्रेण 'गन्' प्रत्ययः। स च कित्, तेन न गुणः। तस्य नुडागमो,

१. 'चक्र प्रतिघाते', व्योमाध्वनि सर्वं प्रतिहतं भवति भिन्नं-भिन्नं प्रतिभासते इत्यर्थः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धातोर्ह्रस्वश्च। *"नेड् वशि कृति"* (पा० ७।२।८) इति इटो निषेधः। अनुस्वारपरसवर्णौ। बाहुलकाद् गकारस्य नेत्संज्ञा। शृणाति=हिनस्ति तमोऽनेनेति 'शृङ्गं'=दीप्तिः। तेषां शृङ्गाणां समूहः 'शार्ङ्गः', तद्धनुरस्येति 'शार्ङ्गधन्वा' सूर्यः।

धनुश्शब्दश्च—'धन धान्ये' जौहोत्यादिकाद्धातोः *"अर्तिपृवपियजितनिधनितपिभ्यो नित्"* (उ० २।११७) इत्युणादिना नित्संज्ञके 'उसि' प्रत्यये सिध्यति। नित्त्वाद् *"ञ्नित्यादिर्नित्यम्* (पा० ६।१।१९१) सूत्रेणाद्युदात्तः। समासे च *"वा संज्ञायाम्"* (पा० ५।४।१३३) सूत्रेणानङ्ङादेशः। *"ङिच्च"* (पा० १।१।५२) सूत्रेणान्त्यस्य भवति। पाक्षिकः यण्। नान्तलक्षणो दीर्घः। पशुशृङ्गोऽप्येतस्मादेव, शीर्यतेऽनेनेति।

मन्त्रलिङ्गञ्च—

स एकव्रात्योऽभवत् स धनुरादत्त तदेवेन्द्रधनुः। अथर्व १५।१।६।।

शृङ्गः—सूर्य इति पूर्वं कृतव्याख्यानम्। स च वर्षासु मेघेषु यत्त्रिरेखामयं दिव्यं धनुर्दृश्यते तद्वान् भवति। तत्सन्नियोगेन सूर्यः 'शार्ङ्गधन्वा' भवति।

लोकेऽपि च—इन्द्रधनुर्विशेषज्ञा इन्द्रधनुरवलोक्य, तेन समयानुसारं समीपस्था विप्रकृष्टा वा भविष्यन्तीर्वर्षा ब्रुवन्ति। एते च वर्षाविदो 'रङ्गबाजाः' इत्युच्यन्ते। शृङ्गशब्दो रङ्गशब्दस्यापभ्रंशरूपस्य प्रकृतिः। प्राकृता अपभ्रंशमुच्चारयन्ति। एष शार्ङ्गधनुष्ट्वरूपो भगवतो गुणः समग्रे लोके व्याप्तः।

मन्त्रलिङ्गञ्च—

सत्यं त्वेषा अमवन्तो धन्वञ्चिदा रुद्रियासः।
मिहं कृण्वन्त्यवाताम्।। ऋक् १।३८।७।।

भवति चात्रास्माकम्—

स शार्ङ्गधन्वा कथितो ह सूर्यो
मेघेषु तच्छृङ्गमिवास्ति वक्रम् ।
बृहद्धनुः सत् कथयन्ति तद्वा
चन्द्रस्य सर्वत्र स विष्णुरस्मात्।।१३४८।।

गदाधरः—६६७

गदेति—'गद व्यक्तायां वाचि' धातुर्भौवादिकः। तस्मात् पचाद्यच्। गदति=शब्दं करोतीति 'गदा', स्त्रियां 'टाप्'। यद्वा—'स्तन गदी शब्दे' चौरादिकः कथाद्यन्तर्गतोऽदन्तो धातुः। ततो 'णिच्', अतो लोपः। तस्य च—*"अचः*

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परस्मिन् पूर्वविधौ'' (पा० १।१।५६) सूत्रेण स्थानिवद्भावान्नोपधावृद्धिः। ततः पचाद्यच्। अचि णिलोपः, स्त्रियां 'टाप्'='गदा'। यद्वा—***''अ प्रत्ययात्''*** (पा० ३।३।१०२) इति स्त्रियां भावे 'अङ्'। ततः स्त्रियां 'टाप्'। एवञ्च स्तनयित्नुर्मेघनिर्घोषः, स एव च गदाशब्दवाच्यः।

धर इति—'धृञ् धारणे' भौवादिको धातुः। ततः पचाद्यच्, रपरो गुणः। धरतीति—'धरः'। गदायाः धरः='गदाधरः' इति शेषषष्ठीसमासः। स्तनयित्नोः= मेघनिर्घोषस्य धर्तेति भावः, सूर्यो विष्णुर्वा। इदं च सर्वदा लोके मेघनिर्घोषं शृण्वतां प्रत्यक्षचरम्।

तथा च मन्त्रलिङ्गम्—

चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य।
त्रिधा·····महो देवो मर्त्या आविवेश।। ऋक् ४।५८।३।।

भवति चात्रास्माकम्—

गदाधरो विष्णुरसौ हि सूर्यः
स एव मेघेषु दधाति शब्दम्।
स विद्युतञ्चाकुरुते सशब्दां
स एव मेघांश्च धरत्यशेषान्।।१३४६।।

रथाङ्गपाणिः—६६८

'रमु क्रीडायां' भौवादिको धातुः। ततो ***''हनिकुषिनीरमिकाशिभ्यः क्थन्''*** (उ० २।२) इत्युणादिना 'क्थन्' प्रत्ययः। रमते=क्रीडति यस्मिन् येन वा 'रथः'।

'अङ्गः'—अङ्गतेर्गतिकर्मण उक्तपूर्वः। रथोऽङ्गति=गच्छति येन तद् 'रथाङ्गम्'। रथस्यावयवा वा 'रथाङ्ग'शब्देनोच्यन्ते। तथा च यथा—चक्रम्, अक्षः, धूः, युगमित्यादीनि।

पाणिरिति—'पण व्यवहारे स्तुतौ च' इति भौवादिको धातुः। तस्यात्र व्यवहार एवार्थोऽभिमतः। ततश्च ***''गुपूधूपविच्छिपणिपनिभ्य आयः''।*** (पा० ३।१।२८) इति सूत्रेण 'आयः'। तस्य च ***''अशिपणाय्योरुडायलुकौ च''*** (उ० ४।१३३) इत्युणादिसूत्रेण 'लुक्'। 'इण्' प्रत्ययश्च धातोः। णित्त्वाद् वृद्धिः। पणाय्यते=व्यवह्रियतेऽनेनेति 'पाणिः'=हस्तः, करणम्।

यद्वा—***''भुजन्युब्जौ पाण्युपतापयोः''*** (पा० ७।३।६१) सूत्रनिपातनात् 'पाणि'शब्दः सिध्यति। त्रिंशदंशमानो राशिरपि सूर्यसङ्क्रमणमार्गः अश्नुते=व्याप्नोति व्योमेति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृत्वा। अश्यते वा राशिर्यवादिसंघातः। ***''आयादय आर्धधातुके वा''*** (पा० ३।१।३१) सूत्रेण पाक्षिक आयप्रत्ययाभावेऽपि केवलाद् 'पण्' धातोः 'इणि' प्रत्यय उपधावृद्धौ च 'पाणिः' इति। एवञ्च रथस्य अङ्गं=हिरण्यादिकं पाणौ यस्य स 'हिरण्यपाणिः' सूर्यः।

मन्त्रलिङ्गञ्च—

हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन्। ऋक् १।३५।२।।

तत्र हिरण्यं रथाङ्गम्। तत्रापि मन्त्रलिङ्गम्—

हिरण्यपाणिः सविता विचर्षणिरुभे द्यावापृथिवी अन्तरीयते। ऋक् १।३५।६।।

हिरण्यपाणिः=सूर्यः। पाणिः=हस्तः—

हिरण्यहस्तो असुरः सुनीथः सुमृडीकः स्ववाँ यात्वर्वाङ्। ऋक् १।३५।१०।।

तथा रथाङ्गनिर्देशः—

स्थिरा वः सन्तु नेमयो रथा अश्वास एषाम्।

सुसंस्कृता अभीषवः।। ऋक् १।३८।१२।।

हिरण्यपाणिशब्दो बहुत्र प्रयुक्तो वेदे। तथा च—

अश्वैर्हिरण्यपाणिभिः। ऋक् ८।७।२७।। इत्यादि।

यथायं हिरण्यपाणिशब्दस्तथाऽन्येपि हिरण्यशब्दसम्बद्धाः शब्दा ऋग्वेदे दृश्यन्ते—

हिरण्यजिह्वः। ऋक् (६।७१।३)।। **हिरण्यत्वक्।** ऋक् (५।७७।३)।।
हिरण्यदन्तम्। ऋक् (५।२।३)।। **हिरण्यबाहुः।** ऋक् (७।३४।४)।।
हिरण्यरूपः। ऋक् (२।३५।१०)।। **हिरण्यवक्षसे।** ऋक् (१२।१।२६)।।
हिरण्यशृङ्गः। ऋक् (१।१६३।६)।। **हिरण्यसन्दृक्।** ऋक् (२।३५।१०)।।
हिरण्याभीशुः। ऋक् (८।२२।५)।। **हिरण्याक्षः।** ऋक् (१।३५।८)।।
हिरण्यगर्भः। ऋक् (१०।१२१।१)।। **हिरण्यचक्रान्।** ऋक् (१।८८।५)।।

निरुक्ते—''मनुष्यवद्देवताभिधानम्'' इत्युक्तम्। एतावांश्च हिरण्यपाणिविषयः। सर्वत्र सूर्यः सूर्यदैवतोऽग्निः सूर्यदैवतानि नक्षत्राणि च स्तुतिं प्राप्नुवन्ति नाम्नैतेन। वेदव्याख्याने नियम एष यत्प्रसङ्गप्राप्तं व्याख्यायते।

भवति चात्रास्माकम्—

रथाङ्गपाणिः स हि चर्षणिर्मतः
स एव विष्णुः स हि वास्ति भास्करः।
हिरण्यपाणिः स यथा तथा ह्यसौ
त्वग्दन्तरूपाक्षिहिरण्यसंयुतः ।।१३५०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अक्षोभ्यः—९९९

'क्षुभ संचलने' दैवादिको भौवादिको वा धातुः। ततः ***''ऋहलोर्ण्यत्''*** (पा० ३।१।१२४) सूत्रेण शक्यार्थेऽर्हार्थे वा कर्मणि 'ण्यत्' प्रत्ययः। क्षोभयितुं शक्योऽर्हो वा 'क्षोभ्यः' इति। 'न क्षोभ्यः' इति नञा समासे नलोपः='अक्षोभ्यः'। न क्षोभयितुं=संचलयितुं शक्य इत्यर्थः।

मन्त्रलिङ्गञ्च तदर्थप्रतिपादकम्——

क्षोभणश्चर्षणीनाम्। ऋक् १०।१०३।१।।

स्वयमक्षोभ्योऽन्येषां च क्षोभण इत्यर्थः। तत्रैव च सूक्ते—

बलविज्ञायः स्थविरः प्रवीरः सहस्वान् वाजी सहमान उग्रः।
अभिवीरो अभिसत्वा सहोजा जैत्रमिन्द्र रथमातिष्ठ गोवित्।।

ऋक् १०।१०३।५।।

स्थविरः=अक्षोभ्यः, स्थिर इति यावत्।

लोकेऽपि च पश्यामः एव—लोके स्थिरो दृढो वोच्यते। स्थिरो दृढो वाऽक्षोभ्य इति। अतो विष्णुरेव 'अक्षोभ्यः'।

भवति चात्रास्माकम्—

अक्षोभ्य एकः स हि विष्णुरुक्तः
स वास्ति सूर्यः स हि वा प्रवीरः ।
स एव वाजी सहमान उग्रः
स वा रथे तिष्ठति जैत्र इन्द्रः ।।१३५९।।

'अनिमिषः' इति, 'एकवीरः' इति चापि स एव सूर्यः। 'अनिमिषः 'इति विष्णुनाम पूर्वं व्याख्यातं प्रसङ्गतः स्मार्यते।

सर्वप्रहरणायुधः—१०००

'सर्व' शब्दः—***''सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतन्त्रे।''*** (उ० १।१५३) इत्युणादिसूत्रेण वन्नन्तो निपातितः सृ धातोः। अनिडयं धातुः। ***''सार्वधातुकार्धधातुकयोः''*** (पा० ७।३।८४) सूत्रेण गुणः, ***''उरण् रपरः''*** (पा० १।१।५१) इत्यनेन सूत्रेण स रपरो भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'प्रहरणम्'इति—'प्र' पूर्वो 'हृञ् हरणे' भौवादिको धातुः, ततः ***''करणाधिकरण-योश्च''*** (पा० ३।३।११७) सूत्रेण 'ल्युट्'। गुणो रपरः, योरनादेशः। ***''अट्कुप्वाङ्नुम्व्यवायेऽपि''*** (पा० ८।४।२) सूत्रेण णत्वम्। प्रह्रियतेऽनेनेति 'प्रहरणम्'।

'आयुधः' इति—'युध सम्प्रहारे' दैवादिको धातुराङ् पूर्वः। ततः ***''घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थम्''*** (पा० ३।३।५८ वा०) इति वार्तिकेन घञर्थे करणे 'कः' प्रत्ययः। कित्त्वात् ***''क्ङिति च''*** (पा० १।१।५) सूत्रेण गुणस्य निषेधः।

सर्वेषां प्रहरणानि सर्वप्रहरणानि, तान्यायुधानि यस्य—'सर्वप्रहरणायुधः'। अथवा—सर्वाणि यानि प्रहरणानि तान्यायुधानि यस्य सः। षष्ठीतत्पुरुषगर्भो बहुव्रीहिः। केवलो वा त्रिपदो बहुव्रीहिः। 'सर्वप्रहरणायुधः' काल इति सविशदं व्याख्यातः। सर्वमेव च पदार्थजातं किञ्चिन्निमित्तं प्रतिपद्य मारकं रक्षकं वा भवति। एवं सर्वव्यापकत्वं भगवतः सिद्धम्। मन्त्रलिङ्गञ्च—

नमस्ते रुद्र मन्यव उतो त इषवे नमः। बाहुभ्यामुत ते नमः।
यजुः १६।१॥

मा नो वीरान् रुद्र भामिनो वधीः। यजुः १६।१६॥

इत्यादि बहुत्र व्याख्यातचरं मन्त्रलिङ्गं, शत्रुजिच्छत्रुतापनादिनामसु।

द्विरभ्यासो नामसंग्रह-समाप्ति-द्योतनः। प्रणवपूर्वो मन्त्र आरभ्यते प्रणवान्तश्च समाप्यते। 'ओ नमः' इति ***''ओमाङोश्च''*** (पा० ६।१।९५) सूत्रेण पूर्वपरयोः स्थाने पररूपैकादेशः क्रियते। नमस् इति—इत्यत्र रुत्वे ***''भो भगो अघो अपूर्वस्य योऽशि''*** (पा० ८।३।१७) सूत्रेण रोर्यस्तस्य च ***''लोपः शाकल्यस्य''*** (पा० ८।३।१९) सूत्रेण लोपः। यलोपस्य स्थानिवद्भावान्न सन्धिः।

सारांशोऽयमत्र—भगवान् विष्णुरेवानुकूलः सर्वविधान् विघ्नानपाकरोति प्राणिनां बुद्धिप्रदानेन। सद्बुद्धयश्च भगवतो विष्णोरेवेदं सर्वं गुणमयं पश्यन्तः, पश्यन्तश्च तद्रूपं विष्णुं सानन्दा भवन्ति।

भवन्ति चात्रास्माकम्—

स एव विष्णुः परिपाति सर्वं
स एव सर्वं प्रहरत्यनम्रम्।
स आयुधान्यात्मभवानि नित्यं
यथायथं सर्वभवाय युङ्क्ते ॥१३५२॥

यदुन्निनीषुर्भवतीह काल-
स्तं सम्मिमीते मृदुभावनाभिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्यक्कर्तुमिच्छुः पुरुषं यमो वा
हितेऽहितं पश्यति तस्य बुद्धिः ।।१३५३।।

तस्मात् सदा सत्यधियोऽतिनम्राः
प्रहारसंहारविहारभूतम् ।
तमेव विष्णुं प्रणिपत्य नित्यं
पश्यन्त आनन्दसुखं[1] लभन्ते ।।१३५४।।

तस्यैकवीरस्य[2] कृपातियोगाद्
भाष्यस्य नाम्नां गमनाय पारम् ।
योऽहं समर्थोऽद्य भवामि लोकाः
सत्यं स एवास्ति च पारकर्ता ।।१३५५।।

पुनर्भावान्तरेण—

हे विश्ववन्द्य! तव कीर्त्तिरशब्दगेया
हे शक्तिरूप! तव शक्तिमुपेत्य भाष्यम्।
दुस्तार्यमप्यतिकृशः करणे समर्थो
योऽहं भवामि, न भवामि कृतं त्वयैव ।।१३५६।।

सत्यभाष्योपहारोऽयं सादरं विष्णवेऽर्पितः ।
तेन मे भगवान् विष्णुः प्रीतो भवतु सर्वदा ।।१३५७।।

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृते
महाभारतानुशासनपर्वान्तर्गतस्य (अ० १४६)
विष्णुसहस्रनामस्तोत्रस्य
वेदप्रमाणोपवृंहितसत्यभाष्ये
दशमं नामशतकं
सम्पूर्णम्।

{वि० प्र० २०, वि० सं० २०२६; तथा खिष्टाब्दः २।५।१९६९}

---

१. **"आनन्दो वै सः"** इत्यानन्दस्य विष्णोः सुखं रमणीयं रथं स्थानं वा लभन्त इति।
२. एकवीरः=सूर्यो विष्णुर्वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिशिष्टानि

१. श्रीविष्णुसहस्रनाम्नां चतुर्थ्यन्तरूपाणि

२. श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (१-१०००)

३. श्रीविष्णुकाव्यम्

४. श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (५०१–१०००)

५. सम्मतयः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिशिष्टम्—१

होमार्थं श्रीविष्णुसहस्रनाम्नां चतुर्थ्यन्तरूपाणि

यज्ञविधिः सम्पुटितपाठश्च

विष्णुसहस्रनामभिः केचन विष्णुं चराचरजगत्पतिं परमेश्वरं यजन्ति। यजनं च चतुर्थ्यन्तनाम्ना सह 'स्वाहा' पदेन भवति। विशिष्ट-कामनासिद्ध्यर्थं यज्ञेन सह क्वचित् जपोऽपि भवति। स च सम्पुटितपाठनाम्ना व्यवह्रियते। सम्पुटितपाठस्य विधिरपीह प्रदर्श्यते।

विष्णुसहस्रनामजपस्य यज्ञेन सम्पूर्णता भवति। यद्वा—सर्वेषामेव जपानां सम्पूर्णता जप्यस्य स्वाहान्तेनैव भवति। साधारणं जपं जप्त्वा तस्य जपस्य दशांशेन हवनं, हवनस्य, दशांशेन मार्जनम्, मार्जनस्य दशांशेन तर्पणम्, तर्पणस्य दशांशेन ब्राह्मण-भोजनम्। तद्यथा—

सहस्रजापे शतं हवनम्, शतं हवने दशमार्जनम् ।
दशमार्जने तर्पणमेकम्, एकशेषे एकं ब्राह्मभोजनम्।।

सकामजापे संपुटितजापः संकल्पितार्थदैवतको गृह्यते। संपुटनस्य मूलम्—

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्।।

ऋक् १० ।१२१ ।१० ।।

यजमानो यत्कामदैवतः सन् संकल्पं संकल्पते, स एव पुनः पुनः प्रयुक्तो **''यत्कामास्ते जुहुमः''** इति मन्त्रोक्तं समर्धयति। तद्यथा—

धनार्थिना— .

अग्ने अच्छा वदेह नः प्रत्यङ् नः सुमना भव।
प्र नो यच्छ विशांपते धनदा असि नस्त्वम् ।। अथर्व ३ ।४ ।२० ।।

एतं मन्त्रं तद्विधं वाऽन्यं कञ्चित् मन्त्रं पठित्वा पुनः विष्णुसहस्रनाम्नः श्लोकः पठनीयः। पुनः श्लोकान्ते स एव मन्त्रः पठनीयः। पुनस्तदग्रे विष्णुसहस्रनाम्नः श्लोकः पठनीयः एवं क्रमः। एवं संपुटितः रक्षितो वा सन् जपः संपुटजपः संपुटपाठो वोक्तो भवति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयुष्कामेन—

तत् त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुशंस मा न आयुः प्रमोषीः ।।

ऋक् १।२४।११।

पुत्रार्थिना—

विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु।
आ सिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते।।
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा।।
हिरण्ययी अरणी यं निर्मन्थतो अश्विना।
तं ते गर्भं हवामहे दशमे मासि सूतवे।। ऋक् १०।१८४।१-३।।

प्रतित्र्यृचं पठित्वा विष्णुसहस्रनाम्नः श्लोकः पठनीयः। हवनं चाप्यमुनैव क्रमेण कार्यम्। वाञ्छानामानन्त्यात् तदर्थस्य मन्त्रस्य श्लोकस्य वा कल्पना स्वयं कल्पनीया भवति, दक्षिणा च यथाशक्ति।

ध्यायन् स्तुवन् नमस्यंश्च यजमानस्तमेव च।

यजमानः=यजन्, तदर्थचतुर्थ्यन्तीकृतनामसाहस्त्री।

न ह्यद्यतना लोका नाम्नां चतुर्थ्यन्तरूपविधाने प्रायेण समर्थाः, इति कृत्वा तादृशां होमचिकीर्षूणां कृते विष्णोः सहस्रनाम्नां चतुर्थ्यन्तरूपाणि प्रदर्श्यन्ते—

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१ ओम् विश्वाय (स्वाहा)
२ विष्णवे
३ वषट्काराय
४ भूतभव्यभवत्प्रभवे
५ भूतकृते
६ भूतभृते
७ भावाय
८ भूतात्मने
९ भूतभावनाय
१० पूतात्मने
११ परमात्मने
१२ मुक्तानां परमगतये
१३ अव्ययाय
१४ पुरुषाय
१५ साक्षिणे
१६ क्षेत्रज्ञाय
१७ अक्षराय
१८ योगाय
१९ योगविदां नेत्रे
२० प्रधानपुरुषेश्वराय
२१ नारसिंहवपुषे
२२ श्रीमते
२३ केशवाय
२४ पुरुषोत्तमाय
२५ सर्वाय
२६ शर्वाय
२७ शिवाय
२८ स्थाणवे
२९ भूतादये
३० निधिरव्ययाय
(निधयेऽव्ययाय)
३१ सम्भवाय
३२ भावनाय
३३ भर्त्रे
३४ प्रभवाय
३५ प्रभवे
३६ ईश्वराय
३७ स्वयम्भवे
३८ शम्भवे
३९ आदित्याय
४० पुष्कराक्षाय
४१ महास्वनाय
४२ अनादिनिधनाय
४३ धात्रे
४४ विधात्रे
४५ धातुरुत्तमाय
४६ अप्रमेयाय
४७ हृषीकेशाय
४८ पद्मनाभाय
४९ अमरप्रभवे
५० विश्वकर्मणे
५१ मनवे
५२ त्वष्ट्रे
५३ स्थविष्ठाय
५४ स्थविरो ध्रुवाय
(स्थविराय ध्रुवाय)
५५ अग्राह्याय
५६ शाश्वताय
५७ कृष्णाय
५८ लोहिताक्षाय
५९ प्रतर्दनाय
६० प्रभूताय
६१ त्रिककुब्धाम्ने
६२ पवित्राय
६३ मङ्गलाय परस्मै
६४ ईशानाय
६५ प्राणदाय
६६ प्राणाय
६७ ज्येष्ठाय
६८ श्रेष्ठाय
६९ प्रजापतये
७० हिरण्यगर्भाय
७१ भूगर्भाय
७२ माधवाय
७३ मधुसूदनाय
७४ ईश्वराय
७५ विक्रमिणे
७६ धन्विने
७७ मेधाविने
७८ विक्रमाय
७९ क्रमाय
८० अनुत्तमाय
८१ दुराधर्षाय
८२ कृतज्ञाय
८३ कृतये
८४ आत्मवते
८५ सुरेशाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

८६ शरणाय
८७ शर्मणे
८८ विश्वरेतसे
८६ प्रजाभवाय
६० अह्ने
६१ संवत्सराय
६२ व्यालाय
६३ प्रत्ययाय
६४ सर्वदर्शनाय
६५ अजाय
६६ सर्वेश्वराय
६७ सिद्धाय
६८ सिद्धये
६६ सर्वादये
१०० अच्युताय
१०१ वृषाकपये
१०२ अमेयात्मने
१०३ सर्वयोगविनिःसृताय
१०४ वसवे
१०५ वसुमनसे
१०६ सत्याय
१०७ समात्मने
१०८ सम्मिताय
१०६ समाय
११० अमोघाय
१११ पुण्डरीकाक्षाय
११२ वृषकर्मणे
११३ वृषाकृतये
११४ रुद्राय
११५ बहुशिरसे
११६ बभ्रवे
११७ विश्वयोनये
११८ शुचिश्रवसे
११६ अमृताय
१२० शाश्वतस्थाणवे
१२१ वरारोहाय
१२२ महातपसे
१२३ सर्वगाय
१२४ सर्वविद्भानवे
१२५ विष्वक्सेनाय
१२६ जनार्दनाय
१२७ वेदाय
१२८ वेदविदे
१२६ अव्यङ्गाय
१३० वेदाङ्गाय
१३१ वेदविदे
१३२ कवये
१३३ लोकाध्यक्षाय
१३४ सुराध्यक्षाय
१३५ धर्माध्यक्षाय
१३६ कृताकृताय
१३७ चतुरात्मने
१३८ चतुर्व्यूहाय
१३६ चतुर्द्रंष्ट्राय
१४० चतुर्भुजाय
१४१ भ्राजिष्णवे
१४२ भोजनाय
१४३ भोक्त्रे
१४४ सहिष्णवे
१४५ जगदादिजाय
१४६ अनघाय
१४७ विजयाय
१४८ जेत्रे
१४६ विश्वयोनये
१५० पुनर्वसवे
१५१ उपेन्द्राय
१५२ वामनाय
१५३ प्रांशवे
१५४ अमोघाय
१५५ शुचये
१५६ ऊर्जिताय
१५७ अतीन्द्राय
१५८ संग्रहाय
१५६ सर्गाय
१६० धृतात्मने
१६१ नियमाय
१६२ यमाय
१६३ वेद्याय
१६४ वैद्याय
१६५ सदायोगिने
१६६ वीरघ्ने
१६७ माधवाय
१६८ मधवे
१६६ अतीन्द्रियाय
१७० महामायाय
१७१ महोत्साहाय
१७२ महाबलाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१७३ महाबुद्धये
१७४ महावीर्याय
१७५ महाशक्तये
१७६ महाद्युतये
१७७ अनिर्देश्यवपुषे
१७८ श्रीमते
१७९ अमेयात्मने
१८० महाद्रिधृषे
१८१ महेष्वासाय
१८२ महीभर्त्रे
१८३ श्रीनिवासाय
१८४ सतां गतये
१८५ अनिरुद्धाय
१८६ सुरानन्दाय
१८७ गोविन्दाय
१८८ गोविदां पतये
१८९ मरीचये
१९० दमनाय
१९१ हंसाय
१९२ सुपर्णाय
१९३ भुजगोत्तमाय
१९४ हिरण्यनाभाय
१९५ सुतपसे
१९६ पद्मनाभाय
१९७ प्रजापतये
१९८ अमृत्यवे
१९९ सर्वदृशे
२०० सिंहाय
२०१ सन्धात्रे
२०२ सन्धिमते
२०३ स्थिराय
२०४ अजाय
२०५ दुर्मर्षणाय
२०६ शास्त्रे
२०७ विश्रुतात्मने
२०८ सुरारिघ्ने
२०९ गुरवे
२१० गुरुतमाय
२११ धाम्ने
२१२ सत्याय
२१३ सत्यपराक्रमाय
२१४ निमिषाय
२१५ अनिमिषाय
२१६ स्रग्विणे
२१७ वाचस्पतिरुदारधिये
(वाचस्पतये उदारधिये)
२१८ अग्रण्ये
२१९ ग्रामण्ये
२२० श्रीमते
२२१ न्यायाय
२२२ नेत्रे
२२३ समीरणाय
२२४ सहस्रमूर्ध्ने
२२५ विश्वात्मने
२२६ सहस्राक्षाय
२२७ सहस्रपदे
२२८ आवर्तनाय
२२९ निवृत्तात्मने
२३० संवृताय
२३१ सम्प्रमर्दनाय
२३२ अहःसंवर्तकाय
२३३ वह्नये
२३४ अनिलाय
२३५ धरणीधराय
२३६ सुप्रसादाय
२३७ प्रसन्नात्मने
२३८ विश्वधृषे
२३९ विश्वभुजे
२४० विभवे
२४१ सत्कर्त्रे
२४२ सत्कृताय
२४३ साधवे
२४४ जह्नवे
२४५ नारायणाय
२४६ नराय
२४७ असंख्येयाय
२४८ अप्रमेयात्मने
२४९ विशिष्टाय
२५० शिष्टकृते
२५१ शुचये
२५२ सिद्धार्थाय
२५३ सिद्धसंकल्पाय
२५४ सिद्धिदाय
२५५ सिद्धिसाधनाय
२५६ वृषाहिणे
२५७ वृषभाय
२५८ विष्णवे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२५९ वृषपर्वणे
२६० वृषोदराय
२६१ वर्धनाय
२६२ वर्धमानाय
२६३ विविक्ताय
२६४ श्रुतिसागराय
२६५ सुभुजाय
२६६ दुर्धराय
२६७ वाग्मिने
२६८ महेन्द्राय
२६९ वसुदाय
२७० वसवे
२७१ नैकरूपाय
२७२ बृहद्रूपाय
२७३ शिपिविष्टाय
२७४ प्रकाशनाय
२७५ ओजस्तेजोद्युतिधराय
२७६ प्रकाशात्मने
२७७ प्रतापनाय
२७८ ऋद्धाय
२७९ स्पष्टाक्षराय
२८० मन्त्राय
२८१ चन्द्रांशवे
२८२ भास्करद्युतये
२८३ अमृतांशूद्भवाय
२८४ भानवे
२८५ शशबिन्दवे
२८६ सुरेश्वराय
२८७ औषधाय
२८८ जगतःसेतवे
२८९ सत्यधर्मपराक्रमाय
२९० भूतभव्यभवन्नाथाय
२९१ पवनाय
२९२ पावनाय
२९३ अनलाय
२९४ कामघ्ने
२९५ कामकृते
२९६ कान्ताय
२९७ कामाय
२९८ कामप्रदाय
२९९ प्रभवे
३०० युगादिकृते
३०१ युगावर्ताय
३०२ नैकमायाय
३०३ महाशनाय
३०४ अदृश्याय
३०५ व्यक्तरूपाय
३०६ सहस्रजिते
३०७ अनन्तजिते
३०८ इष्टाय
३०९ अविशिष्टाय
३१० शिष्टेष्टाय
३११ शिखण्डिने
३१२ नहुषाय
३१३ वृषाय
३१४ क्रोधघ्ने
३१५ क्रोधकृत्कर्त्रे
३१६ विश्वबाहवे
३१७ महीधराय
३१८ अच्युताय
३१९ प्रथिताय
३२० प्राणाय
३२१ प्राणदाय
३२२ वासवानुजाय
३२३ अपां निधये
३२४ अधिष्ठानाय
३२५ अप्रमत्ताय
३२६ प्रतिष्ठिताय
३२७ स्कन्दाय
३२८ स्कन्दधराय
३२९ धुर्याय
३३० वरदाय
३३१ वायुवाहनाय
३३२ वासुदेवाय
३३३ बृहद्भानवे
३३४ आदिदेवाय
३३५ पुरन्दराय
३३६ अशोकाय
३३७ तारणाय
३३८ ताराय
३३९ शूराय
३४० शौरये
३४१ जनेश्वराय
३४२ अनुकूलाय
३४३ शतावर्ताय
३४४ पद्मिने
३४५ पद्मनिभेक्षणाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३४६ पद्मनाभाय
३४७ अरविन्दाक्षाय
३४८ पद्मगर्भाय
३४९ शरीरभृते
३५० महर्द्धये
३५१ ऋद्धाय
३५२ वृद्धात्मने
३५३ महाक्षाय
३५४ गरुडध्वजाय
३५५ अतुलाय
३५६ शरभाय
३५७ भीमाय
३५८ समयज्ञाय
३५९ हविर्हरये
३६० सर्वलक्षणलक्षण्याय
३६१ लक्ष्मीवते
३६२ समितिञ्जयाय
३६३ विक्षराय
३६४ रोहिताय
३६५ मार्गाय
३६६ हेतवे
३६७ दामोदराय
३६८ सहाय
३६९ महीधराय
३७० महाभागाय
३७१ वेगवते
३७२ अमिताशनाय
३७३ उद्भवाय
३७४ क्षोभणाय
३७५ देवाय
३७६ श्रीगर्भाय
३७७ परमेश्वराय
३७८ करणाय
३७९ कारणाय
३८० कर्त्रे
३८१ विकर्त्रे
३८२ गहनाय
३८३ गुहाय
३८४ व्यवसायाय
३८५ व्यवस्थानाय
३८६ संस्थानाय
३८७ स्थानदाय
३८८ ध्रुवाय
३८९ परर्द्धये
३९० परमस्पष्टाय
३९१ तुष्टाय
३९२ पुष्टाय
३९३ शुभेक्षणाय
३९४ रामाय
३९५ विरामाय
३९६ विरताय
३९७ मार्गाय
३९८ नेयाय
३९९ नयाय
४०० अनयाय
४०१ वीराय
४०२ शक्तिमतां श्रेष्ठाय
४०३ धर्माय
४०४ धर्मविदुत्तमाय
४०५ वैकुण्ठाय
४०६ पुरुषाय
४०७ प्राणाय
४०८ प्राणदाय
४०९ प्रणवाय
४१० पृथवे
४११ हिरण्यगर्भाय
४१२ शत्रुघ्नाय
४१३ व्याप्ताय
४१४ वायवे
४१५ अधोक्षजाय
४१६ ऋतवे
४१७ सुदर्शनाय
४१८ कालाय
४१९ परमेष्ठिने
४२० परिग्रहाय
४२१ उग्राय
४२२ संवत्सराय
४२३ दक्षाय
४२४ विश्रामाय
४२५ विश्वदक्षिणाय
४२६ विस्ताराय
४२७ स्थावरस्थाणवे
४२८ प्रमाणाय
४२९ बीजमव्ययाय (बीजायाव्ययाय)
४३० अर्थाय
४३१ अनर्थाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४३२ महाकोशाय
४३३ महाभोगाय
४३४ महाधनाय
४३५ अनिर्विण्णाय
४३६ स्थविष्ठाय
४३७ अभुवे
४३८ धर्मयूपाय
४३९ महामखाय
४४० नक्षत्रनेमये
४४१ नक्षत्रिणे
४४२ क्षमाय
४४३ क्षामाय
४४४ समीहनाय
४४५ यज्ञाय
४४६ इज्याय
४४७ महेज्याय
४४८ ऋतवे
४४९ सत्राय
४५० सतां गतये
४५१ सर्वदर्शिने
४५२ विमुक्तात्मने
४५३ सर्वज्ञाय
४५४ ज्ञानमुत्तमाय
४५५ सुव्रताय
४५६ सुमुखाय
४५७ सूक्ष्माय
४५८ सुघोषाय
४५९ सुखदाय
४६० सुहृदे
४६१ मनोहराय
४६२ जितक्रोधाय
४६३ वीरबाहवे
४६४ विदारणाय
४६५ स्वापनाय
४६६ स्ववशाय
४६७ व्यापिने
४६८ नैकात्मने
४६९ नैककर्मकृते
४७० वत्सराय
४७१ वत्सलाय
४७२ वत्सिने
४७३ रत्नगर्भाय
४७४ धनेश्वराय
४७५ धर्मगुपे
४७६ धर्मकृते
४७७ धर्मिणे
४७८ सते
४७९ असते
४८० क्षराय
४८१ अक्षराय
४८२ अविज्ञात्रे
४८३ सहस्रांशवे
४८४ विधात्रे
४८५ कृतलक्षणाय
४८६ गभस्तिनेमये
४८७ सत्त्वस्थाय
४८८ सिंहाय
४८९ भूतमहेश्वराय
४९० आदिदेवाय
४९१ महादेवाय
४९२ देवेशाय
४९३ देवभृद्गुरवे
४९४ उत्तराय
४९५ गोपतये
४९६ गोप्त्रे
४९७ ज्ञानगम्याय
४९८ पुरातनाय
४९९ शरीरभूतभृते
५०० भोक्त्रे
५०१ कपीन्द्राय
५०२ भूरिदक्षिणाय
५०३ सोमपाय
५०४ अमृतपाय
५०५ सोमाय
५०६ पुरुजिते
५०७ पुरुसत्तमाय
५०८ विनयाय
५०९ जयाय
५१० सत्यसन्धाय
५११ दाशार्हाय
५१२ सात्वतां पतये
५१३ जीवाय
५१४ विनयितासाक्षिणे
५१५ मुकुन्दाय
५१६ अमितविक्रमाय
५१७ अम्भोनिधये
५१८ अनन्तात्मने

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५१९ महोदधिशयाय
५२० अन्तकाय
५२१ अजाय
५२२ महार्हाय
५२३ स्वाभाव्याय
५२४ जितामित्राय
५२५ प्रमोदनाय
५२६ आनन्दाय
५२७ नन्दनाय
५२८ नन्दाय
५२९ सत्यधर्मणे
५३० त्रिविक्रमाय
५३१ महर्षिकपिलाचार्याय
५३२ कृतज्ञाय
५३३ मेदिनीपतये
५३४ त्रिपदाय
५३५ त्रिदशाध्यक्षाय
५३६ महाशृंगाय
५३७ कृतान्तकृते
५३८ महावराहाय
५३९ गोविन्दाय
५४० सुषेणाय
५४१ कनकाङ्गदिने
५४२ गुह्याय
५४३ गभीराय
५४४ गहनाय
५४५ गुप्ताय
५४६ चक्रगदाधराय
५४७ वेधसे

५४८ स्वाङ्गाय
५४९ अजिताय
५५० कृष्णाय
५५१ दृढाय
५५२ संकर्षणाच्युताय
५५३ वरुणाय
५५४ वारुणाय
५५५ वृक्षाय
५५६ पुष्कराक्षाय
५५७ महामनसे
५५८ भगवते
५५९ भगघ्ने
५६० आनन्दिने
५६१ वनमालिने
५६२ हलायुधाय
५६३ आदित्याय
५६४ ज्योतिरादित्याय
५६५ सहिष्णवे
५६६ गतिसत्तमाय
५६७ सुधन्वने
५६८ खण्डपरशवे
५६९ दारुणाय
५७० द्रविणप्रदाय
५७१ दिविस्पृशे
५७२ सर्वदृग्व्यासाय
५७३ वाचस्पतिरयोनिजाय
(वाचस्पतयेऽयोनिजाय)
५७४ त्रिसाम्ने
५७५ सामगाय

५७६ साम्ने
५७७ निर्वाणाय
५७८ भेषजाय
५७९ भिषजे
५८० संन्यासकृते
५८१ शमाय
५८२ शान्ताय
५८३ निष्ठायै
५८४ शान्तये
५८५ परायणाय
५८६ शुभाङ्गाय
५८७ शान्तिदाय
५८८ स्रष्ट्रे
५८९ कुमुदाय
५९० कुवलेशाय
५९१ गोहिताय
५९२ गोपतये
५९३ गोप्त्रे
५९४ वृषभाक्षाय
५९५ वृषप्रियाय
५९६ अनिवर्त्तिने
५९७ निवृत्तात्मने
५९८ संक्षेप्त्रे
५९९ क्षेमकृते
६०० शिवाय
६०१ श्रीवत्सवक्षसे
६०२ श्रीवासाय
६०३ श्रीपतये
६०४ श्रीमतां वराय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६०५ श्रीदाय
६०६ श्रीशाय
६०७ श्रीनिवासाय
६०८ श्रीनिधये
६०९ श्रीविभावनाय
६१० श्रीधराय
६११ श्रीकराय
६१२ श्रेयसे
६१३ श्रीमते
६१४ लोकत्रयाश्रयाय
६१५ स्वक्षाय
६१६ स्वङ्गाय
६१७ शतानन्दाय
६१८ नन्दये
६१९ ज्योतिर्गणेश्वराय
६२० विजितात्मने
६२१ विधेयात्मने
(अविधेयात्मने)
६२२ सत्कीर्तये
६२३ छिन्नसंशयाय
६२४ उदीर्णाय
६२५ सर्वतश्चक्षुषे
६२६ अनीशाय
६२७ शाश्वतस्थिराय
६२८ भूशयाय
६२९ भूषणाय
६३० भूतये
६३१ विशोकाय
६३२ शोकनाशनाय
६३३ अर्चिष्मते
६३४ अर्चिताय
६३५ कुम्भाय
६३६ विशुद्धात्मने
६३७ विशोधनाय
६३८ अनिरुद्धाय
६३९ अप्रतिरथाय
६४० प्रद्युम्नाय
६४१ अमितविक्रमाय
६४२ कालनेमिनिघ्ने
६४३ वीराय
६४४ शौरये
६४५ शूरजनेश्वराय
६४६ त्रिलोकात्मने
६४७ त्रिलोकेशाय
६४८ केशवाय
६४९ केशिघ्ने
६५० हरये
६५१ कामदेवाय
६५२ कामपालाय
६५३ कामिने
६५४ कान्ताय
६५५ कृतागमाय
६५६ अनिर्देश्यवपुषे
६५७ विष्णवे
६५८ वीराय
६५९ अनन्ताय
६६० धनञ्जयाय
६६१ ब्रह्मण्याय
६६२ ब्रह्मकृते
६६३ ब्रह्मणे
६६४ ब्रह्मणे
६६५ ब्रह्मविवर्धनाय
६६६ ब्रह्मविदे
६६७ ब्रह्मणाय
६६८ ब्रह्मिणे
६६९ ब्रह्मज्ञाय
६७० ब्राह्मणप्रियाय
६७१ महाक्रमाय
६७२ महाकर्मणे
६७३ महातेजसे
६७४ महोरगाय
६७५ महाक्रतवे
६७६ महायज्वने
६७७ महायज्ञाय
६७८ महाहविषे
६७९ स्तव्याय
६८० स्तवप्रियाय
६८१ स्तोत्राय
६८२ स्तुतये
६८३ स्तोत्रे
६८४ रणप्रियाय
६८५ पूर्णाय
६८६ पूरयित्रे
६८७ पुण्याय
६८८ पुण्यकीर्तये
६८९ अनामयाय
६९० मनोजवाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६६१ तीर्थकराय
६६२ वसुरेतसे
६६३ वसुप्रदाय
६६४ वसुप्रदाय
६६५ वासुदेवाय
६६६ वसवे
६६७ वसुमनसे
६६८ हविषे
६६९ सद्गतये
७०० सत्कृतये
७०१ सत्तायै
७०२ सद्भूत्यै
७०३ सत्परायणाय
७०४ शूरसेनाय
७०५ यदुश्रेष्ठाय
७०६ सन्निवासाय
७०७ सुयामुनाय
७०८ भूतावासाय
७०९ वासुदेवाय
७१० सर्वासुनिलयाय
७११ अनलाय
७१२ दर्पघ्ने
७१३ दर्पदाय
७१४ दृप्ताय
७१५ दुर्धराय
७१६ अपराजिताय
७१७ विश्वमूर्त्तये
७१८ दीप्तमूर्त्तये
७१९ दीप्तमूर्त्तये
७२० अमूर्त्तिमते
७२१ अनेकमूर्त्तये
७२२ अव्यक्ताय
७२३ शतमूर्त्तये
७२४ शताननाय
७२५ एकाय
७२६ नैकाय
७२७ सवाय
७२८ काय
७२९ कस्मै
७३० यस्मै
७३१ तस्मै
७३२ पदमनुत्तमाय
७३३ लोकबन्धवे
७३४ लोकनाथाय
७३५ माधवाय
७३६ भक्तवत्सलाय
७३७ सुवर्णवर्णाय
७३८ हेमाङ्गाय
७३९ वराङ्गाय
७४० चन्दनाङ्गदिने
७४१ वीरघ्ने
७४२ विषमाय
७४३ शून्याय
७४४ घृताशिषे
७४५ अचलाय
७४६ चलाय
७४७ अमानिने
७४८ मानदाय
७४९ मान्याय
७५० लोकस्वामिने
७५१ त्रिलोकधृषे
७५२ सुमेधसे
७५३ मेधजाय
७५४ धन्याय
७५५ सत्यमेधसे
७५६ धराधराय
७५७ तेजोवृषाय
७५८ द्युतिधराय
७५९ सर्वशस्त्रभृतां वराय
७६० प्रग्रहाय
७६१ निग्रहाय
७६२ व्यग्राय
७६३ नैकशृंगाय
७६४ गदाग्रजाय
७६५ चतुर्मूर्तये
७६६ चतुर्बाहवे
७६७ चतुर्व्यूहाय
७६८ चतुर्गतये
७६९ चतुरात्मने
७७० चतुर्भावाय
७७१ चतुर्वेदविदे
७७२ एकपादे
७७३ समावर्ताय
७७४ अनिवृत्तात्मने
७७५ दुर्जयाय
७७६ दुरतिक्रमाय
७७७ दुर्लभाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७७८ दुर्गमाय
७७९ दुर्गाय
७८० दुरावासाय
७८१ दुरारिघ्ने
७८२ शुभाङ्गाय
७८३ लोकसारङ्गाय
७८४ सुतन्तवे
७८५ तन्तुवर्धनाय
७८६ इन्द्रकर्मणे
७८७ महाकर्मणे
७८८ कृतकर्मणे
७८९ कृतागमाय
७९० उद्भवाय
७९१ सुन्दराय
७९२ सुन्दाय
७९३ रत्ननाभाय
७९४ सुलोचनाय
७९५ अर्काय
७९६ वाजसनाय
७९७ शृङ्गिणे
७९८ जयन्ताय
७९९ सर्वविज्जयिने
८०० सुवर्णबिन्दवे
८०१ अक्षोभ्याय
८०२ सर्ववागीश्वरेश्वराय
८०३ महाह्रदाय
८०४ महागर्ताय
८०५ महाभूताय
८०६ महानिधये
८०७ कुमुदाय
८०८ कुन्दराय
८०९ कुन्दाय
८१० पर्जन्याय
८११ पावनाय
८१२ अनिलाय
८१३ अमृताशाय
८१४ अमृतवपुषे
८१५ सर्वज्ञाय
८१६ सर्वतोमुखाय
८१७ सुलभाय
८१८ सुव्रताय
८१९ सिद्धाय
८२० शत्रुजिते
८२१ शत्रुतापनाय
८२२ न्यग्रोधाय
८२३ उदुम्बराय
८२४ अश्वत्थाय
८२५ चाणूरान्ध्रनिषूदनाय
८२६ सहस्रार्चिषे
८२७ सप्तजिह्वाय
८२८ सप्तैधसे
८२९ सप्तवाहनाय
८३० अमूर्तये
८३१ अनघाय
८३२ अचिन्त्याय
८३३ भयकृते
८३४ भयनाशनाय
८३५ अणवे
८३६ बृहते
८३७ कृशाय
८३८ स्थूलाय
८३९ गुणभृते
८४० निर्गुणाय
८४१ महते
८४२ अधृताय
८४३ स्वधृताय
८४४ स्वास्याय
८४५ प्राग्वंशाय
८४६ वंशवर्धनाय
८४७ भारभृते
८४८ कथिताय
८४९ योगिने
८५० योगीशाय
८५१ सर्वकामदाय
८५२ आश्रमाय
८५३ श्रमणाय
८५४ क्षामाय
८५५ सुपर्णाय
८५६ वायुवाहनाय
८५७ धनुर्धराय
८५८ धनुर्वेदाय
८५९ दण्डाय
८६० दमयित्रे
८६१ दमाय
८६२ अपराजिताय
८६३ सर्वसहाय
८६४ नियन्त्रे

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

८६५ नियमाय
(अनियमाय)
८६६ यमाय
(अयमाय)
८६७ सत्त्ववते
८६८ सात्त्विकाय
८६९ सत्याय
८७० सत्यधर्मपरायणाय
८७१ अभिप्रायाय
८७२ प्रियार्हाय
८७३ अर्हाय
८७४ प्रियकृते
८७५ प्रीतिवर्धनाय
८७६ विहायसगतये
८७७ ज्योतिषे
८७८ सुरुचये
८७९ हुतभुजे
८८० विभवे
८८१ रवये
८८२ विरोचनाय
८८३ सूर्याय
८८४ सवित्रे
८८५ रविलोचनाय
८८६ अनन्ताय
८८७ हुतभुजे
८८८ भोक्त्रे
८८९ सुखदाय
८९० नैकजाय
८९१ अग्रजाय
८९२ अनिर्विण्णाय
८९३ सदामर्षिणे
८९४ लोकाधिष्ठानाय
८९५ अद्भुताय
८९६ सनाते
८९७ सनातनतमाय
८९८ कपिलाय
८९९ कपये
९०० अप्ययाय
९०१ स्वस्तिदाय
९०२ स्वस्तिकृते
९०३ स्वस्तये
९०४ स्वस्तिभुजे
९०५ स्वस्तिदक्षिणाय
९०६ अरौद्राय
९०७ कुण्डलिने
९०८ चक्रिणे
९०९ विक्रमिणे
९१० ऊर्जितशासनाय
९११ शब्दातिगाय
९१२ शब्दसहाय
९१३ शिशिराय
९१४ शर्वरीकराय
९१५ अक्रूराय
९१६ पेशलाय
९१७ दक्षाय
९१८ दक्षिणाय
९१९ क्षमिणां वराय
९२० विद्वत्तमाय
९२१ वीतभयाय
९२२ पुण्यश्रवणकीर्तनाय
९२३ उत्तारणाय
९२४ दुष्कृतिघ्ने
९२५ पुण्याय
९२६ दुःस्वप्ननाशनाय
९२७ वीरघ्ने
९२८ सन्ताय
९२९ रक्षणाय
९३० जीवनाय
९३१ पर्यवस्थिताय
९३२ अनन्तरूपाय
९३३ अनन्तश्रिये
९३४ जितमन्यवे
९३५ भयापहाय
९३६ चतुरश्राय
९३७ गभीरात्मने
९३८ विदिशाय
९३९ व्यादिशाय
९४० दिशाय
९४१ अनादये
९४२ भूर्भुवाय
९४३ लक्ष्म्यै
९४४ सुवीराय
९४५ रुचिराङ्गदाय
९४६ जननाय
९४७ जनजन्मादये
९४८ भीमाय
९४९ भीमपराक्रमाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६५० आधारनिलयाय
६५१ अधात्रे
६५२ पुष्पहासाय
६५३ प्रजागराय
६५४ ऊर्ध्वगाय
६५५ सत्पथाचाराय
६५६ प्राणदाय
६५७ प्रणवाय
६५८ पणाय
६५९ प्रमाणाय
६६० प्राणनिलयाय
६६१ प्राणभृते
६६२ प्राणजीवनाय
६६३ तत्त्वाय
६६४ तत्त्वविदे
६६५ एकात्मने
६६६ जन्ममृत्युजरातिगाय
६६७ भूर्भूवःस्वस्तरवे
६६८ ताराय
६६९ सवित्रे
६७० प्रपितामहाय
६७१ यज्ञाय
६७२ यज्ञपतये
६७३ यज्वने
६७४ यज्ञाङ्गाय
६७५ यज्ञवाहनाय
६७६ यज्ञभृते
६७७ यज्ञकृते
६७८ यज्ञिने
६७९ यज्ञभुजे
६८० यज्ञसाधनाय
६८१ यज्ञान्तकृते
६८२ यज्ञगुह्याय
६८३ अन्नाय
६८४ अन्नादाय
६८५ आत्मयोनये
६८६ स्वयंजाताय
६८७ वैखानाय
६८८ सामगायनाय
६८९ देवकीनन्दनाय
६९० स्रष्ट्रे
६९१ क्षितीशाय
६९२ पापनाशनाय
६९३ शङ्खभृते
६९४ नन्दकिने
६९५ चक्रिणे
६९६ शाङ्र्गधन्वने
६९७ गदाधाराय
६९८ रथाङ्गपाणये
६९९ अक्षोभ्याय
१००० सर्वप्रहरणायुधाय

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिशिष्टम्-२

श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (०००१ - १०००)

{अस्यां सूच्यां संस्कृतवर्णमालानुसारं नामानि दीयन्ते। अनुस्वारान्तानि सविसर्गाणि च अक्षराणि प्रथमं दीयन्ते। वर्गाणां पञ्चमवर्णसंयुक्तान्यक्षराणि यथाक्रममवलोकनीयानि। सूच्याः क्रमस्त्वित्थं ज्ञेयः—अं (ं), अः (ः), अ (—), आ (ा), इ (ि), ई (ी), उ (ु), ऊ (ू), ऋ (ृ), ॠ (ॄ), ए (े), ऐ (ै), ओ (ो), औ (ौ), क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म्, य्, र्, ल्, व्, श्, ष्, स्, ह्। सङ्केतः— **श्लोकपृ०**=विष्णुसहस्रनामश्लोकपृष्ठाङ्कः, **स० भा० पृ०**= सत्यभाष्यपृष्ठाङ्कः}

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
	अ				
१	अक्रूरः	६१५	१११	६५८	६५८
२	अक्षरः	१७	१५	३६	४५
३	अक्षरम्	४८१	६४	५४३	५४३
४	अक्षोभ्यः	८०१	६६	८५५	८५८
५	अक्षोभ्यः	६६६	१२०	१०२५	१०३२
६	अग्रजः	८६१	१०८	६३७	६४२
७	अग्रणीः	२१८	३७	२४२	२४२
८	अग्राह्यः	५५	२०	८५	८५
९	अच्युतः	१००	२४	११८	१२३
१०	अच्युतः	३१८	४८	३६५	३६६
११	अचलः	७४५	६२	७६७	८०५
१२	अचिन्त्यः	८३२	१०२	८८५	८६२
१३	अजः	६५	२४	११८	१२३
१४	अजः	२०४	३५	२२०	१२६
१५	अजः	५२१	६६	५६४	५६४
१६	अजितः	५४६	७२	६२२	६२३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
१७	अणुः	८३५	१०३	८६५	८६५
१८	अतीन्द्रः	१५७	३०	१६८	१७८
१६	अतीन्द्रियः	१६६	३१	१८४	१६०
२०	अतुलः	३५५	५२	४०६	४०६
२१	अदृश्यः	३०४	४६	३४२	३४६
२२	अद्भुतः	८६५	१०८	६३७	६४५
२३	अधाता (धाता)	६५१	११५	६८५	६८६
२४	अधिष्ठानम्	३२४	४८	३६५	३७२
२५	अधृतः	८४२	१०३	८६५	६०२
२६	अधोक्षजः	४१५	५७	४५६	४७१
२७	अनघः	१४६	२६	१६२	१६५
२८	अनघः	८३१	१०२	८८५	८६२
२६	अनन्तः	६५६	८३	७१६	७२६
३०	अनन्तः	८८६	१०८	६३७	६३७
३१	अनन्तजित्	३०७	४६	३४२	३४८
३२	अनन्तरूपः	६३२	११३	६७१	६७१
३३	अनन्तश्रीः	६३३	११३	६७१	६७२
३४	अनन्तात्मा	५१८	६८	५८३	५८६
३५	अनयः	४००	५६	४४८	४५२
३६	अनर्थः	४३१	५६	४८५	४६१
३७	अनलः	२६३	४५	३३२	३३४
३८	अनलः	७११	८६	७६७	७७३
३६	अनादिः	६४१	११४	६७८	६७८
४०	अनादिनिधनः	४२	१८	६४	७३
४१	अनामयः	६८६	८६	७४०	७४८
४२	अनिर्देश्यवपुः	१७७	३२	१८४	१६६
४३	अनिर्देश्यवपुः	६५६	८३	७१६	७२४
४४	अनिमिषः	२१५	३६	२३१	२३६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
४५	अनिरुद्धः	१८५	३३	२०३	२०६
४६	अनिरुद्धः	६३८	८१	७०४	७०८
४७	अनिर्विण्णः	४३५	६०	४६६	४६६
४८	अनिर्विण्णः	८६२	१०८	६३७	६४३
४६	अनिलः	२३४	३८	२५६	२६३
५०	अनिलः	८१२	१००	८६३	८६८
५१	अनिवर्ती	५६६	७७	६७६	६७६
५२	अनिवृत्तात्मा	७७४	६६	८२६	८३०
५३	अनीशः	६२६	८०	६६८	६६६
५४	अनुकूलः	३४२	५०	३८५	३६२
५५	अनुत्तमः	८०	२२	१०२	१०६
५६	अनेकमूर्तिः	७२१	६०	७७८	७८१
५७	अन्तकः	५२०	६८	५८३	५६२
५८	अन्नम्	६८३	११८	१००८	१०१४
५६	अन्नादः	६८४	११८	१००८	१०१५
६०	अपराजितः	७१६	८६	७६७	७७७
६१	अपराजितः	८६२	१०५	६१६	६१६
६२	अपां निधिः	३२३	४८	३६५	३७२
६३	अप्ययः	६००	१०६	६४६	६४८
६४	अप्रतिरथः	६३६	८१	७०४	७०८
६५	अप्रमत्तः	३२५	४८	३६५	३७३
६६	अप्रमेयः	४६	१६	७७	७७
६७	अप्रमेयात्मा	२४८	४०	२७६	२८१
६८	अभिप्रायः	८७१	१०६	६२२	६२६
६६	अभूः (भूः)	४३७	६०	४६६	४६६
७०	अमरप्रभुः	४६	१६	७७	८१
७१	अमानी	७४७	६३	८०८	८०८
७२	अमितविक्रमः	५१६	६८	५८३	५८६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
७३	अमितविक्रमः	६४१	८१	७०४	७१०
७४	अमिताशनः	३७२	५३	४१६	४२५
७५	अमूर्तिः	८३०	१०२	८८५	८६१
७६	अमूर्तिमान्	७२०	६०	७७८	७८०
७७	अमृतः	११६	२६	१३६	१४१
७८	अमृतपः	५०४	६७	५७३	५७४
७६	अमृतवपुः	८१४	१००	८६३	८७०
८०	अमृतांशूद्भवः	२८३	४४	३२२	३२२
८१	अमृताशः	८१३	१००	८६३	८६६
८२	अमृत्युः	१६८	३५	२२०	२२०
८३	अमेयात्मा	१०२	२४	११८	१२६
८४	अमेयात्मा	१७६	३२	१८४	२०२
८५	अमोघः	११०	२५	१२६	१३४
८६	अमोघः	१५४	३०	१६८	१७३
८७	अम्भोनिधिः	५१७	६८	५८३	५८७
८८	अरविन्दाक्षः	३४७	५१	३६७	४००
८६	अरौद्रः	६०६	११०	६५१	६५१
६०	अर्कः	७६५	६८	८४४	८४६
६१	अर्चितः	६३४	८१	७०४	७०४
६२	अर्चिष्मान्	६३३	८१	७०४	७०४
६३	अर्थः	४३०	५६	४८५	४६०
६४	अर्हः	८७३	१०६	६२२	६२७
६५	अविज्ञाता	४८२	६४	५४३	५४६
६६	अविशिष्टः	३०६	४७	३४६	३५०
६७	अव्यङ्गः	१२६	२७	१४३	१४६
६८	अव्यक्तः	७२२	६०	७७८	७८२
६६	अव्ययः	१३	१५	३६	४१
१००	अशोकः	३३६	५०	३८५	३८६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
१०१	अश्वत्थः	८२४	१०१	८७३	८८१
१०२	असंख्येयः	२४७	४०	२७६	२७६
१०३	असत्	४७६	६४	५४३	५४७
१०४	अहः	६०	२३	११०	११४
१०५	अहःसंवर्तकः	२३२	३८	२५६	२६०
	आ				
१०६	आत्मयोनिः	६८५	११६	१०१६	१०१६
१०७	आत्मवान्	८४	२२	१०२	१०६
१०८	आदित्यः	३६	१८	६४	६५
१०६	आदित्यः	५६३	७३	६३४	६४१
११०	आदिदेवः	३३४	४६	३७६	३८३
१११	आदिदेवः	४६०	६५	५५४	५५८
११२	आधारनिलयः	६५०	११५	६८५	६८५
११३	आनन्दः	५२६	६६	५६४	५६६
११४	आनन्दी	५६०	७३	६३४	६३७
११५	आवर्तनः	२२८	३८	२५६	२५६
११६	आश्रमः	८५२	१०४	६०७	६११
	इ				
११७	इज्यः	४४६	६१	५०८	५०६
११८	इन्द्रकर्मा	७८६	६७	८३७	८४१
११६	इष्टः	३०८	४७	३४६	३४६
	ई				
१२०	ईशानः	६४	२१	८५	६२
१२१	ईश्वरः	३६	१७	५४	६३
१२२	ईश्वरः	७४	२२	१०२	१०२
	उ				
१२३	उग्रः	४२१	५८	४७४	४८०
१२४	उत्तरः	४६४	६६	५६३	५६३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
१२५	उत्तारणः	६२३	११२	६६५	६६५
१२६	उदीर्णः	६२४	८०	६६८	६६८
१२७	उदुम्बरः	८२३	१०१	८७३	८८०
१२८	उद्भवः	३७३	५४	४२६	४२६
१२९	उद्भवः	७६०	६८	८४४	८४४
१३०	उपेन्द्रः	१५१	३०	१६८	१६८
	ऊ				
१३१	ऊर्जितः	१५६	३०	१६८	१७६
१३२	ऊर्जितशासनः	६१०	११०	६५१	६५४
१३३	ऊर्ध्वगः	६५४	११५	६८५	६८६
	ऋ				
१३४	ऋतुः	४१६	५८	४७४	४७४
१३५	ऋद्धः	२७८	४३	३१३	३१५
१३६	ऋद्धः	३५१	५१	३६७	४०३
	ए				
१३७	एकः	७२५	९१	७८५	७८५
१३८	एकपात्	७७२	९५	८२५	८२८
१३९	एकात्मा	६६५	११६	६६३	६६८
	ओ				
१४०	ओजस्तेजोद्युतिधरः	२७५	४३	३१३	३१३
	औ				
१४१	औषधम्	२८७	४४	३२२	३२६
	क				
१४२	कः	७२८	९१	७८५	७८६
१४३	कथितः	८४८	१०४	६०७	६०८
१४४	कनकाङ्गदी	५४१	७१	६१२	६१५
१४५	कपिः	८६६	१०६	६४६	६४७
१४६	कपिलः	८६८	१०६	६४६	६४७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
१४७	कपीन्द्रः	५०१	६६	५६३	५७१
१४८	करणम्	३७८	५४	४२६	४३२
१४६	कर्ता	३८०	५४	४२६	४३४
१५०	कविः	१३२	२७	१४३	१५०
१५१	कान्तः	२६६	४५	३३२	३३७
१५२	कान्तः	६५४	८३	७१६	७२२
१५३	कामः	२६७	४५	३३२	३३८
१५४	कामदेवः	६५१	८३	७१६	७२०
१५५	कामकृत्	२६५	४५	३२६	३३६
१५६	कामप्रदः	२६८	४५	३३२	३४१
१५७	कामपालः	६५२	८३	७१६	७२०
१५८	कामहा	२६४	४५	३३२	३३६
१५६	कामी	६५३	८३	७१६	७२१
१६०	कारणम्	३७६	५४	४२६	४३३
१६१	कालः	४१८	५८	४७४	४७७
१६२	कालनेमिनिहा	६४२	८२	७११	७११
१६३	किम्	७२६	६१	७८५	७८६
१६४	कुण्डली	६०७	११०	६५१	६५२
१६५	कुन्दः	८०६	१००	८६३	८६५
१६६	कुन्दरः	८०८	१००	८६३	८६४
१६७	कुमुदः	५८६	७६	६६८	६७०
१६८	कुमुदः	८०७	१००	८६३	८६३
१६६	कुम्भः	६३५	८१	७०४	७०५
१७०	कुवलेशयः	५६०	७६	६६८	६७०
१७१	कृतकर्मा	७८८	६७	८३७	८४२
१७२	कृतज्ञः	८२	२२	१०२	१०८
१७३	कृतज्ञः	५३२	७०	६०५	६०७
१७४	कृतलक्षणः	४८५	६४	५४३	५५२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
१७५	कृताकृतः	१३६	२८	१५२	१५४
१७६	कृतागमः	६५५	८३	७१६	७२३
१७७	कृतागमः	७८६	६७	८३७	८४३
१७८	कृतान्तकृत्	५३७	७०	६०५	६११
१७६	कृतिः	८३	२२	१०२	१०८
१८०	कृशः	८३७	१०३	८६५	८६७
१८१	कृष्णः	५७	२०	८५	८६
१८२	कृष्णः	५५०	७२	६२२	६२४
१८३	केशवः	२३	१६	४६	५०
१८४	केशवः	६४८	८२	७११	७१५
१८५	केशिहा	६४६	८२	७११	७१६
१८६	क्रतुः	४४८	६१	५०८	५११
१८७	क्रमः	७६	२२	१०२	१०५
१८८	क्रोधकृत्कर्ता	३१५	४७	३४६	३६१
१८६	क्रोधहा	३१४	४७	३४६	३५८
१६०	क्षमः	४४२	६०	४६६	५०४
१६१	क्षमिणां वरः	६१६	१११	६५८	६६२
१६२	क्षरम्	४८०	६४	५४३	५४८
१६३	क्षामः	४४३	६०	४६६	५०५
१६४	क्षामः	८५४	१०४	६०७	६१३
१६५	क्षितीशः	६६१	११६	१०१६	१०२३
१६६	क्षेत्रज्ञः	१६	१५	३६	४४
१६७	क्षेमकृत्	५६६	७७	६७६	६७८
१६८	क्षोभणः	३७४	५४	४२६	४२८
	ख				
१६६	खण्डपरशुः	५६८	७४	६४५	६४६
	ग				
२००	गतिसत्तमः	५६६	७३	६३४	६४४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
२०१	गदाग्रजः	७६४	६४	८१७	८२४
२०२	गदाधरः	६६७	१२०	१०२५	१०२६
२०३	गभस्तिनेमिः	४८६	६५	५५४	५५४
२०४	गभीरः	५४३	७१	६१२	६१८
२०५	गभीरात्मा	६३७	११३	६७१	६७५
२०६	गरुडध्वजः	३५४	५१	३६७	४०५
२०७	गहनः	३८२	५४	४२६	४३६
२०८	गहनः	५४४	७१	६१२	६१८
२०६	गुणभृत्	८३६	१०३	८६५	८६६
२१०	गुप्तः	५४५	७१	६१२	६१६
२११	गुरुः	२०६	३६	२३१	२३१
२१२	गुरुतमः	२१०	३६	२३१	२३४
२१३	गुहः	३८३	५४	४२६	४३३
२१४	गुह्यः	५४२	७१	६१२	६१७
२१५	गोपतिः	४६५	६६	५६३	५६३
२१६	गोपतिः	५६२	७६	६६८	६७३
२१७	गोप्ता	४६६	६६	५६३	५६५
२१८	गोप्ता	५६३	७६	६६८	६७३
२१६	गोविदांपतिः	१८८	३३	२०३	२०६
२२०	गोविन्दः	१८७	३३	२०३	२०८
२२१	गोविन्दः	५३६	७१	६१२	६१४
२२२	गोहितः	५६१	७६	६६८	६७२
२२३	ग्रामणीः	२१६	३७	२४२	२४४
	घ				
२२४	घृताशीः	७४४	६२	७६७	८०४
	च				
२२५	चक्रगदाधरः	५४६	७१	६१२	६२०
२२६	चक्री	६०८	११०	६५१	६५३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
२२७	चक्री	६६५	१२०	१०२५	१०२७
२२८	चतुरश्रः	६३६	११३	६७१	६७४
२२६	चतुरात्मा	१३७	२८	१५२	१५५
२३०	चतुरात्मा	७६६	६५	८२५	८२५
२३१	चतुर्गतिः	७६८	६५	८२५	८२५
२३२	चतुर्दंष्ट्रः	१३६	२८	१५२	१५७
२३३	चतुर्बाहुः	७६६	६५	८२५	८२५
२३४	चतुर्भावः	७७०	६५	८२५	८२५
२३५	चतुर्भुजः	१४०	२८	१५२	१५८
२३६	चतुर्मूर्तिः	७६५	६५	८२५	८२५
२३७	चतुर्वेदवित्	७७१	६५	८२५	८२५
२३८	चतुर्व्यूहः	१३८	२८	१५२	१५६
२३६	चतुर्व्यूहः	७६७	६५	८२५	८२५
२४०	चन्दनाङ्गदी	७४०	६२	७६७	८००
२४१	चन्द्रांशुः	२८१	४३	३१३	३१६
२४२	चलः	७४६	६२	७६७	८०६
२४३	चाणूरान्ध्रनिषूदनः	८२५	१०१	८७३	८८३
	छ				
२४४	छिन्नसंशयः	६२३	७६	६६०	६६०
	ज				
२४५	जगतःसेतुः	२८८	४४	३२२	३२८
२४६	जगदादिजः	१४५	२६	१६२	१६४
२४७	जनजन्मादिः	६४७	११४	६७८	६८२
२४८	जननः	६४६	११४	६७८	६८२
२४६	जनार्दनः	१२६	२७	१४३	१४५
२५०	जनेश्वरः	३४१	५०	३८५	३६१
२५१	जन्ममृत्यु-जरातिगः	६६६	११६	६६३	६६६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
२५२	जयः	५०६	६७	५७३	५७७
२५३	जयन्तः	७६८	६८	८४४	८५३
२५४	जह्नुः	२४४	३६	२६६	२७४
२५५	जितक्रोधः	४६२	६२	५१८	५२८
२५६	जितमन्युः	६३४	११३	६७१	६७३
२५७	जितामित्रः	५२४	६६	५६४	५६७
२५८	जीवः	५१३	६८	५८३	५८३
२५९	जीवनः	६३०	११२	६६५	६६६
२६०	जेता	१४८	२६	१६२	१६६
२६१	ज्ञानगम्यः	४६७	६६	५६३	५६६
२६२	ज्ञानमुत्तमम्	४५४	६१	५०८	५१७
२६३	ज्येष्ठः	६७	२१	८५	६४
२६४	ज्योतिः	८७७	१०७	६२६	६३१
२६५	ज्योतिरादित्यः	५६४	७३	६३४	६४२
२६६	ज्योतिर्गणेश्वरः	६१६	७६	६६०	६६३
	त				
२६७	तत्	७३१	६१	७८५	७६१
२६८	तत्त्वम्	६६३	११६	६६३	६६७
२६९	तत्त्ववित्	६६४	११६	६६३	६६७
२७०	तन्तुवर्धनः	७८५	६७	८३७	८४०
२७१	तारः	३३८	५०	३८५	३८७
२७२	तारः	६६८	११७	१००१	१००२
२७३	तारणः	३३७	५०	३८५	३८७
२७४	तीर्थकरः	६६१	८७	७४६	७५०
२७५	तुष्टः	३६१	५५	४३८	४४६
२७६	तेजोवृषः	७५७	६४	८१७	८१८
२७७	त्रिककुब्धाम	६१	२०	८५	८६
२७८	त्रिदशाध्यक्षः	५३५	७०	६०५	६१०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
२७६	त्रिपदः	५३४	७०	६०५	६०६
२८०	त्रिलोकधृक्	७५१	९३	८०८	८१२
२८१	त्रिलोकात्मा	६४६	८२	७११	७१४
२८२	त्रिलोकेशः	६४७	८२	७११	७१४
२८३	त्रिविक्रमः	५३०	६६	५६४	६०१
२८४	त्रिसामा	५७४	७५	६५५	६५५
२८५	त्वष्टा	५२	१६	७७	८३
	द				
२८६	दक्षः	४२३	५८	४७४	४८३
२८७	दक्षः	६१७	१११	६५८	६६०
२८८	दक्षिणः	६१८	१११	६५८	६६१
२८६	दण्डः	८५६	१०५	६१६	६१७
२६०	दमः	८६१	१०५	६१६	६१६
२६१	दमनः	१६०	३४	२१०	२११
२६२	दमयिता	८६०	१०५	६१६	६१८
२६३	दर्पदः	७१३	८६	७६७	७७५
२६४	दर्पहा	७१२	८६	७६७	७७४
२६५	दामोदरः	३६७	५३	४१६	४१६
२६६	दारुणः	५६६	७४	६४५	६४७
२६७	दाशार्हः	५११	६७	५७३	५७८
२६८	दिविस्पृक्	५७१	७४	६४५	६४६
२६६	दिशः	६४०	११३	६७१	६७७
३००	दीप्तमूर्तिः	७१६	९०	७७८	७८०
३०१	दुरतिक्रमः	७७६	६६	८२६	८३२
३०२	दुराधर्षः	८१	२२	१०२	१०७
३०३	दुरारिहा	७८१	६६	८२६	८३६
३०४	दुरावासः	७८०	६६	८२६	८३५
३०५	दुर्गः	७७६	६६	८२६	८३४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
३०६	दुर्गमः	७७८	६६	८२६	८३४
३०७	दुर्जयः	७७५	६६	८२६	८३१
३०८	दुर्धरः	२६६	४२	३००	३०२
३०६	दुर्धरः	७१५	८६	७६७	७७६
३१०	दुर्मर्षणः	२०५	३५	२२०	२२७
३११	दुर्लभः	७७७	६६	८२६	८३३
३१२	दुष्कृतिहा	६२४	११२	६६५	६६६
३१३	दुःस्वप्ननाशनः	६२६	११२	६६५	६६७
३१४	दृढः	५५१	७२	६२२	६२५
३१५	दृप्तः	७१४	८६	७६७	७७५
३१६	देवः	३७५	५४	४२६	४२६
३१७	देवकीनन्दनः	६८६	११६	१०१६	१०२०
३१८	देवभृद्गुरुः	४६३	६५	५५४	५६१
३१६	देवेशः	४६२	६५	५५४	५६०
३२०	द्युतिधरः	७५८	६४	८१७	८१८
३२१	द्रविणप्रदः	५७०	७४	६४५	६४८
	ध				
३२२	धनञ्जयः	६६०	८३	७१६	७२७
३२३	धनुर्धरः	८५७	१०५	६१६	६१६
३२४	धनुर्वेदः	८५८	१०५	६१६	६१७
३२५	धनेश्वरः	४७४	६३	५२६	५४२
३२६	धन्यः	७५४	६३	८०८	८१५
३२७	धन्वी	७६	२२	१०२	१०३
३२८	धरणीधरः	२३५	३८	२५६	२६४
३२६	धराधरः	७५६	६३	८०८	८१६
३३०	धर्मः	४०३	५६	४४८	४५६
३३१	धर्मकृत्	४७६	६४	५४३	५४४
३३२	धर्मगुप्	४७५	६४	५४३	५४३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
३३३	धर्मयूपः	४३८	६०	४६६	५००
३३४	धर्मविदुत्तमः	४०४	५६	४४८	४५७
३३५	धर्माध्यक्षः	१३५	२८	१५२	१५४
३३६	धर्मी	४७७	६४	५४३	५४५
३३७	धाता	४३	१८	६४	७४
३३८	धातुरुत्तमः	४५	१८	६४	७६
३३६	धाम	२११	३६	२३१	२३५
३४०	धुर्यः	३२६	४६	३७६	३७७
३४१	धृतात्मा	१६०	३०	१६८	१८१
३४२	ध्रुवः	३८८	५५	४३८	४४३
	न				
३४३	नक्षत्रनेमिः	४४०	६०	४६६	५०२
३४४	नक्षत्री	४४१	६०	४६६	५०४
३४५	नन्दः	५२८	६६	५६४	६००
३४६	नन्दकी	६६४	१२०	१०२५	१०२६
३४७	नन्दनः	५२७	६६	५६५	५६६
३४८	नन्दिः	६१८	७६	६६०	६६३
३४६	नयः	३६६	५६	४४८	४५२
३५०	नरः	२४६	३६	२६६	२७८
३५१	नहुषः	३१२	४७	३४६	३५५
३५२	नारसिंहवपुः	२१	१६	४६	५०
३५३	नारायणः	२४५	३६	२६६	२७५
३५४	निग्रहः	७६१	६४	८१७	८२१
३५५	निधिरव्ययः	३०	१७	५४	५६
३५६	निमिषः	२१४	३६	२३१	२३८
३५७	नियन्ता	८६४	१०५	६१६	६२०
३५८	नियमः (अनियमः)	१६१	३०	१६८	१८१
३५६	नियमः	८६५	१०५	६१६	६२१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
३६०	निर्गुणः	८४०	१०३	८६५	६००
३६१	निर्वाणम्	५७७	७५	६५५	६५६
३६२	निवृत्तात्मा	२२६	३८	२५६	२५७
३६३	निवृत्तात्मा	५६७	७७	६७६	६७७
३६४	निष्ठा	५८३	७५	६५५	६६५
३६५	नेता	२२२	३७	२४२	२४८
३६६	नेयः	३६८	५६	४४८	४५१
३६७	नैकः	७२६	६१	७८५	७८६
३६८	नैककर्मकृत्	४६६	६३	५२६	५३३
३६६	नैकजः	८६०	१०८	६३७	६४१
३७०	नैकमायः	३०२	४६	३४२	३४४
३७१	नैकरूपः	२७१	४२	३००	३०८
३७२	नैकशृङ्गः	७६३	६४	८१७	८२२
३७३	नैकात्मा	४६८	६३	५२६	५३४
३७४	न्यग्रोधः	८२२	१०१	८७३	८७८
३७५	न्यायः	२२१	३७	२४२	२४७
	प				
३७६	पणः	६५८	११५	६८५	६६३
३७७	पदमनुत्तमम्	७३२	६१	७८५	७६२
३७८	पद्मगर्भः	३४८	५१	३६७	४०१
३७६	पद्मनाभः	४८	१६	७७	८०
३८०	पद्मनाभः	१६६	३४	२१०	२१८
३८१	पद्मनाभः	३४६	५१	३६७	३६८
३८२	पद्मनिभेक्षणः	३४५	५०	३८५	३६६
३८३	पद्मी	३४४	५०	३८५	३६६
३८४	परमस्पष्टः	३६०	५५	४३८	४४५
३८५	परमात्मा	११	१५	३६	३७
३८६	परमेश्वरः	३७७	५४	४२६	४३१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
३८७	परमेष्ठी	४१६	५८	४७४	४७८
३८८	परर्द्धिः	३८६	५५	४३८	४४४
३८६	परायणम्	५८५	७५	६५५	६६७
३६०	परिग्रहः	४२०	५८	४७४	४७६
३६१	पर्जन्यः	८१०	१००	८६३	८६६
३६२	पर्यवस्थितः	६३१	११२	६६५	६७०
३६३	पवनः	२६१	४५	३३२	३३३
३६४	पवित्रम्	६२	२०	८५	८६
३६५	पापनाशनः	६६२	११६	१०१६	१०२५
३६६	पावनः	२६२	४५	३३२	३३४
३६७	पावनः	८११	१००	८६३	८६८
३६८	पुण्डरीकाक्षः	१११	२५	१२६	१३४
३६६	पुण्यः	६८७	८६	७४०	७४७
४००	पुण्यः	६२५	११२	६६५	६६६
४०१	पुण्यकीर्तिः	६८८	८६	७४०	७४७
४०२	पुण्यश्रवण-कीर्तनः	६२२	१११	६५८	६६४
४०३	पुनर्वसुः	१५०	२६	१६२	१६७
४०४	पुरन्दरः	३३५	४६	३७६	३८४
४०५	पुरातनः	४६८	६६	५६३	५६७
४०६	पुरुजित्	५०६	६७	५७३	५७५
४०७	पुरुषः	१४	१५	३६	४२
४०८	पुरुषः	४०६	५७	४५६	४६२
४०६	पुरुषोत्तमः	२४	१६	४६	५२
४१०	पुरुसत्तमः	५०७	६७	५७३	५७६
४११	पुष्कराक्षः	४०	१८	६४	७१
४१२	पुष्कराक्षः	५५६	७२	६२२	६३२
४१३	पुष्टः	३६२	५५	४३४	४४२
४१४	पुष्पहासः	६५२	११५	६८५	६८८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
४१५	पूतात्मा	१०	१५	३६	३६
४१६	पूरयिता	६८६	८६	७४०	७४६
४१७	पूर्णः	६८५	८६	७४०	७४५
४१८	पृथुः	४१०	५७	४५६	४६७
४१६	पेशलः	६१६	१११	६५८	६५६
४२०	प्रकाशनः	२७४	४२	३००	३११
४२१	प्रकाशात्मा	२७६	४३	३१३	३१४
४२२	प्रग्रहः	७६०	६४	८१७	८२०
४२३	प्रजागरः	६५३	११५	६८५	६८८
४२४	प्रजापतिः	६६	२१	८५	६६
४२५	प्रजापतिः	१६७	३४	२१०	२१८
४२६	प्रजाभवः	८६	२३	११०	११३
४२७	प्रणवः	४०६	५७	४५६	४६५
४२८	प्रणवः	६५७	११५	६८५	६६२
४२६	प्रतर्दनः	५६	२०	८५	८८
४३०	प्रतापनः	२७७	४३	३२३	३२५
४३१	प्रत्ययः	६३	२३	११०	११६
४३२	प्रतिष्ठितः	३२६	४८	३६५	३७४
४३३	प्रथितः	३१६	४८	३६५	३६७
४३४	प्रद्युम्नः	६४०	८१	७०४	७०६
४३५	प्रधानपुरुषेश्वरः	२०	१६	४६	४८
४३६	प्रपितामहः	६७०	११७	१०००	१००३
४३७	प्रभवः	३४	१७	५४	६२
४३८	प्रभुः	३५	१७	५४	६२
४३६	प्रभुः	२६६	४५	३३२	३४६
४४०	प्रभूतः	६०	२०	८५	८८
४४१	प्रमाणम्	४२८	५६	४८५	४८८
४४२	प्रमाणम्	६५६	११६	६६३	६६४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
४४३	प्रमोदनः	५२५	६६	५६४	५६८
४४४	प्रसन्नात्मा	२३७	३६	२६६	२६७
४५५	प्रांशुः	१५३	३०	१६८	१७२
४४६	प्राग्वंशः	८४५	१०३	८६५	६०४
४४७	प्राणः	६६	२१	८५	६३
४४८	प्राणः	३२०	४८	३६५	३६६
४४६	प्राणः	४०७	५७	४५६	४६३
४५०	प्राणजीवनः	६६२	११६	६६३	६६६
४५१	प्राणदः	६५	२१	८५	६२
४५२	प्राणदः	३२१	४८	३६५	३६६
४५३	प्राणदः	४०८	५७	४५६	४६४
४५४	प्राणदः	६५६	११५	६८५	६६१
४५५	प्राणनिलयः	६६०	११६	६६३	६६४
४५६	प्राणभृत्	६६१	११६	६६३	६६५
४५७	प्रियकृत्	८७४	१०६	६२२	६२८
४५८	प्रियार्हः	८७२	१०६	६२२	६२६
४५६	प्रीतिवर्धनः	८७५	१०६	६२२	६२६
	ब				
४६०	बभ्रुः	११६	२६	१३६	१३६
४६१	बहुशिरा	११५	२६	१३६	१३८
४६२	बीजमव्ययम्	४२६	५६	४८५	४८६
४६३	बृहत्	८३६	१०३	८६५	८६५
४६४	बृहद्भानुः	३३३	४६	३७६	३८२
४६५	बृहद्रूपः	२७२	४२	३००	३१०
४६६	ब्रह्म	६६४	८४	७२८	७३०
४६७	ब्रह्मकृत्	६६२	८४	७२८	७२६
४६८	ब्रह्मज्ञः	६६६	८४	७२८	७३४
४६६	ब्रह्मण्यः	६६१	८४	७२८	७२८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
४७०	ब्रह्मवित्	६६६	८४	७२८	७३१
४७१	ब्रह्मविवर्धनः	६६५	८४	७२८	७३१
४७२	ब्रह्मा	६६३	८४	७२८	७३०
४७३	ब्रह्मी	६६८	८४	७२८	७३३
४७४	ब्राह्मणः	६६७	८४	७२८	७३४
४७५	ब्राह्मणप्रियः	६७०	८४	७२८	७३५
	भ				
४७६	भक्तवत्सलः	७३६	९१	७८५	७६६
४७७	भगवान्	५५८	७३	६३४	६३४
४७८	भगहा	५५६	७३	६३४	६३६
४७९	भयकृत्	८३३	१०२	८८५	८६३
४८०	भयनाशनः	८३४	१०२	८८५	८६४
४८१	भयापहः	९३५	११३	९७१	९७३
४८२	भर्ता	३३	१७	५४	६१
४८३	भानुः	२८४	४४	३२२	३२३
४८४	भारभृत्	८४७	१०४	९०७	९०७
४८५	भावः	७	१४	२४	३०
४८६	भावनः	३२	१७	५४	६१
४८७	भास्करद्युतिः	२८२	४३	३१३	३२१
४८८	भिषक्	५७९	७५	६५५	६६२
४८९	भीमः	३५७	५२	४०६	४०८
४९०	भीमः	६४८	११४	९७८	९८४
४९१	भीमपराक्रमः	९४९	११४	९७८	९८४
४९२	भुजगोत्तमः	१९३	३४	२१०	२१४
४९३	भूगर्भः	७१	२१	८५	९८
४९४	भूतकृत्	५	१४	२४	२९
४९५	भूतभव्यभवत्प्रभुः	४	१४	२४	२८
४९६	भूतभव्यभवन्नाथः	२९०	४५	३३२	३३२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
४६७	भूतमहेश्वरः	४८६	६५	५५४	५५८
४६८	भूतभावनः	६	१४	२४	३५
४६६	भूतभृत्	६	१४	२४	३०
५००	भूतात्मा	८	१४	२४	३३
५०१	भूतादिः	२६	१७	५४	५८
५०२	भूतावासः	७०८	८६	७६७	७६७
५०३	भूतिः	६३०	८०	६६८	७०२
५०४	भूरिदक्षिणः	५०२	६६	५६३	५७२
५०५	भूर्भुवः	६४२	११४	६७८	६७६
५०६	भूर्भुवःस्वस्तरुः	६६७	११७	१०००	१०००
५०७	भूशयः	६२८	८०	६६८	७००
५०८	भूषणः	६२६	८०	६६८	७०१
५०६	भेषजम्	५७८	७५	६५५	६६१
५१०	भोक्ता	१४३	२६	१६२	१६३
५११	भोक्ता	५००	६६	५६३	५६६
५१२	भोक्ता	८८८	१०८	६३७	६४०
५१३	भोजनम्	१४२	२६	१६२	१६२
४१४	भ्राजिष्णुः	१४१	२६	१६२	१६२
	म				
५१५	मङ्गलं परम्	६३	२०	८५	६१
५१६	मधुः	१६८	३१	१८४	१६०
५१७	मधुसूदनः	७३	२१	८५	१००
५१८	मनुः	५१	१६	७७	८२
५१६	मनोजवः	६६०	८७	७४६	७४६
५२०	मनोहरः	४६१	६२	५१८	५२६
५२१	मन्त्रः	२८०	४३	३१३	३१७
५२२	मरीचिः	१८६	३४	२१०	२१०
५२३	महर्द्धिः	३५०	५१	३६७	४०३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
५२४	महर्षिःकपिलाचार्यः	५३१	७०	६०५	६०५
५२५	महाकर्मा	६७२	८५	७३५	७३६
५२६	महाकर्मा	७८७	६७	८३७	८४२
५२७	महाकोशः	४३२	५६	४८५	४६२
५२८	महाक्रतुः	६७५	८५	७३५	७३८
५२६	महाक्रमः	६७१	८५	७३५	७३६
५३०	महाक्षः	३५३	५१	३६७	४०४
५३१	महागर्तः	८०४	६६	८५५	८६०
५३२	महातपाः	१२२	२६	१३६	१४२
५३३	महातेजाः	६७३	८५	७३५	७३६
५३४	महादेवः	४६१	६५	५५४	५५६
५३५	महाद्युतिः	१७६	३२	१८४	१५८
५३६	महाद्रिधृक्	१८०	३२	१८४	२०२
५३७	महाधनः	४३४	५६	४६५	४६७
५३८	महान्	८४१	१०३	८६५	६०१
५३६	महानिधिः	८०६	६६	८८५	८६२
५४०	महाबलः	१७२	३१	१८४	१६४
५४१	महाबुद्धिः	१७३	३२	१८४	१६६
५४२	महाभागः	३७०	५३	४१६	४२२
५४३	महाभूतः	८०५	६६	८५५	८६१
५४४	महाभोगः	४३३	५६	४८५	४६४
५४५	महामखः	४३६	६०	४६६	५०१
५४६	महामनाः	५५७	७२	६२२	६३३
५४७	महामायः	१७०	३१	१८४	१६२
५४८	महामूर्तिः	७१८	६०	७७८	७७६
५४६	महायज्ञः	६७७	८५	७३५	७३६
५५०	महायज्वा	६७६	८५	७३५	७३८
५५१	महार्हः	५२२	६६	५६४	५६५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
५५२	महावराहः	५३८	७१	६१२	६१२
५५३	महावीर्यः	१७४	३२	१८४	१६७
५५४	महाशक्तिः	१७५	३२	१८४	१६८
५५५	महाशनः	३०३	४६	३४२	३४५
५५६	महाशृङ्गः	५३६	७०	६०५	६१०
५५७	महास्वनः	४१	१८	६४	७२
५५८	महाहविः	६७८	८५	७३५	७३६
५५९	महाह्रदः	८०३	९९	८५५	८५९
५६०	महीधरः	३१७	४७	३४६	३६३
५६१	महीधरः	३६६	५३	४१६	४२१
५६२	महीभर्ता	१८२	३३	२०३	२०४
५६३	महेज्यः	४४७	६१	५०८	५१०
५६४	महेन्द्रः	२६८	४२	३००	३०५
५६५	महेष्वासः	१८१	३३	३०३	३०३
५६६	महोत्साहः	१७१	३१	१८४	१६३
५६७	महोदधिशयः	५१६	६८	५८३	५६१
५६८	महोरगः	६७४	८५	७३५	७३७
५६९	माधवः	७२	२१	८५	९९
५७०	माधवः	१६७	३१	१८४	१८६
५७१	माधवः	७३५	९१	७८५	७६५
५७२	मानदः	७४८	९३	८०८	८०९
५७३	मान्यः	७४६	९३	८०८	८१०
५७४	मार्गः	३६५	५३	४१६	४१७
५७५	मार्गः	३६७	५६	४४८	४५१
५७६	मुकुन्दः	५१५	६८	५८३	५८५
५७७	मुक्तानां परमा गतिः	१२	१५	३६	४०
५७८	मेदिनीपतिः	५३३	७०	६०५	६०८
५७९	मेधजः	७५३	९३	८०८	८१४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
५८०	मेधावी	७७	२२	१०२	१०४
	य				
५८१	यज्ञः	४४५	६१	५०८	५०८
५८२	यज्ञः	६७१	११७	१०००	१००४
५८३	यज्ञकृत्	६७७	११८	१००८	१००६
५८४	यज्ञगुह्यम्	६८२	११८	१००८	१०१२
५८५	यज्ञपतिः	६७२	११७	१०००	१००५
५८६	यज्ञभुक्	६७६	११८	१००८	१०१०
५८७	यज्ञभृत्	६७६	११८	१००८	१००८
५८८	यज्ञवाहनः	६७५	११७	१०००	१००८
५८९	यज्ञसाधनः	६८०	११८	१००८	१०११
५९०	यज्ञाङ्गः	६७४	११७	१०००	१००६
५९१	यज्ञान्तकृत्	६८१	११८	१००८	१०१२
५९२	यज्ञी	६७८	११८	१००८	१०१०
५९३	यज्वा	६७३	११७	१०००	१००५
५९४	यत्	७३०	९१	७८५	७९०
५९५	यदुश्रेष्ठः	७०५	८८	७५६	७६३
५९६	यमः (अयमः)	१६२	३०	१६८	१८१
५९७	यमः	८६६	१०५	६१६	६२२
५९८	युगादिकृत्	३००	४६	३४२	३४२
५९९	युगावर्तः	३०१	४६	३४२	३४४
६००	योगः	१८	१६	४६	४६
६०१	योगविदां नेता	१९	१६	४६	४७
६०२	योगी	८४६	१०४	६०७	६०६
६०३	योगीशः	८५०	१०४	६०७	६१०
	र				
६०४	रक्षणः	६२८	११२	६६५	६६८
६०५	रणप्रियः	६८४	८६	७४०	७४४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६०६	रत्नगर्भः	४७३	६३	५२६	५३६
६०७	रत्ननाभः	७६३	६८	८४४	८४७
६०८	रथाङ्गपाणिः	६६८	१२०	१०२५	१०३०
६०६	रविः	८८१	१०७	६२६	६३४
६१०	रविलोचनः	८८५	१०७	६२६	६३६
६११	रामः	३६४	५६	४४८	४४८
६१२	रुचिराङ्गदः	६४५	११४	६७८	६८१
६१३	रुद्रः	११४	२६	१३६	१३७
६१४	रोहितः	३६४	५३	४१६	४१७
	ल				
६१५	लक्ष्मीः	६४३	११४	६७८	६७६
६१६	लक्ष्मीवान्	३६१	५२	४०६	४१३
६१७	लोकत्रयाश्रयः	६१४	७८	६८५	६८६
६१८	लोकनाथः	७३४	६१	७८५	७६४
६१६	लोकबन्धुः	७३३	६१	७८५	७६४
६२०	लोकसारङ्गः	७८३	६७	८३७	८३८
६२१	लोकस्वामी	७५०	६३	८०८	८११
६२२	लोकाधिष्ठानम्	८६४	१०८	६३७	६४४
६२३	लोकाध्यक्षः	१३३	२८	१५२	१५२
६२४	लोहिताक्षः	५८	२०	८५	८७
	व				
६२५	वंशवर्धनः	८४६	१०३	८६५	६०६
६२६	वत्सरः	४७०	६३	५२६	५३६
६२७	वत्सलः	४७१	६३	५२६	५३७
६२८	वत्सी	४७२	६३	५२६	५३६
६२६	वनमाली	५६१	७३	६३४	६३८
६३०	वरदः	३३०	४६	३७६	३७८
६३१	वराङ्गः	७३६	६२	७६७	७६६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६३२	वरारोहः	१२१	२६	१३६	१४२
६३३	वरुणः	५५३	७२	६२२	६२८
६३४	वर्धनः	२६१	४१	२६१	२६७
६३५	वर्धमानः	२६२	४१	२६१	२६८
६३६	वषट्कारः	३	१४	२४	२७
६३७	वसुः	१०४	२५	१२६	१२६
६३८	वसुः	२७०	४२	३०३	३०७
६३६	वसुः	६६६	८७	७४६	७५४
६४०	वसुदः	२६६	४२	३००	३०६
६४१	वसुप्रदः	६६३	८७	७४६	७५१
६४२	वसुप्रदः	६६४	८७	७४६	७५२
६४३	वसुमनाः	१०५	२५	१२६	१३०
६४४	वसुमनाः	६६७	८७	७४६	७५४
६४५	वसुरेताः	६६२	८७	७४६	७५०
६४६	वह्निः	२३३	३८	२५६	२६२
६४७	वाग्मी	२६७	४२	३००	३०६
६४८	वाचस्पतिरयोनिजः	५७३	७४	६४५	६५३
६४६	वाचस्पतिरुदारधीः	२१७	३६	२३१	२४०
६५०	वाजसनः	७६६	६८	८४४	८५१
६५१	वामनः	१५२	३०	१६८	१७०
६५२	वायुः	४१४	५७	४५६	४७१
६५३	वायुवाहनः	३३१	४६	३७६	३७६
६५४	वायुवाहनः	८५६	१०४	६०७	६१५
६५५	वारुणः	५५४	७२	६२२	६२६
६५६	वासवानुजः	३२२	४८	३६५	३६६
६५७	वासुदेवः	३३२	४६	३७६	३८१
६५८	वासुदेवः	६६५	८७	७४६	७५३
६५६	वासुदेवः	७०६	८६	७६७	७७०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६६०	विकर्ता	३८१	५४	४२६	४३५
६६१	विक्रमः	७८	२२	१०२	१०४
६६२	विक्रमी	७५	२२	१०२	१०३
६६३	विक्रमी	६०६	११०	६५१	६५४
६६४	विक्षरः	३६३	५३	४१६	४१६
६६५	विजयः	१४७	२६	१६२	१६५
६६६	विजितात्मा	६२०	७६	६६०	६६४
६६७	विदारणः	४६४	६२	५१८	५३०
६६८	विदिशः	६३८	११३	६७१	६७६
६६६	विद्वत्तमः	६२०	१११	६५८	६६२
६७०	विधाता	४४	१८	६४	७५
६७१	विधाता	४८४	६४	५४३	५५१
६७२	विधेयात्मा (अविधेयात्मा)	६२१	७६	६६०	६६५
६७३	विनयः	५०८	६७	५७३	५७६
६७४	विनयितासाक्षी	५१४	६८	५८३	५८४
६७५	विभुः	२४०	३६	२६६	२७०
६७६	विभुः	८८०	१०७	६२६	६३३
६७७	विमुक्तात्मा	४५२	६१	५०८	५१५
६७८	विरतः	३६६	५६	४४८	४५०
६७६	विरामः	३६५	५६	४४८	४४६
६८०	विरोचनः	८८२	१०७	६२६	६३४
६८१	विविक्तः	२६३	४१	२६१	२६८
६८२	विशिष्टः	२४६	४०	२७६	२८२
६८३	विशुद्धात्मा	६३६	८१	७०४	७०६
६८४	विशोकः	६३१	८०	६६८	७०२
६८५	विशोधनः	६३७	८१	७०४	७०७
६८६	विश्रामः	४२४	५८	४७४	४८३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६८७	विश्रुतात्मा	२०७	३५	२२०	२२६
६८८	विश्वम्	१	१४	२४	२४
६८९	विश्वकर्मा	५०	१६	७७	८२
६९०	विश्वदक्षिणः	४२५	५८	४७४	४८५
६९१	विश्वधृक्	२३८	३९	२८६	२८९
६९२	विश्वबाहुः	३१६	४७	३४९	३६२
६९३	विश्वभुक्	२३९	३९	२६६	२६९
६९४	विश्वमूर्तिः	७१७	९०	७७८	७७८
६९५	विश्वयोनिः	११७	२६	१३६	१३९
६९६	विश्वयोनिः	१४९	२९	१६२	१६६
६९७	विश्वरेताः	८८	२३	११०	११२
६९८	विश्वात्मा	२२५	३७	२४२	२५२
६९९	विषमः	७४२	९२	७६७	८०२
७००	विष्णुः	२	१४	२४	२६
७०१	विष्णुः	२५८	४१	२६१	२६३
७०२	विष्णुः	६५७	८३	७१९	७२४
७०३	विष्वक्सेनः	१२५	२७	१४३	१४४
७०४	विस्तारः	४२६	५९	४८५	४८५
७०५	विहायसगतिः	८७६	१०७	६२६	६२९
७०६	वीतभयः	९२१	१११	६५८	६६३
७०७	वीरः	४०१	५६	४४८	४५४
७०८	वीरः	६४३	८२	७११	७१२
७०९	वीरः	६५८	८३	७१९	७२५
७१०	वीरबाहुः	४६३	६२	५१८	५२९
७११	वीरहा	१६६	३१	१८४	१८७
७१२	वीरहा	७४१	९२	७६७	८०१
७१३	वीरहा	९२७	११२	६६५	६६८
७१४	वृक्षः	५५५	७२	६२२	६३०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
७१५	वृद्धात्मा	३५२	५१	३६७	४०३
७१६	वृषः	३१३	४७	३४६	३५७
७१७	वृषकर्मा	११२	२५	१२६	१३५
७१८	वृषपर्वा	२५६	४१	२६१	२६४
७१९	वृषप्रियः	५६५	७६	६६८	६७५
७२०	वृषभः	२५७	४१	२६१	२६३
७२१	वृषभाक्षः	५६४	७६	६६८	६७४
७२२	वृषाकपिः	१०१	२४	११८	१२५
७२३	वृषाकृतिः	११३	२५	१२६	१३६
७२४	वृषाही	२५६	४१	२६१	२६१
७२५	वृषोदरः	२६०	४१	२६१	२६५
७२६	वेगवान्	३७१	५३	४१६	४२४
७२७	वेदः	१२७	२७	१४३	१४६
७२८	वेदवित्	१२८	२७	१४३	१४८
७२९	वेदवित्	१३१	२७	१४३	१५०
७३०	वेदाङ्गः	१३०	२७	१४३	१४९
७३१	वेद्यः	१६३	३१	१८४	१८४
७३२	वेधाः	५४७	७२	६२२	६२२
७३३	वैकुण्ठः	४०५	५७	४५६	४६०
७३४	वैखानः	६८७	११६	१०१६	१०१८
७३५	वैद्यः	१६४	३१	१८४	१८५
७३६	व्यक्तरूपः	३०५	४६	३४२	३४७
७३७	व्यग्रः	७६२	६४	८१७	८२२
७३८	व्यवसायः	३८४	५५	४२६	४२९
७३९	व्यवस्थानः	३८५	५५	४३८	४३८
७४०	व्यादिशः	६३६	११३	६७१	६७७
७४१	व्यापी	४६७	६३	६२६	६३३
७४२	व्याप्तः	४१३	५७	४५६	४७०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
७४३	व्यालः	६२	२३	११०	११५
	श				
७४४	शक्तिमतां श्रेष्ठः	४०२	५६	४४८	४५५
७४५	शङ्खभृत्	६६३	१२०	१०२५	१०२५
७४६	शतमूर्तिः	७२३	९०	७७८	७८३
७४७	शताननः	७२४	९०	७७८	७८४
७४८	शतानन्दः	६१७	७६	६६०	६६१
७४९	शतावर्तः	३४३	५०	३८५	३९४
७५०	शत्रुघ्नः	४१२	५७	४५६	४६६
७५१	शत्रुजित्	८२०	१०१	८७३	८७६
७५२	शत्रुतापनः	८२१	१०१	८७३	८७८
७५३	शब्दसहः	६१२	११०	९५१	९५६
७५४	शब्दातिगः	६११	११०	९५१	९५५
७५५	शमः	५८१	७५	६५५	६६४
७५६	शम्भुः	३८	१८	६४	६५
७५७	शरणम्	८६	२३	११०	१११
७५८	शरभः	३५६	५२	४०६	४०८
७५९	शरीरभूतभृत्	४६६	६६	५६३	५६८
७६०	शरीरभृत्	३४६	५१	३६७	४०२
७६१	शर्म	८७	२३	११०	११२
७६२	शर्वः	२६	१७	५४	५५
७६३	शर्वरीकरः	६१४	११०	९५१	९५७
७६४	शशबिन्दुः	२८५	४४	३२२	३२४
७६५	शान्तः	५८२	७५	६५५	६६४
७६६	शान्तिः	५८४	७५	६५५	६६६
७६७	शान्तिदः	५८७	७६	६६८	६६९
७६८	शार्ङ्गधन्वा	९९६	१२०	१०२५	१०२८
७६९	शाश्वतः	५६	२०	८५	८६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
७७०	शाश्वतस्थाणुः	१२०	२६	१३६	१४१
७७१	शाश्वतस्थिरः	६२७	८०	६६८	७००
७७२	शास्ता	२०६	३५	२२०	२२८
७७३	शिखण्डी	३११	४७	३४६	३५३
७७४	शिपिविष्टः	२७३	४२	३००	३११
७७५	शिवः	२७	१७	५४	५६
७७६	शिवः	६००	७७	६७६	६७९
७७७	शिशिरः	९१३	११०	९५१	९५७
७७८	शिष्टकृत्	२५०	४०	२७८	२८३
७७९	शिष्टेष्टः	३१०	४७	३४६	३५१
७८०	शुचिः	१५५	३०	१६८	१७५
७८१	शुचिः	२५१	४०	२७६	२८५
७८२	शुचिश्रवाः	११८	२६	१३६	१४०
७८३	शुभाङ्गः	५८६	७६	६६८	६६८
७८४	शुभाङ्गः	७८२	६७	८३७	८३७
७८५	शुभेक्षणः	३६३	५५	४३८	४४७
७८६	शून्यः	७४३	९२	७९७	८०२
७८७	शूरः	३३९	५०	८८५	८८९
७८८	शूरजनेश्वरः	६४५	८२	७११	७१३
७८९	शूरसेनः	७०४	८८	७५६	७६१
७९०	शृङ्गी	७९७	९८	८४४	८५२
७९१	शोकनाशनः	६३२	८०	६६८	७०३
७९२	शौरिः	३४०	५०	३८५	३९०
७९३	शौरिः	६४४	८२	७११	७१३
७९४	श्रमणः	८५३	१०४	९०७	९१२
७९५	श्रीकरः	६११	७८	६८५	६८७
७९६	श्रीगर्भः	३७६	५४	४२६	४२९
७९७	श्रीदः	६०५	७८	६८५	६८५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
७९८	श्रीधरः	६१०	७८	६८५	६८७
७९९	श्रीनिधिः	६०८	७८	६८५	६८६
८००	श्रीनिवासः	१८३	३३	२०३	२०५
८०१	श्रीनिवासः	६०७	७८	६८५	६८६
८०२	श्रीपतिः	६०३	७७	६७६	६८३
८०३	श्रीमतां वरः	६०४	७७	६७६	६८४
८०४	श्रीमान्	२२	१६	४६	५०
८०५	श्रीमान्	१७८	३२	१८४	२०१
८०६	श्रीमान्	२२०	३७	२४२	२४५
८०७	श्रीमान्	६१३	७८	६८५	६८९
८०८	श्रीवत्सवक्षाः	६०१	७७	६७६	६८१
८०९	श्रीवासः	६०२	७७	६७६	६८३
८१०	श्रीविभावनः	६०९	७८	६८५	६८७
८११	श्रीशः	६०६	७८	६८५	६८५
८१२	श्रुतिसागरः	२६४	४१	२९१	२९९
८१३	श्रेयः	६१२	७८	६८५	६८८
८१४	श्रेष्ठः	६८	२१	८५	८५
	स				
८१५	संन्यासकृत्	५८०	७५	६५५	६६३
८१६	संवत्सरः	९१	२३	११०	११५
८१७	संवत्सरः	४२२	५८	४७४	४८१
८१८	संवृतः	२३०	३८	२५६	२५८
८१९	संस्थानः	३८६	५५	४२८	४४०
८२०	सङ्कर्षणोऽच्युतः	५५२	७२	६२२	६२६
८२१	सङ्क्षेप्ता	५९८	७७	६७६	६७७
८२२	सङ्ग्रहः	१५८	३०	१६८	१७९
८२३	सत्	४७८	६४	५४३	५४६
८२४	सतांगतिः	१८४	३३	२०३	२०६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
८२५	सतांगतिः	४५०	६१	५०८	५१३
८२६	सत्कर्ता	२४१	३६	२६६	२७१
८२७	सत्कीर्तिः	६२२	७६	६६०	६६६
८२८	सत्कृतः	२४२	३६	२६६	२७२
८२६	सत्कृतिः	७००	८८	७५६	७५६
८३०	सत्ता	७०१	८८	७५६	७५८
८३१	सत्त्ववान्	८६७	१०६	६२२	६२२
८३२	सत्त्वस्थः	४८७	६५	५५४	५५५
८३३	सत्पथाचारः	६५५	११५	६८५	६६०
८३४	सत्परायणः	७०३	८८	७५६	७५६
८३५	सत्यः	१०६	२५	१२६	१३१
८३६	सत्यः	२१२	३६	२३१	२३६
८३७	सत्यः	८६६	१०६	६२२	६२४
८३८	सत्यधर्मपराक्रमः	२८६	४४	३२२	३३१
८३६	सत्यधर्मपरायणः	८७०	१०६	६२२	६२५
८४०	सत्यधर्मा	५२६	६६	५६४	६००
८४१	सत्यपराक्रमः	२१३	३६	२३१	२३७
८४२	सत्यमेधाः	७५५	६३	८०८	८१५
८४३	सत्यसन्धः	५१०	६७	५७३	५७७
८४४	सत्रम्	४४६	६१	५०८	५१२
८४५	सदामर्षी	८६३	१०८	६३७	६४४
८४६	सदायोगी	१६५	३१	१८४	१८६
८४७	सद्गतिः	६६६	८८	७५६	७५६
८४८	सद्भूतिः	७०२	८८	७५६	७५८
८४६	सनात्	८६६	१०६	६४६	६४६
८५०	सनातनतमः	८६७	१०६	६४६	६४६
८५१	सन्तः	६२६	११२	६६५	६६६
८५२	सन्धाता	२०१	३५	२२०	२२४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
८५३	सन्धिमान्	२०२	३५	२२०	२२४
८५४	सन्निवासः	७०६	८८	७५६	७६४
८५५	सप्तजिह्वः	८२७	१०२	८८५	८८७
८५६	सप्तवाहनः	८२६	१०२	८८५	८८६
८५७	सप्तैधाः	८२८	१०२	८८५	८८८
८५८	समः	१०६	२५	१२६	१३३
८५९	समयज्ञः	३५८	५२	४०६	४०६
८६०	समात्मा	१०७	२५	१२६	१३१
८६१	समावर्तः	७७३	९६	८२६	८२६
८६२	समितिञ्जयः	३६२	५२	४०६	४१६
८६३	समीरणः	२२३	३७	२४२	२४६
८६४	समीहनः	४४४	६०	४६६	५०७
८६५	सम्प्रमर्दनः	२३१	३८	२५६	२५८
८६६	सम्भवः	३१	१७	५४	५६
८६७	सम्मितः	१०८	२५	१२६	१३२
८६८	सर्गः	१५६	३०	१६८	१८०
८६९	सर्वः	२५	१७	५४	५४
८७०	सर्वकामदः	८५१	१०४	६०७	६११
८७१	सर्वगः	१२३	२७	१४३	१४३
८७२	सर्वज्ञः	४५३	६१	५०८	५१६
८७३	सर्वज्ञः	८१५	१००	८६३	८७१
८७४	सर्वतश्चक्षुः	६२५	८०	६६८	६६८
८७५	सर्वतोमुखः	८१६	१००	८६३	८७२
८७६	सर्वदर्शनः	६४	२३	११०	११७
८७७	सर्वदर्शी	४५१	६१	५०८	५१४
८७८	सर्वदृक्	१६६	३५	२२०	२२१
८७९	सर्वदृग्व्यासः	५७२	७४	६४५	६५१
८८०	सर्वप्रहरणायुधः	१०००	१२०	१०२५	१०३३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
८८१	सर्वयोगविनिःसृतः	१०३	२४	११८	१२८
८८२	सर्वलक्षणलक्षण्यः	३६०	५२	४०६	४१२
८८३	सर्ववागीश्वरेश्वरः	८०२	९९	८५५	८५८
८८४	सर्वविज्जयी	७९६	९८	८४४	८४६
८८५	सर्वविद्भानुः	१२४	२७	१४३	१४४
८८६	सर्वशस्त्रभृतांवरः	७५९	९४	८१७	८१९
८८७	सर्वसहः	८६३	१०५	९१६	९२०
८८८	सर्वादिः	९९	२४	११८	१२२
८८९	सर्वासुनिलयः	७१०	८९	७६७	७७२
८९०	सर्वेश्वरः	९६	२४	११८	१२०
८९१	सवः	७२७	९१	७८५	७८७
८९२	सविता	८८४	१०७	९२९	९३६
८९३	सविता	९९९	११७	१०००	१००३
८९४	सहः	३६८	५३	४१६	४२१
८९५	सहस्रजित्	३०६	४६	३४२	३४८
८९६	सहस्रपात्	२२७	३७	२४२	२५४
८९७	सहस्रमूर्धा	२२४	३७	२४२	२५१
८९८	सहस्रांशुः	४८३	६४	५४३	५५०
८९९	सहस्राक्षः	२२६	३७	२४२	२५३
९००	सहस्रार्चिः	८२६	१०२	८८५	८८५
९०१	सहिष्णुः	१४४	२९	१६२	१६४
९०२	सहिष्णुः	५६५	७३	६३४	६४३
९०३	साक्षी	१५	१५	३६	४३
९०४	सात्वतां पतिः	५१२	६७	५७३	५७९
९०५	सात्त्विकः	८६८	१०६	९२२	९२३
९०६	साधुः	२४३	३९	२६६	२७३
९०७	साम	५७६	७५	६५५	६५९
९०८	सामगः	५७५	७५	६५५	६५८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६०६	सामगायनः	६८८	११६	१०१६	१०१६
६१०	सिंहः	२००	३५	२२०	२२२
६११	सिंहः	४८८	६५	५५४	५५६
६१२	सिद्धः	६७	२४	११८	१२१
६१३	सिद्धः	८१६	१०१	८७३	८७६
६१४	सिद्धसंकल्पः	२५३	४०	२७६	२८७
६१५	सिद्धार्थः	२५२	४०	२७६	२८५
६१६	सिद्धिः	६८	२४	११८	१२१
६१७	सिद्धिदः	२५४	४०	२७६	२८८
६१८	सिद्धिसाधनः	२५५	४०	२७६	२६०
६१६	सुखदः	४५६	६२	५१८	५२३
६२०	सुखदः	८८६	१०८	६३७	६४०
६२१	सुघोषः	४५८	६२	५१८	५२२
६२२	सुतन्तुः	७८४	६७	८३७	८३६
६२३	सुतपाः	१६५	३४	२१०	२१७
६२४	सुदर्शनः	४१७	५८	४७४	४७६
६२५	सुधन्वा	५६७	७४	६४५	६४५
६२६	सुन्दः	७६२	६८	८४४	८४६
६२७	सुन्दरः	७६१	६८	८४४	८४५
६२८	सुपर्णः	१६२	३४	२१०	२१३
६२६	सुपर्णः	८५५	१०४	६०७	६१४
६३०	सुप्रसादः	२३६	३६	२६६	२६६
६३१	सुभुजः	२६५	४२	३००	३००
६३२	सुमुखः	४५६	६२	५१८	५१६
६३३	सुमेधाः	७५२	६३	८०८	८१२
६३४	सुयामुनः	७०७	८८	७५६	७६६
६३५	सुराध्यक्षः	१३४	२८	१५२	१५३
६३६	सुरानन्दः	१८६	३३	२०३	२०७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६३७	सुरारिहा	२०८	३५	२२०	२३०
६३८	सुरुचिः	८७८	१०७	६२६	६३२
६३९	सुरेशः	८५	२३	११०	११०
६४०	सुरेश्वरः	२८६	४४	३२२	३२५
६४१	सुलभः	८१७	१०१	८७३	८७३
६४२	सुलोचनः	७६४	९८	८४७	८४८
६४३	सुवर्णबिन्दुः	८००	९९	८५५	८५५
६४४	सुवर्णवर्णः	७३७	९२	७६७	७६७
६४५	सुवीरः	६४४	११४	६७८	६८०
६४६	सुव्रतः	४५५	६२	५१८	५१८
६४७	सुव्रतः	८१८	१०१	८७३	८७५
६४८	सुषेणः	५४०	७१	६१२	६१५
६४९	सुहृत्	४६०	६२	५१८	५२५
६५०	सूक्ष्मः	४५७	६२	५१८	५२०
६५१	सूर्यः	८८३	१०७	६२६	६३५
६५२	सोमः	५०५	६७	५७३	५७४
६५३	सोमपः	५०३	६७	५७३	५७३
६५४	स्कन्दः	३२७	४९	३७६	३७६
६५५	स्कन्दधरः	३२८	४९	३७६	३७६
६५६	स्तव्यः	६७९	८६	७४०	७४०
६५७	स्तवप्रियः	६८०	८६	७४०	७४१
६५८	स्तुतिः	६८२	८६	७४०	७४३
६५९	स्तोता	६८३	८६	७४०	७४३
६६०	स्तोत्रम्	६८१	८६	७४०	७४१
६६१	स्थविरो ध्रुवः	५४	१६	७७	८४
६६२	स्थविष्ठः	५३	१६	७७	८४
६६३	स्थविष्ठः	४३९	६०	४६६	४६७
६६४	स्थाणुः	२८	१७	५४	५७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६६५	स्थानदः	३८७	५५	४३८	४४१
६६६	स्थावरस्थाणुः	४२७	५६	४८५	४८६
६६७	स्थिरः	२०३	३५	२२०	२२५
६६८	स्थूलः	८३८	१०३	८६५	८६८
६६९	स्पष्टाक्षरः	२७६	४३	३१३	३१६
६७०	स्रग्वी	२१६	३६	२३१	२३६
६७१	स्रष्टा	५८८	७६	६६८	६६६
६७२	स्रष्टा	६६०	११६	१०१६	१०२२
६७३	स्वक्षः	६१५	७६	६६०	६६०
६७४	स्वङ्गः	६१६	७६	६६०	६६१
६७५	स्वधृतः	८४३	१०३	८६५	६०२
६७६	स्वयञ्जातः	६८६	११६	१०१६	१०१७
६७७	स्वयम्भूः	३७	१८	६४	६४
६७८	स्ववशः	४६६	६३	५२६	५३२
६७९	स्वस्ति	६०३	१०६	६४६	६५०
६८०	स्वस्तिकृत्	६०२	१०६	६४६	६५०
६८१	स्वस्तिदः	६०१	१०६	६४६	६५०
६८२	स्वस्तिदक्षिणः	६०५	१०६	६४६	६५०
६८३	स्वस्तिभुक्	६०४	१०६	६४६	६५०
६८४	स्वाङ्गः	५४८	७२	६२२	६२३
६८५	स्वापनः	४६५	६३	५३१	५३१
६८६	स्वाभाव्यः	५२३	६६	५६४	५६७
६८७	स्वास्यः	८४४	१०३	८६५	६०३
	ह				
६८८	हंसः	१६१	३४	२१०	२१२
६८९	हरिः	६५०	८२	७११	७१८
६९०	हलायुधः	५६२	७३	६३४	६३६
६९१	हविः	६६८	८७	७४६	७५५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
९९२	हविर्हरिः	३५९	५२	४०६	४११
९९३	हिरण्यगर्भः	७०	२१	८५	९७
९९४	हिरण्यगर्भः	४११	५७	४५६	४६८
९९५	हिरण्यनाभः	१६४	३४	२१०	२१६
९९६	हुतभुक्	८७६	१०७	६२६	६३२
९९७	हुतभुक्	८८७	१०८	६३७	६३८
९९८	हृषीकेशः	४७	१६	७७	७६
९९९	हेतुः	३९९	५३	४१६	४१८
१०००	हेमाङ्गः	७३८	९२	७९७	७९८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णुकाव्यस्य प्रस्तावना-विंशतिः

(श्री १०८ पं० सत्यदेववासिष्ठप्रणीते

श्रीविष्णुसहस्त्रनाम-सत्यभाष्ये

'भवति/भवतः/भवन्ति चात्रस्माक'मितिवाक्यानुगतानि परिकर-पद्यान्यत्र श्रीविष्णुकाव्यमि 'तिशीर्षकेण पुनरुद्धियन्ते। 'विश्वं विष्णु वंषट्कार' इत्यादिश्लोकतः सहस्त्रनाम्नां परिगणनं प्रारभ्यते। अतः पूर्वं सत्यभाष्ये यानि पद्यान्यागतानि तानि 'प्रस्तावनाविंशति' रिति शीर्षकान्तर्गतं सङ्कलितानि। एतदनन्तरं विश्व मिति नाम्नः पुनः पद्यसंख्या प्रारभ्यते-सम्पादकः।)

जपन्नरो मन्त्रशतैर्यजंस्तथा
स्मरन् ददद्भूतबलिं प्रमुच्यते ।
कृताघतो [1]वर्षगणेष्वसम्मतात्
[2]त्रिधाविभक्तादुत भोजयन् द्विजम्।।१।।

पवित्रमेकं सकलेश्वरं यो
हृदा गिरा कायिकचेष्टया वा ।
स्मरेज्जपेत् सत्यतपश्चरेद्वा
पवित्रता स्वीकुरुते नरं तम् ।।२।।

नामंगलं सद्मनि नैव बुद्धौ
भवेन्न सत्त्वे हृदि नापि काये ।
तं मंगलं मंगलवर्गवर्यं
परं प्रधानं पुरुषं स्मरेद्यः ।।३।।

रक्षांसि भूतान्युत वा पिशाचका-
नुताथ निम्नानुत वा तमश्चरान् ।
त्यक्त्वाखिलान् यो भुवनेशमीड्यं
देवं जपेद्देवमयः स ना[1] भवेत् ।।४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यो ना नरान् व्याधिजरोपरूढान्
श्रिया विहीनान् विकलांगकान् वा।
प्रीणाति पुष्णाति ददाति धैर्यं
मर्त्योऽप्यसौ सन् लभते पितृत्वम् ।।५।।

निरस्तदम्भो मनुजो हि यः सदा
तमच्युतं ध्यायति वांछिताप्त्यै।
ध्यातः प्रसन्नः स विभुर्मनस्वी
ददाति भोगान् पुरुषाय दिव्यान्।।६।।

यश्चिन्त्यमानः सकलामयघ्नः
पुष्णाति पोषैर्मनुजैरभीप्स्यैः ।
लोकाः! परित्यज्य कथं नु देवं
बम्भ्रम्यमाणाः क्षिपतेह कालम् ।।७।।

स्तवैः स्तुवन् देवमनन्तवीर्य-
मुदात्तभावं लभतेऽप्रकम्प्यम् ।
गुणेशसाहाय्यमुपेत्य मर्त्यो
गुणानशेषानतिवर्तते च ।।८।।

न संशयाः शेरत आत्मगर्भा
दृष्टे परे ब्रह्मणि सत्यरूपे ।
तथा यथा पुस्तकपंक्तिपाठा-
न्न संशयाः काललवं स्पृशन्ति ।।६।।

सनातनं लोकपतिं जनं शिवं
स्मरन् मनुष्यः सततं शुचिव्रतः ।
विनष्टदुःखो भवतीह निश्चितं
क्रमेण कालेन च याति लभ्यम् ।।१०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एको विभुर्दीप्ततपो भवत्यरं
निमित्तमात्रं जगतो ह सर्जने ।
ब्रह्माच्युतानंगरिपुश्च सन् स्वयं
सृजत्यवत्यत्ति जगच्चराचरम् ॥११॥

जगत्कृता या विहिता व्यवस्था
तल्लंघनं पापमिहोक्तमेकम् ।
नृपेण वा पंचजनैः कृताया
व्यवस्थितेरुत्क्रमणं द्वितीयम् ॥१२॥

तदु द्वयं कर्म करोति नूनं
प्रज्ञापराधी मनुजो यथेच्छी ।
जपादिकं कर्म नरस्य नूनं
प्रज्ञाप्रमार्ष्ट्यायलमाहुरार्याः ॥१३॥

भयं द्वितीयात् सबलात् कृतान्तकात्
कृताच्च निन्द्यात्, त्रिविधात् स्वकर्मणः।
जपादिकं कर्म नराय नूनं
ददाति बुद्धिं सबलं च धैर्यम् ॥१४॥

यथा वपुः पर्वशतैर्निबद्धं
बिभर्ति नामानि पृथक् च तेषाम् ।
तथाखिलाङ्गं क्रमते क्रियायां
सजीवमेतन्न तु पर्वहीनम् ॥१५॥

तथा ह्यजोऽयं सकलान्तरात्मा
नामाश्नुते ज्ञानबलक्रियाभिः ।
एतद्विदं नामसहस्रमेतद्
भुनक्ति पापादुत सर्वभीत्या ॥१६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनन्तवीर्यं तपसा तपन्तं
महाशयं सर्वनियन्तृवन्द्यम् ।
को नाम शक्नोति नरो नियन्तुं
तमच्युतं नामसहस्त्ररज्ज्वा ।।१७।।

तथाप्यलं स्युः पठितानि शम्भो-
र्नामानि नुर्मोहतमोऽपहर्तुम् ।
यच्छक्तिमन्नाम विभोर्निरुक्तं
ध्यायञ्जपन्नेति स तस्य तत्त्वम् ।।१८।।

स तत्त्वविद्धीरगुणो मनस्वी
विपत्सु सीदन्नपि नैत्यधैर्यम् ।
क्रमेण कालेन विपत्समूहं
विजित्य सर्वानतियाति लोके ।।१६।।

स्वतः प्रमाणं भवतीह वेदो
वेदेन तुल्यं च सहस्रनाम ।
तदुद्भवत्वात् न हि तत्र शंका
युधिष्ठिरं भीष्म उवाच दार्ढ्यात् ।।२०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री १०८ पं० सत्यदेववासिष्ठ-प्रणीतम्

श्रीविष्णुकाव्यम्

विश्वम्—१

ज्योतींषि लोकाश्च वनानि नद्यो
दिशः समुद्रा गिरयः प्रजाश्च ।
यद्भासया भान्ति निजं स्वरूपं
गृणन्ति[1] चैते भुवनेशमेकम् ।।१।।
त्रिमात्र ओंकार ऋचि प्रसिद्धः
स एव चोक्तः प्रणवेन वापि ।
यज्ञक्रियायां प्रणवत्वमेति
टिर्वेदमन्त्रस्य मतं प्रसिद्धम् ।।२।।
आनुष्टुपेनात्र सहस्रनाम्नां
यः संग्रहोऽस्त्योउम् लभते न तत्र ।
व्याख्यायते नामभिरेक एव
खं ब्रह्म विष्णुरुत विश्वमुक्त्या ।।३।।
यथा जगद् ब्रह्मणि विष्टमस्ति
स्त्रष्ट्राऽथवा विष्टमिदं जगत् स्यात्।
कृत्स्नं जगत् ब्रह्म च विश्वमुक्तं
प्रकाशते यत्र स विश्वभक्तः ।।४।।

विष्णुः—२

विष्ट्वा यथा ब्रह्म जगद्दधाति
विष्टं जगद्वा सुखमेति यस्मिन् ।
तथा स्वके[1] यः सुखमेति वर्गे[2]
वर्गश्च यस्मिन् स नरोऽस्ति विष्णुः।।५।।

वषट्कारः—३

लोके वषट् वाक्यविधौ प्रयुक्तः
स एव कारेण युतोऽस्ति वेदे ।
रुद्रो वषट्कार ऋचास्ति वाच्यः
प्रैषोऽस्ति दर्शादिषु वौषडन्तः ।।६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूतभव्यभवत्प्रभुः—४

योदेशदिक्कालविभागमुक्तः
स्वयं प्रभुः सन् सृजतीह विश्वम् ।
तमच्युतं सर्वतिङा[1] समूहो
व्यनक्ति[2] कालेन भिनत्ति नैव ॥७॥

भूतकृत्—५ भूतभृत्—६

अजो नियन्ता सकलं सृजन् जगत्
गुणैः पृथक् सन् यतते निमित्ततः ।
जगत् स्वयं तत्कृतया व्यवस्थया
विकारषट्कानयते न स स्वयम् ॥८॥

भावः—७

भावः शोध्यः पराद्यत्नात्, भावे सर्वं प्रतिष्ठितम्।
भावाशुद्धौ भशुद्धेऽपि, फलं नास्तीति चिन्त्यताम् ॥९॥
यो भावरूपं महनीयमीशं
सर्वत्र बुध्वारभतेऽनवद्यम् ।
भावाः शुभाः साधिकृताश्च तस्य
भावात्मके ब्रह्मणि नास्ति पापम्॥१०॥
यदा नरो भावमयं विशुद्धं
जगत्कृतं वामधियाऽनुपश्यन् ।
करोत्यभद्राणि तदा स शम्भु-
स्त्यजन् नरं तं नरके निधत्ते ॥११॥
यस्मिन् भावे भवति, भावशुद्धौ हि तच्छुचिः ।
तस्मिन् सत्तात्मकं ब्रह्म, तत्रास्तीत्यवधार्यताम् ॥१२॥

भूतात्मा—८

आहस्ति कीटान्तमिदं निबद्धं
जगच्चरं हृद्गुहया सचित्तम् ।
आत्मा हृदिस्थो गमयत्यजस्रं
हृदं गुणैरावृतमस्वतन्त्रम् ॥१३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा तथा विश्वमिदं विधाता
समिद्धतेजा भ्रमयत्यजस्त्रम् ।
भूतात्मनास्त्येव विभुर्विशेष्य-
स्तं व्यापकं श्रौतवचांसि चाहुः ॥१४॥
जगत्कृता या विहिता व्यवस्था
सैवास्ति सूत्रं जगदस्ति सूत्रे ।
यो वेद लोकं स हि वेद सूत्रं
यो वेद सूत्रं स हि वेद विष्णुम्॥१५॥

भूतभावनः—९

भूतभावन उत्कृष्टो, यथा विज्ञोऽनुसेवितः ।
तथा जीवोऽपि ताद्भाव्याद्, भूतभावनसंज्ञकः॥१६॥

पूतात्मा—१०

पूतात्म-शब्देन शुचिः स उक्तो
न तत्र पापस्य लवोऽप्यनक्ति ।
अग्निः पवित्रं स पुनाति विश्वं
पवित्रता ब्रह्मवशाद्धि तस्य ॥१७॥
पूतात्मसंज्ञां गुणतः प्रवृत्तां
विष्णोः स्मरन् कार्यविधौ नयंश्च।
ध्यातापराधात् परिमुच्य शेते
पूतात्मचिन्ता हरतेऽपराधम् ॥१८॥

परमात्मा—११

परमात्मा परं व्योम व्योम वा व्यवनं हि तत् ।
अक्षरेऽस्मिन्नृचः सर्वा देवाश्चास्मिन् समासते॥१९॥

मुक्तानां परमा गतिः—१२

नरोऽथ जानन्नथ वाप्यजानन्
यदा निहन्त्यात्मकृतांश्च बन्धान्।
तदा स मुक्तो रमते तृतीये
धाम्न्यत्र वा मद्गुरिवात्मतन्त्रः ॥२०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अव्ययः—१३

हीनातियोगान्न विभोर्व्ययोऽस्ति
व्ययो विधानेऽस्य न दृष्टपूर्वः ।
न जायतेऽसौ न जरामुपैति
न मृत्युमेत्युक्तमतोऽव्ययः सः ॥२१॥

पुरुषः—१४

स्थानं न तद्यत्र न पूरुषोऽस्ति
सहस्रबाहुः स सहस्रपाद् वा ।
ध्याता धिया सर्वमिदं विदित्वा
भवेदनंहो गतभीः प्रसन्नः ॥२२॥

साक्षी—१५

नरो यथा पश्यतिमात्रमात्रः
साक्षीति संज्ञां लभते नृलोके ।
स विश्वतश्चक्षुरुतात्मसंस्थ-
स्तथैव साक्षी भुवनानि पश्यन् ॥२३॥

क्षेत्रज्ञः—१६

क्षेत्रं शरीरं क्षयमेत्यवार्यं
क्षेत्रज्ञमाहुः समनोहृदिस्थम् ।
क्षेत्रं जगत् तस्य महेश्वरस्य
सोऽप्यस्ति तज्ज्ञस्तदधिष्ठितत्वात् ॥२४॥

अक्षरः—१७

स्थानं न तद्यत्र न सोऽस्ति सृप्तः
क्लेशक्षरो नास्ति पदे तृतीये ।
तं ध्यानयोगेन हृदिस्थमित्वा
क्लेशक्षरो ध्यातरि नैति नूनम् ॥२५॥

योगः—१८

पृथक् स्थितौ स्वार्थमपास्य संगतौ
परस्परं सख्यमुपागतौ यौ ।
योगेति संज्ञामयंतः पुनश्च तौ
न तं विना योग इयर्त्ति तात्स्थ्यम् ॥२६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

योगविदां नेता—१६

प्रकल्प्य सृष्टिं हि चतुर्विधां स
विधित्सुकानां कुरुते ह नेत्रम् ।
ख्यातोऽस्त्यतो 'योगविदां' स नेता
न तं विना योगविदां गतिः स्यात् ॥२७॥

प्रधानपुरुषेश्वरः—२०

यदस्ति दृश्यं प्रकृतेर्मनोहरं
न यत्र शक्तिः पुरुषस्य गच्छति ।
गुणातिशीत्या क्रमते पुमान् यदा
[1]प्रधानजीवेश्वरकर्म तन्मतम् ॥२८॥

नारसिंहवपुः—२१

सुखेच्छुना न्रा सततं विधेयं
तत् कर्म यत् कर्म विचारयुक् स्यात्।
विचारितं कर्म भवेच्च यद् यत्
तत् तद् विधातुं च नरो यतेत ॥२६॥

श्रीमान्—२२

श्रीमान् स एवास्ति न तत्परोऽन्यः
पतिर्धनानां स हि शाश्वतोऽस्ति ।
[1]तातं यथा जन्तव आरुवन्ति
स दाशुषे यच्छति भोजनीयम् ॥३०॥

केशवः—२३

जलं कमुक्तं द्विविधं च तन्मतं
तदन्तरिक्षस्थमुतापि भूस्थितम् ।
ईष्टे विभुर्यो द्व्यधिपश्च यो मतः
स केशवोऽस्त्याप्तजनैरुपास्यः ॥३१॥
सुखं कमुक्तं द्विविधं च तन्मतं
धनेन लभ्यं किमु वात्मतोषात् ।
[1]यद्दक्षिणं केशव एति पार्श्वं
सुखी नरः सोऽस्त्यपरो विरौति ॥३२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

केशीवधात् केशव एव नाम
श्रीकृष्णचन्द्रस्य जगत्प्रसिद्धम् ।
जगन्नियन्ता न दधाति कायं
श्रुतावकायोऽस्त्यजरः स उक्तः ॥३३॥

पुरुषोत्तमः—२४

पुरं जगत् तत् सकलोऽधिशेते
वेदे स उक्तः पुरुषोऽक्षरश्च ।
तत्सम्मितान्येव वपूंषि धात्रा
कृतान्यतोऽसौ पुरुषोत्तमोऽस्ति ॥३४॥

सर्वः—२५

वृतं जगत् तेन स वेत्ति वेद्यं
सर्वः स उक्तः परिपूर्णहेतोः ।
सर्वेण सर्वं परितोऽस्ति सृप्तं
[1]सर्वं विना सर्वमिदं न भाति ॥३५॥

शर्वः—२६

शृणाति पापान्युत दुःखमात्रं
शर्वो महादेव [2]उ रुद्रनामा ।
शर्वो जिघांसुश्च यमोऽघमार-
श्छिनत्ति पापानिह शर्वभक्तः ॥३६॥

शिवः—२७

तस्मिञ्छिवे शान्ततमे मनस्विनि
स्थितः स्वयं भक्तवरः शिवायते ।
दीनान् समुद्धर्त्तुमसौ प्रवृत्तो
न दुःखलेशं मनसापि याति ॥३७॥
शिवः स्वयं दुःखमशेषमूढ्वा
मृगाजिनः सर्पगलः सभस्म ।
धियंस्त्रिशूलं सुखपूर्णमुद्रः
शिवात्मिकां स्वां न जहाति दृष्टिम् ॥३८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थाणुः—२८

जगच्छिवः सर्वमिदं प्रचालयन्
स्वयं स्थितः स्थाणुरिवाप्रकम्पनः ।
तमाचलं यो जपिताऽनुसेवते
स्वयं स्थिरः सोऽभ्युदयाय कल्पते ।।३६।।

भूतादिः—२६

यो विश्वकर्मा स मनुर्मनीषी
स एव भूतादिरिहास्ति सिद्धः ।
न तं विना विश्वमिदं प्रक्लृप्तं
न तस्य कर्त्ता न च तत्पुरोऽस्ति ।।४०।।

निधिरव्ययः—३०

[१]निधिर्जगत्यां न तथाविधोऽस्ति
व्ययो न यस्यास्ति, तथाविधः सः ।
ध्याताऽव्ययं[२] तं निधिमप्रमेयं
ज्ञात्वा स्वयं स्यान्निधिरप्रमेयः ।।४१।।

सम्भवः—३१

चिन्त्यैकध्यं जगत् सर्वं, सम्भवेन कृतं यथा।
तथैवाद्यापि निर्भ्रान्तं, जगद् बद्धं प्रधावति।।४२।।

भावनः—३२

नरस्य यस्येह भवेन्मनीषा
चिराय सम्भावयितुं स्व-नाम ।
स भावनं नाम जपेन्महेशं
तदाश्रयं काव्यमुदीरयेच्च ।।४३।।

भर्त्ता—३३

बिभर्ति लोकानुत प्राणिमात्रं
न तं विना भर्तृतमोऽस्ति कश्चित् ।
रुजान्वितं सुप्तमथार्थहीनं
जरायुजं न्वेष बिभर्ति 'भर्त्ता' ।।४४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एव 'भर्ता' न हि तत्परोऽन्यो
विश्वम्भरो नाम बिभर्त्ति कश्चित् ।
तद्भर्तृयोगाद् यदि [1]नापि कश्चित्
भर्त्ता भवेत् स्तुत्यतमोऽस्ति सोऽपि।।४५।।

प्रभवः—३४

कालेन सर्वं विकृतिं प्रयाति
स्रोतांसि शुष्यन्ति महान्ति चापि।
पृथक् पृथक् यः प्रभवोऽस्ति लोके
व्यनक्ति शोभां प्रभवस्य तस्य ।।४६।।

प्रभुः—३५

न कोपि लोके प्रभुरस्ति तत्समः
प्रभुः स्वयं सन् प्रभुतां प्रयच्छति ।
न यान्ति शोभां प्रभवोऽपि तं विना
स दक्षिणे यस्य स एव नः प्रभुः ।।४७।।

ईश्वरः—३६

ईष्टे जगत् तेन स ईश्वरोऽस्ति
विश्वं तदावास्यमिदं स्वभावात् ।
हृदन्तराले स स्थितो महात्मा
समीक्षते विश्वमिदं तपत् सः ।।४८।।
तस्यार्द्रदृष्ट्या भवतीश्वरो ना
स एव रंको न यदेक्षते सः ।
तस्मान्नरः पुण्यतमानि कुर्वन्
ध्यायेत् सदा तं सकलेशमाद्यम् ।।४९।।

स्वयंभूः—३७

क्रमेलको ह्युत्क्रमते सभारः
पाणी स्वयं प्रोच्चलतः क्रियायाम् ।
स्वयं नरं स्त्री हरते नरस्तां
स्वयम्भुवो ह्याश्रवमुद्गृणन्तः ।।५०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शम्भुः—३८

शम्भोः कृतिर्नैव तथाविधाऽस्ति
परस्परं या सुखयेन्न कामम् ।
न तत्कृतौ दोषलवोऽप्यनक्ति
यतः स शम्भुस्तमसोऽस्ति पारे ॥५१॥

आदित्यः—३९

एको हि सूर्यः सवितेति नामा
नामानि चाप्नोति पृथक् पृथक् सः ।
धाताऽर्यमा मित्र इतीरणानि
चैत्रादिमासेषु यथोदितानि ॥५२॥
उत्सर्गवन्मासयुगेन चर्तुः
शीतोष्णवर्षेषु च ते [1]ह्रसन्ति ।
यथाक्रमं गौर्ऋतवोऽपि भिन्ना
भिन्नास्तथाऽऽयुर्बलवर्णदेहाः ॥५३॥
एको हि सूर्यः सवितेति नामा
निजांशुभी राशिगुणान् भिनत्ति ।
तत्राऽस्थिताः शेषखगाः समस्ता
व्यस्ताश्च वा भेदमुदीरयन्ति ॥५४॥
संवत्सरो द्वादशमासचक्रो
मासोदयः सूर्यवशेन तस्मिन् ।
संवत्सरार्कौ परियात इत्थं
परस्परं वेदवचः प्रमाणम् ॥५५॥
स एव तिग्मांशुरनन्तवीर्यो
यः स्थापयत्यात्मनि भूतमात्रम् ।
न यद्विना भाति स भास्वरोऽपि
सोऽस्त्यत्र चाऽऽदित्यपदेन विष्णुः ॥५६॥

पुष्कराक्षः—४०

व्योम्नोऽपरं पुष्करमत्र नाम
तस्मिन् स्थितौ रात्रिदिवाधिनाथौ ।
तावक्षिणी यस्य स पुष्कराक्षः
स सर्वदृक् सर्वगतोऽस्ति विष्णुः ॥५७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महास्वनः—४१

यो लोकलोकान्तरवृत्तजन्यः
स्वनो महान् तेन महास्वनेन ।
धृतोऽस्ति यस्मात् स महास्वनोऽस्ति
यथोत्तरं नादबलं स एव ॥५८॥

अनादिनिधनः—४२

आदिर्न शम्भोर्निधनं न चापि
न तत्समः पूर्वभवो न कश्चित् ।
स एव बन्धुर्जनिता सखा सः
सनातनो वेदमयः स एव ॥५९॥

धाता—४३

दधाति यो विश्वमिमं तपन्तं
दधाति यश्चाम्भसि वर्त्तमानम् ।
दधाति यश्चात्मनि सत्यसन्धं
दधाति धातेति स विष्णु-संज्ञाम् ॥६०॥

विधाता—४४

कर्माणि कुर्वन् शतमायुरिच्छ-
न्नरो महेच्छो व्यसनैर्विमुक्तः ।
विधानमेतद् व्यदधात् सनात् सः
श्रुतौ विधाता स हि विष्णुरुक्तः ॥६१॥

धातुरुत्तमः—४५

कार्यं न तद्यस्य न धातुरस्ति
वेदश्च तं कारणमाह धातुम् ।
नास्त्युत्तमो कोऽपि भवेऽत्र दृष्टो
यो लघंयेदुत्तमतामजस्य ॥६२॥

अप्रमेयः—४६

न तद्विधः कोऽपि न तत्समो वा
मिमीत तं ज्ञानबलक्रियाभिः ।
प्रमाणवृन्दोऽपि न तत्र शेते
तं त्यच्च भित्त्वा श्रुतिराह तत्त्वम् ॥६३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हृषीकेशः—४७

हृषीकेशो हि सर्वात्मा, यस्य सव्यांगमंचति।
हृषीकेशो भवेन्मर्त्यो, जपदानव्रतेज्यया ।।६४।।

पद्मनाभः—४८

यथा जले पद्म जनिं दधाति
तथैव भूर्यात्युदयं जलेऽत्र ।
तत् पद्म नाभौ निहितं हि यस्य
स 'पद्मनाभो'ऽस्त्यमरोऽत्र विष्णुः।।६५।।

यथा जले पद्म जनिं बिभर्त्ति
तथैव भूर्वारिणि याति पुष्टिम् ।
हिरण्यगर्भः स यथैक एव
स पद्मगर्भोऽपि तथैव विष्णुः ।।६६।।

अमरप्रभुः—४६

न जन्म गृह्णाति न मृत्युमेति
यः सोऽमराणां कुरुते प्रभुत्वम् ।
प्रभुत्वभाक्ञ्च व्रजन्ति ते य
उपासते विष्णुमथामरेशम् ।।६७।।

विश्वकर्मा—५०

स विश्वकर्मा कुरुते ह विश्वं
विचित्रवीर्यं विविधप्रकारम् ।
न तत्कृतौ दोषलवोऽपि भाति
स विश्वकर्मा कथितोऽत्र विष्णुः ।।६८।।

मनुः—५१

लोकानिमाँल्लोकपतिर्मनीषी
दर्धर्त्त्यशेषान् मनुते तथा सः ।
न तत्कृतौ दोषलवप्रसक्ति-
र्मन्ता मनुर्यो मननीय एकः ।।६६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वष्टा—५२

त्वष्टा यथा तक्षति काष्ठमात्रं
रूपस्य संभारविधौ प्रवृत्तः ।
तथैव त्वष्टा स्वविधानबद्धो
गर्भे स्थितं त्वक्षति देहमात्रम् ।।७०।।

ऊर्वोर्यथा दीर्घमुतापि बल्यं
तन्वस्थि चाक्ष्णोरुत नासिकायाम् ।
स्फिङ्मांसमात्रस्तनुमांसनासा
त्वष्टा स्वयं त्वक्षति सर्वलोकान् ।।७१।।

स्थविष्ठः—५३

यद् दृश्यशक्तेरपरं परं वा
ज्ञानेन यज्ज्ञातुमिहास्ति शक्यम्।
सोऽयं स्थविष्ठो ह्रसतेऽत्र सर्वं
न तत्परः स्थूलतमोऽस्ति कश्चित्।।७२।।

स्थविरो ध्रुवः—५४

न तद्विधं दृष्टमिहास्ति लोके
ध्रुवं च तत् स्यात् स्थविरं तथैव ।
स एव विष्णुः स्थविरो ध्रुवश्च
सोऽन्तर्बहिश्चास्ति च वर्त्तमानः ।।७३।।

अग्राह्यः—५५

अशब्दमस्पर्शमरूपमव्ययं
तथारसं नित्यमगंधवच्च यत् ।
कथं भवेत् तद्विषयोऽत्र खानां
सर्वत्र सोऽग्राह्यपदोऽस्ति विष्णुः ।।७४।।

शाश्वतः—५६

शश्वत् सदार्थे, स हि शाश्वतोऽणा
कालो भिनत्त्येव न तं कदाचित् ।
तं शाश्वतं सर्वजनैकवन्द्यं
विपश्चितं विष्णुमुपैति विज्ञः ।।७५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृष्णः—५७

कृष्णो हि यज्ञः स च विष्णुनामा
वेदाश्च विष्णोर्गरिमाणमाहुः ।
हलस्य फालेऽपि च कृष्णशब्दो
विश्वम्भरस्तेन स उक्त आस्ते ।।७६।।

लोहिताक्षः—५८

यद्वर्चसो रूपमिहास्ति सूर्ये
चन्द्रेऽथवा तेन स लोहिताक्षः ।
चन्द्रार्कतो मूलमुपेत्य मर्त्यो
पित्तेन रक्तेन च लोहिताक्षः ।।७७।।

प्रतर्दनः—५९

वधे प्रवृत्तो वधको यथात्र
नृशंसभावं न जहाति कामम् ।
प्रतर्दनो विष्णुरिहापि तद्वत्
मृतौ स्थितं मुंचति नैव मन्त्रैः ।।७८।।

प्रभूतः—६०

प्रभूतमात्रः स विभुः पुराण-
स्तस्मान्न तत्कर्मणि चाल्पतास्ति।
बहुः स्वयं सन् न सहायमीर्ते
जगच्च संख्यामतिवर्ततेऽतः ।।७९।।

त्रिककुब्धाम—६१

स एव त्रिककुब्धाम, दिशस्तिस्त्रः समश्नुते ।
दिशश्चापि विलीयन्ते, नान्तं यान्ति च ता विभोः।।८०।।

पवित्रम्—६२

अग्निस्तथा वायुरुतापि दर्भः
सूर्योऽथ चन्द्रश्च पवित्रवर्गः ।
पुनाति सर्वं स पवित्रनामा
पवित्रता विष्णुवशाद्धि लोके ।।८१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खिदन्ति कार्यं परितश्च रोगा
दोषाश्च देहं परिदूषयन्ति ।
तं दोषदूष्यं पवते पवित्रं
विष्णुः स्वयं नामसहस्रजापात् ॥८२॥

मंगलं परम्—६३

लुब्धस्य रुष्टस्य बुभुक्षितस्य
मनोजवेगेन परिप्लुतस्य ।
मानादिदोषैर्विहतस्य चापि
प्रज्ञापराधो विकरोति चित्तम् ॥८३॥
खिन्नोऽथ दीनोऽथ भयं गतो वा
श्रिया विहीनो किमु कान्तया वा ।
मर्त्यो ह्यभद्राणि सदा चिनोति
दोषा मतिं तस्य विकुर्वतेऽतः ॥८४॥
एवंविधोऽप्यस्तमतिर्मनुष्यो
जपन् स्तुवन् मङ्गलमेकचित्तः ।
तन्मङ्गलं ब्रह्म तमुच्चिनोति
साध्व्या, धिया चोत्क्रमते सदा सः ॥८५॥

ईशानः—६४

ईशानमेनं कवयः पुराणा-
श्चराचरस्याधिपतिं ब्रुवन्ति ।
तमाह्वयन्ते स हि सर्वशास्ता
स एव रक्षां कुरुते विपत्सु ॥८६॥

प्राणदः—६५

प्राणान् ददाति, किमु वा द्यति, दाति किं वा
प्राणान् विशोधयति, दापयतीति किं वा ।
सर्वत्र सर्वविधिना स हि विष्णुरेको
यः प्राणदोऽस्ति कथितः श्रुतिभिः पुराणः ॥८७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राणः—६६

प्राणं जगत् प्राणिति तत्प्रणुन्नः
प्राणः स उक्तः स शिवः स विष्णुः ।
प्राणेन विश्वं परितोऽस्ति गुप्तं
प्राणं विना नात्र विभाति किंचित् ॥८८॥

ज्येष्ठः—६७

सूर्यं प्रशंसन्ति नमन्ति लोकाः
सूर्योऽपि लोकं भ्रमयत्यशेषम् ।
न सोऽपि तत्पारमवैत्यनल्पो
ज्येष्ठात् परं ज्येष्ठमिहास्ति नान्यत् ॥८९॥

श्रेष्ठः—६८

तस्मात् परः श्रेष्ठतमो न कश्चित्
तमो न तस्मिन् न रजोऽस्ति तस्मिन्।
वेदे स उक्तस्तमसः परस्तात्
श्रेष्ठः स विष्णुर्भुवि कीर्त्तनीयः ॥९०॥

प्रजापतिः—६९

स विश्वरेताः सकलं प्रसूते
स्वाभाविकज्ञानबलक्रियाभिः ।
स्वभावतः पाति जगत् समग्रं
प्रजापतिः सोऽभिहितोऽस्ति विष्णुः ॥९१॥

हिरण्यगर्भः—७०

हिरण्यगर्भः स विभुः स विष्णु-
स्तेनैव देहो विहितोऽग्निगर्भः ।
सर्वत्र रूपं निजकं विभाव्य
सोऽन्तर्दधे विश्वमिदं यथाण्डे ॥९२॥

भूगर्भः—७१

चतुर्विधा सृष्टिरियं विचित्रा
यामाश्रयीकृत्य जनिं दधाति ।
सा भूः समग्रस्य चराचरस्य
भूगर्भसंज्ञस्य च गर्भ आस्ते ॥९३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

माधवः—७२

स एव पूर्व्यो भुवि माधवोऽस्ति
तमेव नाथन्ति[1] जना जनेशम् ।
स सर्ववित् पुष्पविधानविज्ञो
नानाविधां ज्ञापयते तनूं स्वाम् ।।६४।।

स्वाभाविकज्ञानबलक्रियाभिः
पुष्णाति पुष्पाणि पृथग् रसैः सः ।
स एव दुग्धे रसमादधाति
स माधवो वर्षति वारिवाहैः ।।६५।।

स माधवो रूपमनिन्द्यमित्वा
कवौ स्वयं तिष्ठति काव्यरूपः ।
तं माधवं स्तौति जगत् समग्रं
स दाशुषे यच्छति भोजनानि ।।६६।।

मधुसूदनः—७३

दुष्टस्वभावो वपुषोऽर्थदर्शी[1]
स्वैरो जनो वेदविरुद्धवादी ।
रक्षः स उक्तो मधुसंज्ञको वा
तं हन्ति विष्णुर्मधुसूदनोऽतः।।६७।।

न हस्तपादैरुत वा शरेण
स हन्ति विष्णुर्वत मेधया तम् ।
पृथक् करोत्येव स निम्नदर्शी
स्वकैर्विकारैर्वधमेति भूयः ।।६८।।

सदैव रूपं मधुसूदनस्य
प्रजा-विनाशाय रुषानुविद्धम् ।
निरीक्ष्यते चातिजलप्रपाते
रोगानिले वा [1]हतभिक्षमात्रे ।।६६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ईश्वरः—७४

ऐश्वर्यभावेन जगत् समग्र-
मीष्टे स्वभावादत ईश्वरः सः ।
सर्वं समावास्य[2] स विष्णुरास्ते
तस्मिन्[3] ह तस्थुर्भुवनानि विश्वा ॥१००॥

विक्रमी—७५

स विक्रमी विष्णुरनन्तवीर्य-
श्छन्दांसि वेदानुत वा स्वरांश्च ।
लोकान् समग्रान् कुरुते यतो ह
पृथक् पृथक् सोऽर्हतमोऽस्ति नान्यः॥१०१॥

धन्वी—७६

स एव धन्वी, स बलिष्ठबाहु-
र्निहन्ति दुष्टान् धनुषा रुषाक्तः ।
तस्मै नमः स्यादुत तस्य दोर्भ्यां
प्रीतः स विष्णुः परिपातु चास्मान् ॥१०२॥

मेधावी—७७

आसूक्ष्मकीटादुत हस्तिगात्रं
जलेऽन्तरिक्षेऽपि सृतं च यद् यत् ।
मतौ धृतं तस्य जगत् समस्तं
मेधाव्यतोऽसौ कथितोऽत्र विष्णुः ॥१०३॥

विक्रमः—७८

भूराद्यमेकं पदमस्य भूम्नो
भुवर्द्वितीयं स्वरथो तृतीयम् ।
तुरीयपादेन च विक्रमोऽयं
कृताकृतं पश्यति लोकवृत्तम्[1] ॥१०४॥

क्रमः—७९

क्रमः स विष्णुः क्रमते स्वयं नो
विक्रम्यते तेन चराचरञ्च ।
निजं स्वरूपं प्रथते जगत्यां
सोऽन्तर्बहिश्चास्ति न याति तस्मात्॥१०५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुत्तमः—८०

न तेन कश्चित्सम उत्तमो वा
मर्त्यस्ततो ज्ञानबलक्रियाभिः ।
सोऽनुत्तमो वेदवचोभिरुक्तो
सर्वातिशायी जगदन्तरात्मा ॥१०६॥

दुराधर्षः—८१

दुराधर्षः स विष्णुर्नः, पाति रक्षांसि धर्षयन् ।
कुरुते चाखिलं विश्वं, भूत्वा सर्वत्रभूः स्वयम् ॥१०७॥

कृतज्ञः—८२

स्मृतौ हि कर्त्ता निदधाति तद्व्रतम्[1]
कृतज्ञ उक्तः स हि सर्व-धामवित् ।
स एव संज्ञां कुरुते पृथक् पृथक्
क्रियाकलापस्य च सिद्धिसाधनः ॥१०८॥

कृतिः—८३

सर्वाः क्रिया लोकभवा हि या या-
स्तासां स एवास्ति कृतिर्महौजाः ।
कर्त्ता क्रिया कापि न तं विनास्ति
विष्णोः कृतिं गर्भविदो विदन्ति ॥१०६॥

आत्मवान्—८४

स 'आत्मवान्' राजति सत्त्वसंस्थो
नापेक्षतेऽन्यं स्वविधौ स्वकस्थः ।
तेनैव हेतोः सकलास्य सृष्टिः
स्वयं स्थिता राजति चात्मसंस्था ॥११०॥

सुरेशः—८५

नूनं सुरेशः कुरुते मनुष्यं
देवं वयस्येषु च सुश्रुवांसम्[1] ।
दातृत्वशक्तिं निदधाति तस्मिन्
स एव दाताक्षयमाप्रदाता ॥१११॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शरणम्—८६

नूनं जनस्तच्छरणं[1] प्रपन्नो
हिनस्ति जन्मान्तरदुर्विपाकान् ।
शनैः शनैस्तज्जपदानयोगा-
च्छायामृतं तस्य, सुखं तदुक्तम् ।।११२।।
यथा धनेशं कृपणः प्रपद्य
शनैः शनैरात्मनि याति तृप्तिम् ।
तथा जनस्तच्छरणं[1] प्रपद्य
हिनस्ति दुर्भावचयाननन्तान् ।।११३।।

शर्म—८७

स शर्म विष्णुर्न जरामुपैति
न चान्यदुःखोदयकर्तृबन्धान् ।
तच्छर्म तस्मात् कुरुते स्वभक्तं
दुःखैर्विमुक्तं निजसख्ययुक्तम् ।।११४।।

विश्वरेताः—८८

स विश्वरेताः सकलं प्रसूते
पृथक् पृथक् क्षेत्रमथापि बीजम् ।
तस्मात् स माता स पिता च तस्माद्
रेतः स्वरूपेण जगद् दधाति ।।११५।।

प्रजाभवः—८६

चतुर्विधा सृष्टिरियं विचित्रा
प्रजाभवोपात्तभवा विभिन्ना ।
यावानृजुर्यः स सुखप्रसूत-
स्तावान् परीदृश्यत एव लोके ।।११६।।

अहः—६०

अहः स विष्णुर्न जहाति कर्म
वेदे च यत्नेन बहुत्र गीतम् ।
अहःस्वभावस्य वशं गतो यः
स भासते सूर्य इवाप्रतर्क्यः ।।११७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संवत्सरः—६१

न कोऽपि कालाद् व्यतिरिच्य शेते
संवत्सरोऽयं किमु भार्कचक्रम्[1]।
क्षणे क्षणेऽसौ स्मरणीय एव
सोऽधीक्षते कालमिषेण सर्वम् ।।११८।।

व्यालः—६२

व्यालः स विष्णुः परितोऽभ्युपैति
स एव विश्वं परितो वृणोति ।
स भूषयत्येव जगत् समस्तं
यतः स्वयं भूषणभूषणः[1] सः ।।११९।।

प्रत्ययः—६३

इयं विचित्रा कृतिरस्य कर्त्तुः
प्रत्यायिकास्तीति मतं ध्रुवं मे ।
स प्रत्ययः प्रत्ययमात्रलभ्यो[1]
विष्णुः स्वयं रूपमवैत्यनन्तम् ।।१२०।।

सर्वदर्शनः—६४

स एव विष्णुः किमु सर्वदर्शनः
स विश्वतश्चक्षुरुतार्कलोचनः ।
स्वयं [1]चरैर्वा भुवनानि पश्यति
प्रमादलेशोऽस्ति न तद्व्यवस्थितौ।।१२१।।

अजः—६५

'अजः' स विष्णुर्न जनिं दधाति
सोऽन्तर्बहिश्चास्ति विराजमानः ।
किं मातृगर्भे किमु हृद्गुहायां
न राजते तस्य महात्मनो भूः[1] ।।१२२।।

तस्मादजोऽसौ न जनिं दधाति
सोऽधीक्षते विश्वमिदं समस्तम् ।
स्वयं जरा-जन्म-विपाकहीनो
नित्यं जराजन्मवतः स पाति ।।१२३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अजं देवमुपासीनो, मुच्यते मर्त्यनिष्ठया[1]।
[2]सत्त्वे [3]सत्त्व [4]मुपातिष्ठन्नजभूयाय कल्पते ॥१२४॥

सर्वेश्वरः—९६

सर्वेश्वरः सर्वमिदं समीष्टे
[1]लोकेश्वराश्चापि तदंशयोगात् ।
स स्थानदः सर्वमिदं यथावद्
व्यवस्थया स्थापयते समग्रम् ॥१२५॥
सर्वेश्वरोऽसौ सकलेश्वरोऽसौ
महेश्वरोऽसौ भुवनेश्वरोऽसौ ।
इत्थं महेशं हृदि चिन्तयन् ना
विमुक्तपापो भुवि राजते सः ॥१२६॥

सिद्धः—९७

विष्णुः स्वसिद्धौ न परं प्रमाणं
कर्तारमेवं समपेक्षतेऽतः ।
'सिद्धः' स उक्तोऽखिलसिद्धिमूलः
स्वयं श्रुतिश्चाथ जगत्प्रमाणम् ॥१२७॥
नानाविधा याः कृतयो महत्यो
विचित्रवर्णाकृतिगन्धपूर्णाः ।
सिद्धं सदा तं विनिवेदयन्ति
सिद्धादृते नास्ति कृतित्वसिद्धिः ॥१२८॥

सिद्धिः—९८

प्राप्तव्यवर्गे परमं प्रधानं
'सिद्धि' र्हि तन्नामपरं वदन्ति ।
एतं विनाष्टाविह सिद्धयो या
विघ्नन्ति भक्तं स हि साध्य एकः॥१२९॥

सर्वादिः—९९

दिवं भुवं स्वर्दिनरात्रिनाथौ
मरुज्जले वह्निमनल्पशक्तिम् ।
[1]सर्वादिरोमाददते समग्रं
यथाक्ष[2] आयच्छति बाह्यचक्रम् ॥१३०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वादिरद्यापि तथैव सर्वं
स्तभ्नाति तस्मात् स हि विष्णुरुक्तः ।
जगन्नियत्या[1] लभते विकारान्
नासौ जहात्येकरसस्वभावम्[2] ॥१३१॥

अच्युतः—१००

तमच्युतं शम्भुमनन्तवीर्यं
जगद् व्यनक्त्येव हिरण्यगर्भम् ।
च्युतो न सूर्यः किमु चन्द्रमा वाऽ-
च्युतेन कर्त्रास्ति जगन्निबद्धम् ॥१३२॥
नूनं मनुष्येण समस्तकृत्येऽ-
च्युतस्वभावेन सदैव भाव्यम् ।
च्युतस्वभावश्च्यवते व्रताच्च
विडम्बयन्त्येव जना मुहुस्तम् ॥१३३॥

वृषाकपिः—१०१

वृषाकपिर्विष्णुरकम्पिताभवत्
वृषस्य धर्मस्य स कल्पकृत् क्षणात् ।
[1]यो याथवा यत् कुरुते विकर्म[2]
यमाप्तिविग्नः[3] [4]क्षयमेत्यवार्यम् ॥१३४॥

अमेयात्मा—१०२

विचित्र-रूपाकृति-वर्ण-देहव-
ज्जगत् स्वयं तत्प्रभया[1] प्रकाशते ।
पृथक् प्रमेयः[2] प्रमितिः[3] पृथक् ततः
प्रमाणकृच्चास्ति न तं विना पृथक् ॥१३५॥
अमेय आत्मा श्रुतिभिः प्रकाशितः
'न मेय आत्मे' ति च वाऽसमासतः ।
स एव सूर्यः स उ वा निशाकरः
गायन्त्यमेयात्मपदेन तं वा ॥१३६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'अमेयात्मा' न शक्योऽस्ति मातुं मानेन केनचित्।
यथा मानं स्वकात्मानं मातुं नार्हति कर्हिचित् ॥१३७॥

सर्वयोगविनिःसृतः—१०३

सर्वं विरच्यापि बहुप्रकारं
जगत् पुनर्योगशतैश्च बद्ध्वा ।
असङ्ग एवेति पुनस्तमीष्टे
नानाविधानस्य स सारभूतः ॥१३८॥

निरपेक्षो निराधारः, 'सर्वयोगविनिःसृतः' ।
स विष्णू रचयन् सर्वं, स्वयं सर्वं समीक्षते ॥१३९॥

वसुः—१०४

य आत्मनेदं सकलं सुखात्मा[1]
वस्तेऽथवा वासयते[2] 'वसुः' सः ।
न तद्विनाष्टौ वसवोऽपि कामं
नरं क्षणं वासयितुं क्षमन्ते ॥१४०॥

वसुमनाः—१०५

नूनं 'वसुमना' विष्णुर्जीवं जीवं व्यवस्थया ।
आवास्यैव यथास्थानं, तन्मनाः[1] प्रतिबुद्ध्यते॥१४१॥

स्थानं न तद्यत्र न जीववासो
जीवोऽपि सर्वो न समानदेहः ।
शरीरभेदादुपकर्तृभेद-
स्त[1] तं यथास्थानमनक्ति[2] विष्णुः॥१४२॥

सत्यः—१०६

सत्यः स विष्णुः सृजतीह यद्यत्
तत्तच्च सत्यं स्वगुणानुरूपम् ।
कार्यं स्वकर्त्तारमनक्ति[3] तद्वत्
कुम्भो यथा कुम्भकृतं व्यनक्ति ॥१४३॥

समात्मा—१०७

आकीटगात्रात् स गजादिगात्रे
समानरूपेण विराजतेऽन्तः ।
अतो विशिष्टः स समात्मनाम्ना
नाऽऽकल्पमेतं प्रजहाति धर्मम् ॥१४४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सम्मितः—१०८

एकात्मता मानमिहास्ति यस्य
स सम्मितो विष्णुरनन्तकर्मा ।
सर्वं क्षयं याति विनाशयुक्तं
नैकोऽप्यलं मातुमिहास्ति कश्चित् ॥१४५॥

समः—१०९

समान-मानः स समोऽव्ययो वा
लक्ष्म्या च यो वा 'सहितः' 'समो' वा ।
लक्ष्मीर्हि लाभादुत लक्षणाद्वा
जगच्च 'मा' तत्सहितः 'समो' वा ॥१४६॥

अमोघः—११०

अमोघविष्णोर्न हि कर्म मुग्धं
न तद्व्यवस्था शिथिलत्वमेति ।
भक्तेन काम्यं तदु यद् भवितृ
[1]मोघांशमत्राशु जहात्यमोघः ॥१४७॥

पुण्डरीकाक्षः—१११

यश्चेतनः खैः कुरुते स्वकर्म
तस्यास्ति हृत्, तत्र निगूढ उक्तः ।
स पुण्डरीकाक्षपदेन विष्णु-
र्ज्ञेयो नृभिर्यो 'न कुतश्चनोनः' ॥१४८॥

वृषकर्मा—११२

वृषो हि धर्मो धृति-लक्षणोऽसौ
करोति तद्येन धृतं जगत् स्यात् ।
तत् कर्म विष्णोर्वृषकर्म-नाम्नो
व्यस्तं क्षयायार्हति विश्वमेतत् ॥१४९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृषाकृतिः—११३

यल्लोकलोकान्तरधारणोत्थं[1]
रूपं विभोस्तन्न जरामुपैति ।
वृषाकृतिः शम्भुरनामयोऽयं
सनातनं रूपमिदं बिभर्त्ति ॥१५०॥

रुद्रः—११४

यःसर्वलोकानुगतस्य विष्णो-
र्विधानमाद्यं जगतो भनक्ति[1] ।
तं रोदयत्येव स रुद्रकर्मा
विधानभंगोद्भवदुःखजालैः ॥१५१॥
दुःखस्य रुद्रस्य च सारमित्वा
प्रज्ञापराधाच्च भयं विमृष्य ।
नूनं नरः सत्त्वगुणप्रसूतान्
क्रियाकलापान् विदधीत भूयः ॥१५२॥
प्रबुद्धसत्त्वस्य महाशयस्य
दुःखानशेषानपहन्ति रुद्रः ।
भूपो यथा तुष्टमना विधिज्ञं
दुःखैरशेषै रहितं विधत्ते ॥१५३॥

बहुशिराः—११५

अनन्तवेदः स महान् मनस्वी
विधाय योनीर्विविधा विचित्राः ।
शिरःसु सर्वेष्वधिवास्य वेदं[1]
स्वकं बहुत्वं शिरसां करोति ॥१५४॥

बभ्रुः—११६

अनन्तयोनीर्विविधेच्छबद्धा
वयश्च तासां विषमं पृथक्शः ।
पृथक् पृथक् भोग्यशतैश्च तास्ता
बिभर्ति 'बभ्रु' र्भगवान् स विष्णुः॥१५५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वयोनिः—११७

कैः कैरुपादानविभक्ततत्त्वै-
मर्त्यो मृगेन्द्रा झष-काक-यूकाः ।
आम्रो लता प्रस्तर-हेम-वज्रं
युवन्ति यो वेत्ति स 'विश्वयोनि ।।१५६।।

शुचिश्रवाः—११८

न कापि दिक् यत्र न तं स्तुवन्ति
ध्वनिर्न सा या दिशमन्तरा स्यात्।
भूतात्मसंकीर्त्तन-नाम-यज्ञा-
च्छुचिश्रवाः स प्रणवादिवाच्यः ।।१५७।।

अमृतः—११६

यः शोकमोहादिमनोविकारै-
र्जन्मादिबाल्यादिशरीरधर्मैः[1] ।
मुक्तोऽव्ययः शाश्वतधर्मगोप्ता
सनातनो विष्णुरिहामृतः सः ।।१५८।।
प्राणाः सदार्हन्ति निवासहेतो-
र्मर्माणि शारीरविकारजानि ।
न तानि शम्भोरमृतः स विष्णु-
र्जगच्छरीरेण विराजते सः ।।१५६।।

शाश्वतस्थाणुः—१२०

शश्वत् सदार्थेऽव्यय आत्मसिद्धः
सदाभवः शाश्वत एव विष्णुः ।
नगोऽचलः स्थाणुरनेकलिंगो
यः शाश्वतस्थाणुरसौ हि विष्णुः ।।१६०।।

वरारोहः—१२१

ऋतं च सत्यं समुदीयतस्ततो
जगत्प्रसूतौ भवतश्च बीजे ।
न यद्विनारोहति बीजयुग्मं
फले 'वरारोह'[1] इहास्ति विष्णुः ।।१६१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महातपाः—१२२

महत्तपो ज्ञानमजस्य यस्मात्
महातपा विष्णुरजोऽमृतः सः ।
भवाद्यकालात् क्षणमद्य यावत्
बिभर्ति तेजांसि स खेचराणि[1] ॥१६२॥

सर्वगः—१२३

स्थानं न तद् यत्र न तस्य सत्ता
सोऽन्तर्बहिश्चास्ति सुवर्तमानः ।
स सर्वगो विष्णुरनन्तवीर्यो
जवेन सर्वं गमयत्यजस्रम् ॥१६३॥

सर्वविद्भानुः—१२४

स सर्वविद् विश्वमुखो मखोऽजः
सर्वं जगत् वेत्ति स विष्णुरुक्तः ।
गुप्तं न शम्भोर्भुवि किंचिदास्ते
जगत् समस्तं किल तत्र शेते ॥१६४॥
न यद्विना भाति तडित् कदाचि-
न्न यद्विना भान्ति खगाः समस्ताः ।
सोऽनन्तकर्मा स सखा स विष्णुः
स एव भाता सकलस्य भानुः ॥१६५॥
स सर्वविद्भानुरसौ विभाता
हृदन्तरा ज्ञानलवेन भाति ।
ज्ञानप्रभः सन्निखिलं विचष्टे
स [1]वाडवस्तापयते समुद्रम् ॥१६६॥

विष्वक्सेनः—१२५

नभोऽथ वायुं पृथिवीं समुद्रं
प्रकल्प्य तद्दोषविनाशनानि ।
यथार्हशारीरविकारवन्ति
सृष्ट्वा स भूतानि विराजते तैः ॥१६७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अतो मुनीन्द्रैः कथितो हि 'विष्वक्-
सेनः' स विष्णुर्न विना तदाज्ञाम्।
तदंगतोऽपीह हिनस्ति किंचिद्
वृथाकरोत्येव चमूः स विष्णुः ।।१६८।।

जनार्दनः—१२६

जनार्दनो विष्णुरयोनिजन्मा
युग्मोदयेनार्दयते स जन्तून् ।
न सज्जनं शंसति, दुर्जनं नो
हिनस्ति, तद्विक्रमणं[1] हिनस्ति ।।१६६।।

वेदः—१२७

विष्णुर्हि नूनं तमसः परस्ता-
दतः स वेदः, स हि विद्यते वा ।
स लभ्यते वेदविदा च वेदः
स चेतनो वेदयतेऽथ वेदः ।।१७०।।
विचारपूर्वा कृतिरत्र शम्भो-
रतः स वेदो न हि तत्र दोषः ।
व्याख्याति विश्वे प्रतिवस्तु वेद[1]
विश्वस्य सूत्रं स्थितमस्ति वेदे ।।१७१।।
इदं जगन्नैव नरेण शक्यं
यथार्थतो ज्ञातुमदोषयुक्तम् ।
को नाम शक्नोति यथार्थशब्दै-
र्वक्तुं हि तज्ज्ञस्तु विना तदीशम्[1] ।।१७२।।

वेदवित्—१२८

यथार्थतो वेदविदं तमाहु-
र्यो वेत्ति वेदं जगदात्मसृष्टम् ।
पश्यन्न पश्यत्यपि बाह्यदृष्टिः
पुरःस्थितं वस्तु नरो यथान्धः[1] ।।१७३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अव्यंगः—१२६

आसर्गतोऽद्यावधि योऽविरामं
स्वाभाविकज्ञानबलक्रियाभिः ।
अव्यङ्गनामा कुरुते हि विश्वं[1]
नाप्नोति साङ्गो न निजेन्द्रियैस्तम् ।।१७४।।

वेदांगः—१३०

वेदा यमंगन्त्यथवांगयन्ति
वेदांगसंज्ञः स हि विष्णुरत्र ।
महान् स उक्तः परमेष्ठिसंज्ञो
व्यक्तोऽपि विश्वेऽस्ति निगूढ एषः।।१७५।।

वेदवित्—१३१

विन्ते स वेदानिति वेदवित् स
सृष्टिञ्च तर्कानुगतां विधत्ते ।
चतुर्षु वेदेषु च बुद्धिपूर्वं
न्यधात् स्वकं ज्ञानमनन्तवेदः ।।१७६।।

कविः—१३२

कविर्मनीषी भगवान् स विष्णु-
श्चकार काव्यं श्रुति-विश्वरूपम्[1] ।
स्रोतःसु[2] गां[3] वीषु चतुष्पदेषु
न्यधात् स वेधा नृषु गां च तुर्याम्।।१७७।।

लोकाध्यक्षः—१३३

सप्तोर्ध्वलोकानुत सप्त निम्ना-
नध्यश्नुते विष्णुरयोनिजन्मा ।
तथा यथा ज्ञानबलेन देहं
जीवोऽश्नुतेऽध्यक्षति चात्र विष्णुः ।।१७८।।

सुराध्यक्षः—१३४

यः श्रद्धया राति सुरः स देवः
सूक्त्याथवाताननुयाति विष्णुः ।
अध्यश्नुते विश्वसदः स दातृ-
नतः सुराध्यक्ष इहास्ति विष्णुः ।।१७६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धर्माध्यक्षः—१३५

न कोऽपि धाता भुवने विना तं
योऽध्यश्नुवीताऽखिलधर्मपालान् ।
तथाश्नुते धर्मपदानि विष्णु-
र्यथांगमंगं दृढसन्धिबद्धम्[1] ॥१८०॥

कृताकृतः—१३६

कृतं नियन्त्रा सकलं स्वबुद्धौ[1]
व्यवस्थितत्वादकृतं तथा स्यात् ।
यथा नियन्ता[2] विनियम्य यन्त्रं
सम्भाव्यमानानि निरीक्षतेऽत्र ॥१८१॥

कृताकृताह्वोऽमरमाननीयो
विष्णुः सनात् पश्यति यन्त्रबद्धम् ।
प्रवाहतो नित्यमिदं समस्तं
तथा यथा ज्ञानदृशा नियन्ता ॥१८२॥

चतुरात्मा—१३७

चतुर्विधां सृष्टिमुतापि लोकान्
विकल्प्य विष्णुश्चतुरात्मसंज्ञः ।
विराजते तत्र [1]विचित्रशक्ति-
रात्मानमञ्जन् स्वयमात्मना सः ॥१८३॥

चतुर्व्यूहः—१३८

चतुर्व्यूहः स सर्वज्ञस्तर्क्यो भूतचतुष्टये ।
विश्वयोनिर्दधन्नाम सर्वं पश्यन् विराजते ॥१८४॥

मेषादयो द्वादश नामभिन्ना
नवांकयोगेन सुवन्ति चान्यम् ।
जगच्चतुर्व्यूहमयं समस्तं
व्याप्तश्चतुर्व्यूहपदः स तस्मिन् ॥१८५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुर्दंष्ट्रः—१३६

नखी[1] यथाऽऽखेटमुपात्तवीर्यो
निगृह्य दंष्ट्राभिरमुं निहन्ति ।
विष्णुश्चतुर्दंष्ट्रपदेन वाच्य-
स्तथैव नूनं भुवनं प्रशास्ति ॥१८६॥

भुक्तं यथा पाकमुपैति जन्तोः
कृतं तथा कर्म च याति पाकम् ।
विष्णुश्चतुर्दंष्ट्रपदेन वाच्यो
ददाति जीवाय यथार्हयोनीः ॥१८७॥

चतुर्भुजः—१४०

चतुर्विधं विश्वमिदं विक्लृप्तं,
भुनक्ति भुंक्ते भुजतीह विष्णुः ।
चतुर्भुजः स्वेन गुणेन विश्वं,
यथाव्यवस्थं गमयत्यजस्रम् ॥१८८॥

व्याख्याक्रमस्तस्य चतुर्भुजस्य
न्यस्तो यथाबुद्धिबलोदयाय ।
इयत्त्वमस्त्येव न तस्य विष्णो-
र्भुजाश्चतस्रश्च न तस्य दृष्टाः ॥१८९॥

भ्राजिष्णुः—१४१

भ्राजिष्णुना विश्वमिदं समस्तं
देदीप्यतेऽतः स महः स विष्णुः ।
अनन्तता चापि च तस्य विष्णोः
पृथक् पृथक् भाति च वस्तुमात्रे ॥१९०॥

भोजनम्—१४२

परस्पराकर्षणसूत्रसंधृतं
जगत् समस्तं प्रतिवस्तु भोजनम् ।
स एव धाता सकलस्य यस्मात्
तस्मादनक्त्येव व भोजनाख्याम् ॥१९१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भोक्ता—१४३

भुनक्ति भुंक्ते भुजतीति 'भोक्ता'
पाको ह पक्तारमुपैत्यवश्यम् ।
सृष्ट्वा स 'भोक्ता' सकलं स्वजम्भै-
र्गृह्णन् जगत् स्वात्मनि वेत्ति वेद्यम् ॥१६२॥

सहिष्णुः—१४४

नृभिः सदुक्तं किमु वा दुरुक्तं
सर्वं विमृष्यन् सहते च विश्वम् ।
न यात्यधैर्यं भुवनानि मृष्यन्
लोके सहिष्णुः स हि विष्णुरेकः ॥१६३॥

जगदादिजः—१४५

जगत् समग्रं कुरुते स्वयंभू-
र्विराजते चापि स तत् पुरस्तात् ।
स एव विष्णुर्जगदादिजोऽव्ययो
घटात् पुरस्तात् घटकृद् यथास्ते ॥१६४॥

अनघः—१४६

अघो न विष्णावनघः स उक्तः
सोऽपापविद्धः स विशुद्ध उक्तः ।
न कापि शम्भोः कृतिरस्ति दुष्टा
कर्ताऽनघो [1]विश्वकृतेर्यतोऽतः ॥१६५॥

विजयः—१४७

जयः स विष्णुर्विजयः स विष्णु-
र्व्याप्नोति विश्वं स विजेतृधर्मा ।
सत्ये जयो वा विजयोऽस्ति गुप्तो
यत्रास्ति धर्मो विजयोऽस्ति तत्र ॥१६६॥

जेता—१४८

स एव जेता सकलस्य लोके
न कोऽपि तं जेतुमिहास्ति शक्तः ।
यो हन्ति विष्णोरचलां व्यवस्थां
सहस्रधा शातयते ह तं सः ॥१६७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वयोनिः—१४६

स विश्वयोनिर्भगवान् वरेण्यो
वियौति संयौति च विश्वमात्रम् ।
सोऽदृश्यमानो विविधं प्रसूते
व्यनक्ति [1]जातस्तमु विश्वयोनिम् ।।१६८।।

पुनर्वसुः—१५०

जातं पुनर्वासयते स विष्णुः
पुनर्वसुं चांकति जातमात्रम्[1] ।
यथैकधा यत् कृतमस्ति तत् तथा
पुनः पुनर्म्नाति[2] सनात् पुनर्वसुः ।।१६६।।

उपेन्द्रः—१५१

उपेन्द्रनामा भगवान् स विष्णुः
पूर्वापराभ्यां बध्नाति विश्वम् ।
ददाति वीर्यं निखिलौषधिभ्यः
[1]तन्मूलमूलाश्च भवन्ति जीवाः ।।२००।।

वामनः—१५२

यदत्र किंचिद् भुवि दृश्यमानं
ज्ञानेक्षणेनापि च चिन्त्यमानम् ।
तद् वामनेनात्र विक्लृप्तमेत-
ज्ज्ञानस्वरूपेण[1] निजात्मयोगात्।।२०१।।
जगत् [1]सिसृक्षुर्भगवान् स विष्णु-
र्विकल्पनैर्वामन आ विभाति[2] ।
जीवोऽपि तज्ज्ञानपथानुगः सन्
विकल्पनैस्तोषमुपैति भूयः ।।२०२।।

प्रांशुः—१५३

प्रांशुर्ह वेवेष्टि जगत् समस्तं
नोच्चैर्हि तस्मात् न परं च किंचित्।
तस्यैव गर्भे स्थितिमेति विश्वं
ह्रस्वायते तारकितं नभश्च ।।२०३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमोघः—१५४

[1]अनल्पविद्ये न हि मोहसत्ता
सनातनो विष्णुरमोघ उक्तः ।
जगत् समस्तं महिमानमस्य
व्यनक्त्यमोघस्य बुधं सुनेत्रम्[2] ॥२०४॥

शुचिः—१५५

यदत्र विश्वे शुचिमत् स्वरूपं
स्वभावतो वा शुचिमत् प्रसिद्धम् ।
शुचिः स विष्णुः स्वयमास्थितः सन्
सर्गादितः शुच्यत एव सर्वम् ॥२०५॥

ऊर्जितः—१५६

यदत्र किंचिद् बलवत् प्रसिद्धं
विराजते प्राणयुतं च यद् यत् ।
तदूर्जितेनैव ततं समस्तं
सनाद्ध वै विष्णुरिहोर्जितः[1] सः ॥२०६॥

अतीन्द्रः—१५७

यदिन्द्रनाम्ना वरुणेन नाम्ना
यमेन नाम्नाऽथ सुपर्णनाम्ना ।
सूर्येण नाम्ना किमु वाग्निनाम्ना
कर्मास्ति वेदेषु बहुत्र गीतम् ॥२०७॥
तत् कर्मजातं ह्यतिवर्त्तते यः
स पावनो विष्णुरतीन्द्र उक्तः ।
स मातरिश्वा स यमः स उग्र-
स्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥२०८॥

संग्रहः—१५८

स 'संग्रहः' सर्वगतः स विष्णु-
र्गृहीतकेशो व[1] जगत् समस्तम् ।
संगृह्य, संग्राह उ संग्रहो वा
विश्वं विधत्ते स उ चैकनीडम् ॥२०९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्गः—१५९

सर्गः स शम्भुः समुदीर्णवीर्यो
रेतो विधायैव मनोमयं सः ।
ससर्ज विश्वं विविधस्वरूपं
कामः स विष्णुः स हि सर्ग उक्तः ।।२१०।।

धृतात्मा—१६०

धृतात्मना विश्वमिदं समस्तं
धृतं विराजं स उ संविवेश ।
तथैव जीवोऽपि निजात्मयोगाद्
ध्रियन् वपुर्विष्णु[1] मनक्त्यनन्तम् ।।२११।।

नियमः—१६१ यमः—१६२

यमो विवस्वान् नियमो यमो वा
नियामके विश्वमिदं नियम्य ।
स मृत्युदूतः नियमेन सर्वं
जगद् व्यवस्थापयते ह विष्णुः ।।२१२।।
विष्णुर्नियन्ता नियमो यमोऽसौ
विष्णुर्नियन्ताऽनियमोऽयमः सः ।
प्रकाशते विश्वमिदं समस्तं
यमैर्नियामैश्च[1] कृतव्यवस्थम् ।।२१३।।

वेद्यः—१६३

स एव वेद्यः सकलैः पुराणो
वेद्यं कविं तं कथयन्ति वेदाः ।
वेद्ये स्थितं विश्वमिदं समस्तं
तस्माज्जगच्चापि च वेद्यमाहुः ।।२१४।।

वैद्यः—१६४

विश्वस्य निर्माणकलामशेषां
विष्णुर्ह वेदेति स 'वैद्य' उक्तः ।
तं सर्वविद्यं य उ वेत्ति वैद्यं
विद्यामयः सोऽप्युपयाति वैद्यम् ।।२१५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सदायोगी—१६५

स वर्जनं निन्द्यकृते विधत्ते
युङ्क्ते स्वयं विश्वकृतौ विधाता ।
स विश्वमेतं परितो दधाति
स युज्यते सर्वकलासु दक्षः ॥२१६॥

एवं सदायोगमुपेयिवांसं
बुधाः सदायोगिनमाहुरग्र्यम् ।
विष्णुं पुराणं सुलभं शुचिं तं
पश्यन्त आयुक्ततत[1] सदैव ॥२१७॥

वीरहा—१६६

विरुद्धकर्तॄन् स हिनस्ति वीरान्
प्रज्ञापराधी विनिपातमेति ।
स मन्युमान् विष्णुरमेयकर्मा
स वीरहा लोक-हिताय युक्तः ॥२१८॥

माधवः—१६७

स ज्ञानवान् ज्ञानमयोऽथ विष्णु-
र्मत्वा जगद् धूनयतीह शश्वत् ।
लक्ष्मीस्तु मा, मा च हरस्य विद्या
तस्याः स ईष्टे स उ माधवोऽतः ॥२१९॥

मधुः—१६८

न तत् स्थलं यत्र न सोऽस्ति सृप्तो
न कर्म तद् यन्न स वेत्ति वैद्यः[1] ।
स एव मन्वान इदं समस्तं
व्याप्नोति विष्णुर्मधुराप्तकामः[2] ॥२२०॥

अतीन्द्रियः—१६९

अतीन्द्रियो विष्णुरनल्पशक्ति-
र्न शक्यते त्राऽविकलेन वक्तुम् ।
गायन्ति वेदास्तमुदात्तवीर्यं
ध्रुवं महीयांसमशब्दरूपम् ॥२२१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महामायः—१७०

स सर्वविद्यो [1]निजकाभिरग्र्यो
मायाभिराप्नोति बहुत्वमत्र ।
तं नैकरूप[2] पुरुरूपकं वा
विज्ञा महामायमुतामनन्ति ।।२२२।।
स व्याप्नुवन् विश्वमिदं समस्तं
न यत्र मर्त्यस्य मनोऽपि याति ।
व्यनक्ति रूपैर्विविधैः स्वरूपं
विष्णुर्महामाय[1] उ नैकमायः ।।२२३।।

महोत्साहः—१७१

विष्णुर्महोत्साह उ वा सहोऽसौ
सोढं महोत्साहवता समस्तम् ।
बिभ्रत् सनादेव स भूरिभारः
कदाचिदप्याश्रयते न तापम्[1] ।।२२४।।

महाबलः—१७२

यद् यद् बलं यस्य जगत् प्रसिद्धं
तत् तद् बलं तस्य महाबलस्य ।
स धृष्णुषेणः स महान् शचीभि-
र्व्याप्नोति विश्वं स बलः स विष्णुः।।२२५।।
स धृष्णुषेणः स सुषेण उक्तो
विश्वं समस्तं स हि पाति हन्ति ।
इन्द्रो ह राजा स चराचरस्य
तमेव विष्णुं प्रणमन्ति सेनाः ।।२२६।।

महाबुद्धिः—१७३

विष्णुर्महाबुद्धिरनन्तविद्यो
बुद्धेर्वितानं तत एव लोके ।
ज्ञानातियोगाद् ध्रियते स विश्वं
जीवेन कर्माणि च बुद्धियोगात् ।।२२७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महावीर्यः—१७४

स वीर्यवान् विष्णुरनन्तवीर्यः
लोकान् समस्तान् स्ववशे विधत्ते ।
यद् वीर्यमात्रं तदु तस्य वीर्यं
दिष्टो महावीर्यपदेन विष्णुः ॥२२८॥

महाशक्तिः—१७५

स मर्षणः शक्तिरसौ सहः सः
विष्णुर्महाशक्तिरिहास्ति गीतः ।
न शक्तिमद् दृष्टिपथेऽस्ति किंचित्
तस्मात्परं शक्तिमयं च यत् स्यात् ॥२२९॥

महाद्युतिः—१७६

यद् दीप्तिमज्ज्ञानदृशास्ति लभ्यं
प्रत्यक्षतो वा नयनेन दृश्यम् ।
महाद्युतिर्द्योतयते समस्तं
व्याप्नोति दीप्त्या भुवनानि विष्णुः ॥२३०॥

अनिर्देश्यवपुः—१७७

वपुर्विराट् तस्य महेश्वरस्य
तत् कोऽत्र शक्नोति गिरा प्रवक्तुम् ।
विराजते सर्वक एव विश्वे
[1]रामोऽस्त्यनिर्देश्यवपुः स विष्णुः ॥२३१॥
विष्णुं जनुर्नापि जरा न मृत्युः
स्पृशन्ति [1]वैराजवपुर्यतः सः ।
स सर्वगः विश्वमदः ससर्ज
युवा स विष्णुर्न कुतश्चनोनः ॥२३२॥

श्रीमान्—१७८

शोभा हि सर्वत्र महेश्वरस्य
श्रीमानतो विष्णुरुदात्तशोभः ।
उच्छिष्टनाम्ना च स शम्भुरुक्तो
लक्ष्मीरुत श्रीश्च तदंकमंक्तः[1] ॥२३३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमेयात्मा—१७६

[1]इयत्परिच्छिन्नवपुर्न कश्चित्
[2]सर्वोदरस्थं प्रभवेत् प्रमातुम् ।
उक्तो ह्यमेयात्मपदेन विष्णु-
र्व्याप्नोत्यमेयः स समस्तमेतत् ।।२३४।।

महाद्रिधृक्—१८०

महाद्रिधृक् विष्णुरधर्षणोऽसौ
धृष्णोति सर्वं भुवि चाद्रिमात्रम् ।
गुहा न तेषां भुवि कापि दृष्टा
महाद्रिधृक् यत्र न सत्तयास्ति ।।२३५।।

महेष्वासः—१८१

विष्णुर्महेष्वासपदेन वाच्यः
स विश्वमात्रं परिपाति हन्ति ।
यच्छक्तिमत्तद्धनुरस्य शम्भोः
युनक्ति तं कर्षणबृंहणाभ्याम् ।।२३६।।

महीभर्त्ता—१८२

महीं बिभर्त्येव सनात् स विष्णुः
सूर्यः स्वभूत्या च बिभर्त्ति तां वा ।
धाता यथापूर्वमकल्पयच्च
महीं स दाधार बभार चाद्‌भ्यः ।।२३७।।

श्रीनिवासः—१८३

स श्रीनिवासः श्रियमादधाति
जगच्च तं विष्णुमनक्ति भूयः ।
तं श्रीनिवासं मनुजाः स्तुवन्ति
'स नो वसून्याभर' शब्दयन्तः।।२३८।।

सतांगतिः—१८४

स सच्चिदानन्दगुणो ह विष्णुः
सतांगतिश्चापि स एव विष्णुः ।
सतां गतिर्ब्रह्मणि सत्स्वरूपे
भर्गः[1] स विष्णुः स शुचिः स बन्धुः।।२३९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनिरुद्धः—१८५

न केनचित् कर्हिचिदेव विष्णुः
शक्योऽत्र रोद्धुं प्रबलेन यस्मात् ।
तस्मात् सदा सोऽस्त्यनिरुद्ध उक्तो
विष्णुर्वरेण्यः स रुणद्धि[1] लोकान् ॥२४०॥

सुरानन्दः—१८६

विष्णुः सुरानन्द उ नन्दनः स
सुरान् सदा नन्दयते हृदिस्थः ।
[1]तद्व्याप्तिधर्मं च विकासयन्ती
धरा ददात्येव सहस्रशस्तम् ॥२४१॥

गोविन्दः—१८७

विष्णुः स गोविन्दपदेन वाच्यो
यं विन्दयन्तीह वचांसि भूयः ।
तेनोद्धृतेयं पृथिवी समुद्रात्
स्रवन्ति गावो ह पयांसि तस्मै[1] ॥२४२॥

गोविदांपतिः—१८८

न कापि वाक् प्राणिनि लब्धभेदा
न 'गोविदां वेत्ति' पतिस्तु यां स्यात्।
स सर्वविद्यः स हि सर्वलभ्यः
सर्वे यथावाक् तमु यान्ति विष्णुम् ॥२४३॥

मरीचिः—१८९

मरीचिरात्मानमनक्ति विष्णु-
र्यमस्वरूपेण स मृत्युदूतः ।
न तस्य मत्युर्न जरा न जन्म
स वै मरीचिः सकलं विहन्ति ॥२४४॥

दमनः—१९०

विश्वं समस्तं दमनेन दान्तं
सर्वत्र सर्वस्य च मृत्युरुप्तः ।
दण्डं स दम्यं च सहैव जज्ञे
विष्णुर्दमोऽसौ दमनः स दण्डः ॥२४५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हंसः—१६१

जीवो हि तादात्म्यमितो महेच्छुः
सोऽसावहं हंस उ वास्म्यहं सः ।
विष्णुर्हि हंसः स उ हंसनेत्रो
व्याप्नोति विश्वं भुवनानि पश्यन्॥२४६॥

तमेव वेदं पुरुषं पुराणं
विद्वान्समग्निं त्रिवृतं च हंसम् ।
नानागुणैर्व्याप्तमनेकमेकं
ज्येष्ठं वदन्त्येव बुधास्तु विष्णुम्॥२४७॥

सुपर्णः—१६२

सृष्ट्वा जगत् सर्वविधं स तष्टा
विविक्तमात्रः स सुपर्ण एकः ।
स एव दिव्यं गमयत्यजस्त्रं
सुपर्णमग्निं दिवि सूर्यसंघम् ॥२४८॥

एकः स विष्णुर्विविधात्मशक्त्या
व्याप्नोति विश्वं विविधस्वरूपैः ।
तमेव सूर्यं तमु वा सुपर्णं
तमेव विद्वांसमलं ब्रुवन्ति ॥२४९॥

भुजगोत्तमः—१६३

गतेरधिष्ठानमिहास्ति वायुः
पतत्रिणो यान्ति यथेष्टवेगाः ।
वैमानिकाश्चापि पतत्रिमूला
जयन्ति नैते भुजगोत्तमं तम् ॥२५०॥
सर्पा भुजंगा भुजगास्त एव
तत्रापि नानाकृतिवर्णभेदाः ।
कौटिल्ययोगाद् भुजगास्त उक्ता
अत्येति विष्णुर्भुजगोत्तमस्तान् ॥२५१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हिरण्यनाभः—१६४

हिरण्यनाभो भगवान् स विष्णु-
श्चराचरं नह्यति विश्वमात्रम् ।
यथा स लोकान् भ्रियते तथात्मा
हिरण्यनाभो ध्रियतेऽथ गात्रम्[1] ।।२५२।।

सुतपाः—१६५

यथा स विष्णुः सुतपाः स्वयं सन्
सूर्यादिकानां सहतेऽथ तापम् ।
तथा स्वयं तापसुतप्तगात्रा
गर्भस्य तापं सहते च माता ।।२५३।।

स एव विष्णुः सुतपाः स्वयं सन्
गर्भे दधात्येव दिवाकरादीन् ।
मातापि तद्वत् 'सुतपा' यशोधृक्
गर्भान् दधात्येव यथार्हकालम् ।।२५४।।

पद्मनाभः—१६६

स पद्मनाभो भगवान् विरामो[1]
ज्ञानेन संनह्यति वेद[2]-सृष्टिम् ।
यो यस्य यावल्लभते ह वेदं
स पद्मनाभं लभते ह तावत् ।।२५५।।

नाभिर्यथा नह्यति मर्ममात्रं
ज्ञानं तथा नह्यति भूतमात्रम् ।
पद्मप्रभं विश्वमिदं समस्तं
बध्नाति विष्णुः प्रतिकल्पमेतत् ।।२५६।।

प्रजापतिः—१६७

प्रजापतिः सर्वप्रजा जनित्वा
भोज्येन धामेन च पाति सर्वाः ।
स एव चायुर्निदधाति तासु
स ओत एवास्ति समग्रविश्वे ।।२५७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमृत्युः—१९८

अमृत्युरस्त्यत्र स विष्णुरुक्तः
प्रवाहतोऽमृत्युरिदं समस्तम् ।
यथाकृतं यद् विभुना तथा तत्
क्रियाक्षमं मृत्युरतोऽयथात्वम् ॥२५८॥

सर्वदृक्—१९९

स सर्वदृक् विष्णुरमीलिताक्ष-
श्चन्द्रार्कनेत्रः सकलं विचष्टे[1] ।
यस्तं विभुं सर्वदृशं हृदिस्थं
जानाति नातिक्रमते स वर्त्म ॥२५९॥

सिंहः—२००

हिनस्ति यस्मात् प्रतिवस्तु वस्तु
व्याप्नोति विश्वं स हि सिंहशक्त्या।
न तद्विना कोऽपि क्षमोऽस्ति लोके
विरुद्धभूतानि नियोजयेद् यः ॥२६०॥
तस्मात् स सिंहः प्रतिवस्तुनिष्ठो
विरुद्धभावैर्जगदातनोति ।
तं व्यापकं सर्वकलाभिरामं
विष्णुं वदन्त्येव च सिंहनाम्ना ॥२६१॥

संधाता—२०१

संधातृधर्मा भगवान् वरेण्यो
भेदं विना विश्वमिदं बिभर्त्ति ।
तथा यथा स्थानमभीप्सुरात्मा
सर्वांगरूढं नयते ह कायम् ॥२६२॥

सन्धिमान्—२०२

स सन्धिमान् विष्णुरनन्तकर्मा
जगद्विधत्ते बहुसन्धियुक्तम् ।
तं सन्धिमन्तं भुवनं स धाता
व्याप्नोति संधानगुणेन[1] नित्यम् ॥२६३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्थिरः—२०३

स्थिरः स विष्णुर्गतिमद् विधाय
जगत् स्थिरत्वं न निजं जहाति ।
यथात्र यन्त्राणि विधाय कर्ता
मतेः स्थिरत्वं न जहाति मोहात् ॥२६४॥

यन्त्रं भ्रमन्तं सगतिं विधाय
स्वामी स्वयं तिष्ठति चाप्रकम्पः ।
यथा तथा विश्वमिदं विधाय
स्थिरो[1] नियच्छन् भुवनानि शास्ति ॥२६५॥

अजः—२०४

अजः स सर्वत्र गतोऽस्ति विष्णु-
र्न तं विना स्थानमिहास्ति किंचित् ।
तं सोम-सम्मुग्धगुणो ह भक्तो
रारन्धि सोमेति च जोहवीति ॥२६६॥
यः सत्यरूपस्य गुहागतस्य
जगद्विधातुर्न विहन्ति मार्गम् ।
स एव भक्तो, न तु गान-रक्त-
स्तं सत्यबुद्ध्याजति, पाति, शम्भुः ॥२६७॥

दुर्मर्षणः—२०५

दुर्मर्षणो विष्णुरयं विविक्तो
जगद्विधत्ते सुगमादबोधम् ।
तन्नाल्पविद्या अतपाः क्षमन्ते
दुर्मर्षणं तेन कृतं समस्तम् ॥२६८॥

शास्ता—२०६

शास्ता स विष्णुर्ह्यसकृत् प्रकल्प्य
जगन्नितान्तं नियतं प्रशास्ति ।
ग्रहाः स्वमार्गं न परित्यजन्ति
मृत्युश्च शिष्टः क्रमतेऽनुभक्ष्यम् ॥२६९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शास्ता गुरुर्विष्णुरपापविद्धः
शिष्यं जगद् वेदपथेन शास्ति ।
य एव लोकं बहुधा विचष्टे
स वेद तत्त्वं बहुधात्र वेत्ति ॥२७०॥

विश्रुतात्मा—२०७

स विश्रुतात्मा बहुधाभिधानै-
र्गीतोऽस्ति वेदे स उ विष्णुरुक्तः ।
स एव शुक्रः स उ चन्द्रमा च
स एव वायुः स उ चाग्निरुक्तः ॥२७१॥

सुरारिहा—२०८

सुरारिहा सर्वजगत्प्रसिद्धो
विष्णुर्हि नूनं परितो रुणद्धि ।
सुरान् जिघांसुर्मनुजोऽत्र यस्तान्
सदीपकं ध्यायति[1] 'पाहि नोग्ने' ॥२७२॥

गुरुः—२०९

गुरुर्हि विष्णुः स जगत् समस्तं
यथायथं न्यासितपादपद्मम् ।
वेदोपदेशेन[1] गृणाति नित्यं
जगत् स्वयं वक्ति गुरोः कृतिं च ॥२७३॥

गुरुतमः—२१०

न कोऽपि तस्मादधिकोऽस्ति वक्ता
ज्ञानस्य [1]तज्ज्ञानमिहास्ति सृप्तम्[2] ।
गुरुः स विष्णुस्तमपा [3]तिशेते
गुरुं ग्रहं चापि च विश्वमात्रम् ॥२७४॥

धाम—२११

धामात्मकं ब्रह्म दधाति सर्वं
धामात्मके ब्रह्मणि विश्वमेतत् ।
ज्योतिर्हि सूर्यः स उ धाम उक्तः
विष्णुर्हि धामाश्नुत[1] एव सर्वम् ॥२७५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्यः—२१२

जगत् समस्तं गतिमत् स्वरूपं
यज्ञात्मकं विश्वमिदं च तस्य ।
स तत्र यज्ञेऽविचलस्वरूपः
सत्यो ह्यतो विष्णुरिहास्ति गीतः ।।२७६।।

सत्यपराक्रमः—२१३

स सर्वजित् सत्यपराक्रमः स;
स्थिरं पराक्रान्तमिदं हि तेन ।
नश्यत्सु सर्वेषु न नाशमेति
कृतं हि यत् सत्यपराक्रमेण ।।२७७।।

निमिषः—२१४

नियम्य विश्वं सकलं विधाता
गुणोच्चिकीर्षु[1] र्जगदातनोति ।
एकं ह्यनेकं विदधन्निमेषं[2]
निमेषमात्रः[3] स बिभर्त्ति विष्णुः ।।२७८।।

अनिमिषः—२१५

विश्वं विधत्ते स जगद्यथार्थं[1]
न कोऽपि तं स्पर्द्धयितुं क्षमोऽस्ति।
स एव विश्वेऽनिमिषः पुराण-
स्तमेव विष्णुं कवयन्ति वेदाः ।।२७६।।

स्रग्वी—२१६

अनन्तपारं विविधस्वरूपं
सूत्रे शिवे[1] संग्रथितं समस्तम् ।
तं स्रग्विणं विष्णुमुदात्तभासं
शोभायमानं कुरुते प्रकामम् ।।२८०।।

वाचस्पतिरुदारधीः—२१७

स भूतमात्रस्य हृदन्तरस्थो
निशम्य वाचः परिपाति सर्वान् ।
बलान्वितान् हीनबलान् विधत्ते
हीनानलक्ष्येण च पाति नाम्ना ।।२८१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वाचस्पतिर्वाचि विराजमानो
वाचा[1] जगच्छास्ति च निर्विकल्पः ।
वाचं स सर्वेषु निधाय विश्वं
व्याप्नोति तस्मात् स हि विष्णुरुक्तः ।।२८२।।

उदारधीर्विष्णुरुदारबोधो
विश्वं प्रियं ज्ञानमयं विधत्ते ।
पश्यन्ति तं काव्यधियं पुराणं
न तत् परोऽन्यः कविरस्ति लोके ।।२८३।।

अग्रणीः—२१८

यदत्र किंचिद्विभुनास्ति सृष्टं
तदग्र एवानयतेऽग्रणीः सः ।
ग्रहैः समां [1]यातिमुपैति विश्वं
यथागमं[2] विष्णुरनक्ति[3] चाग्रे ।।२८४।।

ग्रामणीः—२१६

स ग्रामणीर्विश्वमिदं समस्तं
समूहरूपेण नयन् बिभर्ति ।
[1]विश्वं वपुस्तस्य यतोऽस्ति विष्णोः
सर्वांगमात्रं नयते स एकः ।।२८५।।

श्रीमान्—२२०

श्रीमान् स उक्तो भगवान् वरेण्यः
श्रिया जगद्व्याप्तमिदं समस्तम् ।
सा श्रीरजस्रं विभुमद्वितीयं
वृणोति लक्ष्मीश्च तथैव तद्वान् ।।२८६।।

स श्रीपतिः श्रीश उ श्रीनिवासः
शोभापतिर्भूतिपतिस्तथैव ।
स जातवेदा विधिवद् वृतः सन्
युनक्ति लक्ष्म्या पुरुषं स्तुवन्तम् ।।२८७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्यायः—२२१

न्यायेन विश्वं परितोऽस्ति नीतं
न्यायः स्वयं नो क्रमते कुतश्चित् ।
स सर्वव्याप्तो न कुतश्चनोनः
सनातनो न्याय इहास्ति विष्णुः ॥२८८॥

नेता—२२२

यदत्र किंचिद्भुवि दृश्यमानं
नेत्रास्ति सर्वं पथि नीयमानम् ।
स एव नेता सकलस्य लोके
यतः स विष्णुर्वयुनानि वेद ॥२८९॥

समीरणः—२२३

समीरणो विष्णुरनन्तकर्मा
समीरयन्नेति जगत् समस्तम् ।
सनात् स्वकां पालयति व्यवस्थां
समीरणो विष्णुरिहास्त्यतः सः ॥२९०॥

सहस्रमूर्धा—२२४

सहस्रमूर्धा भगवान् स विष्णुः
सहस्रमूर्धानमकल्पयत् सः ।
लोकं समग्रं पुरुषस्तथा तं
सहस्रमूर्धानमनक्ति विष्णुम् ॥२९१॥

विश्वात्मा—२२५

यदत्र किंचिद् भुवि दृश्यमानं
तद् ब्रह्मणा व्याप्तमिहास्ति सर्वम् ।
विश्वं शरीरं गमयत्यजस्रं
विश्वात्मनामास्त्यत एव विष्णुः ॥२९२॥

सहस्राक्षः—२२६

विष्णुः सहस्राक्षपदेन वाच्यो
विकल्पयन् गोचरगोलकानि ।
स एव विज्ञानवितानानिष्ठः
सनातनः पश्यति भूतमात्रम् ॥२९३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहस्रपात्—२२७

सहस्रधा पादवितानविज्ञः
सहस्रपात् पादशतैर्विभक्तम् ।
अथाप्यपादो विविधस्वरूपं
जगत् प्रक्लृप्यास्ति स तत्र विष्णुः ॥२६४॥

आवर्त्तनः—२२८

आवर्त्तनो विष्णुरदृश्यमानः
शक्त्या स्वया वर्त्तयते समस्तम् ।
जातो विकारान् समुपैति विद्वान्
नान्तायतेऽनन्तधिकस्य *कर्म ॥२६५॥

निवृत्तात्मा—२२६

जज्ञे स विश्वं स बिभर्ति विश्वं
सखा स जीवस्य समानशाखः ।
नाश्नन् जगज्जातरसानशेषान्
निवृत्तमात्रोऽश्नुत एव सर्वम् ॥२६६॥

संवृतः—२३०

स संवृतो विष्णुरनन्तलोकान्
समानभावेन ववार जातान् ।
तस्मिन्निदं सं च वि चैति सर्वं
विश्वं भवत्येकगृहं च तस्मिन् ॥२६७॥

सम्प्रमर्दनः—२३१

स विश्वकृद् विश्वमिदं चिकीर्षु-
र्मृद्नाति सम्यक् सबलं ह्यजां ताम् ।
तथा यथा कुम्भकृतो प्रवृत्तौ
मृदं प्रमृद्नाति समस्तशक्त्या ॥२६८॥

विष्णुः स्वयं सर्वकलासु निष्ठो
क्षुभ्नाति विश्वञ्च करैरसंख्यैः ।
स रुद्र उक्तो भयकृत् स उक्तो
यमोऽयमः सःस उ काल उक्तः ॥२६६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तं कालनेमिं प्रणमन्ति सर्वे
तं चाप्रमत्तं द्युचरा द्रवन्ति ।
मृत्युर्भयादत्ति जगच्च तस्य
वह्निर्भयाद् यात्यवनेरथोर्ध्वम् ॥३००॥

अहःसंवर्त्तकः—२३२

लोकज्ञो न च वेदज्ञो वेदज्ञो न च लोकवित् ।
एकपक्षखगस्येव, वाक्य तस्यावसीदति ॥३०१॥
जगद् वेदस्य व्याख्यानं, वेदो विश्वप्रकाशकः।
तस्माद्वेदं विजानीयाल्लोकाच्छास्त्राच्च यत्नतः॥३०२॥

स्वतः प्रमाणानि भवन्ति वेदाः
स्वतः प्रमाणं च जगत् समस्तम् ।
न वेदगाथामनुयाति विश्वं
विश्वे भवं वेदवचः प्रमाणम् ॥३०३॥

स प्रत्यहं विश्वमिदं विधाता
संवर्तयन्नात्मगुणैः सदास्थैः ।
विष्णुः स्वयं स्वं न जहाति धर्मं
जगच्च नो धर्मगुणौ जहाति ॥३०४॥

विष्णुः स्वयं सत्यपरायणः सन्
सत्येन धर्मेण जगद् युनक्ति ।
सर्गाद्यकाले गुणवद्यथैतत्
तथैव चाद्यापि जगद् विभाति ॥३०५॥

वह्निः—२३३

वह्नीः स विष्णुर्जगदाप्य सर्वं
फलेन कर्त्तारमलङ्करोति ।
उप्तं यथा वापमुपैति बीजं
जगच्च तं विष्णुमुपैति तद्वत् ॥३०६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनिलः—२३४

अतन्द्रितो विष्णुरतन्द्रितं जगत्
गतिं व्यवस्थापयतेऽनिलोऽतः ।
स प्राणयन् विश्वमिदं समस्तं
स एव वायुं च युनक्ति गत्या ॥३०७॥

धरणीधरः—२३५

विष्णुर्हि लोके धरणीधरोऽस्ति
स एव दाधार स पाति धातॄन् ।
पतिर्यथा पाति धरित्रिरूपां
पत्नीं तथा विश्वमिदं च पुत्रम् ॥३०८॥

सुप्रसादः—२३६

यः सुप्रसादस्तमसः परस्ता-
च्छब्देन वेदेऽस्ति बहुत्र गीतः ।
दिग्-देश-कालैः स न याति बन्धं
प्रसादेयच्चापि जगन्निबध्नन्[1] ॥३१०॥

प्रसन्नात्मा—२३७

सूर्योद्गते विश्वमिदं प्रसन्नं
सूर्याभिमुख्ये च मनः प्रसन्नम्।
मध्यागतैश्चाथ [1]विजातियोगै-
र्दृष्टाथ दृश्यं लभते विकारम् ॥३११॥

न तत्र देवेऽस्ति विकारजातं
न मध्यपाती च विहन्ति तं कम्[1]।
तस्मात् प्रसन्नात्मपदेन वाच्यो
विष्णुस्तनोत्येव जगत् प्रसन्नम्॥३१२॥

विश्वधृक्—२३८

उत्पत्तिभेदैरुत कालभेदैः
प्रसूनभेदैरथ पर्णभेदैः ।
रसस्य भेदैर्वयसश्च भेदैर्धृष्णोति
विश्वं स कविः स विष्णुः ॥३१३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वभुक्—२३६

स विश्वभुग् विश्वमिदं सनाद्वै
भुनक्ति भुंक्ते भुजतीति तज्ज्ञाः ।
वदन्ति, नानागणितप्रयोगै-
र्ग्रहानुरूपैः श्रुतिमन्त्रपूर्व्यैः ॥३१४॥

विभुः—२४०

चराचरे ज्ञाननयेन[1] वेद्ये
विभुर्भवत्येव विचित्ररूपैः ।
स एव सूर्यः स उ चन्द्रमा वा
सोऽग्निः स इन्द्रः स उ वा गरुत्मान् ॥३१५॥

व्याप्ते विभौ विश्वमिदं समस्तं
लोके भवत्येकगृहेण तुंल्यम् ।
तथा यथा वाप[1]-गुणेन युक्ता
भवन्ति पुत्रा विविधाश्च पौत्राः ॥३१६॥

एवं स विष्णुर्विविधस्वरूपै-
र्विभावयत्येव निजं स्वरूपम् ।
व्यवस्थया विश्वमिदं दधानो
विदत्सु बुद्धिं दृशये युनक्ति ॥३१७॥

सत्कर्त्ता—२४१

कर्त्ता विकारान् कुरुते प्रकृत्या
विकार्यकर्त्रोश्च समानसत्ता ।
सत्कर्तृशब्देन स विष्णुरुक्तो
जगच्च तं सत्कुरुते सदैव ॥३१८॥

सत्कृतः—२४२

स सत्कृतो विष्णुरनन्तकर्मा
पूर्वैर्नवैश्चाप्यृषिभिः सदैव ।
स्तुतोऽथ गीतो विविधेन साम्ना
तं सत्कृतं विष्णुमुदीरयन्ति ॥३१९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

साधुः—२४३

स साधुकर्मा स हि विश्वकर्मा
स साधनैः साध्यमिदं तनोति ।
सारल्यसद्भावमुपेत्य विश्वं
तत् तं स्तुवन् विष्णुमनक्ति साधुम्।।३२०।।

सुज्ञानमेवं सुलभं सुगम्यं
कर्मास्ति देवस्य ततः स साधुः ।
तज्ज्ञानसिद्धौ मनुजोऽपि तद्वत्
साध्नोति यन्त्राणि यथार्थकानि ।।३२१।।

जह्नुः—२४४

जहाति दोषानुत वापि दूष्यान्
जह्नुः स विष्णुः स विशुद्धरूपः ।
अकाय उक्तः स विशोक उक्तो
भर्गः स उक्तस्तमसः परस्तात् ।।३२२।।
स जाह्नवं विश्वमिदं वितन्वन्
दोषापहृत्यै कुरुते च खानि ।
यथार्हदोषस्य परापसृत्यै
स्रोतांस्यनल्पानि च वा तनोति ।।३२३।।

स स्थावरेऽनन्तविभेदभिन्ने
वृक्षे लतायां किमु वापि गुल्मे ।
यथाप्तदोषस्य विमोक्षणाय
पत्रावपातं नियतं विधत्ते ।।३२४।।

नारायणः—२४५

नारास्तु यं स्तम्भमुपेत्य गुप्ता[1]
नारायणं तं प्रवदन्ति तज्ज्ञाः ।
यथाश्रयत्येव जलाप्तगर्भं
माता तथा विष्णुरिदं जलाप्तम् ।।३२५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नरः—२४६

प्रवाहतो विश्वमिदं समस्तं
नृणाति विष्णुर्नर उच्यतेऽतः ।
जीवोऽपि सर्वांगसमूढकायं
नृणन्नराख्यां लभते सदैव ॥३२६॥

असंख्येयः—२४७

विष्णुस्त्वसंख्येयपदेन वाच्यो
विश्वं प्रशास्त्येकरसेन वर्त्मना[1] ।
न तत्समः कोऽपि च दृष्टपूर्व-
स्तस्मान्न संख्याविषयोऽस्ति विष्णुः ॥३२७॥
नैकात्मा नैकमायश्च, नैकरूपोऽथ नैककः ।
एकात्मैकश्च नामानि, व्याख्यातानि प्रसङ्गतः ॥३२८॥

अप्रमेयात्मा—२४८

को वा स्वयं स्वेन निजात्मकं वा
प्रमाणमात्रैः प्रभवेत् प्रमातुम् ।
अतोऽप्रमेयात्मपदेन विष्णुः
सनातनः सर्वगतो ह बोध्यः ॥३२९॥
यथा जलं जलेनैव मातुं नार्हति कर्हिचित्।
मातृमेयप्रमाणानां सत्ता नास्ते पृथग्यतः॥३३०॥
न तद् दृश्यं न तच्छ्रव्यं विष्णुर्यत्र न विद्यते ।
अप्रमेयस्वरूपोऽतः परमात्मात्र गीयते ॥३३१॥

विशिष्टः—२४९

बहुत्र वेदेषु स एक एव
विशेषणैर्गीत इहास्त्यनेकैः ।
लोकेऽर्थिनो ज्ञानधनाप्तमर्थ्यं
स्तुवन्त्यलंकारशतैः[1] पुनस्तम् ॥३३२॥

शिष्टकृत्—२५०

स्वल्पान्तरैर्विश्वमिदं विभिन्नं
यद्यौन[1] भेदैश्च विभूषितं यत् ।
प्रवाहतः शिष्टमिदं समस्तं
स शिष्टकृत् तत् कुरुतेऽप्रकम्प्यम्[2] ॥३३३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रवाहतोऽशेषधरेण वीणा:[1]
सूर्यादयो यान्ति विना प्रमादम् ।
न नूतनं शास्ति न कार्यजातं
शिष्टानुशिष्टं विधिवद् विधत्ते ।।३३४।।

शुचि:—२५१

शुचिर्हि विष्णुः शुचिमद् विधत्ते
जगत् सदा वारिधरप्रपातै:[1] ।
आमर्त्यकीटान्तमिदं समस्तं
स्नात्वा वपुः शुच्यति याति चौजः।।३३५।।

सिद्धार्थ:—२५२

सिद्धस्य तस्याखिलशब्दवाच्य-
स्यात्माप्तकामस्य महाविभूतेः ।
सिद्धार्थता भाति तथैव यद्वत्
सिद्धः स्वयं भाति च सूर्य एकः ।।३३६।।

सिद्धसङ्कल्प:—२५३

स सिद्धसङ्कल्प इदं विधत्ते
गुणेन 'सामर्थ्य' इतीरितेन ।
ऋतञ्च सत्यञ्च विमिश्रितञ्च
नपुंसकस्त्रीपुरुषस्वरूपे ।।३३७।।
तं सत्यसन्धं कवयो हृदिस्थं
पश्यन्ति नित्यं भुवने त्रिनेत्रम् ।
तं सिद्धिदं स्तोत्रशतैरनेकैः
सिद्धाः स्तुवन्त्यात्मरजोविमृष्ट्यै ।।३३८।।
आस्थावरं तारकितं नभो यत्
स्वं सिद्धसंकल्पकितं[1] व्यनक्ति ।
रूपं स्वभावो गुणवीर्यवत्त्वं
न सिद्धसंकल्पमतीत्य किञ्चित् ।।३३९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिद्धिदः—२५४

स सिद्धिदः साधनदोऽथ गीतः
स साधनैः सिद्धमिदं तनोति ।
यथा स युक्त्वा समनोभिरक्षै-[1]
र्जन्तुं प्रचाराय[2] करोति शक्तम् ।।३४०।।
तथैव साध्यैः स उ देवसिद्धैः
सिद्धैः प्रवाहेण सदास्तिमद्भिः ।
करोति विश्वं विविधं वितन्वन्
स सिद्धिदो विष्णुरिहास्ति गीतः ।।३४१।।
तं सिद्धिदं सर्वमनोऽभिरामं
रामं विराम[1] च नमन्ति देवाः ।
तस्यानुकृत्या मनुजः स्वसृष्टिं
तन्तन्यमानस्तनुते सहायान्[2] ।।३४२।।

सिद्धिसाधनः—२५५

स साधनः साधनवर्गमुख्यो,
न तं विना साधनमत्र किञ्चित् ।
सूर्यो यथात्मा सकलस्य लोके
तस्यात्मभूतः[1] स उ विष्णुरेकः ।।३४३।।
सिद्धिसाधन आख्यातो, विष्णुः प्राणेन सम्मितः ।
भुक्तं व्याप्तञ्च प्रत्यङ्गं च, सर्वं पुष्णाति वर्ष्म तत् ।।३४४।।

वृषाही—२५६

वैश्वानरः प्राणिगतोऽभिधीयते
तथाब्धिगो वाडवनामवाच्यः ।
दावानलः काष्ठगतस्तथेति
धत्ते स नामानि तदाप्तिभेदात् ।।३४५।।
विभाति भानुप्रभया विभावसु-
र्विभावसुश्चास्ति विनात्मभासा ।
[1]स्वयम्प्रभासाद्रविरेति भासं
विष्णुर्वृषाहीति निगद्यतेऽतः ।।३४६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृषभः—२५७

वृषत्वधर्मेण जगन्निबद्धं,
विभाति चाकल्पत अद्य यावत् ।
तं सर्ववन्द्यं विविधार्थयुक्तं
नमन्ति देवा वृषभाख्यविष्णुम् ।।३४७।।

विष्णुः—२५८

निष्पापबुद्ध्या य उ विश्वमात्रे
भर्गस्य देवस्य कृतेर्बहुत्वम् ।
पुनः पुनः पश्यति तत्त्वदर्शी
स सर्वविष्टं मनुते ह विष्णुम् ।।३४८।।

विष्णुर्हि सूर्यः स हि त्रैधमित्वा
त्रिभिः पदैः क्रामति विश्वमात्रम् ।
सोऽग्निः स मित्रः स उ इन्द्र एको
न चास्ति विष्णोः परमत्र किञ्चित् ।।३४९।।

वृषपर्वा—२५९

वृषो ह्यग्निरथो धर्मो, द्वयोः सन्धिश्च पर्व तत् ।
स विष्णुरग्निधर्माभ्यां, विश्वं व्याप्नोति पर्ववत् ।।३५०।।

वृषोदरः—२६०

वृषोदरो विष्णुरनन्तरूपो
विश्वं व्यवस्थाप्य करोति वह्निम् ।
मध्ये शरीरस्य तथोदधौ च
पृथ्वी च वह्निं बहुशो व्यनक्ति ।।३५१।।

एषा व्यवस्था हि वृषोदरस्य
विज्ञं विधिज्ञं क्षणशो व्यनक्ति ।
अग्नौ स्थिते जीवितमाहुरर्च्यं[1]
वृषोदरो वर्षति वह्निमन्तः[2] ।।३५२।।

वृषो वाग्निर्विषं वाग्निर्यथादृश्यं वनस्पतौ ।
तथा वृषोदरः श्रीमान्, विष्णुर्विश्वं समश्नुते ।।३५३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वर्धनः—२६१

स वर्धनो विष्णुरनन्तशक्ति-
विंश्वं समग्रं नयते चिराय ।
समग्रलोकानुत जीवदेहा-
नाभूतृणान्[1] मेरुपदं[2] च यावत् ॥३५४॥

वर्धमानः—२६२

स वर्धमानः सकलं जनित्वा
यथार्हकालं स्थितिमद् विधत्ते ।
नित्यो हि विष्णुर्नियतं[1] विचिन्वन्[2]
कला[3] स्वका व्याप्य विराजते च ॥३५५॥

विविक्तः—२६३

सृष्ट्वा जगत् सर्वविधं विधाता
स्वयं विविक्तो ह्यजरोऽमरः सः ।
सहस्रशीर्षा स सहस्रदृष्टिः
स सर्वबन्धुः[1] स पृथक् च दृश्यात्[2] ॥३५६॥

श्रुतिसागरः—२६४

यथा नदीनां बहवोऽम्बुवेगाः
समुद्रमेवाभिमुखा द्रवन्ति ।
तथा श्रुतीनां बहवोऽर्थकल्पा
विष्णुं विना नान्यमियन्ति कञ्चित् ॥३५७॥

सुभुजः—२६५

बह्वर्थमेतत्सुभुजेति नाम
तं वक्ति विष्णुं विविधस्वरूपम् ।
भुनक्ति भुङ्क्ते भुजतीति यस्माद्
विश्वं स तस्मात् सुभुजोऽत्र गीतः ॥३५८॥
नूनं हि मन्ये सुभुजोऽत्र विश्वं
यथार्थसिद्ध्यै विविधान् प्रदाय ।
भुजान् समेभ्यः प्रतिपालशक्तं
कृत्वा स्वयं तिष्ठति निर्विकल्पः ॥३५९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्धरः—२६६

यथा शरीरं गतिमद्विधत्ते
[1]मनोऽर्थवज्जीव उ दुर्धराख्यः ।
तथार्थवद्[2] भेषु[3] जगद्विभक्तं
स [4]दुर्धरस्तद् गतिमद्विधत्ते ॥३६०॥

वाग्मी—२६७

यथार्थवाचः श्रुतयो वदन्त्य-
स्तं वाग्मिनं सर्वगतं स्तुवन्ति ।
जगत् समस्तं नियतार्थबद्धं[1]
तं वाग्मिनं वक्ति यथार्थवाचम्[2] ॥३६१॥

महेन्द्रः—२६८

इन्द्रो ह सूर्यो य उ मध्यतो दिवं
गोले स्वकात् पश्यति मध्यतो जगत् ।
महेन्द्र-नामा भगवान् स वर्धनो[1]
विश्वं जगत्[2] पश्यति मध्यमः स्थितः॥३६२॥
विभ्राजमानस्य गुणेन लोके
सर्वस्य मूलं स महेन्द्र एकः ।
विश्वं समस्तं स समश्नुवानो[1]
यथायथं शास्ति च विश्वमात्रम् ॥३६३॥

वसुदः—२६९

सृष्ट्वा जगद्विष्णुरनेकरूपं
पृथक् पृथक् साधनवद्विधत्ते ।
लोके प्रसिद्धो 'वसुदः' स एव
स एव सूर्यः स उ चाग्निरुक्तः ॥३६४॥
यो वस्त्र-दाता, य उ चान्न-दाता
यो वास्ति भूमेरुत तोयदाता ।
ज्ञानस्य दाता[1] किमु धैर्यदाता
स्वयं निमग्नो[2] वसुदोऽस्ति तेषु ॥३६५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वसुः—२७०

वसुः स्वयं विष्णुरजा[१] निबध्नन्[२]
वसौ[३] च रूपं स्वकमाततान ।
लोकेऽर्थ्यतेऽतो वसुमान्[४] वसुर्वा[५]
जगच्च मन्ये [६]वसुनास्ति गुप्तम्[७] ।।३६६।।

नैकरूपः—२७१

आब्रह्मकीटान्तमिदं निबद्धं
पुंस्त्रीप्रयोगेण जगत् समस्तम् ।
पृथक् स शुक्रं स पृथग्रजो वा
भिनत्ति भुक्तैकरसश्च सत्त्वम् ।।३६७।।
स नैकरूपो भगवान् वरेण्यो
विश्वं सृजन्नैकविधं विधत्ते ।
यो नैकरूपं तमु हृद्गुहास्थः
पश्यञ्जगत् पश्यति वीक्षते सः ।।३६८।।

बृहद्रूपः—२७२

यो रूपतां विश्वमियर्ति[१] नित्यं
यो वा च गर्भे तमु[२] आदधाति ।
रूपेण विश्वं बृहता स विष्णु-
र्जगद् दधद् रूपमयं[३] विधत्ते ।।३६६।।

शिपिविष्टः—२७३

उदीयमानः प्रपलं[१] पतंगो[२]
गोले[३] जनानां समुपैति दृष्टिम् ।
विष्णुः स्वयं वै शिपिविष्ट-नामा
जगद् विधत्ते शिपिविष्टरूपम् ।।३७०।।
पशुर्जगत् पश्यतिमात्रहेतो-
र्विष्णुर्विशन् ख्यापयते तनूं स्वाम्।
अतोऽस्ति लोके शिपिविष्ट उक्तो
नमन्ति तं वीक्ष्य जना जगत्याम्।।३७१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रकाशनः—२७४

प्रकाशनो विश्वमिदं समस्तं
प्रकाशयन् सर्व-जगद्[1] बिभर्ति ।
स्वयंप्रकाशः स उ सर्ववन्द्य-
स्तेजांसि[2] सर्वाणि च तं नमन्ति ।।३७२।।
प्रकाशते दीप्तिमतः प्रदीप्त्या
सूर्यः शशाङ्कोऽपि तथा तयैव ।
प्रकाशनं तं प्रणमन्ति सर्वे
ग्रहाः समस्ताः स्वविकारयुक्ताः[1] ।।३७३।।

ओजस्तेजोद्युतिधरः—२७५

ओजस्तेजोद्युतिधरस्तथा, व्याप्य जगत् स्थितः ।
यथा जीवो वपुर्नित्यं, व्याप्नोत्योजोभिरान्तकम्[1] ।।३७४।।

प्रकाशात्मा—२७६

[1]प्रकाशकानामपि योऽन्तरात्मा
स्वयं स्वरूपेण च यः प्रकाशः ।
विश्वस्य सर्वस्य गतौ रतस्य
प्रकाशभूतः स उ चाऽऽत्मभूतः ।।३७५।।

प्रतापनः—२७७

प्रतापनो विष्णुरनन्तरूपः
[1]प्रतापभेदैश्च जगत् समस्तम् ।
प्रतापयन् सौति[2] शुभाप्तये[3]ऽदस्-
तपस्विनं स्वीकुरुते च विद्या ।।३७६।।

ऋद्धः—२७८

ऋद्धः स्वयं स भगवान् वरेण्यो
विश्वं समग्रं कुरुते ह वृद्धम् ।
ऋध्नोति चार्थ्यान्[1] बहुधार्थिनः[2] स
काया[3] तमृद्धं प्रपदं विचष्टे ।।३७७।।

स्पष्टाक्षरः—२७९

स्पष्टाक्षरो विष्णुरसंख्य-भेषु[1]
नद्ध्वा ग्रहान् नह्यति विश्वमेतत्[2] ।
स्पष्ट्रा निबद्धं जगदात्ममानं[3]
नयन् जगन्नह्यति विश्वमात्रम्[4] ।।३७८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मन्त्रः—२८०

ज्ञानात्मना विश्वमिदं समस्तं
मन्त्रेण गुप्तं[1] तदु याति कल्पम् ।
वो वेद मन्त्रं स उ वेद विश्वं
[2]मन्त्रेण गुप्तेन [3]समूढमेतत् ॥३७६॥

चन्द्रांशुः—२८१

चन्द्रांशुराह्लादयते समस्तं
शुरन्तःकरणानि यौति[1] ।
चन्द्रांशुमन्तर्विततं ह लोके
पश्यन्ति कर्माणि च तस्य विज्ञाः[2] ॥३८०॥

भास्करद्युतिः—२८२

प्रकाशकानां स उ एक एव
प्रकाशकः सर्वजगद्वरेण्यः ।
यथा शरीरस्य उ सूर्य आत्मा
प्रकाशकोऽस्यापि[1] तथैव विष्णुः ॥३८१॥

अमृतांशूद्भवः—२८३

जलं स विष्णुस्तपसा विभिन्दन्
जगत् प्रकाश्यं[1] कुरुते ह नित्यम् ।
तञ्चामृतांशूद्भवनामगेयं[2]
जगत् समस्तं प्रपदं विचष्टे[3] ॥३८२॥

भानुः—२८४

भानुर्हि विष्णुः स विभाति विश्वे
चरेऽग्निरूपेण विभाति काये ।
स चित्रभानुः स उ विश्वभानुः
स भास्वतां चापि विभासकोऽत्र ॥३८३॥

शशविन्दुः—२८५

जिज्ञासवस्तं शशविन्दुमग्र्यं
मनोजवेनैव विदन्ति वेद्यम् ।
गतिं स विश्वे प्रणिधाय सर्वां
गत्यैव सर्वानणुशो युनिक्त ॥३८४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुरेश्वरः—२८६

चरं नृलोके पुष्णाति तस्थिवान्
स्थिर[1] च पुष्णाति चरँस्तथैव।
सुरेश्वरोऽयं भगवान् वरेण्यो
सुरं जगत्[2] शास्ति सनात् पुराणः ।।३८५।।

हित्वा च यो दानविधिं विमुग्धो
जिजीविषेद्दीर्घमथापि कालम् ।
तं नष्टबुद्धिं भगवान् जहाति
तं प्राणवायुश्च जहाति सद्यः ।।३८६।।

औषधम्—२८७

ओषस्य पित्तस्य यथाविधस्य
प्रकल्पनं ब्रह्म चकार पूर्वम् ।
तथाविधं नैव शशाक कर्तुं
प्रकल्पनं ना [1]भगणैरनेकैः ।।३८७।।

तस्यौषधस्यापि च पात्रभूतं
कलामय[1] ब्रह्म चकार जालम् ।
चरं समस्तं किमु वाचरं वा
तमौषधं विष्णुमुपस्तुवन्ति ।।३८८।।

ओषो हि सूर्यः स उ तं ज्वलन्तं
स्वकोदरे ब्रह्म दधाति नित्यम् ।
अतोऽस्ति विष्णुः कथितः पुराणैः
स औषधं ब्रह्म च तत् स देवः ।।३८९।।

जगतःसेतुः—२८८

यथा जगद् भेषु[1] निबद्धमेतत्
तथैव जन्तुश्च कशेरुदण्डे ।
कशेरुकाणामथ तारकाणा[2]
मर्त्येऽस्ति साम्यं श्रुतिसम्मतं तत् ।।३९०।।

को नाम शक्नोति विना महेशं
कर्तुं ह सेतुं जगता[1] यथार्थम् ।
प्रभासते तत् प्रतिजन्तु-कायं
विष्णुर्ह उक्तो जगतां स सेतुः ।।३९१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा नभोगा उडुमार्गबद्धाः[1]
करैः स्वकैर्विश्वमिदं विभान्ति[2] ।
तथात्र वंशाक्त-शिरःस्थितानां[3]
खानां च भासां[4] प्रतिभाति काया ।।३६२।।

सत्यधर्मपराक्रमः—२८६

षड्भिर्विकारैः प्रतिवस्तु युक्तंऽ
यथाप्तकालं परिरक्षते यः ।
तं सत्यधर्मेषु पराक्रमन्तं
विष्णुं ह लोकः प्रपदं गृणाति[1] ।।३६३।।

भूतभव्यभवन्नाथः—२९०

नाथः स विश्वस्य जगन्नियन्ता
त्रिकालभेदेन विभक्तमात्रम् ।
त्रिलोचनः पश्यति काल-भक्त[1]
तथा यथा विश्वमिदं दिनेशः ।।३६४।।

पवनः—२९१

स विश्वकृत् सर्वजगन्नियन्ता
विश्वं पवित्रं कुरुते ह सर्वम् ।
शुद्धः स विष्णुः स पुनाति लोकान्
परस्परं शुद्धमुशन्ति विश्वम् ।।३६५।।

पावनः—२९२

स पावनो विष्णुरनन्तशक्ति-
र्विश्वं मिथः पावयते समस्तम् ।
तं पावनं नौति जगत् समस्तं
नेनीयते विश्वमिदं च तेन ।।३६६।।

अनलः—२९३

विष्णुर्विरूप[1] कुरुते ह विश्वं
स्वयं विगन्धः कथितो विरूपः[2] ।
अनन्तकर्तुर्भुवने[3] न शक्तो
जीवः कदाचित् परमाप्तुमस्य[4] ।।३६७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कामहा—२६४

विष्णुः स्वयंभूर्न कुतश्चनोन-
स्तज्ज्ञस्य[1] कामान्[2] स निराकरोति ।
[3]रसेन तृप्तः स नरोऽत्र लोके
विष्णोः पदं गायति चाप्रमत्तः ।।३६८।।

कामकृत्—२६५

व्यृद्धः समृद्धार्थमुपैति यद्वत्
तद्वद् ह विष्णुं समुपैति जीवः ।
कामान् स तेषां हृदयस्थितः सन्
पुष्णाति गीतः स उ कामकृत्[1] कः[2] ।।३६६।।

कान्तः—२६६

कान्तः स विष्णुः सुखरूप उक्तः
स विश्वरूपः प्रतिवस्तुसंस्थः ।
विद्वांस्तमीशं विविधस्वरूपं
पश्यन् मुहुर्हृष्यति वीतमोहः ।।४००।।

कामः—२६७

संकल्पप्रभवः कामः, संकल्पः काम एव वा।
संकल्प-वृक्ष-संक्लृप्तं, जगद् भोगाय कल्पते।।४०१।।
कामो हि विष्णुः स ससर्ज विश्वं
रूपाणि कामो विविधानि वव्रे ।
तत्कामक्लृपतः समनस्कमात्मा
खानां सहायेन तनोति तन्यम् ।।४०२।।
स कामदेवः स उ कामपालः
कामी स उक्तः स उ कामदश्च ।
स एव विश्वं विविधं विधत्ते
भाशांशयुक्तैः प्रतिवस्तुनिष्ठैः ।।४०३।।

कामप्रदः—२६८

अग्निः समस्मै प्रददाति कामान्
कामेन युक्तश्च[1] विभाति जन्तुः ।
[2]कामप्रदो विष्णुरिहास्ति गीतः
कस्तं विनाग्निं ज्वलयेच्च काये ।।४०४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रभुः—२६६

सामर्थ्ययुक्तस्य विभोर्जगत्यां
विना प्रभुत्वेन[1] न किंचिदस्ति ।
[2]प्रभुर्हि विष्णुः स समस्तमित्वा
जगत् समस्तं कुरुते सशक्तम्[3] ॥४०५॥

युगादिकृत्ः—३००

पृथक् स्थितान् विश्वहिते समर्थान्
ग्रहानुडून्, भानि[1] दिशोऽथ कालम्।
संयोज्य चक्रं कुरुते सलीलं
युगादिकृत् तं कथयन्ति विष्णुम् ॥४०६॥

युगावर्तः—३०१

आवर्तयन् सोऽत्र युगं युगस्थं
विष्णु 'र्युगावर्त' इहास्ति गीतः ।
यथादिकालं भगणं[1] युनक्ति
सोऽद्यापि विष्णुस्तमु तं तथैव ॥४०७॥

नैकमायः—३०२

इन्द्रो महान् दीधितिभिः स्वकाभि-
र्मानं स एकं कुरुते ह्यनेकम् ।
यथास्थिमानं कुरुते स बाहौ
तथास्थिमानं कुरुते च सक्थ्नि ॥४०८॥

महाशनः—३०३

मृत्युर्न तृप्तिं भजते कदाचित्
मृता यतन्ते न च देहलब्ध्यै ।
भुक्तं ह्यभुक्तं[1] कुरुते ह विश्वं
महाशनं विष्णुमियर्त्ति[2] भोज्यम् ॥४०९॥

अदृश्यः—३०४

स विष्णुरन्तः प्रतिप्राणिसंस्थो
विद्योतयत्यात्मविभूतिमन्तः ।
तथा यथा जन्तुरनन्यबुद्धि-
र्गुह्यानि[1] कुर्वन् न जनैर्हि दृश्यः ॥४१०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यक्तरूपः—३०५

सोऽव्यक्तरूपो हि महान्[1] वरेण्यो
व्यनक्ति रूपं प्रतिवस्तुसंस्थम् ।
तं व्यक्तरूपं प्रतिवस्तुसंस्थं
विजानते ज्ञानदृशः समन्तात् ॥४११॥

सहस्रजित्—३०६

सेना यथा स्वाम्युपदिष्टनेत्रा
जयत्यशेषान् द्विषतां महौघान् ।
तथैव देही सकलाङ्गयुक्तो
जय्यं पराजित्य च मोमुदीति ॥४१२॥

अनन्तजित्—३०७

अनन्तजिद् विष्णुरनन्तलोकान्
वशे स्ववीर्येण दधाति नित्यम् ।
तथा यथा ना निजसिद्धशक्त्या
विघ्नाननन्तान् निहतान् विधत्ते ॥४१३॥

इष्टः—३०८

यज्ञेन देवा अयजन्त यज्ञ-
मिष्टो हि तस्मादिह विष्णुरुक्तः ।
यज्ञेन विश्वं परिवर्त्तमानं
गर्भे स्वके तत्[1] कुरुते ह यज्ञः[2] ॥४१४॥

अविशिष्टः—३०९

समानरूपेण स जन्तुमात्रं
युनक्त्यशेषैः करणैः समानैः ।
लोकेऽविशिष्टः कथितोऽस्ति विष्णु-
स्तथैव वृक्षादिषु कल्पनीयम् ॥४१५॥

शिष्टेष्टः—३१०

शिष्टा हि साध्या अयजन्त यज्ञं
यज्ञो हि विश्वं परितोऽभ्युपैति ।
शिष्टेष्ट-नाम्ना च स विष्णुरुक्त-
स्तं चानुकुर्वन्ति नराश्च शिष्टाः ॥४१६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिखण्डी—३११

शीङ्ह्रस्वमाप्नोति च खेन युक्त-
श्चूडा शिखा खे शयनात् सदुक्ता[1] ।
उणादिसूत्राणि च यानि तत्र
शब्दस्य सिद्ध्यै बहुलप्रयोगः ॥४१७॥

अनन्तपारस्य च शब्दराशे-
र्यथाकथं पारमवाप्तुमत्र ।
अण्डन्विधानं[1] कुरुते पुरस्तात्
तज्ज्ञापयत्येव बहुत्वमस्य ॥४१८॥

शेते यथा खे वरुणस्य[1] हेति-
स्तथैव लोके नयनस्य वर्त्म ।
सूर्यो हि तद्वान् कथितः शिखण्डी
चक्षुश्च तद्वत् कथितं शिखण्डि ॥४१९॥

नैकस्य वर्णस्य यथा निवेशो
रुद्रस्य हेतौ प्रपदं ह दृश्यः ।
तथा मयूरस्य च बर्हिमात्रे
बहुत्वमन्वेति च वर्णकानाम् ॥४२०॥

आग्नेयधर्मा कथितो मयूर-
स्तथाग्निधर्मानुसृतञ्च चक्षुः ।
बुधो यथार्कस्य तथात्र नासा
सख्यं[1] विधत्ते नयनस्य नित्यम् ॥४२१॥

विष्णुः शिखण्डी स्वगुणं ततानो
विश्वे समस्ते कुरुते च दृश्यम् ।
निजं स्वरूपं कवयः प्रसन्नाः
पश्यन्ति नित्यं हृदि सन्निविष्टम् ॥४२२॥

नहुषः—३१२

यदत्र धात्रा विहितं पुरस्तात्
बद्धं स्वरूपात् किमु वाप्यबद्धम् ।
तथैव तन्नह्यति निर्विकल्पं
विपर्यये नाशमियात् समस्तम् ॥४२३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा खगा[1] नामस्वरूपभिन्नाः
सन्तोऽपि राशेः परियन्ति वर्त्म[2] ।
तथैव देहे पृथगिन्द्रियाणि[3]
देहं निबद्धं परियन्ति चैकम् ।।४२४।।

वृषः—३१३

वृषोऽग्निरेको बहुधा विक्लृप्तो
विश्वं समस्तं परियाति धत्ते ।
नष्टोऽति वोग्रो कुरुते विनाशं
'वेदे त्वमग्ने[1] कथितोऽसि रुद्रः' ।४२५।।
सोऽग्निः समस्तं समभावमाप्त-
स्तं तत्स्थभावेन युनक्ति विश्वम्।
अग्नेर्विधानं य उ वेत्ति विद्वान्
कामानशेषान् स उ दोग्धि तस्मात्।।४२६।।

क्रोधहा—३१४

स क्रोधहा विष्णुरनन्तशक्ति-
र्नाप्नोति कोपं न च मन्युमेति ।
अकाय उक्तो न हि तत्र मन्ये
द्वन्द्वोदयो जीव इवाभ्युपैति ।।४२७।।
दैव-प्रकोपोऽयमिति ब्रुवाणाः
आत्माल्प-विज्ञान-बलादिहेतोः ।
बम्भ्रम्यमाणाश्च निजार्थनाशै-
र्निन्दन्ति नन्दन्ति च तं महेशम्।।४२८।।
यदत्र विश्वे प्रतिसूर्यलग्नं
स्पृश्यं च वा श्रव्यमथापि दृश्यम्।
तत् सर्वकं मर्त्यकृतेऽस्ति नित्यं[1]
सूते यथा सव्यमनिन्द्य-योनिः ।।४२९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स क्रोधहा विष्णुरजेयशक्तिः
पुष्णाति विश्वं निजमार्गबद्धम् ।
न क्रोधमन्वेति न हर्षमेति
कर्मानुबद्धं च युनक्ति भोगैः ॥४३०॥

क्रोधकृत्कर्त्ता—३१५

विकारकर्तॄन् स उ हन्ति नित्यं
विकारभावं स निराकरोति ।
जगत् समस्तं स समे प्रकुर्वन्
सव्येन साकं कुरुतेऽपसव्यम् ॥४३१॥

विश्वबाहुः—३१६

स विश्वबाहुर्भगवान् वरेण्यो
व्याप्नोति मथ्नाति गुणेन नित्यम् ।
तं विश्वबाहुं कवयः सदैव
ध्यायन्ति कर्माणि च बाधमानाः ॥४३२॥
यथैव बाहू सकलं तथैव
युग्मेन युक्तं कुरुते ह विष्णुः ।
तस्मान्मयोक्तं बहुधाऽत्र भाष्ये
यो वेत्ति लोकं स उ वेत्ति वेदम् ॥४३३॥

महीधरः—३१७

महोऽत्र पूजार्थविधानसिद्धोऽ-
यं प्राप्य गौरादिषु चैति ङीषम् ।
द्यावापृथिव्योरुत वाचि भूमौ
नूनं प्रसिद्धो गवि चापि वेदे ॥४३४॥
तां योऽप्रमादं विविधार्थसिद्धां
मही सदा धारयते स विष्णुः ।
महीधरं तं कवयो विधिज्ञाः
पश्यन्ति नित्यं कमलासनस्थम् ॥४३५॥
महीधरो विष्णुरनन्तकर्मा
मही सदा धारयते यथैव ।
तथैव देहो प्रकृतेर्विकारं
वहन् नितान्तं तमु वक्ति विष्णुम् ॥४३६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

देहाद्यथा देहमुपैति देही
तथैव भाद् भं समुपैति सूर्यः ।
सूर्यो यथाऽऽत्मा सकलस्य लोके
तथा शरीरे स उ सूर्य आत्मा ॥४३७॥

अच्युतः—३१८
वशी वसिष्ठः स उ चात्मकल्पै-
र्गुणैर्निबध्नन् जगदावृणोति ।
न तत्र किंचिच्च्यवते स्वधर्मात्
प्रकाशयच्चाच्युतमर्च्यमर्कैः[1] ॥४३८॥

प्रथितः—३१९
प्रख्यातवीर्यः स उ विश्ववन्द्यो
लोकेऽस्ति गीतः'प्रथितः' स विष्णुः।
तं रोदसी, तं च समुद्रयुग्म[1]
व्यंजन्ति नित्यं प्रथितं पुराणम् ॥४३९॥
स नेति षड्भावविकारसंघं
चक्रं क्रमन्तं कुरुते स नित्यम् ।
यथाविधं यच्च कृतं विधात्रा
तथाविधं कर्तुमिहास्ति नान्यः ॥४४०॥

प्राणः—३२०
प्राणः स विष्णुः स उ वस्तुमात्रं
युनक्ति सूर्यस्य कलाभिरन्तः ।
सूर्यो यथा विश्वमिदं दधाति
प्राणस्तथा विश्वमिदं दधाति ॥४४१॥
[1]कफोढकाभ्यामनुयन्ति केचिद्
यथा मनुष्याः पशवो वयश्च ।
त्वचा परे प्राणमुषन्ति लोके
मीनादयो वारिचरा यथा के ॥४४२॥
त्वक्फुफ्फुसाभ्यां बलमर्हयन्ति
केचिद् यथा दर्दुरकोऽत्र लोके ।
एवं त्रिधा प्राणिति सर्वजन्तुः
प्राणात्मके ब्रह्मणि वर्त्तमानः ॥४४३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राणदः—३२१

स प्राणदो भूतविकारयुक्तान्
प्राणेन जीवान्, किमु लोकमात्रम्।
चिराय वस्तुं[1] कुरुते, पृथक् च
मृत्युश्च प्राणान् द्यति सर्वकस्य ।।४४४।।

वासवानुजः—३२२

वासुर्हि विष्णुः स उ चान्तरङ्गः
स्वाभीद्धतापस्य विकारभूते ।
ऋतञ्च सत्यञ्च पृथग् जनित्वा
ताभ्यां प्रपञ्चं कुरुते समस्तम् ।।४४५।।
एवं हि यो वेत्ति स वेत्ति विश्वं
विष्णुं स वा पश्यति सर्वयातम् ।
तं [1]वासवानूजमनन्तशक्तिं
तातन्यमानं कवयः स्तुवन्ति ।।४४६।।

अपांनिधिः—३२३

अपां निधिर्विष्णुरशेषबन्धु-
र्द्वैधं स पाथांसि ससर्ज चैकः ।
स पार्थिवानां निधिरम्भसां वा
स खेशयानाञ्च निधिर्जलानाम् ।।४४७।।

अधिष्ठानम्—३२४

स एव विष्णुः प्रपदं समग्रं
स्वस्मिन्नधिष्ठापयते ह विश्वम् ।
तस्मादधिष्ठानमिति गृणन्तो
गायन्ति देवास्तमचिन्त्यशक्तिम्।।४४८।।

अप्रमत्तः—३२५

स विश्वबन्धुर्न पुरा न पश्चात्
प्रमादमैच्छत् न करिष्यते वा।
तथा यथा भानुरचिन्त्यवीर्यः
प्रमादमन्वेति न दृश्यमानः ।।४४६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तं चाप्रमत्तं प्रपदं ह विष्णुं
विश्वेऽथ देहेऽथ नियुक्तमात्रम् ।
सन्नद्धकर्मानुरतं ह विश्वं
दृष्ट्वा प्रसीदन्ति नमन्ति तं वा ॥४५०॥

प्रतिष्ठितः—३२६

सनातनो विष्णुरिदं[1] सिसृक्षुः
प्रतिष्ठितः पश्यति विश्वमात्रम् ।
यावन्तमन्वेति सभा स्वकालं
तावत्सभेशोऽपि[1] प्रतिष्ठितः स्यात् ॥४५१॥
प्रवाहतोऽनादिमदस्ति विश्वं
विश्वव्यवस्थाकृतबन्धहेतोः ।
प्रतिष्ठितो विष्णुरिहास्ति गीतो
दिग्देशकालानतिवर्त्तमानः ॥४५२॥
तं सर्ववन्द्यं प्रपदं ह विष्णुं
पश्यन्ति सर्वत्र ततं जगत्याम् ।
तथा यथात्मा स्वरथे[3] स्थितः सन्
शक्त्या स्वया स्थापयते ह कायम् ॥४५३॥

स्कन्दः—३२७ स्कन्दधरः—३२८

स्कन्दः स विष्णुः प्रतिजन्तुनिष्ठः
शुष्कद्रवाभ्यां कुरुते शरीरम् ।
तं सर्वदृश्यं मुनयः पुराणं
गायन्ति नित्यं भुवने त्रिनेत्रम् ॥४५४॥
स्कन्द-व्यवस्थाकृतविश्वरूपं
यश्चाप्रमत्तो धरते स विष्णुः ।
लोके नराः स्कन्दधरं पुराणं
गायन्ति पश्यन्ति च तं गुहास्थम्[1] ॥४५५॥
यस्तत्त्वतः शोष-गती विदित्वा
यन्त्राणि कर्तुं यततेऽप्रमत्तः ।
शिल्पी स विश्वं विविधोपकारै-
र्युञ्जन् स्वयं याति च शर्म दिव्यम् ॥४५६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धुर्यः—३२६

सर्वाग्रगामी भगवान् स विष्णुः
सङ्कीर्त्यते धुर्यपदेन विज्ञैः ।
निर्दिश्य मार्गं सकलस्य नेता
स सर्वमुख्यः सकलान्तरात्मा ॥४५७॥

वरदः—३३०

विष्णुर्वरेण्यो वरदस्तथास्ति
यथा वरेप्सुर्वृणुते वदान्यम् ।
विपश्चितस्तं बहुधा स्तुवन्ति
वर्च्चः प्रजाः सम्पदमाप्तुकामाः ॥४५८॥

वायुवाहनः—३३१

वायुवाहननामायं, लोकानां सुखदुःखदः।
प्रवर्त्य बहुधा वातं, लोककर्मानुसारतः ॥४५९॥
क्वचिन्महावातमथापि मन्दं
वायुं प्रवर्त्यातयते त्रिलोकीम् ।
स [1]सातसक्लेशयुगं दधानो
जीवेषु जीवात्मकृतानुसारम् ॥४६०॥
स एव सूर्यो जगदात्मरूपः
स एव जीवः प्रतिवर्ष्मनिष्ठः ।
स एव प्राणादिभिदा प्रभिन्नः
प्रवर्तको जीवगणस्य विष्णुः ॥४६१॥

वासुदेवः—३३२

सर्वं वसानो निवसन्नशेषे
नियम्य सर्वं विजिगीषया च ।
विद्योतमानः स्तुतिमोदमानः
स वासुदेवेति बुधैः प्रदिष्टः ॥४६२॥

बृहद्भानुः—३३३

विष्णुर्बृहद्भानुपदाभिधानः
प्रसार्य तेजांसि बृहन्ति विश्वे ।
वागादिरूपाणि समिन्धरूपः
ज्योतिर्मयं सर्वजगद् विधत्ते ॥४६३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आदिदेवः—३३४

यथोर्णनाभोऽथ यथा च सूर्य-
स्तन्तूंस्तथांशून् पुनराददाते ।
सृष्ट्वा तथैतत् पुनराददानो
विष्णुर्बुधैरुक्त इहादिदेवः ॥४६४॥

पुरन्दरः—३३५

पुरन्दरो विष्णुरनन्तशक्तिः
पुरं स दत्त्वा प्रभिनत्त्यथाऽन्ते ।
पूरेव चात्रास्ति वपुर्हि वेद्यं
तद्दारकश्चात्र पुरन्दरोऽस्ति ॥४६५॥
पुरन्दरं तं सकलानुसृप्तं
जीवोऽनुकुर्वन् कुरुते तथैव ।
विचित्रचित्राभरणं विराजं
दृणाति कालेन पुरन्दरः सः ॥४६६॥
पुरन्दरं विष्णुमिदं समस्तं
जगत् सदानक्ति शरीरमूलम् ।
तथा यथा लिङ्गिनमन्तरस्थं
व्यनक्ति गात्री निजलभ्यलिङ्गैः ॥४६७॥

अशोकः—३३६

तमोगुणे शोक उदेति नित्यं
ज्योतिःस्वरूपे च न शोकलेशः ।
क्लेशोदयो यश्च यथा मनुष्ये
सज्ज्ञानरूपे न तथास्ति विष्णौ ॥४६८॥
यः क्लेशकर्माशयबद्धजन्तु-
र्लोकेऽस्ति दृष्टः स हि याति शोकम् ।
यथा मनुष्याः पशवोऽपि तद्वत्
क्लिश्यन्ति शोकेन निपीडिताङ्गाः ॥४६९॥
परन्तु नैतत्सकलानुयाते
सन्दृश्यते ब्रह्मणि वीतशोके ।
अतोऽस्ति लोके कथितः पुराणै-
र्विष्णुर्ह्यशोको न कुतश्चनोनः ॥४७०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्तत्त्ववित् पश्यति देवकाव्यं
शृणोति देवस्य[1] च वेदकाव्यम् ।
स शोकसन्तानवितानभावं
नाप्नोति, शान्तो रमतेऽमृते स्वे ॥४७१॥

तारणः—३३७; तारः—३३८

स तारणो विष्णुरनन्तशक्तिः
सदा जराजन्मनिबद्धजीवम् ।
परादिदं दृश्यतटं तथास्मात्
तटात् स जीवं नयते परञ्च ॥४७२॥

यथात्र लोके कवयः पुराणा
नवं नवं पारमवाप्तुकामाः ।
वाञ्छन्ति नित्यं [1]गहनानुकूल्यं
तितीर्षुरेवं च सदात्र जीवः ॥४७३॥

शूरः—३३९

शूरो हि विष्णुः स ददाति सर्वं
पदैस्त्रिभिर्विश्वमिदं मिमानः ।
स कालदिग्देशविभागमुक्तः
त्रिधा स्थितं विश्वमिदं बिभर्ति ॥४७४॥

शौरिः—३४०

शौरिर्हि विष्णुः स्वकृतेऽत्र कल्पे
न कञ्चिदप्येकरसं विधत्ते ।
वृद्धिक्षयाभ्यां किमुतांशरूपै-
र्नित्यं युनक्त्येकरसः स्वयं सः ॥४७५॥

जनेश्वरः—३४१

स सर्ववित् सर्वविधानकर्ता
विश्वस्य विक्रान्तिमितस्य भर्ता ।
अतोऽस्ति लोके मुनिभिः स गीतः
सदा सदा सर्वजनेश्वरः सः ॥४७६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनुकूलः—३४२

यथा जलं कूलयुगानुसृप्तं
नदीति संज्ञां लभतेऽनवद्याम् ।
तथा नगं गञ्च जगत् समस्तं
द्यावापृथिव्योरनुयाति कूलम् ।।४७७।।
यथा नदी कूलमलङ्करोति
तथान्तराले [1]दहरं विभाति ।
मनो निवासो हृदयेऽस्ति नूनम्
चित्तं प्रतिष्ठं च हृदन्तराले ।।४७८।।
सर्वत्र बीजेषु वितत्य यौग्म्यं
धाता सना शास्ति च विश्वमात्रम्।
पितोपरिष्टादधरा च धात्री
द्यौरूर्ध्वमुर्व्याः पृथिवी ह्यधस्तात् ।।४७९।।
अधः शयानो जनको न वामा-
मलं भवेत्तर्पयितुं कदाचित् ।
उच्चैः पिता द्यौः कथितोऽस्ति वेदे
धरा ह्यधस्ताद् धरणीव योषा ।।४८०।।
[1]वेद्यञ्च यो वेत्त्यनुकूलसंज्ञं
तं विघ्नबाधा न विहन्ति मर्त्यम्।
सुखं शयानः पदमप्रमेयं
पश्यन् सदा नन्दति वीतशोकः।।४८१।।

शतावर्तः—३४३

विष्णुः शतावर्तपदप्रसिद्धो
विश्वं सचक्रं कुरुतेऽनवद्यम् ।
यो वेत्ति विश्वं स उ वेत्ति कायं
यो वेत्ति कायं स उ वेत्ति वेदम्।।४८२।।
निर्दोषमुक्तं श्रुतिनिष्ठतत्त्वं
जगच्छ्रुती कूलयुगस्वयम्भोः ।
जगत् सदुक्तं श्रुतिभाष्यमानं
श्रुतिश्च विश्वस्य समाससूत्रम् ।।४८३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पद्मी—३४४

पद्मी स शम्भुर्विविधानुसृप्तं,
ज्ञानं स्वकं ज्ञापयतेऽवदातम् ।
एवञ्च यः पद्मिनमन्तरस्थं
जानात्यसौ तुष्यति युग्ममुक्तः ॥४८४॥

पद्मनिभेक्षणः—३४५

विष्णुः स सङ्कोचविकासशीलं
जगत् सृजन् पद्मनिभेक्षणोऽस्ति।
तदीक्षणोद्भूतमिदं समस्तं
तमेव विष्णुं प्रपदं व्यनक्ति ॥४८५॥

पद्मनाभः—३४६

स पद्मनाभोऽनुपमप्रकाशो
दृश्यः सदा कर्मभिरस्ति विज्ञैः ।
तं पद्मनाभं सनमोवचोभिः
स्तुवन्ति विज्ञाः स्वहृदासनस्थम् ॥४८६॥
येऽतर्क्यमेतद् भगवत्स्वरूपं
तर्कप्रमाणेन तदाप्तुकामाः ।
वृथाप्रयासा न सदुक्तवन्तः
क्लिश्यन्ति ते सूर्यदृशोऽधिरात्रौ ॥४८७॥
एवं य विद्वांस्तमु सर्वकालं
सन्तं तथासन्तमभीष्टदोहम् ।
ज्ञानत्रिनेत्रं सकलाधिवासं
पश्यत्यनिन्द्यं स भवत्यशोकः ॥४८८॥

अरविन्दाक्षः—३४७

अरविन्दाक्षः स वै विष्णुर्यो ज्योतींषि नियच्छति।
चक्षुर्हि वारविन्दाक्षं, मनो वा देवतानुगम् ॥४८९॥
एवं हि यो वेत्ति वरेण्यमीशं
लोकेऽरविन्दाक्षपदप्रसिद्धम् ।
स एव विष्णुं परितोऽभ्युपैति
मनश्च चक्षुः शुचि संविधत्ते ॥४९०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पद्मगर्भः—३४८

स पद्मगर्भो नियतायुरर्हैर्-
भोगैर्यथाकर्म युनक्ति जीवान् ।
विज्ञाः शुभं कुर्वत एव कर्म
शुभेप्सवस्तं नमसा गृणन्तः ॥४६१॥

बीजो यथा गर्भगतोऽप्यदृश्यः
समेधते मातरि कालबद्धः[1] ।
तथात्र विश्वं नियतायुरर्थ्यै-
र्युञ्जन् समिन्धे ननु पद्मगर्भे ॥४६२॥

शरीरभृत्—३४६

शरीरभृद् विश्वमिदं समस्तं
स्वतेजसा दीपयते प्रसह्य ।
तथा यथा जीव इदं शरीरं
बिभर्ति, युक्तञ्च शुभाशुभाभ्याम् ॥४६३॥

शरीरभृद् विष्णुरिदं समस्तं
विरच्य जीवान् गमयत्यजस्रम् ।
शुभोदयाप्त्यै दुरितापसृप्त्यै
लीलायते [1]सर्वखगानुबन्धुः ॥४६४॥

महर्द्धिः—३५०, ऋद्धः—३५१, वृद्धात्मा—३५२

महर्द्धिरन्तः स उ वा बहिश्च
स एव चर्द्धस्तमु वा स्तुवन्ति ।
वृद्धस्वरूपः सकलाप्तगर्भो
विश्वं भवत्येकगृहञ्च तस्मिन् ॥४६५॥

मूले तथा जीवति वृद्धरूपे
पुत्रादितज्जञ्च पृथक्स्वभावम् ।
रूपेण वृत्त्या च तथैव भिन्नं
तस्मिन् भवत्येकगृहं समस्तम् ॥४६६॥

एवं खगोले शतशोऽथ गोलान्
गत्या च भिन्नान् किमु धामभिन्नान्।
बध्नाति वृद्धात्मनि सूत्रवत्तान्
वृद्धस्वरूपः स हि बन्धुदृष्टिः ॥४६७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महाक्षः—३५३

विष्णुर्महाक्षो ग्रहगम्यगोले
स्थितान् ह लोकान् गमयत्यजस्रम्।
तथा यथा देहमिमं महाक्षं
जीवोऽश्नुते कर्मसु[1] चार्थसार्थः[2] ।।४६८।।

गरुडध्वजः—३५४

सूर्यो हि लोके गरुडध्वजोऽस्ति
विश्वं निगृह्णन् कलते स सर्वम् ।
उत्पाद-संहार-विकार-जातै-
र्विश्वं नियच्छन् गरुडध्वजोऽसौ ।।४६६।।

अतुलः—३५५

स विश्वनाथोऽतुलवीर्यविद्यो
विश्वं ह्यतुल्यं कुरुते समस्तम् ।
रसेन वीर्येण गुणेन किञ्चा-
तुल्यं विधत्ते वयसा च सर्वम् ।।५००।।
एवंविधे राजति विश्वमात्रे
कः संमिमीते तुलया नरस्तम् ।
शक्ताऽतुलं तं संख्या न भेत्तुं
संख्या स्वयं भेदमियर्त्यतोऽतः ।।५०१।।

शरभः—३५६

शाणायसोर्घर्षणजा शराभा
या भा तयासौ शरभोऽत्र विष्णुः ।
तं सर्वसंस्थं शरभं शरण्यं
नमन्ति पश्यन्ति च देवसंघाः ।।५०२।।

भीमः—३५७

प्रकम्पयन् विष्णुरिदं समस्तं
विधानबद्धं त्वचलं विधत्ते ।
भीमाभिधो भीममनाश्च मृत्यु-
र्मर्त्यं भयार्तं कुरुते स्वभोज्यम् ।।५०३।।
सर्वं जगद् भीमपदेन युक्तं
सद् भीमभीतं रमतेऽप्रमत्तम् ।
स्वयं भयं नार्हति भीतभीतम्
शम्भुः स्वकान्तो[1] भयमेति भीमः ।।५०४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समयज्ञः—३५८

विष्णुः स एकः समयज्ञ उक्तः
स एव जानाति शुभाशुभे च ।
मन्वन्तराणामित उत्तराणां
कल्पेऽह्नि जागर्ति सदाप्रमत्तः ॥५०५॥
तञ्चानुकुर्वन् मनुजोऽपि तद्वत्
बध्नाति कालस्य सदैव यातिम्[1] ।
परन्तु दोषोपहतस्वभावः
प्राप्नोति शैथिल्यकृतावरोधान् ॥५०६॥
नैवंविधं दोषमुपैति शम्भु-
र्विश्वं नियच्छन्निह कालरज्ज्वा ।
तं कालबन्धं स हि कालबन्धुः
सर्गान्तमित्त्वा विदधाति सर्वम् ॥५०७॥
अतः स लोके समयज्ञ उक्तो
गतिर्हि काले स पलैर्हि कल्यः ।
कालो गतिर्वा गणकेन शक्या
संख्यातुमत्राविरतं यतित्वा ॥५०८॥

हविर्हरिः—३५९

यदत्र विश्वे विभुना निबद्धं
तत्सर्वकं स्वैरभिधानमन्त्रैः[1] ।
ह्यातारमभ्येति स विष्णुरुक्तो
हविर्हरिर्विश्वमुखोऽक्षिबाहुः ॥५०९॥

सर्वलक्षणलक्षण्यः—३६०

विश्वं समस्तं [1]सकलप्रसूर्भू-
र्व्यनक्ति सा स्वात्मभवैर्विकारैः ।
स्वभावभिन्नैः क्षणभंगुरैश्च
विष्णुस्तथा [2]लक्ष्मभिरस्ति गम्यः ॥५१०॥

लक्ष्मीवान्—३६१

लक्ष्मीर्यदङ्कं समुपैति लौल्यात्
तत्पार्श्वमभ्येति पदञ्च विष्णोः ।
विष्णोर्हि लक्ष्मीः कथितास्ति पत्नी[1]
तद्वान् तया विश्वमिदं बिभर्ति[3] ॥५११॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

समितिञ्जयः—३६२

समानमानाः स्वसमानमानै-
युध्यन्त आत्मेष्टमवाप्तुकामाः ।
एकेन साकं शतिनो यदा स्युः
सहस्त्रिणो वा किमु वाप्यनल्पाः ।।५१२।।
एको हि यस्तान् हतभान् विधत्ते
न तत्र मर्त्योद्भवमस्ति वीर्यम् ।
तत्रास्ति शम्भोः समितिञ्जयस्य
बलं ह्यजय्यं हृदि सर्वभानोः ।।५१३।।
स एव मर्त्ये किमु जीवमात्रे
सामर्थ्यमाधाय निजं ह्यधृष्यम् ।
नित्यं विधत्ते समितिञ्जयन्तं
तं विश्ववन्द्यञ्च नमन्ति तस्मात् ।।५१४।।

विक्षरः—३६३

स विक्षरः सर्वगुहानुसृप्तः
स्वाभाविकज्ञानबलक्रियाभिः ।
न क्षीयते नान्यमुपैति भावं
तमक्षरं विष्णुमिहार्चयन्ति ।।५१५।।

रोहितः—३६४

स रोहितो विष्णुरिदं समस्तं
युगे युगे रोहयतीह [1]दृश्यम् ।
तथा यथा [2]बीजमनन्तमन्तः-
सुप्तं[3] स्वभावेन[4] भवेच्च दृश्यम्[5] ।।५१६।।

मार्गः—३६५

अशेषलिप्साविषयः स एको
मार्गाभिधानः सकलाध्वभूतः ।
बह्वन्तरालव्यवधानसत्तं
स[1] ब्रह्मतत्त्वं कुरुतेऽधिगम्यम् ।।५१७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हेतुः—३६६

हेतुर्हि विष्णुः स हि कामरूपो
विश्वं सृजन् तत्प्रभवैर्विकारैः ।
व्यनक्ति हेतुत्वमचिन्त्यरूपै-
स्तथा यथा मूलकमात्मरूपैः ॥५१८॥

दामोदरः—३६७

सूत्रानुसूत्रैर्वलितं हि यत् स्याद्
दामेति संज्ञां लभते तदेव ।
यथा तथा प्राणकलांशयुक्तो
राशिस्तथैवास्ति च मास उक्तः ॥५१९॥
ग्रहा निबद्धाः किल राशिभोगैः
कालो निबद्धो दिनरात्रिमासैः ।
एवं हि जीवा रदनैर्निबद्धा
ये ते च बद्धा उदरान्त्रजालैः ॥५२०॥
अतः स विष्णु कथितः सुविज्ञै-
र्दामोदरः सर्वजगत्प्रसृप्तः ।
यथा सदन्तास्तरवस्तथैव-
मूलैर्जटाभिश्च निबद्धपादाः ॥५२१॥
एवं जगद्दामनिबद्धमन्त्रै-
र्दामोदरं ख्याति च पुष्पहासम् ।
दामोदरस्यानुचरंश्च शिल्पी
करोति यन्त्राणि सबन्धनानि ॥५२२॥

सहः—३६८

सहो हि विष्णुः कुरुते च सर्वं
सहिष्णु दृश्यं किमु वाप्यदृश्यम् ।
यथाबलं यत् सहते तथा त-
ज्जपद् व्यनक्त्येव सहं सनात्तम् ॥५२३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महीधरः—३६६

महीधरो विष्णुरचिन्त्यशक्तिः
प्रजाः सवाचो विदधात्यशेषाः ।
[1]साम्ना स्तुवत्यो विविधेन वाचा
[2]पदं तृतीयं गमयन्त्यनिन्द्यम् ।।५२४।।

वाणीधरं ये भुवि भारभूता-
स्त्यक्त्वा नरा मर्त्यमरं स्तुवन्ति ।
ते स्वप्रयुक्तां वृथयन्ति वाचं
मर्त्येन साकं म्रियते च वाक् सा ।।५२५।।

महाभागः—३७०

स एव सूर्यः स हि सर्वगः स-
न्नंशैः स्वकैर्विश्वमिदं बिभर्ति ।
तं सत्यसन्धाः कवयः पुराणं
स्तुवन्ति नित्यं [1]बहुभागमर्कैः ।।५२६।।

वेगवान्—३७१

स वेगवान् विष्णुरनन्तवेगो
निजेन वेगेन जगत्समस्तम् ।
तथा विधत्ते गतिमद् यथा ना
प्राप्तव्यमर्थं गमयेच्च वेगात् ।।५२६।।

अमिताशनः—३७२

अशक्यमानस्य च जीवराशेः
कृतां व्यवस्थां स हि भोजनस्य ।
जानाति विष्णुर्न परोऽस्ति वेत्ता
नमन्ति गायन्त्यमिताशनं तम् ।।५२७।।

सर्वे हि तृप्यन्ति यथा स्वशक्ति
जीवा मृता वा किमु यद्गता वा ।
परन्तु मृत्युर्न हि याति तृप्तिं
लोकेऽस्ति मृत्युर्ह्यमिताशनोऽतः ।।५२८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उद्भवः—३७३

सूर्यो यथेहोद्भवतीह नित्यं
जीवस्तथेहोद्भवतीह नित्यम् ।
य उद्बुभूषोः कुरुते व्यवस्थां
ण्यन्तार्थगम्यं तमनक्ति[1] सर्वम् ॥५३०॥

क्षोभणः—३७४

स क्षोभणो विष्णुरिमान् समग्रान्
संक्षोभयन् लोकगणान् बिभर्ति ।
तथा यथान्त्राणि[1] च जग्धमन्नं
संक्षोभ्य पुष्णन्ति समस्तगात्रम् ॥५३१॥

देवः—३७५

देवः स्वयं स्वेन गुणेन युक्तो
जगद् विधत्ते बहुभूतिमत् सः ।
तं देवमीड्यं सवितारमर्च्य
नरा नमोभिर्बहुधा स्तुवन्ति ॥५३२॥

श्रीगर्भः—३७६

श्रीगर्भ उक्तः स उ विश्वयोनिः
श्रीस्तत्र गुप्ता स उ वा कुबेरः ।
स विश्वमात्रं नियतार्थबद्धं
युनक्ति [1]तत्काम्यमनोविकारैः ॥५३३॥
यस्यास्ति सव्ये स उ विश्वमूर्तिः
स एव दाता स उ वा धनेशः ।
यथा सगर्भा यदुपैति धाम
स्वगर्भगर्भं कुरुते गृहं तत् ॥५३४॥
सहस्त्रिणो वाप्यथ लक्षिणो वा
प्रवेशमात्रेण गृहं चकास्ति ।
तथा स शम्भुः कमनीयकान्त्या
श्रिया सदाभासयतीह विश्वम् ॥५३५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परमेश्वरः—३७७

य ईश्वरो यस्य सनात् स्वकस्य
यस्तं मिमीते परमेश्वरः सः ।
एवं स विष्णुर्जगदश्नुवानो
रूपं समञ्जन् सकलं बिभर्ति ॥५३६॥

करणम्—३७८

कामो मनः सर्वसमीहितार्थे
प्रजाजनानां कुरुते सहायम् ।
आत्मा नियुंक्ते तदु चार्थसिद्ध्यै
लोके प्रसिद्धः करणेन विष्णुः॥५३७॥
कामो हि सङ्कल्पविकल्पयुक्तं
मनो जगद्भेदभिदा प्रभिन्नम् ।
व्यनक्ति विष्णुं करणेन नाम्ना
व्याप्तं मनः स्यूतमिदं हि तेन॥५३८॥

कारणम्—३७६

निमित्तमुद्दिश्य समस्तभूतं
मनःप्रचारं कुरुते क्रियासु ।
तत्कारणं सर्वजगत्प्रसृप्तं
ब्रह्मैव तत् त्यं कुरुते च सार्थम्॥५३६॥

कर्ता—३८०

स कारयन् सर्वमिदं प्रकृत्या
कर्तेतिसंज्ञां लभते महेशः ।
मनो विधत्ते विविधाः क्रियाश्च
कामप्रणुन्नं करणैकबन्धुः ॥५४०॥

विकर्ता—३८१

मनो हि सङ्कल्पविकल्पयुक्तं
विलक्षणं कर्म करोति नित्यम्।
कामानुविद्धो जगति प्रसृप्तो
विष्णुर्विचित्रं कुरुते च विश्वम्॥५४१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गहनः—३८२

स गाहते विश्वमिदं समस्तं
तथा यथा साधनसिद्धपाणिः ।
मथ्नाति मथ्यं बहुशोऽप्रमत्तो
जन्यं [1]मनोज्ञं [2]कमनीयमीप्सुः ।।५४२।।
नित्यः स विष्णुर्गहनः स्वभावाद्
विश्वं समञ्चात्मसमं विधत्ते ।
तथा यथा मूलिन आत्मभृत्यै
गाहन्त आप्यं[1] समयानुकूलम् ।।५४३।।

गुहः—३८३

स लीलया संवृत एव विष्णु-
र्व्याप्त्यावृणोत्यत्र जगत्तु सर्वम्।
गुहं स्तुवानाः कवयः पुराणाः
संवृण्वते स्वं चपलं मनश्च ।।५४४।।

व्यवसायः—३८४

स शम्भुरेको व्यवसायनामा
सर्वञ्जगत्तेन निबद्धमास्ते ।
वैशिष्ट्यमस्त्येव च तस्य विष्णो-
र्बद्धोऽप्यबद्धं मनुते निजं ना ।।५४५।।

व्यवस्थानः—३८५ संस्थानः—३८६

व्यवस्थानो महेष्वासो भगवान् विष्णुरूर्जितः।
संस्थानः स्थानदश्चापि गुणैः सर्वत्र दृश्यते।।५४६।।
य एवं वेत्ति तं स्तुत्यं प्रत्यक्षं सर्वव्यापकम्।
निर्ममो निरहङ्कारो ब्रह्मभूयाय कल्पते ।।५४७।।

स्थानदः—३८७

द्यावापृथिव्योरिह मध्यगं यत्
तत्स्थानदेनास्ति यथा विभक्तम्।
तथा स धामानि ददाति गात्रे
तदाशयेभ्यो न च याति मोहम्।।५४८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्रुवः—३८८

स्वयं ध्रुवो विष्णुरमेयकर्मा
ध्रुवत्वधर्मेण जगच्चलं सः ।
प्रवाहसिद्धं कुरुतेऽचलं तत्
यथोदितं मृत्युरुपैत्यवश्यम् ॥५४६॥

परर्द्धिः—३८६

परर्द्धिनामा भगवान् स विष्णु-
र्ऋद्ध्या समृद्धं कुरुते समस्तम् ।
नैतद् विधातुं क्षमते तदन्य-
स्ततं तयद्धर्येदमनन्तचक्रम् ॥५५०॥

परमस्पष्टः—३६०

बध्नाति विष्णुः स जगद्यथा त-
न्निर्बन्धवद् भाति दृशा सुबद्धम् ।
तथा यथा कान्तमिदं शरीरं
बद्धं स्वतन्त्रञ्च मृतञ्च बद्धम् ॥५५१॥
दृढं स्पशानः परमेति पूर्वः
स्पष्टाभिधानः परमेश्वरोऽत्र ।
तथा शरीरं स्पशते स जन्तो-
र्यथा न विश्लिष्यति तन्मृतञ्च[1] ॥५५२॥

तुष्टः—३६१

तुष्टः स विष्णुः कुरुते ह तुष्टं
जगत् समस्तं परिपूर्णमर्थैः ।
यस्यां स्थितौ तुष्यति यच्च यत्र
तस्यां स्थितौ तुष्यति तच्च तत्र ॥५५३॥

पुष्टः—३६२

विष्णुर्हि पुष्टः कुरुते ह पुष्टं
जगत् समस्तं परिपुष्टिमत् सः ।
यद्भोजनो यश्च कृतोऽस्ति तेन
तद्भोजनः पुष्यति तत्र सक्तः ॥५५४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शुभेक्षणः—३६३

शुभेक्षणो विष्णुरिदं समस्तं
जगद्विधत्ते शुभनेत्रयोगी ।
यस्यास्ति सूर्यः शुभयोगयुक्तः
तथैव चन्द्रः स सुलोचनो ना ।।५५५।।

रामः—३६४

रामः स विष्णुः सकलं[1] हि विश्वं
प्रस्थाय तस्मिंल्लभते विरामम् ।
स्वतन्त्रवत्तद् रमयत्यजस्रं
बद्धं तथा भाति यथा स्वतन्त्रम् ।।५५६।।

विरामः—३६५

विरामसंज्ञो भगवान् वरेण्यो
जगद्विधत्ते स विरामशीलम् ।
सूर्योऽप्रमत्तो भ्रमणे प्रसक्तः
कालात्यये खे रमते विरामे ।।५५७।।
विष्णुर्विरामः कुरुते ह विश्वं
विरामधर्मं प्रलयेऽनिवार्ये ।
यथोदितोऽलङ्कुरुतेऽस्तकालं
तथा विरामं लभते ह जन्तुः ।।५५८।।

विरतः—३६६

रजो न तस्मिन्न तमश्च तस्मिन्
सत्त्वस्वभावो हि स विष्णुरुक्तः ।
सोऽस्ति स्वभावादमितप्रकाशो
वेदेऽस्ति गीतस्तमसः परस्तात् ।।५५९।।

मार्गः—३६७

मार्गः स विष्णुः स हि भर्ग उक्तः
शुचिः स विष्णुर्विरजाः स एव ।
स एव शुद्धस्तमु वा स्तुवन्ति
रामं विरामं सकलेशमर्च्यम् ।।५५९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेयः—३६८

सर्वप्रमाणाविषयः स विष्णु-
नेयो मनोभिर्मननीय एकः ।
तमन्तरा चेह न किञ्चिदाप्यं
यच्छ्रेयसे स्यात् सुतरां नराणाम्।।५६१।।

नयः—३६६

नयः स विष्णुः स्वकृते ह विश्वे
रूपं निजं प्रापयते हि नित्यम् ।
स सच्चिदानन्दमयः प्रकृत्या
सच्चिन्मयं चापि जगद् विधत्ते ।।५६२।।

अनयः—४००

विष्णुर्नयः सन्ननयः स उच्यते
कूटस्थनित्यो गमको जगत्याः ।
यथाविधानं गमयत्यजस्रं
जातोऽमरो नास्ति यथात्र तद्वत्।।५६३।।

वीरः—४०१

वीरः स विष्णुः प्रपदं जगत्यां
गतिं दधानः क्रमतेऽविरामम् ।
यस्मिन् हि यावान् क्रमते तदंशः
स मर्त्यभूतोऽपि न रिष्यतेऽर्थात्।।५६४।।
सूर्यो हि वीरः स निजांशयोगाद्
ग्रहान् यथास्थानगतान् युनक्ति ।
बलेन दीप्त्या निजराशिवर्गे
स्थितांस्तथा दीप्ततमान् करोति।।५६५।।
हिनस्ति तेजः स सधस्थयातु-
र्वीरो यथा शत्रुगणान् क्षिणोति ।
अतोऽस्ति वीरः परमादरार्हः
पदञ्च विष्णोः कवयः स्तुवन्ति।।५६६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शक्तिमतां श्रेष्ठः—४०२

शक्तिर्हि या प्राणिनि वा जगत्यां
तामादिधाता स महान् सहिष्णुः।
स शक्तिमत्स्वाकथितः प्रशस्यः
श्रेष्ठं तमाहू रविमात्मसंस्थम् ॥५६७॥

धर्मः—४०३

धर्मो हि विष्णुः स हि वास्ति सूर्यः
सूर्यात्मधर्मेण जगद्धृतं वै ।
सूर्यञ्च यो धारयते स विष्णुः
तस्मिन्ह तस्थुर्भुवनानि विश्वा ॥५६८॥
व्यवस्थितौ यो नियुनक्ति विश्वं
नक्षत्रसूर्यादिगणान् समस्तान् ।
स विष्णुरेकः क उ तं विना स्याद्
धर्मोऽस्ति संख्यातुमिह प्रवृत्तः ॥५६९॥

धर्मविदुत्तमः—४०४

स धर्मविद् धर्मविदां वरेण्यः
स एव सन्धीन् कुरुते विचित्रान्।
स एव तान् वेत्ति च सन्दधाति
स एव मर्त्येन च गेय[1] एकः ॥५७०॥

वैकुण्ठः—४०५

चराचरं विश्वमिदं समस्तं
यत्तेजसा याति गतेर्बहुत्वम् ।
तत्तेज एवारभते च कुण्ठां
वैकुण्ठनामा स महान् वरेण्यः ॥५७१॥
सदेकभावान्म्रियते न शम्भुः
सदेकभावान्न स जायते वा ।
सर्वत्र सद्भावमितः स शम्भु-
र्न कुण्ठते नापि विकुण्ठते वा ॥५७२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इयं विसृष्टिर्विभुना प्रणुन्ना
वैकुण्ठ्यकुण्ठ्ये विजहाति याति।
रविर्यथा यात्युदयास्तहीनो
दिनं निशां वा कुरुते दिनेशः ॥५७३॥

पुरुषः—४०६

सोऽभीद्धतेजाः पुरुषः पुराणः
सूर्यादिकान् दीप्तिमतः करोति।
एवं स शिल्पी कुरुतेऽर्थवन्ति[1]
धातूत्थरूपाणि निजार्थकानि[2] ॥५७४॥
गर्भेऽर्भकं पाति यथा स शम्भुः
तस्याह्यर्योगैर्विदधाति वृद्धिम्।
लोके तथैवास्य पथोऽनुगन्ता
कर्ता च कृत्यानि[1] सदा करोति ॥५७५॥

प्राणः—४०७

न चास्ति किञ्चिद्भुवि दृश्यमानं
किं वापि चित्तेन विचिन्त्यमानम्।
न यत्र शक्त्या स भवेत् प्रपूर्णः
पूर्णात्मके पूर्णमिदं[1] दधाति ॥५७६॥

प्राणदः—४०८

पूर्णः स्वयं शम्भुरचिन्त्यशक्तिः
विश्वं विधत्ते बहुशः[1] प्रपूर्णम्।
तथा यथा पूर्णमिदं शरीरं
दोषैर्मलैर्धातुभिरातनोति ॥५७७॥
तं प्राणदं पश्यति वीतशोको
निजे स्वरूपे स पुनर्बहिस्तम्।
पश्यन् दृशा याति तथैव हर्षं
यथा शिशुर्मातरमत्र पश्यन् ॥५७८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

को नाम मूढः परिहृत्य विष्णो-
रङ्कं [1]सुखापूर्णमियादपूर्णम् ।
[2]इयत्त्वमात्रं जगदस्ति सर्वं
तत्प्राणदेनाततमित्यबुद्ध्वा[3] ।।५७९।।

प्रणवः—४०९

स एव नूनं प्रणवोऽत्र विष्णु-
र्यो व्याप्य विश्वं कुरुते विचित्रम्[1]।
तमेव वेदास्तमु विश्वदेवाः[2]
स्तुवन्ति गायन्ति नमन्ति यान्ति[3] ।।५८०।।

पृथुः—४१०

पृथुः स विष्णुः प्रथते ह सर्वं
चराचरं विश्वमिदं समस्तम् ।
सोऽनन्तधर्मा कुरुते ह्यनन्तं
चराचरं तस्य[1] दृशा च सान्तम् ।।५८१।।
पृथुं हि यो पश्यति पार्थदृष्टिः
स एव देहं मनुते च विष्णुम् ।
चन्द्रं मनः सूर्यमसौ स्वनेत्रम्
विराजमानस्य[1] विराट् शरीरम् ।।५८२।।

हिरण्यगर्भः—४११

हिरण्यगर्भः स उ विष्णुरेको,
देहे यथात्मा मत एक एव ।
रथे स्थितः सन् स रथी शरीरी
हिरण्यगर्भोऽपि तथात्र विष्णुः ।।५८३।।

शत्रुघ्नः—४१२

विश्वे कृता या विभुना व्यवस्था
तां यो [1]विभज्याकुरुते क्रियाः स्वाः।
स एव दण्ड्यः किमु वा स घात्यः
शत्रुघ्ननाम्ना कथितः स विष्णुः ।।५८४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्याप्तः—४१३

व्याप्नोति विश्वं स्वक एव गर्भे
माता यथान्तर्निदधाति गर्भम् ।
व्याप्तेन नाम्ना स ततोऽत्र विष्णुः
सङ्कीर्तितो वेदविदां वरेण्यः ॥५८५॥

वायुः—४१४

स्थानन्न तद्यत्र न वाति शम्भुः
स्थानन्न तद्यत्र न तस्य सत्ता ।
स वायुरूपं प्रपुनाति विश्वं
विश्वान्तरः प्राणयते ह विश्वम् ॥५८६॥

अधोक्षजः—४१५

जनैर्यथास्थानगतैः स सूर्यः
सृप्रान्तरिक्षादधरादुदायन् ।
निरीक्ष्यतेऽधोक्षजमेनमाहु-
र्विष्णुं रविं भानुमनेकसंज्ञम् ॥५८७॥
न जायते नापि च लीयतेऽयं
दिवि श्रितो द्योतत एव नित्यम् ।
यो वाऽर्कराशिः स्पृशतीव गोंऽशं
निरीक्ष्यते लग्नमतस्तमाहुः ॥५८८॥
लग्नं कलांशैः स्फुटयन्ति तज्ज्ञाः
शुभाशुभं लग्नवशाद्धि मर्त्यः ।
भुङ्क्ते यथाकालकृतं च नैजं
लग्नातिरिक्तं न हि किञ्चिदस्ति ॥५८९॥
यद्वा द्यौरक्षं पृथिवी चाधस्तयोः प्रादुर्भवन्निव।
दृश्यते लोहितार्कोऽयं ततोऽधोक्षज उच्यते ॥५९०॥
अधोक्षजो विष्णुरनन्तशक्ति-
श्चतुर्विक्लृप्तं जनयत्यकल्यम् ।
पिता यथा द्यौः पृथिवी च माता
तयो रविर्जायत एव दृश्यः ॥५९१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं बुधा सर्वसरं तमाद्यं
सर्वास्ववस्थासु तमेव विश्वे ।
पश्यन्ति, शृण्वन्ति, गृणन्ति तं वा
ज्ञानेक्षणा ज्ञानमियन्ति तस्य ।।५६२।।

लोकेऽस्ति दृश्यं सकलं प्रसूतं
पुंस्त्रीप्रयोगेण कृतं गुणाख्यम्।
अधोक्षजो विष्णुरिदं विरच्य
जगत् स्वयं तिष्ठति निर्विकल्पः।।५६३।।

ऋतुः—४१६

ऋतुस्वभावात् प्रतिमासमेति
रसोदयश्चापि भवेद्विभिन्नः ।
लोकेऽस्ति दृश्यं विविधौषधीनां
जनित्वमह्नाञ्च समासभेदात् ।।५६४।।
भूगोलकृच्चापि रसोदयानां
भेदोऽस्ति दृश्यः पृथिवीस्वभावात्।
उपोर्मिमद् यन्न तदस्ति मेरौ
प्रभाकरस्यैव मरीचिभेदात् ।।५६५।।

सुदर्शनः—४१७

सुदर्शनो विष्णुरिदं विरच्य
जगत्स्वयं पश्यति सूर्यनेत्रः ।
शिल्पी यथा यन्त्रकृतौ प्रवृत्तः
स्वयं हि तज्जानि सुखानि भुंक्ते।।५६६।।

कालः—४१८

कालः स विष्णुः कलयन् समस्तं
स्वभावसिद्धञ्च युनक्ति सर्वम् ।
सूत्याऽथ धृत्या ग्रसनेन चापि
स्वयञ्च नोपैति सदैकभावात् ।।५६७।।

परमेष्ठी—४१९

स एव विष्णुः परमेष्ठिधर्मा
विश्वं समस्तं दिवि सन्दधाति ।
तथा यथोर्ध्वं कुरुते स खाना-
ञ्चयञ्च तान्यास्फुटयन्ति विष्णुम्।।५६८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिग्रहः—४२०

सूर्यो यथाऽनादित एव विश्वं
गृह्णति शक्त्या निजया समन्तात्।
तथैव गृह्णति च विष्णुरेक-
श्चराचरं चित्तमथापि तद्वत् ॥५९९॥

उग्रः—४२१

उग्रे यथार्के निचितं हि विश्वं
विष्णौ तथोग्रे निचितञ्च सर्वम् ।
विष्णोर्यथोग्रे निचितं हि सर्वं
चित्ते तथोग्रे निचितं प्रजानाम् ॥६००॥

संवत्सरः—४२२

संवत्सरो विष्णुरमोघकर्मा
करोति विश्वं निजधर्मसिद्धम् ।
एवं हि यो वेत्ति महेशमाद्यं
स विष्णुभूतः परमेति धाम ॥६०१॥

दक्षः—४२३

दक्षः स विष्णुः कुरुते सदैव
विश्वं समस्तं गतिमत्प्रणुन्नम् ।
स एव दक्षः किमु दक्षिणो वा
स विश्वपूर्वः स महान् स भर्गः॥६०२॥

विश्रामः—४२४

स विश्रमो विष्णुरनन्तलोकान्
दधाति गर्भे तपसा पुनस्तान् ।
संक्षोभ्य संयोज्य समेध्य शक्त्या
पुनर्भवायैव च तान् युनक्ति ॥६०३॥

तथैव लोकेऽपि च मातृगर्भे
जीवः शयानः स्वकृतानि जानन्।
विश्रम्य कालं निजयोनिसिद्धं[1]
चेखिद्यमानो बहिरेति धाम ॥६०४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वदक्षिणः—४२५ विस्तारः—४२६

विश्वं समस्तं कुरुते स्वगर्भे
विस्तारनाम्ना कथितः स विष्णुः।
वटं स बीजे निदधाति यद्वत्
तद्वत् स बीजं कुरुतेऽर्थवृत्तम्[1]।।६०५।।

स्थावरस्थाणुः—४२७

स स्थावरः सर्वजगन्नियन्ता
नियम्य विश्वं कुरुते स्थिरं वै ।
तथा यथा मातरि गर्भ एवं
चलत्सु मार्गश्च न याति चालम् ।।६०६।।

स्थाणुर्हि विष्णुर्विविधं विधाय
विश्वं गुणैस्तिष्ठति चाप्रमत्तः ।
बीजो यथा चात्मगुणैर्द्रुमाङ्गैः
तिष्ठन्ति लिङ्गानि च कार्यकाले।।६०७।।

स स्थावरस्थाणुरनन्तलोकान्
दूरेऽवरे मर्त्यदृशा च दृश्यान् ।
निर्माय तत्रैव करोति धाम
स्वकं यतो वेत्ति स विश्वविश्वम्।।६०८।।

प्रमाणम्—४२८

स विश्वकर्मा मिषतो वशी वा
विश्वं मिमीते च मिमित्समानः ।
तस्यानुमानं कुशलीह शिल्पी
कुर्वन् मितीते कुरुतेऽथ कार्यम्।।६०९।।

बीजमव्ययम्—४२९

ब्रह्माव्ययं तेन कृतञ्च बीजं
सदाव्ययं सद्भिरिहास्ति गीतम् ।
फलात्स विष्णुः कुरुते ह बीजं
बीजात्फलं वेद स एव मूलम्[1] ।।६१०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अर्थः—४३०

अर्थः स विष्णुः प्रपदं व्यनक्ति
गम्योऽहमत्रास्मि जगद्वशे मे ।
तथा यथा यन्त्रमुदीर्य[1] शिल्पी
[2]तस्योच्चनीचे [3]कुरुतेऽधिनैजम् ॥६११॥

अनर्थः—४३१

अर्थार्थिनस्तं भुवने शयानं
स्तुवन्ति याचन्ति जगन्ति वाग्भि ।
तस्मादनर्थो[1] भगवान् वरेण्यो
ह्यल्पार्थता क्लेशयतीह मर्त्यम् ॥६१२॥

महाकोशः—४३२

लोके महाकोशपदेन विष्णु-
र्गीतः पुराणैः स यतोऽस्ति वेदः ।
न क्षीयते तस्य कृता व्यवस्था
जगत्[1] स कोशप्रसु[2] संविधत्ते ॥६१३॥

महाभोगः—४३३

उक्तो महाभोगपदेन विष्णु-
र्भुनक्ति विश्वं महतः स कालात् ।
तत्रैव तद्भोजनमादधाति
साक्षी स्वयं पश्यतिमात्रमात्रः ॥६१४॥

महाधनः—४३४

कश्चित्सुवर्णं यवकांश्च कश्चित्
वस्त्राणि कश्चित् द्रुमयांश्च कश्चित् ।
कश्चिद् गुडूचीं मधुयष्टिकां वा
कश्चित्पशून् वा विनिमातुमेति ॥६१५॥

स एव विष्णुः कुरुते निधानं
धनस्य सर्वत्र कृतेऽत्र विश्वे ।
महाधनः स्वेन गुणेन युक्त्या
धनेन तुल्यं कुरुते समस्तम् ॥६१६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं हि सर्वत्र धनं स विष्णु-
मर्हाधनो व्यापयति प्रसह्य ।
तं बुद्धिमन्तः स्वधिया [1]विशेष्य
महाधनं तं स्तुवते महान्तः ।।६१७।।

अनिर्विण्णः—४३५

उक्तो ह्यनिर्विण्णपदेन विष्णुः
समीक्ष्य विश्वं बहुधा ततं यत् ।
सूर्यो न निर्वेदमुपैति भेषु[1]
न चोर्मिमाली न धरा च नैजे[2] ।।६१८।।

स्थविष्ठः—४३६

नूनं स्थविष्ठः स हि विष्णुरेव
यतोऽस्ति सर्वत्र गतः स्वयं सः ।
व्याप्य स्थितः सर्वमतो वशिष्ठो
दीपो यथा रश्मिभिरावृणोति ।।६१९।।
एवं हि यो ध्यायति [1]सत्यबन्धुं
स्थूलाच्च वृद्धं परियातमन्तः ।
देहे यथात्मा विभिनत्ति[2] रूपं
तथा स्थविष्ठः कथितः स एव।।६२०।।

अभूः—४३७

अभूः स विष्णुर्ह्यजरोऽमरो वा
न तत्परः कोऽपि न तस्य शास्ता।
सम्पद्विपद्भ्यां च न सोऽस्ति सक्त-
स्तथा यथा व्योम जगत् प्रसृप्तम्।।६२१।।

धर्मयूपः—४३८

स धर्मयूपः कुरुते विचित्रं
जगत् बहुत्वे कृतबुद्धिरन्तः ।
स वा मनःकामनया च शम्भुः
पुंस्त्रीप्रयोगेण[1] जगद् बभार[2] ।।६२२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महामखः—४३९

महामखो विष्णुरनन्तबोधो
जङ्गज्जगद्दोषगणेन[1] युञ्जन् ।
चयप्रकोपप्रशमांश्च कुर्वन्
यज्ञायते विश्वमिदञ्च सर्वम् ।।६२३।।
शीतोष्णसाम्यैरवनेः प्रदेशा
वसन्तसन्तापगुणान् वहन्तः ।
पृथग्विभक्तौषधिवर्गजातान्
विकास्य पुष्पैरथवा फलैश्च ।।६२४।।
महामखत्वं हि महामखस्य
व्यवस्थया यत्र वितानवृद्धम् ।
व्रते समस्तं न परं हि तस्मा-
न्महामखो विष्णुरतोऽस्ति गीतः।।६२५।।

नक्षत्रनेमिः—४४०

नक्षत्रनेमिर्भगवान् स विष्णु-
र्व्यवस्थया नह्यति नेमिभूतः ।
नक्षत्रताराग्रहमण्डलानि
ध्रुवे निबद्धानि च तानि तेन ।।६२६।।

नक्षत्री—४४१

नक्षत्रलोकस्य यतोऽस्ति शम्भु-
र्विधायकोऽतः कथितः स तद्वान्।
देहे मनः सर्वशरीर आत्मा
विराजते तस्य पदं दधानः ।।६२७।।

क्षमः—४४२

क्षमः स विष्णुः प्रवितत्य विश्वं
क्षमत्वधर्मेण जगच्च युञ्जन् ।
स्वयं क्षमः सन् सहते ह सर्वं
जगत्क्षमं तं [1]पदशो ऽनुयाति ।।६२८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षामः—४४३

क्षामः स्वयं सर्वमिदं विधाय
विष्णुः स्वयं तत्कुरुते क्षयार्हम ।
पुनश्चिकीर्षुं समयेऽन्तराले
क्षामेति नाम्ना कवयः स्तुवन्ति।।६२६।।

समीहनः—४४४

समीहनो विष्णुरिहास्ति गीतः
कर्तुं स विश्वं कुरुते समीहाम् ।
तथैव जीवः कुरुतेऽनुयान[1]
समीहमानः पुरुरूपभूत्यै[2] ।।६३०।।

यज्ञः—४४५

यज्ञात्मकं विश्वमिदं समस्तं
यज्ञो ह विष्णुः कुरुते प्रयत्नात् ।
संश्लेष-विश्लेषमयं हि विश्वं
[1]तस्मात् [2]प्रचारार्थमिहैति सर्वम् ।।६३१।।

इज्यः—४४६

इज्यः स विष्णुः सकलैषणेन
मन्त्रैः सकामैः किमु वाप्यकामैः ।
नाम्नापि हव्यः स उ एक एव
साम्नाऽथ गीत्या स्तुतिभिश्च सोऽर्हः।।६३२।।

महेज्यः—४४७

विष्णुर्महेज्यः कुरुते ह नित्यं
विश्वं महत् संयजनेन तुल्यम् ।
तथा यथा देहमिमं महेज्यो
धात्वाशयैर्यन्त्रमयैर्विधते ।।६३३।।

क्रतुः—४४८

करोति नित्यं सवनं जनानां
करोति नित्यं मरणं जनानाम्[1] ।
नित्यक्रियं विश्वमिदं समस्तं
सर्गान्तमन्वेष्यति विष्णुगर्भम्[2] ।।६३४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्त्रम्—४४६

सत्त्रं स विष्णुः कुरुते हि सर्वं
गत्यानुविद्धं प्रपदं स्थिरं तत् ।
सिरानुविद्धं हृदयं स्थिरं सत्
सत्त्रायते जीवयितुञ्च जन्तुम् ॥६३५॥

सतांगतिः—४५०

यदस्ति लोके तदिहास्ति गच्छद्
गतेर्विना तस्य च नास्ति सत्ता ।
सतांगतिर्विष्णुरिदं विरच्य
सम्भ्रामयन् मोहयतीह विश्वम् ॥६३६॥

सर्वदर्शी—४५१

स सर्वदर्शी भगवान् वरेण्यः
पश्यञ्जगज्ज्ञानदृशा बिभर्ति ।
सूर्यो यथा विश्वमिदं विचष्टे
तथैव देही निजकर्मचक्रम् ॥६३७॥

विमुक्तात्मा—४५२

गीतो विमुक्तात्मपदेन विष्णु-
रन्तर्बहिश्चास्ति स वर्तमानः ।
तथा यथा भूतविकारदेहा-
दात्मा विमुक्तो निजलिङ्गभेदात्[1] ॥६३८॥

सर्वज्ञः—४५३

स एव सर्वज्ञपदेन गीतो
विष्णुः पुराणो भुवने शयानः ।
यस्मिन् हि यत्तस्य स वेत्ति तत्त्वं
विश्वं हि तस्मिन् स्थितिमेति यस्मात् ॥६३९॥

ज्ञानमुत्तमम्—४५४

ज्ञेयं क्षितावस्ति जनेन किन्तत् ?
तस्यैव गूढस्य विशुद्धरूपम् ।
ज्ञानोत्तमे ब्रह्मणि सत्यबोधे
सत्यस्वरूपे निखिलं हि यस्मात् ॥६४०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुव्रतः—४५५

स सुव्रतो विष्णुरमोघबोधो
विश्वं नियच्छन् कुरुते व्रते तत् ।
व्रती ह सूर्यो वशयंश्च विश्वं
सु-सुव्रतं विश्वमतोऽस्ति सर्वम् ।।६४१।।

सुमुखः—४५६

विज्ञा विधिज्ञाः सुमुखं तमाहुः
समुद्रखातं बहुशश्च दृष्ट्वा ।
तस्यानुयानं मुखमस्ति जन्तो-
र्मुखैस्तु तैर्ज्ञाप्यवरः स एकः ।।६४२।।

सूक्ष्मः—४५७

स सूक्ष्मनामा भगवान् वरेण्यो
विष्णुः स्वयं सूचयते प्रसह्य ।
जनाय बोधं[1] निजमात्मरूप-
मनन्तगात्रेषु विराजमानम् ।।६४३।।
एवं हि यो ना प्रपदे वशिष्ठं
गुहाशयं पश्यति वीतशोकः ।
स स्थूलभूतोऽपि शरीरयोगात्
सूक्ष्मायते सूक्ष्मविचारमग्नः[1] ।।६४४।।
विद्यामयोऽसौ न तिरोदधाति
रूपं निजं विश्वमयं हि तस्य ।
विश्वं हि यो वेद स वेद विष्णुं
[1]तदेव सूत्रस्य च सूत्रमुक्तम् ।।६४५।।

सुघोषः—४५८

सुघोषनाम्ना भगवान् मनोज्ञो
घोषं व्यवस्थापयतीह विश्वे ।
सद्घोषमात्रे विमलं स्वरूपं
निजं व्यनक्त्येव सुघोषरूपम् ।।६४६।।
एवं हि यो गायति तस्य घोषं
शब्दः स्वयं गायकमाप्तुकामः ।
तस्यैव रूपं विविधं व्यनक्ति
तथा यथा चित्रकृतं[1] तु रेखाः ।।६४७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

घोषो हि कण्ठ्यः, स तु घोषभेदात्
षड्जादिकानात्मनि सन्दधाति ।
तानान् बहून् मूर्च्छनया विभक्तान्
तमेव तत् सर्वमिदं व्यनक्ति ॥६४८॥

सुखदः—४५६

स एव लोके सुखदः पुराणो
लोकान्वितं खातमयं शरीरम् ।
जीवाय नित्यं प्रददाति सर्गाद्
न मोहमाप्नोति सुखं ददानः ॥६४६॥

निर्दोषमेवं किमु वस्तु युक्तं
खं यस्य लोके स सुखी मनुष्यः ।
तस्मै ददात्यात्मपदं सुगुप्तं
गीतस्तु तज्ज्ञैः सुखदः स विष्णुः ॥६५०॥

सुखं विना क्लेशपदं हि यत्तत्
स्वयं निगृह्णन् कुरुते स्वकस्थम् ।
यस्तं स्वसव्ये कुरुते सदास्थं
स एव मर्त्यः सुखदेन गोप्यः[1] ॥६५१॥

सुहृत्—४६०

सुहृत् स विष्णुः सकलं वसानो
मित्रस्य दृष्ट्या परिपाति विश्वम् ।
तं मित्रभूतं सुहृदं पुराणं
ध्यायन्ति नित्यं गतवैरदोषाः ॥६५२॥

मनोहरः—४६१

मनोहरो विष्णुरिमां वितन्वन्
सृष्टिं विचित्राकृतिरूपयुक्ताम् ।
मनोहरत्वेन करोति रम्यां
कृत्वा विसृष्टिं[1] परिपाति भुंक्ते[2] ॥६५३॥

एवं मनुष्योऽपि मनोहरस्य
कार्यानुकारी कुरुते विसृष्टिम् ।
यथाभिलाषं त्रिगुणोदयां तां
यतः स्वभावात्त्रिगुणात्मकः सः[1] ॥६५४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जितक्रोधः—४६२

विश्वे जितक्रोध उ विष्णुरेकः
सोऽकाय उक्तस्तमसः परस्तात् ।
तस्मिन्न जागर्ति विकारवर्गो
यथा मनुष्ये कृतबुद्धिदोषे ॥६५५॥

वीरबाहुः—४६३

स वीरबाहुर्विधमन् समस्तं
विश्वं जनित्वा कुरुते स्ववश्यम् ।
जन्तुस्तदीयेन गुणेन युक्तो
निजाप्रियं बाधत एव नित्यम् ॥६५६॥

विदारणः—४६४

विदारणो विष्णुरदृश्यमानो
गर्भे विदार्यैव बहिष्करोति ।
सर्वाङ्गसम्पूर्णविभक्तगात्रं
बीजे च मज्जां कुरुते विभक्ताम् ॥६५७॥

स्वापनः—४६५

स स्वापनो विष्णुरतन्द्रितः सन्
रात्रिं विधत्ते शयनाय जन्तोः ।
रात्रौ तमः श्लेष्मबलञ्च रात्रौ
निद्रा यतः श्लेष्मतमोभवोक्ता ॥६५८॥
विश्वस्य सर्गो दिनमुक्तमार्यै
रात्रिर्हि विश्वस्य तमोऽभ्यधायि ।
न स्वापनो याति कदापि निद्रां
तथा यथा याति रविर्न निद्राम् ॥६५९॥

स्ववशः—४६६

स विष्णुरुक्तः स्ववशः पुराणो
विश्वं युनक्त्येव पृथक् पृथक् सः ।
तैः साधनैर्यैरलमस्ति कर्ता
तथा यथा पक्षयुगेन[1] पक्षी ॥६६०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्यापी—४६७

व्यापी स विष्णुः प्रपदं हि दृश्यो
यथा रविं पश्यति सर्वलोकः।
खपञ्चके ज्ञानसमृद्धमुच्चै-
र्यथा तथा मध्यकरांघ्रिषूह्यम् ।।६६१।।

नैकात्मा—४६८

आमृत्यु कर्माणि करोति जन्तु-
र्नैकात्मरूपेषु विभक्तसंज्ञः ।
[1]स एव पुत्रः स पिता स भर्ता
स एव शिष्यः स गुरुः स बन्धुः।।६६२।।
स एव भृत्यः स सखा स राजा
स एव निद्राङ्कमितो विमूढ़ः ।
स एव नेता स कविः स गोप्ता
एको ह्यनेकात्मगत[1]स्तथा सः ।।६६३।।

नैककर्मकृत्—४६६

आमृत्यु कर्माणि करोति जन्तु-
स्तं नैककर्माणमजं विपश्यन् ।
स एव पुत्रः स पिता स भर्ता
स एव शिष्यः स गुरुः स बन्धुः।।६६४।।
स एव भृत्यः स सखा स राजा
स एव निद्राङ्कमितो विमूढः ।
स एव नेता स कविः स गोप्ता
एवं विपश्यन् न स मोहमेति ।।६६५।।

वत्सरः—४७०

संवत्सरो वासयति स्वगर्भे
विष्णुर्हि विश्वं सकलं यथार्हम् ।
तथा यथा गर्भगतं हि माता
सैवास्य सूते स्वगुणैर्वसन्तम् ।।६६६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स सद्वचोभिर्नमसा स्तुवन् वा
सदा सदाचारविहारयुक्तः ।
तमेव निःशङ्कमुपैत्यशङ्कः
संवत्सरो सर्वगतोऽस्ति यस्मात् ।।६६७।।
एवं हि यो वेत्ति पदं गुहस्य
मातेव विष्णुं बहिरन्तराप्तम् ।
तमानुकुर्वन् हृदयान्तराले
विश्वे च वा पश्यति निर्विकल्पः ।।६६८।।

वत्सलः—४७१

स वत्सलो विष्णुरिदं समस्तं
विश्वं निजेऽङ्के कुरुते सदातः ।
तं योऽतिहीनो भजते वचोभि-
र्भावेन वा वत्सल एति साक्ष्यम् ।।६६९।।
स वत्सलो विष्णुरुदारवीर्यः
समग्रशक्त्या हृदयं बलेन ।
सत्येन धैर्येण च साहसेन
गुणेन संयोज्य करोति वाङ्के ।।६७०।।
तदङ्गमाप्तः स विभुं स्तुवानः
मातासि धातासि पितासि शब्दैः ।
तमेव गायन् तमुपैति पश्यन्
विश्वे ततं वत्सलमेकरूपम् ।।६७१।।

वत्सी—४७२

वत्सी स विष्णुर्वदतां वरेण्यः
स एव माता स पिता स बन्धुः ।
तं वत्सिनं सत्यवचोभिरेष्य
स्तुवन्ति गायन्ति नमन्ति यान्ति ।।६७२।।

रत्नगर्भः—४७३

स रत्नगर्भो रमयन् स्वगर्भे
विश्वं समस्तं विविधप्रसूतम्[1] ।
[2]विश्वप्रचाराय विचित्रचित्रां
सृष्टिं वितन्वन् रमते स्वसत्त्वे[3] ।।६७३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यो लौकिको गर्भ इहास्ति दृश्यः
स गर्भधिं प्राप्य सुखेन शेते ।
मातापि नित्यं रमते स्व-सत्त्वे
तद् रत्नगर्भस्य पदं वृणीते ॥६७४॥
रत्नानि सर्वाणि दधाति शम्भु-
गर्भे स्वके सर्वमिहास्ति रत्नम्।
कश्चिद्धनाप्त्यै यतते च तस्मात्
वधूकृते कोऽपि करोति यत्नम् ॥६७५॥
कश्चित्कृषिं कर्षति सर्वयत्नैः
क्रीणाति गामश्वमथापि कश्चित्।
कश्चिच्च यन्त्राणि करोति यत्ना-
ल्लब्ध्वा स्वकार्हाणि सुखेन शेते॥६७६॥
यो रत्नगर्भं भजते मनुष्यो
जानाति वा सूत्रतमस्य वाच्यम् ।
स रत्नगर्भो भवतीह मर्त्यः
पश्यन् विकीर्णानि च रत्नकानि ॥६७७॥
न मोहमभ्येति स रत्नकेषु
न संचयं वा कुरुते च तेषाम्।
न वस्तुहीनो भवतीह खिन्नो
न हर्षमभ्येति च रत्नगर्भः ॥६७८॥
मन्येऽत्र नूनं बहुजन्मयोगात्
सद्योऽपि वा तत्त्वविदोऽनुबन्धात्।
संल्लब्धसिद्धिर्मनुजो भवेऽस्मिन्
मनुष्यरूपे भगवान् स्वयं सः॥६७९॥
रत्नानि गर्भे निपतन्ति तस्य
रत्नत्वमस्मास्विदमस्ति भान्ति ।
पदार्थजातानि वदन्ति तस्मै
स रत्नगर्भो रमते सुकर्णः ॥६८०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धनेश्वरः—४७४

धनेश्वरो विश्वमिदं समस्तं
समेध्य धन्यत्वगुणेन तस्मिन् ।
करोति चाशुत्वमथापि यस्मात्
तस्मात्प्रसिद्धा चपला च लक्ष्मीः ।।६८१।।

धनानि शम्भुः स्ववशे विधत्ते
धनेश्वरः सन् स्तुतिमभ्युपैति ।
तमेव याचन्ति च लिप्सितार्थाः
स भोजनीयेन युनक्ति विश्वम् ।।६८२।।

धर्मगुप्—४७५

स धर्णगुब् विश्वमिदं वितत्य
मूलञ्च गोपायति तस्य यत्नात्।
तथा यथा बीजमथापि वृक्षं
बीजाच्च वृक्षं तरुतश्च बीजम् ।।६८३।।

धर्मकृत्—४७६

स धर्मकृद् विश्वमिदं विधाय
गोप्तापि नूनं स्वकृतस्य बोध्यः।
अतोऽस्ति गीतः कविभिः पुराणैः
स धर्मगुब् धर्मकृतं विजानन् ।।६८४।।

धर्मी—४७७

धर्मी स विष्णुः कुरुते समस्तं
धर्मेण युक्तं व्यभिचारहीनम् ।
एवं हि यः पश्यति धर्मिणं तं
स सर्वगं पश्यति विष्णुमेकम् ।।६८५।।

सद्—४७८

सन् विष्णुरेकः स्वकृते च विश्वे
सर्वं सता योजयते ह नित्यम्।
नित्यो हि देही नियतं हि सत् सः
कायो विकारी स तु सत् विकृत्या ।।६८६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

असत्—४७६

वैकारिकं तस्य न सत्स्वरूप-
मसत्-सदुक्तः कविभिः पुराणैः ।
एवं हि यो वेत्ति पदं गुहस्य
स [1]मृत्स्नमूर्तौ न मनो दधाति ॥६८७॥

क्षरम् ४८०; अक्षरम्—४८१

क्षरं जगद् दृश्यदृशास्ति दृश्यं
क्षराणि नामानि च तस्य विष्णोः ।
दिने महेन्द्रः सविताऽग्निरेवं
मासानुपातेन पृथक् पृथक् सः ॥६८८॥
एवं हि यो वेत्ति पदं क्षरस्य
क्षरेऽक्षरं पश्यति तस्य चक्षुः ।
तथा यथा यन् मनुजो पदाभ्याम्
चलाचलेनैति पदेन धाम ॥६८९॥
तत्राक्षरो जीव इलामभीप्सुः
क्षराक्षरे तत्र चरे क्षरे ते ।
विक्लृप्तिरेषा भुवनेऽस्ति दृश्या
न चाक्षरे ब्रह्मणि सञ्चलत्वम् ॥६९०॥

अविज्ञाता—४८२

ज्ञानोदयो विष्णुरमोघधर्मा
करोति पूर्णं न कुतश्चनोनम् ।
यद्यत् कृतं तेन भवेऽस्ति दृश्यं
तत्तत् तमाख्याति च निर्विकल्पम् ॥६९१॥
जगत् सिसृक्षुः प्रकृतेर्विकारान्
पिलिप्पिलारूपमुपाददानः ।
करोति विश्वं मनुजैरतर्क्यं
स्वयं ह्यविज्ञातृपदं दधानः ॥६९२॥
नरोऽनुकुर्वन् निजकर्मसिद्ध्यै
पिलिप्पिलं रूपमुपाददानः ।
करोति रूपाणि यथार्हकाणि
स्मरन् ह्यविज्ञातृपदं हृदिस्थम् ॥६९३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहस्रांशुः—४८३

सहस्रदीप्तिर्भगवान् प्रसिद्धः
सहस्रबोधोऽपि स एव तस्मात् ।
सूर्यो यथासंख्यकरैर्व्यनक्ति
स्वं विश्वमेतच्च सहस्ररश्मिः ॥६६४॥

विधाता—४८४

धातुर्विधाता भगवान् स विष्णु-
र्जायाञ्च जन्यञ्च[1] समानकाले ।
दधाति पुष्णाति पृथक् पृथक्[2] सः
धाता विधाता कथितः स सन्दृक्[3] ॥६६५॥

कृतलक्षणः—४८५

स विष्णुरेकः स्वमनिन्द्यसत्त्वं
प्रकाशयन् लक्षणमातनोति ।
तथा यथा व्यक्ततरं विकारं
बहिर्गतं लक्षणमातनोति ॥६६६॥
कृता व्यवस्था सुखदेन[1] येन
सुखे[2] शरीरे किमु वा जगत्याम् ।
गायन्ति याचन्ति यथाभिलाषं
नमन्ति तं वा कृत[3] लक्षणं ते ॥६६७॥
सैषा व्यवस्था प्रतिवस्तु वीक्ष्या
मूलं त्वरिष्टस्य समग्रमस्मिन् ।
यत्तत्त्वविद्भिः प्रपदं व्यकारि[1]
शास्त्रे, तदर्हं निचितं हि यत्नात् ॥६६८॥
एवं हि यो वेत्ति स वेत्ति सूक्ष्मं[1]
स्वयं भवे दुर्मतिमास्थितो वा ।
ज्ञानं पवित्रं कुरुते पवित्रं
तैर्दुर्गतैर्दुर्गमितं मनुष्यम् ॥६६९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्ञानान्यनेकानि निरञ्जनं तं
व्यञ्जन्त्यसक्तं भुवने शयानम् ।
सच्छ्रद्धया नम्रतया च तज्ज्ञान्
संसेव्य पृच्छेत् परमादरेण ॥७००॥
ज्ञानस्य लिङ्गम्, तपसश्च लिङ्गम्
नपुंसकं लोकमतं प्रसिद्धम् ।
भोगान् परित्यज्य मनो निदध्यात्
शास्त्रे गुरूणां वचने च यत्नात् ॥७०१॥

गभस्तिनेमिः—४८६

गभस्तिनेमिः कथितो ह सूर्यः
प्रकाशकोऽनन्तमयूखगर्भः ।
तस्यापि यो भासयिता स विष्णु-
र्गीतो बृहद्भानुपदेन वेदे ॥७०२॥
आत्मा शरीरेऽस्ति गभस्तिनेमिः
पृथु प्रभावत्कुरुते शरीरम् ।
मृतं शरीरं सकलं यथावत्
सच्चापि तेजोरहितं यतस्तत्[1] ॥७०३॥
एवं हि यो वेत्ति गभस्तिनेमिं
स दीपकानां कुरुते विकासम् ।
ज्योतिः पुरस्कृत्य तदर्थलिङ्गं
गभस्तिनेमौ रमते विशङ्कः ॥७०४॥

सत्त्वस्थः—४८७

सत्तैव सत्त्वं हृदयं मनो वा
सत्त्वं गुणो वा सततप्रकाशः ।
तं योऽधिकुर्वन् स्थितिमातनोति
'सत्त्वस्थ'नाम्ना भगवान् स विष्णुः ॥७०५॥
यः शुद्धसत्त्वो भजते स्वकान्तः
सत्त्वस्थभावं लभते स मर्त्यः ।
रजस्तमो वा निजवर्गयुक्तं
तं सत्यसन्धं न वियौति मार्गात्[1] ॥७०६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिंहः—४८८

सिंहः स विष्णुर्हि जगद् विरच्य
करोति तत्क्षारगुणेन युक्तम् ।
स्वयन्न तत्रापि स सेचितोऽस्ति
योह्यक्षरश्चास्ति स एव सिंहः ॥७०७॥

भूतमहेश्वरः—४८९

महेश्वरो भूतपदादिमोऽयं
विना विरामं त्वरया युनक्ति ।
विश्वं समस्तं रसभावमायन्[1]
स्वयं स्थिरः[2] पश्यति हेमगात्रः[3] ॥७०८॥

आदिदेवः—४९०

स आदिदेवो भगवान् वरेण्यो
विक्रीडयन्नेति[1] जगत्समस्तम् ।
आदानमादिर्निहितं हि यस्मिन्
ददाति चान्तं स उ देव एकः ॥७०९॥

महादेवः—४९१

विष्णुर्महादेवपदेन गीतः
स दीप्यमानः स्तुतिमभ्युपैति ।
तथा यथा भूषणभूषिताङ्गं
वपुस्तमाख्याति च भूषणं स्वम् ॥७१०॥

देवेशः—४९२

विष्णुः स देवेश इहास्ति बोध्यः
सूर्योऽपि देवेश इहास्ति सिद्धः ।
मनोऽपि देवेशमुदाहरन्ति
देवेश आत्मा कथितः स देही ॥७११॥

देवभृद्गुरुः—४९३

स देवभृद् विष्णुरिदं विरच्य
सहैव लोकेन च वक्ति कालम् ।
भूतं भवन्तं बहुधा च भव्यं
तच्छाकुनं शास्त्रमुदाहरन्ति ॥७१२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृष्टिर्यदा सामयिकी न भूता
दुर्भिक्षतायाः कथनं तदेतत् ।
रोगोदयो राष्ट्रविनाशकर्ता
पापेऽतिवृद्धे तदरिष्टमाहुः[1] ।।७१३।।
स देवभृत् पक्षिमुखैर्ब्रुवाणः
स्वं नाम सार्थं कुरुते मतं मे ।
तथा यथा सर्वसमृद्धगात्रः
क्रियाः समस्ताः कुरुते [1]सनात्मा ।।७१४।।

उत्तरः—४६४

स उत्तरो विष्णुरिदं समस्तं
वितत्य तत्रास्ति न तेन लिप्तः ।
तथा यथात्मा कथितोऽस्ति देही
देहेन नाक्तस्तत उत्तरः सः ।।७१५।।

गोपतिः—४६५

स गोपतिर्विष्णुरुदात्तवीर्यो
गां पाति भूमिं बत पाति वाचम्।
आत्मा मनः खानि वपुश्च सर्वं
गौस्तन्मिथः पाति जगत् प्रसिद्धम्।।७१६।।
एवं हि यो वेत्ति गवां पतिं तं
विष्णुं जगत्यां विततं समन्तात् ।
स एव योगी स हि पण्डितो वा
स एव गोपालपदेन गीतः ।।७१७।।

गोप्ता—४६६

गोप्ता स लोकस्य सनातनोऽजः
कर्तापि लोकस्य यतः स विष्णुः।
माता प्रसूते परिपाति सर्व्यं
गोप्तारमाख्याति दिने-दिने सा ।।७१८।।

ज्ञानगम्यः—४६७

स ज्ञानगम्यः, कथितः पुराणो
ज्ञाने समाप्तिं लभते हि सर्वम् ।
ज्ञानात्प्रसूतं सकलं हि दृश्यं
तस्मिन् समायाति च बोधगम्ये[1] ।।७१८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरातनः—४६८

पुरातनो विष्णुरिदं समस्तं
पुरातनं सन्ततयन् सदावत् ।
पुरातनस्तत्र पुरातनेऽस्मिन् विश्वे
[1]सदाभाति पुरा च यद्वत् ॥७२०॥

शरीरभूतभृत्—४६६

शरीरभूतभृल्लोके, गीतः सोऽस्ति पुरातनः ।
स बिभर्ति सदा सूर्यं, मृत्युं निद्रां श्रियं तथा ॥७२१॥
एवं वेत्ति च यो लोके, व्याप्तं सत्यं सनातनम्।
स तमेवैति तत्त्वज्ञः, सत्ये सत्यं प्रतिष्ठितम् ॥७२२॥

भोक्ता—५००

भोक्ता स विष्णुः कुरुते ह विश्वं
भुनक्ति तत् सर्वमिदं स एव ।
स एव सर्गं कुरुते स्वगर्भे
तथा यथा पाकमुपैति[1] पक्ता ॥७२२॥

कपीन्द्रः—५०१

नूनं कपीन्द्रः स हि विष्णुरेकः
कल्पान्तवासाय मनो दधानः ।
सूर्यादिकान् सर्वनिजोपकार्यान्
सम्भ्रामयन् कल्पमिदं वितस्थौ ॥७२४॥

भूरिदक्षिणः—५०२

सन्तं चरन्तं स हि विष्णुरेको
वृद्ध्याथ शैघ्र्येण युनक्ति नूनम् ।
तस्यानुमानं प्रपदं हि दृश्यम्
भूरिः स उक्तः खलु दक्षिणान्त ॥७२५॥

सोमपः—५०३

स सोमपो भानुरनागसो वा
नियन्त्रितः सोमपमाह विष्णुम् ।
अन्नं स लोकाय ददाति सोमं
धाराप्रपातेन पृथग् धरांशे ॥७२६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमृतपः—५०४

छाया यथा छायिनि नित्यसंस्था
तथामृतं पीतमिवास्ति सूर्ये ।
विष्णुर्व्यवस्थां कुरुते यतोऽत-
स्तेनैव नाम्नाऽमृतपः स उक्तः ।।७२७।।

सोमः—५०५

सोमः स विष्णुः कथितः पुराणैः
शान्ता भवन्त्येव तु तं विदित्वा।
यो वेत्ति लोके विततं हि सोमं
स एव देहस्य च वेत्ति सोमम् ।।७२८।।

पुरुजित्—५०६

स विष्णुरेकः पुरुजित् पुराणः
विश्वं समस्तं कुरुते वशं सः ।
आत्मापि तद्वत् पुरुजिन्मनोजित्
सिद्धोऽथ सिद्धैर्बहुधोपगीतः ।।७२६।।

पुरुसत्तमः—५०७

सत्ता हि सर्वस्य विनाशलीला
योऽतीत्य सर्वं न जहाति सत्ताम्।
स एव लोके कथितः पुराणैः
शब्देन विष्णुः पुरुसत्तमेन ।।७३०।।

विनयः—५०८

स शम्भुरेको विनयः पुराणः
स एव वैविध्यविभक्तविश्वः ।
तस्यानुगानं सुमनाः सुमेधाः
करोति नित्यं कविधर्ममाप्तः ।।७३१।।

जयः—५०६

जयः स विष्णुः स हि सर्वयातः
स एव सर्वान् प्रपुनाति लोके ।
जयः स सूर्यः पृतनेव सर्वा-
ञ्जयत्यतः सर्वजयो जयः सः ।।७३२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्यसन्धः—५१०

स सत्यसन्धो भगवान् वरेण्यः
सत्येन विश्वं परितो दधाति ।
एषा हि तस्यास्ति च सत्यसन्धा
सोऽहं पुरा योऽस्मि सुते वदामि।।७३३।।

दाशार्हः—५११

उक्तः स दाशार्हपदेन विष्णुः
स एव दात्रे प्रददाति भोज्यम् ।
शुभाशिषा तञ्च युनक्ति भूम्ना
तमेव मर्त्या बहुधा नमन्ति ।।७३४।।

सात्वतां पतिः—५१२

स सात्वतानां पतिरस्ति लोके
स एव जीवान् मनसा युनक्ति ।
मनस्तरङ्गान् विषमान् समान् वा
अपां समत्वेन तदोपयाति ।।७३५।।
शुभोर्मिमत्स्यान्मन आत्मसंस्थं
जीवः स्वयं प्रार्थयतेऽतिमन्त्रैः ।
मनो जविष्ठं विविधेऽप्सु[1] तच्च
[2]जीवैरनेकैः पुरुषं स शास्ति ।।७३६।।
नक्षत्रभेदादुत पादभेदात्
भस्यांशभेदादुत दृष्टिभेदात् ।
स्थानस्य भेदाद् गतिभेदभेदात्
कालस्य शुक्रस्य च लभ्यभेदात्।।७३७।।
मनोनदी रूपमयी दुरन्ता
जीवेषु सर्वत्र तरङ्गिणी सा ।
विश्वं ह्यनन्तेषु गमेषु गन्तुं[3]
[1]प्रकाशछन्नं कुरुते समग्रम् ।।७३८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुरन्तपाराममृतां नदीं यो
नियम्य विश्वं परिपाति सम्यक् ।
स सात्वतामत्र पतिर्महात्मा
ज्ञाने समास्थाप्य भवत्यलिङ्गः[1] ।।७३९।।

एवं हि यो वेत्ति महेशमेनं
चराचरे व्याप्तमचिन्त्यवीर्यम् ।
स सात्वतानां पतिमेव पश्यन्
न क्लेशमायाति न चैति हर्षम् ।।७४०।।

आनन्दसिन्धुर्भगवान् स्वयम्भूः
पिपर्ति तान् ये सुखयन्ति जीवान्।
स सात्वतां चास्ति पतिर्यतोऽतः
[1]तत्रार्पयन्त्येव कृतं स्वकर्म।।७४१।।
एवं हि यो लौकिककर्ममग्नो
दिवानिशं [1]कार्मणमातनोति ।
कर्माणि लिम्पन्ति न कारकं तं
स एव शेते गतभीरलिप्सुः ।।७४२।।
निराशीः कर्मसंयुक्तान् सात्वतांश्चाप्यकल्पयन्।
सात्वतज्ञानद्रष्टाऽहं सत्वतः सात्त्विकीपते।।७४३।।
यो दृश्यमेतत्पुरुषस्य काव्यं
समीक्षते नित्यमतन्द्रितः सन् ।
ज्ञातुं स शक्नोति विभक्तरूपां
विचित्रचित्रां प्रकृतिं त्रिरूपाम्[1] ।।७४४।।
तां योऽविभक्तां कुरुते विभक्तां
स एव लोके पतिरस्ति तस्याः ।
एवं दृशा पश्यति योऽत्र मर्त्यः
स सात्वतानां पतिमेति पश्यन् ।।७४५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स सात्वतान् संयममात्रनिष्ठान्
यथार्हभोगेन युनक्ति काले ।
पतिर्यतोऽसौ सकलस्य लोके
कुतो न पायान्निजसात्वतान् सः ॥७४६॥

जीवः—५१३

जीवः स विष्णुर्मिथुनेन विश्वं
चराचरं जीवयति प्रसह्य ।
तेनैव चक्रे विहिते ह दृश्ये
सूर्यस्ततश्चन्द्र उ जायते वा ॥७४७॥

विनयिता साक्षी—५१४

स एव विष्णुर्गमयन् समस्तं
[1]जगज्जगत्यां कुरुते ह्यपारम् ।
तत्रापि वैविध्यमनक्ति योऽसौ
गते 'विं' धर्ता=नयिताऽस्ति विष्णुः ॥७४८॥
साक्षी स विष्णुः स हि दर्शनो वा
द्रष्टा स्वयं सोऽस्ति च सूर्यचक्षुः ।
ज्ञानं हि चक्षुर्ऋतुमात्रबोधः
[1]सोऽन्तर्गतः पश्यति विश्वमात्रम् ॥७४९॥

मुकुन्दः—५१५

स [1]केतपूः सर्वकलाभिरामो
विमोचयत्येव तदाप्तिवाञ्छम् ।
मुकुन्द उक्तो वत मुक्तिदः सः
स्तुवन्ति गायन्ति नमन्ति तं वा ॥७५०॥

अमितविक्रमः-५१६

सूर्यः स विष्णुः क्रमतेऽतिमात्रं
वैविध्यमस्यास्ति जगत्प्रसिद्धम् ।
को नाम शक्नोति नरो ह मातुं
तमच्युतं चामितवीर्यवन्तम् ॥७५१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रेधा पदस्य क्रमणं हि विष्णो-
स्त्रिपर्वता साऽत्र गतास्ति विश्वे ।
सांख्या न संख्याभिरियत्त्वमाप्तुं
भवन्त्यलं सोऽमितविक्रमोऽतः ।।७५२।।

एवं हि यो वेत्ति तुरीयमस्य
शिष्टं पदं तेन तुरीय उक्तः ।
स एकपाद् विष्णुरजः स देवः
स्तुवन्ति तं [1]वेदवचोभिरर्च्यम् ।।७५३।।

अम्भोनिधिः—५१७

स सर्वसाद् भाव्यमितो यथेश
आपश्च साद्भाव्यमितास्तथैव ।
अम्भोनिधिः सोऽस्ति महेश उक्तो
योऽपां निधानं कुरुतेऽतिरम्यम् ।।७५४।।
अम्भोनिधिं तं पुरुषं पुराणम्
नभ्यं तथा पार्थिवमाहुरस्मिन् ।
सर्वं स्थितं विश्वहिते च यत् यत्
स्तुवन्ति तं देवगणा व्यलीकाः ।।७५५।।

अनन्तात्मा—५१८

लोके ह्यनन्तात्मपदेन विष्णुः
प्राणेन युक्तं कुरुते समस्तम् ।
देहं यथात्मा प्रतिगात्रसंस्थः
तथा जगत् [1]प्राणिति चान्तरात्मा।।७५६।।

सान्ते समग्रे विभुना निबद्धे
सान्तः कुतः पारमियात्तु विष्णोः।
ईष्टे स विश्वस्य स पाति विश्वं
नान्तः स्वरूपेण विभुर्विशिष्टः।।७५७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महोदधिशयः—५१६

महोदधौ शेत इव स्वभावाद्-
वह्निर्यथा विष्णुरयं तथैव ।
तस्यैव शक्त्या धृतमस्ति सर्वं
मध्ये जले विश्वमिदञ्च तस्मात् ।७५८ ।।

अन्तकः—५२०

सृष्ट्वा जगत्सोऽन्तक एव विष्णुः
संस्थाप्य काले च यथाविधानम् ।
जलातिपातेन विशोषणेन
कृशानुयोगाच्च नयेत् स्वगर्भे ।।७५९।।
यथास्थितं यद्विभुना प्रणीतं
तथा स्थितं जीवनमाहुरार्य्याः ।
वियोगहेतुत्वमुपैति यत्स्यात्
तत्कारकं तस्य विकारकत्वात् ।।७६०।।
लोकं दृष्ट्वा फलं चिन्त्यं फलनादुक्तं फलं ग्रहाः ।
चौरः स्तेयफलेनैव चारैर्निगृह्य नीयते ।।७६१।।
स भवेद्वेदविद्वक्ता दाता भोक्ता महान् कविः ।
किं स्याच्चौरेषु तादृगुण्याच्चौर्याच्चौर उदाहृतः ।।७६२।।
ग्रहाणां तु फलं व्यक्तं लोके दृश्यं सनातनम् ।
मर्त्ये तत्कीदृशं कर्हि ज्ञानमेतन्महार्थकम् ।।७६३।।
ये निन्दन्ति विमूढास्ते वेदवाचां बहिर्मुखाः ।
वेदो गायति सोद्घोषं चन्द्रमाःस्तिरते वयः ।।७६४।।

अजः—५२१

यदत्र विश्वे परितोऽस्ति दृश्यं
नक्षत्रचन्द्रार्कधरासमेतम् ।
विकारजातञ्च पृथक् स्थितं यत्
तत् ख्याति नित्यं तमजं पुराणम् ।।७६५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महार्हः—५२२

विष्णुर्महार्हः स सुभावसिद्धः
कृतं धृतं तेन यतो ह सर्वम् ।
स ओत आस्ते सकलेऽतिरम्ये
तथा यथा पुष्पगतं हि सूत्रम् ।।७६६।।

एवं हि यो वेत्ति महार्हमेकं
विष्णुं स ना[1] कर्मशतानि कुर्वन् ।
तमर्चयन् कर्मशतैरलिप्तो
मालेव सूत्रं [2]गलमेति तस्य ।।७६७।।
स वीतशोको व्यपयातचिन्त-
स्तस्मिन् स्थितस्तेन भवेत् स पोष्यः ।
महार्हभावेन रजस्तमोभ्यां
विमुच्यते कर्मशतानि कुर्वन् ।।७६८।।

स्वाभाव्यः—५२३

स्वाभाव्यनाम्ना कथितोऽत्र विष्णुः
स्वयं समन्तात्परितोऽभ्युपैति ।
अवश्यरूपेण मनु[1] न वाञ्छेद्
द्रष्टा स सर्वस्य चराचरस्य ।।७६६।।

जितामित्रः—५२४

लोके जितामित्रपदेन विष्णुः
शवांसि तस्मिन् निचितानि यस्मात् ।
अमित्रसेनामभिभञ्जमानो
मित्रस्य सव्ये च विराजतेऽतः ।।७७०।।

जयः स विष्णुः स युवा महान् सः
महाबलो विक्रमणः स एव ।
स एव जेता स हि सत्यधर्मा
तदाश्रितानां स भवेच्च सव्यः ।।७७१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यशांसि सर्वाणि स एव भुङ्क्ते
श्रवांसि सत्यानि शृणोति वा सः ।
नरस्तु मोहावृतबुद्धिदोषात्
न्यक्कृत्य तं स्वं जयमातनोति ॥७७२॥

सव्ये स्थितं योद्धृतमं वरेण्यं
पश्यन् प्रहर्ता जयते ह्यमित्रान् ।
न यत्र सत्यं न च यत्र धर्मः
पराजिता तत्र भवेच्च सेना ॥७७३॥

प्रमोदनः—५२५

प्रमोदनो विष्णुरशेषयोनिः
प्रमोदयन् वासयते सनात् सः ।
प्रमोदनोऽतः श्रुतिवाक् वरेण्यं
तं वक्ति शुद्धं ह्यजरामरञ्च ॥७७४॥

आनन्दः—५२६

स विश्वरूपेण समर्धमानः
स सर्वरूपेण समर्धमानः ।
वैविध्यमानन्दपदेन धाता
सैवास्ति चानन्दपदेन विष्णुः ॥७७५॥

नन्दनः—५२७

स नन्दनो विष्णुरमित्रशत्रु-
श्चराचरं नन्दयतेऽतिरम्यैः ।
नक्षत्रचन्द्रार्कधराविकारैः
समृध्यमानं भुवनं चकार ॥७७६॥

नन्दः—५२८

नन्दः स विष्णुः प्रपदं ह सर्वं
स्वस्मिन् स्थितं नन्दयते स्ववीर्यैः।
तथा यथात्मा निजवीर्यसिद्धो
देहं सखायं कुरुते समृद्धम् ॥७७७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्यधर्मा—५२६

स सत्यधर्मा प्रभुरद्वितीयः सत्येन
वृत्तेन करोति विश्वम् ।
तथैव [1]दाधर्ति धरिष्यते वा
स सत्यधर्मा न जहाति लिङ्गम् ।।७७८।।

त्रिविक्रमः—५३०

त्रिविक्रमो विष्णुरिमान् समस्तान्
विरच्य लोकान् कुरुते चतुर्धा ।
चतुष्प्रकारान् कुरुते त्रिधा स
त्रिविक्रमोऽतः स परः पुराणः ।।७७६।।

भानां भ्रमतां भेषु रूपमष्टोत्तरं शतम् ।
वेद्मि वच्मि ततश्चार्थान् ततोऽस्म्यष्टोत्तरं शतम्।।७८०।।

त्रिविक्रमे सर्वमिदं त्रिसूत्रं
यो वेद तं वेद स एव विश्वम् ।
त्रिविक्रमः स्वस्य महिम्नि निष्ठ-
स्तुर्यं पदं स्वात्मनि गुप्तमस्ति ।।७८१।।

महर्षिः कपिलाचार्यः—५३१

ऋषिः स विष्णुः प्रपदं विजान-
ञ्ज्ञानस्य तत्त्वं स ददावृषिभ्यः ।
ऋषिर्हि साक्षात्प्रपदं यथावद्
दृष्ट्वा स मन्त्रस्य ऋषिर्बभूव ।।७८२।।

महर्षिरेतस्य कृताकृतस्य
यथार्थवित् सन् कुरुते जगन्ति ।
स एव धर्मान् स उ वोपदेशान्
नृभ्योऽददाल्लोकभवञ्च सत्यम् ।।७८३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विश्वं स लोके कपिलः पुराणः
[1]यायत्यमानं प्रकरोति यस्मात् ।
आचार्य उक्तस्तत एव तं वा
स्तुवन्ति गायन्ति नमन्ति सर्वे ।।७८४।।
महर्षिः कपिलाचार्यः सर्वहृद्गह्वरं गतः ।
आवृत्य गमयत्येतद्विश्वं चक्रमतन्द्रितः ।।७८५।।

कृतज्ञः—५३२

कृतज्ञनामा भगवान् स विष्णुः
कृतानि जानाति जगन्ति विश्वा ।
कैर्हेतुभिः कुत्र कदा कथं च
कियद्वयस्कानि कृतानि तेन ।।७८६।।

मेदिनीपतिः—५३३

उर्वीपति र्विष्णुरिलां प्रपातैः
संवर्द्धय सम्पोष्य धराञ्च पोष्यैः ।
पुण्यानि संवर्द्धय जनेषु विष्टो
निजंस्वरूपं कुरुते प्रकाश्यम् ।।७८७।।

त्रिपदः—५३४

त्रिधा विभक्तं त्रिपदेन सर्वं
तत्रास्ति गम्यस्त्रिपदः स विष्णुः।
एवं हि यः पश्यति सर्वथा तं
पश्यत्सु तं सूक्ष्मदृशं हि मन्ये ।।७८८।।

त्रिदशाध्यक्षः—५३५

स विष्णुस्त्रिदशाध्यक्षो देवाध्यक्षोऽपि स स्मृतः ।
शम्भुर्दशासु सर्वासु सर्वं व्याप्नोत्यशेषतः ।।७८९।।

महाशृङ्गः—५३६

स एव सूर्यः स उ चन्द्रमा वा
तावेव लोकं विहतोऽथ पातः ।
यस्तौ नियम्यारभते च विश्वं
लोके महाशृङ्गपदेन विष्णुः ।।७९०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतान्तकृत्—५३७

कृतान्तकृद्विष्णुरिदं समस्तं
वितत्य काले कुरुतेऽन्तवत्तत् ।
एवं हि यः पश्यति धैर्यधृष्णु-
र्न मोहमभ्येति कृतान्तजं सः ॥७६१॥

महावराहः—५३८

महावराहो भगवान् स विष्णु-
र्महावराहं कुरुते च सूर्यम् ।
महाधनोऽसौ स महावरो वा
सुदर्शनोऽयं स्तुवते प्रजास्तम् ॥७६२॥

गोविन्दः—५३९

[1]जगत्स्वनाम्नैव गतिं व्यनक्ति
गतौ स्थितं तत्तमनक्ति विष्णुम्।
मनश्च गोस्तानि[2] मनोऽनुगानि
व्यञ्जन्ति जीवं [3]स पुनस्तमेति॥७६३॥

सुषेणः—५४०

स विष्णुरेकः कथितः सुषेणः
सितं समस्तं न वियौति तेन ।
मृतोऽपि देहश्च सुषेणबद्धो
नित्यं तमंक्त्वा [1]चितिमभ्युपैति ॥७६४॥

कनकाङ्गदी—५४१

नूनं हि विष्णुः कनकाङ्गदी स्यात्
तस्यैव दीप्त्या द्युतिमज्जगत्स्यात् ।
बद्धं गतौ सर्वमिहास्ति तेन
जीवोऽपि देहे कनकाङ्गदीव ॥७६५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गुह्यः—५४२

गुह्यः सः विष्णुः कुरुते समस्तं
गूढं जगत्स्वस्य च गुह्यलिङ्गात् ।
अन्तः स विश्वस्य बहिस्तथैव
गुह्यो गुहायां कुरुते [1]विरामम् ॥७६६॥

गभीरः—५४३

विष्णुर्गभीरः स हि वास्ति सूर्यः
प्रतिष्ठितश्चास्ति चराचरे सः ।
विपश्चितस्तं कवयः सदैव
पश्यन्त्यलीकं मनसा हृदन्तः ॥७६७॥

गहनः—५४४

विष्णु[1]र्मनोज्ञं [2]गहनं [3]भविष्णुं
[4]विलोडनाधारनिधानदक्षम् ।
यथा शरीरं कुरुते पृथक्शः
पश्यन्ति तं [5]लब्धगुरूपदेशाः ॥७६८॥

गुप्तः—५४५

गुप्तो ह विष्णुः कुरुते सुगुप्तं
विरच्य विश्वं सकलं चिराय ।
शिल्पी यथा यन्त्रविधानविज्ञो
गोपायतीत्थं भगवान् स गुप्तः ॥७६६॥

चक्रगदाधरः—५४६

चक्रं हि तद्येन करोति विश्वं
दधाति तच्चक्रधरोऽप्यतोऽसौ ।
सूर्योऽपि चक्रं भुवनानि चक्रं
चक्रं विना नास्ति जगद्धि किञ्चित् ॥८००॥
वेदोऽस्ति वाचां निचयः पुराणो
गदास्ति वाग् धारयते च तां सः ।
गदाधरः प्राणिनि वाक्प्रवृत्तः
स वाङ्मयं विश्वमिदं तनोति ॥८०१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इयं गदा या समरे सशब्दा
प्रक्षिप्यते द्वेष्टरि मन्युगर्भा ।
तां यो दधात्यात्मनि निर्भयः सन्
गदाधरोऽसौ मनुजोऽप्यनिन्द्यः ॥८०२॥

वेधाः—५४७

अग्निर्हि वेधाः स कविः स होता
स एव यक्ष्यः स यजिष्ठ उक्तः ।
विश्वं समस्तं विदधाति सान्तं
तस्मिन् ह तस्थुर्भुवनानि विश्वा[1] ॥८०३॥

स्वाङ्गः—५४८

स्वान्तः स्थिराङ्गः पुरुरूपभानु-
र्विश्वं समस्तं गमयत्यचिन्त्यम् ।
न कोऽपि तस्यास्ति गतेर्विधाता
स्वाङ्गः स्वयं सर्वगतोऽस्ति यस्मात् ॥८०४॥

अजितः—५४९

लोकेऽजितः कः स हि विष्णुरेकः
परोऽपरं यस्यति चाधिकर्तुम् ।
न चात्र तस्यास्ति परः समानः
स्वयं स लोकेऽजित आत्मसंस्थः ॥८०५॥

एवं हि यो वेत्ति ततं हि विष्णो-
र्व्याप्तं स्वरूपं सकले कले [1]ले ।
मनोविकारैर्वलितः स नान्यं
सङ्क्लेशयन्नात्मसुखानि भुङ्क्ते ॥८०६॥
सर्वं स्वकेऽस्त्यप्रतिमस्वरूपं
मूढो न जानन् धुनुते स्वमन्तः ।
मोहेऽपयाते न [1]परं हि पश्यन्
सुखं शयानोऽजितमेति चान्ते ॥८०७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृष्णः—५५०

द्यावापृथिव्योरिदमन्तरं यत्
कृष्णेन सर्वं धृतमस्ति नित्यम् ।
यो वेत्ति कृष्णं स हि वेत्ति शुक्लं
छायाऽस्ति कार्ष्ण्यं न जहाति सा स्वम् ॥८०८॥

दृढः—५५१

दृढः स विष्णुर्निजशक्तियोगात्
स्तभ्नाति विश्वं परितोऽभ्युपेतः ।
यथा शरीरेऽस्थि दृढं, तथैव
दृढा धरा वारिनिधिं दधाति ॥८०९॥

सङ्कर्षणोऽच्युतः—५५२

बालो यथा क्रीडनकं विधाय
स्वचेतसस्तत्र रतिं विधत्ते ।
स्वमेव सर्वं मनुते [1]विरामं
सङ्कर्षयन् तद् गृहमेत्युदस्तः[2] ॥८१०॥

यस्यासनं यद्विधमत्र धात्रा
कृतं स तत्राच्युत एव सर्वः ।
कालेन सर्वं च्यवते ह सर्वं
न चाव्ययोऽसौ च्यवतेऽच्युतोऽतः ॥८११॥
सङ्कर्षणश्च्यावयतीह सर्वं
पुनर्विधत्तेऽच्युतधर्मकं तत् ।
यथाप्तकालं निखिलञ्च पश्यन्
स्वयं स्वधर्माच्च्यवते न कर्हि ॥८१२॥
यथा वणिक् वृत्तिमुपायमानोऽ-
लङ्कृत्य वस्तूनि पुरस्करोति ।
स्वयं स [1]सर्वेण वृतोऽच्युतः सन्
करोति नित्यं भगवांश्च तद्वत् ॥८१३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वरुणः—५५३

वृणोति यो विश्वमिदं समस्तं
सर्वेण यो वा व्रियते स विष्णुः ।
उद्यन् स मित्रः सवितान्तरिक्षे
यन्मध्य इन्द्रोऽस्तमितः स चाग्निः ॥८१४॥

एवं वृणोत्याभुवनं स सूर्यः
सर्वेण वासौ व्रियते नभोगः ।
यद् भीषया भ्राम्यति चान्तरिक्षे
वृणोति तं सोऽपि महेशमेकम् ॥८१५॥

वारुणः—५५४

स वारुणो विष्णुरिदं समस्तं
विश्वं विधत्ते वरुणेन गुप्तम् ।
रजोद्रवः शुक्रमथापि तद्वत्
स चाप्सु बीजं व्यकिरत् पुराणः ॥८१६॥

वृक्षः—५५५

वृक्षः स विष्णुः स हि वास्ति सूर्य
आत्मा च वृक्षः प्रकृतिश्च वृक्षः ।
माताऽपि वृक्षस्तरुरस्ति वृक्षो
वृक्षेण विश्वं विततं महत्तत् ॥८१७॥
एवं हि यो वेत्ति निगूढमर्थं
वृक्षस्य वृक्षे च जगत्समस्तम् ।
स एव वृक्षं परितोऽभ्युपेत्य
वृक्षः स्वयं वृश्चति मोहवृक्षम् ॥८१८॥
वृणोति शम्भुर्यदिहास्ति दृश्यं
वृणोति सूर्यो भुवनानि पश्यन् ।
वृणोति माता सवनेन पुंसां
वृणोति चात्मा निजमात्रमेकम् ॥८१९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्कराक्षः—५५६

अन्तः शयानो हृदये भवे वा
व्याप्नोति विश्वं स हि पुष्कराक्षः ।
तं पुष्कराक्षं मनसा विपश्चित्
नित्यं हृदा पश्यति वीतमोहः[1] ॥८२०॥

महामनाः—५५७

स एव विद्वान् कविरग्निसंज्ञो
[1]मनांसि सर्वाणि च तद् भवानि ।
महामना विष्णुरिहास्ति वाच्यो
मेधाप्तये तं बहुधा स्तुवन्ति ॥८२१॥

भगवान्—५५८

विष्णोः पदं यत् परमं पवित्रं
तज्जागृवांसः स्तुवतेऽर्थसिद्ध्यै ।
भगो हि सूर्यो भगवान् स विष्णुः
भगं जगच्चक्रमय[1] विधत्ते ॥८२२॥

भगहाः—५५९

लोकेऽस्ति दृश्यं विभुना कृतं य-
न्मर्त्येन वा यद्विहितं स्वशक्त्या ।
सर्वं हि तन्नाशनिगूढबीजं
वृणोति विष्णुं भगहेति सिद्धम्[1] ॥८२३॥

आनन्दी—५६०

स एव विष्णुर्न कुतश्चनोनः
यत्राप्तकामाः परमाश्रयन्ति ।
तं सच्चिदानन्दमयं पुराणं
त्रिकालसिद्धं कवयन्ति धीराः ॥८२४॥

वनमाली—५६१

विभिन्नवर्णाकृतिगन्धयुक्तं
पौष्पं[1] सनेत्रं विमले च सूत्रे ।
माला यथा विश्वमिदञ्च तद्वत्
मालाभृतं विष्णुमनक्ति नित्यम् ॥८२५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हलायुधः—५६२

हलायुधो विष्णुरिदं प्रतन्वन्
जगत् समृद्धं कुरुते हलेन।
[1]हलस्य नानाविधतेह दृश्या
कार्यस्य योन्याश्च तथैव भेदः ।।८२६।।

एवं हि यो वेत्ति हलायुधं तं
विष्णुं समस्ते विततं भवेऽस्मिन् ।
न मोहमभ्येति स कार्यसिद्धौ
[1]हलं क्रियासिद्धिकरं करोति ।।८२७।।

निःसाधनो[1] ना सबलोऽप्यपार्थकः
सुसाधनो न्यूनबलोऽपि सार्थकः।
हलस्य तत्त्वं निहितं गुहायां
विज्ञाय धीरः सुखमेत्यनिन्द्यम् ।।८२८।।

आदित्यः—५६३

प्रवाहनित्यं जगदाततानो
विचित्ररूपां कुरुतेऽदितिं सः ।
विकारजातांश्च करोत्यनन्तान्
सर्वेऽपि चादित्यपदेन ते स्युः ।।८२९।।

ज्योतिरादित्यः—५६४

छाया सदा छायिनमेति नित्यं
छायी च तस्या हि सदानुकारी ।
ज्योतिर्हि सूर्यः स उ वा प्रकाशः
सिंहश्च सूर्यः स च पञ्चमो वा।।८३०।।

एवं ततं यो मनुते जगत्यां
स वेद वेद्यं किमु वेदवाचम् ।
विज्ञाय लोके सुखमेत्यनिन्द्यं
वेदाश्च तस्मिन् विलसन्ति नन्द्याः।।८३१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सहिष्णुः—५६५

सहोऽस्ति विष्णुः सहते समग्रं
सहिष्णुमन्तः कुरुते जगत् सः ।
यथा शरीरेऽस्थिवितानमन्तः
कृत्वा सहिष्णून् कुरुते च जन्तून ।।८३२।।
एवं हि यो वेत्ति सहं सहिष्णुं
तस्यैव साहश्च जगत् प्रसृप्तः ।
सर्वं खलानां सहते स शान्तः
सहिष्णुमग्र्यञ्च[1] सखायमित्वा[2] ।।८३३।।

गतिसत्तमः—५६६

विष्णुर्भवेऽस्मिन् गतिसत्तमोऽस्ति
सर्वं गतं तेन [1]सदात्मयोगात् ।
[2]अमर्त्यगत्या मृत एति चात्मा
सूर्योऽपि तद्वद् गतिसत्तमः खे ।।८३४।।

सुधन्वा—५६७

लोकेऽस्ति दृश्या भ्रुकुटिर्मनुष्ये
मन्ये सुधन्वैव पदं व्यनक्ति ।
विष्णुः सुधन्वा धनुरातनोति
[1]ब्रह्मद्विषो रक्षति [2]तेन विश्वम् ।।८३५।।

खण्डपरशुः—५६८

सोऽनन्तविज्ञानविभक्तविश्वं
विष्णुर्विचित्रं कुरुते ह्यपारम् ।
व्याप्नोति लीलायितमात्रमात्त[1]
तद् भ्रामयन् नेमिरिवासिनोति[2] ।।८३६।।

दारुणः—५६९

स दारुणो विष्णुरिदं समस्तं
द्विधा विभक्तं कुरुते जगत्याम् ।
बद्धं विमुक्तं कुरुते स बन्धा-
न्मुक्तं स बध्नाति च बन्धनेन ।।८३७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कायेन बद्धस्य मृतिर्विमोको
मृतस्य बन्धोऽस्ति च गर्भरज्ज्वा ।
दृणाति विश्वं स सदाऽप्रमत्तः
तथा यथा स्त्री च पुमांश्च तौ वा।।८३८।।
एकं हि सद्द्वैधमुपैति लोके
द्विधा च यत्तत् पुनरेकभावम् ।
एकं त्वनेकं कुरुते स एको
विचित्रमायोऽस्ति स दारुणोऽतः ।।८३९।।

द्रविणप्रदः—५७०

स एव रत्नानि दधाति विष्णुः
स एव गर्भे द्रविणं दधाति ।
स एव दात्रे प्रददाति नित्यं
स एव लोके द्रविणप्रदोऽस्ति ।।३४०।।

दिविस्पृक्—५७१

दिविश्रितं यत् सकलं हि तेन
व्याप्तेन नद्धं निजसत्ययोगात् ।
दिविस्पृशं तं रविमेकमाहु-
र्विश्वस्य यन्तारमथापि चैके ।।८४१।।
एवं हि यो वेत्ति पदं भविष्णोः
स एव लोकं किमु वा शरीरम् ।
विज्ञाय सूक्ष्मादपि सूक्ष्मभूतं
सूत्रस्य सूत्रं सुखमेत्यनन्तम् ।।८४२।।

सर्वदृग्व्यासः—५७२

स सर्वदृग् विष्णुरमोघकर्मा
करोति जन्तूनभितो [1]दृशानान् ।
जले स्थले खे दिवि वान्धकारे
पश्यन्ति ते सर्वदृशं स्तुवन्तः ।।८४३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कायं यथा भूतमसौ ददाति
[1]जीवाय भोगानुपनेतुकामः ।
तदर्थशक्तानि च तानि तेषु
कृत्वा यथाकर्म वयो ददाति ॥८४४॥
[1]विचित्रयोन्याततचित्रविश्वं
विचित्रचित्राणि च [2]शक्तिमन्ति ।
खान्याचितान्यात्मबलेन विश्वे
पृथक्-पृथक् सर्वदृगस्ति यस्मात् ॥८४५॥
व्यासो हि सूर्योऽथ निशाकरश्च
व्यस्तञ्च वा सर्वमिदं जगत्याम् ।
अहो विचित्राभरणीयमस्य
व्यासस्य यत्तन्नयते समस्तम् ॥८४६॥
स सर्वदृग् व्यासकरोऽप्यसौ वा
व्यस्तं समस्तञ्च वशे दधानः ।
नित्यं ह विश्वे कुरुते [1]विरामं
विक्रीडयन् विश्वमतन्द्रितः सन् ॥८४७॥
यथा शरीरे कुरुतेऽङ्गवर्गं
पृथक्-पृथक् रूपमथापि कर्म ।
परन्तु सर्वाणि समस्य देहं
कुर्वन्ति शक्तं जगदस्ति तद्वत् ॥८४८॥

वाचस्पतिरयोनिजः—५७३

वाचोऽग्निरीशोऽस्ति रविश्च वह्नेः
सूर्योऽग्निरूपेण च जन्तुमात्रे ।
[1]आत्मा स्ववाच्यानभिधातुमिच्छन्
कायाग्निमाहन्ति मनः स वायुम् ॥८४९॥
वायुर्यथास्थानमभिप्रयातः
शब्दं यथास्थानविभागभक्तम् ।
जगत्प्रचाराय करोति शक्तं
वाचस्पतिस्तत्र च पाति वाचम् ॥८५०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वस्य धाता रुचिरो हि सूर्यः
कथं भगाख्यां समियात् स योनिम्।
यस्तस्य धाता स कथं व्रजेद्वा
योनिं ह्यतोऽयोनिज एव विष्णुः ॥८५१॥
वाचस्पतिर्यः स न याति योनिं
जीवोऽपि तद्वत् कथितोऽस्ति नित्यः।
यथा शरीराणि बिभर्ति जीवः
तथा दरीधर्ति च लोकसङ्घम् ॥८५२॥

त्रिसामा—५७४

मन्ये त्रिसामा भगवान् त्रिबन्धो
विश्वं निबध्नन् गमयत्यभीष्टम् ।
तं वामदेव्येन रथन्तरेण
स्तुवन्ति नूनं बृहता च तज्ज्ञाः ॥८५३॥
साम्नां बहुत्वं प्रथितं हि वेदे
गायन्ति तद् गानविदो यथार्थम् ।
ज्ञात्वा विकारं प्रकृतिञ्च साम्नां
ते चोक्थशासः प्रचरन्ति लोके ॥८५४॥
एवं हि यो वेत्ति स वेत्ति सर्वां
छन्दोमयीं गां समिधश्च तिस्रः ।
वेदेऽस्ति गीतं विविधं यथावत्
तज्ज्ञास्त्वलङ्कारमिति ब्रुवन्ति[1] ॥८५५॥

सामगः—५७५

यदन्तरङ्गं मनुजस्य दुःखं
सुखञ्च वा येन [1]विलासमेति ।
ताभ्यां प्रणुन्नेन जनेन किं स्यात्
गेयं तु सामैव मतं श्रुतीनाम् ॥८५६॥

साम—५७६

सर्वस्य कर्तारमचिन्त्यशक्तिं
[1]गायन्तु मर्त्याः निहितार्थसिद्ध्यै ।
स सर्वगः सर्वसुहृत् हृदिस्थः
स एव चेष्टेन युनक्ति मर्त्यम् ॥८५७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निर्वाणम्—५७७

विष्णुर्हि निर्वाणपदेन वाच्यो
निर्वापयन् विश्वमिदं दधाति ।
यथोदयास्तौ रविरश्नुवानो
दृश्योऽस्ति लोके सकलञ्च तद्वत् ।।८५८।।

भेषजम्—५७८

यदत्र दृश्यं किमुवाप्यदृश्यं
तद् भेषजेनास्ति ततं समग्रम् ।
विष्णुः स्वयं भेषजमाप्तमात्रः
क्षिणोति रोगं [1]सकलस्य लोके ।।८५६।।
जन्तुर्यदा याति निजान्तकालं
स भेषजस्तञ्च जहाति तस्मात् ।
न भेषजं नापि भिषक् च तत्र
व्यनक्ति वीर्यं किमु वास्ति चित्रम् ।।८६०।।

भिषक्—५७६

भिषक् हि विष्णुः स हि सर्वयातः
सुप्तं प्रमत्तं विषमस्थितं वा ।
जन्तुं सदा रक्षति दुर्गतं वा
सर्वत्र भैषज्यमयो यतः सः ।।८६१।।

संन्यासकृत्—५८०

नित्यं भ्रमन् लौकिकमार्गमाप्तो
यदा मनुष्यः सुकृतानुरोधात् ।
तमांसि हित्वा किमु वा रजांसि
संन्यासकृत्[1] विष्णुरिवापरः सः ।।८६२।।

शमः—५८१

शमो विष्णुः शमः सूर्यः शमो मर्त्योऽपि तद्वशात् ।
शमं पश्यन् शमं प्राप्तः शमः शान्तिं प्रपद्यते ।।८६३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शान्तः—५८२

शान्तो हि विष्णुः स विधत्त एतत्
जगत् समस्तं निजशान्तभावे ।
शान्तं स्मरन् शान्तमनास्तपस्वी
हित्वा च काम्यान् तमुपैति शान्तम्।।८६४।।

निष्ठा—५८३

निष्ठा हि विष्णुर्गतिमच्च सर्वं
तत्र स्थितं ब्रह्म न चैति याति ।
यथा तथा प्रस्तरनिष्ठजन्तु-
रश्मानमाकम्पयितुं न शक्तः ।।८६५।।
निष्ठां हि यो वेत्त्यविकल्पतो[1] ना[2]
न कम्पते नापि च याति मोहम् ।
मनोविकाराः किमु वापि विघ्ना-
स्तं निष्ठनिष्ठं न विचालयन्ति ।।८६६।।

शान्तिः—५८४

शान्तिर्हि सा यत्र धृतं हि किञ्चित्
विष्णुर्हि शान्तिः सकलं दधाति ।
विष्णौ हिरण्यात्मनि सर्वमास्ते
जीवोऽपि तं शान्तमुपैति शान्तः ।।८६७।।

परायणम्—५८५

परायणे ब्रह्मणि सर्वमोतं
यो वेत्ति तद् विश्वभवञ्च वा यत्।
स एव दुःखान्यतिमुच्य शेते
परायणेऽशेषसुखालये वा ।।८६८।।

शुभाङ्गः—५८६

विष्णुः शुभाङ्गः कुरुते शुभाङ्गं
सूर्यं जगच्चापि तथैव शक्तम् ।
शुभाङ्गता सर्वशरीरजा[1] या सा
द्योतिका तस्य शुभस्य दातुः ।।८६९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शान्तिदः—५८७

स शान्तिदो विष्णुरमर्त्यकर्मा[1]
विश्वस्य वासाय ददाति शान्तिम् ।
एवं हि यो वेत्ति जगच्छयानं[2]
विष्णुं स देहेऽपि ततं रहस्यम्[3] ॥८७०॥

स्रष्टा—५८८

स्रष्टा स एवोक्त इहास्ति विष्णु-
स्तस्माद्ध जज्ञे यदिहास्ति दृश्यम् ।
स्रष्टारमीशं कवयः स्तुवन्ति
स्वयं मनुष्यः सृजतीह सर्ज्यम् ॥८७१॥

कुमुदः—५८९

यो मोदते कायति तत्र किञ्चित्
युक्तं भवेत्तूक्तमथाप्ययुक्तम् ।
वाचं मुदं चापि स एव नृभ्यो
ददन्मुदं तिष्ठति वीतरागः ॥८७२॥

कुवलेशयः—५९०

स [1]कातृवर्गं वचसानुयाति
स संवृणोत्येव च भूमिमुग्राम् ।
ईष्टे स ईशान इदं समस्तं
प्राप्तिः समाप्तिश्च हितास्ति यस्मिन् ॥८७३॥
एवं हि यो वेत्ति विचित्रवीर्यं
विचित्ररूपेण वितत्य विश्वे ।
विराजमानं च सखायमेकं
स वेद विष्णुं कुवलेशयं तम् ॥८७४॥

गोहितः—५९१

स गोहितो विष्णुरिदं समस्तं
गत्या नियुञ्जन् भ्रमणेन युङ्क्ते ।
शिल्पी यथा यन्त्रकलाप्रवीणः
शक्तिं नियुङ्क्ते गमनाय तद्वत् ॥८७५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गोपतिः—५६२

सर्वं प्रवाहेण हि नित्यमेतत्
पुनश्च तद् व्यासकृतावधानः ।
गतिञ्च गम्ये प्रहिणोति यो वै
स गोहितो विष्णुरिहास्ति गीतः ॥८७६॥
रथी यथा तत्र विराजमानः
चलत्सु वा वाजिषु 'हिं' करोति ।
तान् सर्वतः पाति रथञ्च तद्वत्
स गोपतिर्विष्णुरिहास्ति बोध्यः ॥८७७॥

गोप्ता—५६३

गोप्ता स विष्णुः स हि गोप्तृधर्मा
दिविश्रितेभ्योऽथ च भूश्रितेभ्यः ।
यच्छन् स शर्म स्वयमात्मगुप्तो
विश्वञ्च गोपायति सर्वगुप् सः ॥८७८॥

वृषभाक्षः—५६४

स एव विष्णुर्वृषभाक्ष उक्तो
व्याप्नोति विश्वं स महः स चक्षुः ।
मेघैश्च यत् सिंचति विश्वमात्रं
व्याप्नोति सर्वं वृषभाक्ष एकः ॥८७९॥

वृषप्रियः—५६५

वृषप्रियो विष्णुरिदं स जानन्
प्रीणाति सूर्यः स उ वाग्निरुर्व्याम् ।
प्रीणाति विश्वञ्च स वर्षणेन स
एव [1]विश्वाय ददाति भोज्यम् ॥८८०॥

अनिवर्ती—५६६

यद्विष्णुना यत्र यथाविधं वा
कृतं तदासर्गनिवृत्तिशून्यम् ।
तथाविधं तत् कुरुते च कर्म
[1]नक्षत्रधर्मेण जगद्वितन्वन् ॥८८१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निवृत्तात्मा—५९७

विष्णुर्निवृत्तात्मपदेन बोध्यः
प्रवर्तते यश्च निवर्तते च ।
गोलार्धके सूर्य इहास्ति दृश्यः
परार्धकास्तञ्च '[1]निवृत्त' माहुः ॥८८२॥

संक्षेप्ता—५९८

आब्रह्मकीटान्तमिदं हि विश्वं
[1]संक्षेपविक्षेपमयं विधत्ते ।
बीजे वटं वृक्षमथापि बीजात्
[2]संक्षेपशीलः कुरुतेऽति चित्रम् ॥८८३॥

क्षेमकृत्—५९९

स क्षेमकृद्विष्णुरिदं वितन्वन्
सर्वस्य पारं च स वेद एकः ।
[1]क्षेमं स जीवाय ददाति[2] गुप्तम्
[3]स्वोकांसि जीवोऽपि करोति तस्मात् ॥८८४॥

शिवः—६००

शिवः स विष्णुः स सखा स देवः
स एव लोकान् परितः पिपर्ति ।
शिवोऽग्निरुक्तः स हि पाति विश्वं
स दुर्मतिं कृन्तति हूयमानः ॥८८५॥

श्रीवत्सवक्षाः—६०१

श्रीवत्सवक्षा भगवान् स विष्णु-
र्विश्वं स वक्तीति पुनः पुनश्च ।
सेवध्वमन्यं तमसः परोऽहं
श्रीरस्ति सर्वा मयि गुप्तरूपा ॥८८६॥

श्रीवासः—६०२

श्रीवास एकः स हि सूर्य उक्त-
स्तस्मिन् ह तस्थुर्भुवनानि यस्मात् ।
तस्मात् स विष्णुर्निजशक्तिमस्यन्
श्रियं पुरुत्रा कुरुतेऽधिविश्वम् ॥८८७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीपतिः—६०३

स श्रीपतिर्विष्णुरिदं वितन्वन्
श्रियं स्वयं पाति सना समग्राम ।
लोकेऽस्ति दृश्यं बहुपुष्पजातं
कस्तच्छ्रियं पाति स एव विष्णुः ॥८८८॥

श्रीमतांवरः —६०४

श्रीमज्जगत् सर्वमिहास्ति दृश्यं
वरीतुमर्होऽस्ति स एव विष्णुः ।
तमाप्तवाचः कवयः पुराणाः
स्तुवन्ति गायन्ति नमन्ति चान्ते ॥८८९॥
श्रीः सन्ति वेदा य उ तान् वृणोति
श्रीमान् स उक्तः स वरः स मान्यः।
ऋचाऽथ साम्ना यजुषा च नित्यं
तं जागृवांसः कवयः स्तुवन्ति ॥८९०॥

श्रीदः—६०५

श्रीदो हि विष्णुर्जगते ददाति
श्रियं सदा भूरिविधामनन्ताम् ।
वने जले विद्युति भेषु चोर्व्यां
स केवलं [1]पञ्चति निष्प्रपञ्चः ॥८९१॥

श्रीशः—६०६

श्रीशोऽस्ति विष्णुः स युनक्ति लोकं
श्रिया विचित्राभरणा च सा श्रीः ।
लोकोऽस्ति तस्मात् प्रपदं विभक्तो
निन्द्येन नन्द्येन [1]तदाश्रयेण ॥८९२॥

श्रीनिवासः—६०७

श्रियः समग्रा निहिता हि सूर्ये
सूर्योऽस्ति विष्णुर्जगदस्ति विष्णौ ।
यथा[1] धनेशाकलकाधिसर्वं
सन् मन्यते स्वामिनि तद्वदेतत् ॥८९३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीनिधिः—६०८

स श्रीनिधिर्विष्णुरिहास्ति गम्यः
पदानि यस्मिन् त्रिवृतानि तस्थुः ।
तं श्रीनिधिं ध्यायति तत्त्वविद् यः
स श्रीनिधिः सन् व्रियते सदार्थैः ॥८६४॥

श्रीविभावनः—६०६

श्रियं स विष्णुः प्रपदं विभज्य
गुणेन रूपेण पृथक् च नाम्ना ।
श्रिया विभातं कुरुते च विश्वं
स्वयं श्रिया तत्र विभाति नित्यम् ॥८६५॥

श्रीधरः—६१०

स श्रीधरो विष्णुरनन्तशोभः
श्रियञ्च दाधर्ति विचित्रचित्राम् ।
नामानि लोके विविधानि तस्याः
श्रियं स षट्केन बिभर्ति लोकान् ॥८६६॥

श्रीकरः—६११

[1]स श्रीकरो विष्णुरनन्तलोकान्
करोति गर्भे स्वक एव यस्मात् ।
तस्मात् स उक्तः कविभिः पुराणैः
प्रभाकरो भास्कर एव वा सः ॥८६७॥

श्रेयः—६१२

श्रेयो हि विष्णु स उ वास्ति दक्षः
स एव सूर्यः स उ वास्ति यज्ञः ।
स एव लभ्यः स उ वास्ति वाच्यः
श्रेयांसमेनं कवयः स्तुवन्ति ॥८६८॥

श्रीमान्—६१३

श्रीमान् स विष्णुः कुरुतेऽधि सर्वं
न तद्विना श्रीर्भुवनेऽस्ति दृश्या ।
श्रीमान् मनुष्योऽपि भवेत् सुयज्ञो
यज्ञेषु सर्वेषु ततः स एव ॥८६६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकत्रयाश्रयः—६१४

लोकत्रयं संश्रयते स विष्णु-
लोकत्रयं संश्रयते च सूर्यः ।
लोकत्रयं संश्रयते च देही
त्रिलोकयातं मनुते मनश्च ।।६००।।

स्वक्षः—६१५

स्वक्षः स विष्णुर्भुवनानि पश्यन्
हिरण्मयेनाथ रथेन याति ।
स एव चक्षुः सकलस्य लोके
स्तुवन्ति देवाः सुदृशं सदाग्निम् ।।६०१।

स्वङ्गः—६१६

स्वङ्गो हि विष्णुर्गमयन् स विश्वं
साङ्गैः शुभाङ्गैः कुरुते च विश्वम्।
स्वाङ्गो हि गीतः कुरुते स्थिराङ्गं
यैः प्राणिमात्रं कुरुते क्रियाः स्वाः।।६०२।।

शतानन्दः—६१७

शतानन्दः स वै विष्णुस्ते वा ये तदुपासकाः।
देवा देवगणा वापि सर्वे वा लोकविग्रहाः ।।६०३।।

विश्वे शतानन्दमयेन सृप्तं
नन्दं स विष्णुः सकलाय राति ।
न निर्ऋतिं काङ्क्षति कोऽपि जीवो
वाञ्छन् शतानन्दमयस्य चाङ्कम् ।।६०४।।

नन्दिः—६१८

सूर्यो हि नन्दिः स समृद्ध्यमानो
यथा जनैः खे परिलोक्यते वै ।
विष्णुस्तथा विश्वमिदं समस्तं
समृद्ध्यमानं कुरुते ह्यजस्रम् ।।६०५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ज्योतिर्गणेश्वरः—६१६

ज्योतिर्गणेशः स रविः स विष्णु-
नर्क्षत्रतेजांस्युदयन् क्षिणोति ।
तथा यथात्मा विरहन् शरीरं
ज्योतींषि खानां परिगृह्य याति ॥६०६॥

विजितात्मा—६२०

अयं ह विष्णुः सकलं विजित्य
स्वीये स्वरूपे निदधाति सर्वम् ।
सूर्योऽपि तद्वद्विजितान्तरात्मा
विश्वं समस्तं कुरुते निजान्तः ॥६०७॥

विधेयात्मा—६२१—अविधेयात्मा

सर्वत्र सद्व्याप्तिमयं महेशं
सूर्यं तथा चन्द्रमथापि शुक्रम् ।
आगच्छ तिष्ठेह कुरुष्व वैवं
प्रकाश्यते मर्त्यवरेण वाञ्छा ॥६०८॥

सत्कीर्तिः—६२२

विष्णुः सदा सर्वगुणाभिरामः
सङ्कीर्त्यते स्वात्मतमः प्रमृष्ट्यै ।
मन्त्रैर्व्रतैः सत्यजपैस्तपोभि-
र्नान्यस्ततः[1]कीर्तिमुपैति सत्याम् ॥६०६॥

छिन्नसंशयः—६२३

न संशयः स्थानमुपैति तस्मिन्
यस्मिन् ह तस्थुर्भुवनानि विश्वा ।
अयं तथाहं च पदेन विष्णु-
र्व्यक्तोऽस्ति यद्वद् दिवि सूर्य [1]एकः ॥६१०॥

उदीर्णः—६२४

सूर्यो ह्युदीर्णः सकलं हि दृश्यं
नित्यं नयत्यात्मगुणेन नूत्नम् ।
उदीर्य विश्वं कुरुते मनोज्ञं
विष्णाविदं स्यूतमतोऽस्त्युदीर्णः ॥६११॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वतश्चक्षुः—६२५

स सर्वतश्चक्षुरिहास्ति विष्णुः
स विश्वतः पश्यति विश्वमेतद् ।
स विश्वबाहुः स च विश्वतस्पात्
तमेव गायन्ति नमन्ति धीराः ॥६१२॥

अनीशः—६२६

अग्निर्हि विष्णुर्ह्यथवाऽपि सूर्यः
स एव सर्गान्तमिदं समीष्टे ।
न कोऽपि विष्णोरपरोऽस्ति शास्ता
गीतोऽस्त्यतोऽनीशपदेन विष्णुः ॥६१३॥

शाश्वतस्थिरः—६२७

स्थिरो हि विष्णुः स हि शाश्वतो वा
दिवं सनाथं कुरुते चिरस्य ।
तस्मिन् ह तस्थुर्भुवनानि विश्वा
संस्थापयन् विश्वमसौ बिभर्त्ति ॥६१४॥

भूशयः—६२८

स भूशयो विष्णुरनन्तशक्ति-
श्चराचरं भूगुणवद्विधाय ।
शेतेऽन्तरासौ भुवनानि जानन्
वपुर्यथात्मा कुरुते क्रियावत् ॥६१५॥

भूषणः—६२९

स भूषणो विष्णुरलङ्करिष्णुः
सूर्यादिभिर्भूषयते ह नित्यम् ।
तथा यथात्मा वपुरिन्द्रियाढ्यं
स्वसत्तया तत्कुरुते प्रभावत् ॥६१६॥

भूतिः—६३०

भूतिः स विष्णुः कुरुते कृतं स्वं
सत्तान्वितं सर्वरसं सदास्थम् ।
यतः स भूतिर्न जहाति सत्तां
कार्यञ्च सत्तां न जहाति तस्मात् ॥६१७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विशोकः—६३१ अशोकः

विष्णुर्विशोकः कुरुते च सूर्यं
विशोकमग्निं सकलं जगद्वा ।
न शोकमोहौ च तमश्नुवाते
यतः स विद्वान् कविरात्मतन्त्रः ॥६१८॥

शोकनाशनः—६३२

विष्णुर्विशोकः सविनाशनोऽस्ति
शोकस्य तस्माल्लभते प्रसादम् ।
जगत् समस्तं शिशुमात्मसूतं
माता यथा सूर्यमिमं तथा विद् ॥६१९॥

अर्चिष्मान्—६३३

अर्चिष्मानस्ति पूजार्हो विष्णुः सूर्यः सदा शुचिः।
अपरेऽपि ग्रहाः सर्वे पूजामर्हन्ति नैत्यिकीम् ॥६२०॥
विष्णुनैतद् यथा व्याप्तं जगत् सर्वं विराजते ।
ग्रहैश्चापि तथा सर्वं विश्वं व्याप्तं विराजते ॥६२१॥

अर्चितः—६३४

विष्णुर्जगत्यां लभतेऽर्चनां स्वां
ततोऽर्चितः स स्तुतिमभ्युपैति ।
तमेव वेदाः प्रणुदन्ति गातुं
देवा नरा वा ऋषयः पुराणाः ॥६२२॥

कुम्भः—६३५

कुम्भोऽत्र विष्णुः स उ वापि सूर्यः
सहोऽपि कुम्भः किमु वाक् च कुम्भः ।
उशन्ति यं सूरिवराः स कुम्भो
व्याप्तञ्च कुम्भेन विभाति सर्वम् ॥६२३॥

विशुद्धात्मा—६३६

विशुद्धात्मा स एवास्ति विष्णुः सूर्यः पुरातनः।
शुद्धो दधाति विश्वस्मै रत्नानि च धनानि च॥६२४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विशोधनः—६३७

विशोधनो विष्णुरमोघशक्ति-
विंशोधयन् विश्वमिदं समस्तम् ।
प्रत्नं स [1]नूत्नं कुरुते चिराय
तथा यथा स्वापविमुक् [2]सभः स्यात् ।।६२५।।

अनिरुद्धः—६३८

अनिरुद्धः स एवास्ति विष्णुः सूर्यः पुरातनः।
स्तूयते जीयते वासौ शत्रुजिद्विश्वबन्धनः[1] ।।६२६।।

अप्रतिरथः—६३९

रथो न कश्चिन्न रथी च कश्चित्
यः स्याज्जगत्यां प्रतिमानभूतः ।
हिरण्ययेनारमता रथेन
पश्यन् स सूर्यो भुवनानि याति ।।६२७।।

प्रद्युम्नः—६४०

स एव विष्णुः किमु वापि सूर्यः
प्रद्युम्नशब्देन नमन्ति तं वा ।
प्रद्युम्न आत्मापि यतः स कायं
पुनः पुनः प्राप्य नवो विभाति ।।६२८।।

अमितविक्रमः—६४१

इन्द्रोऽस्ति वेदेऽमितविक्रमेण
नाम्ना प्रगीतः स हि वामितौजाः ।
स एव सूर्यः क्रमतेऽमिते खे
तं योऽतिविक्रामयते स विष्णुः ।।६२९।।

कालनेमिनिहा—६४२

कालनेमिनिहा विष्णुः सर्वं काले नियच्छति।
तद्यथाक्षगतं चक्रं [1]तं निहन्ति भ्रमत्यपि।।६३०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाशे यानि दृश्यन्ते ज्योतिर्बिम्बान्यनेकशः ।
तेषु नक्षत्रसंज्ञानि स्थिरस्थानानि यानि वै ॥६३१॥
गच्छन्तो [1]भानि गृह्णन्ति सततं ये तु ते ग्रहाः।
सूर्यादियो ग्रहाः सप्त राहुकेतुयुता नव ॥६३२॥

वीरः—६४३

यदत्र विश्वेऽस्ति विचित्रवीर्यं
सर्वञ्च तद्वीरपदेऽस्ति विष्णौ ।
अग्निर्हि वीरो रविरस्ति वीरो
वीरो मनुष्योऽपि जवातिरेकात् ॥६३२॥

शौरिः—६४४

य एव शूरः स हि चात्र शौरिः
स सर्ववीरः सनिता धनानाम् ।
स क्षिप्रधन्वा स विहन्ति शत्रून्
सूर्योऽथवा विष्णुरिहास्ति तर्क्यः ॥६३३॥

शूरजनेश्वरः—६४५

गतौ हि यज्जायत एव तस्मा-
ज्जनोऽस्ति जातो जगदस्ति ज़ातम् ।
तस्मात् प्रधानात् पुरुषात् पुराणात्
स गीयते शूरजनेश्वरोऽपि ॥६३४॥

त्रिलोकात्मा—६४६

त्रिलोकात्मा स एवास्ति विष्णुः सूर्यः पुरातनः।
स त्रिबन्धुस्त्रिमूर्धा वा पश्यंश्चातति सर्वदा ॥६३५॥

त्रिलोकेशः—६४७

संराजते येन समस्तमेत-
दीष्टे त्रिलोक्याः स्वयमात्मसिद्धः ।
विष्णुर्ह वा सूर्य उ वा स एको
विप्रास्तमेकं [1]बहुधा वदन्ति ॥६३६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

केशवः—६४८

स केशवो विष्णुरिहास्ति सूर्यः
स्वकांशुभिर्विश्वमिदं [2]प्रचष्टे ।
त्रिधातुशृङ्गो दिविषत् स एव
त्रिलोचनोऽसौ स मरीचिमाली ।।६३७।।

एवं हि यः केशवमात्मसंस्थं
नित्यं शुचिं पश्यति हृद्गुहास्थम् ।
स वीतशोको विनिहन्ति पापं
तथा यथाग्निर्विदहत्यवद्यम् ।।६३८।।

केशिहा—६४६

इन्द्रः स्वकाश्वैर्गतिमादधानः
सन् केशिहा नाम बिभर्ति लोके ।
अग्निं जलं विद्युतमत्र निघ्नन्
स केशिहा सूर्य इहास्ति दृश्यः ।।६३६।।

कालं स लोके गणनाय युञ्जन्
सरश्मिकः पश्यति विश्वमर्कः ।
[1]जीवोऽपि तिग्मांशुसमश्च देहं
घट्यादिभिः संकलनाय युङ्क्ते ।।६४०।।

स एव वातादिषु जालबद्धं
त्रिनाडिबद्धं च वपुर्निसर्गात् ।
जीवः स्वकार्थाय गतिं दधाति
केशा विचित्राः कृतिमाहुरस्य[1] ।।६४१।।

स पुण्डरीकाक्षपदेन वाच्यः
केशीव हृत्तन्त्रमनक्ति गत्या ।
सूतो रथेष्ठोऽपि तथैव लोके
स केशिहाऽश्वान् कशया विनिघ्नन् ।।६४२।।

एवं हि यो वेत्ति स वेत्ति वेदं
लोकं च वा देहमथापि सूर्यम् ।
इन्द्रं च वा केशिहनं च विष्णुं
विश्वे ततं पश्यति विष्णुमेव ।।६४३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हरिः—६५०

हरिर्हि विष्णुः सः उ वास्ति सूर्यो
विश्वं समस्तं हरते महौजाः ।
भासा च विश्वं सकलं विभाति
जन्मानि विश्वस्य स वेद विद्वान् ॥६४४॥

कामदेवः—६५१

स कामदेवो भगवान् वरेण्यो
विष्णुर्ह वा सूर्य उतापि चाग्निः ।
काम्यं समस्मै स ददाति नित्यं
तं कामदेवं स्तुतिभिः स्तुवन्ति ॥६४५॥

कामपालः—६५२

कामस्तदग्रे समवर्ततायं
विभुर्विभावा स सखीयते च ।
स सासहिः पृत्सु स एव चोग्रः
स कामपालोऽवतु मां[1] शरण्यः ॥६४६॥

कामी—६५३

कामी स सूर्यः परिपूर्य विश्वं
पिपर्ति कामान् सकलस्य लोके ।
विष्णुर्हि भूत्वा हृदि सन्निविष्टः
कामेन कान्तं कुरुते जगत् सः ॥६४७॥

कान्तः—६५४

कान्तिं समापन्न इहास्ति कान्तः
स एव काम्येषु गतश्च कान्तः ।
यं कामये तञ्च करोमि कान्तं
कविं सुमेधामृषिषूत्तमं वा' ॥६४८॥

कृतागमः—६५५

विष्णुर्महान् यो विविधैः स्वरूपैः
स्तोत्रा स्तुतस्तं समुपैति यस्मात् ।
तस्मात् स्तुतः सत्कविभिः पुराणैः
कृतागमेनापि पदेन भानुः[1] ॥६४६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनिर्देश्यवपुः—६५६

यदत्र विश्वे परितोऽस्ति दृश्यं
ज्ञानेन वा गन्तुमिहास्ति शक्यम् ।
सर्वं स्वरूपं तदिहास्ति विष्णो-
रियान् स वाचा न विधातुमर्हः ॥६५०॥

विष्णुः—६५७

स्थानं न तद्यत्र न विष्णुवासः
स्थानं न तद्यत्र न विष्णुसत्ता ।
स्थानं न तद्यत्र न सोऽस्ति विष्टः
स्थानं न तद्यत्तु परं ततः स्यात् ॥६५१॥

वीरः—६५८

वीरो हि विष्णुः स हि वास्ति सूर्यो
जनोऽस्ति वा विष्णुगुणेन युक्तः ।
व्याप्नोति विश्वं स हि सर्वयातः
सर्वंसहं तं स्तुवते पवित्रम् ॥६५२॥

अनन्तः—६५९

अनन्तशक्तिः कथितोऽत्र विष्णु-
रनन्तशक्तिश्च तथैव सूर्यः ।
अनन्तपारं कुरुते च सान्तं
त्वेषश्चरिष्णुर्दिवमात्मचक्षुः[1] ॥६५३॥

धनञ्जयः—६६०

धनञ्जयो विष्णुरनन्तराधा
धनं हि सर्वं जितमस्ति तेन ।
यस्मिन् स्थितः सोऽस्ति धनं तदेव
यथा धनं जीवति काय आहुः ॥६५४॥

ब्रह्मण्यः—६६१

स सर्वधा ब्रह्म बृहत् प्रवृद्धो
विश्वे समस्ते च बृहद्धि सर्वम् ।
दृशास्ति दृश्यो रविरूर्ध्वमायन्
जगद्धितायैव चरिष्णुधर्मा ॥६५५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मण्य[1] उक्तः कविभिर्विधिज्ञै-
ब्रह्मण्य[2] एनं निदधाति यन्त्रै[3] ।
नियन्त्रितो विश्वहिताय[4] गच्छन्
धामानि विश्वानि च वेद देवः[5] ।।६५६।।

ब्रह्मकृत्—६६२

स ब्रह्मकृद् विष्णुरुतापि सूर्यो
ये तत्कृतौ सन्ति च दत्तवाचः ।
स्तुवन्ति तं ब्रह्मकृतं पुराणं
निजार्थसिद्ध्यैः सकलायुराप्त्यै ।।६५७।।

ब्रह्मा—६६३, ब्रह्म—६६४

ब्रह्मा स विष्णुश्च तथाऽस्ति सूर्यो
यः स्तूयते सामभिरुक्थरूपैः ।
यज्ञं च नो वर्धय देव देव!
तवोतिभी रिष्यति नैव मर्त्यः ।।६५८।।

ब्रह्मविवर्धनः—६६५

विवर्धनं विश्वमिदं समस्तं
यतः स्वयं ब्रह्मविवर्धनः सः ।
बीजाच्च वृक्षं कुरुते विवृद्धं
वृक्षाच्च बीजान् कुरुते बहून् सः ।।६५६।।

ब्रह्मवित्—६६६

स ब्रह्मविद्विष्णुरुदात्तकाव्यो
धामानि सर्वाणि दधाति गर्भे ।
जानाति वा तानि विधारकत्वात्
स्तुवन्ति तं ब्रह्मविदः पुराणाः ।।६६०।।

ब्राह्मणः—६६७

अग्निः स एको बहुधा समिद्धः
सूर्यः स वा सर्वमिदं स एव ।
उषोऽप्यसौ ब्राह्मण एव भाति
स केतुमान् चित्ररथस्त्रिचक्रः ।।६६१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं हि यो वेत्ति पदं सुगुप्तं
स ब्राह्मणं वेद पदञ्च विष्णोः ।
विष्णुर्विधाता स पुनश्च धाता
ब्रह्माप्यतो ब्राह्मणशब्दवाच्यः ॥६६२॥

ब्रह्मी—६६८

यो यस्य राजा स्वमदो हि तस्य
ब्रह्मास्ति विश्वं सकलञ्च तस्मिन् ।
ब्रह्मीति तस्मात् स हि विष्णुरुक्तः
स विश्वतो वा परिभूः पुराणः ॥६६३॥

ब्रह्मज्ञः—६६९

विष्णुर्हि विश्वं परितोऽभ्युपेतो
जानाति वृद्धं सकलं स्वकस्थम्[1] ।
ब्रह्मज्ञ उक्तः स कविश्च तस्माद्
विश्वानि देवो वयुनानि विद्वान् ॥६६४॥

ब्राह्मणप्रियः—६७०

ब्राह्मणस्य प्रियो लोके विष्णुः सूर्यः पुरातनः ।
तं नमन्ति सदार्चन्ति विश्वञ्च स पृणाति वै॥६६५॥

महाक्रमः—६७१

न चास्ति किञ्चिद् भुवि वर्तमानं
महाक्रमो यन्न वशे करोति ।
त्रिधातुरुक्तः स कविः स सूर्यः
स विष्णुरिन्द्रः स महान् स भर्गः॥६६६॥

महाकर्मा—६७२

महाकर्मा स एवास्ति विष्णुः सूर्यो जनेश्वरः।
तं स्तुवन्ति सदा विप्राः प्राप्तुं तत्पदमुत्तमम्॥६६७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महातेजाः—६७३

तेजोऽग्निरुक्तः स समिद्धतेजाः
सूर्यो विभात्येति तमो विलुम्पन् ।
स तेजसां तेज इति प्रतीतः
तेजांसि विष्णुर्हरते समेषाम् ॥६६८॥

महोरगः—६७४

महोरगो विष्णुरुतापि सूर्य
उरोऽन्तरिक्षं स महांश्च तत्र ।
गच्छन् रविः स्यात् स महोरगोऽतो
विष्णुश्च यस्तन्नियमं विधत्ते ॥६६६॥

महाक्रतुः—६७५

महाक्रतुर्विष्णुरनन्तकर्मा
सूर्योऽपि वोक्तः क्रतुमान् महान् सः।
विश्वञ्च यः कर्मसु सन्नियुङ्क्ते
क्षणं विरामं लभते स्वयं नो ॥६७०॥

महायज्वा—६७६

यज्वा महान् विष्णुरुतापि सूर्यो
होता स एवास्ति कविः स वेधाः ।
विद्युद्रथोऽसौ सहसश्च पुत्रः
स्तुतोऽस्ति वेदे स हि सर्वयातः ॥६७१॥

महायज्ञः—६७७

महानसौ येन विना न सिध्येद्
यज्ञः स विष्णुः सदसस्पतिः सः ।
स एव सोमो वसुवित् स रैवान्
स वाद्भुतस्तञ्च नमन्ति देवाः ॥६७२॥

महाहविः—६७८

महाहविर्विष्णुरुतापि सूर्यो
विश्वानि यो वा भुवनानि जुह्वद् ।
ऋषिः स होता हविषा पिता नः
स एव [1]विश्वा भुवनानि वेद ॥६७३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तव्यः—६७६

स्तव्योऽस्ति को विष्णुरुतापि सूर्यो
यतोऽमृतोऽसौ सकलस्य कर्म ।
पश्यन् स्मरन् भूतपतिश्चरिष्णु-
र्वञ्छन् नियच्छन् भुवनानि [1]वेत्ति ॥६७४॥
त्वक्त्वाऽमरं यो मनुजो महेशं
नरो नरं स्तौति सहस्रभावैः ।
नष्टः स्वयं स्तोत्रमथापि नश्यन्
वियुज्यते [1]चार्थ्यतमैश्च [2]लिप्स्यैः ॥६७५॥

स्तवप्रियः—६८०

स्तवप्रियो विष्णुरिहास्ति लोके
सूर्यस्तथान्ये च खगाः समस्ताः ।
स्तुतिं स्वकीयामभितो भवन्तीं
श्रुत्वा च वित्त्वा परितः कनन्ति ॥६७६॥
लोकेऽपि यः स्तोत्रशतैः प्रक्लृप्तै-
र्नरो नरं स्तौति शताभिधानैः ।
स्तुत्यः स्तवैः शुद्धतरात्मभावः
प्रीणाति तञ्चार्थ्यतमप्रदानैः ॥६७७॥

स्तोत्रम्—६८१

स्तोत्रं स्वयं [1]ब्रह्मविवर्धनोऽसौ
स्तोत्रस्वरूपेण [2]जरितृकोशे ।
प्रतिष्ठितः सन् जरितुश्च [3]वाचः
समर्धयत्येव च [4]तन्निशम्य ॥६७८॥

स्तुतिः—६८२

स्तुतिर्हि विष्णुः स हि वास्ति सूर्यो
मर्त्यः स्वकार्यस्य वशं प्रपन्नः ।
स्तुतिं प्रयुङ्क्ते हृदि तं बिभर्ति
तमेव वाचा बहुशो ब्रवीति ॥६७९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तोता—६८३

स्तोता स विष्णुर्ह्यथवाऽपि सूर्यः
स्तोतुर्हि हृद्देशगतः स्वयं सः ।
अर्थप्रदित्सुः प्रणुदन् प्रवक्तुं
प्रसादमन्वेति वचांसि चोद्य ॥६८०॥

रणप्रियः—६८४

रणप्रियो विष्णुरुतापि सूर्यः
प्रकाशयन् द्यां च स एति विश्वम्।
हृदि स्थितो वा स तमांसि हत्वा
प्रकाशयत्येव कविः सुमेधाम् ॥६८१॥

पूर्णः—६८५

पूर्णो ह विष्णुः स हि वास्ति सूर्यः
स पूर्णबन्धुः सविता सुरत्नः ।
स पूरयत्येव जगत्स्वभाभिः
पूर्णं पदं तस्य बृहद् वदन्ति ॥६८२॥

पूरयिता—६८६

मन्ये पूरयिता विष्णुर्जगत्[1] पूर्णं च मन्यते।
पूर्णस्य पूर्णमादाय पूर्णं सर्वञ्च दृश्यते॥६८३॥

पुण्यः—६८७

पुण्यः स विष्णुः स हि वाऽस्तु सूर्यः
पुण्यः पवित्रं स पुनाति विश्वम् ।
तपः पवित्रं तपसा च पूर्णं
विश्वं समस्तं प्रविभाति तस्मात् ॥६८४॥

पुण्यकीर्तिः—६८८

[1]पुण्यकीर्तिः स एवास्ति विष्णुः सूर्यः सनातनः।
तं विप्रासः समिन्धते लब्धुं विष्णोश्च [2]सत् पदम्॥६८५॥

अनामयः—६८९

अनामयो विष्णुरुतापि सूर्यः
सदाऽव्रणो विश्वमसौ पिपर्ति ।
योऽनामयं ध्यायति मुच्यतेऽसौ
मनोविकारादथवान्यरोगात् ॥६८६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनोजवः—६६०

ज्ञानं मनस्तत्र जवो हि यस्य
मनोजवः स कविभिः प्रगीतः ।
ज्ञानेऽस्ति विष्णोरखिलं [1]समाप्तं
जवो न तस्मात् परमस्ति किञ्चित् ।।६८७।।
सुनिश्चितं पूर्वत एव विश्वं
[1]मनोजवेनैति सदा प्रणुन्नम् ।
स [2]विष्णुरेको भुवनस्य नाभि-
र्दिवि[3] क्षयो धावति [4]पूर्णबन्धुः ।।६८८।।

तीर्थकरः—६६१

मन्ये तीर्थकरो विष्णुः सूर्यः सर्वे च खेचराः ।
तरन्ति विष्णौ सम्बद्धा विष्णुस्तीर्थकरो मतः ।।६८९।।

वसुरेताः—६६२

वसुरेताः स एवास्ति विष्णुः सूर्यः सखा कविः ।
यस्मिन्नात्मा समस्तस्य रेतोधो वृषभश्च सः ।।६९०।।

वसुप्रदः—६६३

स्थानं ह्यशेषाय ददाति शम्भुः
स्थानाधिपः स्थानपतिश्च सोऽस्ति ।
वसुप्रदो वासपतिश्च किं वा
[1]वस्यः स्वयं विष्णुरनन्तकर्मा ।।६९१।।

वसुप्रदः—६६४

विष्णुर्दयालुर्दयते वसूनि
वसुप्रदश्चापि स एव गीतः ।
सखित्वमिच्छन्ति बुधश्च तस्य
स नो वसून्याभरते च यस्मात् ।।६९२।।

वासुदेवः—६६५

यस्मिन्निदं वासमुपैति विश्वं
विश्वे च यो वासमुपैत्यशेषे ।
चरिष्णुरर्को दिवि यात्यनन्ते
स वासुदेवः कथितोऽत्र विष्णुः ।।६९३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वसुः—६९६

वसुर्हि विष्णुः स हि वास्तु सूर्य-
स्त्रिविक्रमे वासमुपैति विश्वम् ।
वसुर्हि वासं [1]दयते समस्मै स्तुवन्ति
गायन्ति वसुं वरेण्यम् ।।६९४।।

वसुमनाः—६९७

नूनं वसुमना विष्णुः सूर्यः सत्यस्त्रिविक्रमः ।
सर्वं विश्वं समावास्य मनुते कर्मतत्कृतम् ।।६९५।।

हविः—६९८

हविर्हि विष्णुः स जुहोति नित्यं
क्रियाविधौ विश्वमिदं [1] प्रगच्छन् ।
स एव होता स हि वास्तु हुत्यो
बिभर्त्ति रूपाणि यतः स एकः ।।६९६।।

सद्गतिः—६९९

सदास्ति खे तद्गतिमद् यदस्ति
सूर्यादयश्चापि सता [1] भ्रमन्ति ।
प्रवाहनित्यञ्च जगद् भ्रमत् सत्
स विष्णुरेको भ्रमयत्यशेषम् ।।६९७।।

सत्कृतिः—७००

स सत्कृतिर्विष्णुरनन्तकर्मा
करोति तद् यस्य निमित्तमस्ति ।
करोति बीजात् स फलं फलाच्च
बीजं पुनर्विश्वमिदञ्च तद्वत् ।।६९८।।

सत्ता—७०१

चराचरं विश्वमिदं समस्तं
बिभर्ति नूनं निजसत्स्वरूपे ।
षड्भाववैकारिकविश्वमेतत्
परं न सत्ता प्रजहाति सत्ताम् ।।६९९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सद्भूतिः—७०२

सत् सर्वकार्येषु विभाति नैर्जी
सत्तां पुनस्तन्न जहाति नूनम् ।
सत्ता हि सद्भूतिपदेन बोध्या
सद्भूतिरन्वेति च कार्यमात्रम् ॥१०००॥
कृषीवलः सस्यसुखानुलिप्सु-
र्निमित्तमात्रं त्विह बीजवापे ।
तथैव विष्णुस्तु निमित्तमात्रं
स सत्प्रकृत्या कुरुते च विश्वम् ॥१००१॥

सत्परायणः—७०३

यदस्ति सत्तत् क्रमते च सन्तं
स सच्चिदानन्दमयोऽस्ति सृप्तः।
लोकेऽपि विद्वांसमुपेत्य दक्षं
सम्भान्ति सर्वाणि च साधनानि ॥१००२॥
महांबुद्धिर्महावीर्यो विष्णुरेको हि केवलः ।
[1]तपसोऽभीद्धयोगेन [2]व्यज्यानक्ति च सत्पदम्॥१००३॥

शूरसेनः—७०४

स शूरसेनो भगवान् मनस्वी
बध्वापि विश्वं कुरुते स्वतन्त्रम् ।
तं ज्ञाननेत्राः प्रपदं समीक्ष्य
स्तुवन्ति विष्णुं क्षपयन्ति पापम् ॥१००४॥

ये शूरसेनस्य यथातिसूक्ष्मं
ज्ञानं जगत्याञ्च प्रतिष्ठमानम् ।
पश्यन्ति ते वह्निमुपास्य यन्त्रे
कुर्वन्ति यन्त्रं गतिमत् सुबद्धम्[1] ॥१००५॥

यदुश्रेष्ठः—७०५

मन्ये यदुश्रेष्ठ इहास्ति सूर्य
आत्मापि सूर्यः स विभुश्च सूर्यः ।
काये यदुश्रेष्ठमतश्च ''हृत्'' स्यात्
विष्णुस्तु यातूनतिशय्य शेते ॥१००६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सन्निवासः—७०६

स सन्निवासो भगवान् वरेण्यो
विष्णुः स्वयं तिष्ठति सत्यधर्मा ।
चराचरे मर्त्यधियाप्यचिन्त्ये
प्रवाहनित्यं जगदादधाति ।।१००७।।

एवं हि ये पूतधियो हि धन्या
जपन्ति किं वा तमु राधयन्ति ।
ते सन्निवासं भगवन्तमेकं
पश्यन्ति नित्यं हृदये वसन्तम् ।।१००८।।

किं वच्मि मर्त्याः! मम सत्प्रयासे
गङ्गामृते[1] दोषविनाशशक्ते ।
भाष्ये निमज्यात्मधियो विशोध्य
विष्णुं सदा पश्यत यात शान्तिम् ।।१००६।।

सुयामुनः—७०७

सुयामुनो विष्णुरतर्क्यरूपः
क्षिणोति स्वस्मिन्निति कार्यजातम् ।
रात्रौ नरोऽशेषमथोपरत्य
सकारणं ज्ञानमनाश्च शेते ।।१०१०।।

भूतावासः—७०८

स विष्णुरेकः स्वधिया विभाव्य
जगत्प्रक्लृप्यात्मनि तन्निवास्य ।
निमित्तहेतुर्जगतोऽद्वितीयः
शेते समायो जगदीश आद्यः ।।१०११।।

नित्यो हि जीवः प्रकृतिश्च नित्या
संयोज्य शिल्पीव करोति देहान् ।
विचित्र वर्णाकृतिभिर्विभक्तान्
नमन्ति नम्राः कवयोऽत्र विष्णुम् ।।१०१२।।

कालं प्रसूतेरथ गर्भशय्यां
पृथक्पृथक्शोऽथ विधाय चायुः ।
आवासितं भूतमयं विधत्ते
जगत् समस्तं सविता मनस्वी ।।१०१३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वासुदेवः—७०६

स वासुदेवः सकलं वसानः
स वा निवासोऽस्ति च भूतयोन्याः।
स सर्वकस्मै च ददाति सर्वं
वस्त्वस्य यद्यत् समपेक्षितं स्यात् ॥१०१४॥
देवो हि दानात् स वरेण्य उक्तो
वासुर्हि वासं स ददाति यस्मात् ।
तं वासुदेवं प्रणमन्ति देवा
याचन्ति[1] तञ्चापि समीप्सितं स्वम् ॥१०१५॥
स वासुदेवो वसुदान[1] उक्तो
[2]वह्निर्हि वा विश्वमिदं समिध्य ।
करोति वासाय समग्रमेतद्
यथार्हमिष्टेन च संयुनक्ति ॥१०१६॥

सर्वासुनिलयः—७१०

सर्वासुनिलयः शम्भुः सर्वं कृत्वा जगद्वशे ।
सर्वाधारः स्वयं प्राणो जगतीं व्याप्य तिष्ठति ॥१०१७॥

अनलः—७११

मन्येऽनलं सर्वगतं हि विष्णुं
न तस्य शक्तिं ह्युपहन्तुमीशः ।
न कोऽपि वा भूषयिताऽस्ति तस्य
निमित्तभूतः स दधाति विश्वम् ॥१०१८॥

दर्पहा—७१२

स दर्पहा सर्वगतः स्वयम्भू-
र्दर्पं ददात्येव स विश्वकस्मै ।
दर्पं च हर्षं किमुताथ मोहं
स एव हन्तीति विनिश्चितं मे ॥१०१९॥

दर्पदः—७१३

विष्णुर्हि रूपेण युनक्ति विश्वं
सत्येन तञ्चाऽपि युनक्ति युक्त्या ।
न तं विना रूपमिहास्ति चन्द्रे
मन्ये न शुक्रे स हि दर्पदोऽतः ॥१०२०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अदृप्तः—दृप्तः—७१४

दृप्तः शम्भुरदृप्तो वा स्वभावं नातिवर्तते।
यथाबीजगुणं कृत्वा नियच्छन् विश्वमेजति।।१०२१।।

दुर्धरः—७१५

स दुर्धरो विष्णुरचिन्त्यरूपः
स्वात्मानुरूपञ्च जगद्विधाय ।
स्वं दुर्धरत्वं विविधं विचष्टे
तं दुर्धरं पूतधियो नमन्ति ।।१०२२।।

अपराजितः—७१६

परो न यस्यास्ति समो बलेन
रूपेण किं वा पर एव नास्ति ।
तस्माद्वदन्त्येव तमाप्तवेदा
विष्णुं न केनापि जितं कदाचित् ।।१०२३।।

विश्वमूर्तिः—७१७

स्थानं न तद् यत्र न वर्तते "यत्"[1]
तद्दर्शकं विस्मितवद् विधत्ते ।
विद्वान् सदा विश्वगतञ्च विष्णुं
निजात्मवत् पश्यति वीतशङ्कः ।।१०२४।।
शरीर आत्मा हि यथा ह्यदृश्यो
जीवो न केनापि दृशास्ति दृष्टः ।
तथापि निर्वक्तुमहंधिया तं
मर्त्यो यथाशक्ति वचांसि यौति[1] ।।१०२५।।

महामूर्तिः—७१८

यावान् हि यस्तस्य च तावती स्यात्
छाया महामूर्तिपदेन विष्णुम् ।
गायन्ति पश्यन्ति कथानकेषु
शृण्वन्ति तं चोपचरन्ति तज्ज्ञाः ।।१०२६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दीप्तमूर्तिः—७१६

मर्त्यो यथा गुह्यतमानि कर्तुं
गुप्तं प्रदेशं कुरुते प्रयत्नात् ।
विष्णुर्न तद्वत् स तु दीप्तमूर्तिः
सर्वत्र सर्वञ्च करोति दीप्रम् ॥१०२७॥

अमूर्तिमान्—७२०

नैवंविधैवास्ति च तस्य मूर्ति-
रित्थं विनिश्चेतुमिदं प्रवृत्तम् ।
अमूर्तिमान्नाम च तस्य विष्णोः
स एव सर्वत्र गतोऽस्त्यमूर्तः ॥१०२८॥

अनेकमूर्तिः—७२१

विश्वं हि विष्णुः परिगृह्य सर्वं
विभिद्य तत् तत्र च वर्तमानम् ।
एकं हि सन्तं बहुधा तमाप्ता
अनेकमूर्तिं परिभाव्य तस्थुः ॥१०२९॥

अव्यक्तः—७२२

अव्यक्तमाहुर्मुनयस्तमक्तं
व्यक्तं पुनस्तञ्च [1]विभक्तमाहुः ।
तथा यथा व्यक्ततमोऽत्र सूर्योऽ-
व्यक्तस्वरूपेण[2] जगद् बिभर्ति ॥१०३०॥

शतमूर्तिः—७२३

एको रसोऽर्कप्रभवः पृथिव्यां
विभिद्यते सोऽत्र च पाकभेदात् ।
यथा तथाऽयं परियातविश्वो[1]
विष्णुर्निजं[2] मूर्तिशतैर्व्यनक्ति ॥१०३१॥

शताननः—७२४

शताननो विष्णुरिहामुखो वा[1]
तथैव बोध्यं स सहस्रशीर्षा ।
मुखं सदेकं बहुरूपभक्तं
[2]त्वष्टारमाम्नाति ततं हि विश्वे ॥१०३२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यथा स विष्णुर्भुवनं जजान
तथा स विष्णुर्बहुधा बभूव ।
[1]दिव्यानिवाण्डाज्जलजांश्च सोऽण्डात्
धरेव योनीर्जनयत्यनेकाः ॥१०३३॥
अहं हि मन्ये महिमानमस्य
शताननस्यैकरसस्य कल्पात् ।
प्रक्लृप्य सर्वं स दधार सर्वं
तेभ्यो ददात्येव च भोजनानि[1] ॥१०३४॥

एकः—७२५

कः स विष्णुः सकलं विजन्य
पितेव तञ्चैति स [1]एकसंज्ञः ।
[2]वापो यथा याति च गर्भधिं स्वां
न चैककालेऽस्ति गतिर्द्वयोऽतः ॥१०३५॥

नैकः—७२६

विश्वं जनित्वा स विभुर्विशिष्टः
नैकं करोत्यात्मगुणानुरूपम् ।
समानपित्रोरपि जायमानः
पृथग् व्यनक्त्येव सहोदरात् स्वम् ॥१०३६॥

सवः—७२७

सवं हि देवस्य पुरातनस्य
गृणाति देवी किमु वाऽथ सर्वे ।
गृणन्ति देवाः किमु मित्रवर्गः
किं वार्यमा किं वरुणः सजोषा ॥१०३७॥
निश्चायिता ज्ञानविधिः स विष्णु-
र्विश्वं जनित्वा न करोति मोहम् ।
यतो ह्यमोघः स पुनर्मनस्वी
काव्यं जगत् सान्तमिदं करोति ॥१०३८॥
सर्वं हि वो व्याप्य जगत् समस्तं
तज्जीवयच्चेतनवद् विधत्ते ।
तस्मिन् हि वै प्रीतिमुपैति विश्वं
न तद्विना भाति मृतं वपु र्वा[1] ॥१०३६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कः—७२८

आभा शरीरे प्रबलं हि भाति
काख्येन जीवेन समर्ध्यते सा ।
तथैव विश्वं प्रपदं वसानः
कः कान्तिमद्विश्वमिदं विधत्ते ।।१०४०।।

किम्—७२६

विचित्रचित्रं यदिहास्ति विश्वे
दृश्यं तथा ज्ञानदृशा च गम्यम् ।
सर्वत्र तत्रास्ति स वर्तमानः
किं किं कुतो वेति च तत्र गुप्तः।।१०४१।।

यत्—७३०

यदस्ति विष्णुः स इहास्ति विश्वे
तस्मिन् ह तस्थुर्भुवनानि विश्वा ।
यदेव यस्मिन् हि पदस्थवाच्यं
तदेव तस्मिन् पदतोऽस्ति गम्यम्।।१०४२।।

तत्—७३१

ततं जगत्तेन ततं हि मन्ये
तस्मिन् ह तस्थुर्भुवनानि तद्वत् ।
गर्भो यथा मातरि गुप्त आस्ते
ततोऽस्ति माता तदिहास्ति विष्णुः।।१०४३।।

पदमनुत्तमम्—७३२

विश्वं हि सर्वं पदनीयमेकं
तस्य त्रिधा स्यूतमिहास्ति कर्म ।
यो वेत्ति सूत्रं किमु सूत्रसूत्रं
स [1]ब्राह्मणं वेद[2] महच्च विष्णुम्।।१०४४।।

लोकबन्धुः—७३३

स लोकबन्धुर्भगवान् मनस्वी
बध्नाति युक्त्या च ततं समस्तम्।
न तत्र रज्जुर्न च दृश्यमन्यत्
स केवलस्तत्र निगूढकर्मा ।।१०४५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकनाथः—७३४

नाथन्ति लोकास्तमु लोकनाथं
युनक्ति लोकान् पुनराशिषा सः।
तस्यैव भासाऽथ भिया च भीत-
स्तमेव लोकोऽत्र सदा प्रणौति ॥१०४६॥

माधवः—७३५

स माधवो विष्णुररं विधूय
यथायथं ज्ञानविभागभक्तम् ।
विश्वं विधायात्मनि गुप्तरूपं
प्रकाशते माधव एव सृप्तः ॥१०४७॥

भक्तवत्सलः—७३६

भक्तादिमद् वत्सलनामविष्णु-
र्भागं विधत्ते सकलस्य लोके ।
सस्नेहवाचञ्च ददाति तस्मै
तथा यथा वाचमुनत्ति[१] माता ॥१०४८॥

सुवर्णवर्णः—७३७

सुवर्णवर्णो भगवान् वरेण्यो
विष्णुः स्वयं राजति वर्णमात्रे ।
त्वष्टा जगत्त्वक्षति भिन्नरूपं
ग्रहाः निमित्तं [१]पृथुलोचनानाम् ॥१०४६॥

हेमाङ्गः—७३८

हेमाङ्गसंज्ञो भगवान् स विष्णु-
श्चन्द्रादिसर्वं गमयत्यजस्रम् ।
याता यथा स्वात्मपदं प्रपित्सु-
र्विवर्धते मार्गगतांशयातैः ॥१०५०॥

वराङ्गः—७३६

जनैर्वराङ्गोऽस्ति सदा वरेण्यो
विष्णुर्यथा जीवितदेहजीवः ।
जीवेऽपयातेऽस्यति तं नृसङ्गो
वरा गतिस्तञ्च यतो जहाति ॥१०५१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनोज्ञगात्रोऽथ मनोज्ञकर्मा
युवा युवत्या व्रियते मनुष्यः ।
तस्माद् वरो विष्णुसमो जगत्या-
माप्नोति पूजास्तुतिभोजनानि ।।१०५२।।

चन्दनाङ्गदी—७४०

यदत्र विश्वे गतिमत् प्रसन्नं
तत्तस्य तस्मिन्निति वा च बोध्यम्।
स सच्चिदानन्दमयोऽत्र विष्णुः
स्वशक्तिमद् विश्वमिदं विधत्ते ।।१०५३।।

वीरहा—७४१

स वीरहा विष्णुरिदं समस्तं
जगत् समृद्धं कुरुते जलेन ।
[1]इरासहायः स विहन्ति मेघान्
पर्जन्ययोनिर्जलमेव विश्वे ।।१०५४।।

विषमः—७४२

स विष्णुरेको विषमः पुराणः
करोति विश्वं विषमं स्वभावात् ।
तमान्विते ते विषमं प्रवृत्ते
सम्पद् विपच्चापि जगत् प्रसृप्ते।।१०५५।।

शून्यः—७४३

शून्यो हि विष्णुर्विदधाति खाक्तं
विश्वं स्वयं तत्र च लीयते सः ।
गर्भाशयः स्तत्रभवेऽस्ति शून्यः
शिशुञ्च शून्यं न जहाति शून्यम्।।१०५६।।

घृताशीः—७४४

विष्णुर्घृताशीः स्वगुणेन विश्वं
घृताशिषा युक्तमयं विधत्ते ।
सूर्यो घृताशीरनलो घृताशी-
वैंश्वानरोऽग्निश्च तथा घृताशीः।।१०५७।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अचलः—७४५

चलं हि सर्वं यदिहास्ति दृश्यं
स्वकञ्च धर्मन्न चलं जहाति ।
कर्ताऽचलो ह्यस्य यतः स विष्णु-
र्धीरोऽचलं तं प्र पदं हि नौति ॥१०५८॥

चलः—७४६

या विश्वमात्रे गतिरस्ति सक्ता
तदात्मभूतश्चलकर्मवायुः ।
वायुं चलं यः कुरुते मनस्वी
चलः स विष्णुः स्तुतिमेति [1]वातः॥१०५६॥

अमानी—७४७

अमानिविष्णुर्नहि [1]मानगोचरो-
ह्यमानिविष्णुर्नहि [2]मानगोचरः ।
अमानिविष्णुर्नहि मातुमर्ह्यते
नरेण कल्पान्तवयः समेयुषा ॥१०६०॥

मानदः—७४८

स मानदो मानशतानि दत्ते
द्यतीव वा मानशतानि विष्णुः ।
परस्परं मानमियर्त्ति सर्वं
परस्परं वा च [1]विकर्षतीति ॥१०६१॥

मान्यः—७४६

मान्यः स विष्णुर्भुवने शयानः
स मेधयाऽन्यान् कुरुते ह्यधस्तात्।
स्तुवन्ति साम्ना स्तुतिकर्मदक्षाः
तमेव चार्चन्ति च पूजनीयम् ॥१०६२॥

लोकस्वामी—७५०

स्वामी हि लोकस्य परात्परोऽसौ
स एव विष्णुर्वितनोति सर्वम् ।
तथा यथा [1]स्वात्मवशी शरीरं
स्वैश्वर्यमात्रेण करोति मान्यम् ॥१०६३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्रिलोकधृक्—७५१

त्रिलोकधृग् विश्वमिदं समस्तं
भवद् भविष्यत् किमु वापि भूतम् ।
स्वज्ञानमात्रे नियतं विधार्य
पात्रं यथापो निहितं बिभर्ति ॥१०६४॥

सुमेधाः—७५२

विष्णुः सुमेधाः स हि सत्यमेधा
व्यनक्ति विश्वं प्रपदं तमेव ।
तमेव देवं वरुणं तथाग्निं
प्रजापतिं वायुमथापि मत्वा ॥१०६५॥
मेधाभिलाषी निजदोषमृष्ट्यै
यथार्हमार्गञ्च गुरूपदेशात् ।
लब्ध्वा व्रतान्याकलयन् समेति
मेधां सुमेधामुत सत्यमेधाम् ॥१०६६॥

मेधजः—७५३

स मेधजो विष्णुरनेकनामा
मेधेषु यज्ञेषु विराजमानः ।
स्वकं स्वरूपं विविधं व्यनक्ति
तं मेधजं तत्त्वविदः स्तुवन्ति ॥१०६७॥

धन्यः—७५४

धन्यो हि सूर्यः स हि विष्णुरुक्तः
स स्तूयतेऽनन्तविभेदभक्तः ।
यदर्थकामोऽर्थयते तमर्थी
तथाविधार्थेन स तं पिपर्ति[1] ॥१०६८॥

सत्यमेधाः—७५५

स सत्यमेधा भगवान् वरेण्यः
सत्यः स विष्णुर्न जहाति धर्मम् ।
यथाविधं यद्रचितं हि पूर्वं
तथाविधं तद्रचयन् समेति ॥१०६९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अमोघ उक्तः स हि विश्वकर्मा
स सत्यधर्मा स च सत्ययोनिः ।
मेधापि तस्मात् कथितास्ति सत्या
तस्येति लोकेऽपि तथैव दृश्या ॥१०७०॥

धराधरः—७५६
धराधरो विष्णुरनेकशक्तिः
सर्वं जगद्धारयतीति मन्ये ।
तथा यथा भारवहं वपुश्च
जीवोऽविकारी धरते सहर्षम् ॥१०७१॥

तेजोवृषः—७५७
तेजोवृषो विष्णुरिदं प्रकल्प्य
करोति सर्वं स्वगुणानुरूपम् ।
तेजो जलं तेज इहास्ति वाग्निः
सूर्यो नरो वौषधिपश्च तद्वत्[1] ॥१०७२॥

द्युतिधरः—७५८
विष्णुर्हि लोकं स्वगुणानुरूपं
करोति चित्रं द्युतिमप्रमेयम् ।
तथा यथा देहगतो हि जीवो
वपुर्दधात्यात्मसमानदीप्रम् ॥१०७३॥

सर्वशस्त्रभृतांवरः—७५९
शस्त्रं जगत्यां यदिहास्ति दृश्यं
मूलं तु तस्यास्ति स एव विष्णुः ।
रक्षार्थमेवं व्यवहारसिद्ध्यै
स प्राणिनः शस्त्रभृतो विधत्ते ॥१०७४॥

प्रग्रहः—७६०
स प्रग्रहो विष्णुरनन्तभेदं
जगद् विरच्यापि [1]मनोऽनुबद्धम् ।
[2]असङ्गमात्रः स [3]मनोग्रहेण
प्रगृह्य विश्वं नयते [4]विदिक्षु ॥१०७५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

निग्रहः—७६१

स निग्रहो विष्णुरमोघवर्त्मा
निगृह्य विश्वं नयते यथावत् ।
सूते स [1]जन्यञ्च विहन्ति मर्त्यं[2]
सर्वं स्वतन्त्रं कुरुते निगृह्णन् ॥१०७६॥

व्यग्रः—७६२

व्यग्रः स विष्णुः स्वयमग्रधर्मा
व्यग्रञ्च विश्वं तनुते स सर्वम् ।
व्यग्रोऽस्ति जीवो निजलक्ष्यलब्ध्यै
सूर्यादयो व्यग्रतमाश्च तस्मात् ॥१०७७॥

नैकशृङ्गः—७६३

स नैकशृङ्गो भगवान् वरेण्यो
विष्णुः ससर्जाखिल भेदभिन्नम् ।
शृङ्गं सदेकं द्विविधं विभज्य
स हस्तशृङ्गं मनुजं करोति ॥१०७८॥
नखी तथा चैकशफी न शृङ्गी
दन्ती च वा सूकर एष लोके ।
शुण्डा करिण्यां थुहनं तथोष्ट्रे
विभक्तलीलं विधुनोति विश्वम् ॥१०७९॥

गदाग्रजः—७६४

गदाग्रजो विष्णुरनेकरूपः
प्रजाः सिसृक्षुः पुरुधा ससर्ज ।
वदत्सु वाणीमधिजायतेऽसौ
गच्छत्सु यातोऽस्ति च जातपूर्वः॥१०८०॥

चतुर्मूर्तिः—७६५

सोऽग्निश्चतुर्मूर्तिरचिन्त्यशक्तिः
स एव विष्णुः स उ वास्ति सूर्यः।
बध्नाति विश्वं ह्यभितोऽत उक्तो
विष्णुश्चतुर्बाहुरमोघवीर्यः ॥१०८१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सोऽग्निश्चतुर्व्यूहपदप्रसिद्धः
संव्यूह्य विश्वं गमयत्यजस्रम् ।
यथा शरीरी सकलं शरीरं
वृण्वान एत्यात्ममनोऽर्थ्यमाप्तुम् ।।१०८२।।
चतुर्गतिश्चापि स विष्णुरेको
गन्तुं चतस्रश्च दिशः करोति ।
एकः स्वयं सन् चतुरात्मभूतो
विष्णुर्हि विश्वं विभिनत्ति भेदैः ।।१०८३।।
पृथक् पृथग् योनिषु वर्तमानं
चतुष्कसंख्यासु विचित्रकासु ।
विष्णुश्चतुर्भावपदप्रसिद्धम्
त्रिधा विभज्याकलते च विश्वम्।।१०८४।।
स एवात्मगतं वेदं वेदञ्चापि यथार्थतः ।
चतुर्भेदसमापन्नं जानाति नात्रसंशयः ।।१०८५।।

एकपात्–७७२

विष्णुर्हि लोके स्वत एव सिद्धः
स्वकानि गन्तव्यपदानि याति ।
नापेक्षतेऽन्यं [1]मनुजोऽपि तद्वत्
[2]जीवात्मबन्धुः क्रमते [3]क्रियायाम्।।१०८६।।

समावर्त्तः–७७३

विभाति यस्मिन्नुदितो ह सूर्यो
व्यवस्थया वा पुनरेति यस्य ।
यो वा समावर्तयतीह चक्रं
विश्वस्य वन्द्यः स हि विष्णुरुक्तः ।।१०८७।।

निवत्तात्मा–७७४

विष्णुर्निवृत्तात्मपदेन सिद्धः
करोति विश्वञ्च निवर्तमानम् ।
प्रवर्तते यः स निवर्तते वा
तस्मात् स्मरन् तं प्रभुमात्मगूढम् ।।१०८८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्जयः—७७५

यो दुर्जयो यत्र च दुर्जयत्वं
तत्रास्ति विष्णुः स्वबलं दधानः ।
नरो हि योऽधीत्य जगत् जगत्यां
तनोति कृत्यानि स दुर्जयः स्यात् ।।१०८९।।

दुरतिक्रमः—७७६

अतिक्रमो दुःखमिहास्ति विष्णोः
तथा यथा राजविधानभङ्गः ।
दुःखाम्बुधौ सर्वजगन्निमज्जे-
दत्याक्रमेच्चेन्निजवर्त्म सूर्यः ।।१०९०।।

विष्णुर्हि मूलं सकलस्य लोके
जीवो हि मूलं वपुषो जगत्याम् ।
तथा हि मूलं सविता क्रियाया
अतिक्रमे दुःखमियात् समग्रम् ।।१०९१।।

दुर्लभः—७७७

स दुर्लभो विष्णुरनन्तरूपो
मृल्लोष्ठवल्लब्धुमिहास्त्यशक्यः ।
तं दुर्लभं विश्वसृजं सुधीरा
मन्यन्त आत्मानमिवात्मसंस्थम् ।।१०९२।।

दुर्गमः—७७८

स दुर्गमो विष्णुरनन्तकर्मा
विश्वं करोत्यात्मगुणानुरूपम्[1] ।
ऋतस्य दृश्यो महिमा विचित्र-
स्तत्कर्म दृष्ट्वापि गतिर्न तत्र ।।१०९३।।

सूर्यस्तथानन्तविकर्त्त एवं
वपुर्जहद् दुर्गम एव जीवः ।
न तद्गतौ मर्त्यगतिः कदाचित्
[1]सूर्यो गतिं स्वां स्वयमाह मर्त्यम् ।।१०९४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुर्गः—७७६

दुर्गः स विष्णुः कथितः पुराणैः
सूर्योऽपि दुर्गः कथितस्तथैव ।
दुर्गस्य कर्मापि न चाशुबोधं
गतिश्च दुर्गास्ति तथैव भानोः ॥१०६५॥
एवं हि यो वेत्ति स वेत्ति विश्वं
दुर्गं स विष्णुं किमु वाऽपि सूर्यम्।
वित्त्वा स्वकान्तःसुखमेत्यपूर्वं
विसंशयः स्तौति तमेव नित्यम् ॥१०६६॥

दुरावासः—७८०

दुरावासो वरेण्यो यः स विष्णुः सविता च सः ।
स ज्येष्ठः स च वा श्रेष्ठः, तं स्तुवन्ति नमन्ति च॥१०६७॥

दुरारिहा—७८१

दुरारिहा विष्णुरयोनिजन्मा
सर्वं जगत्यां सुलभं करोति ।
नरोऽपि तं चानुनयन् स्वभावे
हत्वा दुरारिं सुलभं [1]सदैति ॥१०६८॥

शुभाङ्गः—७८२

विष्णुः शुभाङ्गो ह्यभवत् सदाऽसौ
विष्णुर्यथापूर्वमकल्पयत्तम् ।
जीवः शुभाङ्गोऽङ्गति देहसक्तः
स मे शुभाङ्गोऽस्तु सदार्चनीयः ॥१०६६॥

लोकसारङ्गः—७८३

स लोकसारङ्गपदावबोध्यो
विष्णुः सनात् सारवदाप्तुमर्हः ।
सारं विगृह्णन् क्रमते च सूर्यः
स लोकते विश्वमनन्तशक्तिः ॥११००॥

सुतन्तुः—७८४

विष्णुः सुतन्तुः स तनोति रम्यं
विश्वं सुयज्ञं विततं महान्तम् ।
दिनोदयास्तैः प्रतिवस्तु रम्यं
सर्वत्र तन्तुं कुरुते विचित्रम् ॥११०१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सिरा मनुष्येषु च तन्तुवत्ता
लतासु तन्तुस्तु ततो विभाति ।
ग्रहेषु राशिर्मणिसूत्रवत् स्यात्
सुतन्तुरूपाः प्रवहन्ति नद्यः ॥११०२॥
एवं हि यो वेत्ति सुतन्तुमर्थ्यं
विष्णुं शयानं सकलेऽत्र तन्त्रे ।
स एव तं पश्यति सर्वदृष्टि-
र्न चक्षुषा पश्यति तं सुचक्षुः ॥११०३॥

तन्तुवर्धनः—७८५

विश्वं ततं तेन यतः स एव
तद्वर्धनः सर्वमिदञ्च वेत्ति ।
कुतः प्ररूढं क्व नु चान्तमस्य
स जन्मिनां वेद च [1]भूतभव्ये ॥११०४॥
एवं हि यो वेत्ति सनातनं तं
[1]सूर्यस्य कर्तारमपीह विष्णुम् ।
स एव सूत्रस्य च वेद सूत्रं
[2]यस्मिन् ह तस्थुर्भुवनानि विश्वा ॥११०५॥

इन्द्रकर्मा—७८६

स इन्द्रकर्मा भगवान् वरेण्यो
दाधार भूमिं स उ वा दिवञ्च ।
अजीजनच्चापि स सूर्यमग्र्यं
स वोषसं, तञ्च नमन्ति सर्वे ॥११०६॥

महाकर्मा—७८७

महाकर्मा स एवास्ति विष्णुरुक्तः [1]सनातनः ।
मनुष्योऽपि विदित्वा तं तादृशो भवति ध्रुवम् ॥११०७॥

कृतकर्मा—७८८

कृतं हि यत्तेन करोति तत्पुनः
स एव नान्यः क्षमते च तद्वत् ।
[1]सूर्यं कृतं दर्शयतीह भूयो
न नूतनस्तेन विसृज्यतेऽतः ॥११०८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृतागमः—७८९

कृतागमो विष्णुरनन्तबोधो
ज्ञानं जनेभ्यः प्रददत्र नित्यम् ।
कृतं पुरा यत् कुरुते तथा तद्
यथागमं स्वं कुरुते [१]खरांशुः ॥११०९॥

उद्भवः—७९०

स उद्भवो विष्णुरनन्तकर्मा
विश्वं सदोत्थाय करोति नूनम् ।
मर्त्योऽपि कर्माण्यनुसञ्चिकीर्षुः
करौ स्वकावुद्यमनाय युङ्क्ते ॥१११०॥

सुन्दरः—७९१

स सुन्दरो विष्णुरनन्तरूपो
योनीः समग्रा विविधं दृणाति ।
सुखात एवास्ति रथः सुखाय
योनिः प्रतीकास्ति रथं चिकीर्षोः ॥११११॥

सुन्दः—७९२

विष्णुर्हि सुन्दः स उनत्ति भूमिं
सूर्यो हि मूलं पयसः प्रपाते ।
मर्त्योऽपि लोके निजमर्थ्यमाप्तुं
तमेव गायन् करणान्युनत्ति ॥१११२॥

रत्ननाभः—७९३

स रत्ननाभो भगवान् वरेण्यो
लोके समुद्रे विदधाति रत्नम् ।
स रत्नयोनिः [१]स्त्रियमेकमात्रं
रत्नप्रसूत्यै कुरुते सुनाभिम् ॥१११३॥
एवं हि यो वेत्ति च रत्ननाभं
लोके ततं रत्नहञ्च विष्णुम् ।
स रत्नचक्षुः सकलं हि रत्नं
पश्यन् श्रिया नैव विमुच्यतेऽतः ॥१११४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुलोचनः—७६४

सुलोचनो विष्णुरिदं दधानः
करोति सूर्यञ्च सुलोचनं सः ।
जगत् प्रपश्यन्नुत दर्शयंश्च
सनातनो[1] याति यदाप्रमत्तः ॥१११५॥
मथ्नाति यो ज्ञानपयोधिमग्र्यं
वेदं, स वेद्यं लभते च वेदात् ।
वेदो यतो ज्ञानमयात् प्रसूत-
स्तस्मात् सदास्थं स दधाति वाच्यम् ॥१११६॥

अर्कः—७६५

अर्चन्ति यं सोऽर्क इहास्ति विष्णुः
सूर्योऽथवा सोऽग्निरुत प्रचेता ।
सदार्थिनो ह्यर्थ्यमभिस्तुवन्ति
प्रभुर्न तस्माद् 'घञ्' [1]अकर्तरीह ॥१११७॥

वाजसनः—७६६ (वाजसनिः—वैदिक—पाठः)

विष्णुर्हि वाजं सनतीति बोध्यं
सूर्यो वृषो वाजसनिश्च मर्त्यः ।
एवं हि यो वेत्ति स वेत्ति विश्वं
दाता भवन् वाजसनित्वमेति ॥१११८॥

शृङ्गी—७६७

शृङ्गं हि नूनं ज्वलतोऽस्ति नाम
ते वा मयूखा रविरस्ति तद्वान् ।
अग्निर्विभक्त्या विविधात्मयोगै-
र्जगत् स्वभावेन भिनत्ति तस्मात् ॥१११९॥

जयन्तः—७६८

विष्णुर्जयन्तो वशयत्यशेषं
सूर्योऽपि [1]तस्माद् वशयत्यजस्रम् ।
विश्वं तथा विश्वगतञ्च सर्वं
सूर्यो हि राजा जगतश्चरिष्णोः ॥११२०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं हि यो वेत्ति जयन्तमग्र्यं
विष्णुं स सर्वं जयतीति बोध्यम् ।
यस्यास्ति सव्ये भगवान् जयन्तः
किं शत्रवस्तस्य नरस्य कुर्युः ॥११२१॥

सर्वविज्जयी—७९९

स सर्ववित्पूर्वपदो जयीशो
विश्वं सनात् [१]सत्यमना यथावत् ।
व्यवस्थया न्यस्य तदन्तमित्वा
स्वाङ्कस्थवद्वेत्ति जिगीषुरेतत् ॥११२२॥

सुवर्णबिन्दुः—८००

सुवर्णबिन्दुः कथितो ह सूर्यः
खेऽनन्तपारे कणवद्विभान्तः ।
तथैव दृश्यास्त्वितरे ग्रहाश्च
खं ब्रह्म विष्णुः स बृहन्महत् सः ॥११२३॥

अक्षोभ्यः—८०१

विकाररूपं हि जगत् समस्तं
विष्णु सदाऽक्षोभ्य इहास्ति सर्गात् ।
क्षोभ्यः कथं सोऽत्र भवेद् विकारै-
स्तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥११२४॥

सर्ववागीश्वरेश्वरः—८०२

स सर्ववाक्पूर्वपदेश्वरो यो
विभाति विष्णुर्विततः पुराणः ।
अग्निर्हि वाचामधिदेवता सन्
सोऽग्निर्व्यनक्त्यात्मबलैः पृथक् ताः ॥११२५॥
एवं हि यो वेत्ति स वेत्ति वाचां
गुप्तं रहस्यं [१]करणस्य भेदात् ।
अग्नेः [२]समास्थापनभेदभेदाद्
[३]बलाबलं चापि [४]भिनत्ति वाचम् ॥११२६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

महाह्रदः—८०३

महाह्रदो विष्णुरमोघकर्मा
करोति सर्वं सुविचार्य विश्वम् ।
शुष्येद्धरेयं यदि नोदधिः स्यात्
कुक्षिर्न चेत् स्याद्वपुरत्र[1] शुष्येत् ॥११२७॥
महाह्रदो विष्णुरमोघकर्मा
करोति विश्वं बहुसाधनाप्तम् ।
महाह्रदं सोऽम्बुनिधिं विधत्ते
शुष्येन्न भूः सूर्यखरांशुपातैः ॥११२८॥

यथान्तरिक्षे निदधाति सोऽभ्रं
तथा शरीरे कुरुते च कुक्षिम् ।
स स्वोदरं वै कुरुतेऽन्तरिक्षं
शब्दोऽप्यतोऽव्यक्त इतोऽस्ति सृप्तः ॥११२९॥

महागर्तः—८०४

महागर्तो महाकाशो यत्रस्थो वीक्षते जगत् ।
सूर्यो यत्र च लीनो वा दृश्यते चक्षुषा तथा॥११३०॥
महागर्तं सनादाहुर्विष्णुं विश्वविभाविनम् ।
यस्मिन्नस्तोदयौ याति भ्रमन् [1]सूर्योऽपि नित्यशः॥११३१॥

महाभूतः—८०५

विष्णुर्महाभूत इहास्ति गीतः
स पञ्चभूतैः कुरुते महद्भिः ।
जगन्महत्तच्च चराचरं यत्
स्वयं महाभूतगुणे न लीनः ॥११३२॥

महानिधिः—८०६

महानिधिर्विष्णुरिहास्ति गीत-
स्तस्मिन् ह तस्थुर्भुवनानि विश्वा ।
यस्मिन्नृह तस्थुर्भुवनानि विश्वा
महान् स लोके महतां निधित्वात् ॥११३३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुमुदः—८०७

विष्णुर्हि लोके कुमुदः प्रसिद्धः
सोमोऽथवा सूर्य उतापि मर्त्यः ।
शब्दायमानो मुदमेति यस्मात्
तस्मात्तडिच्छब्दमुपैति चाभ्रे ॥११३४॥

कुन्दरः—८०८

स कुन्दरो विष्णुरहं ब्रुवाणो
दधाति कुन्दं पुरुरूपरत्नम् ।
स सर्वकस्मै च ददाति तत्तद्
यद्यच्च यस्यास्त्यभिवाञ्छनीयम् ॥११३५॥
स कुन्दरो नाम विदार्य भूमिं
स आत्मशक्त्या कुरुते समुद्रम् ।
स एव बुद्धिं जरितुर्विशोध्य
सुमेधसं तं कुरुते ह विष्णुः ॥११३६॥

कुन्दः—८०९

कुन्दो ह विष्णुः सविता ऋजीषः
स कोर्विशुद्ध्यै कुरुते च वृष्टिम् ।
स्तोतुश्च हृत्स्थं हरते स पापं
तमेव कुन्दं प्रणमन्ति [1]कुन्दम् ॥११३७॥

पर्जन्यः—८१०

पर्जन्यरूपो भगवान् ह विष्णुः
पर्जन्यरूपो भगवान् स सूर्यः ।
पर्जन्यरूपोदकवाहको वा
पर्जन्यनाम्ना स्तुतिमेति सर्वम् ॥११३८॥

पावनः—८११

स पावनो विष्णुरमर्त्यकर्मा
पुनाति विश्वं विविधप्रभेदैः ।
स एव सूर्ये स हि वास्ति वायौ
जले स्थले वा पविता स एव ॥११३९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनिलः—८१२

इलो न यस्यास्त्यनिलः स्वयं स[1]
स वास्ति सर्वेलकविश्वविष्टः ।
स्वयं समग्रं कुरुतेऽनिलं वो[2]
दिनाधिपो वैलयते समग्रम् ॥११४०॥

अमृताशः—८१३

स वामृताशो भगवान् वरेण्यः
सूर्योऽमृताशो जलमापिपासुः ।
अग्निर्घृताशः पवनो घृताश[1]-
स्तथामृताशीह जगच्च सर्वम् ॥११४१॥

अमृतवपुः—८१४

लोकेऽस्त्ति वन्द्योऽमृतवर्ष्म विष्णु-
र्वन्द्याश्च सर्वेऽमृतवर्ष्मवित्ताः ।
सनातनः सूर्य इह प्रसिद्धः
वपुश्च विष्णोरिदमस्ति विश्वम् ॥११४२॥

सर्वज्ञः—८१५

विष्णुर्हि सर्वज्ञ इहास्ति गीतो
विश्वस्य सर्वाणि वनानि[1] यानि।
तस्मिन् ह तिष्ठन्ति चलाचलानि
सर्वज्ञभावाय च कल्पते ना ॥११४३॥

सर्वतोमुखः—८१६

सर्वतो हि मुखं तस्य व्याप्तं द्यौरिह दृश्यते ।
तत्र यान्ति खगाः सर्वे मुखे जिह्वा चला यथा ॥११४४॥
गृहीतञ्च जगत्तेन, मुखे दन्तग्रहा यथा ।
न चलन्ति यथा स्थानाच्चलन्ति च यथेहितताः ॥११४५॥

सुलभः—८१७

विष्णुर्हि लोके सुलभः पुराणः
सूर्योदयो वा सुलभाः सनाथे ।
पुरोहितोऽग्निः सुलभश्च लोके
प्रार्थ्योऽस्ति मन्ये सुलभः स एकः॥११४६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुव्रतः—८१८

स सुव्रतो विष्णुरमोघशक्ति-
नियच्छतीदं सकलं व्रतेन ।
यद्भीषया चापि सदागतिर्वा
सूर्यो वशीवोदयमेत्यजस्रम् ॥११४७॥

सिद्धः—८१९

सिद्धः स विष्णुः कुरुते च सिद्धं
विश्वं सुपूर्णं नियमानुबद्धम् ।
यथोप्तबीजा पृथिवी तथैव
बीजोपजीव्यानि [1]समाप्तुमीर्ते ॥११४८॥

शत्रुजित्—८२०

स शत्रुजिद् विष्णुरनेकरूपो
निहन्ति वृत्रं स च मेघ उक्तः ।
विघ्नापहारं स ददाति शृङ्गं
गोभ्यो नखान् वा स नखिभ्य ईशः ॥११४९॥

एवं हि यः शत्रुजितं महान्तं
जानाति सर्वत्र गतञ्च विष्णुम् ।
स एव विघ्नान् परिहृत्य शेते
यथानृणी याति च गाढनिद्राम् ॥११५०॥

शत्रुतापनः—८२१

शत्रुतापन उक्तोऽसौ, विष्णुर्दर्भः सना [1]शुचिः ।
दर्भः सूर्यगुणो यस्माद् घर्मे दर्भो हि हृष्यति ॥११५१॥

न्यग्रोधः—८२२

न्यग्रोधनामा भगवान् ह विष्णु-
र्यथा स्थितं विश्वमिदं बिभर्ति ।
सूर्यो धृतस्तेन रुणद्धि विश्वं
न्यग्रोधवृक्षोऽपि रुणद्धि शाखाम् ॥११५२॥

न्यग्रोधवृक्षो बहुमूल एष
चिरं हि तिष्ठन्न्यग्रोहतीति ।
सन्दृश्यतेऽस्मान्न्यग्रोधमेनं
रुधेः समानं न्यग्रोधमाहुः ॥११५३॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उदुम्बरः—८२३

उदुम्बरो विष्णुरुदेति नित्यं
लोकस्य दृश्योऽस्ति न संशयोऽतः।
उषाः प्रसूनेन समास्ति तस्य
लोके च पुष्पाणि फलान्यतः स्युः ॥११५४॥

अश्वत्थः—८२४

अश्वत्थमाहुः कवयो ह विष्णु-
मश्वत्थमाहुः सुधियो हि सूर्यम् ।
अश्वत्थमाहुः सुनिरूढमूलं
वृक्षं तथा तां प्रकृतिं सुपर्णाम् ॥११५५॥
अश्वत्थमेनं विविधप्रकारं
विद्वान् हि यो वेत्ति विमुक्तशङ्कः ।
स एव तं विष्णुमथापि सूर्यं
वृक्षं त्वजां पश्यति सर्वयाताम् ॥११५६॥

चाणूरान्ध्रनिषूदनः—८२५

चाणूरान्ध्रनिषूदनः स भगवानिन्द्रोऽथवा स स्मृतः,
तं सूर्यं तमु वाग्निमुग्रयशसं तं वा सनाद् भास्करम्।
तं हंसं तमु वा सुपर्णमुरगं तं वा रथेष्ठं गुरुम्,
गायन्तीह विशुद्धचिन्तकवयो वेदेऽस्ति येषां गतिः ॥११५७॥

सहस्रार्चिः—८२६

मन्ये सहस्रार्चिरिहास्ति विष्णुः
सूर्योऽथवाग्निः स उ सर्वविष्टः ।
रूपैः स्वकैः स्वं पुरतो विधत्ते
विपश्चितोऽयं न तु मूढबुद्धेः ॥११५८॥
अतोऽस्ति गीतः स सहस्रमूर्तिः
स विश्वरूपोऽस्ति च नैकरूप ।
सहस्रशृङ्गः स सहस्रबाहुः
सहस्रपात् सोऽस्ति सहस्रशीर्षा ॥११५९॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं हि यो वेत्ति सहस्रदीप्तिं
स एव जानाति विभुं वरेण्यम् ।
तमेव देवाः शिरसा नमन्तो
यजन्ति मन्त्रैर्हविषा यथेष्टम् ॥११६०॥

विष्णुः सहस्रार्चिरनन्तरश्मिः
शिल्पी च तद्रश्मिमिह प्रगृह्य ।
विभिन्नयन्त्रेषु नियुज्य विश्वे
गन्धानिहाप्नोति ततो विभिन्नान् ॥११६१॥

सप्तजिह्वः—८२७

स सप्तजिह्वोऽग्निरसौ च सूर्यः
स एव विष्णुः स उ सप्तरश्मिः ।
सोऽग्निर्हि देवान् वहते हवींषि
तन्नामनुन्नानि यजद्भिरग्नौ ॥११६२॥

सप्तैधाः—८२८

सप्तैधाश्च स एवाग्निः सूर्यो विष्णुर्यमोऽर्यमा ।
सप्ताश्वः सप्तहोता वा सप्तास्यः स हि वा स्मृतः ॥११६३॥

सप्तवाहनः—८२९

सप्ताश्वविष्णुः स्वरथं प्रविष्टः
पश्यत्यशेषं स वपूंषि तक्षन् ।
यो वेद गात्रं स हि वेद वेदं
सप्ताश्वरश्मिः कथितः स सूर्यः ॥११६४॥

अमूर्तिः—८३०

अमूर्तिरग्निः स हि विश्वविद्वा
स एव होता स उ रत्नधामा ।
स एव सर्वत्र विभिन्नरूपः
स्वयं ह्यमूर्तिः कुरुते च मूर्तम् ॥११६५॥
आत्मा ह्यमूर्तिर्वहते च मूर्तं
गात्रं यथा नाम तथाभ्युपैति ।
विष्णुर्ह्यमूर्तिः सकलं च विश्वं
वहन् तथा नामभिरुच्यते सः ॥११६६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनघः—८३१

अघो हि दोषः स न तत्र भर्गे
ध्यायन्त्यतस्तं सवितारमुग्रम् ।
व्यपाययेन्नो दुरितानि देवो
यतोऽनघः 'सः' स हि विष्णुरस्मात् ।।११६७।।

अचिन्त्यः—८३२

अचिन्त्यमेवं मुनयस्तमाहु-
र्विष्णुं सुपर्णं कविमग्निमर्कम् ।
दाधार यो द्यां पृथिवीं दृढाञ्च
कश्चिन्तयन् तस्य लभेत पारम् ।।११६८।।

भयकृत्—८३३

विष्णुर्हि लोके भयकृत्[1] पुराणो
विष्णुर्हि लोके भयकृत्[2] पुराणः ।
भयं बलिष्ठात् स हरेच्च तेज-
स्तेजःक्षये कुप्यति वायुरूर्ध्वम् ।।११६९।।

भयनाशनः—८३४

भयं हि सर्वस्य हृदि स्थितं यत्
तन्नाशयत्येव स विष्णुरेकः ।
स विश्वतः पाति बलं प्रयच्छन्
जीवं सुदुःस्थञ्च विरूपसंस्थः[3] ।।११७०।।

अणुः—८३५; बृहत्—८३६

अणुर्हि विष्णुः स हि सर्वयातः
शब्दोऽपि रवस्थोऽस्ति च सर्वयातः ।
तडिच्च नूनं स्तनथुं विधत्ते
सूर्येरिताणुं विततं व्यनक्ति ।।११७१।।
बृहत् स विष्णुः स हि सर्वविष्टो
बृहत् स्वधर्मेण विधत्त एतत् ।
यो वेद सूत्रस्य च सूत्रभूतं
विष्णुं बृहद् वेत्ति जगत् स विज्ञः ।।११७२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कृशः—८३७

कृशो हि विष्णुः स तनूकरोति
तथा यथा तस्य सुखाय यत् स्यात्।
चतुष्प्रकारां स वितत्य सृष्टिं
तदन्तराविष्ट इहास्ति तष्टा ॥११७३॥

स्थूलः—८३८

स्थूलो हि विष्णुः स दधाति सर्वं
स्थूलञ्च सर्वं स्थितिमेति तस्मिन्।
यथास्ति खं सर्वगतञ्च तस्मिन्
सूर्यादयः स्पर्शमियन्त्यजस्रम् ॥११७४॥

गुणभृत्—८३९

विष्णुर्हि लोके गुणभृत् पुराणः
गुणैर्विभक्तं विषमस्वभावैः।
विश्वं मनो वा प्रतिजन्तुनिष्ठं
स्तुवन्ति तं भिन्नगुणानुबद्धाः ॥११७५॥

निर्गुणः—८४०

स निर्गुणो विष्णुरलिप्त एको
धामानि सर्वाणि च वेद गत्या।
गुणा न तं क्षोभयितुं समर्थाः
स वा गुणातीत इहास्ति सूर्यः ॥११७६॥

महान्—८४१

विष्णुर्महान् पूज्यतमश्च विष्णुः
सूर्यो महान् पूज्यतमश्च सूर्यः।
अग्निर्महान् पूज्यतमश्च सोऽग्निः
मनीषिणस्तञ्च तथा स्तुवन्ति ॥११७७॥

अधृतः—८४२

[1]खगोऽसहायो दिवमेत्यशङ्कः
[2]खगोऽसहायो दिवमेत्यशङ्कः।
यस्तक्षकस्तक्षति तं [3]सुपर्णं
स सर्वगो विष्णुरिहाधृतोऽस्ति ॥११७८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वधृतः—८४३

सूर्यो हि विश्वे स्वधृतस्तथायं
स्वयन्धृतः खे च खगो यथास्ति ।
खगे यथा शक्तिमयोऽस्ति जीवः
सर्वत्र विष्णुः स्वधृतस्तथास्ति ॥११७६॥

स्वास्यः—८४४

स्वास्यो विभुर्विश्वविभूतिशाली
दत्ते समस्मै च समां स आस्याम् ।
समानजातीयगणे स विष्ट्वा
स्वास्यः स्वयं स्वास्यमिह प्रणौति ॥११८०॥

प्राग्वंशः—८४५

प्राग्वंश उक्तः स हि विष्णुरेकः
सूर्यः स वा विष्णुरिलां दधानः ।
प्राची हि सा दिग् भुवनेऽस्ति रूढा
सूर्योदयो लग्नमियर्त्ति यत्र ॥११८१॥

कालो हि सूर्यो गणनापि चार्कात्
स्वेष्टञ्च सर्वत्र पृथक् पृथक् स्यात् ।
इष्टेन हीनो विफलस्तथा स्यात्
वन्ध्या सुसूषूः क्षयते यथायुः ॥११८२॥

वंशवर्धनः—८४६

विष्णुर्हि लोके वत वंशवर्धनो
गुप्तं स दृश्यं कुरुते च वर्धनः ।
हिरण्यगर्भः पतिरस्य तस्थुषो
व्यनक्ति तत्तद् यदु तस्य गर्भगम् ॥११८३॥

भारभृत्—८४७

स भारभृद् विश्वमसंख्यरूपं
बिभर्ति विष्णुः स हि भूरिभारः ।
नोत्सादमन्वेति न शीर्यते वा
सनात् सनाभिर्वहते ह चक्रम् ॥११६४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कथितः—८४८

विष्णुर्हि लोके कथितः पुराण-
स्तस्यान्तमाप्नोति न वाग् वचोभिः ।
तस्मात् सनादेव च वर्तमाना
वागस्ति वक्तुं प्रतिजन्तुनिष्ठा ॥११८५॥
विष्णुर्हि लोके कथितः पुराण-
स्तस्यान्तमाप्नोति न वेदवाणी ।
तस्मात् सनात् सा कथितं तदेव
वाग् यस्यतीहागमवस्तु वक्तुम् ॥११८६॥
यथास्ति शश्वन्निजशक्तिसिद्धो
विष्णुस्तथा खानि च शक्तिमन्ति ।
सिद्धानि सिद्धं गमयन्त्यजस्रं
जीवं सनात्तञ्च बुभुत्सुमन्तः ॥११८७॥

योगी—८४६

योगी स विष्णू रथयोगयुक्तो
योगी स विश्वं न वियौति मार्गात् ।
वपुस्तथैवास्ति च योगयुक्तं
सर्वायुरन्वेति च तद्धि जीवः ॥११८८॥

योगीशः—८५०

सर्वं हि मन्ये यदिहास्ति दृष्टं
योगेन युक्तञ्च विभाति तत्तत् ।
यस्तस्य बन्धुः स हि वात्र नाम्ना
योगीश उक्तः सविताथ विष्णुः ॥११८६॥

सर्वकामदः—८५१

स सर्वकामदो विष्णुर्यथाकामाभिसंस्तुतः ।
स्तोत्रे बुद्धिं प्रदायाशु, तं प्रीणात्यर्थकामिनम् ॥११६०॥

आश्रमः—८५२

स आश्रमो विष्णुरिहास्ति सिद्धः
श्रमस्य दायं विभजत्यवश्यम् ।
ते लब्धदायाः सुखिनः स्वयोनौ
दायं यथाकाममथो चरन्ति ॥११६१॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लोकेऽपि दायं श्रमजं मनुष्यो
ददाति मर्त्याय स वा पशुभ्यः ।
एवं हि नित्यं स गभस्तिमाली
रात्रिं करोत्याश्रमणाय नित्यम् ॥११६२॥

रात्रिः कफस्तत्र तमः स्वभावा-
न्निद्रास्ति वा श्लेष्मतमोऽनुसृष्टा ।
दिनं श्रमायास्ति निशाऽश्रमाय
दायो निशा तत्र दिनं श्रमश्च ॥११६३॥

श्रमणः—८५३

स एव विष्णुः श्रमणस्तपस्वी
श्रमेण दाधार दिवं धरां च ।
तपः श्रमो वास्त्युभयोः समानः
सन्तापयन् द्यां क्रमते रविश्च ॥११६४॥

क्षामः—८५४

क्षामोऽस्ति विष्णुः सकलाप्तविश्वो
विश्वञ्च वा क्षाममिहास्ति सर्वम् ।
वक्तुर्विवक्षावश एव सर्वं
स्थाल्यां पचाम्यापचते च [1]सैव ॥११६५॥

सुपर्णः—८५५

विष्णुः सुपर्णः स हि वास्तु सूर्यः
सोऽग्निः स वा मेघ उतास्तु पक्षी ।
तमेव मित्रं तमुवाच दिव्यं
तं वा गरुत्मन्तमुदाहरन्ति ॥११६६॥

वेदोऽस्ति काव्यं स हि शब्दरूपो
जगच्च काव्यं तदिहास्ति दृश्यम् ।
कर्ता द्वयोरस्ति सुपर्ण एकः
स एव वाच्यं वचनञ्च वेद ॥११६७॥

वायुवाहनः—८५६

वायुवाहन उक्तोऽसौ, लोके विष्णु रविश्च सः ।
शकुनिः स सुपर्णो वा, स वा वायुदलः स्मृतः ॥११६८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धनुर्धरः—८५७

''धनुर्धरो विष्णुरनन्तशक्ति-
धनुर्दधानो दिवमाविवेश ।
दृश्यं धनुः सूर्यकृतञ्च तस्य
नेत्रे धनुर्धारयतस्तथैव'' ॥११९९॥

धनुर्वेदः—८५८

धनुर्हि लब्ध्वा स दधाति सर्वं
गवादिकानां धनुरस्ति शृङ्गम् ।
सिंहादिहिंस्रस्य नखादिरूपं
धनुश्च मर्त्यस्य सुबुद्धिरत्र ॥१२००॥

दण्डः—८५९

दण्डः स विष्णुर्दमयत्यशेषं
यथाव्यवस्थं नयते पुरुत्रा ।
तमेव दण्डं प्रणमन्ति धीराः
सूर्यं तथा विष्णुमुरुप्रगाथम् ॥१२०१॥

दमयिता—८६०

विष्णुर्हि विश्वं स्ववशे विधत्ते
तृन्नन्त[1] एषोऽथ दमोऽथ दण्डः ।
विघ्नं विहन्तुं सबलोऽबलो वा
यथाबलं यस्यति[2] नौति[3] तं वा ॥१२०२॥

दमः—८६१

दमो हि सर्वत्र विराजमानः
क्रियासु सर्वं स नियम्य युङ्क्ते ।
तमेव विष्णुं दममत्र वै ग्रहा
नमन्ति सर्वे परिधौ भ्रमन्तः ॥१२०३॥

अपराजितः—८६२

विष्णुर्हि लोकेऽस्त्यपराजितः सखा
मनोऽपि लोकेऽस्त्यपराजितं सखा ।
सखापि लोकेऽस्त्यपराजितः सखा
सखाऽस्ति चात्मा यदि नापराजितः[1] ॥१२०४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वसहः—८६३

विष्णुर्हि सर्वं सहते पुरुत्रा
स एव गां वापि दिवं तथा च ।
स एव दाधार चरं स्थिरं वा
तस्मिन् ह तस्थुर्भुवनानि विश्वा ॥१२०५॥

नियन्ता—८६४

विष्णुर्नियन्ता स यमः प्रदिष्ट-
स्तेनैव यन्त्रा नियतं समस्तम् ।
सर्गात् स्वकक्षां क्रमते यथार्क-
स्तथा शरीरे हृदयं नियन्तृ ॥१२०६॥

नियमः—८६५

सर्वं निबद्धं नियमे हि विष्णौ
यथा शरीरेऽङ्गगणं निबद्धम् ।
तथा च विष्णौ क्रमते निबद्धं
स्तब्धं च विश्वं निखिलं हि तस्मिन् ॥१२०७॥

यमः—८६६

यमो नियन्ता स रविः स विष्णु-
र्व्याप्नोति विश्वं स्वमयूखभासा ।
तस्मिन् स्थितं विश्वमिदं विभाति
विष्णुं रविं वा प्रणमन्ति तस्मात् ॥१२०८॥

सत्त्ववान्—८६७

स सत्त्ववान् विष्णुरनन्तगर्भः
स्वसत्तया विश्वमिदं बिभर्ति ।
तथा यथा देहमिमं ह देही
देहो न तस्यान्तमियात् कदाचित् ॥१२०९॥

सात्त्विकः—८६८

स सात्त्विकः सत्यजवः स्वयम्भूः
सत्त्वेन युक्तं कुरुतेऽत्र विश्वम् ।
सत्त्वं स्वकञ्चार्हति दृश्यलोके
सत्त्वार्हमेतज्जगदस्ति सर्वम् ॥१२१०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सत्यः—८६९

सत्यः कविः काव्यमिदं चकार
दृश्यं सदालङ्कृतमेव तस्य ।
न तत्र मोहो न विकारभावो
द्रष्टा पुनर्मुह्यति नौति तञ्च ॥१२११॥

सत्यधर्मपरायणः—८७०

सऽयेनोत्तभिता भूमिः, सत्त्येनोत्तभिता च द्यौः।
विष्णुरस्ति स गेयो यः, सत्यधर्मपरायणः ॥१२१२॥

अभिप्रायः—८७१

अभिप्रायः स सूर्योऽस्ति विष्णुर्वा स विभुः कविः ।
नानारूपधरं मर्त्या अभिप्रायं नमन्ति तम् ॥१२१३॥

प्रियार्हः—८७२

विष्णुः प्रियार्हः स जगत्प्रसिद्धः
प्रियाणि धामानि स चैति नित्यम् ।
प्रियं प्रियार्हाय जनो ददाति
प्रियं स लब्ध्वा मनुते स्वपूजाम् ॥१२१४॥

अर्हः—८७३

अर्होऽस्ति विष्णुर्बहुधा विभक्तः
सर्वं करोत्यात्मगुणेन युक्तम् ।
अर्होऽस्ति सः[1] सर्वमिहास्ति चार्ह्यं
परस्परं लोकसृतस्तथार्हः ॥१२१५॥

प्रियकृत्—८७४

विष्णुर्हि लोके प्रियकृत् पुरुत्रा
प्रियं करोत्येव समस्तजन्तोः ।
स्तोतारमप्येष करोति युक्तं
यष्टीहया वा च हविः प्रणुन्नम् ॥१२१६॥

प्रीतिवर्धनः—८७५

प्रीतिवर्धन उक्तोऽसौ, विष्णुः सूर्योऽग्निरर्यमा ।
तं स्तुवन्ति बृहद्वाग्भिर्यथा वाञ्छाप्तिलिप्सवः ॥१२१७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विहायसगतिः—८७६

विहायसगतिर्विष्णुः, सूर्यो विश्वमनाः कविः ।
गतिं ददाति सर्वस्मै, यथाखं यस्य युज्यते ॥१२१८॥
तस्यानुकरणं लोके, वीनां खेऽव्याहता गतिः ।
विमानानि च मार्त्यानि, यान्त्यायान्ति विहायसे॥१२१९॥
विहायसगतिं विष्णुं, यः स्तौति ज्ञानचक्षुषा ।
स शक्नोति गतिं कर्तुं, प्राणायामपरायणः ॥१२२०॥

ज्योतिः—८७७

ज्योतिर्हि विष्णुः स च सर्वविष्टः
सूर्यादिकेष्वात्मततिं विचष्टे ।
तस्योपजीव्येष्वपि तस्य दीप्ति-
श्चक्षुर्यथा पश्यति दृश्यमात्रम् ॥१२२१॥
सूर्यो हि वा ज्योतिरसौ च वह्निः
सूर्यं यमं चाहुरमेयमिन्द्रम् ।
छाया यथा च्छायिनमेव याति
तथैव सर्वत्र विभज्य चोह्यम् ॥१२२२॥

सुरुचिः—८७८

यद्यद् विशुद्धं सुरुचीति बोध्यं
तद्विष्णुसूर्येन्दुकृतञ्च सर्वम् ।
व्याप्नोति सर्वं सुरुचिर्हि विष्णुः
सूर्योऽपि तस्मात् सुरुचिश्च चन्द्रः ॥१२२३॥

हुतभुक्—८७९

विष्णुर्हि लोके हुतभुक् प्रसिद्धः
सोऽग्निः स वा यज्ञसमिद्धतेजाः ।
वैश्वानरो वास्ति स वास्ति सूर्यो
दावानलो वा स हि वाडवो वा ॥१२२४॥

विभुः—८८०

विभुर्हि विष्णुः स च वापि सूर्यः
कविः स वाग्निः प्रथमः स वोषाः ।
स एव सर्वत्र विभुः प्रसृप्तः
स भाति विश्वे विबभूव चैकः ॥१२२५॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

रविः—८८१

रविर्हि विष्णू रविरस्ति सूर्यः
सोऽग्निः स वा सर्वगतः स मूलम्।
विश्वस्य शब्दस्य च जन्तुमात्रे
वायूत्थसंघर्षणजस्य चापि ।।१२२६।।

विरोचनः—८८२

विरोचते विश्वमिदं समस्तं
विरोचमानेन विभिन्नरूपैः ।
बिभ्रच्च नामानि परश्शतानि
विष्णू रविश्चात्र विभात एवम् ।।१२२७।।

सूर्यः—८८३

सूर्यः सृषूभ्यां क्यपि चास्ति सिद्ध-
स्तस्य क्रियाभिश्च जगत्समाप्तम्।
विशेषणं सूर्यनिमित्तकं यत्
तत् स्वार्थवद्[1] विश्वमिदं विधत्ते।।१२२८।।

सविता—८८४

सर्वं जगत्तस्य यदस्ति राधो
विभक्तरूपं सविता प्रसूते ।
प्रसूत एषोऽप्युषसः स्वयञ्च
सुवर्णविन्दोरिव दृश्यमानः ।।१२२६।।

रविलोचनः—८८५

लोकेऽस्ति विष्णू रविलोचनाख्यः
स लोचते विश्वमतोऽर्कनेत्रः ।
ज्येष्ठं ब्रुवन्तीह सनातनं तं
विज्ञा नमन्त्यत्र सहस्रकृत्वः ।।१२३०।।

अनन्तः—८८६

अनन्तनामा भगवान् स विष्णुः
करोत्यनन्ताध्वविवर्ति विश्वम् ।
नरश्च नान्तं लभते हि तस्य
सूर्यादयोऽतन्ति सदात्मपारे[1] ।।१२३१।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हुतभुक्—८८७

लोकेऽस्ति विष्णुर्हुतभुक् प्रसिद्धः
सूर्योऽग्निरापः पृथिवी मरुच्च ।
स्तोत्रा प्रदत्तानि हवींषि सद्यो
भोक्तृस्वरूपे परियन्ति तानि ॥१२३२॥

यस्यास्ति या या स्तुतिमार्गरूढा
वाञ्छा स तां तां मनुजस्य भुङ्क्ते।
वाञ्छानुरूपञ्च फलं प्रदातुं
ददाति तस्मै धिषणां च सत्याम् ॥१२३३॥

मर्त्योऽपि तद्वद्धुतभुग्भविष्णु-
र्ददाति वाञ्छ्यानि यथेप्सितानि ।
स्वशक्तिगर्भाणि च सर्वकस्मै
दातार[1] मग्र्यं प्रपदं नमस्यन् ॥१२३४॥

भोक्ता—८८८

भोक्तास्ति विष्णुर्हुतभुक् स एव
यथाभिलाषं हुतमस्ति यद्यत् ।
तत्तत् स भुङ्क्ते विविधस्वरूपः[1]
नाम्नां[2] शतैश्चात्र स एव गीतः ॥१२३५॥

सुखदः—८८९

विष्णुर्हि लोके सुखदः प्रसिद्ध
इन्द्रोऽथ वज्री वृषभः स एव ।
स एव लोकाय जलं ददाति
समुद्रवृष्टिस्रवणैर्यथर्तु ॥१२३६॥

सुखं शरीरेऽस्ति चितं[1] समग्रं
रथं शरीरं सुषिरं कृतं तत् ।
कर्मानुरूपं जनुषे[2] पृथक्शो
ददाति मन्ये सुखदोऽस्ति विष्णुः ॥१२३७॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नैकजः—८६०

स नैकजो विष्णुरिहास्ति सूर्यो
नवो नवो चन्द्रमसा सहैति ।
शिशू अमू क्रीडनतत्परौ तौ
स्वतेजसा विश्वमिदंविभातः ॥१२३८॥

अग्रजः—८६१

सूर्योऽग्रजो दृश्यदृशास्ति दृश्ये
ज्येष्ठः स वा लोकवचःप्रसिद्धः ।
आत्मा पृथक् पूर्वभवः शरीरात्
स जायते वा म्रियते न कर्हि ॥१२३९॥

अनिर्विण्णः—८६२

अनिर्विण्णः स एवास्ति, विष्णुः सूर्यः स्वयम्प्रभुः।
स्त्रोतांसि च स्त्रवन्त्येव, जगच्चातो विचारवत्[1] ॥१२४०॥

सदामर्षी—८६३

सदामर्षी स एवास्ति, विष्णुः सूर्यः सनातनः ।
तद्गुणञ्च जगत् सर्वं, सदामर्षि वपुर्यथा ॥१२४१॥

लोकाधिष्ठानम्—८६४

लोकाधिष्ठानमस्त्यर्को, विष्णुर्ब्रह्मादिनामधृत् ।
सति तस्मिन् स्थितं सर्वं, जीवे वर्ष्म[1] स्थितं यथा॥१२४२॥

अद्भुतः—८६५

सूर्योऽद्भुतः शाश्वतिकोऽथ विष्णुः
सदास्तिमानक्षिपथन्न याति ।
यथा जनः सन्नपि नैव दृश्यो[1]
लब्धान्तरश्चास्ति तथात्र सूर्यः[2] ॥१२४३॥

सनात्—८६६

सनात् स सूर्यः स युवा स इन्द्रः
स वास्तु विष्णुः स सखा स उग्रः ।
स एव शूरः स महाननीडः
सनात्तथात्मास्ति जगत् सनाच्च ॥१२४४॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सनातनतमः—८६७

सनातनो विष्णुरुतापि सूर्यः
सनाद्दिनं नक्तमुषाः सनाच्च ।
सनाभवं जन्म जरा मृतिश्च
सनादयं याति जगत् प्रपश्यन् ॥१२४५॥

कपिलः—८६८

सूर्यो हि लोके कपिलः प्रजातः
सोऽब्दान् विधत्ते कपिलान् स्वगोभिः।
तथा यथा पिङ्गलकेशमूर्धा
बालो विभात्यत्र शिरोरुहैः स्वैः ॥१२४६॥

कपिः—८६६

कपिर्हि सूर्यो रसहृत् स वास्ति
लोके तृषार्तो रसमाजिहीते[1] ।
उक्थः स्तुतिर्हृष्टमनास्तया सन्
कपिर्मनो वापि च हर्षमेति ॥१२४७॥

अप्ययः—६००

यस्माज्जनुर्यस्य लयोऽपि तत्र
मृदो घटोऽसौ मृदि लीयते वा ।
सूर्यात् प्रसूतिः प्रलयश्च सूर्ये
विष्णोः समस्तं, तमुपैति चान्ते ॥१२४८॥
स स्वस्तिदः स्वस्तिकृदत्र नः स्यात्,
स स्वस्तिभुक् स्वस्तिपदाभिधानः ।
स स्वस्तिमद्दक्षिण एव नः स्यात्
स्वस्तिश्च भूयः परिपातु चास्मान् ॥१२४६॥

अरौद्रः—६०६

अरौद्र इत्येव मनो निधाय
यः स्तौति तं शम्भुमनन्तरूपम् ।
तस्मै ददातीह स भोजनानि
वसूनि काम्यानि च सर्वकाणि ॥१२५०॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुण्डली—६०७

स कुण्डली सूर्य इहास्ति बोध्य-
स्तस्यौजसा पाकमुपैति सर्वम् ।
स कुण्डली कुण्डलमेति तद्व-
-नेत्रञ्च तद्दैवतकं यतस्तत् ॥१२५१॥

चक्री—६०८

विष्णुर्ह चक्री स उ वास्ति सूर्यो
विश्वञ्च चक्रे भ्रमतीव तस्य ।
यो दण्डभूतः स च[1] चक्रभूतः
पश्यन्ति विज्ञा न तु तं विमूढाः॥१२५२॥

विक्रमी—६०६

स विक्रमी विष्णुरुतास्ति सूर्यः
सर्वञ्च तस्मिन् क्रमते सनाच्च ।
स विक्रमं स्वं वितरन् समग्रे
सर्वं करोत्यात्मगुणेन तुल्यम्[1] ॥१२५३॥

ऊर्जितशासनः—६१०

स विष्णुरेवोर्जितशासनोऽस्ति
स शासदूर्जां नियतां विधत्ते ।
जले स्थले यच्च पदार्थजातं
सर्वं बलं यच्छति भुक्तमात्रम्[1] ॥१२५४॥

शब्दातिगः—६११

शब्दातिगः शब्दविलेपहीनः
सर्वं विलङ्घ्याक्रमतेऽथ विष्णुः ।
जन्तुर्यथा स्वार्थवशं हवींषि
जुहोति लब्धुं निजवाञ्छितानि ॥१२५५॥

शब्दसहः—६१२

लोकेऽस्ति कः शब्दसहः प्रसिद्धः
सूर्योऽथ विष्णुस्तदुपासको वा ।
क्षमा विभूषा सकलस्य लोके
सर्वं क्षमावान् सहते क्षमायाम् ॥१२५६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शिशिरः—६१३

गत्या हि सूर्यो निजया पृथक्शो
जगत्यृतूनां कुरुते बहुत्वम् ।
स सूर्य आत्मा सकलस्य लोके
तन्नामभिर्गायति तत्त्ववित्तम् ॥१२५७॥

शर्वरीकरः—६१४

ज्योतिर्हि सूर्यस्तमसः परस्ताद्
भूगोलविक्षेपवशाद् विधत्ते ।
दिनं च रात्रिः परिवर्तमाने
तमः प्रकाशौ च सदैकरूपौ ॥१२५८॥

अक्रूरः—६१५

अक्रूरमेतत् सकलं हि दृश्यं
क्रूरं भवेत् कर्मवशेन सर्वम् ।
लोको यथाकामवशं ब्रवीति
क्रूरेण दैवेन विनाशितोऽसौ[1] ॥१२५९॥

पेशलः—६१६

सर्वं हि लोके यदिहास्ति दृश्यं
तच्छोभते खण्डकृतैकरूपम् ।
यथा वपुः पेशलमत्र दृश्यं
परन्तु तत् खण्डशतैर्निबद्धम् ॥१२६०॥

तथैव कालः क्षणवृद्धिवृद्धः
क्षयाय विश्वस्य सदोपयाति ।
तं पेशलं सत्यधियोऽनुयोगान्
नयन्ति पुण्यैर्विनमन्ति सूर्यम् ॥१२६१॥

दक्षः—६१७

दक्षो हि सूर्यः स हि वास्ति सोमः
सोमो हि विष्णुर्हृदि सन्निविष्टः ।
स एव राजा वरुणः स एव
स ज्योतिषा विश्वतमोऽपहन्ति ॥१२६२॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दक्षिणः—६१८

स दक्षिणः सूर्य इहास्ति वाच्यः
स एव चाप्युत्तरतोऽभियाति ।
तस्य प्रतीकौ च करौ[1] प्रसिद्धौ
यद्वास्ति सर्वं द्विविभक्तमत्र ॥१२६३॥

क्षमिणां वरः—६१९

सर्वं क्षमावत् स्वपरानुरक्तं
स सूर्य एकः क्षमिणां वरः सन्।
दाधार यो द्यां पृथिवीमुत स्वस्
तस्मै च मे स्यान्नम उक्तिरद्य ॥१२६४॥

विद्वत्तमः—६२०

विद्वत्तमो विष्णुरथाऽस्ति सूर्यो
धामानि सर्वाणि च वेद सर्गात् ।
विद्वत्तमोऽतो न तथा मनुष्यो
विद्वत्तमं तञ्च गृणन्ति वेदाः ॥१२६५॥

वीतभयः—६२१

भयं बलिष्ठादिति विश्वसिद्ध—
मोजिष्ठ इन्द्रः स कुतो बिभीयात्।
तस्मादसौ वीतभयः प्रदिष्टः
स एव सूर्यः स हि विष्णुरिन्द्रः॥१२६६॥

पुण्यश्रवणकीर्तनः—६२२

यस्यास्ति नाम्नां श्रवणं पवित्रं
सङ्कीर्तनं चाप्यमलं हि तस्य ।
सोऽनन्तनामा भगवान् हि विष्णुः
स्वनामभिर्विश्वमिदं पुनाति ॥१२६७॥

उत्तारणः—६२३

उत्तारणो विष्णुरिहास्ति सिद्धो
योंऽहांसि हन्तुं धिषणां ददाति ।
ध्यात्रे, स शुद्धो लभतेऽप्रमेयं
यशः सुखं जन्म च पुण्यवर्गे ॥१२६८॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दुष्कृतिहा—६२४

लोके दुष्कृतिहा विष्णुर्हृद्देशमधितिष्ठति ।
दुष्कृतं बाधकं कर्तुः, स्वयमेव भवेदिह ।।१२६६।।

पुण्यः—६२५

पुण्योऽस्ति विष्णुः कुरुते पवित्रं
सूर्यं ह्यतोऽसौ तमसः परस्तात् ।
तस्मिन् पवित्रे सकलं पवित्रं
खं वायुरापः पृथिवी तथाग्निः ।।१२७०।।

दुःस्वप्ननाशनः—६२६

वैश्वानरोऽग्निः सुसमिद्धदीप्रो
विभज्य भोज्यं परिपच्य दोषान् ।
दुःस्वप्ननाशं कुरुते हि नूनं
वैश्वानरोऽग्निः सविता स इन्द्रः ।।१२७१।।

वीरहा—६२७

स वीरहा विष्णुरुतापि सूर्यो
वीरेभिरश्वैः[1] सकलोपयातः ।
गतिञ्च लब्ध्वा तत एव सर्वं
यथेरितं याति विचित्रगत्या ।।१२७२।।

रक्षणः—६२८

स रक्षणोऽग्निः सविता स विष्णुः
स वार्यमा विश्वभवांश्च बिभ्रत् ।
खं वायुरापः पृथिवी मरुच्च
रक्षन्ति धर्मेण च रक्षणस्य ।।१२७३।।

सन्तः—६२९

सन्तो हि विष्णुः स हि सन्तनोति
बुधो यथा सम्यगवाप्तवाक्यम् ।
तस्मिन् तते विश्वमिदं ततं सत्
तमेव सन्तं परितोऽभ्युपैति ।।१२७४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जीवनः—६३०

स जीवनो विष्णुरुतापि सूर्यो
विभावरी वा बृहता रथेन ।
सा जीवनं प्राणवतो ह विश्वे
तस्यां सुखं कामवशं[1] लषन्ति[2] ।।१२७५।।

पर्यवस्थितः—६३१

तं पर्यवस्थितं मन्ये, विष्णुं सूर्यं कविं सनात् ।
द्यवि स्थले जले वापि, तमूर्ध्वाधः परिष्ठितम् ।।१२७६।।

अनन्तरूपः—६३२

सोऽनन्तरूपो भगवान् वरेण्यो
रूपाणि कुर्वन् प्रतिरूपरूप्यः ।
निजं स्वरूपं प्रतिजन्मगुप्तं
कृत्वा जगद्धारयते ह्यतर्क्यम् ।।१२७७।।

अनन्तश्रीः—६३३

यदेकदा यद्रचितञ्च विष्णुना
तथाविधं तच्छ्रियया च भासते ।
अनन्तताऽतो भुवने श्रियो मता
यद्यस्ति तद्वान् स उ वास्ति तद्विधः ।।१२७८।।

जितमन्युः—६३४

अहेडमानो वरुणो ह विश्वं
श्रेयस्करे वर्त्मनि वर्तनाय ।
कामानुरूपं प्रददाति वाञ्छ्यं
जनाय तस्मै य उ ते जुहोति ।।१२७९।।

भयावहः—६३५

भयं न मे स्यादिति कामयन्ते
देवा मनुष्याः किमुतान्यजीवाः ।
भयावहस्तानभयान् विधत्ते
यतो यतो गन्तुमनाश्च यः स्यात् ।।१२८०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चतुरश्रः—६३६

स विष्णुरेकश्चतुरश्र उक्तः
स एव सूर्यः स हि वास्ति दाता ।
यदर्थकामी हविषा च सम्यग्
जुहोति तस्मै स ददाति काम्यम् ।।१२८१।।
सर्वे ग्रहा वैष्णवशक्तिमन्तः
स्तुत्यास्तथैवेति च धार्यमत्र ।
नक्षत्रमप्येति तथैव चार्चां
स्वदेवतायाः स्तवनेन लोके ।।१२८२।।

गभीरात्मा—६३७

गभीरात्मा स सूर्योऽस्ति, सर्वञ्च गमयत्यसौ।
अचलं दृश्यमानं यन्मृत्युस्तदपि चालयेत् ।।१२८३।।

विदिशः—६३८

लोकेऽस्ति सिद्धो विदिशः स विष्णुः
स्थानं न तद्यत्र न सोऽस्ति सृप्तः।
दिशः समग्राः श्रवणाच्च तस्य
प्रकाशमीयुर्विदिशोऽस्त्यतः सः ।।१२८४।।

व्यादिशः—६३६

स व्यादिशो विष्णुरदभ्रदाता
तं वापि सर्वे नम आदिशन्ति ।
तदात्मतां याति हुतञ्च सर्वं
स सर्वकस्मै च ददाति देयम् ।।१२८५।।

दिशः—६४०

दिशो हि विष्णुः सकलाय सर्वं
यथेष्टभोगाय ददाति नित्यम् ।
सूर्याय यो द्यां च खगाय पक्षौ
घासञ्च गोभ्यो मनुजाय मेधाम् ।।१२८६।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनादिः—६४१

संयोगजं विश्वमिदं समस्तं
य: संयुनक्त्यात्मभवः पृथक् सः।
सोऽनादिरुक्तः कविभिः पुराणै-
र्विष्णुं विना नान्यदिहास्ति किञ्चित्।।१२८७।।

भूर्भुवः—६४२

स भूर्भुवः सत्यमनन्तरूपो
विष्णुर्हि विश्वं कुरुतेऽन्तवच्च ।
तस्मिन् हि तस्थुर्भुवनानि विश्वा
स्तभ्नाति तन्नैव परान्यशक्तिः ।।१२८८।।

लक्ष्मीः—६४३

लक्ष्मीर्हि विष्णुः स हि वास्ति सूर्यः
स दृश्यते सर्वजनैः पृथक्शः ।
पश्यंश्च लोकान् दिनरात्रिभागान्
दिव्यङ्क्यन् याति रथेन देवः ।।१२८९।।

सुवीरः—६४४

सुवीरः कथितो विष्णुः, सूर्यो वास्ति सनातनः।
विविधा हि गतिर्लोके, सूर्यमूला विनानृजुम्[1] ।।१२९०।।

रुचिराङ्गदः—६४५

विष्णुर्हि लोके रुचिराङ्गदोऽस्ति
सूर्योऽथवा विश्वसृडस्ति वेत्ता ।
कस्मै शरीराय कथंविधं वा
दत्तं सुखायास्तु तदङ्गमङ्गम् ।।१२९१।।

जननः—६४६

स बन्धुरुक्तो जननो हि विष्णुः
सूर्यः स जज्ञे सवितारमग्र्यम् ।
विष्णुः पुनर्बीजमिवात्मशक्त्या
[1]वशासहायः प्रकरोति विश्वम् ।।१२९२।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जनजन्मादिः—६४७

अग्निर्हि विष्णुः स हि वास्ति सूर्यो
यज्ञः स वा सर्वजनस्य चादिः ।
तस्मात् स विष्णुः सकलं प्रपश्यन्
पुंस्त्रीस्वरूपेण विभाति जन्ये ॥१२६३॥

भीमः—६४८

भीमो हि विष्णुः स हि वास्ति सूर्यः
सूर्यात्तमो याति परात् परस्तात् ।
यथा विवाहाज्जरठेन[1] बाला
तथा हि सर्वं भयते च भीमात् ॥१२६४॥

भीमपराक्रमः—६४६

विष्णुर्भीमपराक्रमः स भगवान् सर्वानधस्तान्नयेत्
यस्मिन् तस्य महाबलस्य कणशो भूयो बलं वा भवेत्।
मर्त्यो भीमपराक्रमोऽपि न पुनर्जीवेदसद्विक्रमः
विष्णुः स्वेन पराक्रमेण सहते विश्वं भिया योजयन्[1] ॥१२६५॥
तथा यथा स्वात्मबलेन हीनो
राज्ञाप्तशक्तिर्भयदो नरः स्यात् ।
तस्माज्जना बिभ्यति दुर्बलाङ्गाद्
राज्ञो भयं तत्र यतोऽस्ति विष्टम् ॥१२६६॥
यदा स राजा हरते बलं स्वं
तदा मनुष्यः स भवेत् पुरावत् ।
पराक्रमस्तस्य ततोऽपयाति
विष्णुर्हि राजा स बलं क्षिणोति ॥१२६७॥

आधारनिलयः—६५०

आधारनिलयो विष्णुस्तस्मिन्त्सर्वं समाश्रितम् ।
स्वाधारं हि यथा व्योम, तथा सः[1] स्वयमाश्रितः॥१२६८॥

धाता—६५१

धाताऽथ धर्ता स हि विष्णुरेको
धाताऽथ पाता स पपान[1] उक्तः ।
अधातृको वा स कपिः स्वयम्भूः
[1]पपिः स एवास्त्यथवाप्यधाता ॥१२६६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुष्पहासः—६५२

स पुष्पहासो भगवान् वरेण्यः
स पुष्पहासोपमितं विधत्ते ।
विश्वं मनोहारि विराजितान्तः
स्वपुष्पहासत्वगुणं वितन्वन्[1] ॥१३००॥

प्रजागरः—६५३

प्रजागरो विष्णुरहस्करो वा
प्राणाः खमग्निर्मरुदाप आत्मा ।
मनश्च जागर्ति सदा च तस्मिन्
प्रजागरे विश्वमिदं समाप्यम्[1] ॥१३०१॥

ऊर्ध्वगः—६५४

स ऊर्ध्वगो विष्णुरनन्तलोकान्
पश्यन् सदा याति दिवं वसानः ।
ऊर्ध्वं प्रकाशाधिपतिर्विभाति
ज्ञानप्रकाशोऽप्यत उत्तमाङ्गे ॥१३०२॥

सत्पथाचारः—६५५

विष्णुर्हि सत्पथाचारः सूर्यो वास्ति सनातनः ।
मार्गो यस्यास्ति यो यो वा, तेन गच्छन्न रिष्यति॥१३०३॥

प्राणदः—६५६

स प्राणदः प्राणयतीह विश्वं
स प्राणदः प्राणयतीह वह्निम् ।
स प्राणदो विष्णुरनेकरूपः
प्राणो ह्यपानादिविधो विभिन्नः ॥१३०४॥

प्रणवः—६५७

विष्णुर्हि मन्ये प्रणवः प्रसिद्धः
स एव वा व्योम् परमेश्वरोऽस्ति।
स एव सूर्यः स हि वेन्द्रनामा
नमन्ति तं वा प्रणमोऽप्यतः सः ॥१३०५॥

पणः—६५८

पणिर्हि विष्णुः स जगद्विरच्य
यथायथं तत् पणने प्रयुङ्क्ते ।
स्त्रिया पतिः सापि तथा च पत्या
यथायथं तौ पणतः[1] सबन्धू ॥१३०६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रमाणम्—६५६

विष्णुः प्रमाणं जगतोऽस्ति गम्यो
यस्मिन्निदं सं च वि चैति विश्वम्।
शरीरचेष्टा ज्ञपयन्ति जीवं
यथा तथा तञ्च जगद् व्यनक्ति ।।१३०७।।

प्राणनिलयः—६६०

प्राणानां निलयो विष्णुः प्राणास्तस्मिन् प्रतिष्ठिताः।
स युनक्ति पुनः प्राणैरात्मना चक्षुषा च सः।।१३०८।।
तस्मिन्नेव निलीयन्ते, प्राणाः प्राणभृतां पुनः ।
सत्यर्के सति वायौ च, विष्णुस्तिष्ठति केवलः ।।१३०९।।

प्राणभृत्—६६१

स प्राणभृत् सूर्य उतापि विष्णुः
स मातरिश्वा स विराट् स इन्द्रः ।
आत्मा स वा सोऽग्निरसौ च सोमः
स [1]ब्रह्मचारी विविधस्वरूपः ।।१३१०।।

प्राणजीवनः—६६२

वायुः प्राणभृतां लोके, जीवनः परिकीर्तितः ।
विष्णुः स्वस्मिन् हि तं धत्ते, नमामि प्राणजीवनम्।।१३११।।

तत्त्वम्—६६३

तत्त्वं स विष्णुर्जगदस्ति तस्मिन्
तत्त्वं विना नान्यदिहास्ति किञ्चित्।
यदत्र दृश्यं न हि तद्विनास्ति
यो वेत्ति सूत्रं स हि वेत्ति तत्त्वम् ।।१३१२।।

तत्त्ववित्—६६४

स तत्त्ववित् सर्वजगन्नियन्ता
सूर्योऽथ विष्णुर्बहुनामकीर्त्यः ।
ततं हि सर्वत्र तमेकमेव
यो वेत्ति ना[1] तत्त्वविदस्त्यसौ वा ।।१३१३।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एकात्मा—६६५

एकात्मा सकले विश्वे, विष्णुर्व्याप्नोति स्वं पदम्।
सूर्यो वाग्निस्वरूपो वा, विष्णुः सर्वत्र राजते ।।१३१४।।

जन्ममृत्युजरातिगः—६६६

जगत् स विष्णुर्बहुधा विरच्य
स्वस्मिन् सदा तत् सुतरां दधाति।
न जन्ममृत्यू लभते कदाचित्
स वा जरां नैति सदैकरूपः ।।१३१५।।

भूर्भुवःस्वस्तरुः—६६७

भूर्भुवःस्वस्तरुर्विष्णुः सूर्यो वाग्निः प्रजापतिः ।
स भुवं स समुद्रान्तः स्वर्वा याति स्वरोचिषा।।१३१६।।

तारः—६६८

तारो हि विष्णुः स च वास्ति सूर्यो
द्वेषांसि तारो तरते हि शश्वत् ।
द्वेषस्तमोऽतो[1] जगतः स तारो
दीपो यथा हस्तगतोऽस्ति तारः ।।१३१७।।

सविता—६६९

विष्णुर्हि लोके सविता प्रसिद्धः
सूर्यः स्वकैर्नामशतैः स एव ।
सूर्यः स्वशक्त्या समुदीर्य वायुं
सोऽपानसंज्ञो जगदत्र सूते ।।१३१८।।

प्रपितामहः—६७०

विष्णुर्हि लोके प्रपितामहोऽस्ति
पश्यन् स देवो भुवनानि याति ।
तमेव सूर्यं प्रणमन्ति सर्वे
मत्वाजरं तं प्रपितामहं वा ।।१३१९।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञः—६७१

सकामभावेन कृतोऽपि यज्ञः
स यज्वनेऽर्थ्यञ्च ददाति नित्यम् ।
यदीज्यते विष्णुरकामपूर्वं
स एव यज्ञोऽमितदस्तदा स्यात् ॥१३२०॥
यज्ञेन देवा अयजन्त यज्ञं
शरद्धविस्तत्र वसन्त आज्यम् ।
पुरोहितोऽग्निः स पुनाति नित्यं
यज्ञस्य कर्तारमनिन्द्यमर्यम्[1] ॥१३२१॥

यज्ञपतिः—६७२

विष्णुर्हि यज्ञस्य पतिः प्रसिद्धो
[1]मर्त्योऽपि तत्रास्ति च विष्णुरूपः ।
समिद्धवींषीह च सर्वमाज्यं
होता च यज्ञस्य पतिः स विष्णुः ॥१३२२॥

यज्वा—६७३

सर्वो मनुष्यः स्वयमर्थदासो
यज्वा भवन् कर्मशतं विधत्ते ।
सूर्योऽपि यज्वा बृहतां पतिर्वा
स ब्रह्मणो वा च पतिर्हि यज्वा ॥१३२३॥

यज्ञाङ्गः—६७४

विष्णुर्हि यज्ञाङ्ग इहोपदिष्टो
यज्ञो विचित्रं[1] कुरुते सचित्रम् ।
यज्ञो हविस्तच्च नयत्यशेषं
यां देवतां प्रत्यभिलक्ष्य[2] तत्स्यात् ॥१३२४॥

यज्ञवाहनः—६७५

यज्ञवाहन उक्तोऽसौ विष्णुः सूर्यः पुरोहितः ।
अग्निर्वा यज्ञकेतुर्वा यज्ञे सर्वं प्रतिष्ठितम् ॥१३२५॥

यज्ञभृत्—६७६

विष्णुर्हि यज्ञभृल्लोके, सोऽग्निर्वा स पुरोहितः ।
यज्ञो वै रत्नधा तस्माद्, धीरा यज्ञं वितन्वते ॥१३२६॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यज्ञकृत्—६७७

यज्ञकृत् कथितो लोके, विष्णुः सूर्यः पुरोहितः ।
जनो वाऽनुकरोत्येनं, स्वर्गं यज्ञकृते ददत् ।।१३२७।।

यज्ञी—६७८

यज्ञी हि विष्णुः स सनात् पतिर्हि
यज्ञस्य तस्मिन् वितता हि यज्ञाः।
सूर्यादयो यज्ञविधौ प्रवृत्ता
विना प्रमादं सरथा यजन्ति ।।१३२८।।

यज्ञभुक्—६७९ यज्ञसाधनः—६८०

यज्ञसाधन उद्दिष्टो, लोके विष्णुः सनातनः ।
अग्निर्मुख्यतमस्तेषां, यो [1]विभुर्योऽध्वरे ध्रुवः[2] ।।१३३०।।

यज्ञान्तकृत्—६८१

यज्ञान्तकृद् ब्रह्म जगद्दधानं
यज्ञान्तकृद् विष्णुरभिप्रसन्नः ।
तथा च यज्ञान्तकृदस्ति सूर्यः
स विश्वयज्ञं कुरुते समृद्धम् ।।१३३१।।

यज्ञगुह्यम्—६८२

यज्ञगुह्योऽयमस्त्यर्कः, सोऽग्निर्विप्रः स वोशनाः ।
स ऋषिः स कविर्द्रष्टा, यज्ञे पञ्च प्रिया जनाः[1] ।।१३३२।।

अन्नम्—६८३

अन्नं हि सर्वत्र जगत्प्रसृप्तं
तस्मिन् स्थितं विश्वमिदं समस्तम् ।
अन्नं हि विष्णुः प्रपुनाति भोक्तॄन्
निगूढमन्नेषु यतः स्वयं सः ।।१३३३।।

अन्नादः—६८४

अन्नं हि जीवनं लोके, यद्यद् यस्यास्ति तस्य तत्।
तस्मादन्नाद आत्मायं, सूर्यो वाग्निस्तु यज्ञियः ।।१३३४।।
अन्नकामोऽन्नतेजा वा, यान्नभागस्य च स्पृहा ।
अन्नादोऽन्नपतिर्भूत्वा, सोऽन्नार्थं कुरुते क्रियाः ।।१३३५।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मयोनिः—६८५

आत्मयोनिः स्वयं सूर्यो[1], विष्णुर्वातः[2] स्वयम्प्रभुः ।
स्वयं यौति स्वधामानि, राजा विश्वस्य चर्षणिः ।।१३३६।।

स्वयंजातः—६८६

स्वयंजातः, स्वयं सूर्यो, विष्णुर्ब्रह्म पुरोहितः।
स यज्ञः सर्वभूतानि, जज्ञे स्वाभीद्धतेजसा[1] ।।१३३७।।

वैखानः—६८७

वैखानः कुरुते खानं, सामुद्रं रत्नधातमम् ।
तत्र यान्ति नदाः सर्वे, दुष्पूरश्च तथापि सः।।१३३८।।

सामगायनः—६८८

सामगायन उक्तोऽसौ, सर्ववागीश्वरेश्वरः।
स एव वेत्ति गीतानां, गतीर्वा सर्वभावतः।।१३३६।।

देवकीनन्दनः—६८६

देवकीनन्दनः सूर्यः, उषा देवी यतः स्मृता ।
देवसूर्यस्य संयोगात्, देवकी कथिताप्युषाः ।।१३४०।।
उषर्बुधः स सूर्योऽस्ति, स्वसुर्जारः स वा स्मृतः।
[1]तावत् तमो न वा यावद्, दृश्यते देवकीसुतः ।।१३४१।।

स्रष्टा—६६०

स्रष्टा स विष्णुः किमु वास्ति सूर्यो
यतः स एवास्ति गतेर्विधाता ।
मर्त्यो [1]मनःशुक्रसमानबन्धुः
सृज्यानि नित्यं सृजते यथौजः ।।१३४२।।

क्षितीशः—६६१

विष्णुः क्षितीशः स हि वास्ति सूर्यः
तस्मिन् स्थितं विश्वमिदं विभाति ।
क्षितिर्निवासादुत वा विनाशात्
क्षितौ च ना कर्मशतं करोति ।।१३४३।।

पापनाशनः—६६२

पापनाशन उक्तोऽसौ, विष्णुः सूर्यः सनातनः ।
[1]तमाह्वयन्ति वा मन्त्रैः, स नो पायान्महेश्वरः।।१३४४।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शङ्खभृत्—६६३

शंखोऽस्ति सूर्यास्तमु यो बिभर्ति
स शंखभृन्नामधरोऽस्ति विष्णुः ।
लोक्योऽपि[1] शंखः सबलं प्रणुन्नो
रवेण विश्वस्य विषं निहन्ति ।।१३४५।।

नन्दकी—६६४

स नन्दको विष्णुरिहास्ति गीतः
तेनास्य योगोऽस्ति च नित्यमेव ।
स नन्दकी सूर्य इहास्ति बोध्यः
स आशिषा सर्वजगत् पिपर्ति ।।१३४६।।

चक्री—६६५

चक्री ह विष्णुः स करोति विश्वं
चक्रेण तुल्यं परिवर्तमानम् ।
रथश्च चक्री रथवांश्च चक्री
सूर्यश्च चक्री क्रमते च चक्रे[1] ।।१३४७।।

शार्ङ्गधन्वा—६६६

स शार्ङ्गधन्वा कथितो ह सूर्यो
मेघेषु तच्छृङ्गमिवास्ति वक्रम् ।
बृहद्धनुः सत् कथयन्ति तद्वा
चन्द्रस्य सर्वत्र स विष्णुरस्मात् ।।१३४८।।

गदाधरः—६६७

गदाधरो विष्णुरसौ हि सूर्यः
स एव मेघेषु दधाति शब्दम् ।
स विद्युतञ्चाकुरुते सशब्दां
स एव मेघांश्च धरत्यशेषान् ।।१३४९।।

रथाङ्गपाणिः—६६८

रथाङ्गपाणिः स हि चर्षणिर्मतः
स एव विष्णुः स हि वास्ति भास्करः।
हिरण्यपाणिः स यथा तथा ह्यसौ
त्वग्दन्तरूपाक्षिहिरण्यसंयुतः ।।१३५०।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अक्षोभ्यः—९९९

अक्षोभ्य एकः स हि विष्णुरुक्तः
स वास्ति सूर्यः स हि वा प्रवीरः ।
स एव वाजी सहमान उग्रः
स वा रथे तिष्ठति जैत्र इन्द्रः ॥१३५१॥

सर्वप्रहरणायुधः—१०००

स एव विष्णुः परिपाति सर्वं
स एव सर्वं प्रहरत्यनम्रम् ।
स आयुधान्यात्मभवानि नित्यं
यथायथं सर्वभवाय युङ्क्ते ॥१३५२॥
यदुन्निनीषुर्भवतीह काल-
स्तं सम्मिमीते मृदुभावनाभिः ।
न्यक्कर्तुमिच्छुः पुरुषं यमो वा
हितेऽहितं पश्यति तस्य बुद्धिः ॥१३५३॥
तस्मात् सदा सत्यधियोऽतिनम्राः
प्रहारसंहारविहारभूतम् ।
तमेव विष्णुं प्रणिपत्य नित्यं
पश्यन्त आनन्दसुखं[1] लभन्ते ॥१३५४॥
तस्यैकवीरस्य[2] कृपातियोगाद्
भाष्यस्य नाम्नां गमनाय पारम् ।
योऽहं समर्थोऽद्य भवामि लोकाः
सत्यं स एवास्ति च पारकर्ता ॥१३५५॥
हे विश्ववन्द्य ! तव कीर्त्तिरशब्दगेया
हे शक्तिरूप ! तव शक्तिमुपेत्य भाष्यम् ।
दुस्तार्यमप्यतिकृशः करणे समर्थो
योऽहं भवामि, न भवामि कृतं त्वयैव ॥१३५६॥
सत्यभाष्योपहारोऽयं सादरं विष्णवेऽर्पितः ।
तेन मे भगवान् विष्णुः प्रीतो भवतु सर्वदा ॥१३५७॥

इति श्री १०८ पण्डितसत्यदेववासिष्ठकृतं
श्रीविष्णुकाव्यं सम्पूर्णम्

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पाद-टिप्पण्यः

(कोष्ठकेषु पद्याङ्कास्तदनु च तत्तत्पद्यस्थटिप्पणीसूचकाङ्का दीयन्ते। कोष्ठकस्था अङ्का अग्रिमकोष्ठकं यावदनुवर्तन्ते।)

प्रस्तावना-विंशतिः

(०००१) १. वर्षगणमेकं जन्म तेषु। २. त्रिधाविभक्तात्—मनोवाक्कायविभागात्।

(०००४) १. ना=पुरुषः।

विष्णुकाव्यम्

(०००१) १. गृणन्ति=स्तुवन्ति।

(०००५) १. स्वके वर्गे=स्वपरिवारे । पण्डितवर्गे ब्राह्मणवर्गे इति च यथा लोके।

२. वर्गः=परिवारः, तद्विधसमुदायो वा।

(०००६) १. तिङः—लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ्, इत्येवमादयो दश लकाराः कालभेदविज्ञापनाय धातोःप्रत्ययरूपेणायान्ति।

२. व्यनक्तिमात्रम्—यदुक्तं तत्र हेतुः कूटस्थत्वं ब्रह्मण इति।

(००२८) १. प्रधानजीवेश्वर-शब्दश्छन्दोऽनुरोधात् प्रधानपुरुषेश्वरस्य स्थाने प्रयुक्तः।

(००३०) १. तातः=पिता पूज्यो वा।

(००३२) १. यस्य दक्षिणमिति यद्दक्षिणम्।

(००३५) १. सर्वेति विष्णोर्नाम, तस्मात् 'सर्वं विना' ब्रह्म विनेत्यर्थः।

(००३६) १. 'उ' इति सम्बन्धेऽव्ययः, स इत्यर्थः।

(००४१) १. निपूर्वाददधातेः **'कर्मण्यधिकरणे च'** (पा० २।३।६३) इत्यनेन 'कि'-प्रत्ययः।

२. अव्ययोऽविनश्वरः।

(००४५) १. ना=मनुष्यः।

(००५३) १. ह्रसन्ति लाघवं प्राप्नुवन्ति।

(००६४) १. नाथन्ति याचन्त इत्यर्थः। अत्र नाथधातोराशिष्येवात्मनेपदत्वं व्यवस्थितम्। **'आशिषि नाथः'** वार्त्तिकम् (सूत्रे १।३।२१)।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(००६७) १. वपुषोऽर्थदर्शी=इन्द्रियार्थसक्तः २. स्वैरः स्वेच्छाचारी।

(००६६) १. हतभिक्षो दुर्भिक्षः।

(०१००) १. समावास्य=एकीभावेन समन्तात् सर्वं जगदुषित्वा। २. तस्मिन्नित्यादि मन्त्रलिंगम्।

(०१०४) १. लोकवृत्तम्=लोके यद् भवति तत्। एतेन 'विक्रम' नाम्ना विज्ञाप्यते यत् सर्वं चराचरं तेनैव विक्रान्तमस्ति।

(०१०८) १. तद्व्रतम्—यस्य विष्णोः सर्वविधलोकरचनात्मकं कर्म चतुर्विधसृष्टेः पोषणात्मकं च कर्म।

(०१११) १. सुश्रुवांसम्=सत्कीर्तियुक्तम्। २. अक्षयमाप्रदाता=अक्षयाया माया लक्ष्म्याः प्रकृष्टो दाता स एव विष्णुः।

(०११२) १. तस्य शरणं तच्छरणम्।

(०११३) १. तस्य शरणं तच्छरणम्।

(०११८) १. भार्कचक्रम्=द्वादशराशिषु सूर्यादिकस्य परिभ्रमणात्मकं चक्रम्।

(०११६) १. भूषणभूषणः =भूषणान्यपि तमेव भूषयन्ति यत्र तस्य भूषणेश्वरस्य स्वयं सत्ता भवति। तद्यथालंकृतापि काचिद्वनिता मृता सती न शोभायै कल्पते। कुतः? तस्य भूषणेश्वरस्य भगवतो हिरण्यगर्भस्याग्नेस्तस्यामभावात्, **'नष्टेऽग्नौ प्राणी म्रियते'** इति न्यायात्।

(०१२०) १. प्रत्ययमात्रलभ्यः=ज्ञानमात्रगम्यः।

(०१२१) १. चरैः=चरणशीलैः,सूर्य-चन्द्र-मंगल-बुध-बृहस्पति-शुक्र-शनिभिर्दीप्तिमद्भिः खेचरै राहुकेतुभ्याञ्च। वात्र समुच्चये।

(०१२२) १. भूः=सत्ता।

(०१२४) १. मर्त्ये परमात्मायमिति या निष्ठा तया=मर्त्यनिष्ठया। २. सत्त्वे=मनसि। ३. सत्त्वम्=सत्यस्वरूपं शुद्धिमिति। ४. उपातिष्ठन्= उपासनां कुर्वन्।

(०१२५) १. लोके ईश्वराः=लोकेश्वरा। लोकेषु मनुष्येष्वीश्वराः।

(०१३०) १. सर्वादिः=ओम्, ओमव्ययस्तस्मान्न लिंगवचनेषु व्ययत इति कृत्वा तच्छक्तीनां बहुत्वमाश्रयीकृत्याददत इति बहुवचने प्रयोगः कृतः। दिवमित्यादया द्वितीयान्ताः। २. अक्षः=रथचक्रयोः स्तम्भनसाधनीभूतः काष्ठमयो धातुमयो वा दण्डः। अयमक्षः पुंसि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०१३१) १. नियतिः=प्रकृतिः, नित्या व्यवस्था वा, तया। २. एकरसस्वभावम्=यथा सर्गारम्भादिक्षणे तेन भगवता सर्वमिदमात्तं स्तब्धमागृहीतं चासीत्, तथैवाद्यापि धृतं स्तब्धं वेदं सर्वविधं विश्वमास्ते, इति कृत्वा सोऽद्यापि 'सर्वादि'विष्णुरुक्तो भवति स्तम्भनशक्तेः सर्वत्र विद्यमानत्वात्।

(०१३४) १. यः पुमान् या स्त्री, यत् नपुंसकमिति त्रयः कर्त्तारःकर्मणामभिमताः। २. विकर्म=विरुद्धंकर्म। ३. यमाप्तिविग्नः=यमो दण्डो नियमयति प्रजा इति कृत्वा दण्डप्राप्त्योद्विग्नः पश्चात्तापमतिरिति। ४. क्षयम्=नाशम्। सः, सा, तदिति नित्यसम्बन्धत्वात् तदोऽध्याहारः।

(०१३५) १. तस्य विष्णोः प्रभयेति। २. प्रमेयः- माङ् माने शब्दे च जौहोत्यादिकः। **'अचो यत्'** (पा० ३।१।९७) इत्यनेन 'यत्' प्रत्ययः, **'ईद्यति'** (पा ६।४।६५) सूत्रेण ईत्वे कृते गुणः। तेन 'प्रमेयः' 'अमेयः' इत्यादिसिद्धिः। ३. प्रमितिः-बाहुलकात् 'क्तिन्' **'द्यतिस्यतिमास्थामित् ति किति'** (पा ७।४।४०) इत्यनेन इदादेशान् 'मितिः'।

(०१४०) १. सुखात्मा सः **'कमस्यग्ने !'** इति निदर्शितमन्त्रलिंगात्। २. यदुक्तं स एव वासयितेति—नित्यं पश्यामः तद्व्यवस्थया लब्धायुष्कः सकलं जीवनं तस्मिन् वासयितरि वसन्नतिवाहयति, क्षीणायुश्च म्रियते, यथा गृहपतिर्गृहान्निष्कासयति करप्रदानेन निवसन्तम्।

(०१४१) १. तन्मनाः-वसुमनाः।

(०१४२) १. उपकर्तृभेदः=उपकरणभेद इति। २. अनक्ति=व्यनक्ति।

(०१४३) १. अनक्ति=व्यनक्ति=प्रकाशयतीत्यर्थः।

(०१४७) १. मोघांशं=प्रकृतेर्विरुद्धांशम्, व्यर्थांशम्, असंभवांशम्।

(०१५०) १. धारणोत्थम्-धारणा=धर्मस्तज्जम्।

(०१५१) १. वैदिकान्नियमानुच्चरते स्वैरमाचरतीत्यर्थः।

(०१५४) १. वेदो ज्ञानम्।

(०१५८) १. 'जन्मादि' इत्यत्रादिशब्देन षड्भावविकारा गृह्यन्ते, तथा 'बाल्यादि इत्यादिशब्देन तिस्रः शरीरावस्था बाल्ययौवनजरा गृह्यन्ते।

(०१६१) १. वरः श्रेष्ठ आरोहोंऽकुरो वास्य स 'वरारोहः' सनातनो विष्णुः। मन्त्रलिङ्गञ्च—**यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त इयं**

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विसृष्टिर्यत आबभूवेति मन्त्रलिंगाद 'वरारोहः' स विष्णुः।।

(०१६२) १. खेचराणि तेजांसि=दिविचरा ग्रहाः।

(०१६६) १. वडवानलः समुद्राग्निर्यो हि भूस्थानि वारीणि तापयति।

(०१६६) १. विक्रमणम्—विरुद्धक्रान्तारं विरुद्धकर्त्तारमिति वा।

(०१७१) १. वेदम्-विष्णुम्।

(०१७२) १. तदीशम् तस्य जगत ईशं विनेत्यर्थः।

(०१७३) १. अन्धः=विमूढः=विवेकरहितः।

(०१७४) १. ना=मनुजः।

(०१७७) १. श्रुति-विश्वरूपम्=श्रुतिरूपम्, विश्वरूपमिति पृथक्शः। २. स्रोतःसु=नदीषु निर्झरेषुच। ३. गाम्-वाणीम्।

(०१८०) १. देहे यथाङ्गानि सन्धिना दृढबद्धानि स्व-स्व धर्मेण सत्तया वा पराण्यंगानि सत्तावन्ति विदधति। तत्र या सत्ता सा तस्यैव धर्माध्यक्षस्येति कृत्वा सर्वाङ्गपूर्णं वपुर्वदिदं सकलं जगद्धृतमस्त्यतः स 'धर्माध्यक्षः उच्यते।

(०१८१) १. स्वबुद्धौ-तस्य स्वज्ञाने। २. नियन्ता=सामान्यो यन्त्रनिर्माता शिल्पी, सामान्यो वा जनः स्वं संभाव्यमानं ज्ञाने कृतमिव पश्यतीति भावः। १. विचित्रा शक्तिर्यस्य स विचित्रशक्तिः।

(०१८६) १. नखिनः—श्वविडालसिंहप्रभृतयः। १. विश्वकृतेः=सकलंकृतिमात्रस्येति भावः।

(०१९८) १. जातः=उत्पतिं प्राप्तस्तं विश्वयोनिं व्यनक्ति। कुतः ? न हि तेन विश्वयोनिना प्रसूतमिवापरो जनः प्रसवितुं क्षमत इति कृत्वा। २. जातमात्रम्=यत्किंचिदपि तेन पुनर्वसुना भगवता सृष्ट्यामुत्पादितम्, तथाविधं न केनाप्युत्पादयितुं शक्यं सत् तज्जातमात्रं तमेव पुनर्वसुम् अंकति=व्यनक्ति, प्रकाशत इत्यर्थः। २. म्ना अभ्यासे धातुः, म्नाति अभ्यस्यति।

(०२००) १. तन्मूलमूलाः=औषधय एव कारणं निमित्तं भवन्ति जीवानां परिवृद्धय इति भावः। अथवा—प्राणिनां मूलं प्राणाः, ते प्राणा औषधाधीनाः। अत उक्तं भवति औषधिमूलमूलकं प्राणिजगत् समस्तम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०२०१) १. निजात्मयोगात्-निजज्ञानयोगात्। ज्ञानमयो हि सः। ज्ञानं हि प्रकाशः। उक्तं-'**तमसः परस्तात्**' (यजुः ३१।१८)।

(०२०२) १. स्रष्टुमिच्छुः सिसृक्षुः। २. आसमन्तात् विविधं भातीति आविभाति। वामनः ह्रस्वोऽपि।

(०२०४) १. अनल्पा विद्या यस्य सः, अनल्पविद्यो विष्णुः। २. नीयतेऽनेनेति नेत्रम्=शास्त्रं गुरुः चक्षुषी वा। तन्नेत्रं सुष्ठु शोभनं निर्दोषं यस्य स सुनेत्रस्तम्।

(०२०६) १. ऊर्जा संजाता अस्येति-'ऊर्जितः'। तत्र

(०२०६) १. व=इवार्थकः, गृहीतकेश इवेत्यर्थः।

(०२११) १. अनक्ति=व्यनक्ति प्रकाशयतीत्यर्थः।

(०२१३) १. नियामैः=नियमैरित्यर्थः। २. आयुक्तततम्=आयुक्तेन ततं व्याप्तं सदैव सनात् कालादिति। सदायोगोऽस्यास्तीति तं सदायोगिनम्, सदायोगशीलं स्वभावधर्माणं वा

(०२२०) १. वैद्यः=विष्णोर्नाम। २. आप्तकामः=विष्णुरीश्वरः।

(०२२२) १. निजकाभिर्निजाभिः, कः प्रत्ययोऽत्र स्वार्थे २. पुरुरूपकं पुरुरूपं स्वार्थेऽत्र कः प्रत्ययः।

(०२२३) १. महामायः सूर्योऽपि तस्यैव महामायस्य शक्त्या पुरुरूपं विश्वं बिभर्त्तीति कृत्वा।

(०२२४) १. तापम्-उद्वेजनम्। २. 'रामो' विष्णोर्नामसु ३६४ तमं पठितोऽत्र संग्रहे।

(०२३२) १. वैराजवपुः=चराचरात्मकवपुरित्यर्थः।

(०२३३) १. तस्योच्छिष्टस्यांकं=अक्तो व्यक्तः प्रकाशयत इत्यर्थः। "**बिभर्ति भर्त्ता विश्वस्योच्छिष्टो जनितुः पिता**"। अथर्व० ११।७।१५।।

(०२३४) १. इयता परिच्छिन्नं वपुर्यस्य सः— इयत्परिच्छिन्नवपुः। २. सर्वमुदरे स्थितं यस्य स सर्वोदरस्थस्तम्। सर्वत्र तस्यामेयत्वं व्याप्तम्।

(०२३६) १. भर्गः=शुद्धः। सारांशस्त्वयं यद् भगवतः प्रत्येकं कर्म तं भगवन्तमेव गमयति=प्रापयति।

(०२४०) १. यदुक्तं स रुणद्धि लोकानिति, तत्र मन्त्रलिंगं च— '**तस्मिन् ह तस्थुर्भुवनानि विश्वा।**' यजु० ३१।१८।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०२४१) १. तस्य विष्णोर्व्याप्तिधर्मम्।

(०२४२) १. तस्मै विश्वस्मै यतस्ता धेनवो विश्वस्य मातरः सन्ति। मन्त्रलिङ्गञ्च—**'अदुग्धा इव धेनव ईशानमस्य जगतः'**। (साम०)

(०२५२) १. गात्रम्=शरीरम्।

(०२५५) १. 'विरामो' विष्णुः सहस्रनामसु पठितत्वात्। २. वेदाश्चत्वारः= चतुर्भेदभिन्नां सृष्टिमित्यर्थः।

(०२५६) १. 'चक्षिङ् व्यक्तायां वाचि' अयं दर्शनेऽपि। विचष्टे=विशेषेण पश्यतीत्यर्थः।

(०२६३) १. संधानगुणेन=समानधारणगुणेन।

(०२६५) १. 'स्थिरो' विष्णुः। यथा शरीरं गतिमत् सत् यावदायुः सर्वांगसमुदितं स्थिरं सत् कार्यकरं भवति, आत्मना च शासितो भवति। तथैव लोकाध्यक्षो लोकान् शास्ति अधीक्षते वा।

(०२७२) १. 'पाहि नो अग्ने' इत्यादि मन्त्रमिति भावः।

(०२७३) १. यदुक्तं वेदोपदेशेनेति।

(०२७४) १. तस्य गुरुतमस्य ज्ञानं तज्ज्ञानम्। २. इह=विश्वे। सृप्तं=व्याप्तम्। ३. तमप्—प्रत्ययेन।

(०२७५) १. अश्नुते व्याप्नोतीत्यर्थः।

(०२७८) १. उच्चिकीर्षुः=गुणोत्कर्षमादिधापयिषुरित्यर्थः। २. निमेषम्=नियतस्पर्द्धम्। ३. निमेषमात्रः= नियन्त्रितस्पर्द्धामात्रः।

(०२७६) १. यथार्थम्=यथापूर्व क्लृप्तं तथैव प्रतिकल्पं कुरुते।

(०२८०) १. शिवेति विष्णोर्नामसु संगृहीतमत्रैव।

(०२८२) १. वाचा=वेदवाचा।

(०२८४) १. यातिं=गतिम्। २. यथागमं=यथामार्गम्। ३. अनक्ति=नयति।

(०२८५) १. यदुक्तं विश्वं वपुस्तस्येति, तत्र मन्त्रलिंगं च—**यस्य भूमिः प्रमान्तरिक्षमथोदरम्। दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः। यस्य सूर्यश्चक्षुश्चन्द्रमाश्च पुनर्णवः। अग्निं यश्चक्र आस्यं तस्मै ज्येष्ठाय ब्रह्मणे नमः। यस्य वाताः प्राणापानौ चक्षुरंगिरसो भवन्। दिशो यश्चक्रे प्रज्ञानीस्तस्मै ज्येष्ठाय ब्रह्मणे नमः।**

(०२६५) १. कप् समासान्तः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०३१०) १. दिग्देशकालैर्जगन्निबध्नन्नित्यर्थः।

(०३११) १. सूर्यचन्द्रमसोर्मध्यपाती विजातीयो राहुः।

(०३१२) १. कम्=विष्णुम्।

(०३१५) १. ज्ञाननयेन=ज्ञानचक्षुषा।

(०३१६) १. वपतीति वापो जनकः।

(०३२५) १. गुप्ता रक्षिताः। यथा गर्भो मातरि गुप्तो रक्षितो भवतीत्यवसेयम्। ये आपो नरा इत्येव पठन्ति। तत्र भवति चास्माकम्—"**नरास्तु यं स्तम्भमुपेत्य**" इत्यादिः।

(०३२६) १. एकरसेन वर्त्मना=परिवर्तितुमशक्येन वेदेनेत्यर्थः। एतद्व्याख्यानेनैव ६१ एकनवतितमश्लोकोक्तं पञ्चविंशत्युत्तरं सप्तशततममेक इति नाम व्याख्यातं भवति। तथा षोडशोत्तरशततमश्लोकोक्तं पञ्चषष्ट्युत्तरं नवशततममेकात्मेति नाम च व्याख्यातं भवति। आत्मशब्दः स्वरूपवचनः। एकात्मा= एकस्वरूप इत्यर्थः।

(०३३२) १. अलंकारशतैः=विविधविशेषणैरिति।

(०३३३) १. योनीनां समूहो बहुत्वं वा यौनम्। २. अप्रकम्प्यम्= अन्यथाकर्तुमशक्यम्।

(०३३४) १. वीणाः=भ्रमणाय वेगीकृताः।

(०३३५) १. वारिधर-प्रपातैः=मेघानां जलधारापातैरिति।

(०३३६) १. सिद्धसंकल्पकित इत्यत्र स्वार्थे कः प्रत्ययः सिद्धसंकल्पकः, स संजातोऽस्येति तारकादितच् प्रत्ययः। तदस्य संजातमित्यादि अष्टाध्यायी (५।२।३६) २. अक्षैरिन्द्रियैः। ३. प्रचारः-व्यवहारो भ्रमणं वा।

(०३४२) १. राम-विरामे विष्णोर्नाम्नी स्तः, रमते=क्रियां करोति जगद् यस्मिन् स रामः। तस्मिन्नेव विरामं यात्यतो विरामः। २. सहायः=साधनम्। यथा कुम्भकारो घटनिर्माणाय दण्डचक्रसूत्रादीनि साधनान्युपादत्ते।

(०३४३) १. तस्यात्मभूतः=सूर्यस्यात्मभूतः। सिद्धिसाधनः=साधनानां प्राणभूतः। यथैकरूपमप्यन्नं पृथक् पृथगवयवेषु गतं पृथक्-पृथक् परिपाकं विधत्ते, तत्र प्राणस्यैव प्राधान्यम्, एवं पृथक् पृथक् साधनभूतं जगत् स एकः साधयतीति सर्वसाधनः स 'सिद्धिसाधन' उच्यते।

(०३४६) १. स्वयम्प्रभासो=विष्णुः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०३५२) १. अर्च्यं जीवमिति। स एव हि शरीरेऽर्च्यः श्रेष्ठतमो वा। २. यदुक्तं वर्षति वह्निमन्तरिति। लोकेऽपि च पश्यामः ग्रीष्मर्तावग्नेस्तापस्याधिक्यात् सर्वं शुष्कमिव भवति।

(०३५४) १. भुवस्तृणम्-भूतृणम् २. मेरुपदं पर्वतपरिच्छदम्।

(०३५५) १. नियतं=नियतकालाय गृहीतायुष्कम् २. विचिन्वन्=विविध-लिंगलक्षणोपेतं पृथक्-पृथक् विवेकार्हं कुर्वन्निति ३. कलाः=भगवतो गुणराशिज्ञापकलक्षणानि।

(०३५६) १. सर्वबन्धुः=सर्वं बध्नाति स्वकेन नियमेनेति कृत्वा। २. दृश्यात्=दृश्यरूपाज्जगतः, शिष्याद् वा शासितुमर्हाज्जगत इत्यर्थः।

(०३६०) १. मनोऽर्थवत्=मनोयुक्तं पञ्चेन्द्रियार्थयुक्तञ्च। २. अर्थवत्=प्रयोजनवत्। ३. भेषु=ग्रह-नक्षत्र-राशिषु। ४. दुर्धरः=दुर्धरधरः, इति भावार्थः।

(०३६१) १. नियतार्थबद्धम्=नियतेन अर्थेन=प्रयोजनेन बद्धम्। यथाविधा वाक् यस्मै प्राणिनेऽपेक्ष्यते तथाविधा वाक् तस्मै प्रदत्ता। स्त्रीपुंसयोश्च वाचि स्वारस्यस्य भेदादियं स्त्रियो वाक्, इयं च पुरुष-वागित्यपि सुखेन भेदं प्रकटयति। २. यथार्थवाचम्=निष्प्रयोजनं न भाषमाणम्।

(०३६२) १. 'वर्धनः' इति विष्णोर्नाम। २. चतुर्थे चरणे जगच्छब्दो द्वितीयान्तः। अपरप्रकारेण च- इन्द्रो राजा। मन्त्रलिंगं च-**'इन्द्रो राजा जगतश्चर्षणीनाम्'** (ऋक् ७।२७।३) ईश्वराणामपि य ईश्वरः स 'महेन्द्र' इति।

(०३६३) १. समश्नुवानः=समेकीभावेन सर्वत्र प्राप्नुवन्।

(०३६५) १. 'वस्त्रदाते' त्यादिषु सम्बन्धषष्ठ्या समासः। २. निमग्नः=अन्तर्हितः, अन्तः स्थितो वा।

(०३६६) १. अजां=प्रकृतिम्। २. निबध्नन्=जगदरूपेण प्रचारयन्। ३. वसौ=धने। ४. वसुमान्=धनवान्। ५. वसुर्वा=धनं वा। ६. वसुना=विष्णुना। ७. गुप्तम्=रक्षितम्।

(०३६६) १. इयर्त्ति=प्रापयति। २. तं=विश्वम्। तमु आ०=**निपात एकाजनाङ्** (पा० १।१।१५) इति प्रगृह्यत्वान्न सन्धिः। ३. रूपमयं=दर्शनविषयम्। सामान्यतो विश्वमिदं पांचभौतिकं पंचभिरेवेन्द्रियैर्ज्ञातुमर्हं भवति। तत्र प्रत्यक्षस्य प्राधान्यादिदमुक्तं भवति 'रूपमयं विधत्ते' इति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०३७०) १. प्रपलं=प्रतिपलम्। २. पतंगः=सूर्यः। ३. गोले=खगोले।

(०३७२) १. सर्वजगत्=सर्वं जगत् तत्। २. तेजांसि=तेजोगुणवन्ति।

(०३७३) १. स्वविकारयुक्ताः-स्वेन विकारेण च युक्ताः, चक्षुः सूर्यस्य विकार इत्यादिः।

(०३७४) १. आ अन्तकम्=आन्तकम्, यावन्मृत्युरिति। यद्यपि शरीरौजसादयो गुणाः पार्थिवास्तथापि जीवापाये ते गुणा न कार्यक्षमा भवन्तीति कृत्वोक्तं भवति-व्याप्नोत्योजोभिरिति।

(०३७५) १. प्रकाशकानाम्=सूर्यादीनां तैजसाम्।

(०३७६) १. प्रतापभेदैः= सूर्यप्रतापः, अग्निप्रतापः, गर्भप्रतापः, भूमिप्रतापः, कालप्रतापः, पित्तदोषप्रतापः, कर्मपरिपाकः, इत्येवमादिः। २. सौति=अभ्यनुजानाति। ३. शुभाप्तये=शुभप्राप्तये।

(०३७७) १. अर्थ्यान्= लब्धुमर्हान्। २. अर्थिनः=याचकान्। ३. काया=सर्वप्राणिनां काया।

(०३७८) १. भ-शब्दो लग्न-राशि-ग्रह-नक्षत्राणां च वाचकः प्रयुक्तो भवति। २. विश्वमेतत्=चतुर्भेदविभक्तं जगत्। ३. जगदात्ममानं=जगदायुरिति। ४. विश्वमात्रम्=निःशेषमिति।

(०३७९) १. मन्त्रेण गुप्तम्-विष्णुना गुप्तं रक्षितम्। २. मन्त्रेण विष्णुना गुप्तेनान्तःस्यूतेन। ३. समूढं=सर्वतो निबद्धमिव व्याप्तमस्ति।

(०३८०) १. यौति=विविध-भावाभावाय च मिश्रयति वियुनक्ति वा। २. विज्ञाः=विविधज्ञानविज्ञाननिष्ठाः, लोकमर्मज्ञा इत्यर्थः।

(०३८१) १. अस्य=सूर्यस्य।

(०३८२) १. प्रकाश्यम्=प्रकाशमानेतुमर्हम्। २. अमृतांशूद्भवनामगेयम्=अमृतांशूद्भवेन नाम्ना गातुमर्हं स्तोतुमर्हमस्तीत्यर्थः। ३. विचष्टे= विविधप्रकारैराख्याति।

(०३८५) १. स्थिरं जगत्=स्थाणुजगत् वृक्ष-लता-क्षुप-वनस्पति-प्रभृतीनि। २. सुरं जगत्=दानादाने प्रवृत्तं जगदिति।

(०३८७) १. भगणैः=वर्षगणैरिति।

(०३८८) १. कलामयम्-आयुर्वेदविदो भाषन्ते 'षष्टिः पित्तधरा कलाः' इति।

(०३९०) १. भेषु=नक्षत्रेषु। २. तारकाणाम्-नक्षत्राणाम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०३६१) १. जगतां=नभोगानाम्।

(०३६२) १. उडुमार्गबद्धाः= नक्षत्र-राशिबद्धाः। करैः=किरणैः। २. विभान्ति=विविधं प्रकाशन्ते। ३. वंशाक्तशिरःस्थितानां=पृष्ठवंशेन बद्धशिरोगतानाम्। ४. भासा=ज्योतिषा।

(०३६३) १. गृणाति=शब्दते स्तौति वा।

(०३६४) १. कालभक्तम्=भूत-भव्य-भविष्यद्भिर्भेदमापादितम्।

(०३६७) १. विरूपं=विविधं रूपम्। २. विरूपः=विगतरूपः। ३. भुवने=विश्वे। ४. पर्याप्तिम्=अन्तभावम्।

(०.३६८) १. तज्ज्ञं=ब्रह्मज्ञम्। २. कामान्=एषणाः। ३. रसेन तृप्तः=आत्मस्थो ब्रह्मस्थो वा आनन्दः सः।

(०३६६) १. कामान् कृन्तति वा 'कामकृत्। आत्मजिज्ञासोर्जीवस्यासत्यान् कामान् कृन्तति। २. कः=ब्रह्मा। यथा ह्रदे स्थितस्य जलीयान् कामान् ह्रदः पूरयति, तथैव विष्णुरिति भावः।

(०४०४) १. कामेन युक्तः-अग्निना युक्त इत्यर्थः। २. कामप्रदः= आमाशयेऽग्नेर-धिष्ठातृत्वात् कामप्रदः अग्निप्रदो वा समानं भवति। समिद्धाग्निः समाग्निर्वा कामान् प्रार्थयितुं समुत्सहते, तान् स पूरयति। विशदं 'काम' नाम व्याख्यायां द्रष्टव्यम्।

(०४०५) १. प्रभुत्वेन=सामर्थ्येन। २. प्रभुः=समर्थः। ३. सशक्तम्=स्वशक्तिगुणेन युक्तं सशक्तमिति।

(०४०६) १. भानि=राशयः।

(०४०७) १. भगणं=ग्रहगणं नक्षत्रगणञ्च।

(०४०६) १. अभुक्तं=दोष-धातु-मलेषु विपरिणमय्य वृक्षादिभ्यो भोज्यरूपेण तदेव ददातीति भावः। २. इयर्त्ति= प्राप्नोति।

(०४१०) १. गुह्यानि=गुप्तानि, जनेभ्यः प्रतिरक्षितुमर्हाणि।

(०४११) १. महान्=विष्णुः। तत्र मन्त्रलिंगं-**'महिना महान्'** (ऋग् ८।१२।२६) इन्द्र इति शेषः।

(०४१४) १. तत्=विश्वमिति। २. विष्णुरिति।

(०४१७) १. सदुक्ता=सद्भिरुक्ता।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०४१८) १. अण्डन्प्रत्ययस्य विधानमिति विग्रहः।

(०४१६) १. वरुणस्य हेतिः=इन्द्रधनुः।

(०४२१) १. सख्यं=समानस्थानम्।

(०४२४) १. खगा ग्रहाः। २. राशिवर्त्म=नक्षत्रक्रान्तिमार्गः। ३. इन्द्रियाणि रसादयो धातव उपधातवो दोषाश्च ग्रहदैवतकाः सन्तोऽपि समानराशिं शरीरमधितिष्ठन्ति। एवं सर्वत्रैकता पृथक्ता च दरीदृश्यते। तां पृथक्तामेकतां च नह्यति बध्नातीति 'नहुषो' विष्णुरुक्तो भवति। एवं विविधमूहानां कल्पनीयं भवति।

(०४२५) १. **'त्वमग्ने रुद्रः'** ऋग् २।१।६।।

(०४२६) १. नित्यं=नितम्।

(०४३८) १. अर्कैः=स्तोत्रैः। अर्किणः स्तोतार इति। तत्र मन्त्रलिङ्गञ्च— **'गायन्ति त्वा गायत्रिणो अर्चन्त्यर्कमर्किणः'**। ऋक् १।१०।१।।

(०४३६) १. पार्थिवमन्तरिक्षीयञ्च।

(०४४२) १. कफोढकौ=फुफ्फुसा

(०४४४) १. वस्तुम्=वसनाय।

(०४४६) १. अनूजशब्दे दीर्घश्छन्दोऽनुरोधात्।

(०४५१) १. इदं=जगदित्यर्थः। २. प्रे वेति छान्दसनियमेन लघुत्वमिह ज्ञेयम्। ३. रथे=शरीरे।

(०४५५) १. गुहास्थम्=हृदयस्थितम्।

(०४६०) १. सातम्=सुखम्।

(०४७१) १. देवस्य दृश्यं काव्यं जगत्, श्रव्यञ्च वेद इति।

(०४७३) १. गहनो विष्णुः।

(०४७८) १. अवकाशः।

(०४८१) १. वेद्यम्=विष्णुम्।

(०४६२) १. कालबद्धः=नियतकालावधिः।

(०४६४) १. सर्वान् खगान्=ग्रहाननुबध्नातीति सर्वखगानुबन्धुः विष्णुः।

(०४६८) १. कर्मसु-इमं देहमश्नुते व्यापारयति, णिजर्थोऽत्राभिप्रेतः। २. अर्थसार्थः=प्राप्तव्यार्थसहायः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०५०४) १. 'नो' निषेधार्थीयमव्ययम्।

(०५०६) १. यातिं=सरणिम्।

(०५०८) १. स्वमर्यादितविधिना।

(०५१०) १. सकलप्रसूः=सकलस्य चराचरस्य प्रसवित्री=जननी। २. लक्ष्मभिः=लक्षणैश्चिह्नैरित्यर्थः। तथा च—**सर्वलक्षणलक्षण्य उक्तः शम्भुः सनातनः। सुकारैर्वा विकारैर्वा, चिह्नैरन्तः प्रकाश्यते।।**

(०५११) १. तथा च मन्त्रो लक्ष्म्या विष्णुपत्नीत्वे **श्रीश्च तेलक्ष्मीश्च पत्न्यौ**। २. बिभर्तीति क्रिया कालत्रयोपलक्षिका—बभार, बिभर्ति भरिष्यति च।

(०५१६) १. चराचरम्। २. बीजमिति जातावेकवचनम्, अनन्तं संख्यातुमशक्यम्। ३. सुप्तं मूर्छावस्थापन्नम्। ४. स्वभावेन=प्रवाहतोऽनादिमद् भावेन। ५. दृश्यं भवेत्=कार्यरूपतां, चक्षुरिन्द्रियविषयतां वा प्राप्नुयादिति। लोके च पश्यामः सर्वमुत्पद्यते—उत्पद्य च सर्वमन्यदन्यस्योत्पत्तिहेतुर्भवति।

(०५१७) १. सः=सूर्यः।

(०५२४) १. यदुक्तं विविधेन साम्ना, तत्र मन्त्रः— **"उप त्वाग्ने दिवे दिवे दोषावस्तर्धिया वयम्। नमो भरन्त एमसि।।"** साम० पू० १।२।४।।
२. यदुक्तं पदं तृतीयमिति, तत्र मन्त्रः— **"यत्र देवा अमृतमानशानास्तृतीये धामन्नध्यैरयन्त।"** यजु ३२।१०।।

(०५२६) १. बहुभागं=महाभागम्।

(०५३०) १. अनक्ति=व्यनक्ति प्रकाशयतीत्यर्थः।

(०५३१) १. अन्त्राणां बहुत्वं स्थानभेदात्, तथा बहुविधकार्यप्रकाशकत्वाच्च भवति।

(०५३३) १. तदिति विश्वम्।

(०५४२) १. मनोज्ञम्=मनोभिन्नेन्द्रियागोचरमपि मनसा ज्ञातुमर्हमित्यर्थः। २. कमनीयम्=एषितव्यम्— इच्छाविषय इति।

(०५४३) १. आप्यम्=रसम्।

(०५५२) १. च—इत्यप्यर्थे

(०५५६) १. सकलम्—कलया सहितं विश्वमित्यर्थः।

(०५७०) १. गेयः स्तुत्यः स्तोतुमर्ह इत्यर्थः।

(०५७४) १. अर्थवन्ति=प्रयोजनवन्ति। २, निजार्थकानि शिल्पिप्रयोजनकारीणि।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०५७५) १. कृत्यानि=कर्तुमर्हाणि कार्याणि।

(०५७६) १. इदं=सकलं जगत्।

(०५७७) १. बहुशः=वैविध्येन—अनेकधा।

(०५७८) १. सुखापूर्णम्=सुखेन आपूर्णम्=आसमन्तात्परिपूर्णम्=आनन्दघनमित्यर्थः।
२. इयत्त्वमात्रम्— केवलमियदेव इयत्तया परिच्छिन्नम्=परिमितमित्यर्थः।
३. अबुद्ध्वा=अविमृश्य।

(०५८०) १. विचित्रम्=विविधसंयोजनैश्चितमिति। २. विश्वदेवाः=सर्वे देवाः। ३. यान्ति=प्राप्नुवन्ति।

(०५८१) १. तस्य विष्णोः दृशा=ज्ञानदृष्ट्या इदं जगत् सान्तं—एतावत् इयता युक्तमित्यर्थः। तद्यथा—शिल्पी यन्त्रस्योच्चावचं वित्त्वाऽऽविष्कर्तुं प्रयोक्तुं चार्हति, न तथोपभोक्ता।

(०५८२) १. विराजमानस्य=देहाभिमान्यात्मन=इदं शरीरं विश्वमात्रञ्च तस्य महात्मनः शरीरम्।

(०५८४) १. विभज्य = भङ्क्त्वा।

(०६०४) १. निजयोनिसिद्धमिति-निजस्य स्वस्य योनिवासनियतीकृतकालं यावत् तत्रोषित्वेत्यर्थः।

(०६०५) १. अर्थवृत्तम्=सर्वाङ्गसमुदितं वटवृक्षमिति।

(०६१०) १. मूलम्=किं पूर्वं कृतमिति बीजं फलं वा आहोस्विद् युगपदिति।

(०६११) १. उदीर्य=आविष्कृत्य। २. तस्य=यन्त्रस्य। ३. उच्चनीचे=चालनमवरोधनं तिर्यग्भावनं वा।

(०६१२) १. आप्तकामः स विष्णुर्नान्यमर्थयते तस्मा'दनर्थः' इति।

(०६१३) १. जगच्छब्दस्य द्वितीयान्तमेकवचनम्। २. कोशप्रसुशब्दो जगद्विशेषणम्।

(०६१८) १. भेषु=इत्यत्रागच्छन्नित्यध्याहारः। २. नैजे निजविकारेषु बीजोत्पादनादिकर्मसु। तथा समुद्रः स्वकार्येषु सततं निरत इत्यर्थः।

(०६१९) १. वशिष्ठः=वशिनां श्रेष्ठः।

(०६२०) १. सत्यया व्यवस्थया बध्नाति यः स 'सत्यबन्धुः' विष्णुरिति। २. विभिनत्ति=बहुविधं दृश्यते शरीरभेदात् यथाशरीराकारम्। सूक्ष्मकीटादहस्त्युत्तरशरीरान्तमिति यावत्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०६२२) १. पुंस्त्रीप्रयोगः=सर्वत्र युग्मसद्भावाख्यायी। २. भृञ्=भरणे लिटि बभार।

(०६२३) १. दोषगणेन=दोषत्रयेण।

(०६२८) १. पदशः=प्रपदमिति।

(०६३०) १. अनुकरणमनुयानमनुचलनमिति समानार्थकाः। २. पुरुरूपभूत्यै=बहुत्वभावाय पुत्रपौत्रात्मकरूपेणेति।

(०६३१) १. तस्मात्=विष्णोः। २. प्रचारार्थं=व्यवहारार्थम्।

(०६३४) १. जन्मिनाम्=चतुर्विधयोनिसम्भूतानाम्। २. विष्णुगर्भं=विश्वमिति शेषः।

(०६३८) १. यत्तूक्तं निजलिङ्गभेदादिति—प्रत्येकं वस्तु वस्त्वन्तरात् स्वलक्षणविशेषेण जातिगुणादिना भिद्यते। यथा घटपटाविति, न तयोर्योगः सम्भवति। ययोस्तु समाना जातिस्तयोस्तु सम्भवेदेव सम्बन्धो, यथा परस्परं द्वयोः कम्बलयोरिति।

(०६४३) १. बोधं—बोधस्वरूपम्।

(०६४४) १. सूक्ष्मविचारमग्नः=किं सूचयतीति कृतावधानः।

(०६४५) १. तत्=ब्रह्म। २. चित्रं करोतीति चित्रकृत्, तं चित्रकृतम्।

(०६५१) १. गोप्यः=रक्षणीयः। गुपू रक्षणे धातुः।

(०६५३) १. विसृष्टिः=विविधप्रकारालंकृता सृष्टिः। सृष्टिः=सर्जनम्। २. भुंक्ते=यथाकालं स्वान्तःक्षयां कुरुते।

(०६५४) १. सः=मनुष्यः।

(०६६०) १. पक्षयुगेन पक्षी=उपलक्षणमात्रमेतत्। प्रतियोनि शरीरं सर्वावयवसमुदितं करोति।

(०६६२) १. सः=विष्णुर्नैकात्मेति

(०६६३) १. अनेकात्मगतः=एक एव विभिन्नेषु देहेषु, तत्तद्रूपेण वर्तमानो, नामभिर्बहुधा गीयमानश्च, नैकात्मवद्=भिन्नो भिन्नो लक्ष्यते।

(०६७३) १. विविधप्रसूतं=चतुर्विधसृष्टिविक्लृप्तम्। २. विश्वप्रचाराय=लोकव्यवहाराय। ३. स्वसत्त्वे=स्वकीये सत्त्वप्रधाने ज्ञानानन्दात्मनि।

(०६८४) १. धर्मकृतं=मर्यादितं विश्वम्।

(०६८७) १. मृत्स्नं=मृत्तिका। एतच्चोपलक्षणं पाषाणसुवर्णादिधातूनाम्।

(०६९५) १. जनिष्यमाणम्। २. पृथक्=अंगभेदेन पार्थक्यम्। ३. सन्दृक्=समानदृष्टिः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०६६७) १. विष्णुना। २. सुखाते। ३. विष्णुम्।

(०६६८) १. विपूर्वकः कॄ विक्षेपे कर्मणि लुङि।

(०६६६) १. विष्णुम्।

(०७०६) १. मार्गः—शुद्धस्वरूपम्, मृजूष् शुद्धौ। मार्गो विष्णुः, वैष्णवमार्गाद्वा।

(०७०८) १. षड्भावविकारानापादयन्। २. स्थिरः=कूटस्थः। ३. हेमगात्रः=हेमाङ्गो विष्णुः।

(०७०६) १. विविधभावैः क्रीडयन्।

(०७१३) १. अरिष्टलक्षणञ्च चरके—

क्रियापथमतिक्रान्ताः केवलं देहमाप्लुताः। चिह्नं कुर्वन्ति यद्दोषास्तदरिष्टं निरुच्यते । इन्द्रियविमाने (अ० १० श्लो० २६)

(०७१४) १. सना=सदा, आत्मा=शरीरी। विकलाङ्गो न तथा प्रवर्तते यथा सकलाङ्गः।

(०७१८) १. बोधगम्ये=ज्ञानगम्ये भगवति विष्णौ।

(०७२०) १. सदाभाति=सद् आभाति सत उद्भूतम् आभाति प्रकाशते। अथवा—सत्त्वरूपमापन्नः प्रकाशते।

(०७३६) १. अप्सु कर्मसु २. प्रतिशरीरं मनो भिन्नं-भिन्नं सत् शक्तिमीहाञ्च भिन्नां-भिन्नां स्वात्मनि स्थापयति।

(०७३८) १. प्रकाशं—व्यक्तम्।

(०७३६) १. नास्ति लिङ्गं चिह्नं यस्य सोऽलिङ्गः।

(०७४१) १. तत्र=ब्रह्मणि।

(०७४२) १. कर्मणां समूहः, **'तस्य समूहः'** (पा० ४।२।३७) इत्यण्।

(०७४४) १. सत्त्वरजस्तमोमयीम्।

(०७४८) १. गच्छतीति=जगत्।

(०७४६) १. **तदन्तरस्य सर्वस्य तदु सर्वस्यास्यच बाह्यतः। यजुः ४०।५।।**

(०७५०) १. केतमिति कर्मनाम।

(०७५३) १. **"शं नो अज एकपाद् देवो अस्तु"** (ऋ० ७।३५।१३) इत्यादिभिर्मन्त्रैः।

(०७५६) १. प्राणिति-अन्तर्गर्भितण्यर्थः प्राणयतीति भावः।

(०७६७) १. ना=पुरुषः २. गलम्=कण्ठम्।

(०७६६) १. मनुं=मन्तारम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०७७८) १. दाधर्तीति वैदिकपदानुकरणम्, यद्वा छन्दोवत् कवयः कुर्वन्तीति न्यायेन छान्दसप्रयोगोऽपि क्वचिल्लोके प्रयुज्यत एवेति नापशब्दत्वभागयम्।

(०७८४) १. 'यती प्रयत्ने' इत्यस्माद् यङन्तात् शानजन्तं विश्वविशेषणम्।

(०७९३) १. गच्छतीति=जगत्; २. तानि=इन्द्रियाणि गोवाच्यानि; ३. स जीवः पुनस्तं गोविन्दं विष्णुं प्राप्नोति।

(०७९४) १. श्मशाने चितां प्राप्नोति, भस्मीभवतीत्यर्थः।

(०७९६) १. विरामम्-विशेषं रमणम्।

(०७९८) १. ज्ञानगम्यम्; २. विलोडनाधारस्य कर्तारम्; ३. सत्ताशीलम्; ४. विलोडनाधारमान्त्रं-तत्र, भक्ष्य- चोष्य-अवलेह्य- पेयेति चतुर्विधस्याहारस्य भेदको वायुः। तच्च महास्रोतःशब्देनापि संज्ञाप्यते। ५. लोकवेदयोः साम्यं गुरुमुखादधिगतं यैस्ते लब्धगुरूपदेशाः।

(०८०३) १. मन्त्रांशोऽयम्।

(०८०६) १. ल इति-लाति=आदत्ते=आदानं वा प्राप्नोतीति लः। यद्वा लातीति ला कर्तरि क्विपि, ला एव लः, स्वार्थेऽणि अवर्णलोपे लः, तस्मिल्ले।

(०८०७) १. परं=अन्यं=द्वितीयमिति। अजितं=विष्णुम्।

(०८१०) १. विरामं=विक्रीडनम्, क्रीडामयं विविधं साधनम्; २. उदस्तः=औदासीन्यं प्राप्तः।

(०८१३) १. सर्वेण वृतः-सर्वमापन्नः।

(०८२०) १. मोहो व्यभिचारि ज्ञानम्।

(०८२१) १. मनांसि=ज्ञानानि।

(०८२२) १. चक्रमयं=सङ्कोचविस्तारवच्चक्रमयमिति भावः।

(०८२३) १. स्वयं न क्षयं यातीति सिद्धो भगवान् विष्णुरिति।

(०८२५) १. पुष्पाणां समूहः पौष्पम्।

(०८२६) १. हलस्य=शिश्नस्य।

(०८२७) १. हलं=करणम्।

(०८२८) १. साधनं=शिश्नं=करणम्।

(०८३३) १. अग्र्यम्=उत्तमम्; २. इत्वा=प्राप्य;

(०८३४) १. सत् एव आत्मा=स्वरूपं यस्य स सदात्मा, तस्य योगः सदात्मयोगः,

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तस्मादिति। अस्तित्वरूपेण सर्वग इत्यर्थः। २. देहं परित्यज्य, आत्मा कया गत्या यातीति न केनापि मर्त्येन वक्तुं शक्यमिति "अमर्त्यगत्या" इत्युक्तम्।

(०८३५) १. ब्रह्मद्विड्भ्य इत्यर्थः, पञ्चम्यन्तं पदम्; २. तेन=धनुषेत्यर्थः।

(०८३६) १. आत्तं=गृहीतम्; २. आसिनोति=आसमन्ताद् बध्नाति।

(०८४३) १. दृशान इति-दृश् धातोः **"युधिबुधिदशेः किच्च"** इत्युणादिः (२।९०) कर्तरि "आनच्" प्रत्ययः, किद्वदतिदेशश्च तस्य। पश्यतीति दृशानः;

(०८४४) १. जीवाय-जातावेकवचनम्।

(०८४५) १. विचित्रयोनिभ्य आततं विचित्रं विश्वमित्यभिप्रायः; २. तद्यथा-योजनगन्धा पिपीलिका, दूरश्रवाः क्रुञ्चः, चिराय पर्याप्तं जलमाददान उष्ट्रः, बहुप्रसूः सर्पिणी। एवमूह्यं तथा योनिवैचित्र्यम्।

(०८४७) १. विरामं=विक्रीडनम्।

(०८४६) १. **आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया। मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्। मारुतस्तूरसि चरन्मन्दं जनयति स्वरम्** ।। इति श्लोकात्मिका पाणिनीयशिक्षा इहानुसन्धेया।।

(०८५५) १. यथा—त्रिककुत्, त्रैष्टुभम्, त्रिबन्धनम् इत्यादिरूपेण।

(०८५६) १. विगतो लासो विलासः=दुःखमिति यावत्, विशिष्टो लासो वा विलासः=सुखञ्च।

(०८५७) १. हे मर्त्या गायन्तु=स्तुवन्तु भवन्तः।

(०८५९) १. सकलस्य=चतुर्विधसृष्टेरिति।

(०८६२) १. अतएव लोकैषणा-वित्तैषणा-पुत्रैषणा च परिहर्तव्या भवति।

(०८६६) १. अविकल्पतो=निश्चयतो निःसंशयमित्यर्थः; २. ना=पुरुषः।

(०८६६) १. सर्वशरीरजा=सर्वेषां जगदन्तर्वर्तिनां प्राणिनां यावद्धि पशुपक्षिणां तथा जडपदार्थानामपि शरीरेषु अङ्गसौन्दर्यं शुभाङ्गत्वं दृश्यते, तत्तमेव शुभाङ्गं सर्वदाऽऽख्याति।

(०८७०) १. अमर्त्यकर्मा=सततकर्मा; २. जगच्छयानं=जगति वर्तमानम्; ३. रहस्यं=साधारण्येन ज्ञातुमशक्ये गुप्ते धाम्नि वर्तमानो= निगूढस्तमित्यर्थः।

(०८७३) १. कातृवर्गः-शब्दक-वर्गः=गायक-वर्गो वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०८८०) १. अत्र विश्वशब्दो जडचेतनसमष्टिरूपजगद्वाचकः संज्ञाशब्दः। अत एवेह सर्वनामसंज्ञा तत्कार्याभावश्च द्रष्टव्यः।

(०८८१) १. नक्षत्रधर्मेण=अनश्वरधर्मेण=आप्रलयं स्थास्नुधर्मेणेत्यर्थः। जगदिति-कर्म।

(०८८२) १. निवृत्तं=अस्तङ्गतं वदन्ति।

(०८८३) १. संक्षेपः=समासः, विक्षेपो=व्यासः। २. संक्षेपशीलः=संक्षेपधर्मा।

(०८८४) १. क्षेमं=शरीरम्; २. गुप्तं=जीवनोपकरणै रक्षितम्; ३. ओकांसि=स्थानानि।

(०८९१) १. पञ्चति=विस्तारयति। पचि विस्तारवचने चौरादिको धातुः।

(०८९२) १. तस्या आश्रयस्तदाश्रयः। आश्रयः पात्रम्। तद्यथा—सर्वाङ्गो विकालाङ्गश्च। सुरूपः, कुरूपश्च। सुगन्धिः, निर्गन्धश्च। तरुणो जीर्णश्च। बह्वपत्योऽनपत्यश्च। सदारो विदारश्च, दाराः स्त्री। सधनो निर्धनश्चेत्यादि, त्रिलिङ्गोपेतायां चतुर्विधसृष्ट्यां स्वयमूह्यम्। यथा—सुरूपः पुमान् सुरूपा स्त्री, सुरूपमन्यत्। एतत् केवलं निदर्शनमात्रं दर्शितमस्माभिः।

(०८९३) १. आकलको=गणकः, कल संख्याने धातुः। धनेशस्याकलकः धनेशाकलकस्तस्मिन् सर्वमधिकृतं भवति वैभवं धनेशस्य, परन्तु गणकसमेतं सर्वं वैभवं धनेश एव निवसति वास्तवमेतत्। तथैव, प्रपदं गुणविभक्तमेतद् विश्वं तस्मिन्नेव सर्वपरिवृढे निवसति।

(०८९७) १. स विष्णुः सूर्यो वा।

(०९०६) १. तत इति—तस्मादन्य इत्यर्थः।

(०९१०) १. प्रतिसौरमण्डलमियं व्यवस्था द्रष्टव्या।

(०९२५) १. **नवो नवो भवति जायमानः।''** (ऋक् १० ।८५ ।१९ ।) चन्द्र इति शेषः।
२. समाना भा=प्रभा यस्य स सभः।

(०९२६) १. **''स नो बन्धुर्जनिता''** (यजुः ३२ ।१०) इत्यादि मन्त्रमत्र लिङ्गम्।

(०८३०) १. तम्=अक्षमित्यर्थः।

(०९३२) १. भानि=नक्षत्राणि, गृह्णन्ति=उपाददते ये ते ग्रहाः सूर्यादयः सप्त, राहुकेतुयुताश्च नव।

(०९३६) १. **''एकं सद्विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः।''**

(०९३७) १. प्रचष्टे—प्रपश्यति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(०६४०) १. **''सूर्य आत्मा जगतस्तस्थुषश्च''**(ऋक् १।११५।१) इति मन्त्रलिङ्गमत्र।

(०६४१) १. मायाभिः पुरुरूपमीयमानस्यास्येन्द्रस्य। **''इन्द्रो मायाभिः पुरुरूप ईयते''** (ऋक् ६।४७।१८) इति मन्त्रमत्रानुसन्धेयम्।

(०६४६) १. 'माम्' पदमिह जीवमात्राय प्रयुक्तम्।

(०६४६) १. यदुक्तं **'तमसः परस्तात्'** (यजुः ३१।१८) इति।।

(०६५३) १. आत्मचक्षुः=द्रष्टृरूपः।

(०६५६) १. ब्रह्मण्यः=सूर्यः; २. ब्रह्मण्यः=विष्णुः; ३. यन्त्रे=नियमे; ४. परिवृद्धस्य विश्वस्य हिताय। ५. देवः=विष्णुः सूर्यो वा।

(०६६४) १. स्वस्थम्।

(०६७३) १. विश्वा=विश्वानीति।

(०६७४) १. वेत्ति=जानातीत्यर्थः।

(०६७५) १. अर्थ्यतमैः=अत्यन्तं याचितुमर्हैः। २. लिप्स्यैः=वाञ्छ्यैः।

(०६७८) १. ब्रह्मविवर्धनः=विष्णुः। २. जरितृकोशे=स्तोतुर्हृदये। ३. वाचः= द्वितीया-बहुवचनम्; ४. निशम्य=श्रुत्वा। **''श्रुधी हवम्''** (ऋक् १।२।१) इति मन्त्रलिङ्गम्।

(०६८३) १. जगदिति प्रथमैकवचनम्।

(०६८५) १. पुण्यकीर्तिशब्देन नामजपमाहात्म्यमधिगतं भवति। २. सत्पदम्=सत् स्वरूपं पदं ज्ञानमिति।

(०६८७) १. समाप्तं=सम्यगाप्तम्।

(०६८८) १. मनोजवेन=परमेश्वरेण (अक्षरेण); २. विष्णुः=सूर्यः। भुवनस्य नाभिः=नद्धा ३. दिविक्षयः=द्युलोकनिवसनः; ४. पूरयन्=आप्यायन् बध्नातीति=पूर्णबन्धुः।

(०६९१) १. वस्तुमर्हः=वस्यः।

(०६९४) १. दयते=ददाति।

(०६९६) १. प्रगच्छन्=प्रकर्षेण गच्छन्=अव्याहतगतिरित्यर्थः।

(०६९७) १. सता=सद्धेतुका इति, हेतौ तृतीया।

(१००३) १. अत्र मन्त्रलिङ्गम्—**''ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत।''** २. व्यज्य—अज्य=सर्वं कार्यगणं कारणगणञ्च पृथक्—पृथक् प्रकाश्य, स्वकं विनाशरहितं स्वरूपं प्रत्याययति, प्रत्यक्षमिव प्रकटयति।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१००५) १. दध धारणे, विपूर्वः करोत्यर्थे।

(१००६) १. नदीनां गङ्गा श्रेष्ठतमा, तस्मादिदमुच्यते।

(१०१५) १. याचन्ति आर्षानुकरणम्।

(१०१६) १. मन्त्रलिङ्गं च– **"सायं सायं गृहपतिर्नो अग्निः प्रातः प्रातः सौमनसस्य दाता।वसोर्वसोर्वसुदान एधि वयं त्वेन्धानस्तन्वं पुषेम।"** अथर्व १६।७।५५।। ३. वह्निः=अग्निः।

(१०२४) १. यदिति=विष्णुः।

(१०२५) १. यौति=सत्यान्यसत्यानि च मिश्रयति यथाज्ञाननिचितैर्वचोभिर्यौति= निश्चयेन व्यामोहयति स्वात्मानं परात्मानञ्च। यथा लोकेऽपि प्रत्येकं प्राणी–आत्मनश्छायां दृष्ट्वाऽस्यां मत्कमेव रूपं व्याप्तमिति मन्यमानः तस्यां प्रियायते। तथैव विद्वानपि चराचररूपं जगत् तद्रूपमेव मन्यमानो विशोको रमते स्वात्मनि निर्भयम्।

(१०३०) १. विभक्तम्=अव्यक्तम्; २. अव्यक्तस्वरूपेण=नानाशक्तिभेदेन।

(१०३१) १. परियातं=व्याप्तं विश्वं येन सः। २. निजं स्वरूपमित्यर्थः।

(१०६२) १. वा=अप्यर्थकः। २. तथा च**"त्वष्टा रूपाणि पिंशतु"** (अथर्व ५।२५।५) **"ये त्रिषप्ताः"** (अथर्व १।१।१।) इत्यादि पदं, रूपविभरणे मूलम्।

(१०३३) १. दिव्याः=दिवि भवाः=आकाशीया इत्यर्थः।

(१०३४) १. मन्त्रलिङ्गञ्च– **"मां हवन्ते पितरन्न जन्तवो अहं दाशुषे विभजामि भोजनम्।"** ऋक् १०।४८।१।।

(१०३५) १. एकः प्रधानः। २. वापः–वप्ता बीजस्य।

(१०३६) १. वा शब्द उपमावाचकः।

(१०४४) १. ब्रह्मण इदं ब्राह्मणं=जगत्। २. महत्=विष्णुः, **"तस्य नाम महद्यश"** इति (३२।३) याजुषान्मन्त्रलिङ्गात्।

(१०४८) १. उनत्ति–उन्दी क्लेदने, स्नेहान्वितां करोतीत्यर्थः।

(१०४६) १. पृथुलोचनानाम्-स्थूलदृशामित्यर्थः।

(१०५४) १. इरा-जलम्।

(१०५६) १. **"तस्मै वाताय हविषा विधेम।"**(ऋक् १०।१६८।४) इत्युक्तमन्त्रलिङ्गम्।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१०६०) १. मानं सम्मानम्। तस्य गोचरो मानगोचरः, मानविषयरहित इत्यर्थः। २. मानं प्रमाणम्। तस्य मानगोचरः, प्रमाणविषय इत्यर्थः।

(१०६१) १. तद्यथा—जलमग्निं निर्वापयति,—अग्निर्वा जलं दहति, स्वबलानुसारम्।

(१०६३) १. आत्मा-जीवः।

(१०६८) १. पिपर्ति=पूर्णं करोतीत्यर्थः।

(१०७२) १. तद्वत्-तेजोवृषवत्।

(१०७५) १. मनः—अन्तरिन्द्रियम्। २. निर्लिप्तः। ३. मनोग्रहेण-ज्ञानग्रहेण। ४. विदिक्षु-नानादिक्षु।

(१०७६) १. जन्यं-जनयितुमर्हम्। २. मर्त्यम्-मारयितुं योग्यम्।

(१०८६) १. मनुज इति जीवितस्योपलक्षणम्। २. जीवात्मबन्धुः=अन्यसाहाय्यानपेक्षः। ३. एको म्रियते—एको वा जायत इति च स्पष्टं दृश्यते।

(१०६३) १. दुर्गममित्यर्थः।

(१०६४) १. सूर्यो भास्करः, स सूर्यसिद्धान्तस्य प्रवक्ता। स च।

(१०६८) १. सदैति-सदा एति=प्राप्नोति।

(११०४) १. भूतभव्ये=भूतं, भविष्यच्च।

(११०५) १. सूर्यस्य=सरणशीलस्य सपरिच्छदस्य सर्वस्य ब्रह्माण्डस्येति भावः। २. **''यस्मिन् क्षियन्ति प्रदिशः षडुर्वी।''** अथर्व १३।३।१।। **''तस्मिन् ह तस्थुर्भुवनानि विश्वा।''** यजुः ३१।१६।।

(११०७) १. सनातन इति यदुक्तं तत्र मन्त्रलिङ्गम्—**''पुरुवसुर्हि मघवन्त्सनादसि।''** ऋक् ७।३२।२४।।

(११०८) १. सूर्य इत्युपलक्षणमात्रम्। सर्वं तेन प्राग्भवमेव पुनः पुनः सृज्यते, न तु नूतनं क्रियते। **''यथापूर्वमकल्पयद्''** (ऋक् १०।१६०।३) इति मन्त्रलिङ्गात्।

(११०६) १. खरांशुः—सूर्यः।

(१११०) १. सर्वयोनिसामान्ये स्त्रीग्रहणम्।

(१११५) १. सनातनः=सूर्यः, इह संग्रहे पठितत्वात्।

(१११७) १. घञ्-अकर्तरि। कर्तृभिन्ने कारके भवतीत्यर्थः।

(११२०) १. विष्णुप्रत्ताप्तशक्तेः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(११२२) १. सत्यमनाः=अबाधितज्ञानः।

(११२६) १. करणस्य=कण्ठस्य भेदात्। २. अग्न्याशयनिर्माणभेदात्। ३. बलाबलं=शरीरबलाबलम्। ४. विविधै रोगैरपि वाग्विहन्यते।

(११२७) १. अत्रेति जङ्गमवर्गे।

(११३१) १. सूर्य इत्युपलक्षणम्, सर्वे ग्रहा ज्ञेयाः।

(११३७) १. रमणीयम्। रमणीयस्य दातारं वा।

(११४१) १. घृतं जलं। तच्च पवनोऽश्नाति।

(११४३) १. वनानि=विभागाः, दिनं—निशा—मासो—वर्षमित्यादयः। तेषां सर्वेषां ग्रहैरेव विभागः। तस्माज्ज्योतींषि वनानि। नक्षत्राणि वनानि, तानि राशिं विभजन्ति। ज्ञानानि वनानि, इदमिदं वेति तानि विभजन्ति। एवं सर्वत्रोह्यम्।

(११४८) १. समाप्तुमीर्ते=सम्यग्—एकीभावेन वा—आप्तुं प्रयतते।

(११५१) १. सूर्यः।

(११६६) १. भयं करोति। २. भयं कृन्तति।

(११७०) १. विविधरूपेषु तत्तद्रूपेणाविर्भूत इत्यर्थः।

(११७८) १. खगः—सूर्यः। सूर्य इत्युपलक्षणं ग्रहोपग्रहसमेतस्य नक्षत्रमण्डलस्य। २. खगः—पक्षी। ३. सुपर्णम्—सूर्यं सपरिच्छदम् पक्षिणं वा तथाविधोपकरणसमेतम्।**"स सुपर्णो गरुत्मान्।"** (ऋक् १।१६४।४६) इति च मन्त्रलिङ्गम्।

(११९५) १. सा एव स्थाली।

(१२०२) १. तृन्नन्तः=दमयिता। २. यस्यति=प्रयतते। ३. विघ्नापहाराय विधिर्नमस्यः।।

(१२०४) १. ना इति निषेधार्थे। पराजितः विषयैः पराभूतः, तथा नेति=नापराजितः।

(१२२५) १. स इति कृतव्याख्यानं विष्णोर्नाम।

(१२२८) १. स्वार्थवद्—विशेषणकृतः, उपसर्गविद्योतितश्च योऽर्थस्तद्वदित्यर्थः।

(१२३१) १. स्वपरिधौ।

(१२३४) १. दातारमग्र्यमिति=विष्णुं सूर्यम् अग्निं वा। लोके चापि पश्यामः—वैश्वानरोऽग्निः सर्वान्तः प्रविष्टः सर्वं यथाकामं प्रीणाति।

(१२३५) १. विविधस्वरूपः=विविधदेवरूप इत्यर्थः। २. शतशब्दो बहुपर्यायः।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(१२३७) १. सुषिराण्यङ्गप्रत्यङ्गानि समूह्यैकीकृतम्। २. जायत इति जनुः।

(१२४०) १. विचारवत्=विचारयुक्तम्, गतिशीलमित्यर्थः। विचरणयुक्तं वा।

(१२४२) १. वर्ष्म=शरीरम्।

(१२४३) १. नैव दृश्यः=द्रष्टुमशक्यः २. सूर्यः=सरणशीलं सर्वम्।

(१२४७) १. आजिहीते=आदत्ते।

(१२५२) १. चोऽप्यर्थे।

(१२५३) १. विक्रमधर्माणं=गतिशीलमित्यर्थः।

(१२५४) १. भुक्तमात्रं=भोग्यतामितम्। व्यवहृतमित्यर्थः।

(१२५६) १. असावहमिति वा।

(१२६३) १. सबाहुमूलकौ।

(१२७२) १. **''अतो भिस ऐस् वा''** इति (कातन्त्र-व्याकरणे) सूत्रं, तेन मनुष्येभिः, देवेभिः, रथेभिरिति वेदे प्रयुक्ताः शब्दा लोकेऽपि प्रयुज्यन्ते। वेदे च भिस ऐस् वैकल्पिको दृश्यते सामान्येन, तथा च यथा—**''वीरेभिरश्वैः''**।

(१२७५) १. कामवशं=यथेष्टम्। २. लषन्ति=कामयन्ते। प्राणवन्त इति शेषः।

(१२९०) १. सूर्य-चन्द्रमसोर्वक्रता न भवति।

(१२९२) १. **''वशेदं सर्वमभवत्, यावत् सूर्यो विपश्यति''**। अथर्व १० ।१० ।३४ ।।

(१२९४) १. जरठो=वृद्धः।

(१२९५) १. शार्दूलविक्रीडितं छन्दः।

(१२९८) १. सः=विष्णुः।

(१२९९) १. पपिः सोमः। **''पपानो देवेभ्यो०''** ऋक् ६ ।४४ ।७ ।।

(१३०१) १. समाप्यम्=सम्यगाप्तं सम्पूर्णतया व्याप्तमित्यर्थः।

(१३०६) १. व्यवहारे आयप्रत्ययस्याभावाद् अनुदात्तेत्त्वादात्मनेदं प्राप्तमपि **'छन्दोवत् कवयः कुर्वन्ति'** (महा० १ ।४ ।३) इति वचनात् परस्मैपदमपि साधु।

(१३१०) १. सूर्यः।

(१३१३) १. ना=पुरुषः। बहुनामकीर्त्यः=बहुभिर्नामभिः कीर्तयितुं योग्य इति।

(१३१७) १. द्वेष एव तमः, अस्माच्च तमसस्तारयितेत्यर्थः।

(१३२१) १. अर्य=स्वामिनम्। **'अर्यः स्वामिवैश्ययोः'** (पा० ३ ।२ ।१०३)

(१३२२) १. मर्त्यो=होता यजमानादिरूपश्च, तथा वस्तु च यज्ञीयं सर्वं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णुरूपमित्यर्थः।

(१३२४) १. विचित्रचित्ररमणीयं यज्ञमित्यर्थः। २. तत्=हविः।

(१३३०) १. **''जागृविं विभुं विश्पतिम्''।** ऋक् ६।१५।८।। २. **''अध्वरे ध्रुवम्''।** ऋक् ६।१५।७।।

(१३३२) १. **''विश्वेदेवा यजमानश्च सीदत''।** यजुः १५।५४ इति च मन्त्रलिङ्गम्।

(१३३६) १. तथा च मन्त्रलिङ्गम्—१. **''ताभिः सयुक् सरथं देव ईयतेऽस्य विश्वस्य भुवनस्य राजा''।** ऋक् १०।१६८।२। २. **''विश्वा ते धाम वरुण प्रियाणि।''** ऋक् ७।८७।२।

(१३३७) १. **''ऋतञ्च सत्यञ्चाभीद्धात्तपसोऽध्यजायत।''** ऋक् १०।१९०।१।।

(१३४१) १. **स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत। व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशत्।**

(१३४२) १. मनःशुक्रौ=चन्द्रशुक्रौ, सूर्यसमानवर्गराशिगौ चेत्। मनः=चन्द्रः। सूर्यः=आत्मा। समानबन्धुः=समानबन्धनः।

(१३४४) १. **''तस्मा इडां सुवीरामायजामहे सुप्रतूर्त्तिमनेहसम्।''** ऋक् १।४०।४।।

(१३४५) १. लोक्यः— लोके भवो दृश्यो वा। १. 'चक्र प्रतिघाते', व्योमाध्वनि सर्वं प्रतिहतं भवति भिन्नं-भिन्नं प्रतिभासते इत्यर्थः।

(१३५४) १. ''आनन्दो वै सः'' इत्यानन्दस्य विष्णोः सुखं रमणीयं रथं स्थानं वा लभन्त इति।

(१३५५) १. एकवीरः=सूर्यो विष्णुर्वा।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिशिष्टम्-४

श्रीविष्णुसहस्रनाम्नां वर्णानुपूर्व्या सूची (५०१ – १०००)

{अस्यां सूच्यां संस्कृतवर्णमालानुसारं नामानि दीयन्ते। अनुस्वारान्तानि सविसर्गाणि च अक्षराणि प्रथमं दीयन्ते। वर्गाणां पञ्चमवर्णसंयुक्तान्यक्षराणि यथाक्रममवलोकनीयानि। सूच्याः क्रमस्त्वित्थं ज्ञेयः—अं (ं), अः (ः), अ (–), आ (ा), इ (ि), ई (ी), उ (ु), ऊ (ू), ऋ (ृ), ॠ (ॄ), ए (े), ऐ (ै), ओ (ो), औ (ौ), क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म्, य्, र्, ल्, व्, श्, ष्, स्, ह्। सङ्केतः— **श्लोकपृ०**=विष्णुसहस्रनामश्लोकपृष्ठाङ्कः, **स० भा० पृ०**= सत्यभाष्यपृष्ठाङ्कः}

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
	अ				
५०१	अक्रूरः	९१५	१११	९५८	९५८
५०२	अक्षोभ्यः	८०१	९९	८५५	८५८
५०३	अक्षोभ्यः	९९९	१२०	१०२५	१०३२
५०४	अग्रजः	८९१	१०८	९३७	९४२
५०५	अचलः	७४५	९२	७६७	८०५
५०६	अचिन्त्यः	८३२	१०२	८८५	८९२
५०७	अजः	५२१	६९	५९४	५९४
५०८	अजितः	५४९	७२	६२२	६२३
५०९	अणुः	८३५	१०३	८९५	८९५
५०९	अद्भुतः	८९५	१०८	९३७	९७५
५१०	अधाता (धाता)	९५१	११५	९८५	९८६
५११	अधृतः	८४२	१०३	८९५	९०२
५१२	अनघः	८३१	१०२	८८५	८९२
५१३	अनन्तः	६५९	८३	७१९	७२६
५१४	अनन्तः	८८६	१०८	९३७	९३७
५१५	अनन्तरूपः	९३२	११३	९७१	९७१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
५१६	अनन्तश्रीः	६३३	११३	६७१	६७२
५१७	अनन्तात्मा	५१८	६८	५८३	५८६
५१८	अनलः	७११	८६	७६७	७७३
५१६	अनादिः	६४१	११४	६७८	६७८
५२०	अनामयः	६८६	८६	७४०	७४८
५२१	अनिरुद्धः	६३८	८१	७०४	७०८
५२२	अनिर्देश्यवपुः	६५६	८३	७१६	७२४
५२३	अनिर्विण्णः	८६२	१०८	६३७	६४३
५२४	अनिलः	८१२	१००	८६३	८६८
५२५	अनिवर्ती	५६६	७७	६७६	६७६
५२६	अनिवृत्तात्मा	७७४	६६	८२६	८३०
५२७	अनीशः	६२६	८०	६६८	६६६
५२८	अनेकमूर्तिः	७२१	६०	७७८	७८१
५२६	अन्तकः	५२०	६८	५८३	५६२
५३०	अन्नम्	६८३	११८	१००८	१०१४
५३१	अन्नादः	६८४	११८	१००८	१०१५
५३२	अपराजितः	७१६	८६	७६७	७७७
५३३	अपराजितः	८६२	१०५	६१६	६१६
५३४	अप्ययः	६००	१०६	६४६	६४८
५३५	अप्रतिरथः	६६३	८१	७०४	७०८
५३६	अभिप्रायः	८७१	१०६	६२२	६२६
५३७	अमानी	७४७	६६	८०८	८०८
५३८	अमितविक्रमः	५१६	६८	५८३	५८६
५३६	अमितविक्रमः	६४१	८१	७०४	७१०
५४०	अमूर्तिः	८३०	१०२	८८५	५६१
५४१	अमूर्तिमान्	७२०	६०	७७८	७८०
५४२	अमृतपः	५०४	६७	५७३	५७४
५४३	अमृतवपुः	८१४	१००	८६३	८७०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
५४४	अमृताशः	८१३	१००	८६३	८६६
५४५	अम्भोनिधिः	५१७	६८	५८३	५८७
५४६	अरौद्रः	६०६	११०	६५१	६५१
५४७	अर्कः	७६५	९८	८४४	८४६
५४८	अर्चितः	६३४	८१	७०४	७०४
५४९	अर्चिष्मान्	६३३	८१	७०४	७०४
५५०	अर्हः	८७३	१०६	९२२	९२६
५५१	अव्यक्तः	७२२	९०	७७८	७८२
५५२	अश्वत्थः	८२४	१०१	८७३	८८१
	आ				
५५३	आत्मयोनिः	९८५	११९	१०१९	१०१९
५५४	आदित्यः	५६३	७३	६३४	६४१
५५५	आधारनिलयः	६५०	११५	६८५	६८५
५५६	आनन्दः	५२६	६९	५९५	५९९
५५७	आनन्दी	५६०	७३	६३४	६३७
५५८	आश्रमः	८५२	१०४	९०७	९११
	इ				
५५९	इन्द्रकर्मा	७८६	९७	८३६	८४१
	उ				
५६०	उत्तारणः	९२३	११२	९६५	९६५
५६१	उदीर्णः	६२४	८०	६९८	६९८
५६२	उदुम्बरः	८२३	१०१	८७३	८८०
५६३	उद्भवः	७९०	९८	८४४	८४४
	ऊ				
५६४	ऊर्जितशासनः	९१०	११०	९५१	९५४
५६५	ऊर्ध्वगः	८५४	११५	९८५	९८६
	ए				
५६६	एकः	७२५	९१	७८५	७८५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
५६७	एकपात्	७७२	६५	८२५	८२८
५६८	एकात्मा	६६५	११६	६६३	६६८
	क				
५६६	कः	७२८	६१	७८५	७८६
५७०	कथितः	८४८	१०४	६०७	६०८
५७१	कनकाङ्गदी	५४१	७१	६१२	६१५
५७२	कपिः	८६६	१०६	६४६	६४७
५७३	कपिलः	८६८	१०६	६४६	६४७
५७४	कपीन्द्रः	५०१	६६	५६३	५७१
५७५	कान्तः	६५४	८३	७१६	७२२
५७६	कामदेवः	६५१	८३	७१६	७२०
५७७	कामपालः	६५२	८३	७१६	७२०
५७८	कामी	६५३	८३	७१६	७२१
५७६	कालनेमिनिहा	६४२	८२	७११	७११
५८०	किम्	७२६	६१	७८५	७८६
५८१	कुण्डली	६०७	११०	६५१	६५२
५८२	कुन्दः	८०६	१००	८६३	८६५
५८३	कुन्दरः	८०८	१००	८६३	८६४
५८४	कुमुदः	५८६	७६	६६८	६७०
५८५	कुमुदः	८०७	१००	८६३	८६३
५८६	कुम्भः	६३५	८१	७०४	७०५
५८७	कुवलेशयः	५६०	७६	६६८	६७०
५८८	कृतकर्मा	७८८	६७	८३६	८४२
५८६	कृतज्ञः	५३२	७०	६०५	६०७
५६०	कृतागमः	६५५	८३	७१६	७२३
५६१	कृतागमः	७८६	६७	८३७	८४३
५६२	कृतान्तकृत्	५३७	७०	६०५	६११
५६३	कृशः	८३७	१०३	८६५	८६७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
५६४	कृष्णः	५५०	७२	६२२	६२४
५६५	केशवः	६४८	८२	७११	७१५
५६६	केशिहा	६४६	८२	७११	७१६
६६७	क्षमिणां वरः	६१६	१११	६५८	६६२
६६८	क्षामः	८५४	१०४	६०७	६१३
६६६	क्षितीशः	६६१	११६	१०१६	१०२३
६००	क्षेमकृत्	५६६	७७	६७६	६७८
	ख				
६०१	खण्डपरशुः	५६८	७४	६४५	६४६
	ग				
६०२	गतिसत्तमः	५६६	७३	६३४	६४४
६०३	गदाग्रजः	७६४	६४	८१७	८२४
६०४	गदाधरः	६६७	१२०	१०२५	१०२६
६०५	गभीरः	५४३	७१	६१२	६१८
६०६	गभीरात्मा	६३७	११३	६७१	६७५
६०७	गहनः	५४४	७१	६१२	६१८
६०८	गुणभृत्	८३६	१०३	८६५	८६६
६०६	गुप्तः	५४५	७१	६१२	६१६
६१०	गुह्यः	५४२	७१	६१२	६१७
६११	गोपतिः	५६२	७६	६६८	६७३
६१२	गोप्ता	५६३	७६	६६८	६७३
६१३	गोविन्दः	५३६	७१	६१२	६१४
६१४	गोहितः	५६१	७६	६६८	६७२
	घ				
६१५	घृताशीः	७४४	६२	७६७	८०४
	च				
६१६	चक्रगदाधरः	५४६	७१	६१२	६२०
६१७	चक्री	६०८	११०	६५१	६५३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६१८	चक्री	६६५	१२०	१०२५	१०२६
६१९	चतुरश्रः	६३६	११३	६७१	६७४
६२०	चतुरात्मा	७६६	९५	८२५	८२५
६२१	चतुर्गतिः	७६८	९५	८२५	८२५
६२२	चतुर्बाहुः	७६६	९५	८२५	८२५
६२३	चतुर्भावः	७७०	९५	८२५	८२५
६२४	चतुर्मूर्तिः	७६५	९५	८२५	८२५
६२५	चतुर्वेदवित्	७७१	९५	८२५	८२५
६२६	चतुर्व्यूहः	७६७	९५	८२५	८२५
६२७	चन्दनाङ्गदी	७४०	९२	७९७	८००
६२८	चलः	७४६	९२	७९७	८०६
६२९	चाणूरान्ध्रनिषूदनः	८२५	१०१	८७३	८८३
	छ				
६३०	छिन्नसंशयः	६२३	७६	६६०	६६०
	ज				
६३१	जनजन्मादिः	६४७	११४	६७८	६८२
६३२	जननः	६४६	११४	६७८	६८२
६३३	जन्ममृत्यु-जरातिगः	६६६	११६	६६३	६६६
६३४	जयः	५०६	६७	५७३	५७७
६३५	जयन्तः	७९८	९८	८४४	८५३
६३६	जितमन्युः	६३४	११३	६७१	६७३
६३७	जितामित्रः	५२४	६६	५६४	५६७
६३८	जीवः	५१३	६८	५८३	५८३
६३९	जीवनः	६३०	११२	६६५	६६६
६४०	ज्योतिः	८७७	१०७	६२६	६३१
६४१	ज्योतिरादित्यः	५६४	७३	६३४	६४२
६४२	ज्योतिर्गणेश्वरः	६१६	७६	६६०	६६३

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यंभाष्यपृ०
	त				
६४३	तत्	७३१	९१	७८५	७९१
६४४	तत्त्वम्	६६३	११६	६६३	६६७
६४५	तत्त्ववित्	६६४	११६	६६३	६६७
६४६	तन्तुवर्धनः	७८५	९७	८३७	८४०
६४७	तारः	६६८	११७	१०००	१००२
६४८	तीर्थकरः	६६१	८७	७४६	७५०
६४९	तेजोवृषः	७५७	९४	८१७	८१८
६५०	त्रिदशाध्यक्षः	५३५	७०	६०५	६१०
६५१	त्रिपदः	५३४	७०	६०५	६०९
६५२	त्रिलोकधृक्	७५१	९३	८०८	८१२
६५३	त्रिलोकात्मा	६४६	८२	७११	७१४
६५४	त्रिलोकेशः	६४७	८२	७११	७१४
६५५	त्रिविक्रमः	५३०	६६	५६४	६०१
६५६	त्रिसामा	५७४	७५	६५५	६५५
	द				
६५७	दक्षः	६१७	१११	६५८	६६०
६५८	दक्षिणः	६१८	१११	६५८	६६१
६५९	दण्डः	८५६	१०५	९१६	९१७
६६०	दमः	८६१	१०५	९१६	९१६
६६१	दमयिता	८६०	१०५	९१६९१८	
६६२	दर्पदः	७१३	८६	७६७	७७५
६६३	दर्पहा	७१२	८६	७६७	७७४
६६४	दारुणः	५६६	७४	६४५	६४७
६६५	दाशार्हः	५११	६७	५७३	५७८
६६६	दिविस्पृक्	५७१	७४	६४५	६४६
६६७	दिशः	६४०	११३	६७१	६७७
६६८	दीप्तमूर्तिः	७१६	९०	७७८	७८०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६६६	दुरतिक्रमः	७७६	६६	८२६	८३२
६७०	दुरारिहा	७८१	६६	८२६	८३६
६७१	दुरावासः	७८०	६६	८२६	८३५
६७२	दुर्गः	७७६	६६	८२६	८३४
६७३	दुर्गमः	७७८	६६	८२६	८३४
६७४	दुर्जयः	७७५	६६	८२६	८३१
६७५	दुर्धरः	७१५	८६	७६७	७७६
६७६	दुर्लभः	७७७	६६	८२६	८३३
६७७	दुष्कृतिहा	६२४	११२	६६५	६६६
६७८	दुःस्वप्ननाशनः	६२६	११२	६६५	६६७
६७६	दृढः	५५१	७२	६२२	६२५
६८०	दृप्तः	७१४	८६	७६७	७७५
६८१	देवकीनन्दनः	६८६	११६	१०१६	१०२०
६८२	द्युतिधरः	७५८	६४	८१७	८१८
६८३	द्रविणप्रदः	५७०	७४	६४५	६४८
	ध				
६८४	धनञ्जयः	६६०	८३	७१६	७२६
६८५	धन्यः	७५४	६३	८०८	८१५
६८६	धनुर्धरः	८५७	१०५	६१६	६१६
६८७	धनुर्वेदः	८५८	१०५	६१६	६१७
६८८	धराधरः	७५६	६३	८०८	८१६
	न				
६८६	नन्दः	५२८	६६	५६४	६००
६६०	नन्दकी	६६४	१२०	१०२५	१०२६
६६१	नन्दनः	५२७	६६	५६४	५६६
६६२	नन्दिः	६१८	७६	६६०	६६३
६६३	निग्रहः	७६१	६४	८१७	८२१
६६४	नियन्ता	८६४	१०५	६१६	६२०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६९५	नियमः (अनियमः)	८६५	१०५	९१६	९२१
६९६	निर्गुणः	८४०	१०३	८९५	९००
६९७	निर्वाणम्	५७७	७५	६५५	६५६
६९८	निवृत्तात्मा	५९७	७७	६७६	६७७
६९९	निष्ठा	५८३	७५	६५५	६६५
७००	नैकः	७२६	९१	७८५	७८६
७०१	नैकजः	८६०	१०८	९३६	९४१
७०२	नैकशृङ्गः	६७३	६४	८१७	८२२
७०३	न्यग्रोधः	८२२	१०१	८७३	८७८
	प				
७०४	पणः	९५८	११५	९८५	९९३
७०५	पदमनुत्तमम्	७३२	९१	७८५	७९१
७०६	परायणम्	५८५	७५	६५५	६६७
७०७	पर्जन्यः	८१०	१००	८६३	८६६
७०८	पर्यवस्थितः	९३१	११२	९६५	९७०
७०९	पापनाशनः	९९२	११९	१०१९	१०२४
७१०	पावनः	८११	१००	८६३	८६८
७११	पुण्यः	६८७	८६	७४०	७४७
७१२	पुण्यः	९२५	११२	९६५	९६६
७१३	पुण्यकीर्तिः	६८८	८६	७४०	७४७
७१४	पुण्यश्रवण-कीर्तनः	९२२	१११	९५८	९६४
७१५	पुरुजित्	५०६	६७	५७३	५७५
७१६	पुरुसत्तमः	५०७	६७	५७३	५७६
७१७	पुष्कराक्षः	५५६	७२	६२२	६३२
७१८	पुष्पहासः	९५२	११५	९८५	९८७
७१९	पूरयिता	६८६	८६	७४०	७४६
७२०	पूर्णः	६८५	८६	७४०	७४५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
७२१	पेशलः	६१६	१११	६५८	६५६
७२२	प्रग्रहः	७६०	६४	८१७	८२०
७२३	प्रजागरः	६५३	११५	६८५	६८८
७२४	प्रणवः	६५७	११५	६८५	६६२
७२५	प्रद्युम्नः	६४०	८१	७०४	७०६
७२६	प्रपितामहः	६७०	११७	१०००	१००३
७२७	प्रमाणम्	६५६	११६	६६३	६६४
७२८	प्रमोदनः	५२५	६६	५६४	५६८
७२६	प्राग्वंशः	८४५	१०३	८६५	६०४
७३०	प्राणजीवनः	६६२	११६	६६३	६६६
७३१	प्राणदः	६५६	११५	६८५	६६१
७३२	प्राणनिलयः	६६०	११६	६६३	६६४
७३३	प्राणभृत्	६६१	११६	६६३	६६५
७३४	प्रियकृत्	८७४	१०६	६२२	६२८
७३५	प्रियार्हः	८७२	१०६	६२२	६२६
७३६	प्रीतिवर्धनः	८७५	१०६	६२२	६२६
	ब				
७३७	बृहत्	८३६	१०३	८६५	८६५
७३८	ब्रह्म	६६४	८४	७२८	७३०
७३६	ब्रह्मकृत्	६६२	८४	७२८	७२६
७४०	ब्रह्मज्ञः	६६६	८४	७२८	७३४
७४१	ब्रह्मण्यः	६६१	८४	७२८	७२८
७४२	ब्रह्मवित्	६६६	८४	७२८	७३१
७४३	ब्रह्मविवर्धनः	६६५	८४	७२८	७३१
७४४	ब्रह्मा	६६३	८४	७२८	७३०
७४५	ब्रह्मी	६६८	८४	७२८	७३३
७४६	ब्राह्मणः	६६७	८४	७२८	७३४
७४७	ब्राह्मणप्रियः	६७०	८४	७२८	७३५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
	भ				
७४८	भक्तवत्सलः	७३६	६१	७८५	७६६
७४६	भगवान्	५५८	७३	६३४	६३४
७५०	भगहा	५५६	७३	६३४	६३६
७५१	भयकृत्	८३३	१०२	८८५	८६३
७५२	भयनाशनः	८३४	१०२	८८५	८६४
७५३	भयापहः	६३५	११३	६७१	६७३
७५४	भारभृत्	८४७	१०४	६०७	६०७
७५५	भिषक्	५७६	७५	६५५	६६२
७५६	भीमः	६४८	११४	६७८	६८४
७५७	भीमपराक्रमः	६४६	११४	६७८	६८४
७५८	भूतावासः	७०८	८६	७६७	७६७
७६६	भूतिः	६३०	८०	६६८	७०२
७६०	भूरिदक्षिणः	५०२	६६	५६३	५७२
७६१	भूर्भुवः	६४२	११४	६७८	६७६
७६२	भूर्भुवःस्वस्तरुः	६६७	११७	१०००	१०००
७६३	भूशयः	६२८	८०	६६८	७००
७६४	भूषणः	६२६	८०	६६८	७०१
७६५	भेषजम्	५७८	७५	६५५	६६१
७६६	भोक्ता	८८८	१०८	६३६	६४०
	म				
७६७	मनोजवः	६६०	८७	७४६	७४६
७६८	महर्षिःकपिलाचार्यः	५३१	७०	६०५	६०५
७६६	महाकर्मा	६७२	८५	६३५	६३५
७७०	महाकर्मा	७८७	६७	८३६	८४२
७७१	महाक्रतुः	६७५	८५	७३५	७३८
७७२	महाक्रमः	६७१	८५	७३५	७३६

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
७७३	महागर्तः	८०४	६६	८५५	८६०
७७४	महातेजाः	६७३	८५	७३५	७३६
७७५	महान्	८४१	१०३	८६५	६०१
७७६	महानिधिः	८०६	६६	८५५	८६२
७७७	महाभूतः	८०५	६६	८५५	८६१
७७८	महामनाः	५५७	७२	६२२	६३३
७७६	महामूर्तिः	७१८	६०	७७८	७७६
७८०	महायज्ञः	६७७	८५	७३५	७३६
७८१	महायज्वा	६७६	८५	७३५	७३८
७८२	महार्हः	५२२	६६	५६४	५६५
७८३	महावराहः	५३८	७१	६१२	६१२
७८४	महाशृङ्गः	५३६	७०	६०५	६१०
७८५	महाहविः	६७८	८५	७३५	७४१
७८६	महाह्रदः	८०३	६६	८५५	८५६
७८७	महोदधिशयः	५१६	५८	५८३	५६१
७८८	महोरगः	६७४	८५	७३५	७३७
७८६	माधवः	७३५	६१	७८५	७६५
७६०	मानदः	७४८	६३	८०८	८०६
७६१	मान्यः	७४६	६३	८०८	८१०
७६२	मुकुन्दः	५१५	६८	५८३	५८५
७६३	मेदिनीपतिः	५३३	७०	६०५	६०८
७६४	मेधजः	७५३	६३	८०८	८१४
	य				
७६५	यज्ञः	६७१	११७	१०००	१००४
७६६	यज्ञकृत्	६७७	११८	१००८	१००६
७६७	यज्ञगुह्यम्	६८२	११८	१००८	१०१२
७६८	यज्ञपतिः	६७२	११७	१०००	१००५
७६६	यज्ञभुक्	६७६	११८	१००८	१०१०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
८००	यज्ञभृत्	६७६	११८	१००८	१००८
८०१	यज्ञवाहनः	६७५	११७	१०००	१००८
८०२	यज्ञसाधनः	६८०	११८	१००८	१०११
८०३	यज्ञाङ्गः	६७४	११७	१०००	१००६
८०४	यज्ञान्तकृत्	६८१	११८	१००८	१०१२
८०५	यज्ञी	६७८	११८	१००८	१०१०
८०६	यज्वा	६७३	११७	१०००	१००५
८०७	यत्	७३०	६१	७८५	७६०
८०८	यदुश्रेष्ठः	७०५	८८	७५६	७६३
८०९	यमः (अयमः)	८६६	१०५	६१७	६२२
८१०	योगी	८४६	१०४	६०७	६०६
८११	योगीशः	८५०	१०४	६०७	६१०
	र				
८१२	रक्षणः	६२८	११२	६६५	६६८
८१३	रणप्रियः	६८४	८६	७४०	७४४
८१४	रत्ननाभः	७६३	६८	८४४	८४७
८१५	रथाङ्गपाणिः	६६८	१२०	१०२५	१०३०
८१६	रविः	८८१	१०७	६२५	६३४
८१७	रविलोचनः	८८५	१०७	६२६	६३६
८१८	रुचिराङ्गदः	६४५	११४	६७८	६८१
	ल				
८१९	लक्ष्मीः	६४३	११४	६७८	६७६
८२०	लोकत्रयाश्रयः	६१४	७८	६८५	६८६
८२१	लोकनाथः	७३४	६१	७८५	७६४
८२२	लोकबन्धुः	७३३	६१	७८५	७६४
८२३	लोकसारङ्गः	७८३	६७	८३७	८३८
८२४	लोकस्वामी	७५०	६३	८०८	८११
८२५	लोकाधिष्ठानम्	८६४	१०८	६३७	६४४

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
	व				
८२६	वंशवर्धनः	८४६	१०३	८६५	६०६
८२७	वनमाली	५६१	७३	६३४	६३८
८२८	वराङ्गः	७३६	६२	७६६	७६६
८२६	वरुणः	५५३	७२	६२२	६२८
८३०	वसुः	६६६	८७	७४६	७५४
८३१	वसुप्रदः	६६३	८७	७४६	७५१
८३२	वसुप्रदः	६६४	८७	७४६	७५२
८३३	वसुमनाः	६६७	८७	७४६	७५४
८३४	वसुरेताः	६६२	८७	७४६	७५०
८३५	वाचस्पतिरयोनिजः	५७३	७४	६४५	६५३
८३६	वाजसनः	७६६	६८	८४४	८५१
८३७	वायुवाहनः	८५६	१०४	६०७	६१५
८३८	वारुणः	५५४	७२	६२२	६२६
८३६	वासुदेवः	६६५	८७	७४६	७५३
८४०	वासुदेवः	७०६	८६	७६७	७७०
८४१	विक्रमी	६०६	११०	६५१	६५४
८४२	विजितात्मा	६२०	७६	६६०	६६४
८४३	विदिशः	६३८	११३	६७१	६७६
८४४	विद्वत्तमः	६२०	१११	६५८	६६२
८४५	विधेयात्मा (अविधेयात्मा)	६२१	७६	६६०	६६५
८४६	विनयः	५०८	६७	५७३	५७६
८४७	विनयितासाक्षी	५१४	६८	५८३	५८४
८४८	विभुः	८८०	१०७	६२६	६३३
८४६	विरोचनः	८८२	१०७	६२६	६३४
८५०	विशुद्धात्मा	६३६	८१	७०४	७०६
८५१	विशोकः (अशोकः)	६३१	८०	६६८	७०२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
८५२	विशोधनः	६३७	८१	७०४	७०७
८५३	विश्वमूर्तिः	७१७	९०	७७८	७७८
८५४	विषमः	७४२	९२	७९७	८०२
८५५	विष्णुः	६५७	८३	७१९	७२४
८५६	विहायसगतिः	८७६	१०७	९२९	९२९
८५७	वीतभयः	९२१	१११	९५८	९६३
८५८	वीरः	६४३	८२	७११	७१२
८५९	वीरः	६५८	८३	७१९	७२५
८६१	वीरहा	७४१	९२	७९७	८०२
८६२	वीरहा	९२७	११२	९६५	९६८
८६३	वृक्षः	५५५	७२	६२२	६३०
८६४	वृषप्रियः	५९५	७६	६६८	६७५
८६५	वृषभाक्षः	५९४	७६	६६८	६७४
८६६	वेधाः	५४७	७२	६२२	६२२
८६७	वैखानः	९८७	११९	१०१९	१०१८
८६८	व्यग्रः	७९२	९४	८१७	८२२
८६९	व्यादिशः	९३९	११३	९७१	९७७
	श				
८७०	शङ्खभृत्	९९३	१२०	१०२५	१०२५
८७१	शतमूर्तिः	७२३	९०	७७८	७८३
८७२	शताननः	७२४	९०	७७८	७८४
८७३	शतानन्दः	६१७	७९	६९०	६९१
८७४	शत्रुजित्	८२०	१०१	८७३	८७६
८७५	शत्रुतापनः	८२१	१०१	८७३	८७८
८७६	शब्दसहः	९१२	११०	९५१	९५९
८७७	शब्दातिगः	९११	११०	९५१	९५५
८७८	शमः	५८१	७५	६५५	६६४
८७९	शर्वरीकरः	९१४	११०	९५१	९५७

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
८८०	शान्तः	५८२	७५	६५५	६६४
८८१	शान्तिः	५८४	७५	६५५	६६६
८८२	शान्तिदः	५८७	७६	६६८	६६६
८८३	शार्ङ्गधन्वा	६६६	१२०	१०२५	१०२८
८८४	शाश्वतस्थिरः	६२७	८०	६६८	७००
८८५	शिवः	६००	७७	६७६	६७६
८८६	शिशिरः	६१३	११०	६५१	६५७
८८७	शुभाङ्गः	५८६	७६	६६८	६६८
८८८	शुभाङ्गः	७८२	६७	८३७	८३७
८८९	शून्यः	७४३	६२	७६६	८०२
८९०	शूरजनेश्वरः	६४५	८२	७११	७१३
८९१	शूरसेनः	७०४	८८	७५६	७६१
८९२	शृङ्गी	७६७	६८	८४४	८५२
८९३	शोकनाशनः	६३२	८०	६६८	७०३
८९४	शौरिः	६४४	८२	७११	७१३
८९५	श्रमणः	८५३	१०४	६०७	६१२
८९६	श्रीकरः	६११	७८	६८५	६८७
८९७	श्रीदः	६०५	७८	६८५	६८५
८९८	श्रीधरः	६१०	७८	६८५	६८७
८९९	श्रीनिधिः	६०८	७८	६८५	६८६
९००	श्रीनिवासः	६०७	७८	६८५	६८६
९०१	श्रीपतिः	६०३	७७	६७६	६८३
९०२	श्रीमतां वरः	६०४	७७	६७६	६८४
९०३	श्रीमान्	६१३	७८	६८५	६८६
९०४	श्रीवत्सवक्षाः	६०१	७७	६७६	६८१
९०५	श्रीवासः	६०२	७७	६७६	६८३
९०६	श्रीविभावनः	६०९	७८	६८५	६८७
९०७	श्रीशः	६०६	७८	६८५	६८५

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६०८	श्रेयः	६१२	७८	६८५	६८८
	स				
६०६	संन्यासकृत्	५८०	७५	६५५	६६३
६१०	सङ्कर्षणोऽच्युतः	५५२	७२	६२२	६२६
६११	सङ्क्षेप्ता	५६८	७७	६७६	६७७
६१२	सत्कीर्तिः	६२२	७६	६६०	६६६
६१३	सत्कृतिः	७००	८८	७५६	७५६
६१४	सत्ता	७०१	८८	७५६	७५८
६१५	सत्त्ववान्	८६७	१०६	६२२	६२२
६१६	सत्पथाचारः	६५५	११५	६८५	६६०
६१७	सत्परायणः	७०३	८८	७५६	७५६
६१८	सत्यः	८६६	१०६	६२२	६२४
६१६	सत्यधर्मपरायणः	८७०	१०६	६२२	६२५
६२०	सत्यधर्मा	५२६	६६	५६४	६००
६२१	सत्यमेधाः	७५५	६३	८०८	८१५
६२२	सत्यसन्धः	५१०	६७	५७३	५७७
६२३	सदामर्षी	८६३	१०८	६३६	६४४
६२४	सद्गतिः	६६६	८८	७५६	७५६
६२५	सद्भूतिः	७०२	८८	७५६	७५८
६२६	सनात्	८६६	१०६	६४६	६४६
६२७	सनातनतमः	८६७	१०६	६४६	६४६
६२८	सन्तः	६२६	११२	६६५	६६६
६२६	सन्निवासः	७०६	८८	७५६	७६४
६३०	सप्तजिह्वः	८२७	१०२	८८५	८८७
६३१	सप्तवाहनः	८२६	१०२	८८५	८८६
६३२	सप्तैधाः	८२८	१०२	८८५	८८८
६३३	समावर्तः	७७३	६६	८२६	८२६
६३४	सर्वकामदः	८५१	१०४	६०७	६११

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६३५	सर्वज्ञः	८१५	१००	८६३	८७१
६३६	सर्वतश्चक्षुः	६२५	८०	६६८	६६८
६३७	सर्वतोमुखः	८१६	१००	८६३	८७२
६३८	सर्वदृग्व्यासः	५७२	७४	६४५	६५१
६३६	सर्वप्रहरणायुधः	१०००	१२०	१०२५	१०३२
६४०	सर्ववागीश्वरेश्वरः	८०२	६६	८५५	८५८
६४१	सर्वविज्जयी	७६६	६८	८४४	८५६
६४२	सर्वशस्त्रभृतांवरः	७५६	६४	८१७	८१६
६४३	सर्वसहः	८६३	१०५	६१६	६२०
६४४	सर्वासुनिलयः	७१०	८६	७६७	७७२
६४५	सवः	७२७	६१	७८५	७८७
६४६	सविता	८८४	१०७	६२६	६३६
६४७	सविता	६६६	११७	१०००	१००३
६४८	सहस्रार्चिः	८२६	१०२	८८५	८८५
६४६	सहिष्णुः	५६५	७३	६३४	६४३
६५०	सात्वतां पतिः	५१२	६७	५७३	५७६
६५१	सात्त्विकः	८६८	१०६	६२२	६२३
६५२	साम	५७६	७५	६५५	६५६
६५३	सामगः	५७५	७५	६५५	६५८
६५४	सामगायनः	६८८	११६	१०१६	१०१६
६५५	सिद्धः	८१६	१०१	८७३	८७६
६५६	सुखदः	८८६	१०८	६३६	६४०
६५७	सुतन्तुः	७८४	६७	८३७	८३६
६५८	सुधन्वा	५६७	७४	६४५	६५५
६५६	सुन्दः	७६२	६८	८४४	८४६
६६०	सुन्दरः	७६१	६८	८४४	८४५
६६१	सुपर्णः	८५५	१०४	६०७	६१४
६६२	सुमेधाः	७५२	६३	८०८	८१२

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
६६३	सुयामुनः	७०७	८८	७५६	७६६
६६४	सुरुचिः	८७८	१०७	६२६	६३२
६६५	सुलभः	८१७	१०१	८७३	८७३
६६६	सुलोचनः	७६४	६८	८४७	८४८
६६७	सुवर्णबिन्दुः	८००	६६	८५५	८५५
६६८	सुवर्णवर्णः	७३७	६२	७६७	७६७
६६६	सुवीरः	६४४	११४	६७८	६८०
६७०	सुव्रतः	८१८	१०१	८७३	८७५
६७१	सुषेणः	५४०	७१	६१२	६१५
६७२	सूर्यः	८८३	१०७	८२६	६३३
६७३	सोमः	५०५	६७	५७३	५७४
६७४	सोमपः	५०३	६७	५७३	५७३
६७६	स्तव्यः	६७६	८६	७४०	७४०
६७५	स्तवप्रियः	६८०	८६	७४०	७४१
६७७	स्तुतिः	६८२	८६	७४०	७४५
६७८	स्तोता	६८३	८६	७४०	७४३
६७६	स्तोत्रम्	६८१	८६	७४०	७४१
६८०	स्थूलः	८३८	१०३	८६५	८६८
६८१	स्रष्टा	५८८	७६	६६८	६६६
६८२	स्रष्टा	६६०	११६	१०१६	१०२२
६८३	स्वक्षः	६१५	७६	६६०	६६०
६८४	स्वङ्गः	६१६	७६	६६०	६६१
६८५	स्वधृतः	८४३	१०३	८६५	६०२
६८६	स्वयञ्जातः	६८६	११६	१०१६	१०१७
६८७	स्वस्ति	६०३	१०६	६४६	६५०
६८८	स्वस्तिकृत्	६०२	१०६	६४६	६५०
६८६	स्वस्तिदः	६०१	१०६	६४६	६५०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्रमाङ्कः	नाम	नामाङ्कः	श्लोकाङ्कः	श्लोकपृ०	सत्यभाष्यपृ०
९९०	स्वस्तिदक्षिणः	६०५	१०६	६४६	६५०
९९१	स्वस्तिभुक्	६०४	१०६	६४६	६५०
९९२	स्वाङ्गः	५४८	७२	६२२	६२३
९९३	स्वाभाव्यः	५२३	६६	५६४	५६७
९९४	स्वास्यः	८४४	१०३	८६५	६०३
	ह				
९९५	हरिः	६५०	८२	७११	७१८
९९६	हलायुधः	५६२	७३	६३४	६३६
९९७	हविः	६६८	८७	७४६	७५५
९९८	हुतभुक्	८७६	१०७	६२६	६३२
९९९	हुतभुक्	८८७	१०८	६३७	६३८
१०००	हेमाङ्गः	७३८	९२	७६७	७६८

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'बब्बर खालसा' में प्रकाशित सम्मति

श्री वासिष्ठ बहुत बड़े कोशविज्ञानी और भाषाविज्ञानी भी हैं। उन्होंने १२ पृष्ठों में छपने योग्य विष्णु के सहस्र (१०००) नामों की १६०० पृष्ठों में व्याख्या की है। इसे रचने में १२ वर्ष तक उन्होंने दिनरात एक किया। न समय पर भोजन न आराम; सारा समय इसी तप में लगाया, क्योंकि बालब्रह्मचारी होने के कारण घर गृहस्थी के झंझटों में समय के अपव्यय का तो प्रश्न ही नहीं था। इस में हर शब्द की पूरी व्युत्पत्ति व निरुक्ति दी गई है। प्रमाण सहित बताया है कि प्रत्येक शब्द कैसे बना, किस धातु से निष्पन्न हुआ और वेद में कैसे प्रयुक्त हुआ है, आदि। इसे पढ़ने पर एक हजार शब्दों के अर्थों का ऐसा सुन्दर ज्ञान होता है जैसा अन्यत्र दुर्लभ है। इसी कारण इस चार जिल्दों में प्रकाशित विपुलकाय ग्रन्थ—दो भाग १९६६ में छपे, दो भाग १९७१ में—का अब दूसरा संस्करण प्रकाशित हो रहा है। आदि शङ्कराचार्य, जिनके ब्रह्मसूत्र, उपनिषदों और गीता पर लिखे गये भाष्य बहुत प्रसिद्ध हुए, ने भी विष्णुसहस्रनाम पर भाष्य किया था; लेकिन श्री वासिष्ठकृत महाभाष्य के सामने वह सूर्य के सामने दीपक—के समान प्रतीत होता है।

पतंजलि-कृत अष्टाध्यायी का भाष्य अपने महत्त्व के कारण "महाभाष्य" के नाम से प्रसिद्ध हुआ। आज 'महाभाष्य' कहने से उसी का बोध होता है। मेरे ख्याल में वासिष्ठ-कृत भाष्य को भी महाभाष्य कहना चाहिए। दोनों में अन्तर स्पष्ट करने के लिये पहले को व्याकरण-महाभाष्य और दूसरे को विष्णुसहस्रनाम महाभाष्य या सत्य-महाभाष्य कहा जा सकता है।

७४ वर्षीय श्री वासिष्ठ अब भी नवयुवकों से कम नहीं। वे साहित्य-सेवा में आज भी प्राणपण से जुटे हैं। उनका समर्पित जीवन भावी साहित्यकारों का, प्रकाश-स्तम्भ की तरह, चिरकाल तक मार्गदर्शन करने में समर्थ है।

सुरेन्द्र 'अज्ञात'

अज्ञातवास, वार्ड नं० ३, म. नं० ५७,
ग्रा० पो० बङ्गा, पिन : १४४५०५
जि० जालन्धर।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'ब्रह्मविद्या' (अडयार लाइब्रेरी बुलेटिन)

में

प्रकाशित समीक्षा

सुविख्यात विष्णुसहस्रनाम नामक स्तोत्र महाभारत के अनुशासनपर्वान्तर्गत दानधर्म विभाग का १४६ वां अध्याय है। हिन्दुओं के दैनिक पाठ के योग्य स्तोत्र के रूप में लोकप्रियता के कारण यह स्तोत्र, महाभारत के ही भीष्मपर्व की अवयवभूत भगवद्गीता के समान, स्वतन्त्र ग्रन्थ का स्थान प्राप्त कर चुका है। दैनिक पाठ के समय भूमिकात्मक पद्य तथा ध्यान श्लोकों का संप्रयोग और इसके स्वतन्त्र भाष्यों की विद्यमानता भी ध्यान देने योग्य हैं। उक्त ग्रन्थ पर अनेक प्राचीन व्याख्याओं में से शङ्कराचार्य प्रणीत भाष्य विशेष उल्लेखनीय है। सम्प्रति समालोच्य, १५०० से अधिक पृष्ठों में निबद्ध, सम्यभाष्य उक्त ग्रन्थ पर आधुनिक संस्कृत व्याख्या है, जो व्याख्या वाङ्मय में प्रशंसनीय योगदान है। यह भाष्य अन्य सभी व्याख्याओं की अपेक्षा अधिक विस्तृत तथा परिपूर्ण है।

आधुनिक रचनाकार द्वारा आधुनिक पाठकों के लिए प्रणीत इस भाष्य की प्रमुख उल्लेखनीय विशेषताएं निम्न प्रकार हैं—

१. बड़े टाइप में मुद्रित मूल श्लोक के पश्चात् उस का पदच्छेद दर्शाया गया है।

२. प्रत्येक उद्भावना को मौलिक स्रोतों से उद्धृत ग्रन्थसन्दर्भों द्वारा प्रमाणित किया गया है।

३. प्रत्येक नाम का विवरण व्याकरण प्रक्रिया, पदार्थ, अभिप्राय तथा भावार्थ, अभिप्राय तथा भावार्थ की दृष्टि से पृथक्—पृथक् दिया गया है जिस को यथावश्यक वैदिक, पौराणिक, दार्शनिक तथा अन्य वाङ्मय से उद्धृत सन्दर्भों से प्रमाणित किया गया है।

४. मूल श्लोक और भाष्य के साथ हिन्दी अनुवाद भी दिया गया है।

भाष्य का विस्तार, उद्धरणों का वैपुल्य और भाष्य की सरल तथा प्रत्यक्ष शैली से ग्रन्थ की उपादेयता में महती वृद्धि हुई है और ग्रन्थकार का वैदुष्य तथा विद्या-वैविध्य सुतराम् झलकता है।

के० बी० शर्मा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।
भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।
यस्य भूमिः प्रमा अन्तरिक्षमथोदरम् । दिवं यश्चक्रे मूर्द्धानं तस्मै ज्येष्ठाय ब्रह्मणे नमः ।

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्री १०८ पं० सत्यदेवो वासिष्ठः

जन्मतिथिः -२७.८.१६१२

जन्मस्थानम् पञ्चाम्बुप्रान्तस्थजालन्धर- मण्डलान्तर्गत
माहलगहिला-ग्रामः

पिता पं० अनन्तराम सहजपालः

माता श्रीमती द्रौपदी

गुरवः श्री ब्रह्मदत्त जिज्ञासुः (विद्यारम्भगुरुः)
श्री नाथूराम मौद्गल्यः
श्री तिलकराम ब्रह्मचारी
(आयुर्वेदगुरू)
श्री शङ्कर‍राम त्रिपाठी (सामवेदगुरुः)
श्री रामचन्द्रभट्ट रटाटे (ऋगथर्वगुरुः)
पं० केदारनाथ सारस्वतः (काव्यगुरुः)
श्री त्रिलोकचन्द्र वसुः (संगीतशिक्षकः)

अधीतानि शास्त्राणि वेद-व्याकरण-निरुक्त-छन्दः-साहित्य-
ज्योतिषायुर्वेदादिशास्त्राणि

लब्धा उपाधयः सामस्वरभास्करः, आयुर्वेदाचार्यः,
साङ्गोपवेदवेदचतुष्टयी, आयुर्वेदानूचानः

अध्युष्टपदानि लवपुर-दिल्ली-भिवानीस्थ-
सनातनधर्मायुर्वेदमहाविद्यालय-प्रधानाध्यापकचरः
गुरुकुलझज्जरस्थायुर्वेदविभागाध्यक्षचरः

प्रणीता ग्रन्थाः नाडीतत्त्वदर्शनम् सत्याग्रहनीतिकाव्यम्
विष्णुसहस्रनाम-सत्यभाष्यम्

आवासः देवसदनम्, महम मार्गः, भिवानी-१२५०२१ (भारतम्)

आवरणपृष्ठे
ग्रन्थकर्तुश्छायाचित्रम्
श्री १०८ पं० सत्यदेवो वासिष्ठः
छायाचित्रकारः- श्री आर. के. शर्मा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitiz... Trust Foundation ... eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीविष्णुसहस्रनाम-सत्यभाष्यस्य शुद्धिपत्रकम्

लेखकस्य, यन्त्रचालकस्य, संशोधकस्य सम्पादकस्य वानवधानात् काश्चन अशुद्धयो ग्रन्थान्निःसारयितुं नाशक्यन्त। ता अत्र शुद्धिपत्रके निर्दिश्यन्ते। अध्येतारस्ताः संशोध्य ग्रन्थं पठितुं प्रार्थ्यन्ते। एतदतिरिक्तमपि पाठका यदि त्रुटीः पश्येयुस्तदा ग्रन्थप्रकाशकः सम्पादको वा कृपया सूचनीयः। अग्रिमे संस्करणे तासां विलोपार्थं यतिष्यते।

—सम्पादकः

पृष्ठे	पङ्क्तौ श्लोके वा	अशुद्धम्	शुद्धम्
आवरणपृष्ठे	२२	ममिख्या	मभिख्या
ऊ	२१	ससाधुवादैः	ससाधुवादाभिः
ऊ	२५	णाञ्च	णां
ऋ	१	कृति	पकृति
ऋ	६	समानोऽयं	सीनोऽयम्
ऋ	२७	रमां	रमा
		अवतरणिका	
४	२	दिमा	दिभवा
४	२२	न' मारभम्	नमारभै
५	६	निका नैशिका	निकीर्नैशिकी
७	३	वग	गव
७	३	वाय	वेद
११	१०	रहं	रहम्
११	१७	द्धि	द्धिरा
१२	२२	धानः।	धानः
१४	१	गुरुभ्य	गुरुभ्यः
१४	४	शैलि	शैली

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१६	२०	लिखनं	लेखनं
२०	३१	क्षिका	क्षिकी
३०	१२	प्रयच्छेत	प्रयच्छेताम्
३५	११	व्यज्यमान	लक्ष्यमाण
४१	१७	वस्ते	वो ये
४६	२३	१४	संख्या विलोपनीया
४६	३५	१५	संख्या विलोपनीया

पूर्वार्द्धम्

२	११	सिद्धार्थां=पीतसर्षपं	सिद्धार्थानां=पीतसर्षपाणां
३	१	पुल्लिंगो	पुँल्लिङ्गो
५	१२	निबध्नन्ती	निबध्नती
५	२६	शान्त	शन्त
६	१२	दुखं	दुःखं
१५	११	पते	पथे
१५	१२	पत लो	पथल
१७	६	जयन्ते	जायन्ते
१७	१२	तपो	तपा
२०	२१	क्तय आ	क्तीरा
२१	६	भासया	रोचिषा
२४	६	पेना	भेना
२४	६	विष्णुरुत	विष्णुः खलु
२८	२३	धर्त्ति	धरति
३०	२२	षट्कानयते	षट्कं लभते
३०	२३	बिलं	विलं
३१	३	यद्य	तद्य

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३१	२८	भ्रातृ	भ्राता
३२	२	चन्द्रमा	चन्द्रमाः
३४	८	महैश्वर्यत्वं	महैश्वर्यं
३४	१६	त्मेवा	त्मैवा
३७	२०	वित्रं	वित्रः
४१	२४	क्तमतोऽ	च्यत अ
४३	१६	नंहो	नंहा
४६	१८	गौणीवृच्या	गौणवृच्या
४६	३	बिलं	विलं
५१	३०	च तन्मतं	विलोक्यते
५२	१३	केशीवधात् केशव एव नाम केशिप्रणाशादिह केशवाभिधा	
५२	१४	द्धम्	द्धा
५४	२४	रनघो चिन्त्यो	रनघोऽचिन्त्यो
५७	१६	भस्म	भस्मा
५७	२०	धियंस्त्रि	धियन् त्रि
५८	२३	तमा	चिरा
६१	२१	पालनीयः	पालनीयं
६१	२१	पोषणीयः	पोषणीयं
६१	२६	रो नाम	राख्याञ्च
६३	२३	स स्थितो	निहितो
६३	२७	राजायते	राजीयति
६६	१४	षडर्त्तवः	षड्तवः
६७	२३	षडर्तुभिः	षड्भिर्ऋतुभिः
६७	२८	मिथुनः	मिथुनं
७०	४	ति ना	तिना

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७१	२४	सूर्य	सूर्या
७८	२५	प्रमाणवृन्दोऽपि न	प्रमाणवृन्दं न च
८४	१४	ञ्चिज्ज	ञ्च ज
८७	१३	आक्षिणी	अक्षिणी
९०	१४	कार्य	काय
९२	१	तन्म	सन्म
९३	१६	प्रणान्	प्राणान्
९३	१७	प्रणान्	प्राणान्
९७	१६	परिज्ञापयिता	परिज्ञापयता
८७	१९	सरता	सरत्य
९९	१६	न्त्वौ	न्त्वो
९९	१९	विधा	विधान्
९९	१९	वनस्पतयः	वनस्पतीन्
९९	१९	पुष्यन्ति	पुष्पयन्ति
९९	२५	सर्वविध	सर्वविध
१००	२५	सवै	सर्वै
१०५	२६	भाजनः	भाजनम्
१०६	१	यन्त्स्वा	यन् स्वा
१०७	१०	रुक्तो	रुक्तः
१०९	२४	हेतोः	नित्यं
११९	७	त्रिःकृत्वोऽत्र	त्रिरत्र
१२१	१२	मूलः	मूलं
१३२	११	ताद्भाव्यता	ताद्भाव्य
१३४	६	ध्यायता	ध्यायता
१३४	१६	यद्भवितृ	यन्नु भाव्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१३७	१५	मृष्य	मृश्य
१४१	३	सा या	योऽसौ
१४३	१३	देन	देत
१४४	६	गत्	गद्
१४५	१४	रक्षयि	रक्षि
१६३	७	व	च
१६८	१६	नात्रि	रात्रि
१६६	४	बाहूः	बाहू
१६६	५	आत्मन	आत्मनः
१६६	५	र्थीय	र्थीये
१६६	५	त्मन	त्मनः
१६६	२६	औष	ओष
१७१	२०	मन्त्यो	मत्यो
१७३	२२	त्न	न्न
१७४	१०	त्रिपुटात्मकोऽगु	त्रिपुटात्मकोऽङ्गु
१८२	२६	विवस्मान्	विवस्वान्
१८३	१६	स्यमानो	स्यन्
१६१	६	समनस्कमे	समनस्क ए
१६२	२२	पुरुरूपे	पुरुरूपो
१६६	१६	कृषकानाम्	कृषकाणाम्
१६६	२२	सेक्ता	सेक्तृ
२००	२६	तम्रं	तमं
२०४	१२	शलो	श्लो
२१०	२४	मत्यु	मृत्यु
२१३	१०	द्वान्स	द्वांस

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२१३	२५	ऽव्ये	ऽव्यये
२१४	२७	कंचन	किञ्चन
२१८	२५	गन्धः पत्रं फलं	गन्ध-पत्र-फल-
२२०	१	प्रजापतिः सर्वप्रजा	प्रजाः प्रजानामधिपो
२२०	२	धामेन च	धाम्ना परि
२२०	१८	तेषां	तासाम्
२२०	१८	लास्थीनां	लास्था
२२०	२२	तुर्यविध-	चतुर्विध
२२०	२३	त्यु स्त	त्युस्त
२२१	६	मृत्युरिदं	मृत्यु जगत्
२२२	१४	मेकै	मेकैकं
२२२	२७	क्षमोऽस्ति लोके	समर्थ आस्ते
२२५	४	यन्ति	यन्ते
२२५	५	ति प्रा	तिप्रा
२२५	८	युषी	युषि
२२६	६	भ्रमन्तं सगतिं	भ्रमत् सद्गतिमद्
२२८	१०	द्या अतपाः	मनुजाः
२२८	१५	शिक्षित्वा	शिक्षयित्वा
२२८	२४	कृल्प्य	कल्प्य
२३५	१०	धांम	धाम
२३६	४	उक्तः	संज्ञो
२४७	१श्रीपतिः	श्रीश उ श्रीनिवासः	श्रीनिवासः श्रिय ईश्वरः पतिः
२४८	२१	व्याप्तो	निष्ठो
२५१	८	विविधविकल्पवत्त्वं	ते विविधविकल्पवता
२५१	६	रूप	रूपेण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

२५५	६	वा	वा विदधाति
२५७	५	धिकस्य	धियश्च
२५६	१३	अश्वोष्ट्र	अश्वोष्ट्री
२५६	२६८	कृतो प्रवृत्तौ	कृतौ प्रवृत्तो
२६०	२६६	मः सः	मोऽसौ
२६१	२	न्तरानु	न्तराण्यु
२६३	११	प्रापयति वर्तते	प्रापयति
२६३	३०६	वह्नीं:	वह्निः
२६५	३०८	धरित्रि	महीस्व
२७५	२	द्वारान्	द्वाराणि
२७५	३	द्वारान्	द्वाराणि
२७७	१	स्थे जल एव	स्थास्वप्स्वेव
२८३	६	प्रतिप्राणि	प्रत्येकं प्राणी
२८३	६	नयन् (जन्मतः)	नयन् जन्म लभते,इति तत्त्वविदां निर्णयः। मनुष्यमन्तरा प्रायशः सर्व एव प्राणिनः स्वतः (जन्मतः)
२८३	७	प्रवहन्ति	निर्वहन्ति
२८४	४	कंचित्	किञ्चित्
२९३	३४७	अद्य यावत्	एव नित्यम्
२९४	३४९	र्यः स हि त्रैधमित्वा	र्यस्त्रिविधः स भूत्वा
२९६	३५१	पृथ्वी	भूमौ
२९७	३५४	नाभूतृणान्	नाभूतृणं
२९८	३५५	स्वका	अभि
३००	३५७	नान्यमियन्ति कञ्चित्	यान्ति न कञ्चिदन्यम्
३०१	६	प्रकाराणि	प्रकाराः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३०१	६	र्विविधानि	र्विविधाः
३०१	१५	चतुरस्त्र्य	चतुरस्त्रं
३०३	१	जीवायं	जीवाय
३०४	१६	स्तनथुर्वि	स्तनितं वि
३०४	२७	सत्यानृत्वं	सत्यानृतत्वं
३०८	१	शा वा	शावा
३०६	२६	तथा	तया
३१०	३६६	तमु	तदु
३१६	३७७	स	वै
३१६	३७७	काया त	कायस्त
३१६	२५	धर्मकानि	धर्मकाणि
३१६	२६	मेनदग्रे	मेतमग्रे
३१७	२०	भवति	भवन्ति
३१७	२३	ज्ञानापय	ज्ञापनाय
३१६	३७६	वो	यो
३२०	२३	किरणमिव	किरण इव
३२३	४	ञ्छशरीरे	ञ्छरीरे
३२४	३८४	युनिक्त	युनक्ति
३२८	३८६	स उ	खलु
३२८	१६	लोकान्तरान्	लोकान्तराणि
३२६	३६२	काया	कायः
३३२	२१	आशिष्षु	आशीष्षु
३३४	३६६	नेनीयते	नेनीय्यते
३३७	३	प्रार्थ्यमानस्य	प्रार्थयमानस्य
३३८	१७	मनीषा	मनीषया

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

३३६	८	सिद्धयै	सिद्धये
३३६	२६	मुनष्यै	मनुष्यै
३४०	४०३	भाशांश	भांशांश
३४०	२०	तन्त्र	तन्त्रं
३४२	१७	कृत्ः	कृत्
३४३	२५	वृहित	वृंहित
३४३	४०६	डून्, भानि	डूर्भानि
३४४	४०७	कालं	काले
३५२	१४	इयु	इत्यु
३५३	६	ज्वलया	ज्वालया
३५५	४२०	बर्हि	बर्ह
३५६	४२४	नामस्वरूप	; आकृतिनाम
३५७	१२	सोऽग्नि’	सोऽग्निः
३६२	७	प्रध्मयिता	प्रध्माता
३६२	२१	विलोडते	विलोडति
३६३	५	वक्ष	वृक्ष
३६७	४४०	नेति	नैति
३६७	४४०	चक्रं क्रमन्तं	चरिष्णु चक्रं
३७१	११	वायवानुजं	वासवानुजं
३७३	४४८	मिति गृणन्तो	कलं गृणन्तो
३६०	४७४	सर्वंऽ	सर्वं
३६२	१६	चलमिव	जलमिव
३६२	११	बीजान	बीजान्य
३६६	८	यके ना	यकेना
४००	४८६	अरविन्दाक्षः स वै विष्णुर्यो	विष्णुरेवारविन्दाक्षो यो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४०७	५०१	ऽतुलं तं संख्या न	न संख्याऽतुलमत्र
४०८	२३	सवषाच्च	सविषाच्च
४१०	५०५	ल्पे ह्वि	ल्पेऽह्वि
४१२	२२	लक्षकानां	लक्षकाणां
४१२	२७	दरिष्टं	तदरिष्टं
४१४	३	चेदिन्द्र	घेदिन्द्र
४२०	५२१	विष्णु	विष्णुः
४२१	८	शुभचाराय	शुभाचाराय
४२२	८	स्तनथु	स्तनित
४४८	२२	राष्ट्राध्यक्ष	राष्ट्राध्यक्षे
४६०	१५	स बीजः	तद् बीजं
४६०	१७	धर्मा बीजः	धर्मं बीजं
४६०	१८	रोढव्यो	रोढव्यं
४६०	१८	कुण्ठितो	कुण्ठितं
४६०	२०	शोणितौ	शोणिते
४६०	२१	समुदितौ	समुदिते
४६०	२१	गतिमन्तौ	गतिमती
४६१	५	तं बीजं	तद् बीजं
४६२	१६	यथा प्रकृति	यथाप्रकृति
४७२	५	दिवसः	दिंवः
४७२	५८६	भुङ्क्ते यथाकालकृतं	भुनक्ति पूर्वाचरितं
४७३	५६२	बुधा	बुधाः
४४७	२४	सम्वत्सरे	संवत्सरे
४८१	६००	विष्णोर्य	विष्णौ य
४८३	६	रस	रसं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

४८५	२१	बीज	बीजर्मव
४८७	२०	पिपीलकां, पिपीलका	पिपीलिकां, पिपीलिका
४८८	६०७	बीजो	बीजं
४८९	६०९	मितीते	मिमीते
४९१	२६	नैयन्यू	नैयू
४९२	६१२	याचन्ति	काङ्क्षन्ति
४९६	२३	सम्पन्नो बीजस्ता	सम्पन्नं बीजं ता
५०३	८	चक्राङ्गा	चक्राङ्गाणि
५१२	२५	कुर्वन्नेव	कुर्वदेव
५२३	६४८	कण्ठञ्यः	कण्ठ्यः
५३०	१०	द्वौ	द्वे
५४३	६८२	याचन्ति	काङ्क्षन्ति
५४८	९	समानार्थः	समानार्थम्
५४९	३	जो	जः
५५०	६	स्तस्थैव	स्तस्यैव
५५१	६६५	सः	तो
५५३	६६७	याचन्ति	वाञ्छन्ति
५६१	७११	इहास्ति	इहास्ति
५६२	७१४	ब्रु	ब्रु
		उत्तरार्द्धम्	
५७२	२४	भक्षित्वा	भक्षयित्वा
५८१	७३८	छन्नं	लीनं
५८२	७४३	द्रष्टा	शीलो
५८९	७५५	पुराणंम्/नभ्यं	पुराणं/दिव्यं
५८९	२७	चित्वा	चित्त्वा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

५६१	१७	रिक्ष्याणा	रिक्षीणा
५६३	७६१	रैर्निगृह्य	रैराबद्ध्य
५६४	३	ऋक	ऋक्
५६७	१८	अमित्रो	अमित्रं
५६७	१६	जिता अमित्रा	जितानि अमित्राणि
५६८	७७०	भञ्जमानो	भञ्जयन् स
५६८	७७३	ह्यमित्रान्	ऽरिवर्गम्
६०३	७८०	भ्रमतां	विभ्रमतां
६०५	२	श्रृ	शृ
६०८	७८७	ति र्वि	तिर्वि
६१०	१६	ज्ञयम्	ज्ञेयम्
६१८	७	प्रतिष्ठमानो	प्रस्थाप्यमानो
६२३	११	विराजं	विराड्
६२५	२८	पृथिवीं	पृथिवी
६२५	८	नक्तत्व	नक्तन्त्व
६३५	१	जगत्।	जगद्
६२५	१	गुणवन्तमात्म	गुणवदात्म
६२५	८	स्याम्	स्याम
६४२	८२६	सर्वेत	सर्वेऽत
६४२	१६	एकं पादं	एकः पादः
६४२	२४	विसंशनीयम्	विसंशयनीयम्
६४३	८३२	जन्तून	जन्तून्
६४४	८३३	साहश्च/प्रसृप्तः	साहञ्च/प्रसृप्तम्
६६२	८६१	हि विष्णुः स हि	स विष्णुः खलु
६७२	८७३	ईष्टे स ईशान इदं समस्तं	समस्तमीशान इदं स शास्ति

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६७४	१७	वृक्षभः	वृषभः
६७६	८८४	स्वोकांसि	स्वौकांसि
६८६	८६३	लकाधि	लकोऽधि
६६४	६०६	विरहन्	विहरन्
७२७	६५३	त्वेषश	सोऽयं
७३०	६	यैः	यै
७३०	६५८	देव देव	देवदेव
७३१	६५६	बीजान् कुरुते बहून्	सः बीजानि करोति विष्णुः
७४२	६७८	जरितृकोशे	हृदन्तरङ्गे
७४३	६७८	तन्निशम्य	ता निशम्य
७४४	६८०	वचांसि चोद्य	निशम्य वाचः
७४७	५	पूत्रे	पूत्रो
७४६	६८७	जवः स	जवोऽसौ
७५१	६६०	रेतोधो	रेतोधा
७५३	७	धश्च	धाश्च
७५८	६	प्राप्नुवानो	प्राप्नुवन्नो
७५६	११	प्राप्यं	प्राप्य
७६१	२४	प्रकाशयन्	प्रकाशयत्
७६२	१५	ब्रिभ्राणो	बिभ्राणो
७६६	५	कुककुटीमिव	कुक्कुटीव
७७७	१२	बलिष्ठं	बलीयांसं
७७६	२६	मन्या	मन्य
७८३	१७	शतं सेनाः=	शतं सेना
७८६	१२	यं	यद्
७८६	१०३५	द्वयोऽतः	द्वयोर्वै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

७८७	१७	करं/करं	करः/करश्च
७८८	१०३६	पु र्वा	पुर्वा
७९३	४	मांसो	मांसं
७९३	५	स्थानीयः	स्थानीयं
७९३	६	मांसो वर्तमान इव	मांसं वर्तमानमिव
७९३	टिप्पणी	तस्य	यस्य
७९५	१२	श्रेष्ठं ज्येष्ठञ्च	श्रेयांसं ज्यायांसञ्च
८०२	१०५५	तमान्विते	तमन्विते
८०४	१०५६	यः स्तत्र	यस्तत्र
८०४	२७	वार्किनो	वार्तिकेनो
८०५	२६	बीजो	बीजं
८०६	६	मानं=सम्मानम्	मानः=सम्मानः
८०६	२८	मानं=सम्मानम्	मानः=सम्मानः
८१०	१	चराणामद्	चराणां मद्
८२०	६	षीअज	ष्यज
८२०	२६	सन्धितं	संहित
८२१	१७	स्व	स्वः
८२२	७	क्षियन्तं	क्षियत्
८२३	५	महिषी	महिष
८२३	६	मेवं	मेव
८२३	६	एक	एकं
८२४	१०७८	खिल भेद	खिलभेद
८२८	१०८५	र्थत	र्थतः
८३६	१६	तन्वन्ना	तन्वदा
८४१	४	सर्वे	स वै

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

८४३	१५	पुर्निव	पुनर्वि
८४५	२०	विर्ण	वर्ण
८५०	१०	पुरा	पुरो
८५१	३	प्रचेता	प्रचेताः
८५१	४	स्तुवन्ति	ष्टुवन्ति
८५८	७	भ्रामयन्ति	भ्राम्यन्ति
८५८	११२४	विष्णु	विष्णुः
८६१	८	यो महा	यन्महा
८७१	११४२	वर्ष्म वि	वर्ष्मवि
८७३	११४५	तताः	ताः
८७६	११५३	उत्तरं चरणत्रयम	न्यग् रोहणादेष चिरप्रतिष्ठः। सन्दृश्यतेऽधः प्रसरन् सदाऽयं न्यग्रोधमाहुश्च रुधेः समानम् ।।
८८०	१६	फलोद्‌गते बोधक	फलोद्‌गतेर्बोधकं
८८५	७	त छ	तच्छ
८८६	३	दर्शयितुं	द्रष्टुं
८६६	२६	स्तनथुना	स्तनितेन
८६५	१	आणु	अणु
८६५	१६	स्तनथु	स्तनित
८६६	११७१	स्तनथुं	स्तनितं
८६८	१७	नृवन्त	नृवत्त
६०५	४	जायमनो	जायमानो
६१२	२३	तमो भवा	तमोभवा
६१५	१३	स्माम्	स्माकम्
६१६	११६८	विष्णु रविश्च	विष्णू रविश्च
६२१	५	सफला दृष्टचरा	सफला कर्त्रा कृतचरी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

६२२	१२०७	गणं निबद्धम्	गणो निबद्धः
६२८	२३	नमउक्ति	नम उक्तिं
६३८	२७	चरैव	चर्य़ेव
६४५	२५	संरण	सरण
६४६	७	कार्ये	कार्यै
६५३	११	धना	धान
६५६	३	यो न	यो नः
६५६	२०	घटि	घटी
६६०	२६	स्पस्टं	स्पष्टं
६७८	१०	यंम्भूः	यम्भूः
६८२	२	दिमः	दिमं
६८६	२७	त्यदि	त्यादि
६६६	१३१४	विष्णुर्व्याप्नोति स्वं पदम्	विष्णुः स्वं पदमश्नुते
१००२	१३१७	तारो तरते	तारस्तरते
१००५	२५	अर्य	अर्यम्
१०३३	१७	ओ नमः	ओं नम
१०३४	२४	रिव्रष्टाब्दः	खिष्टाब्दः
१०४७	२८	७१८ दीप्तमूर्त्तये	७१८ महामूर्त्तये
१०४६	८	६२८ सन्ताय	६२८ रक्षणाय
१०४६	६	६२६ रक्षणाय	६२६ सन्ताय
१०६४	२२	भावे भवति	भावे यद् भवति
१०८६	१३०६	पद्येषु	पूर्वसंशोधनानुसारम्
११००	१	एव	स एव
१३५२	११	सम्य	सत्य
आवरणम्	२२	मिख्यां	भिख्यां

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection